इषुभिः **with arrows** ⟨3.3⟩ m. *iṣu* – arrow

प्रतियोत्स्यामि **I will fight** ⟨*kalki* 3.1⟩ *prati.*√*yudh[a]* – to fight against, attack

पूजार्हौ **who are worshipable** ⟨2.2⟩ m. *pūjā-_arha*...पूजायाः अर्हः इति पूजार्हः – worthy of worship

पूजा – honor, worship, respect, veneration (to superiors or gods)

अरि-सूदन **O Kṛṣṇa!** ⟨8.1⟩ m. *ari-sūdana*...अरीणाम् सूदनः इति अरि-सूदनः – 'the slayer of enemies'

Subodhinī: भीष्म-द्रोणौ पूजायाम् अर्हौ (योग्यौ), तौ प्रति कथम् अहम् योत्स्यामि, तत्र अपि इषुभिः । यत्र वाचा अपि 'योत्स्यामि' इति वक्तुम् अनुचितम्, तत्र बाणैः कथम् योत्स्यामि ? इति अर्थः । हे अरि-सूदन (शत्रु-निर्दलन) ! ॥२.४॥

'तर्हि तव देह-यात्रा अपि न स्यात्' इति चेद्, तत्र आह – 'गुरून्' इति –

2.5

गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके ।
हत्वार्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान्रुधिरप्रदिग्धान् ॥५॥

महानुभावान् गुरून् अहत्वा हि	[after] not killing noble superiors
इह लोके भैक्ष्यम् अपि भोक्तुम् श्रेयः,	even to live on alms in this world is better,
अर्थ-कामान् गुरून् तु हत्वा	but [after] killing superiors, who desire worldy gain
इह एव	even in this life
रुधिर-प्रदिग्धान् भोगान् भुञ्जीय ।	I would enjoy luxuries which are blood-stained

"It would be better to live in this world by begging than to live at the cost of the lives of great souls who are my teachers. Even though desiring worldly gain, they are superiors. If they are killed, everything we enjoy will be tainted with blood."

गुरून् **superiors** ⟨2.3⟩ m. *guru* – heavy (opp. to *laghu*); great, large; difficult; important, respectable; any older relative; a spiritual master

(as in:) *guru-kula* – the family or house of a *guru*; *-pūjā* – the worship of one's spiritual master; (derived:) *garīyas* (*garīyaḥ*) – heavier, greater, more important

अहत्वा **[after] not killing** ⟨*avyaya*⟩ *a-hatvā*

हि **indeed** ⟨*avyaya*⟩

महानुभावान् **who are noble** ⟨2.3⟩ m. *mahā-_anubhāva*...महान् अनुभावः यस्य, सः महानुभावः – 'who has great experience'

अनुभाव – experience, authority, dignity

Bhīṣma is one of the twelve *mahājanas*: Brahmā, Nārada, Śiva, the four Kumāras, Kapila, Svāyambhuva Manu, Prahlāda, Janaka, Bhīṣma, Bali, Śukadeva and Yamarāja. (*SB.* 6.3.20) Some commentators therefore relate *artha-kāmān* not to *gurūn*, but to *bhogān*.

श्रेयः **better** ⟨1.1⟩ n. *śreyas* (*śreyaḥ*) – better, benefit

भोक्तुम् **to live on** *⟨avyaya⟩* (√*bhuj[a]*...पालन-अभ्यवहारयोः – to govern; enjoy; + *.tum[u]*) – to enjoy

भैक्ष्यम् **begging** ⟨1.1⟩ n. *bhaikṣya* (from *bhikṣā* – begging) – living on alms, begging, mendicancy
(similarly:) *bhikṣu* – beggar, mendicant; religious man, esp. a *sannyāsī*

अपि **also** *⟨avyaya⟩*

इह **here** *⟨avyaya⟩*

लोके **in the world** ⟨7.1⟩ m. *loka* – space, place, country, world; (pl.) the inhabitants of this world, people; worldly matters; sight; (as in:) *loka-nātha* – 'lord of the world'

हत्वा **[after] killing** *⟨avyaya⟩* √*han[a]*...हिंसा-गत्योः – to harm, kill; go; + *.[k]tvā*

अर्थ-कामान् **who desire wealth** ⟨2.3⟩ m. *artha-kāma*...अर्थम् कामयते इति अर्थ-कामः – 'who desires wealth'
काम – desire
Other words for 'desire': *icchā, kāñchā, spṛhā, īhā, vāñchā, lipsā, manoratha, abhilāṣa, tarṣa.*

तु **but** *⟨avyaya⟩*

गुरून् **superiors** ⟨2.3⟩ m. *guru* – a superior

इह एव **even here** *⟨avyaya⟩*

भुञ्जीय **I would enjoy** *(vidhi* 3.1) √*bhuj[a]*...पालन-अभ्यवहारयोः – to govern; enjoy

भोगान् **luxuries** ⟨2.3⟩ m. *bhoga* – enjoyment, luxury

रुधिर-प्रदिग्धान् **which are stained with blood** ⟨2.3⟩ m. *rudhira-pradigdha*...रुधिरेण प्रदिग्धः इति रुधिर-प्रदिग्धः – stained with blood
प्रदिग्ध (*pra.*√*dih[a]* – to smear; + *.[k]ta*) – smeared

Subodhinī: गुरून् (द्रोणादीन्) अ-हत्वा, पर-लोक-विरुद्धः गुरु-वधः तम् अ-कृत्वा, इह लोके भिक्षा-अन्नम् अपि भोक्तुम् श्रेयः (उचितम्)। विपक्षे तु न केवलम् परत्र दुःखम्, इहैव तु नरक-दुःखम् अनुभवेयम् इति आह – 'हत्वा' इति। गुरून् हत्वा, इहैव तु रुधिरेण प्रदिग्धान् (प्रकर्षेण लिप्तान्) अर्थ-कामात्मकान् भोगान् अहम् भुञ्जीय (अश्नीयाम्)। यद्वा, 'अर्थ-कामान्' इति 'गुरूणाम्' विशेषणम्। अर्थ-तृष्णा-आकुलत्वात् एते तावत् युद्धात् न निवर्तेरन्, तस्मात् एतद् वधः प्रसज्येत एव इति अर्थः। तथाच युधिष्ठिरम् प्रति भीष्मेण उक्तम् –

अर्थस्य पुरुषः दासः, दासः तु अर्थः न कस्यचित्।
इति सत्यम् महाराज, बद्धः अस्मि अर्थेन कौरवैः॥

(*MB.* 43.41) इति ॥२.५॥

किंच, 'यद्यपि अ-धर्मम् अङ्गीकरिष्यामः, तथापि किम् अस्माकम् जयः पराजयः वा भवेत् इति न ज्ञायतः' इति आह – 'न च' इति –

Note: The *sandhi* between *n* and *ś* (*sūtra* 68) is not very much liked. See also verse 5.8.

2.6

न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः।
यानेव हत्वा न जिजीविषामस्ते ऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥६॥

नः (अस्माकम्) कतरत् गरीयः	which of the two is better for us
एतद् च न विद्मः,	this also we do not know,
यद् वा जयेम	whether we should conquer
यदि वा नः (अस्मान्) जयेयुः,	or whether they should conquer us,
यान् एव हत्वा न जिजीविषामः	[after] killing which we do not want to live
ते धार्तराष्ट्राः प्रमुखे अवस्थिताः।	those very sons of Dhṛtarāṣṭra are arrayed before us

"Nor do we know which is better – conquering them or being conquered by them. If we killed the sons of Dhṛtarāṣṭra, we should not care to live. Yet they are now standing before us on the battlefield."

न **not** *⟨avyaya⟩*

च **and** *⟨avyaya⟩*

एतद् **this** ⟨2.1⟩ n. *kṛṣṇanāma etad* – (first person) he, this

विद्मः **we know** ⟨*acyuta* 1.3⟩ √*vid[a]* 2P...ज्ञाने – to know
(derived:) *vidvas[u]* (*vidvān*) – who knows, who is learned, a wise man; *vidyā* – knowledge, learning, science, philosophy; *veda* – knowledge; the three *Vedas*, namely *Ṛg-*, *Yajur-*, *Sāma-Veda* (and the fourth *Atharva-Veda*)

कतरत् **which of the two** ⟨1.1⟩ n. *kṛṣṇanāma katarat*

नः **for us** ⟨opt. for *asmākam* 6.3⟩ *kṛṣṇanāma asmad* – (last person) I

गरीयः **better** ⟨1.1⟩ n. *garīyas* (*garīyaḥ*; from *guru* – great) – greater

यद् वा **whether** *⟨avyaya⟩*

जयेम **we should conquer** ⟨*vidhi* 3.3⟩ √*ji*...जये – to conquer

यदि वा **whether** *⟨avyaya⟩*

नः **us** ⟨opt. for *asmān* 2.3⟩ *kṛṣṇanāma asmad* – (last person) I

जयेयुः **they should conquer** ⟨*vidhi* 1.3⟩ √*ji*...जये – to conquer

यान् **those whom** ⟨2.3⟩ m. *kṛṣṇanāma yad* – (relative) who, which

एव **certainly** *⟨avyaya⟩*

हत्वा **[after] killing** *⟨avyaya⟩* √*han[a]*...हिंसा-गत्योः – to harm, kill; go; + *.[k]tvā*

न **not** *⟨avyaya⟩*

जिजीविषामः **we desire to live** ⟨*acyuta* 3.3⟩ √*jīv[a]*...प्राणधारणे – to live; + *.sa[n]* – to desire to live

ते **they** ⟨1.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

अवस्थिताः **they are arrayed** ⟨1.3⟩ m. *avasthita* (*ava.*√*sthā* – to stay; + *.[k]ta*) – arrayed

प्रमुखे **in front** ⟨7.1⟩ n. *pramukha* – facing, foremost

धार्तराष्ट्राः **the sons of Dhṛtarāṣṭra** ⟨1.3⟩ m. *dhārtarāṣṭra* – son of Dhṛtarāṣṭra

Subodhinī: एतद् द्वयोः मध्ये नः (अस्माकम्) कतरत् (किम् नाम) गरीयः (अधिकतरम् भवति) इति न विद्मः । तद् एव द्वयम् दर्शयति – यद्वा एतान् वयम् जयेम (जेष्यामः), यदि वा नः (अस्मान्) एते जयेयुः (जेष्यन्ति) इति । किंच, अस्माकम् जयः अपि फलतः परा-जयः एव इति आह – यान् एव हत्वा जीवितुम् न इच्छामः, ते एव (एते) सम्मुखे अवस्थिताः ॥२.६॥ तस्मात् – 'कार्पण्य' इति –

2.7

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसम्मूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥७॥

कार्पण्य-दोषोपहत-स्वभावः	overcome by miserly weakness
धर्म-सम्मूढ-चेताः	and confused about my duty
त्वाम् पृच्छामि,	I am asking You,
यद् मे (मम) निश्चितम् श्रेयः स्यात्	that which will be my definite best
तद् ब्रूहि !	that [alone] tell!
अहम् ते (तव) शिष्यः,	I am Your disciple,
त्वाम् प्रपन्नम् माम् शाधि !	instruct me, who am surrendered to You!

"Now I am confused about my duty and have lost all composure because of miserly weakness. In this condition I am asking You to tell me for certain what is best for me. Now I am Your disciple, and a soul surrendered unto You. Please instruct me."

कार्पण्य-दोषोपहत-स्वभावः **whose nature is overcome by miserly weakness** ⟨1.1⟩ m. *kārpaṇya-doṣa-_upahata-sva-bhāva*...कार्पण्यस्य दोषेण उपहतः स्वभावः यस्य, सः कार्पण्य-दोषोपहत-स्वभावः
कार्पण्य (from *kṛpaṇa* – miser) – miserliness, weakness
स्व-भाव – 'own nature', disposition

पृच्छामि **I ask** ⟨*acyuta* 3.1⟩ √*pracch[a]*...ज्ञीप्सायाम् – to ask

त्वाम् **you** ⟨2.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

धर्म-सम्मूढ-चेताः **whose mind is bewildered with regard to his duty** ⟨1.1⟩ m. *dharma-sammūḍha-cetas (-cetaḥ)*...धर्मे सम्मूढम् चेतः यस्य, सः धर्म-सम्मूढ-चेताः
सम्मूढ (*sam.*√*muh[a]* – to be bewildered; + *.[k]ta*) – bewildered, deluded, confused; foolish; a fool; *sammūḍha-cetas (-cetaḥ)* – 'whose mind is bewildered'

यद् **that which** ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which

श्रेयः **better** ⟨1.1⟩ n. *śreyas (śreyaḥ)* – better, benefit

स्यात् **it would be** ⟨*vidhi* 1.1⟩ √*as[a]*...भुवि – to be, exist

निश्चितम् **definite** ⟨1.1⟩ n. *niścita* (*nir.*√*ci[ñ]* – to ascertain; + *.[k]ta*) – ascertained
(also from *nir.*√*ci[ñ]*:) *niścaya* ascertainment, fixed opinion, conviction, certainty; resolve, purpose

ब्रूहि **you must speak** ⟨*vidhātā* 2.1⟩ √*brū[ñ]*...व्यक्तायां वाचि – to speak

तद् **that** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that

मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I

शिष्यः **disciple** ⟨1.1⟩ m. *śiṣya*

ते **your** ⟨opt. for *tava* 6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

शाधि **you must instruct** ⟨*vidhātā* 2.1⟩ √*śās[u]*...अनुशिष्टौ – to instruct

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

त्वाम् **to you** ⟨2.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

प्रपन्नम् **surrendered** ⟨2.1⟩ m. *prapanna* (*pra.*√*pad[a]* – to surrender; + *.[k]ta*)

Subodhinī: कार्पण्य-दोष-उपहत-स्वभावः 'एतान् हत्वा कथम् जीविष्यामः' (2.6) इति कार्पण्यम्, दोषः च स्वकुल-क्षय-कृतः, ताभ्याम् उपहतः (अभिभूतः) स्व-भावः, शौर्यादि-लक्षणः यस्य सः, अहम् त्वाम् पृच्छामि । तथा धर्मे सम्मूढम् चेतः यस्य सः – युद्धम् त्यक्त्वा भिक्षा-अटनम् अपि क्षत्रियस्य धर्मः वा अ-धर्मः वा ? इति सन्दिग्ध-चित्तः सन् इति अर्थः । अतः मे यद् निश्चितम् श्रेयः (युक्तम्) स्यात्, तद् ब्रूहि । किंच, ते अहम् शिष्यः (शासन-अर्हः) । अतः त्वाम् प्रपन्नम् (शरण-आगतम्) माम् शाधि (शिक्षय) ॥२.७॥ 'त्वम् एव विचार्य यद् युक्तम्, तद् कुरु !' इति चेद्, तत्र आह – 'न हि' इति –

2.8

न हि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रियाणाम् ।
अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम् ॥८॥

भूमौ अ-सपत्नम् ऋद्धम् राज्यम्	an unrivaled prosperous kingdom on earth
अवाप्य	[after] obtaining
सुराणाम् आधिपत्यम् च अपि	and even the supremacy of the demigods
मम इन्द्रियाणाम् उच्छोषणम् शोकम्	the grief drying up my senses
यद् अपनुद्यात्	that which can remove
न हि प्रपश्यामि ।	I do not foresee

"I can find no means to drive away this grief which is drying up my senses. I will not be able to dispel it even if I win a prosperous, unrivaled kingdom on earth with sovereignty like the demigods in heaven."

न हि	**not at all** ⟨*avyaya*⟩
प्रपश्यामि	**I find** ⟨*acyuta* 3.1⟩ *pra.√dṛś[ir]* – to see clearly, understand
मम	**my** ⟨6.1⟩ *kṛṣṇanāma asmad* – (last person) I
अपनुद्यात्	**it would remove** ⟨*vidhi* 1.1⟩ *apa.√nud[a]* – to remove
यद्	**that which** ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
शोकम्	**the grief** ⟨2.1⟩ m. *śoka* – sorrow, grief
उच्छोषणम्	**which is drying up** ⟨2.1⟩ n. *ucchoṣaṇa* (from *ud.√śuṣ[a]* – to dry up)
इन्द्रियाणाम्	**of the senses** ⟨6.3⟩ n. *indriya* – power, force; faculty of sense, sense organ
	indriya is related to *indra* (king), which is derived from *√id[i]*...परमैश्वर्ये – to lord; (as in:) *jñānendriya* (*jñāna-indriya*) – 'sense of knowledge (perception)'; there are five, namely ears, skin, eyes, tongue and nose, for the five *indriyārthas* (*indriya-arthas*, sense objects), namely the *tan-mātras* (subtle elements) *śabda* (sound), *sparśa* (touch), *rūpa* (form), *rasa* (taste) and *gandha* (smell); *karmendriya* (*karma-indriya*) – 'sense of work (activity)'; there are also five, namely larynx (speech), hands, feet, genital and anus; above the ten senses is the mind as 'inner sense'
अवाप्य	**[after] obtaining** ⟨*avyaya*⟩ *ava.√āp[l̥]* – to obtain; + *.ya[p]*
भूमौ	**on earth** ⟨7.1⟩ f. *bhūmi* – the earth
अ-सपत्नम्	**unrivaled** ⟨2.1⟩ n. *a-sapatna*
	स-पत्न (from *sa-patnī* – co-wife) – rival, enemy
ऋद्धम्	**prosperous** ⟨2.1⟩ n. *ṛddha* (*ṛdh[u]*...वृद्धौ – to grow, prosper; + *.[k]ta*) – grown
राज्यम्	**kingdom** ⟨2.1⟩ n. *rājya*
सुराणाम्	**of the gods** ⟨6.3⟩ m. *sura* – a god
अपि	**also** ⟨*avyaya*⟩
च	**and** ⟨*avyaya*⟩
आधिपत्यम्	**supremacy** ⟨2.1⟩ n. *ādhipatya*

Subodhinī: इन्द्रियाणाम् उच्छोषणम् (अतिशोषण-करम्) मदीयम् शोकम् यद् कर्म अपनुद्यात् (अपनयेत्), तद् [कर्म] अहम् न प्रपश्यामि। यद्यपि भूमौ निष्कण्टकम् समृद्धम् राज्यम् प्राप्स्यामि, तथा सुर-इन्द्रत्वम् अपि यदि प्राप्स्यामि, एवम् अभीष्टम् तद् सर्वम् अवाप्य अपि, शोक-अपनोदन-उपायम् न प्रपश्यामि इति अन्वयः ॥२.८॥

एवम् उक्त्वा अर्जुनः किम् कृतवान् ? इति अपेक्षायाम् – 'एवम्' इति –

2.9

सञ्जय उवाच

एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तपः ।
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह ॥९॥

सञ्जयः उवाच -	Sañjaya said:

हृषीकेशम् एवम् उक्त्वा	[after] thus speaking to Śrī Kṛṣṇa
न योत्स्ये	'I shall not fight'
इति गोविन्दम् उक्त्वा	[after] thus speaking
गुडाकेशः परन्तपः तूष्णीम् बभूव ह ।	Arjuna became silent

"Sañjaya said: Having spoken thus, Arjuna, chastiser of enemies, told Kṛṣṇa, 'Govinda, I shall not fight', and fell silent."

सञ्जयः	**Sañjaya** ⟨1.1⟩ m. *sam._jaya* – 'conquest'
उवाच	**he spoke** ⟨*adhokṣaja* 1.1⟩ *√vac[a]*...परिभाषणे – to speak
एवम्	**thus** ⟨*avyaya*⟩
उक्त्वा	**[after] speaking** ⟨*avyaya*⟩ *√vac[a]*...परिभाषणे – to speak; + *.[k]tvā*
हृषीकेशम्	**to Śrī Kṛṣṇa** ⟨2.1⟩ m. *hṛṣīka-_īśa* – 'lord of the senses', the supreme guide, Paramātmā
गुडाकेशः	**Arjuna** ⟨1.1⟩ m. *guḍākā-_īśa* – 'lord/conquerer of sleep/ignorance'
परन्तपः	**Arjuna** ⟨1.1⟩ m. *param-_tapa* – 'who scorches the enemies'
न	**not** ⟨*avyaya*⟩
योत्स्ये	**I will fight** ⟨*kalki* 3.1⟩ *√yudh[a]*...सम्प्रहारे – to fight
इति	**thus** ⟨*avyaya*⟩
गोविन्दम्	**to Śrī Kṛṣṇa** ⟨2.1⟩ m. *govinda* – 'who gives pleasure to and protects the earth, cows and senses'
उक्त्वा	**[after] speaking** ⟨*avyaya*⟩ *√vac[a]*...परिभाषणे – to speak; + *.[k]tvā*
तूष्णीम्	**silent** ⟨*avyaya*⟩
बभूव	**he became** ⟨*adhokṣaja* 1.1⟩ *√bhū*...सत्तायाम् – to be, exist, become
ह	**indeed** ⟨*avyaya*⟩

Subodhinī: स्पष्ट-अर्थः ॥२.९॥

ततः किम् वृत्तम् ? इति अपेक्षायाम् आह – 'तम् उवाच' इति –

2.10

तमुवाच हृषीकेशः प्रहसन्निव भारत ।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥१०॥

हे भारत	O Dhṛtarāṣṭra!
उभयोः सेनयोः मध्ये	between both armies
विषीदन्तम् तम्	to that grieving one (Arjuna)
हृषीकेशः प्रहसन् इव	Śrī Kṛṣṇa, as if smiling,
इदम् वचः उवाच ।	spoke the following words

"O descendant of Bharata, at that time Kṛṣṇa, smiling, in the midst of both the armies, spoke the following words to the grief-stricken Arjuna."

तम् **to him** ⟨2.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak

हृषीकेशः **Śrī Kṛṣṇa** ⟨1.1⟩ m. *hṛṣīka-_īśa* – 'lord of the senses', the supreme guide, Paramātmā

प्रहसन् **[while] smiling** ⟨1.1⟩ m. *prahasat* (from *pra.*√*has[e]* – to smile; + *.[ś]at[r]*)

इव **like** ⟨*avyaya*⟩
prahasan iva – as if smiling

भारत **O Dhṛtarāṣṭra!** ⟨8.1⟩ m. *bhārata* – 'descendant of Bharata'

सेनयोः **of the two armies** ⟨6.2⟩ f. *senā* – army

उभयोः **of both** ⟨6.2⟩ f. *kṛṣṇanāma ubhā* (*.ā[p]*) – both

मध्ये **in the middle** ⟨7.1⟩ n. *madhya* – middle

विषीदन्तम् **to the grieving one** ⟨2.1⟩ m. *viṣīdat* (*vi.*√*sad[l]* – to grieve; + *.[ś]at[r]*) – [while] grieving

इदम् **this** ⟨2.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this

वचः **speech** ⟨2.1⟩ n. *vacas* (*vacaḥ*)

Subodhinī: प्रहसन् इव, प्रसन्न-मुखः सन् इति अर्थः ॥२.१०॥
'देह-आत्मनोः अविवेक-आदस्य एवम् शोकः भवति' इति तद् विवेक-प्रदर्शनार्थम् [श्रीकृष्णः] आह – 'अ-शोच्यान्' इति –

2.11

श्रीभगवानुवाच
अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥११॥

श्री-भगवान् उवाच	Śrī Kṛṣṇa said:
त्वम् अ-शोच्यान् अन्वशोचः	you lamented for those not be lamented for
प्रज्ञा-वादान् च भाषसे,	and [yet] you speak learned words,
गतासून् अ-गतासून् च	for the dead and for the living
पण्डिताः न अनुशोचन्ति ।	the learned do not lament

"The Supreme Personality of Godhead said: While speaking learned words, you are mourning for what is not worthy of grief. Those who are wise lament neither for the living nor for the dead."

श्री-भगवान् **Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'

उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak

अ-शोच्यान् **who should not be lamented for** ⟨2.3⟩ m. *a-śocya* – not to be lamented

अन्वशोचः **you lamented** ⟨*bhūteśvara* 2.1⟩ *anu.*√*śuc[a]* – to lament

त्वम् **you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

प्रज्ञा-वादान् **words of wisdom** ⟨2.3⟩ m. *prajñā-vāda*...प्रज्ञायाः वादः इति प्रज्ञा-वादः – word of wisdom
प्रज्ञा – wisdom

च **and** ⟨*avyaya*⟩

भाषसे **you speak** ⟨*acyuta* 2.1⟩ √*bhāṣ[a]*...व्यक्तायां वाचि – to speak

गतासून् **those who are dead** ⟨2.3⟩ m. *gata-_asu*...गतः असुः यस्य, सः गतासुः – 'whose life is gone', a dead person

अ-गतासून् **those who are living** ⟨2.3⟩ m. *a-gata-_asu*...न गतः असुः यस्य, सः अ-गतासुः – 'whose life is not gone', a living person
असु – breath, life
The word *gatāsu* ('life gone') refers either to a person who lost his life, or to the dead body, from which the life has departed; *a-gatāsu* ('life not gone') may refer to a person who is still alive, surviving the battle, or the soul, which is always alive. Therefore, *gatāsūn a-gatāsūn ca* can be understood as: (1) those relatives who die and those who survive the battle; (2) bodies, which are simultaneaously dead and alive; or (3) bodies and souls, which are respectively always dead and always alive.

च **and** ⟨*avyaya*⟩

न **not** ⟨*avyaya*⟩

अनुशोचन्ति **they lament** ⟨*acyuta* 1.3⟩ *anu.*√*śuc[a]* – to lament

पण्डिताः **the learned** ⟨1.3⟩ m. *paṇḍita* – a learned, wise man; a scholar, teacher, philosopher

Subodhinī: शोकस्य अ-विषय-भूतान् एव बन्धून् त्वम् अन्वशोचः (अनुशोचितवान् असि), 'दृष्ट्वा इमम् स्व-जनम् कृष्ण युयुत्सुम् समुपस्थितम्' (1.28) इत्यादिना । तत्र 'कुतः त्वा कश्मलम् इदम् विषमे समुपस्थितम्' (2.2) इत्यादिना मया बोधितः अपि, पुनः च प्रज्ञावताम् पण्डितानाम् वादान् (शब्दान्) – 'कथम् भीष्मम् अहम् सङ्ख्ये' (2.4) इत्यादीन् केवलम् भाषसे ननु पण्डितः असि । यतः [पण्डिताः] गत-आसून् (गत-प्राणान्) बन्धून्, अगत-आसून् च (जीवितः अपि – 'बन्धु-हीनाः एते कथम् जीविष्यन्ति ?' इति – न अनुशोचन्ति ॥२.११॥
अ-शोच्यत्वे हेतुम् आह – 'न तु' एव इति –

2.12

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतः परम् ॥१२॥

अहम् तु जातु न एव न आसम्,	I never did not exist at any time,
न त्वम्, न इमे जनाधिपाः,	nor you, nor these kings,
अतः परम् च	and hereafter

सर्वे वयम् न एव न भविष्यामः ।	we all will not not exist

"Never was there a time when I did not exist, nor you, nor all these kings, nor in the future shall any of us cease to be."

न तु एव **but certainly not** ⟨*avyaya*⟩

अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

जातु **ever** ⟨*avyaya*⟩ – at all, ever, some day, once, once upon a time; possibly, perhaps; verily

न **not** ⟨*avyaya*⟩

आसम् **I existed** ⟨*bhūteśvara* 3.1⟩ √*as[a]*...भुवि – to be, exist

न **not** ⟨*avyaya*⟩

त्वम् **you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

न **not** ⟨*avyaya*⟩

इमे **these** ⟨1.3⟩ m. *kṛṣṇanāma idam* – (first person) he, this

जनाधिपाः **kings** ⟨1.3⟩ m. *jana-_adhipa*...जनानाम् अधिपः इति जनाधिपः – 'ruler of men', king

न **not** ⟨*avyaya*⟩

च **and** ⟨*avyaya*⟩

एव **certainly** ⟨*avyaya*⟩

न **not** ⟨*avyaya*⟩

भविष्यामः **we will exist** ⟨*kalki* 3.3⟩ √*bhū*...सत्तायाम् – to be, exist, become

सर्वे **all** ⟨1.3⟩ m. *kṛṣṇanāma sarva*

वयम् **we** ⟨1.3⟩ *kṛṣṇanāma asmad* – (last person) I

अतः **from now** ⟨*avyaya*⟩ (*atas*; from *idam* + *.tas[i]*) – 'from this', (time:) from now; (cause:) therefore

परम् **beyond** ⟨*avyaya*⟩

Subodhinī: यथा 'अहम् परमेश्वरः जातु (कदाचित्) लीला-विग्रहस्य-आविर्भावे तिरोभावे अपि न आसम्' इति न एव, अपितु आसम् एव अनादित्वात् । नच 'त्वम् न आसीः (न अभूः)ङ, अपितु आसीः एव । 'इमे च जन-अधिपाः (नृपाः) न आसन्' इति न, अपितु आसन् एव, मद्-अंशत्वात् । तथा 'अतः परम् (इतः उपरि) अपि न भविष्यामः (न स्थास्यामः)' इति च नैव, अपितु स्थास्यामः । एवम् जन्म-मरण-शून्यत्वात् अ-शोच्यत्वम् इति अर्थः ॥२.१२॥

'ननु ईश्वरस्य तव जन्मादि-शून्यत्वम् सत्यम् एव, जीवानाम् तु जन्म-मरणे प्रसिद्धे', तत्र आह – 'देहिनः' इति –

2.13

देहिनो ऽस्मिन्यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥१३॥

यथा अस्मिन् देहे	as in this (present) body
देहिनः	for the embodied soul
कौमारम् यौवनम् जरा	there are childhood, youth and old age
तथा देहान्तर-प्राप्तिः	similarly there is the acquisition of another body,
तत्र धीरः न मुह्यति ।	by this a wise man is not bewildered

"As the embodied soul continuously passes, in this body, from boyhood to youth to old age, the soul similarly passes into another body at death. A sober person is not bewildered by such a change."

देहिनः **of the embodied soul** ⟨6.1⟩ m. *dehin* (*dehī*) – 'who has a body', a living creature, man; the soul
Other words for 'embodied soul': *śarīrī, prāṇī, jantu.*

अस्मिन् **in this** ⟨7.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this

यथा **as** ⟨*avyaya*⟩

देहे **in the body** ⟨7.1⟩ m. *deha* – body; form, shape; appearance, manifestation
(as in:) *dehāntara* (*deha-_antara*) – another body; reincarnation

कौमारम् **childhood** ⟨1.1⟩ n. *kaumāra* (from *kumāra* – child, boy)
Specifically, a *kumāra* up to five years is called *bāla* (as in *bāla-kṛṣṇa* – Kṛṣṇa as a boy) or *śiśu*, from five to ten *pogaṇḍa*, and from ten to sixteen *kiśora.* Then youth (*yauvana*) starts, until one attains manhood at the age of twenty-six.

यौवनम् **youth** ⟨1.1⟩ n. *yauvana* (from *yuvan* (*yuvā*) – young, a youth)

जरा **old age** ⟨1.1⟩ f. *jarā*

तथा **so** ⟨*avyaya*⟩

देहान्तर-प्राप्तिः **reincarnation** ⟨1.1⟩ f. *deha-_antara-prāpti*...देहान्तरस्य प्राप्तिः इति देहान्तर-प्राप्तिः – 'the obtainment of another body'

धीरः **a wise man** ⟨1.1⟩ m. *dhīra* (from *dhī* – wisdom) – who is wise, sober

तत्र **there** ⟨*avyaya*⟩

न **not** ⟨*avyaya*⟩

मुह्यति **he is bewildered** ⟨*acyuta* 1.1⟩ √*muh[a]*...वैचित्ये – to be bewildered
(also from √*muh[a]*...वैचित्ये): *moha, mohana* – bewilderment, delusion, confusion; darkness, ignorance; *mohinī* – a fascinating woman; (+ *.[k]ta:*) *mūḍha* – bewildered, deluded, confused; foolish; a fool

Subodhinī: देहिनः (देह-अभिमानिनः) जीवस्य यथा अस्मिन् स्थूल-देहे कौमारादि-अवस्थाः देह-निबन्धनाः एव, नतु स्वतः, पूर्व-अवस्था-नाशे अवस्था-अन्तर-उत्पत्तौ अपि 'सः एव अहम्' इति प्रत्यभिज्ञानात्, तथैव एतद् देह-नाशे देह-अन्तर-प्राप्तिः अपि, लिङ्ग-देह-निबन्धना । नतु तावत् आत्मनः नाशः, जात-मात्रस्य पूर्व-संस्कारेण स्तन्य-पानादौ प्रवृत्ति-दर्शनात् । अतः धीरः (धीमान्) तत्र (तयोः देह-नाश-उत्पत्त्योः) न मुह्यति, 'आत्मा एव मृतः जातः च' इति न मन्यते ॥२.१३॥

ननु 'गत-आसून् अगत-आसून् च अहम् न शोचामि, किन्तु तद्-वियोगादि-दुःख-भाजम् माम् एव' इति चेद्, तत्र आह – 'मात्रा-स्पर्शाः' इति –

2.14

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥१४॥

हे कौन्तेय !	O Arjuna!
मात्रा-स्पर्शाः तु	but the contacts of the senses [with objects]
शीतोष्ण-सुख-दुःख-दाः	giving rise to cold and heat, happiness and distress
आगमापायिनः अ-नित्याः,	are coming and going and are impermanent,
हे भारत !	[therefore] O Arjuna!
तान् तितिक्षस्व !	you must tolerate them!

"O son of Kuntī, the nonpermanent appearance of happiness and distress, and their disappearance in due course, are like the appearance and disappearance of winter and summer seasons. They arise from sense perception, O scion of Bharata, and one must learn to tolerate them without being disturbed."

मात्रा-स्पर्शाः **contacts of the senses** ⟨1.3⟩ m. *mātrā-sparśa*...मात्रायाः स्पर्शः इति मात्रा-स्पर्शः – 'touch of the senses'
 मात्रा – quantitiy, size, measure of any kind; sense faculty; an element, matter, the material world; materials, goods

तु **but** ⟨*avyaya*⟩

कौन्तेय **O Arjuna!** ⟨8.1⟩ m. *kaunteya* – 'son of Kuntī'

शीतोष्ण-सुख-दुःख-दाः **which create dualities** ⟨1.3⟩ m. *śīta-_uṣṇa-sukha-duḥkha-da*...यः शीतम् उष्णम् च सुखम् दुःखम् च ददाति, सः शीतोष्ण-सुख-दुःख-दः – which gives [feelings of] cold and heat, happiness and distress'
 शीत – cold, cold weather; apathetic
 उष्ण – warm, hot, the hot season; passionate; pungent, sharp
 Śīta-uṣṇa and *sukha-duḥkha* are examples for all dualities due to the material body.

आगमापायिनः **which are coming and going** ⟨1.3⟩ m. *āgama-apāyin (-apāyī)*...आगमः अपायः च यस्य, सः आगमापायी – 'which has a coming and going', transient

अ-नित्याः **which are impermanent** ⟨1.3⟩ m. *a-nitya* – impermanent
 नित्य – permanent, continual, eternal; usual, fixed, obligatory (as opp. to *kāmya* – 'to one's liking', optional; and *naimittika* – occasional)

तान् **them** ⟨2.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

तितिक्षस्व **you must tolerate** ⟨*vidhātā* 2.1⟩ √*tij[a]*...निशाने क्षमायं च – to sharpen; tolerate

भारत **O Arjuna!** ⟨8.1⟩ m. *bhārata* – 'descendant of Bharata'

Subodhinī: मीयन्ते (ज्ञायन्ते) विषयाः आभिः इति 'मात्राः' (इन्द्रिय-वृत्तयः), तासाम् स्पर्शाः (विषयैः सम्बन्धाः) ते शीत-उष्णादि-प्रदाः भवन्ति । ते तु आगम-अपायित्वात् अ-नित्याः (अ-स्थिराः), अतः तान् तितिक्षस्व (सहस्व) । यथा जल-आतप-आदि-सम्पर्काः तद्-तद्-काल-कृताः स्व-भावतः शीत-उष्णादि प्रयच्छन्ति, एवम् इष्ट-संयोग-वियोगाः अपि सुख-दुःखादि प्रयच्छन्ति । तेषाम् च अ-स्थिरत्वात् सहनम् तव धीरस्य उचितम्, नतु तद्-निमित्त-हर्ष-विषाद-पारवश्यम् इति अर्थः ॥२.१४॥
तद्-प्रतीकार-प्रयत्नात् अपि तद्-सहनम् एव उचितम्, महा-फलत्वात् इति आह – 'यम्' इति –

2.15

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥१५॥

हे पुरुषर्षभ !	O Arjuna!
यम् सम-दुःख-सुखम् धीरम् पुरुषम्	that wise man whom, being equal in distress and happiness,
एते न हि व्यथयन्ति	these [dualities] do not perturb
सः अमृतत्वाय कल्पते ।	he is eligible for liberation

"O best among men (Arjuna), the person who is not disturbed by happiness and distress and is steady in both is certainly eligible for liberation."

यम् **whom** ⟨2.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

हि **indeed** ⟨*avyaya*⟩

न **not** ⟨*avyaya*⟩

व्यथयन्ति **they perturb** ⟨*acyuta* caus. 1.3⟩ √*vyath[a]*...भय-चलनयोः – to fear; be perturbed

एते **these** ⟨1.3⟩ m. *kṛṣṇanāma etad* – (first person) he, this

पुरुषम् **a person** ⟨2.1⟩ m. *puruṣa* – man, male, human being, person; soul, Supersoul
 (as in:) *puruṣatva* – manhood, manliness; *puruṣārtha (puruṣa-_artha)* – goal of human life; there are five, namely *dharma* (religious duty), *artha* (wealth), *kāma* (sense gratification), *mokṣa* (liberation) and *prema* (love of God); *puruṣottama (puruṣa-_uttama)* – the Supreme Lord, name of Viṣṇu or Kṛṣṇa
 Other words for 'male': *puruṣa, pūruṣa, pumān.*
 Other words for man: *manuṣya, mānuṣa, manuja, mānava.*

पुरुषर्षभ **O Arjuna!** ⟨8.1⟩ m. *puruṣa-_rṣabha*...पुरुषाणाम् ऋषभः इति पुरुषर्षभः – 'best of men'
 ऋषभ – bull; the best of any kind

सम-दुःख-सुखम् **who is equal in distress and happiness** ⟨2.1⟩ m. *sama-duḥkha-sukha*...समम् दुःखम् सुखम् च यस्य, सः सम-दुःख-सुखः – 'whose happiness and distress are the same'

सम – even, flat; same, equal, similar; unchanged, impartial; regular, normal; neutral, indifferent; ordinary, common; good, straight; (as in:) *sama-citta* – even-minded, indifference; *sama-darśin (-darśī)* – who has equal vision

धीरम् **a wise** ⟨2.1⟩ m. *dhīra* – who is wise, sober

सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

अमृतत्वाय **for liberation** ⟨4.1⟩ n. *amṛtatva* (from *a-mṛta* – immortal; + *.tva*) – immortality, liberation

मृत (√*mṛ[ṅ]*...प्राणत्यागे – to die; + *.[k]ta*) – dead; *a-mṛta* – 'not dead', immortal; the nectar (conferring immortality), ambrosia; anything sweet; (also from √*mṛ[n]*...प्राणत्यागे – to die): *mṛtyu* – death; *martya* – 'having to die', mortal; as in *martya-loka* – 'the world of mortals', this earth

कल्पते **he is eligible** ⟨*acyuta* 1.1⟩ √*kṛp[ū]*...सामर्थ्ये – to be able

Subodhinī: एते मात्रा-स्पर्शाः यम् पुरुषम् न व्यथयन्ति (न अभिभवन्ति), समे सुख-दुःखे यस्य तम् । सः तैः अ-विक्षिप्यमाणः, धर्म-ज्ञान-द्वारा अ-मृतत्वाय (मोक्षाय) कल्पते (योग्यः भवति) ॥२.१५॥

ननु 'तथापि शीत-उष्णादिकम् अतिदुःसहम् कथम् सोढव्यम् ? अत्यन्तम् तद्-सहने च कदाचित् आत्म-नाशस्य अपि सम्भवात्' इति आशङ्क्य, 'तत्त्व-विचारतः सर्वम् सोढुम् शक्यम्' इति आशयेन, आह – 'न अ-सतः' इति –

2.16

नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टो ऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥१६॥

अ-सतः भावः न विद्यते,	there is no existence of the unreal [body],
सतः अ-भावः न विद्यते,	there is no destruction of the real [soul],
अपि तु उभयोः अनयोः अन्तः	and the nature of both about both these
तत्त्व-दर्शिभिः दृष्टः ।	is seen by seers of the truth

"Those who are seers of the truth have concluded that of the nonexistent (the material body) there is no endurance and of the eternal (the soul) there is no change. This they have concluded by studying the nature of both."

न **not** ⟨*avyaya*⟩

अ-सतः **of the unreal** ⟨6.1⟩ n. *a-sat* – not being, matter

विद्यते **there is** ⟨*acyuta* 1.1⟩ √*vid[a]* 4A...सत्तायाम् – to be, exist

भावः **existence** ⟨1.1⟩ m. *bhāva*

न **not** ⟨*avyaya*⟩

अ-भावः **non-existence** ⟨1.1⟩ m. *a-bhāva*

विद्यते **there is** ⟨*acyuta* 1.1⟩ √*vid[a]* 4A...सत्तायाम् – to be, exist

सतः **of the real** ⟨6.1⟩ n. *sat* (√*as[a]*...भुवि – to be, exist; + *.[ś]at[ṛ]*) – being, existing; lasting; real, true, good; beautiful, wise, venerable, honest; true existence, reality, truth

(as in:) *sad-asat (sat-_asat)* being and not being; real and unreal; true and false; good and bad; spiritual and material; *sad-ācāra* – virtuous conduct; *sat-kāra* – kind treatment, hospitality; *sat-saṅga* – saintly association; *sac-cid-ānanda (sat-_cit-_ānanda)* – existence, knowledge and bliss (the characteristics of spiritual life); *saj-jana (sat-_jana)* – gentleman; (pl.:) *santaḥ* – good people, saints; (derived:) *sattva (.tva)* – existence, substance, reality; purity, goodness (as opp. to the other modes of material nature, namely *rajas (rajaḥ)* – passion, and *tamas (tamaḥ)* – darkness, ignorance); *satya* – true, real, honest, good, pure, valid; *satyam* – truth, reality

उभयोः **of both** ⟨6.2⟩ m. *kṛṣṇanāma ubhaya* – both

अपि **also** ⟨*avyaya*⟩

दृष्टः **seen** ⟨1.1⟩ m. *dṛṣṭa* (√*dṛś[ir]*...प्रेक्षणे – to see; + *.[k]ta*)

अन्तः **the nature** ⟨1.1⟩ m. *anta* – end, limit; ascertainment, conclusion; (but also:) inner part, nature

(as in:) *ananta (an-anta)* – endless, boundless, eternal; name of Viṣṇu; *anta-kāla* – 'end time', time of death; *Vedānta (veda-_anta)* – the conclusion or essence of the *Vedas*; (derived:) *antavat (.vat[u])* – 'having *anta* (an end)'; limited, temporary; *antya* – last, final; *atyanta* – 'beyond limit', very much

The word *anta* is not to be confused with *antara* and *antar (antaḥ)*: *antara* – interior; near; distant; interval; difference; *antar (antaḥ)* ⟨*avyaya*⟩ – within, between, amongst; (as in:) *antaḥ-karaṇa* – 'inner sense', mind, heart; *antar-jyotis (-jyotiḥ)* – 'inner light', being enlightened

तु **but** ⟨*avyaya*⟩

अनयोः **of these** ⟨6.2⟩ n. *kṛṣṇanāma idam* – (first person) he, this

तत्त्व-दर्शिभिः **by the seers of the truth** ⟨3.3⟩ m. *tattva-darśin (-darśī)* – seer of the truth

Subodhinī: अ-सतः, अनात्म-धर्मत्वात् अ-विद्यमानस्य शीत-उष्णादेः, आत्मनि भावः (सत्ता) न विद्यते, तथा सतः (सत्-स्वभावस्य आत्मनः) अ-भावः (विनाशः) न विद्यते । एवम् उभयोः (सत्-असतोः) अन्तः (निर्णयः) दृष्टः । कैः ? तत्त्व-दर्शिभिः वस्तु-याथात्म्य-विद्भिः । 'एवम्भूत-विवेकेन सहस्व' इति अर्थः ॥२.१६॥

तत्र सत्-स्वभावम् अ-विनाशि वस्तु सामान्येन उक्तम्, विशेषतः दर्शयति – 'अ-विनाशि' इति –

2.17

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥१७॥

येन सर्वम् इदम् ततम्	by which all this (the world) is pervaded
तद् तु अ-विनाशि विद्धि !	that (the soul) know to be indestructible!
अस्य अ-व्ययस्य विनाशम्	the destruction of this unchangeable (the soul)

न कश्चिद् कर्तुम् अर्हति ।	no one is able to bring about

"That which pervades the entire body you should know to be indestructible. No one is able to destroy that imperishable soul."

अ-विनाशि **which is indestructible** ⟨2.1⟩ n. *a-vināśin (-vināśī)*
तु **but** ⟨*avyaya*⟩
तद् **that** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
विद्धि **you must know** ⟨*vidhātā* 2.1⟩ √*vid[a]* 2P...ज्ञाने – to know
येन **that by which** ⟨3.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
सर्वम् **all** ⟨1.1⟩ n. *kṛṣṇanāma sarva*
इदम् **this** ⟨1.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this
ततम् **pervaded** ⟨1.1⟩ n. *tata* (√*tan[u]*...विस्तारे – to spread, pervade; + *.[k]ta*)
विनाशम् **destruction** ⟨2.1⟩ m. *vināśa*
अ-व्ययस्य **of the unchangeable** ⟨6.1⟩ n. *a-vyaya* – imperishable, unchangeable
व्यय (from *vi.*√*i[ṇ]* – to go away) – 'going away', perishable, changeable (as opp. to *a-vyaya*); expense, cost (as opp. to *āya* – income)
अस्य **of this** ⟨6.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this
न **not** ⟨*avyaya*⟩
कश्चिद् **someone** ⟨1.1⟩ m. *kṛṣṇanāma kim (kaḥ)* + *.cid* – someone, something
कर्तुम् **to do** ⟨*avyaya*⟩ √*[ḍu]kṛ[ñ]*...करणे – to do; + *.tum[u]*
अर्हति **he is able** ⟨*acyuta* 1.1⟩ √*arh[a]*...पूजायाम् – to be worthy, fit, able

Subodhinī: येन सर्वम् इदम् आगम-अपाय-धर्मकम् देहादिकम् ततम् (तद्-साक्षित्वेन व्याप्तम्), तद् तु आत्म-स्वरूपम् अ-विनाशि (विनाश-शून्यम्) विद्धि (जानीहि) । तत्र हेतुम् आह – 'विनाशम्' इति ॥२.१७॥
आगम-अपाय-धर्मकम् सन्दर्शयति – 'अन्तवन्तः' इति ।

2.18

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥१८॥

नित्यस्य अ-नाशिनः	of the eternal, indestructible,
अ-प्रमेयस्य शरीरिणः	and immeasurable embodied soul
इमे देहाः अन्तवन्तः उक्ताः	these bodies are said to be impermanent,
तस्मात् हे भारत ! युध्यस्व !	therefore, O Arjuna, fight!

"The material body of the indestructible, immeasurable and eternal living entity is sure to come to an end; therefore, fight, O descendant of Bharata."

अन्तवन्तः **temporary** ⟨1.3⟩ m. *antavat (.vat[u])* – 'having *anta* (an end)'; limited, temporary
इमे **these** ⟨1.3⟩ m. *kṛṣṇanāma idam* – (first person) he, this
देहाः **bodies** ⟨1.3⟩ m. *deha* – body
नित्यस्य **of the eternal** ⟨6.1⟩ m. *nitya* – eternal
उक्ताः **are said** ⟨1.3⟩ m. *ukta* (√*vac[a]*...परिभाषणे – to speak; + *.[k]ta*) – spoken
शरीरिणः **of the embodied soul** ⟨6.1⟩ m. *śarīrin (śarīrī)* – 'which has a body'
(similarly:) *śarīra* – body, solid parts of the body; any solid body (as opp. to *udaka* – water, etc.)
अ-नाशिनः **of the indestructible** ⟨6.1⟩ m. *a-nāśin (-nāśī)* – 'which is indestructible'
अ-प्रमेयस्य **of the immeasurable** ⟨6.1⟩ m. *a-prameya* – immeasurable, indefinable
प्रमेय (*pra.*√*mā* – to be measured; + *.ya*) – to be measured, measurable; (also from *pra.*√*mā*:) *pramāṇa* – measure, standard; means to valid knowledge, proof; in logic there are three principle kinds of *pramāṇa*: *pratyakṣa* (direct sense perception), *anumāna* (inference) and *śabda* (revelation); and in this connection, *prameya* is the object to be established by *pramāṇa*
तस्मात् **therefore** ⟨*avyaya*⟩
युध्यस्व **you must fight** ⟨*vidhātā* 2.1⟩ √*yudh[a]*...सम्प्रहारे – to fight
भारत **O Arjuna!** ⟨8.1⟩ m. *bhārata* – 'descendant of Bharata'

Subodhinī: अन्तः (विनाशः) विद्यते येषाम्, ते अन्तवन्तः । नित्यस्य (सर्वदा एक-रूपस्य) शरीरिणः (शरीरवतः), अतएव अ-नाशिनः (विनाश-रहितस्य) अ-प्रमेयस्य (अ-परिच्छिन्नस्य) आत्मनः इमे सुख-दुःखादि-धर्मकाः देहाः [अन्तवन्तः] उक्ताः तत्त्व-दर्शिभिः । यस्माद् एवम् आत्मनः न विनाशः, नच सुख-दुःखादि-सम्बन्धः, तस्मात् मोह-जम् शोकम् त्यक्त्वा युध्यस्व । 'स्व-धर्मम् मा त्याक्षीः' इति अर्थः ॥२.१८॥
तद् एवम् भीष्मादि-मृत्यु-निमित्तः शोकः निवारितः । यद् च आत्मनः हन्तृत्व-निमित्तम् दुःखम् उक्तम् 'एतान् न हन्तुम् इच्छामि' इत्यादिना, तद् अपि तद्वत् एव निर्निमित्तम् इति आह – 'यः एनम्' इति –

2.19

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥१९॥

यः एनम् हन्तारम् वेत्ति	one who thinks it (the soul) the killer
यः च एनम् हतम् मन्यते	and one who thinks it to be killed
उभौ तौ न विजानीतः,	both of them do not understand,
अयम् न हन्ति न हन्यते ।	it neither kills nor is it killed

"Neither he who thinks the living entity the slayer nor he who thinks it slain is in knowledge, for the self slays not nor is slain."

यः he who ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
एनम् this ⟨2.1⟩ m. *kṛṣṇanāma etad* – (first person) he, this
वेत्ति he knows ⟨*acyuta* 1.1⟩ √*vid[a]* 2P...ज्ञाने – to know
हन्तारम् a killer ⟨2.1⟩ m. *hantṛ* (*hantā*) (from √*han[a]*...हिंसा-गत्योः – to harm, kill; go)
यः he who ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
च and ⟨*avyaya*⟩
एनम् this ⟨2.1⟩ m. *kṛṣṇanāma etad* – (first person) he, this
मन्यते he thinks ⟨*acyuta* 1.1⟩ √*man[a]* 4A...बोधने – to know, think
हतम् killed ⟨2.1⟩ m. *hata* (√*han[a]*...हिंसा-गत्योः – to harm, kill; go; + *.[k]ta*)
उभौ both ⟨1.2⟩ m. *kṛṣṇanāma ubha*
तौ those two ⟨1.2⟩ m. *kṛṣṇanāma tad* – (first person) he, that
न not ⟨*avyaya*⟩
विजानीतः they understand ⟨*acyuta* 1.2⟩ *vi.*√*jñā* – to understand
न not ⟨*avyaya*⟩
अयम् this ⟨1.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
हन्ति it kills ⟨*acyuta* 1.1⟩ √*han[a]*...हिंसा-गत्योः – to harm, kill; go
न not ⟨*avyaya*⟩
हन्यते it is killed ⟨*acyuta* pass. 1.1⟩ √*han[a]*...हिंसा-गत्योः – to harm, kill; go

Subodhinī: एनम् (आत्मानम्) । आत्मनः हनन-क्रियायाम् कर्मत्वम् कर्तृत्वम् अपि न अस्ति इति अर्थः । तत्र हेतुः – 'न अयम्' इति ॥२.१९॥
'न हन्यते' इति एतद् एव षड्-भाव-विकार-शून्यत्वेन द्रढयति – 'न जायते' इति –

2.20

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतो ऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥२०॥

न जायते म्रियते वा कदाचिद्,	it is not born and it does not die at any time,
न अयम् भूत्वा	it has not come into existence
न भूयः भविता वा,	nor will it again come into existence,
अयम् अ-जः नित्यः शाश्वतः पुराणः,	it is unborn, eternal, ever-existing and primeval,
शरीरे हन्यमाने न हन्यते ।	when the body is killed it is not killed

"For the soul there is neither birth nor death at any time. He has not come into being, does not come into being, and will not come into being. He is unborn, eternal, ever-existing and primeval. He is not slain when the body is slain."

न not ⟨*avyaya*⟩

जायते it is born ⟨*acyuta* 1.1⟩ √*jan[ī]*...प्रादुर्भावे – to be born
म्रियते it dies ⟨*acyuta* 1.1⟩ √*mṛ[ṅ]*...प्राणत्यागे – to die
वा or ⟨*avyaya*⟩
कदाचिद् at any time ⟨*avyaya*⟩ *kadā* (when) + *.cid*
न not ⟨*avyaya*⟩
अयम् this ⟨1.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
भूत्वा [after] becoming ⟨*avyaya*⟩ √*bhū*...सत्तायाम् – to be, exist, become; + *.[k]tvā*
भविता it will become ⟨*bālakalki* 1.1⟩ √*bhū*...सत्तायाम् – to be, exist, become

Some interpret *bhavitā* as ⟨1.1⟩ of m. *bhavitṛ* (*bhavitā*; *.tṛ[n]*) – 'one who exists' – it does not exist [because of] coming into existence. And *bhūyaḥ* is sometimes explained as 'growing'. Still others read *bhūtvābhavitā* (*bhūtvā _a-bhavitā*).

वा or ⟨*avyaya*⟩
न not ⟨*avyaya*⟩
भूयः again ⟨*avyaya*⟩
अ-जः unborn ⟨1.1⟩ m. *a-ja*...यः न जायते, सः अ-जः (from √*jan[ī]*...प्रादुर्भावे – to be born) – who is not born
नित्यः eternal ⟨1.1⟩ m. *nitya*
शाश्वतः ever-existing ⟨1.1⟩ m. *śāśvata*
अयम् this ⟨1.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
पुराणः primeval ⟨1.1⟩ m. *purāṇa* (from √*pur[a]*...अग्रगमने – to precede) – 'preceding', ancient; an old history, (esp.) the eighteen main *Purāṇas*

(also from √*pur[a]*...अग्रगमने): *puras* (*puraḥ*), *purastāt* – in front, before, eastward; *purā* – before, formerly; *pūrva* – before, in front; eastern; former, previous; ancient, traditional

न not ⟨*avyaya*⟩
हन्यते it is killed ⟨*acyuta* pass. 1.1⟩ √*han[a]*...हिंसा-गत्योः – to harm, kill; go
हन्यमाने when being killed ⟨7.1, *sati-saptamī*⟩ n. *hanyamāna* (*.[ś]āna*) – [while] being killed
शरीरे the body ⟨7.1, *sati-saptamī*⟩ n. *śarīra* – body

Subodhinī: 'न जायते' इति जन्म-प्रतिषेधः । 'न म्रियते च' इति विनाश-प्रतिषेधः । 'वा'-शब्दौ 'च' अर्थे । नच अयम् भूत्वा (उत्पद्य) भविता (भवति), अस्तित्वम् भजते, किन्तु प्राक् एव स्वतः सत्-रूपः इति जन्मान्तर-अस्तित्व-लक्षण-द्वितीय-विकार-प्रतिषेधः । तत्र हेतुः – यस्मात् अ-जः । यः हि जायते, सः जन्म-अन्तरम् अस्तित्वम् भजते, नतु यः स्वयम् एव अस्ति, सः भूयः अपि अन्यत् अस्तित्वम् भजते इति अर्थः । नित्यः (सर्वदा एक-रूपः) इति वृद्धि-प्रतिषेधः । शाश्वतः (शश्वत्-भवः) इति अपक्षय-प्रतिषेधः । पुराणः इति विपरिणाम-प्रतिषेधः । पुरा अपि नव एव, नतु परिणामतः रूप-अन्तरम् प्राप्य नवः भवति इति अर्थः । यद्वा, 'न भविता' इति अस्य अनुषङ्गम् कृत्वा, 'भूयः' अधिकम् यथा भवति तथा न भवति इति वृद्धि-प्रतिषेधः । 'अजः नित्यः' इति च उभयम् वृद्धि-अभावे हेतुः इति अ-पौनरुक्त्यम् । 'तद् एवम् जायते, अस्ति, वर्धते, विपरिणमते, अपक्षीयते, नश्यति' (*Nirukta Naighaṇṭuka kāṇḍa* 1.1.2)

इति एवम् यास्कादिभिः वेद-वादिभिः उक्ताः षड्-भाव-विकाराः निरस्ताः । यद् अर्थम् एते विकाराः निरस्ताः, तम् प्रस्तुतम् विनाश-अभावम् उपसंहरति – 'न हन्यते हन्यमाने शरीरे' इति ॥२.२०॥
अतएव हन्तृत्व-अभावः अपि पूर्व-उक्तः प्रसिद्धः इति आह – 'वेद' इति –

2.21

वेदाविनाशिनं नित्यं य एनमजमव्ययम् ।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥२१॥

हे पार्थ !	O Arjuna!
यः	he who
एनम् अ-जम् अ-व्ययम्	this unborn, unchangeable,
अ-विनाशिनम् नित्यम्	indestructible and permanent,
वेद,	knows,
सः पुरुषः कम् हन्ति ?	whom does that person kill?
कम् घातयति ?	whom he causes to kill?
कथम् ?	[and] how?

"O Pārtha, how can a person who knows that the soul is indestructible, eternal, unborn and immutable kill anyone or cause anyone to kill?"

वेद **he knows** ⟨*acyuta* 1.1⟩ √*vid[a]* 2P...ज्ञाने – to know
अ-विनाशिनम् **indestructible** ⟨2.1⟩ m. *a-vināśin* (*-vināśī*) – 'which is indestructible'
नित्यम् **permanent** ⟨m. 2.1⟩ from *nitya* – innate, fixed, eternal
यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
एनम् **this** ⟨2.1⟩ m. *kṛṣṇanāma etad* – (first person) he, this
अ-जम् **unborn** ⟨2.1⟩ m. *a-ja*
अ-व्ययम् **unchangeable** ⟨2.1⟩ m. *a-vyaya* – unchangeable, imperishable
कथम् **how?** ⟨*avyaya*⟩
सः **that** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
पुरुषः **person** ⟨1.1⟩ m. *puruṣa*
पार्थ **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
कम् **whom?** ⟨2.1⟩ m. *kṛṣṇanāma kim* – who/what
घातयति **he causes to kill** ⟨*acyuta* caus. 1.1⟩ √*han[a]*...हिंसा-गत्योः – to harm, kill; go
हन्ति **he kills** ⟨*acyuta* 1.1⟩ √*han[a]*...हिंसा-गत्योः – to harm, kill; go
कम् **whom?** ⟨2.1⟩ m. *kṛṣṇanāma kim* – who/what

Subodhinī: नित्यम् (वृद्धि-शून्यम्), अ-व्ययम् (अपक्षय-शून्यम्), अ-जम्, अ-विनाशिनम् च यः वेद, सः पुरुषः कम् हन्ति ? कथम् वा हन्ति ?, एवम्-भूतस्य वधे साधन-अभावात् । तथा, स्वयम् प्रयोजकः भूत्वा अन्येन कम् घातयति ? न किञ्चित् अपि कथञ्चित् अपि इति अर्थः । 'अनेन मयि अपि प्रयोजकत्वात् दोष-दृष्टिम् मा कार्षीः' इति उक्तम् भवति ॥२.२१॥
ननु 'आत्मनः अ-विनाशः अपि, तदीय-शरीर-नाशम् पर्यालोच्य शोचामि' इति चेद्, तत्र आह – 'वासांसि' इति –

2.22

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥२२॥

यथा नरः	as a person
जीर्णानि वासांसि विहाय	[after] discarding old garments
अपराणि नवानि गृह्णाति,	takes other new ones,
तथा देही	so does the embodied soul
जीर्णानि शरीराणि विहाय	[after] giving up old bodies
अन्यानि नवानि संयाति ।	get other new ones

"As a person puts on new garments, giving up old ones, the soul similarly accepts new material bodies, giving up the old and useless ones."

वासांसि **garments** ⟨2.3⟩ n. *vāsas* (*vāsaḥ*) – garment
जीर्णानि **which are old** ⟨2.3⟩ n. *jīrṇa* – old, worn-out
यथा **as** ⟨*avyaya*⟩
विहाय **[after] abandoning** ⟨*avyaya*⟩ *vi.*√*[o]hā[k]* – to abandon; + *.ya[p]*
नवानि **new ones** ⟨2.3⟩ n. *nava* – new, fresh, recent, young, modern
(as in:) *nava-nīta* – fresh butter; (same as:) *navīna* – new, fresh, young
Other words for 'new': *navya, navīna, nūtana.*
गृह्णाति **he takes** ⟨*acyuta* 1.1⟩ √*grah[a]*...उपादाने – to take
(derived:) *graha* – holding; a planet (as holding or influencing the destinies of men); *gṛha, geha* – house, home; the inhabitants of a house, family
नरः **a person** ⟨1.1⟩ m. *nara* – a man, male, person; husband; hero; the Supreme Person
(as in:) *nara-deva* – 'man-god', a king; *nara-siṁha* (or *nṛ-siṁha*) – 'man-lion' an *avatāra* of Viṣṇu; (same:) *nara-hari* – 'man-god' Nṛsiṁha; *nārāyaṇa* (*nāra-_ayana*) – 'in whom all beings rest', or 'who rests on the Causal Ocean', the Lord; *narādhama* (*nara-_adhama*) – a low or vile man; (opp. to:) *narottama* (*nara-_uttama*) – 'best of men', the Lord, a devotee; *narendra* (*nara-indra*) – 'lord of men', a king; (fem.:) *nārī* – a woman, wife
अपराणि **others** ⟨2.3⟩ n. *kṛṣṇanāma a-para* – later, lower, other, different

तथा	so ⟨avyaya⟩
शरीराणि	**bodies** ⟨2.3⟩ n. *śarīra* – body
विहाय	**[after] abandoning** ⟨avyaya⟩ from *vi*.√*[o]hā[k]* – to abandon; + *.ya[p]*
जीर्णानि	**which are old** ⟨2.3⟩ n. *jīrṇa* – old, worn-out
अन्यानि	**others** ⟨2.3⟩ n. *kṛṣṇanāma anya* – other
संयाति	**he attains** ⟨acyuta 1.1⟩ *sam*.√*yā* – to attain
नवानि	**new ones** ⟨2.3⟩ n. *nava* – new
देही	**the embodied soul** ⟨1.1⟩ m. *dehin (dehī)*

Subodhinī: कर्म-निबन्धनानाम् नूतनानाम् देहानाम् अवश्यम्-भावित्वात्, न जीर्ण-देह-नाशे शोक-अवकाशः इति अर्थः ॥२.२२॥

'कथम् हन्ति ?' इति अनेन उक्तम् वध-साधन-अभावम् दर्शयन्, अ-विनाशित्वम् आत्मनः स्फुटी-करोति – 'न एनम्' इति –

2.23

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥२३॥

शस्त्राणि एनम् न छिन्दन्ति,	weapons do not cut it,
पावकः एनम् न दहति,	fire does not burn it,
आपः च एनम् न क्लेदयन्ति,	water also does not dissolve it,
मारुतः न शोषयति ।	wind does not dry [it] up

"The soul can never be cut to pieces by any weapon, nor burned by fire, nor moistened by water, nor withered by the wind."

न	**not** ⟨avyaya⟩
एनम्	**this** ⟨2.1⟩ m. *kṛṣṇanāma etad* – (first person) he, this
छिन्दन्ति	**they cut** ⟨acyuta 1.3⟩ √*chid[ir]*...द्वैधीकरणे – to divide into two (√*chid[ir]* + *.[k]ta*): *chinna* – cut off, divided
शस्त्राणि	**weapons** ⟨1.3⟩ n. *śastra* – weapon
न	**not** ⟨avyaya⟩
एनम्	**this** ⟨2.1⟩ m. *kṛṣṇanāma etad* – (first person) he, this
दहति	**it burns** ⟨acyuta 1.1⟩ √*dah[a]*...भस्मीकरणे – to burn to ashes
पावकः	**fire** ⟨1.1⟩ m. *pāvaka* (from √*pū*...पवने to purify) – 'purifying' (said of fire and water) (also from √*pū*...पवने): *pavana, pāvana* – 'purifier', wind; *pavitra* – any means of purification (external and mental); *puṇya* – pure, sacred; merit; *pūta* – purified
न	**not** ⟨avyaya⟩

च	**and** ⟨avyaya⟩
एनम्	**this** ⟨2.1⟩ m. *kṛṣṇanāma etad* – (first person) he, this
क्लेदयन्ति	**they moisten** ⟨acyuta caus. 1.3⟩ √*klid[ū]*...आर्द्रीभावे – to be wet
आपः	**waters** ⟨1.3⟩ f. *ap* – water (used only in plural)
न	**not** ⟨avyaya⟩
शोषयति	**it causes to dry up** ⟨acyuta caus. 1.1⟩ √*śuṣ[a]*...शोषणे – to dry
मारुतः	**the wind** ⟨1.1⟩ m. *māruta* – 'relating to the Maruts (wind-gods)'

Subodhinī: आपः न एनम् क्लेदयन्ति (मृदू-करणेन शिथिलम् न कुर्वन्ति) । मारुतः अपि एनम् न शोषयति ॥२.२३॥
तत्र हेतुन् आह – 'अच्छेद्यः' इति सार्धेन –

2.24

अच्छेद्यो ऽयमदाह्यो ऽयमक्लेद्यो ऽशोष्य एव च ।
नित्यः सर्वगतः स्थाणुरचलो ऽयं सनातनः ॥२४॥

अयम् अ-च्छेद्यः अयम् अ-दाह्यः	it is indivisible, it can not be burned
अ-क्लेद्यः अ-शोष्यः एव च	it can not be dissolved and dried up
अयम् नित्यः सर्व-गतः स्थाणुः	it is permanent, everywhere, static
अ-चलः सनातनः ।	unmoving and eternal

"This individual soul is unbreakable and insoluble, and can be neither burned nor dried. He is everlasting, present everywhere, unchangeable, immovable and eternally the same."

अ-च्छेद्यः	**indivisible** ⟨1.1⟩ m. *a-chedya* (from √*chid[ir]*...द्वैधीकरणे – to divide into two; + *.ya*)
अयम्	**this** ⟨1.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
अ-दाह्यः	**not to be burnt** ⟨1.1⟩ m. *a-dāhya* (from √*dah[a]*...भस्मीकरणे – to burn to ashes; + *.ya*)
अयम्	**this** ⟨1.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
अ-क्लेद्यः	**not to be moistened** ⟨1.1⟩ m. *a-kledya* (from √*klid[ū]*...आर्द्रीभावे – to be wet; + *.ya*)
अ-शोष्यः	**not to be dried up** ⟨1.1⟩ m. *a-śoṣya* (from √*śuṣ[a]*...शोषणे – to dry; + *.ya*)
एव च	**and also** ⟨avyaya⟩
नित्यः	**permanent** ⟨1.1⟩ m. *nitya*
सर्व-गतः	**everywhere** ⟨1.1⟩ m. *sarva-gata* – 'gone everywhere', all-pervading, omnipresent
स्थाणुः	**static** ⟨1.1⟩ m. *sthāṇu* (from √*sthā*...स्थाने – to stand) – fixed, stationary
अ-चलः	**unmoving** ⟨1.1⟩ m. *a-cala* चल (from √*cal[a]*...कम्पने – to move, shake) – moving, shaking; unsteady, perishable; disturbed, agitated; (as in:) *cañcala* – flickering; unsteady; (said of:) fortune, name of Lakṣmī

अयम्	**this** ⟨1.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
सनातनः	**eternal** ⟨1.1⟩ n. *sanātana*

Subodhinī: निरवयवत्वात् अ-च्छेद्यः अयम्, अ-क्लेद्यः च । अ-मूर्तत्वात् अ-दाह्यः, द्रवत्व-अभावात् अ-शोष्यः इति भावः । इतः च छेदादि-योग्यः न भवति – यतः नित्यः, अ-विनाशी, सर्व-गतः (सर्वत्र गतः), स्थाणुः (स्थिर-स्वभावः, रूपान्तर-आपत्ति-शून्यः), अ-चलः (पूर्वरूप-अपरित्यागी), सनातनः (अनादिः) ॥२.२४॥

2.25

अव्यक्तो ऽयमचिन्त्यो ऽयमविकार्यो ऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥२५॥

अयम् अ-व्यक्तः, अयम् अ-चिन्त्यः	it is unmanifest, it is inconceivable
अयम् अ-विकार्यः उच्यते,	it is called immutable,
तस्मात् एनम् एवम् विदित्वा	therefore, [after] knowing it to be such
अनुशोचितुम् न अर्हसि ।	you should not lament

"It is said that the soul is invisible, inconceivable and immutable. Knowing this, you should not grieve for the body."

अ-व्यक्तः	**unmanifest** ⟨1.1⟩ m. *a-vyakta* – unmanifested; transcendental
	व्यक्त (from *vi.√añj[ū]* – to make visible; + *.[k]ta*) – made visible, manifested, perceptible by the senses; material (opp. to *a-vyakta* – unmanifested); (derived:) *vyakti* – manifestation; an individual (opp. to *jāti* or class)
अयम्	**this** ⟨1.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
अ-चिन्त्यः	**inconceivable** ⟨1.1⟩ m. *a-cintya* – 'not to be thought about'
अयम्	**this** ⟨1.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
अ-विकार्यः	**immutable** ⟨1.1⟩ m. *a-vikārya* – 'not to be transformed'
	विकार – transformation, modification; (esp. for the worse:) agitation, disease
अयम्	**this** ⟨1.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
उच्यते	**it is said** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak
तस्मात्	**therefore** ⟨*avyaya*⟩
एवम्	**thus** ⟨*avyaya*⟩
विदित्वा	**[after] knowing** ⟨*avyaya*⟩ √*vid[a]* 2P...ज्ञाने – to know; + *.[k]tvā*
एनम्	**this** ⟨2.1⟩ m. *kṛṣṇanāma etad* – (first person) he, this
न	**not** ⟨*avyaya*⟩
अनुशोचितुम्	**to lament** ⟨*avyaya*⟩ *anu.√śuc[a]* – to lament; + *.tum[u]*
अर्हसि	**you deserve** ⟨*acyuta* 2.1⟩ √*arh[a]*...पूजायाम् – to be worthy, fit, able

Subodhinī: अ-व्यक्तः (चक्षुरादि-अविषयः), अ-चिन्त्यः (मनसः अपि अ-विषयः), अ-विकार्यः (कर्म-इन्द्रियाणाम् अपि अ-गोचरः) इति अर्थः । 'उच्यते' इति नित्यत्व-आदौ अभियुक्त-उक्तिम् प्रमाणयति । उपसंहरति – 'तस्मात्' इति ॥२.२५॥

तद् एवम् आत्मनः जन्म-विनाश-अभावात्, न शोकः कार्यः इति उक्तम् । इदानीम् देहेन सह आत्मनः जन्म, तद्-विनाशेन च विनाशम् अङ्गीकृत्य अपि, शोकः न कार्यः इति आह – 'अथ' इति –

2.26

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो नैनं शोचितुमर्हसि ॥२६॥

अथ च एनम् नित्य-जातम् मन्यसे	now, if you think that it is always being born
नित्यम् मृतम् वा	or always dying,
तथापि हे महा-बाहो !	still, O Arjuna!
त्वम् एनम् शोचितुम् न अर्हसि ।	you should not lament for it

"If, however, you think that the soul is perpetually born and always dies, still you have no reason to lament, O mighty-armed."

अथ च	**moreover** ⟨*avyaya*⟩ *atha ca* – and now
एनम्	**this** ⟨2.1⟩ m. *kṛṣṇanāma etad* – (first person) he, this
नित्य-जातम्	**always born** ⟨2.1⟩ m. *nitya-jāta*
नित्यम्	**constantly** ⟨*avyaya*⟩ from *nitya* – innate, fixed, eternal
वा	**or** ⟨*avyaya*⟩
मन्यसे	**you think** ⟨*acyuta* 2.1⟩ √*man[a]* 4A...बोधने – to know, think
मृतम्	**dead** ⟨2.1⟩ m. *mṛta*
तथा अपि	**even so** ⟨*avyaya*⟩
त्वम्	**you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
महा-बाहो	**O Arjuna!** ⟨8.1⟩ m. *mahā-bāhu* – 'who has mighty arms'
न	**not** ⟨*avyaya*⟩
एनम्	**this** ⟨2.1⟩ m. *kṛṣṇanāma etad* – (first person) he, this
शोचितुम्	**to lament** ⟨*avyaya*⟩ √*śuc[a]*...शोके – to grieve, lament; + *.tum[u]*
अर्हसि	**you deserve** ⟨*acyuta* 2.1⟩ √*arh[a]*...पूजायाम् – to be worthy, fit, able

Subodhinī: अथ च (यद्यपि) एनम् आत्मानम् नित्यम् (सर्वदा) तद्-तद्-देहे जाते जातम् मन्यसे, तथा तद्-तद्-देहे मृते मृतम् च मन्यसे, पुण्य-पापयोः तद्-फल-भूतयोः च जन्म-मरणयोः आत्म-गामित्वात्, तथापि त्वम् शोचितुम् न अर्हसि ॥२.२६॥
कुतः ? इति अतः आह – 'जातस्य' इति –

Note: In verses (2.26-29) different atheistic theories (*nāstika-vāda*) about the body and soul are brought into the discussion – *bauddha-vāda* (2.26), *karma-vāda* (2.27), and *śūnya-vāda* (2.28).

2.27

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥२७॥

जातस्य हि मृत्युः ध्रुवः	for one who is born, death is certain
मृतस्य च जन्म ध्रुवम्,	and for one who is dead, birth is certain,
तस्मात् अ-परिहार्ये अर्थे	therefore, when something is unavoidable
न त्वम् शोचितुम् अर्हसि ।	you should not lament

"One who has taken his birth is sure to die, and after death one is sure to take birth again. Therefore, in the unavoidable discharge of your duty, you should not lament."

जातस्य **of one who is born** ⟨6.1⟩ m. *jāta* (√*jan[ī]*...प्रादुर्भावे – to be born; + *.[k]ta*) – born
हि **indeed** ⟨*avyaya*⟩
ध्रुवः **certain** ⟨1.1⟩ m. *dhruva* – fixed, firm, unchanging, constant; lasting, permanent; certain, sure
मृत्युः **death** ⟨1.1⟩ m. *mṛtyu*
Other words for 'death': *pralaya, anta, nāśa, maraṇa, nidhana.*
ध्रुवम् **certain** ⟨1.1⟩ n. *dhruva*
जन्म **birth** ⟨1.1⟩ n. *janman* (*janma*)
Other words for 'birth / creation': *utpatti, bhava, udbhava.*
मृतस्य **of one who is dead** ⟨6.1⟩ m. *mṛta* (√*mṛ[ṅ]*...प्राणत्यागे – to die; + *.[k]ta*) – dead
च **and** ⟨*avyaya*⟩
तस्मात् **therefore** ⟨*avyaya*⟩
अ-परिहार्ये **in an unavoidable** ⟨7.1, *sati-saptamī*⟩ m. *a-parihārya* – not to be avoided, unavoidable
परिहार्य (from *pari.*√*hṛ[ñ]* – to carry round, leave; + *.ya*) – to be avoided
अर्थे **matter** ⟨7.1, *sati-saptamī*⟩ m. *artha* – aim, purpose, wealth
न **not** ⟨*avyaya*⟩
त्वम् **you** ⟨1.1⟩ *kṛṣṇanāmā yuṣmad* – (middle person) you
शोचितुम् **to lament** ⟨*avyaya*⟩ √*śuc[a]*...शोके – to grieve, lament; + *.tum[u]*
अर्हसि **you deserve** ⟨*acyuta* 2.1⟩ √*arh[a]*...पूजायाम् – to be worthy, fit, able

Subodhinī: हि (यस्मात्) जातस्य स्वारम्भक-कर्म-क्षये मृत्युः ध्रुवः (निश्चितः), मृतस्य च तद्-तद्-देह-कृतेन कर्मणा जन्म अपि ध्रुवम् एव । तस्मात् एवम् अपरिहार्ये अर्थे (अवश्यम्-भाविनि जन्म-मरण-लक्षणे अर्थे) त्वम् विद्वान् शोचितुम् न अर्हसि (योग्यः न भवसि) इति अर्थः ॥२.२७॥

किंच, देहानाम् च स्व-भावम् पर्यालोच्य, तद्-उपाधिके आत्मनः जन्म-मरणे च शोकः न कार्यः इति आह –अ-व्यक्तादीनि इति –

2.28

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥२८॥

हे भारत !	O Arjuna!
भूतानि अ-व्यक्तादीनि	beings are unmanifest in the beginning
व्यक्त-मध्यानि अ-व्यक्त-निधनानि एव,	manifest in the middle and unmanifest at death,
तत्र का परिदेवना ?	what is there [the need for] lamentation?

"All created beings are unmanifest in their beginning, manifest in their interim state, and unmanifest again when annihilated. So what need is there for lamentation?"

अ-व्यक्तादीनि **who are unmanifest in the beginning** ⟨1.3⟩ n. *avyakta-ādi*...अव्यक्तम् आदिः यस्य, तद् अव्यक्तादि – 'whose beginning is unmanifest'
अदि – beginning, origin; original; (as in:) *ādy-anta* – beginning and end; *ādi-puruṣa* or *-pūruṣa* – 'original person', the Supreme Lord; *śrīvāsādi* (*śrīvāsa-_ādi*) – 'beginning with Śrīvāsa', Śrīvāsa a.o.
भूतानि **creatures** ⟨2.3⟩ n. *bhūta* (√*bhū*...सत्तायाम् – to be, exist, become; + *.[k]ta*) – 'been', 'gone', past, a ghost; or 'became', 'created', an element, body, being, creature
व्यक्त-मध्यानि **who are manifest in the middle** ⟨1.3⟩ n. *vyakta-madhya*...व्यक्तम् मध्यम् यस्य, तद् व्यक्त-मध्यम् – 'whose middle is manifest'
भारत **O Arjuna!** ⟨8.1⟩ m. *bhārata* – 'descendant of Bharata'
अ-व्यक्त-निधनानि **who are unmanifest at the end** ⟨1.3⟩ n. *avyakta-nidhana*...अव्यक्तम् निधनम् यस्य, तद् अव्यक्त-निधनम् – 'whose end is unmanifest'
निधन (from *ni.*√*[du]dhā[ñ]* – to hold down) – conclusion, end, destruction, death
एव **certainly** ⟨*avyaya*⟩
तत्र **there** ⟨*avyaya*⟩
का **what?** ⟨1.1⟩ f. *kṛṣṇanāmā kim* – who/what
परिदेवना **lamentation** ⟨1.1⟩ f. *paridevanā*

Subodhinī: अ-व्यक्तम् (प्रधानम्) तद् एव आदिः (उत्पत्तेः पूर्व-रूपम्) येषाम्, तानि अव्यक्त-आदीनि भूतानि (शरीराणि), कारणात्मना स्थितानाम् एव उत्पत्तेः । तथा व्यक्तम् (अभिव्यक्तम्) मध्यम् (जन्म-मरण-अन्तराल-स्थिति-लक्षणम्) येषाम् । अ-व्यक्ते निधनम् (लयः) येषाम् तानि इमानि, एवम्-भूतानि एव । तत्र तेषु का परिदेवना, कः शोक-निमित्तः विलापः ? प्रतिबुद्धस्य स्वप्न-दृष्ट-वस्तुषु इव शोकः न युज्यते इति अर्थः ॥२.२८॥

कुतः तर्हि विद्वांसः अपि लोके शोचन्ति ? आत्म-अज्ञानात् एव इति आशयेन आत्मनः दुर्विज्ञेयताम् आह – 'आश्चर्यवत्' इति –

2.29

आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः ।
आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् ॥२९॥

कश्चिद् एनम् आश्चर्यवत् पश्यति,	someone sees it (the soul) as amazing,
अन्यः च तथैव आश्चर्यवत् वदति,	and so also another describes it as amazing,
अन्यः च एनम् आश्चर्यवत् शृणोति,	still another hears of it as amazing,
कश्चिद् च श्रुत्वा अपि	and someone even [after] hearing
एनम् न एव वेद ।	does not know it at all

"Some look on the soul as amazing, some describe him as amazing, and some hear of him as amazing, while others, even after hearing about him, cannot understand him at all."

आश्चर्यवत् **as amazing** ⟨*avyaya*⟩ *āścarya* – astonishing, wonderful; wonder + *.vat[i]*
Other words for 'wonder': *vismaya, adbhuta, citra.*

पश्यति **he sees** ⟨*acyuta* 1.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see

कश्चिद् **someone** ⟨1.1⟩ m. *kṛṣṇanāma kim* (*kaḥ*) + *.cid* – someone, something

एनम् **this** ⟨2.1⟩ m. *kṛṣṇanāma etad* – (first person) he, this

आश्चर्यवत् **as amazing** ⟨*avyaya*⟩

वदति **he speaks** ⟨*acyuta* 1.1⟩ √*vad[a]*...व्यक्तायां वाचि – to speak
(derived:) *vāda* – speech, discourse, statement, explanation, advice; argument, doctrine; *vādin* (*vādī*) – speaker, propounder of any doctrine

तथा एव **and also** ⟨*avyaya*⟩

च **and** ⟨*avyaya*⟩

अन्यः **another** ⟨1.1⟩ m. *kṛṣṇanāma anya* – other

आश्चर्यवत् **as amazing** ⟨*avyaya*⟩

च **and** ⟨*avyaya*⟩

एनम् **this** ⟨2.1⟩ m. *kṛṣṇanāma etad* – (first person) he, this

अन्यः **another** ⟨1.1⟩ m. *kṛṣṇanāma anya* – other

शृणोति **he hears** ⟨*acyuta* 1.1⟩ √*śru*...श्रवणे – to hear, obey

श्रुत्वा **[after] hearing** ⟨*avyaya*⟩ √*śru*...श्रवणे – to hear, obey; + *.[k]tvā*

अपि **also** ⟨*avyaya*⟩

एनम् **this** ⟨2.1⟩ m. *kṛṣṇanāma etad* – (first person) he, this

वेद **he knows** ⟨*acyuta* 1.1⟩ √*vid[a]* 2P....ज्ञाने – to know

न **not** ⟨*avyaya*⟩

च **and** ⟨*avyaya*⟩

एव **certainly** ⟨*avyaya*⟩

कश्चिद् **someone** ⟨1.1⟩ m. *kṛṣṇanāma kim* (*kaḥ*) + *.cid* – someone, something

Subodhinī: कश्चित् एनम् (आत्मानम्) शास्त्र-आचार्य-उपदेशाभ्याम् पश्यन्, आश्चर्यवत् पश्यति । सर्व-गतस्य नित्य-ज्ञान-आनन्द-स्वभावस्य आत्मनः अ-लौकिकत्वात्, ऐन्द्रजालिकवत् अ-घटमानम् पश्यन् इव, विस्मयेन पश्यति, असम्भावना-अभिभूतत्वात् । तथा आश्चर्यवत् एव अन्यः वदति च, शृणोति च अन्यः । कश्चित् पुनः विपरीत-भावना-अभिभूतः श्रुत्वा अपि नैव वेद । च-शब्दात् 'उक्त्वा अपि दृष्ट्वा अपि न सम्यक् वेद' इति द्रष्टव्यम् ॥२.२९॥
तद् एवम् दुर्बोधम् आत्म-तत्त्वम् सङ्क्षेपेण उपदिशन्, अ-शोच्यत्वम् उपसंहरति – 'देही' इति –

2.30

देही नित्यमवध्योऽयं देहे सर्वस्य भारत ।
तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥३०॥

हे भारत !	O Arjuna!
सर्वस्य देहे अयम् देही	this soul in everyone's body
नित्यम् अ-वध्यः,	is eternally not to be killed,
तस्मात्	therefore
सर्वाणि भूतानि त्वम् शोचितुम् न अर्हसि ।	you should not lament for any being

"O descendant of Bharata, he who dwells in the body can never be slain. Therefore you need not grieve for any living being."

देही **the embodied soul** ⟨1.1⟩ m. *dehin* (*dehī*)

नित्यम् **eternally** ⟨*avyaya*⟩ from *nitya* – innate, fixed, eternal

अ-वध्यः **not to be killed** ⟨1.1⟩ m. *a-vadhya*
वध्य (√*han[a]*...हिंसा-गत्योः – to harm, kill; go; + *.ya*) – to be killed

अयम् **this** ⟨1.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this

देहे **in the body** ⟨7.1⟩ m. *deha* – body

सर्वस्य **of all** ⟨6.1⟩ m. *kṛṣṇanāma sarva* – all

भारत **O Arjuna!** ⟨8.1⟩ m. *bhārata* – 'descendant of Bharata'

तस्मात् **therefore** ⟨*avyaya*⟩

सर्वाणि **all** ⟨2.3⟩ n. *kṛṣṇanāma sarva*

भूतानि **beings** ⟨2.3⟩ n. *bhūta* (√*bhū*...सत्तायाम् – to be, exist, become; + *.[k]ta*) – 'been', past, a ghost; or 'became', an element, body, being, creature

न **not** ⟨*avyaya*⟩

त्वम् **you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

शोचितुम् **to lament** ⟨*avyaya*⟩ √*śuc[a]*...शोके – to grieve, lament; + *.tum[u]*
अर्हसि **you deserve** ⟨*acyuta* 2.1⟩ √*arh[a]*...पूजायाम् – to be worthy, fit, able

Subodhinī: स्पष्टम् ॥२.३०॥
यद् च उक्तम् अर्जुनेन 'वेपथुः च शरीरे मे रोम-हर्षः च जायते' (1.29) इति, तद् अपि अ-युक्तम् इति आह – 'स्व-धर्मम्' इति –

2.31

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयो ऽन्यत्क्षत्रियस्य न विद्यते ॥३१॥

स्व-धर्मम् अपि च अवेक्ष्य	[after] considering your duty also
विकम्पितुम् न अर्हसि,	you should not hesitate [to fight],
धर्म्यात् युद्धात्	than a righteous fight
क्षत्रियस्य अन्यत् श्रेयः न हि विद्यते ।	there is nothing better for a *kṣatriya*

"Considering your specific duty as a kṣatriya, you should know that there is no better engagement for you than fighting on religious principles; and so there is no need for hesitation."

स्व-धर्मम् **own religious duty** ⟨2.1⟩ m. *sva-dharma*...स्वस्य धर्मः इति स्व-धर्मः
अपि च **and also** ⟨*avyaya*⟩
अवेक्ष्य **[after] considering** ⟨*avyaya*⟩ *ava.*√*īkṣ[a]* – to look at; + *.ya[p]*
न **not** ⟨*avyaya*⟩
विकम्पितुम् **to hesitate** ⟨*avyaya*⟩ *vi.*√*kap[i]* – to shake, hesitate; + *.tum[u]*
अर्हसि **you deserve** ⟨*acyuta* 2.1⟩ √*arh[a]*...पूजायाम् – to be worthy, fit, able
धर्म्यात् **than righteous** ⟨5.1⟩ n. *dharmya* (from *dharma* – religious duty) – 'according to *dharma*'
A fight is called *dharmya*, wenn the *kṣatriya* codes are followed.
युद्धात् **than a fight** ⟨5.1⟩ n. *yuddha* – battle, war
श्रेयः **better** ⟨1.1⟩ n. *śreyas* (*śreyaḥ*) – better, benefit
अन्यत् **another** ⟨1.1⟩ n. *krṣnanāma anya* – other
क्षत्रियस्य **of a *kṣatriya*** ⟨6.1⟩ m. *kṣatriya* – a ruler, warrior
न हि **not at all** ⟨*avyaya*⟩
विद्यते **there is** ⟨*acyuta* 1.1⟩ √*vid[a]* 4A...सत्तायाम् – to be, exist

Subodhinī: आत्मनः नाश-अभावात् एव एतेषाम् हनने अपि विकम्पितुम् न अर्हसि । किंच, स्व-धर्मम् अपि अवेक्ष्य, विकम्पितुम् न अर्हसि इति सम्बन्धः । यद् च उक्तम् 'न च श्रेयः अनुपश्यामि हत्वा स्व-जनम् आहवे' (1.31) इत्यादि तत्र आह – 'धर्म्यात्' इति, धर्मात् अनपेतात् (न्यायात्) युद्धात् अन्यत् ॥२.३१॥

किंच, महति श्रेयसि स्वयम् एव उपगते सति, कुतः विकम्पसे ? इति आह – 'यद्-ऋच्छया' इति –

2.32

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ॥३२॥

हे पार्थ !	O Arjuna!
यदृच्छया च उपपन्नम्	and having attained it by chance
अपावृतम् स्वर्ग-द्वारम् ईदृशम् युद्धम्	a fight like this, which is an open door to heaven,
सुखिनः क्षत्रियाः लभन्ते ।	fortunate *kṣatriyas* obtain

"O Pārtha, happy are the kṣatriyas to whom such fighting opportunities come unsought, opening for them the doors of the heavenly planets."

यदृच्छया **by chance** ⟨3.1⟩ f. *yad-rcchā* – 'whatever is the gain', accident, chance, on its own accord
च **and** ⟨*avyaya*⟩
उपपन्नम् **attained** ⟨2.1⟩ n. *upapanna* (*upa.*√*pad[a]* – to attain, exist; + *.[k]ta*)
स्वर्ग-द्वारम् **leading to heaven** ⟨2.1⟩ n. *svarga-dvāra*...स्वर्गस्य द्वारम् इति स्वर्ग-द्वारम् – 'door of heaven'
द्वार – door, gate, entrance; opening; (as in:) *dvārakā* – 'which has many gates', the capital of the Yadus
अपावृतम् **opened** ⟨2.1⟩ n. *apāvṛta* (from *apa.ā.*√*vr[ñ]* 5U – to uncover, open; + *.[k]ta*)
सुखिनः **fortunate men** ⟨1.3⟩ m. *sukhin* (*sukhī*) – 'who is happy'
क्षत्रियाः ***kṣatriyas*** ⟨1.3⟩ m. *kṣatriya*
पार्थ **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
लभन्ते **they obtain** ⟨*acyuta* 1.3⟩ √*[ḍu]labh[aṣ]*...प्राप्तौ – to obtain
युद्धम् **a fight** ⟨2.1⟩ n. *yuddha* – battle
ईदृशम् **like this** ⟨2.1⟩ n. *īdṛśa* (a transformation of *idam*) – 'of this kind'

Subodhinī: यद्-ऋच्छया (अ-प्रार्थितम् एव) उपपन्नम् (प्राप्तम्) ईदृशम् युद्धम् सुखिनः (स-भाग्याः) एवम् लभन्ते । यतः निरावरणम् स्वर्ग-द्वारम् एव एतद् । यद्वा, ये एवम्-विधम् युद्धम् लभन्ते, ते एव सुखिनः इति अर्थः । एतेन 'स्व-जनम् हि कथम् हत्वा सुखिनः स्याम' (1.36) इति यद् उक्तम्, तद् निरस्तम् भवति ॥२.३२॥
विपक्षे दोषम् आह – 'अथ' इति –

2.33

अथ चेत्त्वमिमं धर्म्यं सङ्ग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥३३॥

अथ इमम् धर्म्यम् सङ्ग्रामम्	however, this righteous fight
त्वम् न करिष्यसि चेद्,	if you will not perform,
ततः	then
स्व-धर्मम् कीर्तिम् च हित्वा	[after] giving up your duty and reputation
पापम् अवाप्स्यसि ।	you will incur sin

"If, however, you do not perform your religious duty of fighting, then you will certainly incur sins for neglecting your duties and thus lose your reputation as a fighter."

अथ **now** ⟨*avyaya*⟩
चेद् **if** ⟨*avyaya*⟩
Whereas *yadi* (if) comes before the condition (as in English), *ced* comes after the condition.
त्वम् **you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
इमम् **this** ⟨2.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
धर्म्यम् **righteous** ⟨2.1⟩ m. *dharmya* – 'according to *dharma*'
सङ्ग्रामम् **fight** ⟨2.1⟩ m. *saṅgrāma* – battle
न **not** ⟨*avyaya*⟩
करिष्यसि **you will do** ⟨*kalki* 2.1⟩ √*[ḍu]kṛ[ñ]*...करणे – to do
ततः **then** ⟨*avyaya*⟩ (*tatas*; from *tad* + .*tas[i]*) – from/after/than that
स्व-धर्मम् **the own duty** ⟨2.1⟩ m. *sva-dharma*
कीर्तिम् **reputation** ⟨2.1⟩ f. *kīrti* – glory, fame
च **and** ⟨*avyaya*⟩
हित्वा **[after] abandoning** ⟨*avyaya*⟩ √*[o]hā[k]*...त्यागे – to abandon; + .*[k]tvā*
पापम् **sin** ⟨2.1⟩ n. *pāpa*
अवाप्स्यसि **you will obtain** ⟨*kalki* 2.1⟩ *ava.*√*āp[l]* – to obtain

2.34

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् ।
सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥३४॥

भूतानि अपि	the people also
ते (तव) अ-व्ययाम् अ-कीर्तिम् च कथयिष्यन्ति,	will spread your eternal infamy,

सम्भावितस्य च	and for one who is respected
अ-कीर्तिः मरणात् अतिरिच्यते ।	infamy is worse than death

"People will always speak of your infamy, and for a respectable person, dishonor is worse than death."

अ-कीर्तिम् **infamy** ⟨2.1⟩ f. *a-kīrti*
च **and** ⟨*avyaya*⟩
अपि **even** ⟨*avyaya*⟩
भूतानि **people** ⟨1.3⟩ n. *bhūta* (√*bhū*...सत्तायाम् – to be, exist, become; + .*[k]ta*) – 'been', past, a ghost; or 'became', an element, body, being, creature
कथयिष्यन्ति **they will tell** ⟨*kalki* 1.3⟩ √*katha*...वाक्यप्रबन्धे – to tell
ते **your** ⟨opt. for *tava* 6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
अ-व्ययाम् **eternal** ⟨2.1⟩ f. *a-vyayā* (.*ā[p]*) – unchangeable, imperishable
सम्भावितस्य **of one who is honored** ⟨6.1⟩ m. *sambhāvita* (from *sam.*√*bhū* – to take birth, be possible; caus. , .*[k]ta*) – honored
अ-कीर्तिः **infamy** ⟨1.1⟩ f. *a-kīrti*
च **and** ⟨*avyaya*⟩
मरणात् **than death** ⟨5.1⟩ n. *maraṇa* – dying, death
अतिरिच्यते **it is more** ⟨*acyuta* pass. 1.1⟩ *ati.*√*ric[ir]* – to surpass

Subodhinī: अ-व्ययाम् (शाश्वतीम्) । सम्भावितस्य (बहु-मानितस्य) अ-कीर्तिः मरणात् अतिरिच्यते (अधिकतरा भवति) ॥२.३४॥

2.35

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः ।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥३५॥

महा-रथाः	the generals
त्वाम् भयात् रणात् उपरतम् मंस्यन्ते,	will think you have desisted from battle out of fear,
येषाम् च त्वम् बहु-मतः भूत्वा	and [after] having been highly esteemed by them
लाघवम् यास्यसि ।	you will become insignificant

"The great generals who have highly esteemed your name and fame will think that you have left the battlefield out of fear only, and thus they will consider you insignificant."

भयात् **out of fear** ⟨5.1⟩ n. *bhaya* (from *[ñi]bhī* – to fear) – fear (same as *bhī, bhīti*) (as in:) *a-bhaya* – fearlessness; *bhayaṅkara, bhayānaka* – creating fear, fearful; (also from √*[ñi]bhī*:) *bhīta* – afraid; *bhīma, bhīṣaṇa, bhīṣma* – fearful, awful

रणात् **from the battle** ⟨5.1⟩ m. *raṇa* – battle
उपरतम् **desisted** ⟨2.1⟩ m. *uparata* (*upa.√ram[u]* – to desist; + *.[k]ta*)
मंस्यन्ते **they will think** ⟨*kalki* 1.3⟩ *√man[a]* 4A...बोधने – to know, think
त्वाम् **you** ⟨2.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
महा-रथाः **the great warriors** ⟨1.3⟩ m. *mahā-ratha* – 'who has a great chariot'
येषाम् **of whom** ⟨6.3⟩ m. *kṛṣṇanāma yad* – (relative) who, which
च **and** ⟨*avyaya*⟩
त्वम् **you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
बहु-मतः **highly esteemed** ⟨1.1⟩ m. *bahu-mata*...बहु मतः इति बहु-मतः
भूत्वा **[after] being** ⟨*avyaya*⟩ *√bhū*...सत्तायाम् – to be, exist, become; + *.[k]tvā*
यास्यसि **you will attain** ⟨*kalki* 2.1⟩ *√yā*...प्राप्तौ – to attain, go
लाघवम् **insignificance** ⟨2.1⟩ n. *lāghava* (from *laghu* – light, small) – lightness, smallness

Subodhinī: येषाम् बहु-गुणत्वेन त्वम् पूर्वम् सम्मतः अभूः, ते एव भयेन सङ्ग्रामात् त्वाम् निवृत्तम् मन्येरन्, ततः च पूर्वम् बहु-मतः भूत्वा लाघवम् यास्यसि ॥२.३५॥

2.36

अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः ।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥३६॥

तव अ-हिताः च	your enemies also
तव सामर्थ्यम् निन्दन्तः	scorning your ability
बहून् अ-वाच्य-वादान् वदिष्यन्ति,	will speak many bad words,
ततः दुःखतरम् नु किम् ?	what is more painful than that?

"Your enemies will describe you in many unkind words and scorn your ability. What could be more painful for you?"

अवाच्य-वादान् **bad words** ⟨2.3⟩ m. *avācya-vāda*...अ-वाच्यः वादः इति अवाच्य-वादः – a word which is not to be spoken
वाच्य (*√vad[a]*...व्यक्तायां वाचि – to speak; + *.ya*) – to be spoken
च **and** ⟨*avyaya*⟩
बहून् **many** ⟨2.3⟩ m. *bahu*
वदिष्यन्ति **they will speak** ⟨*kalki* 1.3⟩ *√vad[a]*...व्यक्तायां वाचि – to speak
तव **your** ⟨6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
अ-हिताः **enemies** ⟨1.3⟩ m. *a-hita* – unbeneficial; enemy
Other words for 'enemy': *ripu, vairī, sapatna, ari, dviṣat, durhṛda, vipakṣa, amitra, śatru, paripanthī.*

हित (*√[ḍu]dhā[ñ]*...धारण-पोषणयोः – to hold; nourish; + *.[k]ta*) – nourished, beneficial; friend; (as in:) *hitopadeśa* (*hita-_upadeśa*) – beneficial instruction
(also from *√[ḍu]dhā[ñ]*...धारण-पोषणयोः): *dhātu* – layer, stratum; constituent part, ingredient; any element; chemical element, esp. metal, mineral; verbal root or word stem; *dhātṛ* (*dhātā*) – maintainer, the Lord; *dhātrī* – 'female maintainer', a nurse, mother; the earth
निन्दन्तः **who are criticizing** ⟨1.3⟩ m. *nindat* (*√nid[i]*...कुत्सायाम् – to criticize; + *.[ś]at[ṛ]*) – [while] criticizing
(also from *√nid[i]*...कुत्सायाम्): *nindā* – criticism, defamation
तव **your** ⟨6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
सामर्थ्यम् **ability** ⟨2.1⟩ n. *sāmarthya* (from *samartha* – able)
ततः **than that** ⟨*avyaya*⟩ (*tatas*; from *tad* + *.tas[i]*) – from/after/than that
दुःखतरम् **more misery** ⟨1.1⟩ n. *duḥkhatara* (*duḥkha* – misery; + *.tara*)
नु **indeed** ⟨*avyaya*⟩
किम् **what** ⟨1.1⟩ – *kṛṣṇanāma kim* – who/what

Subodhinī: अ-वाच्यान् वादान् (वचन-अनर्हान् शब्दान्) तव अ-हिताः (त्वद्-शत्रवः) वदिष्यन्ति ॥२.३६॥
यद् च उक्तम् 'न च एतद् विद्मः कतरत् नः गरीयः यद्वा जयेम यदि वा नः जयेयुः' (2.6) इति तत्र आह – 'हतः' इति –

2.37

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥३७॥

हतः वा स्वर्गम् प्राप्स्यसि,	either, killed, you will attain heaven,
जित्वा वा महीम् भोक्ष्यसे,	or, [after] conquering, you will enjoy the earth,
तस्मात् हे कौन्तेय !	therefore, O Arjuna!
युद्धाय कृत-निश्चयः उत्तिष्ठ !	with determination get up to fight!

"O son of Kuntī, either you will be killed on the battlefield and attain the heavenly planets, or you will conquer and enjoy the earthly kingdom. Therefore, get up with determination and fight."

हतः **killed** ⟨1.1⟩ m. *hata* (*√han[a]*...हिंसा-गत्योः – to harm, kill; go; + *.[k]ta*)
वा **or** ⟨*avyaya*⟩
प्राप्स्यसि **you will obtain** ⟨*kalki* 2.1⟩ *√āp[l]*...व्याप्तौ – to reach, obtain
स्वर्गम् **heaven** ⟨2.1⟩ m. *svarga*
जित्वा **[after] conquering** ⟨*avyaya*⟩ *√ji*...जये – to conquer; + *.[k]tvā*
वा **or** ⟨*avyaya*⟩

vā ... vā – either ... or

भोक्ष्यसे **you will enjoy** ⟨*kalki* 2.1⟩ √*bhuj[a]*...पालन-अभ्यवहारयोः – to govern; enjoy

महीम् **the earth** ⟨2.1⟩ f. *mahī*

तस्मात् **therefore** ⟨*avyaya*⟩

उत्तिष्ठ **you must stand up** ⟨*vidhātā* 2.1⟩ *ud.*√*sthā* – to stand up

कौन्तेय **O Arjuna!** ⟨8.1⟩ m. *kaunteya* – 'son of Kuntī'

युद्धाय **for the fight** ⟨4.1⟩ n. *yuddha* – battle, fight

कृत-निश्चयः **determined** ⟨1.1⟩ m. *kṛta-niścaya*...कृतः निश्चयः येन, सः कृत-निश्चः – 'by whom a decision (*niścaya*) is made'

Subodhinī: पक्ष-द्वये अपि तव लाभः एव इति अर्थः ॥२.३७॥
यद् अपि उक्तम् 'पापम् एव आश्रयेत् अस्मान्' (1.36) इति तत्र आह – 'सुख-दुःखे' इति –

2.38

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥३८॥

सुख-दुःखे समे कृत्वा	[after] regarding alike happiness and distress
लाभालाभौ जयाजयौ	and also gain and loss, victory and defeat
ततः युद्धाय युज्यस्व !	then prepare for the fight!
एवम् पापम् न अवाप्स्यसि ।	thus you will not incur sin

"Do thou fight for the sake of fighting, without considering happiness or distress, loss or gain, victory or defeat – and by so doing you shall never incur sin."

सुख-दुःखे **happiness and distress** ⟨2.2⟩ n. *sukha-duḥkha*...सुखम् दुःखम् च इति सुख-दुःखे

समे **both equal** ⟨2.2⟩ n. *sama* – same

कृत्वा **[after] doing** ⟨*avyaya*⟩ √*[ḍu]kr[ñ]*...करणे – to do; + *.[k]tvā*

लाभालाभौ **gain and loss** ⟨2.2⟩ m. *lābha-_a-lābha*...लाभः च अ-लाभः च इति लाभालाभौ
लाभ (from √*[ḍu]labh[aṣ]*...प्राप्तौ – to obtain) – gain; *a-lābha* – no gain, loss; (the negation *a-* has six meanings, including absence and diminution)

जयाजयौ **victory and defeat** ⟨2.2⟩ m. *jaya-_ajaya*...जयः च अ-जयः च इति जयाजयौ
जय (from √*ji*...जये – to conquer) – victory; (also from √*ji*:) *jita* – won, conquered; (as in:) *jitendriya* (*jita-_indriya*) – controlled senses
Victory/defeat bring gain/loss, and gain/loss bring happiness/distress.

ततः **then** ⟨*avyaya*⟩ (*tatas*; from *tad* + *.tas[i]*) – from/after/than that

युद्धाय **for the fight** ⟨4.1⟩ n. *yuddha* – battle

युज्यस्व **you must be engaged** ⟨*vidhātā* pass. 2.1⟩ √*yuj[ir]*...योगे – to join, engage, gain

न **not** ⟨*avyaya*⟩

एवम् **thus** ⟨*avyaya*⟩

पापम् **sin** ⟨2.1⟩ n. *pāpa*

अवाप्स्यसि **you will obtain** ⟨*kalki* 2.1⟩ *ava.*√*āp[l̥]* – to obtain

Subodhinī: सुख-दुःखे समे कृत्वा, तथा तयोः कारण-भूतौ यौ लाभ-अलाभौ अपि, तयोः अपि कारण-भूतौ जय-अजयौ अपि समौ कृत्वा । एतेषाम् समत्वे कारणम् हर्ष-विषाद-राहित्यम् । युज्यस्व (सन्नद्धः भव) । सुखादि-अभिलाषम् हित्वा स्वधर्म-बुद्धया युद्धयमानः, पापम् न प्राप्स्यसि इति अर्थः ॥२.३८॥
उपदिष्ट-ज्ञानयोगम् उपसंहरन्, तद्-साधनम् कर्म-योगम् प्रस्तौति – 'एषा' इति –

2.39

एषा तेऽभिहिता साङ्ख्ये बुद्धिर्योगे त्विमां शृणु ।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥३९॥

हे पार्थ !	O Arjuna!
एषा बुद्धिः	this intelligence
साङ्ख्ये ते (तुभ्यम्) अभिहिता	has been explained to you in terms of *sāṅkhya*
योगे तु इमाम् शृणु !	but [now] hear of it in terms of *yoga*!
यया बुद्ध्या युक्तः	endowed with such intelligence
कर्म-बन्धम् प्रहास्यसि ।	you will abandon the bondage of *karma*

"Thus far I have described this knowledge to you through analytical study. Now listen as I explain it in terms of working without fruitive results. O son of Pṛthā, when you act in such knowledge you can free yourself from the bondage of works."

एषा **this** ⟨1.1⟩ f. *kṛṣṇanāma etad* – (first person) he, this

ते **to you** ⟨opt. for *tubhyam* 4.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

अभिहिता **is described** ⟨1.1⟩ f. *abhihitā* (from *abhi.*√*[ḍu]dhā[ñ]* – to name; + *.[k]ta* + *.ā[p]*) – named

साङ्ख्ये **in *sāṅkhya*** ⟨7.1⟩ n. *sāṅkhya* (from *sam.*√*khyā* – to enumerate, analyse) – analysis (esp.) Sāṅkhya, the analysis of the twenty-four elements of material creation, namely *mahat* (material energy), *ahaṅkāra* (false ego), *buddhi* (intelligence), *manaḥ* (mind), five *tan-mātras* (subtle elements), five *mahā-bhūtas* (gross elements) and ten *indriyas* (senses), and how to free the soul from their entanglement; (also from *sam.*√*khyā*:) *saṅkhyā* – calculation, a number

बुद्धिः **intelligence** ⟨1.1⟩ f. *buddhi*

योगे **in *yoga*** ⟨7.1⟩ m. *yoga*

तु **but** ⟨*avyaya*⟩

इमाम् **this** ⟨2.1⟩ f. *kṛṣṇanāma idam* – (first person) he, this

शृणु **you must hear** ⟨*vidhātā* 2.1⟩ √*śru*...श्रवणे – to hear, obey

बुद्ध्या — **with intelligence** ⟨3.1⟩ f. *buddhi* – knowledge; (here:) detachment

युक्तः — **endowed** ⟨1.1⟩ m. *yukta* (√*yuj[ir]*...योगे – to join, engage, gain; + .*[k]ta*)

यया — **that by which** ⟨3.1⟩ f. *kṛṣṇanāma yad* – (relative) who, which

पार्थ — **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'

कर्म-बन्धम् — **the bondage of *karma*** ⟨2.1⟩ m. *karma-bandha*...कर्मणः बन्धः इति कर्म-बन्धः

कर्मन् (*karma*, from √*[ḍu]kṛ[ñ]*...करणे – to do) – activity, work, duty; the object of an activity, product, result, effect; an inevitable result, fate; (as in:) *karma-phala* – the fruit of activity; *karma-vāda* – the philosophy of *karma* (action and reaction in the field of work); (also from √*[ḍu]kṛ[ñ]*...करणे): *kara* – hand; *karaṇa* – instrument; *adhikaraṇa* – substratum; *anukaraṇa* – imitation; *vyākaraṇa* – explanation, grammar; *kāraṇa* – cause; *kārya* – effect, duty; *adhikāra* – authority; *vikāra* – transformation; *kartṛ* (*kartā*) – doer; *karmin* (*karmī*) – worker, fuitive worker; *kṛta* – done; well done; *kṛti* – activity, as in *sukṛti* (virtue) and *duṣkṛti* (sin); *kriyā* – work

बन्ध (from √*bandh[a]*...बन्धने – to bind) – binding; connection, attachment, bondage (opp. to *mukti* or liberation); (also from √*bandh[a]*...बन्धने): *bandhu* – relative, friend

प्रहास्यसि — **you will abandon** ⟨*kalki* 2.1⟩ *pra*.√*[o]hā[k]* – to abandon completely

Subodhinī: सम्यक् ख्यायते (प्रकाश्यते) वस्तु-तत्त्वम् अनया इति 'सङ्ख्या' (सम्यक् ज्ञानम्), तस्मिन् प्रकाशमानम् आत्म-तत्त्वम् 'साङ्ख्यम्', तस्मिन् करणीया बुद्धिः एषा तव अभिहिता। एवम् अभिहितायाम् अपि साङ्ख्य-बुद्धौ तव चेद्, आत्म-तत्त्वम् अ-परोक्षम् न भवति, तर्हि अन्तःकरण-शुद्धि-द्वारा आत्मतत्त्व-अपरोक्षार्थम् कर्म-योगे तु इमाम् बुद्धिम् शृणु। यया बुद्ध्या युक्तः, परमेश्वर-अर्पित-कर्मयोगेन शुद्ध-अन्तःकरणः सन्, तद्-प्रसाद-प्राप्त-अपरोक्ष-ज्ञानेन कर्मात्मकम् बन्धम् प्रकर्षेण हास्यसि (त्यक्ष्यसि) ॥२.३९॥

ननु 'कृष्य-आदिवत् कर्मणाम् कदाचिद् विघ्न-बाहुल्येन फले व्यभिचारात्, मन्त्रादि-अङ्ग-वैगुण्येन च, प्रत्यवाय-सम्भवात्, कुतः कर्म-योगेन कर्मबन्ध-प्रहाणम्?' तत्र आह – 'न इह' इति –

Note: The way of *karma* (action) is difficult to understand (4.18). It is divided into ***karma*** (one's duty, ***sva-dharma***, 2.48), ***vikarma*** (forbidden work, sin), and ***a-karma*** (inactivity, 4.17). *Vikarma*, which produces bad reactions, has to be given up all together. *A-karma*, trying to stop all work, is not recommended (2.47), and because it is not even possible (3.5), real *a-karma* is to work in devotion (***bhakti***), which produces no *karma* (***niṣkarma***). One's duty is further divided into ***nitya-karma*** (regular duty), ***naimittika-karma*** (occasional duty) and ***kāmya-karma*** (work for enjoyment).

To attain freedom from the bondage of *karma* (liberation), one has to give up *kāmya-karma*. *Nitya-* und *naimittika-karma*, although themselves not causes of liberation, are at least helpful, because they keep away the evil effects which would result from their non-performance. About the further procedure to attain liberation there are two view points – one is here refered to as ***yoga*** (the path of duty, ***karma-yoga***), the other as ***sāṅkhya*** (the path of knowledge, ***jñāna-yoga***).

The first one, *karma-yoga*, stresses to renounce all fruits of work (***karma-phala-tyāga***, ***karma-tyāga***, ***tyāga***), by doing one's duty. Thus one gradually becomes purified of material desires (***niṣkāma***), and achieves knowledge (***buddhi***, ***buddhi-***

yoga...*buddhi-rūpaḥ yogaḥ* (*upāyaḥ*) – the means in the form of understanding). The second one, *jñāna-yoga*, stresses to renounce all work meant for sense gratification (***karma-nyāsa***, ***karma-sannyāsa***, ***sannyāsa***, ***sannyāsa-yoga***) by cultivating detachment through spiritual knowledge (***jñāna***, ***sāṅkhya***).

Both are actually non-different, because the goal is the same – detachment from this world and attachment to the Lord. They can be seen as different stages on the same path (5.4). "When *karma-yoga* increases in knowledge and renunciation, the stage is called *jñāna-yoga*. When *jñāna-yoga* increases in meditation on the Lord by different physical processes it is called *aṣṭāṅga-yoga*, which develops into *bhakti-yoga*. One who sticks to a particular stage and does not reach *bhakti*, is called by that particular name (*karma-yogī*, *jñāna-yogī*, *aṣṭāṅga-yogī*)." (Śrīla Prabhupāda)

Since *karma-sannyāsa* is only possible when the mind is already purified (free from desires for sense gratification), to work for purification is a save path for all (3.6,7,17,19). What Śrī Kṛṣṇa recommends is to perform one's duty as a service to the Lord, in full God consciousness. This is the sum and substance of Śrī Kṛṣṇa's instructions to Arjuna in the *Bhagavad-gītā*:

(1) *jñāna-asinā enaṁ saṁśayaṁ chittvā uttiṣṭha* – after cutting your doubt with the sword of knowledge, stand up (4.42);

(2) *sarveṣu kāleṣu māṁ anusmara yudhya ca* – always remember Me, and fight (fighting being the specific duty of Arjuna) (8.7);

(3) *mat-karma-kṛt mad-bhaktaḥ māṁ eti* – one who works for Me in devotion, comes to Me (11.55).

Therefore, at least in the *Bhagavad-gītā*, all the paths mentioned – *karma-yoga*, *yoga*, *niṣkāma-karma*, *naiṣkarma*, *karma-tyāga*, *tyāga*, *buddhi-yoga* and *buddhi* – refer ultimately to *bhakti-yoga*; and to be a *yogī* or *yoga-yukta* means to be a *bhakta* and engaged in *bhakti-yoga*.

2.40

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥४०॥

इह अभिक्रम-नाशः न अस्ति	on this path there is no loss of endeavor
प्रत्यवायः न विद्यते,	there is no reversal,
अस्य धर्मस्य स्वल्पम् अपि	even very little of this *dharma*
महतः भयात् त्रायते ।	protects from great fear

"In this endeavor there is no loss or diminution, and a little advancement on this path can protect one from the most dangerous type of fear."

न — **not** ⟨*avyaya*⟩

इह — **here** ⟨*avyaya*⟩

अभिक्रम-नाशः — **loss of endeavor** ⟨1.1⟩ m. *abhikrama-nāśa*...अभिक्रमस्य नाशः इति अभिक्रम-नाशः

अभिक्रम (from *abhi*.√*kram* – to step near, approach) – undertaking, beginning

अस्ति **there is** ⟨*acyuta* 1.1⟩ √*as[a]*...भुवि – to be, exist

प्रत्यवाय: **reversal** ⟨1.1⟩ m. *pratyavāya* (from *prati.ava.*√*i[ṇ]* – to go down again) – diminution, reversal

न **not** ⟨*avyaya*⟩

विद्यते **there is** ⟨*acyuta* 1.1⟩ √*vid[a]* 4A...सत्तायाम् – to be, exist

स्वल्पम् **very little** ⟨1.1⟩ n. *svalpa* (*su.alpa*)

अपि **also** ⟨*avyaya*⟩

अस्य **of this** ⟨6.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this

धर्मस्य ***dharma*** ⟨6.1⟩ m. *dharma* – religious duty

त्रायते **it protects** ⟨*acyuta* 1.1⟩ √*trai[ṅ]*...पालने – to protect

महत: **from great** ⟨5.1⟩ n. *mahat[u]* – great

भयात् **from fear** ⟨5.1⟩ n. *bhaya* – fear

Subodhinī: इह (निष्काम-कर्म-योगे) अभिक्रमस्य (प्रारम्भस्य) नाशः (निष्फलत्वम्) न अस्ति, प्रत्यवायः च न विद्यते। ईश्वर-उद्देशेन एव विघ्न-वैगुण्यादि-असम्भवात्। किंच, अस्य धर्मस्य स्वल्पम् अपि (उपक्रम-मात्रम् अपि कृतम्) महतः भयात् (संसारात्) त्रायते (रक्षति), नतु काम्य-कर्मवत्, किञ्चिद् अङ्ग-वैगुण्यादिना नैष्फल्यम् अस्य इति अर्थः ॥२.४०॥

कुतः इति अपेक्षायाम् उभयोः वैषम्यम् आह – 'व्यवसाय' इति –

2.41

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयो ऽव्यवसायिनाम् ॥४१॥

हे कुरु-नन्दन !	O Arjuna!
इह व्यवसायात्मिका बुद्धिः एका,	in this the resolute intelligence is one,
अ-व्यवसायिनाम् बुद्धयः	the thoughts of those who are irresolute
बहु-शाखाः हि अनन्ताः च ।	are many-branched and infinite

"Those who are on this path are resolute in purpose, and their aim is one. O beloved child of the Kurus, the intelligence of those who are irresolute is many-branched."

व्यवसायात्मिका **resolute** ⟨1.1⟩ f. *vyavasāya-ātmikā* – 'whose essence is determination', full of determination

व्यवसाय (from *vi.ava.*√*so* – to settle down, resolve) – resolve, determination

आत्मिका (fem. for *ātmaka*) – being of this nature, full of

बुद्धिः **intelligence** ⟨1.1⟩ f. *buddhi*

एका **one** ⟨1.1⟩ f. *kṛṣṇanāma ekā* (*.ā[p]*)

एक – one; alone, solitary, single, once; little, small; identical; the first one (of two or many); unique, singular, chief, excellent; (as in:) *eka-kāla* – 'same time', simultaneous; *ekatā, ekatva* – 'oneness', union, identity; *eka-bhakti* – 'devotion to only one', faithfulness; *ekāgra* (*eka-agra*) – 'one-pointed', attentive; *ekadā* – once; *an-eka* – 'not one', many, much; (derived:) *aikya* – oneness, harmony

इह **here** ⟨*avyaya*⟩

कुरु-नन्दन **O Arjuna!** ⟨8.1⟩ m. *kuru-nandana*...कुरूणाम् नन्दनः इति कुरु-नन्दनः – 'delight of the Kurus'

बहुशाखा: **which are many-branched** ⟨1.3⟩ f. *bahu-śākhā*...बह्व्यः शाखाः यस्याः, सा बहु-शाखा – 'which has many branches'

शाखा – a branch (lit. and fig.); a division, subdivision; a branch or school of knowledge

हि **indeed** ⟨*avyaya*⟩

अनन्ता: **which are infinite** ⟨1.3⟩ f. *an-antā* (*.ā[p]*) – without end, without conclusion

च **and** ⟨*avyaya*⟩

बुद्धय: **the 'intelligences'** ⟨1.3⟩ f. *buddhi*

अ-व्यवसायिनाम् **of those who are irresolute** ⟨6.3⟩ m. *a-vyavasāyin* (*a-vyavasāyī*) – 'who is irresolute'

Subodhinī: इह (ईश्वर-आराधन-लक्षणे कर्म-योगे) व्यवसायात्मिका – 'परमेश्वर-भक्त्या एव ध्रुवम् तरिष्यामि' – इति निश्चयात्मिका एव एक-निष्ठा एव, बुद्धिः भवति। अ-व्यवसायिनाम् तु, बहिः-मुखाणाम् कामिनाम्, कामानाम् आनन्त्यात् [बुद्धयः] अनन्ताः, तत्रापि हि कर्मफल-गुणफलादि-प्रकारभेदात् बहु-शाखाः च बुद्धयः भवन्ति। ईश्वर-आराधनार्थम् हि नित्य-नैमित्तिकम् कर्म किञ्चिद् अङ्ग-वैगुण्येन अपि न नश्यति। 'यथा शक्नुयात् तथा कुर्यात्' इति हि तद् विधीयते। नच वैगुण्यम्, ईश्वर-उद्देशेन एव वैगुण्य-उपरमात्। नतु तथा काम्यम् कर्म। अतः महत् वैषम्यम् इति भावः ॥२.४१॥

ननु 'कामिनः अपि कष्टान् कामान् विहाय व्यवसाय-आत्मिकाम् एव बुद्धिम् किम् न कुर्वन्ति ?' तत्र आह – 'याम्' इति –

2.42-43

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥४२॥
कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् ।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥४३॥

हे पार्थ !	O Arjuna!
याम् इमाम् पुष्पिताम् वाचम्,	such flowery language,
जन्म-कर्म-फल-प्रदाम्	promising good birth and *karma*
भोग-ऐश्वर्य-गतिम् प्रति	aiming at luxury and power

क्रिया-विशेष-बहुलाम्	[describing such] various great sacrifices,
कामात्मानः स्वर्ग-पराः	those who are full of desires, desiring heaven
न अन्यत् अस्ति इति वादिनः	declaring that 'there is nothing better'
अ-विपश्चितः वेद-वाद-रताः	such ignorant followers of the *Vedas*
प्रवदन्ति . . .	they speak [such language] . . .

"Men of small knowledge are very much attached to the flowery words of the Vedas, which recommend various fruitive activities for elevation to heavenly planets, resultant good birth, power, and so forth. Being desirous of sense gratification and opulent life, they say that there is nothing more than this."

याम् **that which** ⟨2.1⟩ f. *kṛṣṇanāma yad* – (relative) who, which

इमाम् **this** ⟨2.1⟩ f. *kṛṣṇanāma idam* – (first person) he, this

पुष्पिताम् **flowery** ⟨2.1⟩ f. *puṣpitā* (from √*puṣp[a]*...विकसने – to open, blossom; + *.ā[p]*) – blossomed

(also from √*puṣp[a]*...विकसने): *puṣpa* – flower

वाचम् **speech** ⟨2.1⟩ f. *vāk*

प्रवदन्ति **they declare** ⟨*acyuta* 1.3⟩ *pra.*√*vad[a]* – to declare

अ-विपश्चितः **who are ignorant** ⟨1.3⟩ m. *a-vipaścit* – unwise

विपश्चित् – inspired, wise, learned; *vipa, vipra* – a wise man

वेद-वाद-रताः **who follow the *Vedas*** ⟨1.3⟩ m. *veda-vāda-rata*...वेदानाम् वादे रतः इति वेद-वाद-रतः – 'who is attached to the word of the *Vedas*'

वाद – speech, discourse, statement, explanation, advice; argument, doctrine

रत (√*ram[u]*...क्रीडायाम् – to play, rejoice; + *.[k]ta*) – pleased, gratified; fond of, devoted to; (also from √*ram[u]*...क्रीडायाम्): *rati* – pleasure, fondness; amorous enjoyment; *ramaṇa* – pleasing; pleasure; a lover; *rāma* – pleasure; a name of the Lord: "The mystics derive unlimited transcendental pleasures from the Absolute Truth, which is therefore known as Rāma." (*Padma-Purāṇa, Śata-nāma-stotra* of Lord Rāmacandra 8) Three of the *avatāras* of Viṣṇu have the name Rāma, namely Paraśurāma, Rāmacandra and Balarāma. The *karma-kāṇḍa* (*karma* section) of the *Vedas* deals with sacrificial rites for elevation to heaven.

पार्थ **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'

न **not** ⟨*avyaya*⟩

अन्यत् **another** ⟨1.1⟩ n. *kṛṣṇanāma anya* – other

अस्ति **there is** ⟨*acyuta* 1.1⟩ √*as[a]*...भुवि – to be, exist

इति **thus** ⟨*avyaya*⟩

वादिनः **those who declare** ⟨1.3⟩ m. *vādin* (*vādī*) – 'who declares'

कामात्मानः **which are full of desires** ⟨1.3⟩ m. *kāma-_ātman* (*-ātmā*)...कामः आत्मा यस्य, सः कामात्मा – 'whose nature is desire', full of desires

काम (from √*kam[u]*...कान्तौ । कान्तिरिच्छा – to desire) – desire, pleasure; worldly desire for sense gratification; affection, love (esp. sensuality, lust); (as in:) *kāma-deva* – 'god of love', cupid; *kāma-dhenu* – 'wish-fulfilling cow' (*surabhi*); *kāma-sūtra* – the title of a celebrated work on sexual love by Vātsyāyana (who prefered to remain a *brahmacārī*); *sa-kāma* – with desire (as in *sakāma-karma* – fruitive or selfish work; opp. to *niṣkāma-karma* – selfless work); (derived:) *kāmya* – desirable (an optional activity opp. to *nitya* and *naimittika*)

स्वर्ग-पराः **whose highest goal is heaven** ⟨1.3⟩ m. *svarga-para*...स्वर्गः परः यस्य, सः स्वर्ग-परः

जन्म-कर्म-फल-प्रदाम् **yielding a good birth and the results of *karma*** ⟨2.1⟩ f. *janma-karma-phala-pradā* (*.ā[p]*)

जन्म – birth, good birth

कर्म – work, *karma*

फल – a fruit; any consequence, effect, result (good or bad), i.e. advantage or disadvantage, gain or loss, reward or punishment (as in *karma-phala* – the result of work); benefit, enjoyment (as in *phala-da* – yielding, rewarding)

क्रिया-विशेष-बहुलाम् **abounding with various ceremonies** ⟨2.1⟩ f. *kriyā-viśeṣa-bahulā* (*.ā[p]*)...क्रियाणाम् विशेषः बहुलः यस्य, सः क्रिया-विशेष-बहुलः

बहुल (from *bahu* – much, many) – 'containing many'; abundant, numerous; (similarly:) *bahudhā, bahu-vidha* – in many ways, variously

भोगैश्वर्य-गतिम् **the goal of luxury and power** ⟨2.1⟩ f. *bhoga-_aiśvarya-gati*...भोगस्य च ऐश्वर्यस्य च गतिः इति भोगैश्वर्य-गतिः

ऐश्वर्य (from *īś[a]*...ऐश्वर्य्ये – to lord) – supremacy, power; supernatural power, like the *siddhis* (*aṇiman, laghiman*, etc.) or omniscience; (also from *īś[a]*...ऐश्वर्य्ये): *īśa, īśāna, īśvara* – lord, god

गति (from √*gam[l̥]*...गतौ – to go) – going; movement, progress; arriving at, obtaining; path, course; means, method; state, condition; goal; (√*gam[l̥]*...गतौ: + *.[k]ta*) *gata* – gone, departed, as in *gata-cetas* – deprived of sense or consciousness; *gatāgata* (*gata-_āgata*) – 'going and coming'

प्रति **towards** ⟨*avyaya*⟩

Subodhinī: याम् इमाम् पुष्पिताम् (पुष्पित-विष-लतावत् आपात-रमणीयाम्) प्रकृष्टाम् परमार्थ-फल-पराम् एव वदन्ति वाचम्, स्वर्गादि-फल-श्रुतिम् ये तेषाम्, तया वाचा अपहृत-चेतसाम् व्यवसायात्मिका बुद्धिः समाधौ विधीयते इति तृतीयेन अन्वयः । किम् इति तथा वदन्ति ? यतः अ-विपश्चितः मूढाः । तत्र हेतुः – वेदे ये वादाः अर्थ-वादाः – 'अ-क्षयम् ह वै चातुर्मास्य-याजिनः सुकृतम् भवति' (*Śatapatha Brā.* 2.6.3.1), 'अपाम सोमम् अमृता अभूम' (*Ṛg* 8.48.3) इति आद्याः – तेषु ऐव रताः प्रीताः । 'अतएव अतः परम् अन्यत् ईश्वर-तत्त्वम् न अस्ति' इति वदन-शीलाः ॥२.४२॥ अतएव – 'कामात्मानः' इति – कामात्मानः काम-आकुल-चित्ताः । अतः स्वर्गः एव परः पुरुषार्थः येषाम् ते । जन्म च तत्र कर्माणि च तद्-फलानि च प्रददाति इति तथा ताम् । भोग-ऐश्वर्ययोः गतिम्

(प्राप्तिम्) प्रति साधन-भूताः ये क्रिया-विशेषाः, ते बहुलाः यस्याम् ताम् प्रवदन्ति इति अनुषङ्गः ॥२.४२-४३॥
ततः च – 'भोग-ऐश्वर्य-प्रसक्तानाम्' इति –

2.44

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् ।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥४४॥

. . . भोगैश्वर्य-प्रसक्तानाम्	. . . of those who are attached to luxury and power
तया अपहृत-चेतसाम्	and whose minds are stolen by that (flowery language)
समाधौ व्यवसायात्मिका बुद्धिः	a resolute intelligence in meditation
न विधीयते ।	does not take place

"In the minds of those who are too attached to sense enjoyment and material opulence, and who are bewildered by such things, the resolute determination for devotional service to the Supreme Lord does not take place."

भोगैश्वर्य-प्रसक्तानाम् **of those who are attached to luxury and power** ⟨6.3⟩ m. *bhoga-_aiśvarya-prasakta*...भोगे ऐश्वर्ये च प्रसक्तः इति भोगैश्वर्य-प्रसक्तः – 'who is attached to luxury and power'
प्रसक्त (*pra.√sañj[a]* – to stick completely; + *.[k]ta*) – completely attached; (from *√sañj[a]*...सङ्गे – to embrace, stick:) *saṅga* – touch, contact, association; devotion, attachment, (esp.) selfish material desire

तया **by that** ⟨3.1⟩ f. *kṛṣṇanāma tad* – (first person) he, that

अपहृत-चेतसाम् **of those whose mind is attracted** ⟨6.3⟩ m. *apahṛta-cetas (-cetaḥ)*...अपहृतम् चेतः यस्य, सः अपहृत-चेतः – 'whose mind is attracted'
अपहृत (*apa.√hṛ[ñ]* – to carry away; + *.[k]ta*) – carried away, attracted, stolen

व्यवसायात्मिका **resolute** ⟨1.1⟩ f. *vyavasāya-_ātmikā* (fem. for *-ātmaka*)

बुद्धिः **intelligence** ⟨1.1⟩ f. *buddhi*

समाधौ **in meditation** ⟨7.1⟩ m. *samādhi* (from *sam.ā.√[ḍu]dhā[ñ]* – to hold, concentrate) – concentration, absorption, the last stage of meditation; a sanctuary of a saint

न **not** ⟨*avyaya*⟩

विधीयते **it is held** ⟨*acyuta karma-kartari* 1.1⟩ *vi.√[ḍu]dhā[ñ]* – to hold, make

Subodhinī: भोग-ऐश्वर्ययोः प्रसक्तानाम् (अभिनिविष्टानाम्) तया (पुष्पितया वाचा) अपहृतम् (आकृष्टम्) चेतः येषाम्, तेषाम् समाधिः (चित्त-एकाग्रचम्, परमेश्वर-एकाग्रच-अभिमुखत्वम्) तस्मिन् निश्चयात्मिका बुद्धिः न विधीयते । कर्म-कर्तरि प्रयोगः, न उत्पद्यते इति अर्थः ॥२.४४॥

ननु च 'यदि स्वर्गादिकम् परमम् फलम् न भवति, तर्हि किम् इति वेदैः तद्-साधनतया कर्माणि विधीयन्ते ?' तत्र आह – 'त्रैगुण्य-विषयाः' इति –

2.45

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥४५॥

वेदाः त्रैगुण्य-विषयाः,	the *Vedas* deal with the three *guṇas* (desires),
हे अर्जुन !	O Arjuna!
निस्त्रैगुण्यः भव !	be free from the three *guṇas*!
निर्द्वन्द्वः नित्य-सत्त्व-स्थः	[be] free from dualities, established in goodness
निर्योग-क्षेमः	free from anxiety for gain and safety
आत्मवान्	and established in the self

"The Vedas deal mainly with the subject of the three modes of material nature. O Arjuna, become transcendental to these three modes. Be free from all dualities and from all anxieties for gain and safety, and be established in the self."

त्रैगुण्य-विषयाः **whose subject is the three *guṇas*** ⟨1.3⟩ m. *traiguṇya-viṣaya*...त्रैगुण्यम् विषयः यस्य, सः त्रैगुण्य-विषयः
गुण (from *√grah[a]*...उपादाने – to take) – a single thread; subdivision, secondary element; an attribute (as sound is the *guṇa* of ether, etc.); a quality, esp. a good quality or virtue (as opp. to *viguṇa*); a material quality of *prakṛti* (material nature); there are three *guṇas* (*tri-guṇa*), namely *sattva-guṇa* (goodness), *rajo-guṇa* (passion) and *tamo-guṇa* (ignorance); (from *tri-guṇa*:) *trai-guṇya* – relating to the three *guṇas*; *viṣaya* – sphere (of influence or activity); a subject-matter; sense object

वेदाः **the *Vedas*** ⟨1.3⟩ m. *veda – Veda*

निस्त्रैगुण्यः **who is without the three *guṇas*** ⟨1.1⟩ m. *nistraiguṇya*

भव **you must be** ⟨*vidhātā* 2.1⟩ *√bhū*...सत्तायाम् – to be, exist, become

अर्जुन **O Arjuna!** ⟨8.1⟩ m. *arjuna* – white, 'who is pure in actions'

निर्द्वन्द्वः **who is free from dualities** ⟨1.1⟩ m. *nirdvandva*
द्वन्द्व – 'two-two', pair; a pair of opposites (a duality like heat and cold, happiness and distress)

नित्य-सत्त्व-स्थः **who is always stays in *sattva-guṇa*** ⟨1.1⟩ m. *nitya-sattva-stha*...यः नित्यम् सत्त्वे तिष्ठति, सः नित्य-सत्त्व-स्थः

निर्योग-क्षेमः **for whom there is nothing to achieve or protect** ⟨1.1⟩ m. *niryoga-kṣema*...न अस्ति योगः च क्षेमः च यस्य, सः निर्योग-क्षेमः

आत्मवान् **who is situated in the self** ⟨1.1⟩ m. *ātmavat* (*.vat[u]*) – 'having *ātmā* (the self)'; situated in the self

Subodhinī: त्रिगुणात्मिकाः स-कामाः ये अधिकारिणः तद्-विषयाः, तेषाम् कर्म-फल-सम्बन्ध-प्रतिपादकाः वेदाः । त्वम् तु निस्त्रैगुण्यः, निष्कामः भव । तत्र उपायम् आह – निर्द्वन्द्वः (सुखदुःख-शीतोष्णादि-युगलानि द्वन्द्वानि तद्-रहितः) भव । तानि सहस्व इति अर्थः । कथम् ? इति अत्र आह – नित्य-सत्त्व-स्थः सन्, धैर्यम् अवलम्ब्य इति अर्थः । तथा निर्योग-क्षेमः, अप्राप्त-स्वीकारः योगः, प्राप्त-परिपालनम् क्षेमः तद्-रहितः । आत्मवान् (अ-प्रमत्तः) । नहि द्वन्द्व-आकुलस्य योग-क्षेम-व्यापृतस्य च प्रमादिनः त्रैगुण्य-अतिक्रमः सम्भवति इति ॥२.४५॥

ननु 'वेदोक्त-नानाफल-परित्यागेन निष्कामतया ईश्वर-आराधन-विषया व्यवसायात्मिका बुद्धिः तु कुबुद्धिः एव ?' इति आशङ्क्य आह – 'यावान्' इति –

2.46

यावानर्थ उदपाने सर्वतः सम्प्लुतोदके ।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥४६॥

यावान् अर्थः उदपाने	as much as the purpose in a well (namely water)
सर्वतः सम्प्लुतोदके,	is in all respects in a great lake,
तावान्	that much [is the purpose]
विजानतः ब्राह्मणस्य	for an enlightened *brāhmaṇa* (namely *brahma-jñāna*)
सर्वेषु वेदेषु ।	in all the *Vedas*

"All purposes served by a small well can at once be served by a great reservoir of water. Similarly, all the purposes of the Vedas can be served to one who knows the purpose behind them."

यावान् **as much** ⟨1.1⟩ m. *yāvat* – to which extent, i.e. as much, as long

अर्थः **purpose** ⟨1.1⟩ m. *artha* – aim, purpose, wealth

उदपाने **in a well** ⟨7.1⟩ n. *uda-pāna* – a well
उद (same as *udaka*) – water
पान – drinking

सर्वतः **in all respects** ⟨*avyaya*⟩ (*sarvatas*; from *sarva* + *.tas[i]*) – 'from all', on all sides, completely

सम्प्लुतोदके **in a great lake** ⟨7.1⟩ n. *sampluta-_udaka*...सम्प्लुतम् उदकम् इति सम्प्लुतोदकम् – 'an overflowing water', a great lake
सम्प्लुत (*sam.√plu[ṅ]* – to flood; + *.[k]ta*) – flooded

तावान् **that much** ⟨1.1⟩ m. *kṛṣnanāma tāvat* – to that extent

सर्वेषु **in all** ⟨7.3⟩ m. *kṛṣnanāma sarva* – all

वेदेषु **in the *Vedas*** ⟨7.3⟩ m. *veda* – *Veda*

ब्राह्मणस्य **of a *brāhmaṇa*** ⟨6.1⟩ m. *brāhmaṇa* – 'related to *brahma*'; or ब्रह्म जानाति इति ब्राह्मणः 'who knows *brahma* (the self)'

विजानतः **of one who is realizing** ⟨6.1⟩ m. *vijānat* (*vi.√jñā* – to understand; + *.[ś]at[ṛ]*) – [while] understanding

Subodhinī: उदकम् पीयते अस्मिन् इति उदपानम्, वापी-कूप-तडाकादि, तस्मिन् स्वल्प-उदके एकत्र कृत्स्नस्य अर्थस्य अ-भावात्, तत्र तत्र परिभ्रमणेन विभागशः यावान् स्नान-पानादिः अर्थः प्रयोजनम् भवति, तावान् सर्वः अपि अर्थः सर्वतः सम्प्लुत-उदके (महा-ह्रदे) एकत्र एव यथा भवति, एवम् यावान् सर्वेषु वेदेषु तद्-तद्-कर्मफल-रूपः अर्थः, तावान् सर्वः अपि विजानतः व्यवसायात्मिक-बुद्धि-युक्तस्य ब्राह्मणस्य (ब्रह्म-निष्ठस्य) भवति एव, ब्रह्म-आनन्दे क्षुद्र-आनन्दानाम् अन्तः-भूतत्वात्, 'एतस्य एव आनन्दस्य अन्यानि भूतानि मात्राम् उपजीवन्ति' (*Bṛhad-āraṇyaka-Up.* 4.3.32) इति श्रुतेः । तस्मात् इयम् एव बुद्धिः सुबुद्धिः इति अर्थः ॥२.४६॥

तर्हि सर्व-कर्म-फलानि परमेश्वर-आराधनात् एव भविष्यन्ति इति अभिसन्धाय, मादृशः प्रवर्तेत, किम् कर्मणा इति आशङ्क्य, तद् वारयन् आह –'कर्मणि एव' इति –

2.47

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गो ऽस्त्वकर्मणि ॥४७॥

कर्मणि एव ते (तव) अधिकारः	your right is to work only
मा फलेषु कदाचन,	not at any time to the results,
कर्म-फल-हेतुः मा भूः !	do not be motivated by the result of work!
अ-कर्मणि ते (तव) सङ्गः मा अस्तु !	be not attached to inactivity!

"You have a right to perform your prescribed duty, but you are not entitled to the fruits of action. Never consider yourself the cause of the results of your activities, and never be attached to not doing your duty."

कर्मणि **in work** ⟨7.1⟩ n. *karman* (*karma*) – activity

एव **certainly** ⟨*avyaya*⟩

अधिकारः **the right** ⟨1.1⟩ m. *adhikāra* – 'to place at the head', authority, claim, jurisdiction, privilege; qualification; (as in:) *adhikārin* (*adhikārī*) – 'who has the right or qualification'; the prefix *adhi* – over, above, besides

ते **your** ⟨opt. for *tava* 6.1⟩ *kṛṣnanāma yuṣmad* – (middle person) you

मा **not** ⟨*avyaya*⟩

फलेषु **in the results** ⟨7.3⟩ n. *phala* – fruit, result

कदाचन **at any time** ⟨*avyaya*⟩

मा **not** ⟨*avyaya*⟩

कर्म-फल-हेतुः **whose motive is the fruit of work** ⟨1.1⟩ m. *karma-phala-hetu*...कर्मणः फलम् हेतुः यस्य, सः कर्म-फल-हेतुः
हेतु – 'impulse', motive, cause, reason

भूः **you should be** ⟨*bhūteśa* 2.1⟩ √*bhū*...सत्तायाम् – to be, exist, become
In combination with *mā* the prefix *a-* of *bhūteśa* (*abhūḥ*) is not used, and *bhūteśa* has an imperative meaning.

मा **not** ⟨*avyaya*⟩

ते **your** ⟨opt. for *tava* 6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

सङ्गः **attachment** ⟨1.1⟩ m. *saṅga*

अस्तु **it should be** ⟨*vidhātā* 1.1⟩ √*as[a]*...भुवि – to be, exist

अ-कर्मणि **in inactivity** ⟨7.1⟩ n. *a-karman* (*-karma*) – inactivity

Subodhinī: ते (तव) तत्त्व-ज्ञानार्थिनः कर्मणि एव अधिकारः । तद्-फलेषु बन्ध-हेतुषु अधिकारः (कामः) मा अस्तु । ननु 'कर्मणि कृते तद्-फलम् स्यात् एव ? भोजने कृते तृप्तिवत्' इति आशङ्क्य आह – 'मा कर्म-फल-हेतुः भूः' । कर्म-फलम् प्रवृत्ति-हेतुः यस्य तथा-भूतः मा भूः । कामितस्य एव स्वर्गादेः नियोज्य-विशेषणत्वेन फलत्वात्, अ-कामितम् फलम् न स्यात् इति भावः । अतएव, 'फलम् बन्धकम् भविष्यति' इति भयात्, अ-कर्मणि (कर्म अ-करणे) अपि तव सङ्गः (निष्ठा) मा अस्तु ॥२.४७॥
किम् तर्हि ? – 'योग-स्थः' इति –

2.48

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥४८॥

हे धनञ्जय !	O Arjuna!
सङ्गम् त्यक्त्वा	[after] giving up attachment
सिद्ध्यसिद्ध्योः समः भूत्वा	[and after] being equal in success and failure
योग-स्थः कर्माणि कुरु !	established in *yoga*, do your duties!
समत्वम् योगः उच्यते ।	[such] equanimity is called *yoga*

"Perform your duty equipoised, O Arjuna, abandoning all attachment to success or failure. Such equanimity is called yoga."

योग-स्थः **who stays in *yoga*** ⟨1.1⟩ m. *yoga-stha*...यः योगे तिष्ठति, सः योग-स्थः

कुरु **you must do** ⟨*vidhātā* 2.1⟩ √*[du]kṛ[ñ]*...करणे – to do

कर्माणि **duties** ⟨2.3⟩ n. *karman* (*karma*) – activity

सङ्गम् **attachment** ⟨2.1⟩ m. *saṅga*

त्यक्त्वा **[after] abandoning** ⟨*avyaya*⟩ √*tyaj[a]*...हानौ – to abandon; + *.[k]tvā*

धनञ्जय **O Arjuna!** ⟨8.1⟩ m. *dhanam-_jaya* – 'winner of riches'

सिद्ध्यसिद्ध्योः **in success and failure** ⟨7.2⟩ f. *siddhi-_asiddhi*...सिद्धिः असिद्धिः च इति सिद्ध्यसिद्धी – success and failure
सिद्धि (from √*sidh[u]* 4P...संराद्धौ – to succeed) – success, perfection; either as a fruitive result, perfect knowledge, mystic power, liberation or love of Godhead; the eight mystic perfections are *aṇimā* (minuteness), *laghimā* (lightness), *prāpti* (attaining anything), *prākāmya* (irresistible will), *mahimā* (increased size), *īśitva* (lordship), *vaśitva* (subjugating by magic), *kāmāvasāyitā* (suppressing all desires); (also from √*sidh[u]* 4P...संराद्धौ): *siddha* – accomplished, perfected, (as in:) *siddhānta* (*siddha-_anta*) – 'perfected end', conclusion

समः **equal** ⟨1.1⟩ n. *sama* – same

भूत्वा **[after] being** ⟨*avyaya*⟩ √*bhū*...सत्तायाम् – to be, exist, become; + *.[k]tvā*

समत्वम् **equanimity** ⟨1.1⟩ n. *samatva* (from *sama* – same; + *.tva*) – 'sameness', equality

योगः ***'yoga'*** ⟨1.1⟩ m. *yoga*

उच्यते **it is called** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak

Subodhinī: योगः (परमेश्वर-एक-परता), तत्र स्थितः कर्माणि कुरु । तथापि सङ्गम् (कर्तृत्व-अभिनिवेशम्) त्यक्त्वा, केवलम् ईश्वर-आश्रयेण एव कुरु । तद्-फलस्य (ज्ञानस्य) अपि सिद्धि-असिद्ध्योः हर्ष-विषादयोः समः भूत्वा, केवलम् ईश्वर-अर्पणेन एव कुरु । यतः एवम्-भूतम् समत्वम् एव 'योगः' उच्यते सद्भिः, चित्त-समाधान-रूपत्वात् ॥२.४८॥
'काम्यम् तु कर्म अतिनिकृष्टम्' इति आह – 'दूरेण' इति –

2.49

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय ।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥४९॥

हे धनञ्जय !	O Arjuna!
बुद्धि-योगात्	by *buddhi-yoga*
अवरम् कर्म दूरेण हि [अस्तु],	let inferior *karma* be far away,
बुद्धौ शरणम् अन्विच्छ !	[therefore] seek shelter in *buddhi-yoga*!
फल-हेतवः कृपणाः ।	fruitive workers are misers

"O Dhanañjaya, keep all abominable activities far distant by devotional service, and in that consciousness surrender unto the Lord. Those who want to enjoy the fruits of their work are misers."

दूरेण **far** ⟨3.1⟩ n. *dūra* – distant (in space and time), far; much, i.e. in a high degree
Dūra, *dūreṇa* and *dūrāt* can all be used in the sense of 'far'

हि indeed ⟨*avyaya*⟩

अवरम् **inferior** ⟨1.1⟩ n. *avara* (from *ava.* – down) – low, inferior; posterior, younger

कर्म ***karma*** ⟨1.1⟩ n. *karman* (*karma*) – activity

बुद्धि-योगात् **than *buddhi-yoga*** ⟨5.1⟩ m. *buddhi-yoga*...बुद्ध्या योगः इति बुद्धि-योगः – '*yoga* through intelligence'

धनञ्जय **O Arjuna** ⟨8.1⟩ m. *dhanam-_jaya* – 'winner of riches'

बुद्धौ **in *buddhi-yoga*** ⟨7.1⟩ f. *buddhi* – intelligence

शरणम् **shelter** ⟨2.1⟩ n. *śaraṇa* – protecting; shelter, refuge

अन्विच्छ **you must seek** ⟨*vidhātā* 2.1⟩ *anu.*√*iṣ[u]* – to seek for

कृपणाः **who are misers** ⟨1.3⟩ m. *kṛpaṇa* – poor, wretched

फल-हेतवः **whose motive is the fruit** ⟨1.3⟩ m. *phala-hetu*...फलम् हेतुः यस्य, सः फल-हेतुः

Subodhinī: बुद्ध्या (व्यवसायात्मिकया) कृतः कर्म-योगः 'बुद्धि-योगः', बुद्धि-साधन-भूतः वा, तस्मात् सकाशात् अन्यत् काम्यम् कर्म दूरेण अ-वरम् (अत्यन्तम् अपकृष्टम्)। हि यस्मात् एवम्, तस्मात् बुद्धौ (पाप-निवृत्ति-द्वारा ज्ञाने) शरणम् (आश्रयम्) कर्म-योगम् अन्विच्छ (अनुतिष्ठ)। यद्वा बुद्धौ शरणम् (त्रातारम्), ईश्वरम् आश्रय इति अर्थः। फल-प्रयोजक-हेतवः तु स-कामाः नराः कृपणाः (दीनाः)। 'यः वा एतद् अ-क्षरम् अ-विदित्वा गार्गि अस्मात् लोकात् प्रैति, सः कृपणः' (*Bṛhad-āraṇyaka-Up.* 3.8.10) इति श्रुतेः ॥२.४९॥

बुद्धि-योग-युक्तः तु श्रेष्ठः इति आह – 'बुद्धि-युक्तः' इति –

Note: The other reading – *karma dūreṇa avaram* [*asti*] (*karma* is by far inferior) – is explained by Śrīdhara Svāmī.

2.50

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥५०॥

बुद्धि-युक्तः	one who is engaged in *buddhi-yoga*
उभे सुकृत-दुष्कृते इह जहाति,	gives up both good and bad deeds in this very life,
तस्मात् योगाय युज्यस्व !	therefore strive for *buddhi-yoga*!
योगः कर्मसु कौशलम् ।	*buddhi-yoga* is the art to work [without reaction]

"A man engaged in devotional service rids himself of both good and bad actions even in this life. Therefore strive for yoga, which is the art of all work."

बुद्धि-युक्तः **who is engaged in *buddhi-yoga*** ⟨1.1⟩ m. *buddhi-yukta*

जहाति **he abandons** ⟨*acyuta* 1.1⟩ √*[o]hā[k]*...त्यागे – to abandon

इह **here** ⟨*avyaya*⟩

उभे **both** ⟨2.2⟩ n. *kṛṣṇanāma ubha*

सुकृत-दुष्कृते **good and bad deeds** ⟨2.2⟩ n. *sukṛta-duṣkṛta*...सुकृतम् दुष्कृतम् च इति सुकृत-दुष्कृते – good and bad *karma*

तस्मात् **therefore** ⟨*avyaya*⟩

योगाय **for *buddhi-yoga*** ⟨4.1⟩ m. *yoga*

युज्यस्व **you must be engaged** ⟨*vidhātā* pass. 2.1⟩ √*yuj[ir]*...योगे – to join, engage, gain

योगः ***buddhi-yoga*** ⟨1.1⟩ m. *yoga*

कर्मसु **in activities** ⟨7.3⟩ n. *karman* (*karma*) – activity

कौशलम् **the art** ⟨1.1⟩ n. *kauśala* (from *kuśala*) – well-being, good fortune; skilfulness, expertise

kuśala – right, good, well; skilful, expert; *kuśalam* – well-being, happiness

Subodhinī: सुकृतम् (स्वर्गादि-प्रापकम्) दुष्कृतम् (निरयादि-प्रापकम्) ते उभे, इह एव जन्मनि परमेश्वर-प्रसादेन जहाति (त्यजति)। तस्मात् योगाय (तदर्थम् बुद्धि-अर्थाय कर्म-योगाय) युज्यस्व (घटस्व)। यतः, कर्मसु यद् कौशलम्, बन्धकानाम् अपि तेषाम्, ईश्वर-आराधनेन मोक्ष-परत्व-सम्पादन-चातुर्यम्, सः एव योगः ॥२.५०॥

कर्मणाम् मोक्ष-साधनत्व-प्रकारम् आह – 'कर्म-जम्' इति –

Note: In this verse there is no *sandhi* between *iha* and *ubhe*. Such licenses by great authorities are known as *ārṣa-prayoga* (usage by *ṛṣis*). The scriptures are older than the present grammatical treatises and not every usage found in the scripture has been codified.

2.51

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥५१॥

कर्म-जम् फलम् त्यक्त्वा	[after] giving up the result of work
बुद्धि-युक्ताः मनीषिणः	wise men engaged in *buddhi-yoga*
जन्म-बन्ध-विनिर्मुक्ताः	are liberated from the bondage of birth and death
अनामयम् पदम् गच्छन्ति हि ।	and certainly attain the transcendental abode

"By thus engaging in devotional service to the Lord, great sages or devotees free themselves from the results of work in the material world. In this way they become free from the cycle of birth and death and attain the state beyond all miseries (by going back to Godhead)."

कर्म-जम् **born from activity** ⟨2.1⟩ n. *karma-ja*

बुद्धि-युक्ताः **engaged in *buddhi-yoga*** ⟨1.3⟩ m. *buddhi-yukta*

हि **indeed** ⟨*avyaya*⟩

फलम् **the result** ⟨2.1⟩ n. *phala* – fruit, result

त्यक्त्वा **[after] abandoning** ⟨*avyaya*⟩ √*tyaj[a]*...हानौ – to abandon; + *.[k]tvā*

मनीषिणः **wise men** ⟨1.3⟩ m. *manīṣin* (*manīṣī*) – 'who is thoughtful', a wise man

जन्म-बन्ध-विनिर्मुक्ताः **who are liberated from the bondage of birth** ⟨1.3⟩ m. *janma-bandha-vinirmukta*...जन्मनः बन्धात् विनिर्मुक्तः इति जन्म-बन्ध-विनिर्मुक्तः – 'liberated from the bondage of birth'

विनिर्मुक्त (*vi.nir.√muc[l]* – to release; + *.[k]ta*) – released, liberated; (similarly:) *mukti* – liberation; *mumukṣu* – who is eager for liberation

पदम् **to the abode** ⟨2.1⟩ n. *pada* (from *√pad[a]*...गतौ – to go) – step; foot; a footing, postion, abode; a part, division; word

(as in:) *pada-kamala* – 'lotus-like foot'; *padārtha* (*pada-_artha*:) – 'meaning of a word', subject matter; (similarly:) *pāda* – foot; root (the foot of a tree); a quarter (as one leg of a quadruped being), verse quarter; added to proper names or titles in token of respect (as in *prabhu-pāda*)

गच्छन्ति **they go** ⟨*acyuta* 1.3⟩ *√gam[l]*...गतौ – to go

अनामयम् **transcendental** ⟨2.1⟩ n. *an-āmaya* – 'free from fault', pure, transcendental

Subodhinī: कर्म-जम् फलम् त्यक्त्वा, केवलम् ईश्वर-आराधनार्थम् कर्म कुर्वाणाः, मनीषिणः (ज्ञानिनः) भूत्वा, जन्म-रूपेण बन्धेन विनिर्मुक्ताः सन्तः, अनामयम् (सर्व-उपद्रव-रहितम्) विष्णोः पदम् मोक्ष-आख्यम् गच्छन्ति ॥२.५१॥

कदा तद् पदम् अहम् प्राप्स्यामि ? इति अपेक्षायाम् आह – 'यदा' इति द्वाभ्याम् –

2.52

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥५२॥

यदा ते (तव) बुद्धिः	when your intelligence
मोह-कलिलम् व्यतितरिष्यति,	will [thus] pass the deep illusion (bodily identification),
श्रोतव्यस्य श्रुतस्य च	towards what is to be heard and what was heard
तदा निर्वेदम् गन्तासि ।	you will then become detached

"When your intelligence has passed out of the dense forest of delusion, you shall become indifferent to all that has been heard and all that is to be heard."

यदा **when** ⟨*avyaya*⟩

ते **your** ⟨opt. for *tava* 6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

मोह-कलिलम् **the thicket of illusion** ⟨2.1⟩ n. *moha-kalila*...मोहस्य कलिलम् इति मोह-कलिलम्

मोह (from *√muh[a]*...वैचित्ये – to be bewildered) – bewilderment, ignorance

कलिल – mixed, covered; impenetrable; (*-am*:) a large heap, thicket, confusion

बुद्धिः **intelligence** ⟨1.1⟩ f. *buddhi*

व्यतितरिष्यति **it will cross** ⟨*kalki* 1.1⟩ *vi.ati.√tṝ* – to cross

तदा **then** ⟨*avyaya*⟩

गन्तासि **you will go** ⟨*bālakalki* ⟩ *√gam[l]*...गतौ – to go

निर्वेदम् **detached** ⟨2.1⟩ m. *nirveda* – 'unscriptural', infidel, indifferent; detachment

श्रोतव्यस्य **of what is to be heard** ⟨6.1⟩ n. *śrotavya* (*√śru*...श्रवणे – to hear, obey; + *.tavya*) – to be heard

श्रुतस्य **of what is heard** ⟨6.1⟩ n. *śruta* (*√śru*...श्रवणे – to hear, obey; +*.[k]ta*) – heard, known, famous, celebrated

च **and** ⟨*avyaya*⟩

Subodhinī: मोहः (देहादिषु आत्म-बुद्धिः), तद् एव कलिलम् । 'कलिलम् गहनम् विदुः' (*Amara-koṣa* 3.1.85) इति अभिधान-कोश-स्मृतेः । ततः च अयम् अर्थः – एवम् परमेश्वर-आराधने क्रियमाणे यदा तद्-प्रसादेन तव बुद्धिः देह-अभिमान-लक्षणम् मोह-मयम् गहनम् (दुर्गम्) विशेषेण अतितरिष्यति, तदा श्रोतव्यस्य श्रुतस्य च अर्थस्य निर्वेदम् (वैराग्यम्) गन्तासि (प्राप्स्यसि) । तयोः अनुपादेयत्वेन, जिज्ञासाम् न करिष्यसि इति अर्थः ॥२.५२॥

ततः च – 'श्रुति' इति –

2.53

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥५३॥

यदा ते (तव) श्रुति-विप्रतिपन्ना बुद्धिः	when your intelligence, [now] perplexed by the *Vedas*,
समाधौ निश्चला अ-चला स्थास्यति,	will steadily remain fixed in *samādhi*,
तदा योगम् अवाप्स्यसि ।	then you will attain *yoga*

"When your mind is no longer disturbed by the flowery language of the Vedas, and when it remains fixed in the trance of self-realization, then you will have attained the divine consciousness."

श्रुति-विप्रतिपन्ना **perplexed by the *Vedas*** ⟨1.1⟩ f. *śruti-vipratipannā*...श्रुतिभिः विप्रतिपन्ना इति श्रुति-विप्रतिपन्ना

विप्रतिपन्ना (from *vi.prati.√pad[a]* – to go in opposit directions, be perplexed; + *.[k]ta* + *.ā[p]*) – perplexed

ते **your** ⟨opt. for *tava* 6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

यदा **when** ⟨*avyaya*⟩

स्थास्यति **it will stay** ⟨*kalki* 1.1⟩ *√sthā*...स्थाने – to stand

निश्चला **steady** ⟨1.1⟩ f. *niścalā* (*.ā[p]*) – motionless

समाधौ **in *samādhi*** ⟨7.1⟩ m. *samādhi*

अ-चला **fixed** ⟨1.1⟩ f. *a-calā* (*.ā[p]*) – unmoving

बुद्धिः **intelligence** ⟨1.1⟩ f. *buddhi*

तदा **then** ⟨*avyaya*⟩

योगम् *yoga* ⟨2.1⟩ m. *yoga*
अवाप्स्यसि **you will obtain** ⟨*kalki* 2.1⟩ *ava.√āp[ḷ]* – to obtain

Subodhinī: श्रुतिभिः नाना-लौकिक-वैदिकार्थ-श्रवणैः विप्रतिपन्ना, इतः पूर्वम् विक्षिप्ता सती, ते (तव) समाधौ बुद्धिः यदा स्थास्यति, समाधीयते चित्तम् अस्मिन् इति समाधिः परमेश्वरः, तस्मिन् निश्चला (विक्षेप-व्याप्त-विषय-अन्तरैः अनाकृष्टा) अतएव अ-चला, अभ्यास-पाटुत्वेन तत्र एव स्थिरा च सती, तदा योगम् (योग-फलम्, तत्त्व-ज्ञानम्) अवाप्स्यसि ॥२.५३॥
पूर्व-श्लोक-उक्तस्य आत्म-तत्त्व-ज्ञस्य लक्षणम् जिज्ञासुः – 'स्थित-प्रज्ञस्य' इति –

2.54

अर्जुन उवाच
स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥५४॥

अर्जुनः उवाच - हे केशव !	Arjuna said: O Kṛṣṇa!
स्थित-प्रज्ञस्य समाधि-स्थस्य	of one steady in wisdom, fixed in *samādhi*,
का भाषा ?	what is the definition?
स्थित-धीः किम् प्रभाषेत ?	how should one with firm intelligence 'speak'?
किम् आसीत ?	how should he 'sit' (control his senses)?
किम् व्रजेत ?	how should he 'walk' (act)?

"Arjuna said: O Kṛṣṇa, what are the symptoms of one whose consciousness is thus merged in transcendence? How does he speak, and what is his language? How does he sit, and how does he walk?"

अर्जुनः **Arjuna** ⟨1.1⟩ m. *arjuna* – white, 'who is pure in actions'
उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ *√vac[a]*...परिभाषणे – to speak
स्थित-प्रज्ञस्य **of one who is firm in wisdom** ⟨6.1⟩ m. *sthita-prajña*...स्थिता प्रज्ञा यस्य, सः स्थित-प्रज्ञः – whose wisdom is fixed
का **what?** ⟨1.1⟩ f. *kṛṣnanāma kim* – who/what
भाषा **the symptom** ⟨1.1⟩ f. *bhāṣā* (from *√bhāṣ[a]*...व्यक्तायां वाचि – to speak) – speech, language, dialect; description, symptom, characteristic
समाधि-स्थस्य **of one who is situated in *samādhi*** ⟨6.1⟩ m. *samādhi-stha* – situated in *samādhi*
केशव **O Kṛṣṇa!** ⟨8.1⟩ m. *keśava* – 'who has beautiful hair' (*keśa.va*); or 'lord of Brahmā (*ka*) and Śiva (*īśa*)' (*ka-_īśa.va*)
स्थित-धीः **who has a steady intelligence** ⟨1.1⟩ m. *sthita-dhī*...स्थिता धीः यस्य, सः स्थित-धीः
किम् **how?** ⟨2.1⟩ n. *kṛṣnanāma kim* – who/what

प्रभाषेत **he should speak** ⟨*vidhi* 1.1⟩ *pra.√bhāṣ[a]* – to speak, declare
किम् **how?** ⟨2.1⟩ n. *krsnanāma kim* – who/what
आसीत **he should sit** ⟨*vidhi* 1.1⟩ *√ās[a]*...उपवेशने विद्यमानतायां च – to sit; be present
व्रजेत **he should go** ⟨*vidhi* 1.1⟩ *√vraj[a]*...गतौ – to go
किम् **how?** ⟨2.1⟩ n. *kṛṣṇanāma kim* – who/what

Subodhinī: स्वाभाविके समाधौ स्थितस्य, अतएव स्थिता (निश्चला) प्रज्ञा (बुद्धिः) यस्य, तस्य का भाषा ? भाष्यते अनया इति भाषा, लक्षणम् इति यावत् । केन लक्षणेन स्थित-प्रज्ञः उच्यते ? इति अर्थः । तथा स्थित-धीः किम् (कथम्) भाषणम्, आसनम्, व्रजनम् च कुर्यात् ? इति अर्थः ॥२.५४॥
अत्र च यानि साधकस्य ज्ञान-साधनानि, तानि एव स्वाभाविकानि सिद्धस्य लक्षणानि । अतः सिद्धस्य लक्षणानि कथयन् एव, अन्तरङ्गाणि ज्ञान-साधनानि आह, यावत् अध्याय-समाप्तिम् । तत्र प्रथम-प्रश्न-उत्तरम् [श्रीभगवान्] आह – 'प्रजहाति' इति द्वाभ्याम् –

2.55

श्रीभगवानुवाच
प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥५५॥

श्री-भगवान् उवाच - हे पार्थ !	Śrī Kṛṣṇa said: O Arjuna!
आत्मनि एव आत्मना तुष्टः	[being] satisfied in the self by the self
यदा सर्वान् मनोगतान् कामान् प्रजहाति,	when one gives up all desires of the mind,
तदा स्थित-प्रज्ञः उच्यते ।	then he is said to be of steady wisdom

"The Supreme Personality of Godhead said: O Pārtha, when a man gives up all varieties of desire for sense gratification, which arise from mental concoction, and when his mind, thus purified, finds satisfaction in the self alone, then he is said to be in pure transcendental consciousness."

श्री-भगवान् **Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'
उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ *√vac[a]*...परिभाषणे – to speak
प्रजहाति **he abandons** ⟨*acyuta* 1.1⟩ *pra.√[o]hā[k]* – to abandon completely
यदा **when** ⟨*avyaya*⟩
कामान् **desires** ⟨2.3⟩ m. *kāma* – desire
सर्वान् **all** ⟨2.3⟩ m. *kṛṣṇanāma sarva*
पार्थ **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
मनोगतान् **which exist in the mind** ⟨2.3⟩ m. *manaḥ-_gata*...मनः गतः इति मनोगतः – 'gone to mind'
गत (*√gam[ḷ]*...गतौ – to go; + *.[k]ta*) – gone

आत्मनि	**in the self** ⟨7.1⟩ m. *ātman* (*ātmā*) (variously derived) – the spirit, Brahman; the self, individual soul; Supersoul (Param-ātmā); essence, nature, character; (in *samāsa*:) *ātma-*, (as in:) *ātma-tattva* – the category or truth of the soul
एव	**certainly** ⟨*avyaya*⟩
आत्मना	**by the self** ⟨3.1⟩ m. *ātman* (*ātmā*) – the self, soul
तुष्टः	**satisfied** ⟨1.1⟩ m. *tuṣṭa* (√*tuṣ[a]*...तुष्टौ – to be satisfied; + .*[k]ta*) (similarly:) *tuṣṭi*, *toṣa* – satisfaction, pleasure
स्थित-प्रज्ञः	**who is steady in wisdom** ⟨1.1⟩ m. *sthita-prajña*
तदा	**then** ⟨*avyaya*⟩
उच्यते	**he is called** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak

Subodhinī: मनसि स्थितान् सर्वान् कामान् यदा प्रकर्षेण जहाति । त्यागे हेतः – आत्मनि एव (स्वस्मिन् एव परमानन्द-रूपे) आत्मना स्वयम् एव तुष्टः इति । आत्म-आरामः सन् यदा क्षुद्र-विषय-अभिलाषान् त्यजति, तदा तेन लक्षणेन मुनिः 'स्थित-प्रज्ञः' इति उच्यते इति अर्थः ॥२.५५॥

2.56

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥५६॥

दुःखेषु अनुद्विग्न-मनाः	one who is undisturbed in miseries
सुखेषु विगत-स्पृहः	free from hankering in pleasures
वीत-राग-भय-क्रोधः	and free from attachment, fear and anger
स्थित-धीः मुनिः उच्यते ।	is called a sage of steady wisdom

"One who is not disturbed in mind even amidst the threefold miseries or elated when there is happiness, and who is free from attachment, fear and anger, is called a sage of steady mind."

दुःखेषु	**in miseries** ⟨7.3⟩ n. *duḥkha* – misery
अनुद्विग्न-मनाः	**who is undisturbed** ⟨1.1⟩ m. *an-udvigna-manas* (*-manāḥ*)...न उद्विग्नम् मनः यस्य, सः अनुद्विग्न-मनाः – 'whose mind is not disturbed' उद्विग्न (*ud.*√*[o]vij[ī]* – to fear; tremble; + .*[k]ta*) – shaken, agitated, terrified
सुखेषु	**in pleasures** ⟨7.3⟩ n. *sukha* – easiness, happiness
विगत-स्पृहः	**who is free from hankering** ⟨1.1⟩ m. *vigata-spṛha*...विगता स्पृहा यस्य, सः विगत-स्पृहः – 'whose hankering is gone' स्पृहा (from √*spṛh[a]*...ईप्सायाम् – to desire to obtain) – eager desire, longing, hankering; covetousness, envy; pleasure, delight
वीत-राग-भय-क्रोधः	**who is free from attachment, fear and anger** ⟨1.1⟩ m. *vīta-rāga-bhaya-krodha*...वीतः रागः भयम् क्रोधः च यस्य, सः वीत-राग-भय-क्रोधः – 'whose attachment, fear and anger are gone' वीत (*vi.*√*i[ṇ]* – to go away; + .*[k]ta*) – gone away, disappeared, lost राग (from √*rañj[a]*...रागे – to dye, be attached to) – color, redness; any feeling or passion, esp. affection; beauty, harmony, melody; (as in:) *rāga-dveṣa* – love and hatred; *rāgānuga* (*rāga-_anuga*) – 'following one's attraction', spontaneous; *raṅga* – color; *rajas* (*rajaḥ*) – emotion, (as in:) *rajo-guṇa* – mode of passion); *rañjana* – coloring; pleasing, delighting क्रोध (from √*krudh[a]*...क्रोधे – to be angry) – anger; *kruddha* – angered, irritated, angry

स्थित-धीः	**who is steady in wisdom** ⟨1.1⟩ m. *sthita-dhī* – 'steady intelligence' (same as *sthita-prajña*)
मुनिः	**a sage** ⟨1.1⟩ m. *muni*
उच्यते	**he is called** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak

Subodhinī: दुःखेषु प्राप्तेषु अपि अनुद्विग्नम् (अक्षुभितम्) मनः यस्य सः । सुखेषु विगता स्पृहा यस्य सः । तत्र हेतुः – वीताः (अपगताः) राग-भय-क्रोधाः यस्मात् । तत्र रागः प्रीतिः । सः मुनिः 'स्थित-धीः' (स्थित-प्रज्ञः) इति उच्यते इति अर्थः ॥२.५६॥
कथम् भाषेत ? इति अस्य उत्तरम् आह – 'यः' इति –

2.57

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥५७॥

यः सर्वत्र अनभिस्नेहः	one who is unaffected everywhere
तद् तद् शुभाशुभम् प्राप्य	[and after] obtaining whatever good or evil
न अभिनन्दति न द्वेष्टि,	*neither praises it nor hates it,*
तस्य प्रज्ञा प्रतिष्ठिता ।	his wisdom is steady

"In the material world, one who is unaffected by whatever good or evil he may obtain, neither praising it nor despising it, is firmly fixed in perfect knowledge."

यः	**he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
सर्वत्र	**everywhere** ⟨*avyaya*⟩
अनभिस्नेहः	**who is unaffected** ⟨1.1⟩ m. *an-abhisneha* स्नेह (from √*snih[a]*...प्रीतौ – to please, stick) – sticky, oily; attached, affectionate; gentle, lovely; smoothness, tenderness; love, attachment Other words for 'love': *prema*, *prīti*.
तद् तद्	**that respectively** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
प्राप्य	**[after] obtaining** ⟨*avyaya*⟩ *pra.*√*āp[ḷ]* – to obtain; + .*ya[p]*
शुभाशुभम्	**good and evil** ⟨2.1⟩ n. *śubha-_a-śubha*...शुभम् च अ-शुभम् च इति शुभाशुभम्

	शुभ (from √*śubh[a]*...दीप्तौ – to shine) – beautiful, pleasant; auspicious, properous; good, virtuous; *śubham* – anything bright and beautiful; happiness, good fortune, prosperity, benefit, virtuous activity; *śobha* – brilliance, beauty, etc. Other words for 'auspicious': *śiva, bhadra, kalyāna, maṅgala, kuśala, kṣema.*
न	**not** ⟨*avyaya*⟩
अभिनन्दति	**he praises** ⟨*acyuta* 1.1⟩ *abhi.[tu]nad[i]* – to please, praise
द्वेष्टि	**he hates** ⟨*acyuta* 1.1⟩ √*dviṣ[a]*...अप्रीतौ – to hate
तस्य	**his** ⟨6.1⟩ m. *kṛṣṇanāma tad* – (first person) he
प्रज्ञा	**wisdom** ⟨1.1⟩ f. *prajñā* – intelligence, wisdom
प्रतिष्ठिता	**steady** ⟨1.1⟩ f. *pratiṣṭhitā* (*prati.*√*sthā* – to stand firmly; + *.[k]ta* + *.ā[p]*) – firmly situated

Subodhinī: यः सर्वत्र (पुत्र-मित्रादिषु अपि) अनभिस्नेहः (स्नेह-शून्यः) । अतएव बाधित-अनुवृत्त्या तद् तद् शुभम् (अनुकूलम्) प्राप्य न अभिनन्दति (न प्रशंसति), अ-शुभम् (प्रतिकूलम्) प्राप्य न द्वेष्टि (न निन्दति), किन्तु केवलम् उदासीनः एव भाषते, तस्य प्रज्ञा प्रतिष्ठिता इति अर्थः ॥२.५७॥

Note: A *dvandva-samāsa* is usually declined in dual or plural – according to the total number of the members of the compound. But there is a concept called *samāhāra*, which takes all members of a *dvandva-samāsa* collectively, and then the *samāsa* can be declined in singular. F.e., the neuter compound *śubha-aśubha* is declined in dual (*śubhāśubhe* etc.), but in *samāhara* in singular (*śubhāśubham* etc.).

2.58

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥५८॥

यदा च अयम्	and when this [sage]
इन्द्रियाणि	the senses
इन्द्रियार्थेभ्यः सर्वशः संहरते,	completely withdraws from sense objects,
कूर्मः अङ्गानि इव,	as a tortoise his limbs,
तस्य प्रज्ञा प्रतिष्ठिता ।	[then] his wisdom is steady

"One who is able to withdraw his senses from sense objects, as the tortoise draws its limbs within the shell, is firmly fixed in perfect consciousness."

यदा	**when** ⟨*avyaya*⟩
संहरते	**he withdraws** ⟨*acyuta* 1.1⟩ *sam.*√*hṛ[ñ]* – to withdraw
च	**and** ⟨*avyaya*⟩
अयम्	**he** ⟨1.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this

कूर्मः	**a tortoise** ⟨1.1⟩ m. *kūrma*
अङ्गानि	**limbs** ⟨2.3⟩ n. *aṅga* – a limb of the body; limb, member; any division or department (as in *vedāṅga*); anything secondary
इव	**like** ⟨*avyaya*⟩
सर्वशः	**completely** ⟨*avyaya*⟩ (*sarvaśas*) – completely, altogether, in every way, on all sides
इन्द्रियाणि	**senses** ⟨2.3⟩ n. *indriya* – sense, sense organ
इन्द्रियार्थेभ्यः	**from sense objects** ⟨5.3⟩ m. *indriya-_artha*...इन्द्रियस्य अर्थः इति इन्द्रियार्थः – sense object
तस्य	**his** ⟨6.1⟩ m. *kṛṣṇanāma tad* – (first person) he
प्रज्ञा	**wisdom** ⟨1.1⟩ f. *prajñā* – intelligence, wisdom
प्रतिष्ठिता	**steady** ⟨1.1⟩ f. *pratiṣṭhitā* – firmly situated

Subodhinī: यदा च अयम् योगी इन्द्रियार्थेभ्यः (शब्दादिभ्यः) सकाशात् इन्द्रियाणि संहरते (प्रत्याहरति) । अनायासेन संहारे दृष्टान्तः – अङ्गानि कर-चरणादीनि कूर्मः यथा स्व-भावेन एव आकर्षति तद्वत् ॥२.५८॥
ननु 'न इन्द्रियाणाम् विषयेषु अ-प्रवृत्तिः स्थित-प्रज्ञस्य लक्षणम् भवितुम् अर्हति, जडानाम् आतुराणाम् उपवास-पराणाम् च विषयेषु अ-प्रवृत्तेः अ-विशेषात् !' तत्र आह – 'विषया' इति –

2.59

विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥५९॥

निराहारस्य देहिनः	for an embodied soul which is restricted
रस-वर्जम्	except for the taste
विषयाः विनिवर्तन्ते,	the sense objects disappear,
परम् दृष्ट्वा	[but] [after] experiencing a higher [taste]
अस्य रसः अपि निवर्तते ।	his (the embodied soul's) taste even ceases

"The embodied soul may be restricted from sense enjoyment, though the taste for sense objects remains. But, ceasing such engagements by experiencing a higher taste, he is fixed in consciousness."

विषयाः	**sense objects** ⟨1.3⟩ m. *viṣaya* – sense object
विनिवर्तन्ते	**they stop to act** ⟨*acyuta* 1.3⟩ *vi.ni.*√*vṛt[u]* – to stop to act; to return
निराहारस्य	**of one who is restricted** ⟨6.1⟩ m. *nirāhāra* – abstention, fasting
	आहार (from *ā.*√*hṛ[ñ]* – to carry near) – taking (esp. food); (as in:) *atyāhāra* (*ati.āhāra*) – over-eating
देहिनः	**of the embodied soul** ⟨6.1⟩ m. *dehin* (*dehī*) – embodied soul; (here:) a fool in the bodily conception

रस-वर्जम् **except the taste** ⟨*avyaya*⟩ *rasa-varjam*...रसम् वर्जयित्वा इति रस-वर्जम् – '[after] excluding the taste'

The word *nirāhāra* here refers to someone whose every sense enjoyment is under restriction (because of old age, disease, foolishness, poverty, etc.). What remains is his 'taste', i.e. the desire to enjoy. Another interpretation is that *nirāhāra* specifically refers to someone who is fasting. In this case, the sense of taste remains.

रसः **the taste** ⟨1.1⟩ m. *rasa* (from √*ras[a]* 10P...आस्वादन-स्नेहनयोः – to taste; love) – 1. taste (as the principal quality of fluids) and there are six *rasas*, namely *madhura* (sweet), *amla* (sour), *lavaṇa* (salty), *kaṭu* (pungent), *tikta* (bitter) and *kaṣāya* (astringent); 2. any object of taste, any liquid (like water), milk, especially nectar; also the best part of anything, its essence; 3. emotion, and there are twelve *rasas*, namely *bhayānaka* (terror), *bībhatsa* (disgust), *raudra* (anger), *adbhuta* (wonder), *karuṇa* (pity), *vīra* (heroism), *hāsya* (mirth), *śānta* (neutrality), *dāsya* (servitude), *sākhya* (friendship), *vātsalya* (paternal affection) and *śṛṅgara* (love)

(as in:) *rasābhāsa* (*rasa-_ābhāsa*) – a semblance or improper manifestation of an emotion; *rasāyana* (*rasa-_ayana*) – a medicine to prolong life; chemistry; (derived:) *rasika* – who has a taste for, is delighting in

अपि **also** ⟨*avyaya*⟩

अस्य **his** ⟨6.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this

परम् **higher** ⟨2.1⟩ n. *para* – beyond

दृष्ट्वा **[after] seeing** ⟨*avyaya*⟩ √*dṛś[ir]*...प्रेक्षणे – to see; + *.[k]tvā*

निवर्तते **it stops** ⟨*acyuta* 1.1⟩ *ni.*√*vṛt[u]* – to stop to act; to return

Subodhinī: इन्द्रियैः विषयाणाम् आहरणम् (ग्रहणम्) 'आहारः' । निराहारस्य (इन्द्रियैः विषय-ग्रहणनम् अ-कुर्वतः) देहिनः (देह-अभिमानिनः अ-ज्ञस्य) विषयाः विनिवर्तन्ते, तद्-अनुभवः निवर्तते इति अर्थः । किन्तु रसः (रागः, अभिलाषः) तद्-वर्जम् । अभिलाषः तु न निवर्तते इति अर्थः । रसः अपि (रागः अपि) परम् (परमात्मानम्) दृष्ट्वा, अस्य स्थित-प्रज्ञस्य स्वतः निवर्तते (नश्यति) इति अर्थः । यद्वा निराहारस्य उपवास-परस्य विषयाः प्रायशः विनिवर्तन्ते, क्षुधा-सन्तप्तस्य शब्द-स्पर्शादि-अपेक्षा-अभावात् । परन्तु रस-वर्जम्, रस-अपेक्षा तु न निवर्तते इति अर्थः । शेषम् समानम् ॥२.५९॥

इन्द्रिय-संयमम् विना तु स्थित-प्रज्ञता न सम्भवति, अतः साधक-अवस्थायाम् तत्र महान् प्रयत्नः कर्तव्यः इति आह – 'यततः ह्यपि' इति द्वाभ्याम् –

2.60

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥६०॥

हे कौन्तेय !	O Arjuna!
यततः हि अपि विपश्चितः पुरुषस्य	even of an endeavoring wise man
प्रमाथीनि इन्द्रियाणि	the turbulent senses
मनः प्रसभम् हरन्ति ।	forcibly steal the mind

"The senses are so strong and impetuous, O Arjuna, that they forcibly carry away the mind even of a man of discrimination who is endeavoring to control them."

यततः **of one who is endeavoring** ⟨6.1⟩ m. *yatat* (√*yat[ī]*...प्रयत्ने – to endeavor; + *.[ś]at[ṛ]*) – [while] endeavoring

(also from √*yat[ī]*...प्रयत्ने): *yatna, prayatna* – endeavor, performance; *yatin* (*yatī*) – 'one who endeavors', an ascetic, devotee

हि अपि **even** ⟨*avyaya*⟩

कौन्तेय **O Arjuna!** ⟨8.1⟩ m. *kaunteya* – 'son of Kuntī'

पुरुषस्य **of a person** ⟨6.1⟩ m. *puruṣa* – person

विपश्चितः **of a wise man** ⟨6.1⟩ m. *vipaścit* – wise

इन्द्रियाणि **the senses** ⟨1.3⟩ n. *indriya* – sense, sense organ

प्रमाथीनि **which are turbulent** ⟨1.3⟩ n. *pramāthin* (*pramāthī*) (from *pra.*√*math[e]* – to stir strongly) – 'which is turbulent'

हरन्ति **they steal** ⟨*acyuta* 1.3⟩ √*hṛ[ñ]*...हरणे – to carry, remove

प्रसभम् **forcibly** ⟨*avyaya*⟩ – forcibly, violently

मनः **the mind** ⟨2.1⟩ n. *manas* (*manaḥ*)

Subodhinī: यततः (मोक्षे प्रयतमानस्य) अपि विपश्चितः (विवेकिनः) अपि मनः इन्द्रियाणि प्रसभम् (बलात्) हरन्ति । यतः प्रमाथीनि (प्रमथन-शीलानि, प्रक्षोभकराणि) ॥२.६०॥

यस्मात् एवम् तस्मात् – 'तानि' इति –

Note: When Vyāsadeva dictated a similar verse to Jaimini – *balavān indriya-grāmo vidvāṁsam api karṣati* – 'the strong senses attract even a learned man', the latter, being overconscious of his power of self-control changed but one innocent syllable – ... *vidvāṁsaṁ nāpi karṣati* – ... will n o t destract a learned man. Some time later, Jaimini was sitting in his hut. It was evening, and a storm broke out. A beautiful woman, soaked in the rain, asked for shelter. There was a fire lit in the hearth. And while she sat there to dry her clothes, Jaimini felt the pull of the senses. She tried to stop him, then conceded on condition of being carried round the fire three times. Jaimini lifted her, but she began hitting his head with the words *vidvāṁsaṁ nāpi karṣati*! He was amazed to hear the very words he had altered in his *guru*'s teaching. So he stopped. And, indeed, there stood Vyāsa himself, looking at him with a meaningful smile. Jaimini repented, hurried back, and changed the verse to its original form.

2.61

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥६१॥

तानि सर्वाणि संयम्य	[after] controlling all these (the senses)

युक्तः मत्परः आसीत;	the *yogī* should remain fixed on Me,
यस्य इन्द्रियाणि वशे हि	he whose senses are under control
तस्य प्रज्ञा प्रतिष्ठिता ।	his wisdom is steady

"One who restrains his senses, keeping them under full control, and fixes his consciousness upon Me, is known as a man of steady intelligence."

तानि **them** ⟨2.3⟩ n. *kṛṣṇanāma tad* – (first person) he

सर्वाणि **all** ⟨2.3⟩ n. *kṛṣṇanāma sarva*

संयम्य **[after] restraining** ⟨*avyaya*⟩ *sam.√yam[a]* – to restrain; + *.ya[p]*

(also from *√yam[a]* 1P...उपरमे – to restrain:) *yama* – restraint; any rule; a primary moral rule for self-control (opp. to *niyama*, a secondary observance); *yata, niyata, saṁyata* – restrained, (as in:) *yata-cetas, yatātman, niyata-mānasa* (self-controlled); *niyatam* – always, inevitably; *yantra* – an instrument, machine; amulet (often mentioned in connection with *mantra* and *tantra* (ritual; magic))

Definitions given by Patañjali: *ahiṁsā-satya-asteya-brahmacarya-aparigrahāḥ yamāḥ* (*Yoga-sūtras* 2.30); *śauca-santoṣa-tapaḥ-svādhyāya-īśvara-praṇidhānāni niyamāḥ* (2.32).

युक्तः **the *yogī*** ⟨1.1⟩ m. *yukta* (from any *yuj dhātu* + *.[k]ta*) – absorbed; restrained; united, engaged, endowed with

A *yukta* is the same as a *yogī*, and like the word *yoga*, the words *yogī* and *yukta* can be derived from any of the three *yuj dhātus* (see note at the end of the first chapter). Thus a *yogī* or *yukta* can be understood as someone 'who is absorbed in meditation', 'who is self-controlled', or 'who is connected with the Supreme'.

आसीत **he should sit** ⟨*vidhi* 1.1⟩ *√ās[a]*...उपवेशने विद्यमानतायां च – to sit; be present

मत्परः **devoted to Me** ⟨1.1⟩ m. *mad-_para*...अहम् परः यस्य, सः मत्परः – 'whose supreme [shelter or master] I am', subordinate or devoted to Me

वशे **under control** ⟨7.1⟩ m. *vaśa* (from *√vaś[a]*...कान्तौ – to desire) – desire; authority, control

हि **indeed** ⟨*avyaya*⟩

यस्य **whose** ⟨6.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

इन्द्रियाणि **senses** ⟨1.3⟩ n. *indriya* – sense, sense organ

तस्य **his** ⟨6.1⟩ m. *kṛṣṇanāma tad* – (first person) he

प्रज्ञा **wisdom** ⟨1.1⟩ f. *prajñā* – intelligence, wisdom

प्रतिष्ठिता **steady** ⟨1.1⟩ f. *pratiṣṭhitā* – firmly situated

Subodhinī: युक्तः (योगी) तानि इन्द्रियाणि संयम्य, मद्-परः सन् आसीत । यस्य वशे (वश-वर्तीनि) । एतेन 'कथम् आसीत ?' इति प्रश्नस्य, 'वशी-कृत-इन्द्रियः सन् आसीत' (निर्व्यापारः तिष्ठेत्) इति उत्तरम् उक्तम् भवति ॥२.६१॥ बाह्य-इन्द्रिय-संयम-अभावे दोषम् उक्त्वा, मनः-संयम-अभावे दोषम् आह – 'ध्यायतः' इति द्वाभ्याम् –

2.62

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ॥६२॥

विषयान् ध्यायतः	[while] contemplating sense objects
पुंसः सङ्गः तेषु उपजायते,	a man's attachment for them arises,
सङ्गात् कामः सञ्जायते,	from attachment arises desire,
कामात् क्रोधः अभिजायते ।	from desire arises anger

"While contemplating the objects of the senses, a person develops attachment for them, and from such attachment lust develops, and from lust anger arises."

ध्यायतः **of one who is contemplating** ⟨6.1⟩ m. *dhyāyat* (*√dhyai*...चिन्तायाम् – to think, meditate; + *.[ś]at[r]*) – [while] contemplating

(also from *√dhyai*...चिन्तायाम्): *dhyāna* – contemplation, meditation

विषयान् **sense objects** ⟨2.3⟩ m. *viṣaya* – sense object

पुंसः **of a man** ⟨6.1⟩ m. *puṁs* (*pumān*) – a man; the soul (*puruṣa*); (in grammar:) masculine

puṁs becomes *pum* in *samāsa*; (as in:) *pum-artha* – 'aim of man', the goal of human life

सङ्गः **attachment** ⟨1.1⟩ m. *saṅga*

तेषु **in them** ⟨7.3⟩ m. *kṛṣṇanāma tad* – (first person) he

उपजायते **it arises** ⟨*acyuta* 1.1⟩ *upa.√jan[ī]* – to be born

सङ्गात् **from attachment** ⟨5.1⟩ m. *saṅga* – attachment

सञ्जायते **it arises** ⟨*acyuta* 1.1⟩ *sam.√jan[ī]* – to be born

कामः **desire** ⟨1.1⟩ m. *kāma*

कामात् **from desire** ⟨5.1⟩ m. *kāma* – desire

क्रोधः **anger** ⟨1.1⟩ m. *krodha*

Anger arises from desire via frustration or quarrel (SB. 11.21.19-20).

अभिजायते **it arises** ⟨*acyuta* 1.1⟩ *abhi.√jan[ī]* – to be born

Subodhinī: गुण-बुद्ध्या विषयान् ध्यायतः पुरुषस्य तेषु सङ्गः (आसक्तिः) भवति । आसक्त्या च तेषु अधिकः कामः भवति । कामात् च केनचिद् प्रतिहतात् क्रोधः भवति ॥२.६२॥

2.63

क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥६३॥

क्रोधात् सम्मोहः भवति,	from anger comes delusion,
सम्मोहात् स्मृति-विभ्रमः,	from delusion confusion of memory,
स्मृति-भ्रंशात् बुद्धि-नाशः,	from loss of memory the loss of intelligence,
बुद्धि-नाशात् प्रणश्यति ।	after the loss of intelligence, one is lost

"From anger, complete delusion arises, and from delusion bewilderment of memory. When memory is bewildered, intelligence is lost, and when intelligence is lost one falls down again into the material pool."

क्रोधात् **from anger** ⟨5.1⟩ m. *krodha* – anger

भवति **it becomes** ⟨*acyuta* 1.1⟩ √*bhū*...सत्तायाम् – to be, exist, become

सम्मोहः **bewilderment** ⟨1.1⟩ m. *sammoha* (from *sam.*√*muh[a]* – to be bewildered)

सम्मोहात् **from bewilderment** ⟨5.1⟩ m. *sammoha*

स्मृति-विभ्रमः **confusion of memory** ⟨1.1⟩ m. *smṛti-vibhrama*...स्मृतेः विभ्रमः इति स्मृति-विभ्रमः

स्मृति (from √*smṛ*...चिन्तायाम् – to think, remember) – memory; the whole body of sacred tradition (as distinct from *śruti* or direct revelation), including *Vedāṅgas*, *dharma*- and *nīti-śāstras*, *Itihāsas* and *Purāṇas*; here it refers to the true identification as spirit soul; (also from √*smṛ*...चिन्तायाम्): *smaraṇa* – remembering (esp. the Lord); *smartavya* – to be remembered; *smārta* – 'related to *smṛti*', based on tradition; an orthodox *brāhmaṇa*

विभ्रम (from *vi.*√*bhram[u]* – to move, roam) – confusion

स्मृति-भ्रंशात् **from the loss of memory** ⟨5.1⟩ m. *smṛti-bhraṁśa*...स्मृतेः भ्रंशः इति स्मृति-भ्रंशः – loss of memory

भ्रंश (from √*bhraṁś[u]*...अधः पतने – to fall down) – failing, decline, ruine, loss

बुद्धि-नाशः **loss of intelligence** ⟨1.1⟩ m. *buddhi-nāśa*...बुद्धेः नाशः इति बुद्धि-नाशः

बुद्धि-नाशात् **from the loss of intelligence** ⟨5.1⟩ m. *buddhi-nāśa* – loss of intelligence

प्रणश्यति **one is lost** ⟨*acyuta* 1.1⟩ *pra.*√*naś[a]* – to disappear, perish

Subodhinī: क्रोधात् सम्मोहः (कार्य-अकार्य-विवेक-अभावः) । ततः शास्त्र-आचार्य-उपदिष्टार्थ-स्मृतेः विभ्रमः (विचलनम्) । ततः बुद्धेः (चेतनायाः) विनाशः, वृक्षादिषु इव अभिभवः । ततः प्रणश्यति, मृत-तुल्यः भवति ॥२.६३॥
ननु 'इन्द्रियाणाम् विषय-प्रवण-स्वभावानाम् निरोद्धुम् अ-शक्यत्वात्, अयम् दोषः दुष्परिहारः इति स्थित-प्रज्ञत्वम् कथम् स्यात्?' इति आशङ्क्य आह – 'राग' इति द्वाभ्याम् –

Note: The soul is indestructible. But, "When remembrance (the identification as spirit soul) is lost, all knowledge is based on a false foundation (the bodily conception of life). When this occurs, wise men consider the soul to be lost." (*SB.* 4.22.31) "That is the difference between animals and human beings. Due to the animals' gross ignorance, it appears that they have lost their souls. . . . At the present moment, human civilization is acting on a false platform of bodily identification; therefore it can be said that the people of the present age have lost their souls, and in this respect they are no better than animals." (Śrīla Prabhupāda)

2.64

रागद्वेषविमुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥६४॥

विधेयात्मा तु	but one who is self-controlled
राग-द्वेष-विमुक्तैः आत्म-वश्यैः इन्द्रियैः	with controlled senses, free from attachment and aversion
विषयान् चरन्	[even] [while] going to sense objects
प्रसादम् अधिगच्छति ।	he attains satisfaction

"But a person free from all attachment and aversion and able to control his senses through regulative principles of freedom can obtain the complete mercy of the Lord."

राग-द्वेष-विमुक्तैः **with those free from affection and hatred** ⟨3.3⟩ n. *rāga-dveṣa-vimukta*...रागेन द्वेषेण च विमुक्तः इति राग-द्वेष-विमुक्तः

द्वेष (from √*dviṣ[a]*...अप्रीतौ – to hate) – hatred, dislike, enmity, aversion

तु **but** ⟨*avyaya*⟩

विषयान् **to sense objects** ⟨2.3⟩ m. *viṣaya* – sense object

इन्द्रियैः **with senses** ⟨3.3⟩ n. *indriya* – sense, sense organ

चरन् **[while] going** ⟨1.1⟩ m. *carat* (√*car[a]*...गतौ – to go, move; + *.[ś]at[r]*)

(also from √*car[a]*...गतौ): *cara* – moving (as in *carācara*, *cara-_acara* – moving and non-moving); *caraṇa* – a foot; *ācāra* – behavior, (esp.) good behavior, precept; *ācārya* – preceptor; *durācāra* – bad behavior

आत्म-वश्यैः **with those controlled** ⟨3.3⟩ n. *ātma-vaśya*...आत्मनः वश्यः इति आत्म-वश्यः – under the control of the self

विधेयात्मा **who is self-controlled** ⟨1.1⟩ m. *vidheya-_ātman (-ātmā)*...विधेयः आत्मा यस्य, सः विधेयात्मा – 'whose mind is controlled', who is regulated

vidheya (*vi.*√*[du]dhā[ñ]* – to hold, make; + *.ya*) – to be held, controlled

प्रसादम् **satisfaction** ⟨2.1⟩ m. *prasāda* (from *pra.*√*sad[ḷ]* – to settle down) – purity; calmness; (applied to the mind:) satisfaction, mercy; *prasāda* also refers to a favor or gift; esp. to the Lord's special mercy seen in articles (like food and flowers), which were first offered to His Deity and later distributed; (*pra.*√*sad[ḷ]* + *.[k]ta:*) *prasanna* – calmed; satisfied

Other words for 'mercy': *karuṇa*, *kāruṇya*, *kṛpā*, *anukampā*.

अधिगच्छति **he attains** ⟨*acyuta* 1.1⟩ *adhi.*√*gam[ḷ]* – to go over, attain

Subodhinī: राग-द्वेष-रहितैः (विगत-दर्पैः) इन्द्रियैः विषयान् चरन् (उपभुञ्जानः अपि) प्रसादम् (शान्तिम्) प्राप्नोति । राग-द्वेष-राहित्यम् एव आह – आत्मनः (मनसः) वश्यैः, विधेयः (वशवर्ती) आत्मा (मनः) यस्य इति । अनेन एव 'कथम् व्रजेत

(भुञ्जीत)' इति अस्य चतुर्थ-प्रश्नस्य – 'स्व-अधीनैः इन्द्रियैः विषयान् अधिगच्छति' इति उत्तरम् उक्तम् भवति ॥२.६४॥
'प्रसादे सति, किम् स्यात् ?' इति अत्र आह – 'प्रसादे' इति –

2.65

प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥६५॥

प्रसादे	when there is satisfaction
अस्य सर्व-दुःखानाम् हानिः उपजायते,	the destruction of all his miseries takes place,
प्रसन्न-चेतसः	for one whose mind is satisfied
बुद्धिः आशु हि पर्यवतिष्ठते ।	the intelligence very quickly becomes steady

"For one thus satisfied (in Kṛṣṇa consciousness), the threefold miseries of material existence exist no longer; in such satisfied consciousness, one's intelligence is soon well established."

प्रसादे **when there is satisfaction** ⟨7.1, *sati-saptamī*⟩ m. *prasāda* (from *pra.√sad[l]* – to settle down) – purity; calmness; (applied to the mind:) satisfaction, mercy

सर्व-दुःखानाम् **of all miseries** ⟨6.3⟩ n. sarva-duḥkha...सर्वम् दुःखम् इति सर्व-दुःखम् – all misery

हानिः **disappearence** ⟨1.1⟩ f. *hāni* (from *√[o]hā[k]*...त्यागे – to abandon) – abandonment; decrease; loss, disappearance, non-existence
(also from *√[o]hā[k]*...त्यागे): *hitvā* – after abandoning; except for; *hīna* – abandoned, left; excluded, without (as in *buddhi-hīna*); deficient, bad, inferior

अस्य **his** ⟨6.1⟩ m. *kṛṣnanāma idam* – (first person) he, this

उपजायते **it takes place** ⟨*acyuta* 1.1⟩ *upa.√jan[ī]* – to be born

प्रसन्न-चेतसः **of one whose mind is satisfied** ⟨6.1⟩ m. *prasanna-cetas (-cetaḥ)*...प्रसन्नम् चेतः यस्य, सः प्रसन्न-चेताः – 'whose mind is satisfied'

हि **indeed** ⟨*avyaya*⟩

आशु **quickly** ⟨*avyaya*⟩ – quickly, immediately, soon

बुद्धिः **intelligence** ⟨1.1⟩ f. *buddhi*

पर्यवतिष्ठते **it is steady** ⟨*acyuta* 1.1⟩ *pari.ava.√sthā* – to be steady

Subodhinī: प्रसादे सति, सर्व-दुःख-नाशः, ततः च प्रसन्न-चेतसः बुद्धिः प्रतिष्ठिता भवति इति अर्थः ॥२.६५॥
इन्द्रिय-निग्रहस्य स्थित-प्रज्ञता-साधनत्वम् व्यतिरेक-मुखेन उपपादयति – 'न अस्ति' इति –

2.66

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥६६॥

अ-युक्तस्य बुद्धिः न अस्ति,	for one who is not a *yogī* there is no intelligence,
अ-युक्तस्य च न भावना,	for one who is not a *yogī* there is no concentration,
अ-भावयतः च न शान्तिः,	and for one who has no concentration there is no peace,
अ-शान्तस्य कुतः सुखम् ?	for one without peace, how can there be happiness?

"One who is not connected with the Supreme (in Kṛṣṇa consciousness) can have neither transcendental intelligence nor a steady mind, without which there is no possibility of peace. And how can there be any happiness without peace?"

न **not** ⟨*avyaya*⟩

अस्ति **there is** ⟨*acyuta* 1.1⟩ *√as[a]*...भुवि – to be, exist

बुद्धिः **intelligence** ⟨1.1⟩ f. *buddhi*

अ-युक्तस्य **of one who is not in *yoga*** ⟨6.1⟩ m. *a-yukta*

न **not** ⟨*avyaya*⟩

च **and** ⟨*avyaya*⟩

अ-युक्तस्य **of one who is not in *yoga*** ⟨6.1⟩ m. *a-yukta* – not in *yoga*

भावना **concentration** ⟨1.1⟩ f. *bhāvanā* – conception, thought, meditation, absorption

न **not** ⟨*avyaya*⟩

च **and** ⟨*avyaya*⟩

अ-भावयतः **of one who is not concentrating** ⟨6.1⟩ m. *a-bhāvayat* (from *√bhū*; ... + *.[ś]at[r]*) [while] not concentrating

शान्तिः **peace** ⟨1.1⟩ f. *śānti* (from *√śam[u]* 4P...उपशमे – to be pacified) – peace, calmness, satisfaction, happiness
(as in:) *śānti! śānti! śānti!* – may the three kinds of suffering (arising from body/mind, other creatures, nature) subside! (also from *√śam[u]* 4P...उपशमे) *śānta* – peacified; *śama* – mind-control (as distinct from *dama* – sense-control)

अ-शान्तस्य **of one without peace** ⟨6.1⟩ m. *a-śānta* – restless, no peace of mind

कुतः **how** ⟨*avyaya*⟩ (*kutas*; from *kim* + *.tas[i]*) – 'from where'

सुखम् **happiness** ⟨2.1⟩ n. *sukha* – easiness, happiness

Subodhinī: अ-युक्तस्य (अ-वशीकृत-इन्द्रियस्य) न अस्ति बुद्धिः, शास्त्र-आचार्य-उपदेशाभ्याम् आत्म-विषया बुद्धिः (प्रज्ञा) एव न उत्पद्यते, कुतः तस्याः प्रतिष्ठा-वार्ता ? कुत्र ? इति अतः आह – 'नच अ-युक्तस्य भावना' (ध्यानम्), भावनया हि बुद्धेः आत्मनि प्रतिष्ठा भवति । सा च अ-युक्तस्य यतः न अस्ति ।

नच अ-भावयतः (आत्म-ध्यानम् अ-कुर्वतः) शान्तिः (आत्मनि चित्त-उपरतिः)।
अ-शान्तस्य कुतः सुखम् (मोक्ष-आनन्दः) इति अर्थः ॥२.६६॥
'न अस्ति बुद्धिः अ-युक्तस्य' इति अत्र हेतुम् आह –'इन्द्रियाणाम्' इति –

2.67

इन्द्रियाणां हि चरतां यन्मनो ऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥६७॥

चरताम् इन्द्रियाणाम्	among the roaming senses
यद् हि मनः अनुविधीयते	that on which the mind is placed
तद् अस्य प्रज्ञाम् हरति,	that takes away his wisdom,
वायुः नावम् इव अम्भसि ।	as the wind a boat on the water

"As a boat on the water is swept away by a strong wind, even one of the roaming senses on which the mind focuses can carry away a man's intelligence."

इन्द्रियाणाम् **of the senses** ⟨6.3⟩ n. *indriya* – sense, sense organ
हि **indeed** ⟨*avyaya*⟩
चरताम् **of those which are moving** ⟨6.3⟩ m. *carat* (√*car[a]*...गतौ – to go, move; + *.[ś]at[ṛ]*) – [while] moving
यद् **that on which** ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
मनः **the mind** ⟨1.1⟩ n. *manas* (*manaḥ*)
अनुविधीयते **it is placed** ⟨*acyuta* pass. 1.1⟩ *anu.vi.*√*[ḍu]dhā[ñ]* – to hold
तद् **that** ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
अस्य **his** ⟨*kṛṣṇanāma* 6.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
हरति **it carries away** ⟨*acyuta* 1.1⟩ √*hṛ[ñ]*...हरणे – to carry, remove
प्रज्ञाम् **wisdom** ⟨2.1⟩ f. *prajñā* – intelligence, wisdom
वायुः **the wind** ⟨1.1⟩ m. *vāyu* (from √*vā*...वायुगतौ – to blow) – the wind; the god of wind (Vāyu); air (as one of the five elements); breath; vital air (*prāṇa*); one of the three *doṣa* or humours of the body (besides *pitta* and *kapha*)
नावम् **a boat** ⟨2.1⟩ f. *nau* – boat, ship
इव **like** ⟨*avyaya*⟩
अम्भसि **on water** ⟨7.1⟩ n. *ambhas* (*ambhaḥ*) – water

Subodhinī: इन्द्रियाणाम् अ-वशी-कृतानाम् स्वैरम् विषयेषु चरताम् मध्ये, यद् एव एकम् इन्द्रियम् मनः अनुविधीयते, अ-वशीकृतम् सन् इन्द्रियेण सह गच्छति, तद् एव एकम् इन्द्रियम् अस्य (मनसः पुरुषस्य वा) प्रज्ञाम् (बुद्धिम्) हरति, विषय-विक्षिप्ताम् करोति, किम् उत वक्तव्यम् बहूनि ।इन्द्रियाणि। प्रज्ञाम् हरन्ति इति । यथा प्रमत्तस्य कर्ण-धारस्य नावम् वायुः समुद्रे सर्वतः परिभ्रामयति तद्वत् ॥२.६७॥

इन्द्रिय-संयमस्य स्थित-प्रज्ञत्वे साधनत्वम् लक्षणत्वम् च उक्तम् उपसंहरति – 'तस्मात्' इति –

2.68

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥६८॥

तस्मात् हे महा-बाहो !	therefore, O Arjuna!
यस्य इन्द्रियाणि	he whose senses
इन्द्रियार्थेभ्यः सर्वशः निगृहीतानि,	are completely restrained from sense objects,
तस्य प्रज्ञा प्रतिष्ठिता ।	his wisdom is steady

"Therefore, O mighty-armed, one whose senses are restrained from their objects is certainly of steady intelligence."

तस्मात् **therefore** ⟨*avyaya*⟩
यस्य **he whose** ⟨6.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
महा-बाहो **O Arjuna!** ⟨8.1⟩ m. *mahā-bāhu* – 'who has mighty arms'
निगृहीतानि **which are controlled** ⟨1.3⟩ n. *nigṛhīta* (*ni.*√*grah[a]* – to control; + *.[k]ta*) – controlled
सर्वशः **altogether** ⟨*avyaya*⟩ (*sarvaśas*) – completely, altogether, in every way, on all sides
इन्द्रियाणि **the senses** ⟨1.3⟩ n. *indriya* – sense, sense organ
इन्द्रियार्थेभ्यः **from sense objects** ⟨5.3⟩ m. *indriya-_artha* – sense object
तस्य **his** ⟨6.1⟩ m. *kṛṣṇanāma tad* – (first person) he
प्रज्ञा **wisdom** ⟨1.1⟩ f. *prajñā* – intelligence, wisdom
प्रतिष्ठिता **it is established** ⟨1.1⟩ f. *pratiṣṭhitā* – firmly situated

Subodhinī: [साधनत्व-उपसंहारे] 'प्रतिष्ठिता भवति' इति अर्थः । लक्षणत्व-उपसंहारे 'तस्य प्रज्ञा प्रतिष्ठिता ज्ञातव्या' इति अर्थः । 'महा-बाहो' इति सम्बोधयन् 'वैरि-निग्रहे समर्थस्य तव अत्र अपि सामर्थ्यम् भवेत्' इति सूचयति ॥२.६८॥
ननु च 'कश्चिद् अपि प्रसुप्तः इव दर्शनादि-व्यापार-शून्यः सर्वात्मना निगृहीत-इन्द्रियः लोके न दृश्यते ! अतः अ-सम्भावितम् इदम् लक्षणम् ! इति आशङ्क्य आह – 'या निशा' इति –

2.69

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥६९॥

या सर्व-भूतानाम् निशा	that which is night for all beings
तस्याम् संयमी जागर्ति,	in that a self-controlled man is awake,
यस्याम् भूतानि जाग्रति	and in which all beings are awake
सा पश्यतः मुनेः निशा ।	that is night for the sage who sees

"What is night for all beings is the time of awakening for the self-controlled; and the time of awakening for all beings is night for the introspective sage."

या **that which** ⟨1.1⟩ f. *kṛṣṇanāma yad* – (relative) who, which

निशा **night** ⟨1.1⟩ f. *niśā* – night; a dream
(as in:) *ahar-niśa* – day and night, the whole day; *ahar-niśam* – continually
Other words for 'night': *rātri, vibhāvarī, yāminī, tamī*.

सर्व-भूतानाम् **of all beings** ⟨6.3⟩ n. *sarva-bhūta*

तस्याम् **in that** ⟨7.1⟩ f. *kṛṣṇanāma tad* – (first person) he, that

जागर्ति **he is awake** ⟨*acyuta* 1.1⟩ √*jāgṛ*...निद्राक्षये – to be awake; (here:) to remain confined or attentive within

संयमी **one who is self-controlled** ⟨1.1⟩ m. *saṁyamin* (*saṁyamī*)

यस्याम् **that in which** ⟨7.1⟩ f. *kṛṣṇanāma yad* – (relative) who, which

जाग्रति **they are awake** ⟨*acyuta* 1.3⟩ √*jāgṛ*...निद्राक्षये – to be awake

भूतानि **all beings** ⟨1.3⟩ n. *bhūtā* (√*bhū*...सत्तायाम् – to be, exist, become; + *.[k]ta*) – past; an element, being, creature

सा **that** ⟨1.1⟩ f. *kṛṣṇanāma tad* – (first person) he, that

निशा **night** ⟨1.1⟩ f. *niśā*

पश्यतः **of one who is seeing** ⟨6.1⟩ m. *paśyat* (√*dṛś[ir]*...प्रेक्षणे – to see; + *.[ś]at[ṛ]*) – [while] seeing

मुनेः **of a sage** ⟨6.1⟩ m. *muni* – sage

Subodhinī: सर्वेषाम् भूतानाम् या निशा (निशा इव), निशा आत्मनिष्ठा, आत्म-अज्ञान-ध्वान्त-आवृत-मतीनाम् तस्याम् [आत्म-निष्ठायाम्] दर्शनादि-व्यवहार-अभावात् । तस्याम् आत्म-निष्ठायाम् संयमी निगृहीत-इन्द्रियः जागर्ति (प्रतिबुद्ध्यते) । यस्याम् तु विषय-निष्ठायाम् भूतानि जाग्रति (प्रतिबुद्ध्यन्ते), सा आत्म-तत्त्वम् पश्यतः मुनेः निशा । तस्याम् दर्शनादि-व्यापारः तस्य न अस्ति इति अर्थः । एतद् उक्तम् भवति – यथा दिवा-अन्धानाम् उलूक-आदीनाम् रात्रौ एव दर्शनम् नतु दिवसे, एवम् ब्रह्म-ज्ञस्य उन्मीलित-अक्षस्य अपि ब्रह्मणि एव दृष्टिः नतु विषयेषु । अतः न अ-सम्भावितम् इदम् लक्षणम् इति ॥२.६९॥
ननु 'विषयेषु दृष्टि-अभावे, कथम् असौ तान् भुङ्क्ते ?' इति अपेक्षायाम् आह – 'आपूर्यमाणम्' इति –

2.70

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत्कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥७०॥

यम् सर्वे कामाः तद्वत् प्रविशन्ति	he whom all desires enter in the same way
यद्वत् आपूर्यमाणम् अ-चल-प्रतिष्ठम् समुद्रम्	as the ocean, which is being filled but remains steady
आपः प्रविशन्ति,	rivers enter,
सः शान्तिम् आप्नोति,	he achieves peace,
न काम-कामी ।	not he who desires enjoyment

"A person who is not disturbed by the incessant flow of desires – that enter like rivers into the ocean, which is ever being filled but is always still – can alone achieve peace, and not the man who strives to satisfy such desires."

आपूर्यमाणम् **which is being filled** ⟨2.1⟩ m. *āpūryamāṇa* (*ā*.√*pṝ* – to fill; pass. + *.[ś]āna*) – [while] being filled

अ-चल-प्रतिष्ठम् **whose position is fixed** ⟨2.1⟩ m. *a-cala-pratiṣṭha*...अचला प्रतिष्ठा यस्य, सः अचल-प्रतिष्ठः

समुद्रम् **the ocean** ⟨2.1⟩ m. *samudra*

आपः **waters** ⟨1.3⟩ f. *ap* – water

प्रविशन्ति **they enter** ⟨*acyuta* 1.3⟩ *pra*.√*viś[a]* – to enter

यद्वत् **as** ⟨*avyaya*⟩

तद्वत् **so** ⟨*avyaya*⟩

कामाः **desires** ⟨1.3⟩ m. *kāma* – desire, (or its object:) sense object

यम् **he whom** ⟨2.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

प्रविशन्ति **they enter** ⟨*acyuta* 1.3⟩ *pra*.√*viś[a]* – to enter

सर्वे **all** ⟨1.3⟩ m. *kṛṣṇanāma sarva*

सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

शान्तिम् **peace** ⟨2.1⟩ f. *śānti* – peace of mind

आप्नोति **he achieves** ⟨*acyuta* 1.1⟩ √*āp[l]*...व्याप्तौ – to reach, obtain

न **not** ⟨*avyaya*⟩

काम-कामी **he who desires enjoyment** ⟨1.1⟩ m. *kāma-kāmin* (*-kāmī*)...कामानाम् कामी इति काम-कामी – the desirer of enjoyment

Subodhinī: नाना-नदीभिः आपूर्यमाणम् अपि अचल-प्रतिष्ठम्, अनतिक्रान्त-मर्यादम् एव, समुद्रम् पुनः अपि अन्याः आपः यथा प्रविशन्ति, तथा कामाः (विषयाः) यम् मुनिम् (अन्तः-दृष्टिम्) भोगैः अ-विक्रियमाणम् एव प्रारब्ध-कर्मभिः आक्षिप्ताः

सन्तः प्रविशन्ति, सः शान्तिम् (कैवल्यम्) प्राप्नोति, नतु काम-कामी (भोग-कामना-शीलः) ॥२.७०॥
यस्मात् एवम् तस्मात् – 'विहाय' इति –

2.71

विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः ।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति ॥७१॥

यः पुमान् सर्वान् कामान् विहाय	a man who, [after] giving up all desires
निःस्पृहः निर्ममः निरहङ्कारः चरति,	lives without hankering, proprietorship and false ego,
सः शान्तिम् अधिगच्छति ।	he attains peace

"A person who has given up all desires for sense gratification, who lives free from desires, who has given up all sense of proprietorship and is devoid of false ego – he alone can attain real peace."

विहाय **[after] abandoning** ⟨*avyaya*⟩ from *vi.√[o]hā[k]* – to abandon; + *.ya[p]*
कामान् **desires** ⟨2.3⟩ m. *kāma* – desire
यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
सर्वान् **all** ⟨2.3⟩ m. *kṛṣṇanāma sarva*
पुमान् **a man** ⟨1.1⟩ m. *puṁs (pumān)*
चरति **he lives** ⟨*acyuta* 1.1⟩ √*car[a]*...गतौ – to go, move
निःस्पृहः **without hankering** ⟨1.1⟩ m. *niḥspṛha (nir.spṛha)*
निर्ममः **without proprietorship** ⟨1.1⟩ m. *nirmama (nir.mama)* – without the notion of 'mine (*mama*)'
निरहङ्कारः **without false ego** ⟨1.1⟩ m. *nirahaṅkāra (nir.ahaṅkāra)*
 अहङ्कार (*aham-_kāra*) – 'I-maker', the conception of one's individuality, ego; (esp.) false ego, egotism, pride; *aham* (from *asmad*) – I; (as in:) *ahaṁ-mamatā* – the sense of 'I' and 'mine'
सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
शान्तिम् **peace** ⟨2.1⟩ f. *śānti*
अधिगच्छति **he attains** ⟨*acyuta* 1.1⟩ *adhi.√gam[l̥]* – to go over, attain

Subodhinī: प्राप्तान् कामान् विहाय (त्यक्त्वा, उपेक्ष्य), अ-प्राप्तेषु च निःस्पृहः, यतः निरहङ्कारः अतएव तद्-भोग-साधनेषु निर्ममः सन् अन्तः-दृष्टिः भूत्वा यः चरति, प्रारब्ध-वशेन भोगान् भुङ्क्ते, यत्र क्वापि गच्छति वा, सः शान्तिम् आप्नोति ॥२.७१॥
उक्ताम् ज्ञान-निष्ठाम् स्तुवन् उपसंहरति – 'एषा' इति –

2.72

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥७२॥

हे पार्थ !	O Arjuna!
एषा ब्राह्मी स्थितिः,	this is the spiritual position,
एनाम् प्राप्य	[after] achieving it
न विमुह्यति,	one is not bewildered,
अन्त-काले अपि अस्याम् स्थित्वा	[after] being situated in it even at death
ब्रह्म-निर्वाणम् ऋच्छति ।	one attains liberation in the Supreme

"That is the way of the spiritual and godly life, after attaining which a man is not bewildered. If one is thus situated even at the hour of death, one can enter into the kingdom of God."

एषा **this** ⟨1.1⟩ f. *kṛṣṇanāma etad* – (first person) he, this
ब्राह्मी **spiritual** ⟨1.1⟩ f. *brāhmī (.ī[p])* – 'related to *brahma* (spirit)'
स्थितिः **position** ⟨1.1⟩ f. *sthiti*
पार्थ **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
न **not** ⟨*avyaya*⟩
एनाम् **this** ⟨2.1⟩ f. *kṛṣṇanāma etad* – (first person) he, this
प्राप्य **[after] attaining** ⟨*avyaya*⟩ √*āp[l̥]*...व्याप्तौ – to reach, obtain; + *.ya[p]*
विमुह्यति **he is bewildered** ⟨*acyuta* 1.1⟩ *vi.√muh[a]* – to be bewildered
स्थित्वा **[after] standing** ⟨*avyaya*⟩ √*sthā*...स्थाने – to stand; + *.[k]tvā*
अस्याम् **in this** ⟨7.1⟩ f. *kṛṣṇanāma idam* – (first person) he, this
अन्त-काले **at the time of death** ⟨7.1⟩ m. *anta-kāla*...अन्तस्य कालः इति अन्त-कालः – 'time of death'
अपि **also** ⟨*avyaya*⟩
ब्रह्म-निर्वाणम् **to liberation in the Supreme** ⟨2.1⟩ n. *brahma-nirvāṇa*...ब्रह्मणि निर्वाणम् इति ब्रह्म-निर्वाणम् – *nirvāṇa* in *brahma*
 निर्वाण (from *nir.√vā* – to cease to blow) – calmness, bliss; cessation, dissolution; liberation
 There are five kinds of liberation or *nirvāṇa*. The first is *sāyujya* (merging), i.e. the extinction of individual existence in Brahman, which is called *śūnya* (zero) in Buddhist philosophy. The other four kinds of liberation (*sālokya*, *sārṣṭi*, *sārūpya* and *sāmīpya*) facilitate a positive and individual spiritual life in relationship with the Lord.
ऋच्छति **he reaches** ⟨*acyuta* 1.1⟩ √*ṛ*...गतौ प्रापणे च – to go; get (or from √*ṛcch[a]*)

Subodhinī: ब्राह्मी स्थितिः (ब्रह्म-ज्ञान-निष्ठा) एषा एवम्-विधा । एनाम् परमेश्वर-आराधनेन विशुद्ध-अन्तः-करणः पुमान् प्राप्य, न विमुह्यति, पुनः संसार-मोहम् न

प्राप्नोति । यतः अन्त-काले (मृत्यु-समये) अपि अस्याम् क्षण-मात्रम् अपि स्थित्वा, ब्रह्मणि निर्वाणम् (लयम्) ऋच्छति (प्राप्नोति), किम् पुनः वक्तव्यम् बाल्यम् आरभ्य स्थित्वा प्राप्नोति ! इति ॥२.७२॥

> ओं तत्सदिति
> श्रीमहाभारते शतसाहस्त्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि
> श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
> श्रीकृष्णार्जुनसंवादे साङ्ख्ययोगो नाम द्वितीयो ऽध्यायः ॥२॥

अथ तृतीयो ऽध्यायः

अथ तृतीयः अध्यायः । now the third chapter

Subodhinī: एवम् तावत् 'अशोच्यान् अन्वशोचः त्वम्' (2.11) इत्यादिना प्रथमम् मोक्ष-साधनत्वेन देह-आत्म-विवेक-बुद्धिः उक्ता । तद्-अनन्तरम् 'एषा ते अभिहिता साङ्ख्ये बुद्धिः योगे तु इमाम् शृणु' (2.39) इत्यादिना कर्म च उक्तम् । नच तयोः गुण-प्रधान-भावः स्पष्टम् दर्शितः । तत्र भगवत्-उक्तौ 'बुद्धि-युक्तस्य' (स्थित-प्रज्ञस्य) निष्कामत्व-नियतेन्द्रियत्व-निरहङ्कारत्वादि-अभिधानात्, 'एषा ब्राह्मी स्थितिः पार्थ' (2.72) इति स-प्रशंसम् उपसंहारात् च, बुद्धि-कर्मणोः मध्ये बुद्धेः श्रैष्ठ्यम् भगवतः अभिमतम् मन्वानः – 'ज्यायसी चेद्' इति –

3.1

अर्जुन उवाच

ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन ।
तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥१॥

अर्जुनः उवाच - हे जनार्दन !	Arjuna said: O Kṛṣṇa!
बुद्धिः कर्मणः ज्यायसी चेद्	if *buddhi* is better than *karma*
ते (तव) मता,	considered by You,
हे केशव ! तद् किम्	O Kṛṣṇa, then why
घोरे कर्मणि माम् नियोजयसि ?	You engage me in ghastly work?

"Arjuna said: O Janārdana, O Keśava, why do You want to engage me in this ghastly warfare, if You think that intelligence is better than fruitive work?"

अर्जुनः — **Arjuna** ⟨1.1⟩ m. *arjuna* – white, 'who is pure in actions'

उवाच — **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak

ज्यायसी — **better** ⟨1.1⟩ f. *jyāyasī* (*.ī[p]*) – superior, more excellent; greater, stronger; elder (the superlative:) *jyeṣṭha* – most excellent, chief, best; eldest

चेद् — **if** ⟨*avyaya*⟩

कर्मणः — **than *karma*** ⟨5.1⟩ n. *karman* (*karma*) – activity

ते — **your** ⟨opt. for *tava* 6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

मता — **considered** ⟨1.1⟩ f. *matā* (√*man[a]* 4A...बोधने – to know, think; + *.[k]ta* + *ā[p]*) – thought

बुद्धिः — ***buddhi*** ⟨1.1⟩ f. *buddhi* – intelligence

जनार्दन — **O Kṛṣṇa!** ⟨8.1⟩ m. *jana-_ardana* – 'who destroys bad elements and grants desires', i.e. the Lord who maintains all

तद् **then** ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that; here used for *tarhi*
किम् **why** ⟨*avyaya*⟩
कर्मणि **in work** ⟨7.1⟩ n. *karman (karma)* – activity
घोरे **in ghastly** ⟨7.1⟩ n. *ghora* – venerable, awful, sublime; frightful, terrible, violent
माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
नियोजयसि **you engage** ⟨*acyuta* caus. 2.1⟩ *ni.√yuj[ir]* – engage, perform
केशव **O Kṛṣṇa!** ⟨8.1⟩ m. *keśava* – 'who has beautiful hair' (*keśa.va*); or 'lord of Brahmā (*ka*) and Śiva (*īśa*)' (*ka-_īśa.va*)

Subodhinī: कर्मणः सकाशात् मोक्ष-अन्तरङ्गत्वेन बुद्धिः ज्यायसी (अधिकतरा, श्रेष्ठा) चेद् तव सम्मता, तर्हि किम् अर्थम् 'तस्मात् युद्धयस्व' इति, 'तस्मात् उत्तिष्ठ' इति च वारम् वारम् वदन्, घोरे हिंसात्मके कर्मणि माम् नियोजयसि (प्रवर्तयसि) ॥३.१॥

ननु 'धर्म्यात् हि युद्धात् श्रेयः अन्यत् क्षत्रियस्य न विद्यते' (2.31) इत्यादिना कर्मणः अपि श्रेष्ठत्वम् उक्तम् एव इति आशङ्क्य आह – 'व्यामिश्रेण' इति –

Note: First Kṛṣṇa glorifies the analytical distinction between body and soul (2.11 ff.), then work without fruitive desire (2.40 ff.). At the end He seems to establish the greater importance of *jñāna* (*sthita-prajñaḥ, brāhmī sthitiḥ*), having all the time urged Arjuna to do his duty of fighting (2.31).

3.2

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे ।
तदेकं वद निश्चित्य येन श्रेयो ऽहमाप्नुयाम् ॥२॥

व्यामिश्रेण इव वाक्येन	by this apparently equivocal speech
मे (मम) बुद्धिम् मोहयसि इव,	You bewilder my intelligence,
येन श्रेयः अहम् आप्नुयाम्	that by which I would get benefit
तद् एकम् निश्चित्य वद !	[after] deciding, tell that alone!

"My intelligence is bewildered by Your equivocal instructions. Therefore, please tell me decisively which will be most beneficial for me."

व्यामिश्रेण **by equivocal** ⟨3.1⟩ n. *vyāmiśra (vi.ā.miśra)* – mixed up, ambiguous
miśra – mixed, combined, accompanied by; adulterated; manifold, diverse
इव **like** ⟨*avyaya*⟩
वाक्येन **by the speech** ⟨3.1⟩ n. *vākya*
बुद्धिम् **intelligence** ⟨2.1⟩ f. *buddhi*
मोहयसि **you bewilder** ⟨*acyuta* caus. 2.1⟩ *√muh[a]*...वैचित्त्ये – to be bewildered
इव **like** ⟨*avyaya*⟩
मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I

तद् **that** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
एकम् **alone** ⟨2.1⟩ n. *kṛṣṇanāma eka* – one
वद **you must speak** ⟨*vidhātā* 2.1⟩ *√vad[a]*...व्यक्तायां वाचि – to speak
निश्चित्य **[after] ascertaining** ⟨*avyaya*⟩ (*nir.√ci[ñ]* – to ascertain; + *.ya[p]*)
येन **that by which** ⟨3.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
श्रेयः **benefit** ⟨1.1⟩ n. *śreyas (śreyaḥ)* – better, benefit
अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
आप्नुयाम् **I would obtain** ⟨*vidhi* 3.1⟩ *√āp[ḷ]*...व्याप्तौ – to reach, obtain

Subodhinī: क्वचिद् कर्म-प्रशंसा क्वचिद् ज्ञान-प्रशंसा इति एवम् व्यामिश्रम् (सन्देह-उत्पादकम्) इव यद् वाक्यम्, तेन मे बुद्धिम् (मतिम्) उभयत्र दोलायिताम् कुर्वन्, मोहयसि इव । परम-कारुणिकस्य तव मोहकत्वम् न अस्ति एव, तथापि भ्रान्त्या मम, एवम् भाति इति इव-शब्देन उक्तम् । अतः उभयोः मध्ये यद् भद्रम्, तद् एकम् निश्चित्य वद इति । यद्वा, 'इदम् एव श्रेयः-साधनम्' इति निश्रित्य येन अनुष्ठितेन श्रेयः (मोक्षम्) अहम् आप्नुयाम् (प्राप्स्यामि), तद् एव एकम् वद इति अर्थः ॥३.२॥

अत्र उत्तरम् [श्री-भगवान् उवाच] – 'लोके अस्मिन्' इति –

3.3

श्रीभगवानुवाच
लोके ऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ।
ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ॥३॥

श्री-भगवान् उवाच – हे अनघ !	Śrī Kṛṣṇa said: O sinless Arjuna!
अस्मिन् लोके द्वि-विधा निष्ठा	a twofold faith in this world
मया पुरा प्रोक्ता,	has been declared by Me before (2.39),
ज्ञान-योगेन साङ्ख्यानाम्	by *jñāna-yoga* [the faith] of the Sāṅkhyas
कर्म-योगेन योगिनाम्	and by *karma-yoga* [the faith] of the Karma-yogīs

"The Supreme Personality of Godhead said: O sinless Arjuna, I have already explained that there are two classes of men who try to realize the self. Some are inclined to understand it by empirical, philosophical speculation, and others by devotional service."

श्री-भगवान् **Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'
उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ *√vac[a]*...परिभाषणे – to speak
लोके **in the world** ⟨7.1⟩ m. *loka* – place, world, people
अस्मिन् **in this** ⟨7.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
द्वि-विधा **twofold** ⟨1.1⟩ f. *dvi-vidhā* (*.ā[p]*)

निष्ठा **faith** ⟨1.1⟩ f. *niṣṭhā* (from *ni.√sthā* – to stay) – state, position; steadiness, attachment, devotion, firm belief

पुरा **formerly** ⟨*avyaya*⟩

प्रोक्ता **declared** ⟨1.1⟩ f. *proktā* (from *pra.√vac[a]* – to declare; + *.[k]ta* + *.ā[p]*)

मया **by me** ⟨3.1⟩ *kṛṣnanāma asmad* – (last person) I

अनघ **O Arjuna!** ⟨8.1⟩ n. *an-agha* – 'who is sinless'

अघ bad, dangerous; sinful, impure; *agham* – sin, impurity; pain, suffering; (as in:) *aghāsura* (*agha-asura*) – Agha, Kaṁsa's general

ज्ञान-योगेन **by *jñāna-yoga*** ⟨3.1⟩ m. *jñāna-yoga*...ज्ञानस्य योगः इति ज्ञान-योगः – 'Yoga of knowledge'

साङ्ख्यानाम् **of the Sāṅkhyas** ⟨6.3⟩ m. *sāṅkhya* – 'who follows *sāṅkhya*'

कर्म-योगेन **by *karma-yoga*** ⟨3.1⟩ m. *karma-yoga*...कर्मणः योगः इति कर्म-योगः – 'Yoga of work'

योगिनाम् **of the Yogīs** ⟨6.3⟩ m. *yogin* (*yogī*)

Subodhinī: अयम् अर्थः – यदि मया परस्पर-निरपेक्षम् मोक्ष-साधनत्वेन कर्म-ज्ञान-योग-रूपम् निष्ठा-द्वयम् उक्तम् स्यात्, तर्हि 'द्वयोः मध्ये यद् भद्रम् तद् एकम् वद' इति त्वदीय-प्रश्नः सङ्गच्छते, नतु मया तथा उक्तम्, किन्तु द्वाभ्याम् एक एव ब्रह्म-निष्ठा उक्ता। गुण-प्रधान-भूतयोः तयोः स्वातन्त्र्य-अनुपपत्तेः। एकस्या एव तु प्रकार-भेद-मात्रम् अधिकार-भेदेन उक्तम् इति। अस्मिन् शुद्ध-अशुद्ध-अन्तःकरणतया द्वि-विधे लोके अधिकारि-जने द्वे विधे (प्रकारौ) यस्याः, सा द्वि-विधा निष्ठा (मोक्ष-परता) पुरा (पूर्व-अध्याये) मया सर्व-ज्ञेन प्रोक्ता (स्पष्टम् एव उक्ता)। प्रकार-द्वयम् एव निर्दिशति – साङ्ख्यानाम् शुद्ध-अन्तःकरणानाम् ज्ञान-भूमिकाम् आरूढानाम् ज्ञान-परिपाकार्थम् ज्ञान-योगेन (ध्यानादिना) निष्ठा ब्रह्म-परता उक्ता, 'तानि सर्वाणि संयम्य युक्तः आसीत मद्-परः' (2.61) इत्यादिना। साङ्ख्य-भूमिकाम् आरुरुक्षूणाम् तु अन्तःकरण-शुद्धि-द्वारा तद्-आरोहार्थम् तद्-उपायभूत-कर्मयोग-अधिकारिणाम् योगिनाम् कर्म-योगेन निष्ठा उक्ता, 'धर्म्यात् हि युद्धात् श्रेयः अन्यत् क्षत्रियस्य न विद्यते' (2.31) इत्यादिना। अतएव चित्त-शुद्धि-अशुद्धि-रूप-अवस्था-भेदेन एव द्वि-विधा अपि निष्ठा उक्ता, 'एषा ते अभिहिता साङ्ख्ये बुद्धिः योगे तु इमाम् शृणु' (2.39) इति ॥३.३॥ अतः सम्यक् चित्त-शुद्ध्यर्थम् ज्ञान-उत्पत्ति-पर्यन्तम् वर्णाश्रम-उचितानि कर्माणि कर्तव्यानि। अन्यथा चित्त-शुद्धि-अभावेन ज्ञान-अनुत्पत्तेः इति आह – 'न कर्मणाम्' इति

3.4

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च सन्न्यसनादेव सिद्धिं समधिगच्छति ॥४॥

कर्मणाम् अनारम्भात्	[just] by abstaining from activities
पुरुषः नैष्कर्म्यम् न अश्नुते,	a person does not obtain freedom from reaction,
सन्न्यसनात् एव च	and just by renunciation
सिद्धिम् न समधिगच्छति ।	he does not obtain perfection (liberation)

"Not by merely abstaining from work can one achieve freedom from reaction, nor by renunciation alone can one attain perfection."

न **not** ⟨*avyaya*⟩

कर्मणाम् **of activities** ⟨6.3⟩ n. *karman* (*karma*) – activity

अनारम्भात् **from not beginning** ⟨5.1⟩ m. *an-ārambha* – not beginning

आरम्भ (from *ā.√rabh[a]* – to begin) – undertaking, attempt, beginning, commencement (same as *prārambha*); effort, exertion; (similarly: *pra.ā.√rabh[a]* + *.[k]ta*) *prārabdha* – commenced, (as in:) *prārabdha-karma* – a reaction (*karma*) which has already started

नैष्कर्म्यम् **freedom from reaction** ⟨2.1⟩ n. *naiṣkarmya* (from *niṣkarma*) – the state of *niṣkarma* (no *karma*)

पुरुषः **a person** ⟨1.1⟩ m. *puruṣa*

अश्नुते **he obtains** ⟨*acyuta* 1.1⟩ *√aś[ūṅ]*...व्याप्तौ – to pervade, obtain

न **not** ⟨*avyaya*⟩

च **and** ⟨*avyaya*⟩

सन्न्यसनात् **from renunciation** ⟨5.1⟩ n. *sannyasana* (from *sam.ni.√as[u]* – to throw down, give up) – giving up, renunciation

(similarly:) *sannyāsa* – renunciation (of materialistic life); (esp.) the fourth order of life (after *brahmacārya*, *gṛhastha* and *vānaprastha*); (derived:) *sannyāsin* (*sannyāsī*) – a renunciate, mendicant

एव **certainly** ⟨*avyaya*⟩

सिद्धिम् **perfection** ⟨2.1⟩ f. *siddhi*

समधिगच्छति **he attains** ⟨*acyuta* 1.1⟩ *sam.adhi.√gam[l]* – to completely go over, attain

Subodhinī: कर्मणाम् अनारम्भात् (अननुष्ठानात्) नैष्कर्म्यम् (ज्ञानम्) न अश्नुते (न प्राप्नोति)। ननु च 'एवम् एव प्रव्राजिनः लोकम् इच्छन्तः प्रव्रजन्ति' (*Bṛhad-āranyaka-Up.* 4.4.22) इति श्रुत्या सन्न्यासस्य मोक्ष-अङ्गत्व-श्रुतेः, सन्न्यासात् एव मोक्षः भविष्यति इति, किम् कर्मभिः ? इति आशङ्क्य उक्तम् – 'न च' इति। नच चित्त-शुद्धिम् विना कृतात् सन्न्यासनात् एव ज्ञान-शून्यात् सिद्धिम् (मोक्षम्) समधिगच्छति (प्राप्नोति) ॥३.४॥ 'कर्मणाम् च सन्न्यासः' तेषु अनासक्ति-मात्रम्, नतु स्व-रूपेण, अ-शक्यत्वात् इति आह – 'न हि' इति –

3.5

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥५॥

न हि कश्चिद् क्षणम् अपि	nobody, not even for a moment
जातु अ-कर्म-कृत् तिष्ठति,	can at any time remain inactive,
प्रकृति-जैः गुणैः	by the modes of [one's] nature
अवशः सर्वः कर्म कार्यते हि।	everyone is helplessly forced to act

"Everyone is forced to act helplessly according to the qualities he has acquired from the modes of material nature; therefore no one can refrain from doing something, not even for a moment."

न हि — **not at all** ⟨*avyaya*⟩

कश्चिद् — **someone** ⟨1.1⟩ m. *kṛṣṇanāma kim (kaḥ)* + .*cid* – someone, something

क्षणम् — **a moment** ⟨2.1⟩ n. *kṣaṇa* – any instantaneous point of time, twinkling of an eye, moment

अपि — **also** ⟨*avyaya*⟩

जातु — **ever** ⟨*avyaya*⟩

तिष्ठति — **he remains** ⟨*acyuta* 1.1⟩ √*sthā*...स्थाने – to stand

अ-कर्म-कृत् — **without working** ⟨1.1⟩ m. *a-karma-kṛt*...यः कर्म न करोति, सः अ-कर्म-कृत्

कार्यते — **he is caused to act** ⟨*acyuta* pass. caus. 1.1⟩ √*[ḍu]kṛ[ñ]*...करणे – to do

अ-वशः — **helplessly** ⟨1.1⟩ m. *a-vaśa* – 'not according to the wish'; (either not acc. to the wish of another:) independently, not under control; (or of oneself:) unwillingly, helplessly; *avaśyam* – necessarily, certainly, by all means

कर्म — **activity** ⟨2.1⟩ n. *karman (karma)* – activity

सर्वः — **everyone** ⟨1.1⟩ m. *kṛṣṇanāma sarva* – all

प्रकृति-जैः — **by the material** ⟨3.3⟩ m. *prakṛti-ja* – born from nature

प्रकृति (from *pra.*√*[ḍu]kṛ[ñ]* – to produce) – the original or natural form or condition of anything, primary substance; origin, cause; nature, character, constitution; (in *sāṅkhya*:) the passive power of creating (distinguished from the *puruṣa*), the material energy (consisting of three *guṇas*, and bringing forth the whole material world); (in grammar:) the uninflected word; (derived:) *prākṛta* – original, natural, ordinary; low, vulgar; any dialect (as distinguished from Sanskrit); (also from *pra.*√*[ḍu]kṛ[ñ]*:) *prakara* usage, custom; *prakaraṇa* – production, creation; discussion, treatment; treatise, chapter; a subject, topic; *prakāra* – sort, kind, class; nature, manner (as in *kena prakāreṇa* – in what way? how?)

गुणैः — **by the *guṇas*** ⟨3.3⟩ m. *guṇa* – quality

Subodhinī: जातु (कदाचित्) अपि कस्याश्चिद् अवस्थायाम् क्षण-मात्रम् अपि कश्चिद् अपि (ज्ञानी वा अज्ञः वा) अ-कर्म-कृत् (कर्माणि अ-कुर्वाणः) न तिष्ठति। तत्र हेतुः – प्रकृति-जैः (स्व-भाव-प्रभवैः) राग-द्वेषादिभिः गुणैः सर्वः अपि जनः कर्म कार्यते (कर्मणि प्रवर्त्यते), अ-वशः (अ-स्वतन्त्रः) सन् ॥३.५॥

अतः अ-ज्ञम् कर्म-त्यागिनम् निन्दति – 'कर्म-इन्द्रियाणि' इति –

3.6

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥६॥

कर्मेन्द्रियाणि संयम्य	[after] restraining the working senses
यः इन्द्रियार्थान् मनसा स्मरन् आस्ते,	one who continues remembering sense objects with the mind,
सः विमूढात्मा मिथ्याचारः उच्यते।	he is bewildered and called a pretender

"One who restrains the senses of action but whose mind dwells on sense objects certainly deludes himself and is called a pretender."

कर्मेन्द्रियाणि — **the working senses** ⟨2.3⟩ n. *karma-_indriya*...कर्मणाम् इन्द्रियम् इति कर्मेन्द्रियम् – 'sense of activities', working sense

There are five working senses, namely larynx, hand, foot, genital and anus.

संयम्य — **[after] restraining** ⟨*avyaya*⟩ *sam.*√*yam[a]* – to restrain; + .*ya[p]*

यः — **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

आस्ते — **he remains** ⟨*acyuta* 1.1⟩ √*ās[a]*...उपवेशने विद्यमानतायां च – to sit; be present

मनसा — **with the mind** ⟨3.1⟩ n. *manas (manaḥ)* – mind

manasā – 'with the mind', in the mind; in thought or imagination; with all the heart; willingly

स्मरन् — **[while] remembering** ⟨1.1⟩ m. *smarat* (√*smṛ*...चिन्तायाम् – to think, remember; + .*[ś]at[ṛ]*)

इन्द्रियार्थान् — **sense objects** ⟨2.3⟩ m. *indriya-_artha* – sense object

विमूढात्मा — **who is bewildered** ⟨1.1⟩ m. *vimūḍha-_ātman (-ātmā)*...विमूढः आत्मा यस्य, सः विमूढात्मा

मिथ्याचारः — **a pretender** ⟨1.1⟩ m. *mithyā-_ācāra*...मिथ्या आचारः यस्य, सः मिथ्याचारः – 'whose behavior is false', a hypocrite

मिथ्या – conflictingly, contrarily, improperly; falsely, untruly, not real

सः — **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

उच्यते — **he is called** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak

Subodhinī: वाक्-पाणि-आदीनि कर्म-इन्द्रयाणि अपि संयम्य (निगृह्य), यः मनसा भगवत्-ध्यान-छलेन इन्द्रिय-अर्थान् (विषयान्) स्मरन् आस्ते, अ-विशुद्धतया मनसा आत्मनि स्थैर्य-अभावात्, सः मिथ्या-आचारः (कपट-आचारः, दाम्भिकः) उच्यते इति अर्थः ॥३.६॥

एतद्-विपरीतः कर्म-कर्ता श्रेष्ठः इति आह – 'यः तु' इति –

3.7

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥७॥

हे अर्जुन !	O Arjuna!
इन्द्रियाणि मनसा नियम्य	[after] controlling the senses by the mind
यः तु अ-सक्तः	[but] one who, without attachment,
कर्मेन्द्रियैः कर्म-योगम् आरभते,	performs *karma-yoga* with the working senses,
सः विशिष्यते ।	he is distinguished

"On the other hand, if a sincere person tries to control the active senses by the mind and begins karma-yoga (in Kṛṣṇa consciousness) without attachment, he is by far superior."

यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
तु **but** ⟨*avyaya*⟩
इन्द्रियाणि **the senses** ⟨2.3⟩ n. *indriya* – sense, sense organ
मनसा **with the mind** ⟨3.1⟩ n. *manas (manaḥ)* – mind
नियम्य **[after] restraining** ⟨*avyaya*⟩ *ni.√yam[a]* – to restrain; + *.ya[p]*
आरभते **he begins** ⟨*acyuta* 1.1⟩ *ā.√rabh[a]* – to begin
अर्जुन **O Arjuna!** ⟨8.1⟩ m. *arjuna* – white, 'who is pure in actions'
कर्मेन्द्रियैः **with the working senses** ⟨3.3⟩ n. *karma-_indriya* – working sense
कर्म-योगम् ***karma-yoga*** ⟨2.1⟩ m. *karma-yoga*
अ-सक्तः **unattached** ⟨1.1⟩ m. *a-sakta*
सक्त (*√sañj[a]*...सङ्गे – to embrace, stick; + *.[k]ta*) – attached
सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
विशिष्यते **he is distinguished** ⟨*acyuta* pass. 1.1⟩ *vi.√śiṣ[l]* – to distinguish

Subodhinī: यः तु ज्ञान-इन्द्रियाणि मनसा नियम्य, ईश्वर-प्रवणाणि कृत्वा, कर्म-इन्द्रियैः कर्म-रूपम् योगम् (उपायम्) आरभते (अनुतिष्ठति), अ-सक्तः (फल-अभिलाष-रहितः) सन्, सः विशिष्यते (विशिष्टः भवति) । चित्त-शुद्ध्या ज्ञानवान् भवति इति अर्थः ॥३.७॥
यस्मात् एवम् तस्मात् – 'नियतम्' इति –

3.8

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्रापि च ते न प्रसिध्येदकर्मणः ॥८॥

त्वम् नियतम् कर्म कुरु !	perform the prescribed duty!
अ-कर्मणः हि कर्म ज्यायः,	for working is better than inaction,
अ-कर्मणः च	without work
ते (तव) शरीर-यात्रा अपि	even your bodily maintainance
न प्रसिध्येत् ।	would not succeed

"Perform your prescribed duty, for doing so is better than not working. One cannot even maintain one's physical body without work."

नियतम् **regular** ⟨2.1⟩ n. *niyata (ni.√yam[a]* – to restrain; + *.[k]ta)* – restrained
कुरु **you must do** ⟨*vidhātā* 2.1⟩ *√[ḍu]kṛ[ñ]*...करणे – to do
कर्म **work** ⟨2.1⟩ n. *karman (karma)* – activity
त्वम् **you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
कर्म **work** ⟨1.1⟩ n. *karman (karma)* – activity
ज्यायः **better** ⟨1.1⟩ n. *jyāyas (jyāyaḥ)* – superior
हि **certainly** ⟨*avyaya*⟩
अ-कर्मणः **than inactivity** ⟨5.1⟩ n. *a-karman (karma)* – inactivity
शरीर-यात्रा **the maintenance of the body** ⟨1.1⟩ f. *śarīra-yātrā*...शरीरस्य यात्रा इति शरीर-यात्रा
यात्रा (from *√yā*...प्राप्तौ – to attain, go) – journey, pilgrimage (as in *pāda-yātrā* – pilgrimage by foot); procession, festival; way, means, practice; livelihood, maintenance; (also from *√yā*...प्राप्तौ): *prayāṇa* – departure, death
अपि च **and also** ⟨*avyaya*⟩
ते **your** ⟨opt. for *tava* 6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
न **not** ⟨*avyaya*⟩
प्रसिध्येत् **it would succeed** ⟨*vidhi* 1.1⟩ *pra.√sidh[u]* 4P – to succeed
अ-कर्मणः **for one without work** ⟨6.1⟩ m. *a-karman (karmā)*...यः कर्म न करोति, सः अ-कर्मा – 'who does not work'

Subodhinī: नियतम् (नित्यम्) सन्ध्या-उपासनादि-कर्म कुरु । हि यस्मात् अ-कर्मणः (कर्म-अकरणात्) सकाशात्, कर्म ज्यायः (अधिकतरम्) । अन्यथा अ-कर्मणः (सर्व-कर्म-शून्यस्य) तव शरीर-निर्वाहः अपि न प्रसिद्ध्येत् (न भवेत्) ॥३.८॥
साङ्ख्याः तु 'सर्वम् अपि कर्म बन्धकत्वात् न कार्यम्' इति आहुः, तद् निराकुर्वन् आह – 'यज्ञार्थात्' इति –

3.9

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥९॥

यज्ञार्थात् कर्मणः अन्यत्र	except for work done for Yajña (Viṣṇu)
अयम् लोकः कर्म-बन्धनः,	this world is bound by work,
हे कौन्तेय !	[therefore] O Arjuna!
मुक्त-सङ्गः तदर्थम् कर्म समाचर !	free from attachment, do your duty for Him!

"Work done as a sacrifice for Viṣṇu has to be performed, otherwise work causes bondage in this material world. Therefore, O son of Kuntī, perform your prescribed duties for His satisfation, and in that way you will always remain free from bondage."

यज्ञार्थात् **than for Yajña** ⟨5.1⟩ n. *yajña-_artha*...यज्ञस्य अर्थः इति यज्ञार्थः – for the sake of Yajña

यज्ञ (from √*yaj[a]*...देवपूजा-सङ्गतिकरण-यजन-दानेषु – to worship; associate; sacrifice; give) – worship, devotion, sacrifice; sacrifice personified, Viṣṇu (*yajño vai viṣṇuḥ – yajña* verily means Viṣṇu)
Other words for 'sacrifice': *yāga, makha, kratu.*
Different *yajñas* are *brahma-yajña* (study), *deva-yajña, manuṣya-yajña* (receiving guests), *pitṛ-yajña (tarpaṇa), bhūta-yajña* (feeding living beings).

कर्मणः **than work** ⟨5.1⟩ n. *karman (karma)* – activity

अन्यत्र **other** ⟨*avyaya*⟩ – in another place or manner, elsewhere

लोकः **the world (people)** ⟨1.1⟩ m. *loka* – place, world, people

अयम् **this** ⟨1.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this

कर्म-बन्धनः **which is bound by work** ⟨1.1⟩ m. *karma-bandhana*...कर्म बन्धनम् यस्य, सः कर्म-बन्धनः – 'whose bondage is work'

तदर्थम् **for his sake** ⟨*avyaya*⟩ *tad-artham*...तस्य अर्थम् इति तदर्थम् – 'for the sake of that'

कर्म **work** ⟨2.1⟩ n. *karman (karma)* – activity

कौन्तेय **O Arjuna!** ⟨8.1⟩ m. *kaunteya* – 'son of Kuntī'

मुक्त-सङ्गः **free from attachment** ⟨1.1⟩ m. *mukta-saṅga*...मुक्तः सङ्गः येन, सः मुक्त-सङ्गः – 'by whom attachment is given up'

समाचर **you must perform** ⟨*vidhātā* 2.1⟩ *sam.ā.*√*car[a]* – to behave, perform

Subodhinī: 'यज्ञः' अत्र विष्णुः । 'यज्ञः वै विष्णुः' (*Taittirīya-saṁhitā* 1.7.44) इति श्रुतेः । तद्-आराधनार्थात् कर्मणः अन्यत्र (तद्-एकम् विना) अयम् लोकः कर्म-बन्धनः (कर्मभिः बध्यते), ननु ईश्वर-आराधनार्थेन कर्मणा । अतः तदर्थम् (विष्णु-प्रीत्यर्थम्), मुक्त-सङ्गः (निष्कामः) सन्, कर्म सम्यक् आचर ॥३.९॥ प्रजापति-वचनात् अपि कर्म-कर्ता एव श्रेष्ठः इति आह – 'सह-यज्ञाः' इति चतुर्भिः –

Note: Verse 3.4 objects to the opinion of the *jñānīs* that just by *karma-sannyāsa* one achieves *mokṣa*, and verse 3.9 objects to the opinion that 'all kinds of work are binding, and that therefore they should be given up'.

3.10

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वमेष वो ऽस्त्विष्टकामधुक् ॥१०॥

सह-यज्ञाः प्रजाः सृष्ट्वा	[after] creating progeny along with sacrifice
प्रजा-पतिः पुरा उवाच	the Lord formerly said:
अनेन प्रसविष्यध्वम्,	'by this (*yajña*) you will multiply,
एषः वः (युष्माकम्) इष्ट-काम-धुक् अस्तु !	this shall be your bestower of desired objects!'

"In the beginning of creation, the Lord of all beings sent forth generations of men and demigods, along with sacrifices for Viṣṇu, and blessed them by saying, 'Be thou happy by this yajña (sacrifice) because its performance will bestow upon you everything desirable for living happily and achieving liberation.'"

सह-यज्ञाः **along with sacrifice** ⟨2.3⟩ f. *saha-yajñā (.ā[p])*...यज्ञेन सह इति सह-यज्ञः – 'along with sacrifice'

प्रजाः **generations** ⟨2.3⟩ f. *prajā* (from *pra.*√*jan[î]* – to be born, bring forth) – offspring, progeny, mankind

सृष्ट्वा **[after] creating** ⟨*avyaya*⟩ √*sṛj[a]*...विसर्गे – to let loose, create; + *.[k]tvā*
(also from √*srj[a]*...विसर्गे): *sarga, sṛṣṭi* – discharging; stream, downpour; origin, offspring; creation of the world, as distinct from *pralaya* (dissolution) and *sthiti* (existence)

पुरा **formerly** ⟨*avyaya*⟩

उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak

प्रजा-पतिः **the Lord** ⟨1.1⟩ m. *prajā-pati* – 'the lord of creatures', Viṣṇu or Brahmā

अनेन **by this** ⟨3.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this

प्रसविष्यध्वम् **you will multiply** ⟨Vedic form⟩ *pra.*√*sū[n]* – to give birth

एषः **this** ⟨1.1⟩ m. *kṛṣṇanāma etad* – (first person) he, this

वः **your** ⟨opt. for *yuṣmākam* 6.3⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

अस्तु **it should be** ⟨*vidhātā* 1.1⟩ √*as[a]*...भुवि – to be, exist

इष्ट-काम-धुक् **which bestows desired objects** ⟨1.1⟩ m. *iṣṭa-kāma-duh (-dhuk)* (...इष्टान् कामान् दोग्धि इति इष्ट-काम-धुक् – 'which bestows desired objects', also a name of the wishfulfilling cow (*kāma-dhenu*)

इष्ट (√*iṣ[u]*...इच्छायाम् – to wish, desire; + *.[k]ta*) – desired; *iṣṭa* (when derived from √*yaj[a]*...देवपूजा-सङ्गतिकरण-यजन-दानेषु – to worship; associate; sacrifice; give; + *.[k]ta*) – worshiped, (as in:) *iṣṭa-deva* – one's worshiped or favourite lord; (also from √*iṣ[u]*...इच्छायाम्): *icchā* – wish, desire
The word *kāma-duh* is declined *kāma-dhuk, kāma-duhau, kāma-duhaḥ*,...!

Subodhinī: यज्ञेन सह वर्तन्ते इति सह-यज्ञाः, यज्ञ-अधिकृताः ब्राह्मण-आद्याः, प्रजाः पुरा (सर्ग-आदौ) सृष्ट्वा ब्रह्मा इदम् उवाच – अनेन स्व-आश्रम-उचित-धर्मेण यज्ञेन प्रसविष्यध्वम् (प्रसूयध्वम्)। प्रसवः हि वृद्धिः। उत्तरोत्तराम् अभिवृद्धिम् लभध्वम् इति अर्थः। तत्र हेतुः – एषः यज्ञः वः (युष्माकम्) इष्ट-काम-धुक्, इष्टान् कामान् दोग्धि इति तथा, अभीष्ट-भोग-प्रदः अस्तु इति अर्थः। अत्र च 'यज्ञ'-ग्रहणम् आवश्यक-कर्म-उपलक्षणार्थम्। काम्य-कर्म-प्रशंसा तु प्रकरणे अ-सङ्गता अपि, सामान्यतः अ-कर्मणः कर्म श्रेष्ठम् इति एतद् अर्थम् इति अ-दोषः ॥३.१०॥

कथम् इष्ट-काम-दोग्धा यज्ञः भवेत् ? इति अत्र आह – 'देवान्' इति –

3.11

देवान्भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥११॥

अनेन देवान् भावयत,	by this (*yajña*) you must satisfy the *devas*,
ते देवाः वः (युष्मान्) भावयन्तु !	and those *devas* must satisfy you!
परस्परम् भावयन्तः	[thus] [while] satisying each other
परम् श्रेयः अवाप्स्यथ ।	you all will get the supreme benefit

"The demigods, being pleased by sacrifices, will also please you, and thus, by cooperation between men and demigods, prosperity will reign for all."

देवान् **the *devas*** ⟨2.3⟩ m. *deva* (from √*div[u]* 4P...क्रीडा-विजीगिषा-व्यवहार-द्युति-स्तुति-कान्ति-गतिषु – to play; desire to win; deal; shine; praise; desire; go) – a divine being, devotee, demigod; esp. those headed by Indra in *svarga-loka*
(as in:) *deva-deva* – 'god of gods', name of Viṣṇu-Kṛṣṇa; *devatā* – divinity, deity; *devī* – goddess; (derived:) *divya* – divine, celestial
Other words for 'demigod': *daivata, devatā, amara, sura, āditya*. The 10 groups of *devas*: *vidyādhara, apsaraḥ, yakṣaḥ, rakṣaḥ, gandharva, kinnara, piśāca, guhyaka, siddha, bhūta*.

भावयत **you must satisfy** ⟨*vidhātā* caus. 2.3⟩ √*bhū*...सत्तायाम् – to be, exist, become; caus.: to cause to exist, nourish, maintain, foster

अनेन **by this** ⟨3.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this

ते **they** ⟨1.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

देवाः **the *devas*** ⟨1.3⟩ m. *deva* – divine being

भावयन्तु **they must satisfy** ⟨*vidhātā* caus. 1.3⟩ √*bhū*...सत्तायाम् – to be, exist, become

वः **you** ⟨opt. for *yuṣmān* 2.3⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

परस्परम् **each other** ⟨*avyaya*⟩

भावयन्तः **[while] satisfying** ⟨1.3⟩ m. *bhāvayat* (√*bhū*...सत्तायाम् – to be, exist, become; + .[*ś*]*at*[*ṛ*])

श्रेयः **benefit** ⟨2.1⟩ n. *śreyas* (*śreyaḥ*) – better, benefit

परम् **supreme** ⟨2.1⟩ n. *para* – beyond

अवाप्स्यथ **you will get** ⟨*kalki* 2.3⟩ *ava.*√*āp[l]* – to obtain

Subodhinī: अनेन यज्ञेन यूयम् देवान् भावयत, हविः-भागैः संवर्धयत (तर्पयत) इति अर्थः। ते च देवाः वः (युष्मान्) संवर्धयन्तु, वृष्टि-आदिना अन्न-उत्पत्ति-द्वारेण। एवम् अन्योन्यम् संवर्धयन्तः, देवाः च यूयम् च परस्परम् श्रेयः (अभीष्टम् अर्थम्) प्राप्स्यथ ॥३.११॥

एतद् एव स्पष्टी-कुर्वन्, कर्म-अकरणे दोषम् आह – 'इष्टान्' इति –

3.12

इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥१२॥

यज्ञ-भाविताः देवाः	the *devas*, satisfied by sacrifice
वः (युष्मभ्यम्) इष्टान् भोगान् हि दास्यन्ते,	will give you the desired objects,
एभ्यः अ-प्रदाय	[but] [after] not offering to them [in return]
यः तैः दत्तान् भुङ्क्ते	one who enjoys things given by them
सः स्तेनः एव ।	he is certainly a thief

"In charge of the various necessities of life, the demigods, being satisfied by the performance of yajña (sacrifice), will supply all necessities to you. But he who enjoys such gifts without offering them to the demigods in return is certainly a thief."

इष्टान् **which are desired** ⟨2.3⟩ m. *iṣṭa* (√*iṣ[u]*...इच्छायाम् – to wish, desire; + .[*k*]*ta*) – desired

भोगान् **enjoyments** ⟨2.3⟩ m. *bhoga* – enjoyment, luxury

हि **indeed** ⟨*avyaya*⟩

वः **to you** ⟨opt. for *yuṣmabhyam* 4.3⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

देवाः **the *devas*** ⟨1.3⟩ m. *deva* – divine being

दास्यन्ते **they will give** ⟨*kalki* 1.3⟩ √[*ḍu*]*dā*[*ñ*]...दाने – to give

यज्ञ-भाविताः **who are satisfied by sacrifice** ⟨1.3⟩ m. *yajña-bhāvita*...यज्ञेन भावितः इति यज्ञ-भावितः – satisfied by sacrifice

तैः **by them** ⟨3.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

दत्तान् **which are given** ⟨2.3⟩ m. *datta* (√[*du*]*dā*[*ñ*]...दाने – to give; + .[*k*]*ta*) – given, presented

अ-प्रदाय **[after] not offering** ⟨*avyaya*⟩ *a-pradāya*
प्रदाय (*pra.*√[*du*]*dā*[*ñ*] – to give away, offer; + .*ya*[*p*]) – [after] offering

एभ्यः **to them** ⟨4.3⟩ m. *kṛṣṇanāma idam* – (first person) he, this

यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

भुङ्क्ते **he enjoys** ⟨*acyuta* 1.1⟩ √*bhuj[a]*...पालन-अभ्यवहारयोः – to govern; enjoy
स्तेनः **a thief** ⟨1.1⟩ m. *stena* – thief
एव **certainly** ⟨*avyaya*⟩
सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

Subodhinī: यज्ञैः भाविताः (सुपूजिताः) सन्तः, देवाः वृष्ट्यादि-द्वारेण वः (युष्मभ्यम्) भोगान् दास्यन्ति हि । अतः देवैः दत्तान् अन्नादीन् एभ्यः (देवेभ्यः) पञ्च-यज्ञादिभिः अ-दत्वा यः भुङ्क्ते, सः तु स्तेनः (चौरः) एव ज्ञेयः ॥३.१२॥ अतः च यजन्ते एव श्रेष्ठाः, न इतरे इति आह –'यज्ञ-शिष्ट-आशिनः' इति –

3.13

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥१३॥

यज्ञ-शिष्टाशिनः सन्तः	saints who eat food offered in sacrifice
सर्व-किल्बिषैः मुच्यन्ते,	are freed from all sins,
ये तु पापाः आत्म-कारणात् पचन्ति	but those sinners who cook for their own sake
ते अघम् भुञ्जते ।	they eat sin

"The devotees of the Lord are released from all kinds of sins because they eat food which is offered first for sacrifice. Others, who prepare food for personal sense enjoyment, verily eat only sin."

यज्ञ-शिष्टाशिनः **those who eat food offered in sacrifice** ⟨1.3⟩ m. *yajña-śiṣṭa-_āśin* (-*āśī*)...यज्ञस्य शिष्टम् अश्नन्ति, सः यज्ञशिष्टाशिनः – 'one who eats remnants of sacrifice'
शिष्ट (√*śiṣ[a]*...असर्व्वोपयोगे – to leave remaining; + .*[k]ta*) – left remaining, remains, remnant
आशिन् (*āśī*) (from √*aś[a]*...भोजने – to eat, enjoy) – one who eats, enjoys; *śiṣṭa-_āśin* (-*āśī*) – one who eats remnants; the *yajña-śiṣṭa* mentioned here is similar to *prasādam*, foodstuff offered to the Lord in the Vaiṣṇava tradition

सन्तः **saints** ⟨1.3⟩ m. *sat* (√*as[a]*...भुवि – to be, exist; + .*[ś]at[r]*) n. – being, existing; ... good; a saintly person
मुच्यन्ते **they are released** ⟨*acyuta* pass. 1.3⟩ √*muc[l̥]*...मोक्षणे – to release
सर्व-किल्बिषैः **from all sins** ⟨3.3⟩ n. *sarva-kilbiṣa*...सर्वः किल्बिषः इति सर्व-किल्बिषः – all (kinds of) sin
किल्बिष – fault, offense, sin (same as *agha, pāpa*); there are five utensils in a house (*pañca-sūnā*) specifically mentioned by which small animals are accidentally killed – mortar, grinding stone, fire place, water pot and broom.
भुञ्जते **they enjoy** ⟨*acyuta* 1.3⟩ √*bhuj[a]*...पालन-अभ्यवहारयोः – to govern; enjoy
ते **they** ⟨1.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

तु **but** ⟨*avyaya*⟩
अघम् **sin** ⟨2.1⟩ n. *agha*
पापाः **sinners** ⟨1.3⟩ m. *pāpa* – sinner
ये **those who** ⟨1.3⟩ m. *kṛṣṇanāma yad* – (relative) who, which
पचन्ति **they cook** ⟨*acyuta* 1.3⟩ √*[ḍu]pac[a]ṣ]*...पाके – to cook, digest
आत्म-कारणात् **for the own sake** ⟨5.1⟩ n. *ātma-kāraṇa*
कारण – cause, reason, motive; *kāraṇāt* – from some cause or reason

Subodhinī: वैश्वदेवादि-यज्ञ-अवशिष्टम् ये अश्नन्ति, ते पञ्च-सूना-कृतैः सर्वैः किल्बिषैः मुच्यन्ते । पञ्च-सूनाः च स्मृतौ उक्ताः –

कण्डनी पेषणी चुल्ली उदकुम्भी च मार्जनी ।
पञ्च-सूना गृहस्थस्य ताभिः स्वर्गम् न विन्दति ॥

इति (*Manu-saṁhitā* 3.67) । 'पञ्च-सूना-कृतम् पापम् पञ्च-यज्ञैः व्यपोहति' इति च । ये तु आत्मनः भोजनार्थम् एव अन्नम् पचन्ति नतु वैश्वदेवादि-अर्थम्, ते पापाः (दुराचाराः) अघम् एव भुञ्जते ॥३.१३॥ जगत्-चक्र-प्रवृत्ति-हेतुत्वात् अपि कर्म कर्तव्यम् इति आह – 'अन्नात्' इति त्रिभिः –

3.14

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥१४॥

अन्नात् भूतानि भवन्ति,	all beings develop from food,
पर्जन्यात् अन्न-सम्भवः,	the production of food is from rain,
यज्ञात् पर्जन्यः भवति,	rain comes from sacrifice,
यज्ञः कर्म-समुद्भवः	sacrifice comes from duty

"All living bodies subsist on food grains, which are produced from rains. Rains are produced by performance of yajña (sacrifice), and yajña is born of prescribed duties."

अन्नात् **from food** ⟨5.1⟩ n. *anna* (√*ad[a]*...भक्षणे – to eat; + .*[k]ta*) – 'eaten'; food, esp. boiled rice
(as in:) *anna-prāśa* – 'feeding rice', the *saṁskāra* of putting rice into a child's mouth for the first time
भवन्ति **they are generated** ⟨*acyuta* 1.3⟩ √*bhū*...सत्तायाम् – to be, exist, become
भूतानि **beings** ⟨1.3⟩ n. *bhūta* (√*bhū*...सत्तायाम् – to be, exist, become; + .*[k]ta*) – past; an element, being, creature
पर्जन्यात् **from rain** ⟨5.1⟩ m. *parjanya* – a rain cloud, rain
अन्न-सम्भवः **production of food** ⟨1.1⟩ m. *anna-sambhava*...अन्नस्य सम्भवः इति अन्न-सम्भवः
यज्ञात् **from sacrifice** ⟨5.1⟩ m. *yajña* – sacrifice

भवति **it is generated** ⟨*acyuta* 1.1⟩ √*bhū*...सत्तायाम् – to be, exist, become

पर्जन्यः **rain** ⟨1.1⟩ m. *parjanya*

यज्ञः **sacrifice** ⟨1.1⟩ m. *yajña*

कर्म-समुद्भवः **comes from duty** ⟨1.1⟩ m. *karma-samudbhava*...कर्मणः समुद्भवः यस्य, सः कर्म-समुद्भवः – 'whose origin is from duty'

समुद्भव (from *sam.ud.*√*bhū* – to produce) – existence, production, origin

Subodhinī: अन्नात्, शुक्र-शोणित-रूपेण परिणतात्, भूतानि उत्पद्यन्ते । अन्नस्य च सम्भवः पर्जन्यात् (वृष्टेः) । सः च पर्जन्यः यज्ञात् भवति । सः च यज्ञः कर्म-समुद्भवः । कर्मणा यजमानादि-व्यापारेण सम्यक् निष्पद्यते इति अर्थः ।

अग्नौ प्रास्त-आहुतिः सम्यक् आदित्यम् उपतिष्ठते ।
आदित्यात् जायते वृष्टिः वृष्टेः अन्नम् ततः प्रजाः ॥

(*Manu-saṁhitā* 3.76) इति स्मृतेः ॥३.१४॥

3.15

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् ।
तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥१५॥

कर्म ब्रह्मोद्भवम् विद्धि,	know that duty comes from the *Veda*,
ब्रह्म अक्षर-समुद्भवम्,	and *Veda* comes from Viṣṇu,
तस्मात् सर्व-गतम् ब्रह्म	therefore, the all-pervading transcendence
नित्यम् यज्ञे प्रतिष्ठितम् ।	always rests in sacrifice

"Regulated activities are prescribed in the Vedas, and the Vedas are directly manifested from the Supreme Personality of Godhead. Consequently the all-pervading Transcendence is eternally situated in acts of sacrifice."

कर्म **duty** ⟨2.1⟩ n. *karman* (*karma*) – activity

ब्रह्मोद्भवम् **which comes from the *Veda*** ⟨2.1⟩ n. *brahma-_udbhava*...ब्रह्मणः उद्भवः यस्य, तद् ब्रह्मोद्भवः – 'whose origin is from *brahma*'

विद्धि **you must know** ⟨*vidhātā* 2.1⟩ √*vid[a]* 2P...ज्ञाने – to know

ब्रह्म **the *Veda*** ⟨2.1⟩ n. *brahman* (*brahma*) – spirit, soul

अक्षर-समुद्भवम् **comes from Viṣṇu** ⟨2.1⟩ n. *a-kṣara-samudbhava*...अक्षरात् समुद्भवः यस्य, तद् अक्षर-समुद्भवः – 'whose origin is from Viṣṇu'

क्षर (from √*kṣar[a]*...सञ्चलने – to flow, perish) – flowing away, perishable; the material body; *a-kṣara* – imperishable; a syllable (esp. *om*), a letter; religious sacrifice; Viṣṇu (the *akṣara* here refers to Viṣṇu, and *Veda* is described as the 'breath or sigh of Viṣṇu')

तस्मात् **therefore** ⟨*avyaya*⟩

सर्व-गतम् **all-pervading** ⟨1.1⟩ n. *sarva-gata* – 'everywhere-gone', omnipresent

ब्रह्म **transcendence** ⟨1.1⟩ n. *brahman* (*brahma*) – spirit, soul

नित्यम् **permanently** ⟨*avyaya*⟩ from *nitya* – innate, fixed, eternal

यज्ञे **in sacrifice** ⟨7.1⟩ m. *yajña* – sacrifice

प्रतिष्ठितम् **firmly situated** ⟨1.1⟩ n. *pratiṣṭhita* (*prati.*√*sthā* – to stand firmly; + *.[k]ta*)

Subodhinī: तद् च यजमानादि-व्यापार-रूपम् कर्म ब्रह्म-उद्भवम् विद्धि, ब्रह्म वेदः, तस्मात् प्रवृत्तम् जानीहि । तद् च ब्रह्म (वेद-आख्यम्) अ-क्षरात् (पर-ब्रह्मणः) समुद्भूतम् विद्धि । 'अस्य महतः भूतस्य निःश्वसितम् एतद् ऋग्वेदः यजुर्वेदः सामवेदः' (*Bṛhad-āraṇyaka-Up.* 2.4.10) इति श्रुतेः । यतः एवम् (अ-क्षरात् एव यज्ञ-प्रवृत्तेः) अत्यन्तम् तस्य अभिप्रेतः, यज्ञः अवश्यम् वक्तुम् सम्मतः । तस्मात्, सर्व-गतम् अपि, अ-क्षरम् ब्रह्म नित्यम् (सर्वदा) यज्ञे प्रतिष्ठितम्, यज्ञेन उपाय-भूतेन प्राप्यते इति 'यज्ञे प्रतिष्ठितम्' उच्यते । 'उद्यम-स्था सदा लक्ष्मीः' इतिवत् । यद्वा, यस्मात् जगत्-चक्र-मूलम् कर्म [अस्ति], तस्मात् सर्व-गतम्, मन्त्र-अर्थवादैः सर्वेषु सिद्धार्थ-प्रतिपादकेषु भूत-अन्वाख्यान-आदिषु गतम् (स्थितम्) अपि, 'वेद'-आख्यम् ब्रह्म सर्वदा यज्ञे तात्पर्य-रूपेण प्रतिष्ठितम् । अतः यज्ञादि-कर्म कर्तव्यम् इति अर्थः ॥३.१५॥

यस्मात् एवम् परमेश्वरेण एव भूतानाम् पुरुषार्थ-सिद्धये कर्मादि-चक्रम् प्रवर्तितम्, तस्मात् तद् अ-कुर्वतः वृथा एव जीवनम् इति आह – 'एवम्' इति –

3.16

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥१६॥

हे पार्थ !	O Arjuna!
यः अघायुः इन्द्रियारामः	one who lives sinfully, delighting in the senses
एवम् प्रवर्तितम् चक्रम्	and the cycle thus established
इह न अनुवर्तयति,	does not carry out in this world,
सः मोघम् जीवति ।	he lives in vain

"My dear Arjuna, one who does not follow in human life the cycle of sacrifice thus established by the Vedas certainly leads a life full of sin. Living only for the satisfaction of the senses, such a person lives in vain."

एवम् **thus** ⟨*avyaya*⟩

प्रवर्तितम् **started** ⟨2.1⟩ n. *pravartita* (*pra.*√*vṛt[u]* – to start to act; + *.[k]ta*)

चक्रम् **the cycle** ⟨2.1⟩ n. *cakra* – wheel; wheel of time; discus, the disc weapon of Viṣṇu; circle, energetic circle, esp. in the body, there are mainly six (*ṣaṭ-cakra* – *mūlādhāra*, *svādhiṣṭhāna*, *maṇi-pūra*, *an-āhata*, *viśuddha* and *ājñākhya*); a province, district;

"An oblation offered in the fire goes directly to the sun, which generates rain, and subsequently grain and men." (*Manu-saṁhitā*) The circle is: work → sacrifice → rain → grain → subsistance → work, etc. This cycle is introduced by Viṣṇu via Brahmā through the *Veda*, which assigns one's duty: Viṣṇu/*akṣara* → (Brahmā →) *Veda* → duty/work.

न **not** ⟨*avyaya*⟩

अनुवर्तयति **he carries out** ⟨*acyuta* caus. 1.1⟩ *anu.*√*vṛt[u]* – to act after, follow

इह **here** ⟨*avyaya*⟩

यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

अघायुः **whose life is sinful** ⟨1.1⟩ m. *agha-_āyus (-āyuḥ)*...अघम् आयुः यस्य, सः अघायुः

इन्द्रियारामः **whose delight is in the senses** ⟨1.1⟩ m. *indriya-_ārāma*...इन्द्रियेषु आरामः यस्य, सः इन्द्रियारामः

मोघम् **vainly** ⟨*avyaya*⟩ from *mogha* – vain, useless, fruitless

पार्थ **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'

सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

जीवति **he lives** ⟨*acyuta* 1.1⟩ √*jīv[a]*...प्राणधारणे – to live

Subodhinī: परमेश्वर-वाक्य-भूतात् वेद-आख्यात् ब्रह्मणः पुरुषाणाम् कर्मणि प्रवृत्तिः, ततः कर्म-निष्पत्तिः, ततः पर्जन्यः, ततः अन्नम्, ततः भूतानि, भूतानाम् च पुनः तथैव कर्मणि प्रवृत्तिः इति एवम् प्रवर्तितम् चक्रम् यः न अनुवर्तयति (न अनुतिष्ठति), सः अघ-आयुः – अघम् (पाप-रूपम्) आयुः यस्य सः, यतः इन्द्रियैः विषयेषु एव आरमति, नतु ईश्वर-आराधनार्थे कर्मणि, अतः मोघम् (व्यर्थम्) सः जीवति ॥३.१६॥

तद् एवम् 'न कर्मणाम् अनारम्भात् नैष्कर्म्यम्' (3.4) इत्यादिना अ-ज्ञस्य अन्तःकरण-शुद्ध्यर्थम् कर्म-योगम् उक्त्वा, ज्ञानिनः कर्म-अनुपयोगम् आह – 'यः तु' इति द्वाभ्याम् –

3.17

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते ॥१७॥

यः तु मानवः	but that person
आत्म-रतिः आत्म-तृप्तः एव च स्यात्	who delights in the self, is pleased with the self only
आत्मनि एव च सन्तुष्टः,	only satisfied in the self,
तस्य कार्यम् न विद्यते ।	for him there is no duty

"But for one who takes pleasure in the self, whose human life is one of self-realization, and who is satisfied in the self only, fully satiated – for him there is no duty."

यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

तु **but** ⟨*avyaya*⟩

आत्म-रतिः **whose delight is in the self** ⟨1.1⟩ m. *ātma-rati*...आत्मनि रतिः यस्य, सः आत्म-रतिः

रति (from √*ram[u]*...क्रीडायाम् – to play, rejoice) – pleasure, fondness; amorous enjoyment

एव **certainly** ⟨*avyaya*⟩

स्यात् **he should be** ⟨*vidhi* 1.1⟩ √*as[a]*...भुवि – to be, exist

आत्म-तृप्तः **satisfied with the self** ⟨1.1⟩ m. *ātma-tṛpta*...आत्मना तृप्तः इति आत्म-तृप्तः

तृप्त (√*tṛp[a]*...प्रीणने – to please, be satisfied; + *.[k]ta*) – satisfied

च **and** ⟨*avyaya*⟩

मानवः **a man** ⟨1.1⟩ m. *mānava*

आत्मनि **in the self** ⟨7.1⟩ m. *ātman (ātmā)* – the self, soul

सन्तुष्टः **satisfied** ⟨1.1⟩ m. *santuṣṭa (sam.*√*tuṣ[a]* – to completely satisfy; + *.[k]ta*)

तस्य **his** ⟨6.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

कार्यम् **duty** ⟨1.1⟩ n. *kārya* (√*[ḍu]kṛ[ñ]*...करणे – to do; + *.ya*) – 'to be done'

न **not** ⟨*avyaya*⟩

विद्यते **it exists** ⟨*acyuta* 1.1⟩ √*vid[a]* 4A...सत्तायाम् – to be, exist

Subodhinī: आत्मनि एव रतिः (प्रीतिः) यस्य । ततः च आत्मनि एव तृप्तः, स्व-आनन्द-अनुभवेन निर्वृतः, अतएव आत्मनि एव सन्तुष्टः, भोग-अपेक्षा-रहितः यः, तस्य कर्तव्यम् न अस्ति ॥३.१७॥

तत्र हेतुम् आह – 'नैव तस्य' इति –

3.18

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥१८॥

तस्य कृतेन	for him by working
इह न एव कश्चन अर्थः,	there is no purpose whatsoever in this world,
न अ-कृतेन,	nor by not working,
अस्य च सर्व-भूतेषु	and for him among all beings
न कश्चिद् अर्थ-व्यपाश्रयः ।	no one is a shelter for any purpose

"A self-realized man has no purpose to fulfill in the discharge of his prescribed duties, nor has he any reason not to perform such work. Nor has he any need to depend on any other living being."

न एव **never** ⟨*avyaya*⟩

तस्य **his** ⟨6.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

कृतेन **by work** ⟨3.1⟩ n. *kṛta* (√*[ḍu]kṛ[ñ]*...करणे – to do; + .*[k]ta*) – 'done', well done, performed; work

अर्थः **purpose** ⟨1.1⟩ m. *artha* – aim, purpose; cause, motive; advantage, utility; thing, object; wealth, money; wanting, needing; sense, meaning

न **not** ⟨*avyaya*⟩

अ-कृतेन **by no work** ⟨3.1⟩ n. *a-kṛta* – 'not done', no work, no duty

कृत – 'done', work, duty

इह **here** ⟨*avyaya*⟩

कश्चन **some** ⟨1.1⟩ m. *kṛṣṇanāma kim (kaḥ)* + .*cana* – someone, something

न **not** ⟨*avyaya*⟩

च **and** ⟨*avyaya*⟩

अस्य **his** ⟨6.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this

सर्व-भूतेषु **among all beings** ⟨7.3⟩ m. *sarva-bhūta* – all beings

कश्चिद् **something** ⟨1.1⟩ m. *kṛṣṇanāma kim (kaḥ)* + .*cid* – someone, something

अर्थ-व्यपाश्रयः **shelter for a purpose** ⟨1.1⟩ m. *artha-vyapāśraya*...अर्थे व्यपाश्रयः इति अर्थ-व्यपाश्रयः

व्यपाश्रय (from *vi.apa.ā.*√*śri[ñ]* – to take shelter) – shelter

Subodhinī: कृतेन (कर्मणा) तस्य अर्थः (पुण्यम्) नैव अस्ति । नच अ-कृतेन कश्चन कः अपि प्रत्यवायः अस्ति, निरहङ्कारत्वेन विधि-निषेध-अतीतत्वात्, तथापि 'तस्मात् तद् एषाम् देवानाम् न प्रियम्, यद् एतद् मनुष्याः बिदुः' (*Bṛhad-āraṇyaka-Up.* 1.4.10) इति श्रुतेः, मोक्षे देवकृत-विघ्न-सम्भवात् तद्-परिहारार्थम् कर्मभिः देवाः सेव्याः इति आशङ्क्य उक्तम्, सर्व-भूतेषु ब्रह्मादि-स्थावर-अन्तेषु कश्चिद् अपि अर्थ-व्यपाश्रयः, आश्रयः एव व्यपाश्रयः । अर्थे (मोक्षे) आश्रयणीयः अस्य न अस्ति इति अर्थः, विघ्न-अभावस्य श्रुत्या एव उक्तत्वात् । तथा च श्रुतिः 'तस्य ह न देवाः च न आभूत्याः ईशते, आत्मा हि येषाम् सः भवति' (*Bṛhad-āraṇyaka-Up.* 1.4.10) इति । 'ह न' इति अव्यय-द्वयम् 'अपि' अर्थे । देवाः अपि तस्य आत्मतत्त्व-ज्ञस्य आभूत्यै (ब्रह्मता-प्रतिबन्धनाय) न ईशते (न शक्नुवन्ति) इति श्रुतेः अर्थः । देव-कृताः तु विघ्नाः सम्यक् ज्ञान-उत्पत्तेः प्राक् एव 'यद् एतद् ब्रह्म मनुष्याः विद्युः, तद् एषाम् देवानाम् न प्रियम्' इति श्रुत्या ब्रह्म-ज्ञानस्य एव अ-प्रियत्व-उक्त्या, तत्रैव विघ्न-कर्तृत्वस्य सूचितत्वात् ॥३.१८॥

यस्मात् एवम-भूतस्य ज्ञानिनः एव कर्म-अनुपयोगः, न अन्यस्य, तस्मात् त्वम् कर्म कुरु ! इति आह –'तस्मात्' इति –

3.19

तस्मादसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥१९॥

तस्मात् अ-सक्तः	therefore, unattached
सततम् कार्यम् कर्म समाचर !	always perform the work which has to be done!
अ-सक्तः हि कर्म आचरन्	[while] performing work unattached
पूरुषः परम् आप्नोति ।	a person attains the Supreme

"Therefore, without being attached to the fruits of activities, one should act as a matter of duty, for by working without attachment one attains the Supreme."

तस्मात् **therefore** ⟨*avyaya*⟩

अ-सक्तः **unattached** ⟨1.1⟩ m. *a-sakta*

सततम् **constantly** ⟨*avyaya*⟩ from *satata* – constant, uninterrupted

कार्यम् **which is to be done** ⟨2.1⟩ n. *kārya* (√*[ḍu]kṛ[ñ]*...करणे – to do; + .*ya*) – 'to be done', duty

कर्म **work** ⟨2.1⟩ n. *karman (karma)* – activity

समाचर **you must perform** ⟨*vidhātā* 2.1⟩ *sam.ā.*√*car[a]* – to behave, perform

अ-सक्तः **unattached** ⟨1.1⟩ m. *a-sakta*

हि **indeed** ⟨*avyaya*⟩

आचरन् **[while] performing** ⟨1.1⟩ m. *ācarat* (*ā.*√*car[a]* – to behave, perform; + .*[ś]at[ṛ]*)

कर्म **work** ⟨2.1⟩ n. *karman (karma)* – activity

परम् **the Supreme** ⟨2.1⟩ n. *para* – beyond

आप्नोति **he attains** ⟨*acyuta* 1.1⟩ √*āp[ḷ]*...व्याप्तौ – to reach, obtain

पूरुषः **a person** ⟨1.1⟩ m. *pūruṣa*

Subodhinī: अ-सक्तः (फल-सङ्ग-रहितः) सन्, कार्यम् (अवश्य-कर्तव्यतया विहितम् नित्य-नैमित्तिकम् कर्म) सम्यक् आचर । हि यस्मात् अ-सक्तः कर्म आचरन्, पुरुषः परम् (मोक्षम्) चित्त-शुद्धि-ज्ञान-द्वारा प्राप्नोति ॥३.१९॥

अत्र सत्-आचारम् प्रमाणयति –'कर्मणा एव' इति –

3.20

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसङ्ग्रहमेवापि सम्पश्यन्कर्तुमर्हसि ॥२०॥

कर्मणा एव हि	just by performing their duty
जनकादयः संसिद्धिम् आस्थिताः,	kings like Janaka attained perfection,
लोक-सङ्ग्रहम् एव अपि सम्पश्यन्	even [while] considering the welfare of all
कर्तुम् अर्हसि ।	you should work

"Kings such as Janaka attained perfection solely by performance of prescribed duties. Therefore, just for the sake of educating the people in general, you should perform your work."

कर्मणा **by work** ⟨3.1⟩ n. *karman (karma)* – activity

एव हि **indeed** ⟨*avyaya*⟩

संसिद्धिम् **perfection** ⟨2.1⟩ f. *saṁsiddhi*

आस्थिताः **having attained** ⟨1.3⟩ m. *āsthita (ā.√sthā* – to attain, resort; + *.[k]ta)* – attained

जनकादयः **Janaka and others** ⟨1.3⟩ m. *janaka-_ādi*

लोक-सङ्ग्रहम् **the welfare of the people** ⟨2.1⟩ m. *loka-saṅgraha*...लोकानाम् सङ्ग्रहः इति लोक-सङ्ग्रहः

सङ्ग्रह (from *sam.√grah[a]* – to collect; control) – collection; control

एव **certainly** ⟨*avyaya*⟩

अपि **also** ⟨*avyaya*⟩

सम्पश्यन् **[while] considering** ⟨1.1⟩ m. *sampaśyat (sam.√dṛś[ir]* – to look at, consider; + *.[ś]at[ṛ])*

कर्तुम् **to work** ⟨*avyaya*⟩ *√[ḍu]kṛ[ñ]*...करणे – to do; + *.tum[u]*

अर्हसि **you deserve** ⟨*acyuta* 2.1⟩ *√arh[a]*...पूजायाम् – to be worthy, fit, able

Subodhinī: कर्मणा एव शुद्ध-सत्त्वाः सन्तः संसिद्धिम् (सम्यक् ज्ञानम्) प्राप्ताः इति अर्थः । यद्यपि त्वम् सम्यक्-ज्ञानिनम् एव आत्मानम् मन्यसे, तथापि कर्म आचरणम् भद्रम् एव इति आह – 'लोक-सङ्ग्रहम्' इति लोकस्य सङ्ग्रहः स्व-धर्मे प्रवर्तनम् । 'मया कर्मणि कृते जनः सर्वः अपि करिष्यति, अन्यथा ज्ञानि-दृष्टान्तेन अज्ञः कर्म त्यजन् पतेत्' इति एवम् लोक-रक्षणम् अपि तावत् प्रयोजनम् सम्पश्यन्, कर्म कर्तुम् एव अर्हसि, नतु त्यक्तुम् इति अर्थः ॥३.२०॥
कर्म-करणे लोक-सङ्ग्रहः यथा स्यात्, तथा आह – 'यद्' इति –

Note: Arjuna must set a good example, otherwise others might also give up their regulated duty and fall down, being not yet purified from material desires.

3.21

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥२१॥

यद् यद् श्रेष्ठः आचरति	whatever the leader does
तद् तद् एव इतरः जनः,	the same thing does another person,
यद् प्रमाणम् सः कुरुते	the standard which he sets
तद् लोकः अनुवर्तते ।	the world follows that

"Whatever action a great man performs, common men follow. And whatever standards he sets by exemplary acts, all the world pursues."

यद् यद् **whatever** ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which

आचरति **he performs** ⟨*acyuta* 1.1⟩ *ā.√car[a]* – to behave, perform

श्रेष्ठः **the best** ⟨1.1⟩ m. *śreṣṭha*

तद् तद् **that very** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that

एव **certainly** ⟨*avyaya*⟩

इतरः **another** ⟨1.1⟩ m. *kṛṣṇanāma itara*

जनः **a person** ⟨1.1⟩ m. *jana* – man, person

सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

यद् **that which** ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which

प्रमाणम् **standard** ⟨2.1⟩ n. *pramāṇa* (from *pra.√mā* – to measure) – measure, standard

कुरुते **he does** ⟨*acyuta* 1.1⟩ *√[ḍu]kṛ[ñ]*...करणे – to do

लोकः **the world** ⟨1.1⟩ m. *loka* – place, world, people

तद् **that** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that

अनुवर्तते **it follows** ⟨*acyuta* 1.1⟩ *anu.√vṛt[u]* – 'to act after', follow

Subodhinī: इतरः (प्राकृतः) जने अपि तद् तद् एव आचरति । सः श्रेष्ठः जनः कर्म-शास्त्रम् निवृत्ति-शास्त्रम् वा यद् प्रमाणम् मन्यते, तद् एव लोकः अपि अनुसरति ॥३.२१॥
अत्र च अहम् एव दृष्टान्तः इति आह – 'न मे पार्थ अस्ति' त्रिभिः –

3.22

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥२२॥

हे पार्थ !	O Arjuna!
त्रिषु लोकेषु	in the three worlds
मे (मम) किञ्चन कर्तव्यम् न अस्ति,	there is not any duty for Me,
न अनवाप्तम् अवाप्तव्यम्,	nor (anything) unobtained to be obtained,
कर्मणि च वर्ते एव ।	[still] I am also engaged in work

"O son of Pṛthā, there is no work prescribed for Me within all the three planetary systems. Nor am I in want of anything, nor have I a need to obtain anything – and yet I am engaged in prescribed duties."

न **not** ⟨*avyaya*⟩

मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I

पार्थ **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'

अस्ति **there is** ⟨*acyuta* 1.1⟩ *√as[a]*...भुवि – to be, exist

कर्तव्यम् **to be done** ⟨1.1⟩ n. *kartavya (√[ḍu]kṛ[ñ]*...करणे – to do; + *.tavya)* – 'to be done', duty (same as *kārya*)

त्रिषु **in the three** ⟨7.3⟩ m. *tri* – three

लोकेषु in the worlds ⟨7.3⟩ m. *loka* – place, world, people
किञ्चन anything ⟨2.1⟩ n. *kṛṣṇanāma kiñcana* – whatever
न not ⟨*avyaya*⟩
अनवाप्तम् unobtained ⟨2.1⟩ n. *an-avāpta*
अवाप्त (*ava.√āp[l]* – to obtain; + *.[k]ta*) – obtained
अवाप्तव्यम् to be obtained ⟨2.1⟩ n. *avāptavya* (*ava.√āp[l]* – to obtain; + *.tavya*)
वर्ते I act ⟨*acyuta* 3.1⟩ *√vṛt[u]* 1A...वर्तने – to happen, act
(also from *√vṛt[u]* 1A...वर्तने): *vartma* – path; *vartamāna* – existing; present, as in *vartamāna-kāla* or present tense; *vṛtti* – action; *pravṛtti* – 'moving onwards', activity, tendency; *nivṛtti* – inactivity
एव certainly ⟨*avyaya*⟩
च and ⟨*avyaya*⟩
कर्मणि in work ⟨7.1⟩ n. *karman* (*karma*) – activity

Subodhinī: हे पार्थ, मे कर्तव्यम् न अस्ति । यतः त्रिषु अपि लोकेषु अनवाप्तम् (अ-प्राप्तम्) सदा अवाप्तव्यम् (प्राप्यम्) न अस्ति, तथापि कर्मणि अहम् वर्ते एव, कर्म करोमि एव इति अर्थः ॥३.२२॥
अ-करणे लोकस्य नाशम् दर्शयति – 'यदि' इति –

3.23

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥२३॥

हे पार्थ !	O Arjuna!
यदि जातु	if ever
अहम् अ-तन्द्रितः हि कर्मणि न वर्तेयम्,	I would not carefully engage in work,
मनुष्याः	[then] people
मम वर्त्म सर्वशः अनुवर्तन्ते ।	would follow my path in all respect

"For if I ever failed to engage in carefully performing prescribed duties, O Pārtha, certainly all men would follow My path."

यदि if ⟨*avyaya*⟩
हि indeed ⟨*avyaya*⟩
अहम् I ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
न not ⟨*avyaya*⟩
वर्तेयम् I would engage ⟨*vidhi* 3.1⟩ *√vṛt[u]* 1A...वर्तने – to happen, act
जातु ever ⟨*avyaya*⟩
कर्मणि in work ⟨7.1⟩ n. *karman* (*karma*) – activity

अ-तन्द्रितः carefully ⟨1.1⟩ m. *a-tandrita* – free from laziness
तन्द्रित – relaxed, exhausted, lazy
मम my ⟨6.1⟩ *kṛṣṇanāma asmad* – (last person) I
वर्त्म path ⟨2.1⟩ n. *vartman* (*vartma*) (from *√vṛt[u]* 1A...वर्तने – to happen, act) – the track of a wheel, path, road, way, course
अनुवर्तन्ते they follow ⟨*acyuta* 1.3⟩ *anu.√vṛt[u]* – to act after, follow
मनुष्याः men ⟨1.3⟩ m. *manuṣya* – human
पार्थ O Arjuna! ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
सर्वशः in all respect ⟨*avyaya*⟩ (*sarvaśas*) – completely, altogether, in every way, on all sides

Subodhinī: जातु (कदाचित्), अतन्द्रितः (अनलसः) सन्, यदि कर्मणि न वर्तेयम् (कर्म न अनुतिष्ठेयम्), तर्हि मम एव वर्त्म (मार्गम्) मनुष्याः अनुवर्तन्ते (अनुवर्तेरन्) इति अर्थः ॥३.२३॥
ततः किम् ? अतः आह – 'उत्सीदेयुः' इति –

3.24

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ।
सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥२४॥

अहम् कर्म न कुर्याम् चेद्	if I would not perform work
इमे लोकाः उत्सीदेयुः,	these worlds would be ruined,
सङ्करस्य च कर्ता स्याम्,	I would be the cause of confusion [of *varṇa*],
इमाः प्रजाः उपहन्याम् ।	and would harm these people

"If I did not perform prescribed duties, all these worlds would be put to ruination. I would be the cause of creating unwanted population, and I would thereby destroy the peace of all living beings."

उत्सीदेयुः they would decline ⟨*vidhi* 1.3⟩ *ud.√sad[l]* – to decline
इमे these ⟨1.3⟩ m. *kṛṣṇanāma idam* – (first person) he, this
लोकाः worlds ⟨1.3⟩ m. *loka* – place, world, people
न not ⟨*avyaya*⟩
कुर्याम् I would do ⟨*vidhi* 3.1⟩ *√[du]kṛ[ñ]*...करणे – to do
कर्म duty ⟨2.1⟩ n. *karman* (*karma*) – activity
चेद् if ⟨*avyaya*⟩
अहम् I ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
सङ्करस्य of confusion [of *varṇa*] ⟨6.1⟩ m. *saṅkara* – mixture, confusion; see *varṇa-saṅkara* (1.40)

कर्ता **the cause** ⟨1.1⟩ m. *kartṛ (kartā)* (√*[ḍu]kṛ[ñ]*...करणे – to do; + *.tṛ[n]*) – the doer

स्याम् **I would be** ⟨*vidhi* 3.1⟩ √*as[a]*...भुवि – to be, exist

उपहन्याम् **I would harm** ⟨*vidhi* 3.1⟩ *upa.*√*han[a]* – to strike at

इमाः **these** ⟨2.3⟩ f. *kṛṣṇanāma idam* – (first person) he, this

प्रजाः **people** ⟨2.3⟩ f. *prajā* – offspring

Subodhinī: उत्सीदेयुः, कर्म-लोपेन नश्येयुः । ततः च यः वर्ण-सङ्करः भवेत्, तस्य अपि अहम् एव कर्ता स्याम् (भवेयम्) । एवम् अहम् एव प्रजा उपहन्याम् (मलिनी-कुर्याम्) ॥३.२४॥
तस्मात् आत्म-विदा अपि लोक-सङ्ग्रहार्थम् तद्-कृपया कर्म कार्यम् इति उपसंहरति – 'सक्ताः' इति –

3.25

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसङ्ग्रहम् ॥२५॥

हे भारत !	O Arjuna!
कर्मणि सक्ताः अ-विद्वांसः	the ignorant, who are attached to work
यथा कुर्वन्ति,	as they work,
लोक-सङ्ग्रहम् चिकीर्षुः अ-सक्तः विद्वान्	desiring the welfare of all, the unattached wise
तथा कुर्यात् ।	should similarly work

"As the ignorant perform their duties with attachment to results, the learned may similarly act, but without attachment, for the sake of leading people on the right path."

सक्ताः **who are attached** ⟨1.3⟩ m. *sakta* (√*sañj[a]*...सङ्गे – to embrace, stick; + *.[k]ta*) – attached

कर्मणि **in work** ⟨7.1⟩ n. *karman (karma)* – activity

अ-विद्वांसः **ignorant men** ⟨1.3⟩ m. *a-vidvas[u] (-vidvān)* – who does not know

यथा **as** ⟨*avyaya*⟩

कुर्वन्ति **they do** ⟨*acyuta* 1.3⟩ √*[ḍu]kṛ[ñ]*...करणे – to do

भारत **O Arjuna!** ⟨8.1⟩ m. *bhārata* – 'descendant of Bharata'

कुर्यात् **he should do** ⟨*vidhi* 1.1⟩ √*[ḍu]kṛ[ñ]*...करणे – to do

विद्वान् **a wise man** ⟨1.1⟩ m. *vidvas[u]* (from √*vid[a]* 2P...ज्ञाने – to know) – who knows

तथा **so** ⟨*avyaya*⟩

अ-सक्तः **who is unattached** ⟨1.1⟩ m. *a-sakta* – unattached

चिकीर्षुः **who wants to do** ⟨1.1⟩ m. *cikīrṣu* (from √*[ḍu]kṛ[ñ]*...करणे – to do)

लोक-सङ्ग्रहम् **the welfare of the people** ⟨2.1⟩ m. *loka-saṅgraha*

Subodhinī: कर्मणि सक्ताः (अभिनिविष्टाः) सन्तः अज्ञाः यथा कर्म कुर्वन्ति, अ-सक्तः सन् विद्वान् अपि तथैव कुर्यात्, लोक-सङ्ग्रहम् कर्तुम् इच्छुः ॥३.२५॥
ननु 'कृपया तत्त्व-ज्ञानम् एव उपदेष्टुम् युक्तम् ? – न !' इति आह – 'न' इति –

3.26

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥२६॥

अ-ज्ञानाम् कर्म-सङ्गिनाम्	for ignorant men attached to work
विद्वान् बुद्धि-भेदम् न जनयेत्,	the wise should not create doubt,
युक्तः सर्व-कर्माणि समाचरन्	[while] performing all duties attentively
जोषयेत्	he should engage [them]

"So as not to disrupt the minds of ignorant men attached to the fruitive results of prescribed duties, a learned person should not induce them to stop work. Rather, by working in the spirit of devotion, he should engage them in all sorts of activities (for the gradual development of Kṛṣṇa consciousness)."

न **not** ⟨*avyaya*⟩

बुद्धि-भेदम् **doubt** ⟨2.1⟩ m. *buddhi-bheda* – 'disturbance of the mind'
भेद (from √*bhid[ir]*...विदारणे – to split, break) – splitting, breaking; separation, division; difference, sort; disturbance, disunion; (in phil.) dualism; (as in:) *bhedābheda (bheda-abheda)* – dualism and non-dualism (*a-bheda*), the doctrine of both difference and identity of God and the world; *bhinna* – split, divided, disunited, different

जनयेत् **he should generate** ⟨*vidhi* caus. 1.1⟩ √*jan[ī]*...प्रादुर्भावे – to be born

अ-ज्ञानाम् **of ignorant men** ⟨6.3⟩ m. *a-jñāna* – who is ignorant

कर्म-सङ्गिनाम् **of those attached to work** ⟨6.3⟩ m. *karma-saṅgin (-saṅgī)*...कर्मणि सङ्गी इति कर्म-सङ्गी – 'who is attached to work'

जोषयेत् **he should engage** ⟨*vidhi* caus. 1.1⟩ √*juṣ[ī]*...प्रीति-सेवनयोः – to please; serve

सर्व-कर्माणि **all duties** ⟨2.3⟩ n. *sarva-karman (-karma)*

विद्वान् **a wise man** ⟨1.1⟩ m. *vidvas[u]* (from √*vid[a]* 2P...ज्ञाने – to know) – who knows

युक्तः **being attentive** ⟨1.1⟩ m. *yukta*

समाचरन् **[while] performing** ⟨1.1⟩ m. *samācarat* (*sam.ā.*√*car[a]* – to behave, perform; + *.[ś]at[ṛ]*)

Subodhinī: अ-ज्ञानाम् अतएव कर्म-सङ्गिनाम् (कर्म-आसक्तानाम्) अकर्तात्म-उपदेशेन बुद्धेः भेदम् (अन्यथात्वम्) न जनयेत्, कर्मणः सकाशात् बुद्धि-चालनम् न कुर्यात्, अपितु जोषयेत् (सेवयेत्) – 'जुषी प्रीति-सेवनयोः', अज्ञैः कर्माणि कारयेत्

चालने कृते सति, कर्मसु श्रद्धा-निवृत्तेः, ज्ञानस्य च अनुत्पत्तेः, तेषाम् उभय-भ्रंशः स्यात् इति भावः ॥३.२६॥

ननु विदुषा अपि चेद् कर्म कर्तव्यम्, तर्हि विद्वत्-अविदुषोः कः विशेषः इति आशङ्क्य, उभयोः विशेषम् दर्शयति – 'प्रकृतेः' इति द्वाभ्याम् –

3.27

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहङ्कारविमूढात्मा कर्ताहमिति मन्यते ॥२७॥

प्रकृतेः गुणैः	by the modes of nature
कर्माणि सर्वशः क्रियमाणानि,	activities are completely being done,
अहङ्कार-विमूढात्मा	one who is bewildered by false ego
अहम् कर्ता इति मन्यते ।	thinks, 'I (the soul) am the doer'

"The spirit soul bewildered by the influence of false ego thinks himself the doer of activities that are in actuality carried out by the three modes of material nature."

प्रकृतेः **of nature** ⟨6.1⟩ f. *prakṛti* – material nature

क्रियमाणानि **[while] being done** ⟨1.3⟩ n. *kriyamāṇa* (√*[du]kṛ[ñ]*...करणे – to do; pass.; + *.[ś]āna*)

गुणैः **by the modes** ⟨3.3⟩ m. *guṇa* – quality

कर्माणि **activities** ⟨1.3⟩ n. *karman (karma)* – activity

सर्वशः **completely** ⟨*avyaya*⟩ (*sarvaśas*) – completely, altogether, in every way, on all sides

अहङ्कार-विमूढात्मा **whose mind is deluded by false ego** ⟨1.1⟩ m. *ahaṅkāra-vimūḍha-_ātman* (-*ātmā*)...अहङ्कारेण विमूढः आत्मा यस्य, सः अहङ्कार-विमूढात्मा
विमूढ (*vi.*√*muh[a]* – to be bewildered; + *.[k]ta*) – bewildered

कर्ता **the doer** ⟨1.1⟩ m. *kartṛ (kartā)*

अहम् **I am** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

इति **thus** ⟨*avyaya*⟩

मन्यते **he thinks** ⟨*acyuta* 1.1⟩ √*man[a]* 4A...बोधने – to know, think

Subodhinī: प्रकृतेः गुणैः (प्रकृति-कार्यैः इन्द्रियैः) सर्व-प्रकारेण क्रियमाणानि यानि कर्माणि, तानि 'अहम् एव कर्ता' ('करोमि') इति मन्यते । तत्र हेतुः – अहङ्कारेण इन्द्रियादिषु आत्म-अध्यासेन विमूढः आत्मा (बुद्धिः) यस्य सः ॥३.२७॥
विद्वान् तु तथा न मन्यते इति आह – 'तत्त्व-विद् तु' इति –

3.28

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥२८॥

हे महा-बाहो !	O Arjuna!
गुण-कर्म-विभागयोः तत्त्व-विद् तु,	but one who knows about the senses and work,
गुणाः गुणेषु वर्तन्ते	'[only] the senses are engaged with their objects'
इति मत्वा	[after] thinking thus
न सज्जते ।	he does not engage

"One who is in knowledge of the Absolute Truth, O mighty-armed, does not engage himself in the senses and sense gratification, knowing well the differences between work in devotion and work for fruitive results."

तत्त्व-विद् **who knows the truth** ⟨1.1⟩ m. *tattva-vid*...यः तत्त्वम् वेत्ति, सः तत्त्व-विद्

तु **but** ⟨*avyaya*⟩

महा-बाहो **O Arjuna!** ⟨8.1⟩ m. *mahā-bāhu* – 'who has mighty arms'

गुण-कर्म-विभागयोः **of the divisions of *guṇa* and *karma*** ⟨6.2⟩ m. *guṇa-karma-vibhāga*...गुणानाम् च कर्मणाम् च विभागौ इति गुण-कर्म-विभागौ – 'the divisions of *guṇa* and *karma*'

गुणाः **the senses** ⟨1.3⟩ m. *guṇa* – quality

गुणेषु **in sense objects** ⟨7.3⟩ m. *guṇa* – quality

वर्तन्ते **they act** ⟨*acyuta* 1.3⟩ √*vṛt[u]* 1A...वर्तने – to happen, act

इति **thus** ⟨*avyaya*⟩

मत्वा **[after] thinking** ⟨*avyaya*⟩ √*man[a]* 4A...बोधने – to know, think; + *.[k]tvā*

न **not** ⟨*avyaya*⟩

सज्जते **he engages** ⟨*acyuta* 1.1⟩ √*sasj[a]*...गतौ – to go, engage

Subodhinī: 'न अहम् गुणात्मकः' इति गुणेभ्यः आत्मनः विभागः, 'न मे कर्माणि' इति कर्मभ्यः अपि आत्मनः विभागः, तयोः गुण-कर्म-विभागयोः यः तत्त्वम् वेत्ति, सः तु न सज्जते, कर्तृत्व-अभिनिवेशम् न करोति । तत्र हेतुः – गुणाः (इन्द्रियाणि) गुणेषु (विषयेषु) प्रवर्तन्ते, न अहम् इति मत्वा ॥३.२८॥
'न बुद्धि-भेदम् जनयेत्' (3.26) इति उक्तम् उपसंहरति – प्रकृतेः इति –

Note: Our explanation of *guṇa-karma-vibhāga* follows Viśvanātha Cakravartī. The divisions of the *guṇas* are *sattva*, *rajas* and *tamas*, and the divisions of the *karmas* are *sāttvika*, *rājasika* and *tāmasika*. The work performed within the three *guṇas* is 'work for fruitive results', and work beyond the *guṇas* is 'work in devotion'. Another explanation of the word is गुणेभ्यः च कर्मभ्यः च [आत्मनः] विभागौ इति गुण-कर्म-विभागौ – the differentiations of the soul from the *guṇas* and *karmas*. The

guṇas are the senses and the *karmas* are the activities of the senses. The soul is different from both. The senses (*guṇas*) are engaged in the sense objects (*guṇeṣu*). The person who knows this becomes an observer, he himself not being engaged (*na sajjate*).

3.29

प्रकृतेर्गुणसम्मूढाः सज्जन्ते गुणकर्मसु ।
तानकृत्स्नविदो मन्दान्कृत्स्नविन्न विचालयेत् ॥२९॥

प्रकृतेः गुण-सम्मूढाः	those who are bewildered by the modes of nature
गुण-कर्मसु सज्जन्ते,	engage into sense activities,
तान् अ-कृत्स्न-विदः मन्दान्	those ignorant fools
कृत्स्न-विद् न विचालयेत् ।	the wise should not unsettle

"Bewildered by the modes of material nature, the ignorant fully engage themselves in material activities and become attached. But the wise should not unsettle them, although these duties are inferior due to the performers' lack of knowledge."

प्रकृतेः **of nature** ⟨6.1⟩ f. *prakṛti* – nature
गुण-सम्मूढाः **those bewildered by the modes** ⟨1.3⟩ m. *guṇa-sammūḍha*...गुणैः सम्मूढः इति गुण-सम्मूढः – 'bewildered by the modes'
सज्जन्ते **they engage** ⟨*acyuta* 1.3⟩ √*sasj[a]*...गतौ – to go, engage
गुण-कर्मसु **in sense activities** ⟨7.3⟩ n. *guṇa-karma*...गुणानाम् कर्मः इति गुण-कर्मः – the activity of the senses
तान् **them** ⟨2.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that
अ-कृत्स्न-विदः **the ignorant men** ⟨2.3⟩ m. *a-kṛtsna-vid* – 'who has incomplete knowledge'
मन्दान् **fools** ⟨2.3⟩ m. *manda* – slow; apathic, indifferent; dull, foolish; unhappy, miserable, bad
(as in:) *mandāḥ sumanda-matayo manda-bhāgyāḥ* – [people in Kali-yuga are] lazy, misguided and unfortunate (*Bhāg.* 1.1.10)
कृत्स्न-विद् **the wise** ⟨1.1⟩ m. *kṛtsna-vid*...यः कृत्स्नम् वेत्ति, सः कृत्स्न-विद् – 'who knows everything'
न **not** ⟨*avyaya*⟩
विचालयेत् **he should unsettle** ⟨*vidhi* caus. 1.1⟩ *vi.*√*cal[a]* – to move, shake

Subodhinī: ये प्रकृतेः गुणैः (सत्त्वादिभिः) सम्मूढाः सन्तः, गुणेषु (इन्द्रियेषु) तद्-कर्मसु च सज्जन्ते, 'वयम् कुर्म' इति, तान् अकृत्स्न-विदः (मन्द-मतीन्) कृत्स्न-विद् (सर्व-ज्ञः) न विचालयेत्, बुद्धिः भेदम् न कुर्यात् ॥३.२९॥
तद् एवम् तत्त्व-विदा अपि कर्म कर्तव्यम्, त्वम् तु न अद्य अपि तत्त्व-विद्, अतः कर्म एव कुरु इति आह – 'मयि' इति –

3.30

मयि सर्वाणि कर्माणि सन्न्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥३०॥

अध्यात्म-चेतसा	with transcendental consciousness
सर्वाणि कर्माणि मयि सन्न्यस्य	[after] renouncing all activities in Me
निराशीः निर्ममः भूत्वा	and [after] being free from expectation and proprietorship
विगत-ज्वरः युध्यस्व !	fight without grief!

"Therefore, O Arjuna, surrendering all your works unto Me, with full knowledge of Me, without desires for profit, with no claims to proprietorship, and free from lethargy, fight."

मयि **in me** ⟨7.1⟩ *kṛṣṇanāma asmad* – (last person) I
सर्वाणि **all** ⟨2.3⟩ n. *kṛṣṇanāma sarva* – all
कर्माणि **activities** ⟨2.3⟩ n. *karman* (*karma*) – activity
सन्न्यस्य **[after] renouncing** ⟨*avyaya*⟩ (*sam.ni.*√*as[u]* – to throw down, give up; + *.ya[p]*) – [after] giving up
अध्यात्म-चेतसा **with transcendental consciousness** ⟨3.1⟩ n. *adhyātma-cetas* (-*cetaḥ*)...अध्यात्मनि चेतः इति अध्यात्म-चेतः – 'transcendental consciousness'
अध्यात्म – 'governing the self', spiritual
निराशीः **who has no expectation** ⟨1.1⟩ m. *nirāśiṣ* (*nirāśīḥ*) (from *nir.ā.*√*śās[u]* – to not desire) – no desire, hope, expectation
निर्ममः **who has no proprietorship** ⟨1.1⟩ m. *nirmama* – notion of 'mine'
भूत्वा **[after] being** ⟨*avyaya*⟩ √*bhū*...सत्तायाम् – to be, exist, become; + *.[k]tvā*
युध्यस्व **you must fight** ⟨*vidhātā* 2.1⟩ √*yudh[a]*...सम्प्रहारे – to fight
विगत-ज्वरः **without grief** ⟨1.1⟩ m. *vigata-jvara*...विगतः ज्वरः यस्य, सः विगत-ज्वरः – 'whose fever has gone'
ज्वर (from √*jvar[a]*...रोगे – to be sick) – fever; mental pain, grief

Subodhinī: सर्वाणि कर्माणि मयि सन्न्यस्य (समर्प्य), अध्यात्म-चेतसा ('अन्तर्यामि-अधीनः अहम् करोमि' इति दृष्ट्या), निराशीः (निष्कामः), अतएव 'मद्-फल-साधनम् (मदर्थम्) इदम् कर्म' इति एवम् ममता-शून्यः च भूत्वा, विगत-ज्वरः (त्यक्त-शोकः) च भूत्वा, युद्ध्यस्व ॥३.३०॥
एवम् कर्म-अनुष्ठाने गुणम् आह – 'ये मे मतम्' इति –

3.31

ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ।
श्रद्धावन्तो ऽनसूयन्तो मुच्यन्ते ते ऽपि कर्मभिः ॥३१॥

ये श्रद्धावन्तः अनसूयन्तः मानवाः	those faithful and unenvious men who
इदम् मे (मम) मतम् नित्यम् अनुतिष्ठन्ति,	always follow this teaching of Mine,
ते अपि कर्मभिः मुच्यन्ते ।	they are also freed from all *karma*

"Those persons who execute their duties according to My injunctions and who follow this teaching faithfully, without envy, become free from the bondage of fruitive actions."

ये **those who** ⟨1.3⟩ m. *kṛṣṇanāma yad* – (relative) who, which
मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
मतम् **opinion** ⟨2.1⟩ n. *mata* (√*man[a]* 4A...बोधने – to know, think; + *.[k]ta*) – thought, opinion, intention, design
इदम् **this** ⟨2.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this
नित्यम् **always** ⟨*avyaya*⟩
अनुतिष्ठन्ति **they follow** ⟨*acyuta* 1.3⟩ *anu.*√*sthā* – to follow
मानवाः **men** ⟨1.3⟩ m. *mānava* – a human
श्रद्धावन्तः **who have faith** ⟨1.3⟩ m. *śraddhāvat* (*.vat[u]*) – 'having *śraddhā* (faith)'; faithful
श्रद्धा (*śrad* (heart, truth) + √*[du]dhā[ñ]*...धारण-पोषणयोः – to hold; nourish) – 'holding the heart or truth', having faith, be true; faith, trust, confidence; loyalty, homage; (derived:) *śrāddha* – faithful; a ceremony of faithfulness or homage to dead relatives
अनसूयन्तः **who are not finding fault** ⟨1.3⟩ m. *an-asūyat* – [while] not finding fault
असूयत् (*nāma-dhātu* √*asūya* + *.[ś]at[r]*) – [while] finding fault
मुच्यन्ते **they are released** ⟨*acyuta* pass. 1.3⟩ √*muc[l]*...मोक्षणे – to release
ते **they** ⟨1.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that
अपि **also** ⟨*avyaya*⟩
कर्मभिः **from all *karma*** ⟨3.3⟩ n. *karman* (*karma*) – activity

Subodhinī: मद्-वाक्ये श्रद्धावन्तः, अनसूयन्तः, 'दुःखात्मके कर्मणि प्रवर्तयति' इति दोष-दृष्टिम् अ-कुर्वन्तः च, ये मे मदीयम् इदम् मतम् अनुतिष्ठन्ति, ते अपि शनैः कर्म कुर्वाणाः, सम्यक् ज्ञानिवत् कर्मभिः मुच्यन्ते ॥३.३१॥
विपक्षे दोषम् आह – 'ये तु' इति –

3.32

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ।
सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ॥३२॥

ये तु अभ्यसूयन्तः	but those who are envious who
एतद् मे (मम) मतम् न अनुतिष्ठन्ति,	do not follow this teaching of Mine,
तान् अ-चेतसः सर्व-ज्ञान-विमूढान्	those fools, bereft of all knowledge
नष्टान् विद्धि !	know to be ruined!

"But those who, out of envy, disregard these teachings and do not follow them are to be considered bereft of all knowledge, befooled, and ruined in their endeavors for perfection."

ये **those who** ⟨1.3⟩ m. *kṛṣṇanāma yad* – (relative) who, which
तु **but** ⟨*avyaya*⟩
एतद् **this** ⟨2.1⟩ n. *kṛṣṇanāma etad* – (first person) he, this
अभ्यसूयन्तः **[while] envying** ⟨1.3⟩ m. *abhyasūyat* (*abhi.*√*asūya* + *.[ś]at[r]*)
न **not** ⟨*avyaya*⟩
अनुतिष्ठन्ति **they follow** ⟨*acyuta* 1.3⟩ *anu.*√*sthā* – to follow
मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
मतम् **teaching** ⟨2.1⟩ n. *mata* – thought
सर्व-ज्ञान-विमूढान् **bewildered in all knowledge** ⟨2.3⟩ m. *sarva-jñāna-vimūdha*...सर्वस्मिन् ज्ञाने विमूढः इति सर्व-ज्ञान-विमूढः
तान् **them** ⟨2.3⟩ m. *kṛṣnanāma tad* – (first person) he, that
विद्धि **you must know** ⟨*vidhātā* 2.1⟩ √*vid[a]* 2P...ज्ञाने – to know
नष्टान् **who are ruined** ⟨2.3⟩ m. *naṣta* (√*naś[a]*...अदर्शने – to disappear, perish; + *.[k]ta*) – perished
अ-चेतसः **fools** ⟨2.3⟩ m. *a-cetas* (*-cetaḥ*) – mindless, thoughtless; a fool

Subodhinī: ये तु मे मतम्, 'ईश्वरार्थम् कर्म कर्तव्यम्' इति अनुशासनम्, अभ्यसूयन्तः (द्विषन्तः) न अनुतिष्ठन्ति इति, तान् अ-चेतसः (विवेक-शून्यान्), अतएव सर्वस्मिन् (कर्मणि ब्रह्म-विषये च) यद् ज्ञानम् तत्र विमूढान् नष्टान् विद्धि ॥३.३२॥
ननु 'तर्हि, महा-फलत्वात्, इन्द्रियाणि निगृह्य निष्कामाः सन्तः, सर्वे अपि स्व-धर्मम् एव किम् न अनुतिष्ठन्ति ?' तत्र आह – 'सदृशम्' इति –

3.33

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥३३॥

ज्ञानवान् अपि	even a man of knowledge
स्वस्याः प्रकृतेः सदृशम् चेष्टते,	acts according to his own disposition,
भूतानि प्रकृतिम् यान्ति,	all beings follow their nature,
निग्रहः किम् करिष्यति ?	what can control do?

"Even a man of knowledge acts according to his own nature, for everyone follows the nature he has acquired from the three modes. What can repression accomplish?"

सदृशम्	**accordingly** ⟨*avyaya*⟩ from *sa-dṛśa* – 'similar'
चेष्टते	**he acts** ⟨*acyuta* 1.1⟩ √*ceṣṭ[a]*...चेष्टायाम् – to endeavor, act
स्वस्याः	**his own** ⟨6.1⟩ f. *kṛṣṇanāma svā* (*.ā[p]*) – own
प्रकृतेः	**of nature** ⟨6.1⟩ f. *prakṛti* – nature
ज्ञानवान्	**a man of knowledge** ⟨1.1⟩ m. *jñānavat* (*.vat[u]*) – 'having *jñāna* (knowledge)'
अपि	**also** ⟨*avyaya*⟩
प्रकृतिम्	**nature** ⟨2.1⟩ f. *prakṛti*
यान्ति	**they attain** ⟨*acyuta* 1.3⟩ √*yā*...प्राप्तौ – to attain, go
भूतानि	**beings** ⟨1.3⟩ n. *bhūta* (√*bhū*...सत्तायाम् – to be, exist, become; + *.[k]ta*) – past; an element, being, creature
निग्रहः	**control** ⟨1.1⟩ m. *nigraha* (from *ni.*√*grah[a]* – to control)
किम्	**what** ⟨2.1⟩ n. *kṛṣṇanāma kim* – who/what
करिष्यति	**it will do** ⟨*kalki* 1.1⟩ √*[ḍu]kṛ[ñ]*...करणे – to do

Subodhinī: प्रकृतिः (प्राचीन-कर्म-संस्कार-अधीन-स्वभावः), स्वस्याः (स्वकीयायाः) प्रकृतेः (स्व-भावस्य) सदृशम् (अनुरूपम्) एव गुण-दोष-ज्ञानवान् अपि चेष्टते, किम् पुनः वक्तव्यम् अज्ञः चेष्टते इति । तस्मात् भूतानि (सर्वे अपि प्राणिनः) प्रकृतिम् यान्ति (अनुवर्तन्ते) । एवम् च सति, इन्द्रिय-निग्रहः किम् करिष्यति, प्रकृतेः बलिष्ठत्वात् ? इति अर्थः ॥३.३३॥

ननु 'एवम् प्रकृति-अधीना एव चेद् पुरुषस्य प्रवृत्तिः, तर्हि विधि-निषेध-वैयर्थ्यम् प्राप्तम् ?' इति आशङ्क्य आह –'इन्द्रियस्य' इति –

3.34

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥३४॥

इन्द्रियस्य इन्द्रियस्य अर्थे	of each sense towards its sense object
राग-द्वेषौ व्यवस्थितौ,	attachment and aversion are fixed,
तयोः वशम् न आगच्छेत्,	[but] one should not come under their control,
तौ हि अस्य परिपन्थिनौ ।	[because] these two are his obstacles

"There are principles to regulate attachment and aversion pertaining to the senses and their objects. One should not come under the control of such attachment and aversion, because they are stumbling blocks on the path of self-realization."

इन्द्रियस्य इन्द्रियस्य	**of each sense organ** ⟨6.1⟩ n. *indriya* – sense, sense organ
अर्थे	**towards the object** ⟨7.1⟩ m. *artha* – aim, purpose, wealth
राग-द्वेषौ	**attachment and aversion** ⟨1.2⟩ m. *rāga-dveṣa*...रागः च द्वेषः च इति राग-द्वेषौ
व्यवस्थितौ	**are fixed** ⟨1.2⟩ m. *vyavasthita* (*ava.*√*sthā* – to stay; + *.[k]ta*) – fixed

तयोः	**of those two** ⟨6.2⟩ m. *kṛṣṇanāma tad* – (first person) he, that
न	**not** ⟨*avyaya*⟩
वशम्	**control** ⟨2.1⟩ m. *vaśa* (from √*vaś[a]*...कान्तौ – to desire) – desire; authority, control
आगच्छेत्	**he should come** ⟨*vidhi* 1.1⟩ *ā.*√*gam[l]* – to come
तौ	**those two** ⟨1.2⟩ m. *kṛṣṇanāma tad* – (first person) he, that
हि	**indeed** ⟨*avyaya*⟩
अस्य	**his** ⟨6.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
परिपन्थिनौ	**two obstacles** ⟨1.2⟩ m. *paripanthin* (*paripanthī*) (from *pari.*√*path[i]* – to go against) – 'who obstructs', an impediment

Subodhinī: 'इन्द्रियस्य इन्द्रियस्य' इति वीप्सया, प्रत्येकम् सर्वेषाम् इन्द्रियाणाम् इति उक्तम् । अर्थे (स्व-स्व-विषये) अनुकूले (रागः) प्रतिकूले (द्वेषः) च इति एवम् राग-द्वेषौ व्यवस्थितौ (अ-वश्यम् भाविनौ) । ततः च तद्-अनुरूपा 'प्रवृत्तिः' इति भूतानाम् प्रकृतिः । 'तथापि, तयोः वशवर्ती न भवेत्' इति शास्त्रेण नियम्यते । हि यस्मात् अस्य मुमुक्षोः तौ परिपन्थिनौ (प्रतिपक्षौ) । अयम् भावः – विषय-स्मरणादिना राग-द्वेषौ उत्पाद्य, अनवहितम् पुरुषम् अनर्थे अपि, गम्भीर-स्रोतः-पातः इव, प्रकृतिः बलात् प्रवर्तयति । शास्त्रम् तु ततः प्राक् एव विषयेषु राग-द्वेष-प्रतिबन्धके परमेश्वर-भजनादौ प्रवर्तयति, गम्भीर-स्रोतः-पातात् पूर्वम् एव नावम् आश्रितः इव, न अनर्थम् प्राप्नोति ॥३.३४॥

तद् एवम् स्वाभाविकीम् पशु-आदि-सदृशीम् प्रवृत्तिम् त्यक्त्वा, स्व-धर्मे प्रवर्तितव्यम् इति उक्तम्, तर्हि स्व-धर्मस्य (युद्धादेः दुःख-रूपस्य) यथावत् कर्तुम् अ-शक्यत्वात्, पर-धर्मस्य च (अहिंसादेः सुकरत्वात्) धर्मत्व-अविशेषत्वात् च, तत्र [पर-धर्मे] प्रवर्तितुम् इच्छन्तम् [अर्जुनम्] प्रति आह –'श्रेयान्' इति –

3.35

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥३५॥

स्वनुष्ठितात् पर-धर्मात्	than another's duty well performed
विगुणः स्व-धर्मः श्रेयान्,	better is one's own duty, [even] defective,
स्व-धर्मे निधनम् श्रेयः,	death in one's own duty is better,
पर-धर्मः भयावहः ।	another's duty is dangerous

"It is far better to discharge one's prescribed duties, even though faultily, than another's duties perfectly. Destruction in the course of performing one's own duty is better than engaging in another's duties, for to follow another's path is dangerous."

श्रेयान्	**better** ⟨1.1⟩ m. *śreyas* (*śreyaḥ*) – better, benefit
स्व-धर्मः	**own duty** ⟨1.1⟩ m. *sva-dharma*

विगुणः	**defective** ⟨1.1⟩ m. *viguṇa* – 'without good quality', bad, faulty
पर-धर्मात्	**than another's duty** ⟨5.1⟩ m. *para-dharma*...परस्य धर्मः इति पर-धर्मः – another's duty
स्वनुष्ठितात्	**than well performed** ⟨5.1⟩ m. *svanuṣṭhita* (*su.anu.√sthā* – to follow well; + *.[k]ta*) – well-performed
स्व-धर्मे	**in the own duty** ⟨7.1⟩ m. *sva-dharma* – own religious duty
निधनम्	**death** ⟨1.1⟩ n. *nidhana* – poverty; loss, destruction, death
श्रेयः	**better** ⟨1.1⟩ n. *śreyas* (*śreyaḥ*) – better, benefit
पर-धर्मः	**another's duty** ⟨1.1⟩ m. *para-dharma*
भयावहः	**dangerous** ⟨1.1⟩ m. *bhaya-_āvaha* – bringing fear or danger आवह (from *ā.√vah[a]* – to carry near) – bringing, inviting

Subodhinī: किञ्चिद् अङ्ग-हीनः अपि स्व-धर्मः श्रेयान् (प्रशस्यतरः)। स्वनुष्ठितात् (सर्व-अङ्ग-सम्पूर्त्या कृतात्) अपि पर-धर्मात् सकाशात्। तत्र हेतुः – स्व-धर्मे युद्धादौ प्रवर्तमानस्य निधनम् (मरणम्) अपि श्रेष्ठम्, स्वर्गादि-प्रापकत्वात्। पर-धर्मः तु स्वस्य भय-आवहः, निषिद्धत्वेन नरक-प्रापकत्वात् ॥३.३५॥

'तयोः न वशम् आगच्छेत्' (3.34) इति उक्तम् तद् एतद् अ-शक्यम् मन्वानः – 'अथ केन' इति –

3.36

अर्जुन उवाच

अथ केन प्रयुक्तो ऽयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥३६॥

अर्जुन उवाच - हे वार्ष्णेय !	Arjuna said: O Kṛṣṇa!
अथ केन प्रयुक्तः	but by what impelled
अनिच्छन् अपि	even unwillingly
बलात् इव नियोजितः	as if engaged by force
अयम् पुरुषः पापम् चरति ?	does a person commit sin?

"Arjuna said: O descendant of Vṛṣṇi, by what is one impelled to sinful acts, even unwillingly, as if engaged by force?"

अर्जुनः	**Arjuna** ⟨1.1⟩ m. *arjuna* – white, 'who is pure in actions'
उवाच	**he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
अथ	**now** ⟨*avyaya*⟩
केन	**by what** ⟨3.1⟩ m. *kṛṣnanāma kim* – who/what
प्रयुक्तः	**engaged** ⟨1.1⟩ m. *prayukta* (√*yuj[ir]*...योगे – to join, engage, gain; +*.[k]ta*)
अयम्	**this** ⟨1.1⟩ m. *kṛṣnanāma idam* – (first person) he, this

पापम्	**sin** ⟨2.1⟩ n. *pāpa*
चरति	**he performs** ⟨*acyuta* 1.1⟩ √*car[a]*...गतौ – to go, move
पूरुषः	**a person** ⟨1.1⟩ m. *pūruṣa*
अनिच्छन्	**unwillingly** ⟨1.1⟩ m. *an-icchat* – [while] not desiring इच्छत् (√*iṣ[u]*...इच्छायाम् – to wish, desire; + *.[ś]at[r]*) – [while] desiring
अपि	**also** ⟨*avyaya*⟩
वार्ष्णेय	**O Kṛṣṇa!** ⟨8.1⟩ m. *vārṣṇeya* – 'descendent of Vṛṣṇi'
बलात्	**by force** ⟨5.1⟩ n. *bala* – strength, force
इव	**like** ⟨*avyaya*⟩
नियोजितः	**engaged** ⟨1.1⟩ m. *niyojita* (*ni.√yuj[ir]* – to engage, perform; caus.; + *.[k]ta*)

Subodhinī: वृष्णेः वंशे अवतीर्णः वार्ष्णेयः। हे वार्ष्णेय ! अनर्थ-रूपम् पापम् कर्तुम् अनिच्छन् अपि, केन प्रयुक्तः (प्रेरितः) अयम् पुरुषः पापम् चरति ? काम-क्रोधौ विवेक-बलेन निरुन्धतः अपि पुरुषस्य पुनः पापे प्रवृत्ति-दर्शनात्, अन्यः अपि तयोः मूल-भूतः कश्चिद् प्रवर्तकः भवेत् ! इति सम्भावनायाम् प्रश्नः ॥३.३६॥

अत्र उत्तरम् [श्री-भगवान् उवाच] – 'कामः एषः' इति –

3.37

श्रीभगवानुवाच

काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥३७॥

श्री-भगवान् उवाच	Śrī Kṛṣṇa said:
एषः कामः एषः क्रोधः	this is desire, this is anger
रजोगुण-समुद्भवः	it is born of the mode of passion
महाशनः महा-पाप्मा,	voracious and most sinful,
इह एनम् वैरिणम् विद्धि !	know it to be an enemy in this world!

"The Supreme Personality of Godhead said: It is lust only, Arjuna, which is born of contact with the material mode of passion and later transformed into wrath, and which is the all-devouring sinful enemy of this world."

श्री-भगवान्	**Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'
उवाच	**he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
कामः	**desire** ⟨1.1⟩ m. *kāma*
एषः	**this** ⟨1.1⟩ m. *kṛṣṇanāma etad* – (first person) he, this
क्रोधः	**anger** ⟨1.1⟩ m. *krodha*
एषः	**this** ⟨1.1⟩ m. *kṛṣṇanāma etad* – (first person) he, this

रजोगुण-समुद्भवः **whose origin is from the mode of passion** ⟨1.1⟩ m. *rajaḥ-_guṇa-samudbhava*...रजो-गुणात् समुद्भवः यस्य, सः रजोगुण-समुद्भवः

महाशनः **which is voracious** ⟨1.1⟩ m. *mahā-_aśana*...महत् अशनम् यस्य, सः महाशनः – 'whose consumption is great'
अशन (from √*aś[a]*...भोजने – to eat, enjoy) – eating, consuming; food

महा-पाप्मा **which is very sinful** ⟨1.1⟩ m. *mahā-pāpman (-pāpmā)*

विद्धि **you must know** ⟨*vidhātā* 2.1⟩ √*vid[a]* 2P...ज्ञाने – to know

एनम् **this** ⟨2.1⟩ m. *kṛṣnanāma etad* – (first person) he, this

इह **here** ⟨*avyaya*⟩

वैरिणम् **an enemy** ⟨2.1⟩ m. *vairin (vairī)* – heroic, inimical; a hero, enemy

Subodhinī: यः त्वया पृष्टः हेतुः, एषः कामः एव । ननु 'क्रोधः' अपि पूर्वम् त्वया उक्तः – 'इन्द्रियस्य इन्द्रियस्य' (3.34) इति अत्र । सत्यम्, न असौ ततः पृथक्, किन्तु क्रोधः अपि एषः एव, कामः एव हि केनचिद् प्रतिहतः क्रोध-आत्मना परिणमते । अतः पूर्वम् पृथक्त्वेन उक्तः अपि क्रोधः, काम-जयः एव क्रोध-जयः इति अभिप्रायेण, कामेन एकी-कृत्य उच्यते । रजोगुणात् समुद्भवति इति तथा । अनेन सत्त्व-वृद्ध्या रजसि क्षयम् नीते सति, कामः अपि क्षीयते इति सूचितम् । एनम् कामम् इह (मोक्ष-मार्गे) वैरिणम् विद्धि । अयम् च वक्ष्यमाण-क्रमेण हन्तव्य एव, यतः 'न असौ दानेन सन्धातुम् शक्यः' इति आह 'महा-अशनः' (महत्-अशनम् यस्य, दुष्पूरः) इति अर्थः । नच साम्ना सन्धातुम् शक्यः, यतः महा-पाप्मा (अत्युग्रः) ॥३.३७॥
कामस्य वैरित्वम् दर्शयति – 'धूमेन' इति –

3.38

धूमेनाव्रियते वह्निर्यथादर्शो मलेन च ।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥३८॥

यथा धूमेन वह्निः आव्रियते	as fire is covered by smoke
मलेन आदर्शः च	a mirror by dust
यथा उल्बेन गर्भः आवृतः,	as an embryo is covered by the womb,
तथा तेन इदम् आवृतम् ।	so is this (knowledge) covered by that (desire)

"As fire is covered by smoke, as a mirror is covered by dust, or as the embryo is covered by the womb, the living entity is similarly covered by different degrees of this lust."

धूमेन **by smoke** ⟨3.1⟩ m. *dhūma* – smoke

आव्रियते **it is covered** ⟨*acyuta* pass. 1.1⟩ *ā.*√*vṛ[ñ]* 5U – to cover

वह्निः **fire** ⟨1.1⟩ m. *vahni*

यथा **as** ⟨*avyaya*⟩

आदर्शः **a mirror** ⟨1.1⟩ m. *ādarśa* (from *ā.*√*dṛś[ir]* – to show) – a copy, ideal

मलेन **by dust** ⟨3.1⟩ n. *mala* – dirt, impurity
(as in:) *a-mala* – clean, pure, shining

च **and** ⟨*avyaya*⟩

यथा **as** ⟨*avyaya*⟩

उल्बेन **by the womb** ⟨3.1⟩ n. *ulba* – a cover, envelope; the vulva

आवृतः **covered** ⟨1.1⟩ m. *āvṛta* (*ā.*√*vṛ[ñ]* 5U – to cover; + *.[k]ta*)

गर्भः **the embryo** ⟨1.1⟩ m. *garbha* – the interior of anything, an inner chamber

तथा **so** ⟨*avyaya*⟩

तेन **by that** ⟨3.1⟩ m. *kṛṣnanāma tad* – (first person) he, that

इदम् **this** ⟨1.1⟩ n. *kṛṣnanāma idam* – (first person) he, this

आवृतम् **covered** ⟨1.1⟩ n. *āvṛta* (*ā.*√*vṛ[ñ]* 5U – to cover; + *.[k]ta*)

Subodhinī: यथा धूमेन सहजेन वह्निः आव्रियते (आच्छाद्यते), यथा वा आदर्शः मलेन आगन्तुकेन, यथा च उल्बेन (गर्भ-वेष्टन-चर्मणा) गर्भः सर्वतः निरुद्धय आवृतः, तथा (प्रकार-त्रयेण अपि) तेन कामेन आवृतम् इदम् ॥३.३८॥
'इदम्'-शब्द-निर्दिष्टम् दर्शयन्, वैरित्वम् स्फुटयति – 'आवृतम्' इति –

3.39

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥३९॥

हे कौन्तेय !	O Arjuna!
काम-रूपेण दुष्पूरेण अनलेन च	in the form of lust, like an unsatiable fire,
एतेन ज्ञानिनः नित्य-वैरिणा	by this eternal enemy of the wise
ज्ञानम् आवृतम् ।	knowledge is covered

"Thus the wise living entity's pure consciousness becomes covered by his eternal enemy in the form of lust, which is never satisfied and which burns like fire."

आवृतम् **covered** ⟨1.1⟩ n. *āvṛta* (*ā.*√*vṛ[ñ]* 5U – to cover; + *.[k]ta*)

ज्ञानम् **knowledge** ⟨1.1⟩ n. *jñāna*

एतेन **by this** ⟨3.1⟩ m. *kṛṣnanāma etad* – (first person) he, this

ज्ञानिनः **of the wise** ⟨6.1⟩ m. *jñānin (jñānī)* – knower

नित्य-वैरिणा **by the eternal enemy** ⟨3.1⟩ m. *nitya-vairin (-vairī)* – eternal enemy

काम-रूपेण **by that in the form of desire** ⟨3.1⟩ m. *kāma-rūpa*...कामः रूपम् यस्य, सः काम-रूपः – 'whose form is desire'
रूप (from √*rūpa*...रूपक्रियायाम् – to form, represent on stage) – any outward appearance or color, shape, figure; beautiful form, beauty; nature, character;

likeness, image, sort, kind, 'having the form of', consisting of', 'like', (as in *mohana-rūpa* – like Cupid)

कौन्तेय **O Arjuna!** ⟨8.1⟩ m. *kaunteya* – 'son of Kuntī'

दुष्पूरेण **by that which is unsatiable** ⟨3.1⟩ m. *duṣpūra* – difficult to be satisfied

पूर (from √*pṛ*...पालन-पूरणयोः – to protect, nourish; fill) – nourishing, filling

अनलेन **by the fire** ⟨3.1⟩ m. *anala* – fire

च **and** ⟨*avyaya*⟩

Subodhinī: इदम् तु (विवेक-ज्ञानम्) एतेन आवृतम्, अ-ज्ञस्य खलु भोग-समये कामः सुख-हेतुः एव, परिणामे तु वैरिताम् प्रपद्यते । ज्ञानिनः पुनः तद् कालम् अपि अनर्थ-हेतुः एव, परिणामे तु वैरिताम् प्रपद्यते ।

ज्ञानिनः पुनः तद् कालम् अपि अनर्थ-अनुसन्धानात् दुःख-हेतुः एव इति 'नित्य-वैरिणा' इति उक्तम् । किंच, विषयैः पूर्यमाणः अपि दुष्पूरः (अ-पूर्यमाणः), शोक-सन्ताप-हेतुत्वात् अनल-तुल्यः । अनेन सर्वान् प्रति नित्य-वैरित्वम् उक्तम् ॥३.३९॥

इदानीम् तस्य अधिष्ठानम् कथयन्, जय-उपायम् आह – 'इन्द्रियाणि' इति द्वाभ्याम् –

3.40

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥४०॥

इन्द्रियाणि मनः बुद्धिः	the senses, mind and intelligence
अस्य अधिष्ठानम् उच्यते,	are said to be its (lust's) seat,
एतैः ज्ञानम् आवृत्य	[after] covering knowledge through these
एषः देहिनम् विमोहयति ।	it bewilders the embodied soul

"The senses, the mind and the intelligence are the sitting places of this lust. Through them lust covers the real knowledge of the living entity and bewilders him."

इन्द्रियाणि **the senses** ⟨1.3⟩ n. *indriya* – sense, sense organ

मनः **the mind** ⟨1.1⟩ n. *manas* (*manaḥ*)

बुद्धिः **intelligence** ⟨1.1⟩ f. *buddhi*

अस्य **its** ⟨6.1⟩ m. *kṛṣnanāma idam* – (first person) he, this

अधिष्ठानम् **seat** ⟨1.1⟩ n. *adhiṣṭhāna* – abode, resting place

उच्यते **it is said** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak

एतैः **by these** ⟨3.3⟩ m. *kṛṣnanāma etad* – (first person) he, this

विमोहयति **it bewilders** ⟨*acyuta* caus. 1.1⟩ *vi.*√*muh[a]* – to be bewildered

एषः **this** ⟨1.1⟩ m. *kṛṣnanāma etad* – (first person) he, this

ज्ञानम् **knowledge** ⟨2.1⟩ n. *jñāna*

आवृत्य **[after] covering** ⟨*avyaya*⟩ (*ā.*√*vṛ[ñ]* 5U – to cover; + .*ya[p]*)

देहिनम् **the embodied soul** ⟨2.1⟩ m. *dehin* (*dehī*)

Subodhinī: विषय-दर्शन-श्रवणादिभिः, सङ्कल्पेन, अध्यवसायेन च कामस्य आविर्भावात्, इन्द्रियाणि च मनः च बुद्धिः च अस्य अधिष्ठानम् उच्यते । एतैः इन्द्रियादिभिः दर्शनादि-व्यापारवद्भिः आश्रय-भूतैः विवेक-ज्ञानम् आवृत्य, देहिनम् विमोहयति ॥३.४०॥

यस्मात् एवम् – 'तस्मात् त्वम्' इति –

3.41

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥४१॥

तस्मात् हे भरतर्षभ !	therefore, O Arjuna!
आदौ हि इन्द्रियाणि नियम्य	[after] restraining the senses in the very beginning
एनम् ज्ञान-विज्ञान-नाशनम् पाप्मानम्	this evil, destroyer of knowledge and realization
त्वम् प्रजहि ।	you must kill

"Therefore, O Arjuna, best of the Bhāratas, in the very beginning curb this great symbol of sin (lust) by regulating the senses, and slay this destroyer of knowledge and self-realization."

तस्मात् **therefore** ⟨*avyaya*⟩

त्वम् **you** ⟨1.1⟩ *kṛṣnanāma yuṣmad* – (middle person) you

इन्द्रियाणि **the senses** ⟨2.3⟩ n. *indriya* – sense, sense organ

आदौ **in the beginning** ⟨7.1⟩ m. *ādi* – beginning

नियम्य **[after] restraining** ⟨*avyaya*⟩ *ni.*√*yam[a]* – to restrain; + *ya[p]*

भरतर्षभ **O Arjuna!** ⟨8.1⟩ m. *bharata-ṛsabha*...भरतानाम् ऋषभः इति भरतर्षभः – 'best of the Bharatas'

पाप्मानम् **the evil** ⟨2.1⟩ m. *pāpman* (*pāpmā*)

प्रजहि **you must kill** ⟨*vidhātā* 2.1⟩ *pra.*√*han[a]* – to kill

हि **indeed** ⟨*avyaya*⟩

एनम् **this** ⟨2.1⟩ m. *kṛṣnanāma etad* – (first person) he, this

ज्ञान-विज्ञान-नाशनम् **the destroyer of knowledge and realization** ⟨2.1⟩ m. *jñāna-vijñāna-nāśana*...ज्ञानस्य च विज्ञानस्य च नाशनम् येन, सः ज्ञान-विज्ञान-नाशनः – 'by which there is destruction of *jñāna* and *vijñāna*'

ज्ञान refers to scriptural, theoretical, philosophical knowledge of the soul; and *vijñāna* to prooved or realized, scientific knowledge

नाशन (from √*naś[a]*...अदर्शने – to disappear, perish) – destroying, destruction

Subodhinī: आदौ (विमोहात् पूर्वम्) एव इन्द्रियाणि मनः बुद्धिम् च नियम्य, पाप-रूपम् एनम् कामम् हि स्फुटं प्रजहि (घातय) । यद्वा, प्रजहि (परित्यज) । ज्ञानम् (आत्म-विषयम्), विज्ञानम् (शास्त्रीयम्), तयोः नाशकम् । यद्वा, ज्ञानम् (शास्त्र-आचार्य-उपदेश-जम्), विज्ञानम् (निदिध्यासन-जम्) – 'तम् एव धीरः विज्ञाय, प्रज्ञाम् कुर्वीत' (*Bṛhad-āraṇyaka-Up.* 4.4.21) इति श्रुतेः ॥३.४१॥

अथ अत्र, प्रसन्नतया चित्त-प्रणिधानेन इन्द्रियाणि नियन्तुम् शक्यन्ते, तद् आत्म-स्वरूपम् देहादिभ्यः विविच्य, दर्शयति – 'इन्द्रियाणि' इति –

3.42

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥४२॥

इन्द्रियाणि पराणि आहुः,	the senses are said to be superior [to objects],
इन्द्रियेभ्यः मनः परम्,	superior to the senses is the mind,
मनसः तु बुद्धिः परा,	but superior to the mind is intelligence,
यः तु बुद्धेः परतः, सः ।	but who is superior to intelligence, is he (the soul)

"The working senses are superior to dull matter; mind is higher than the senses; intelligence is still higher than the mind; and he (the soul) is even higher than the intelligence."

इन्द्रियाणि **the senses** ⟨1.3⟩ n. *indriya* – sense, sense organ
पराणि **are superior** ⟨1.3⟩ n. *para* – beyond
आहुः **they spoke** ⟨*acyuta* opt. for *bruvanti* with a past sense 1.3⟩ √*brū[ñ]*...व्यक्तायां वाचि – to speak
इन्द्रियेभ्यः **than the senses** ⟨5.3⟩ n. *indriya* – sense, sense organ
परम् **superior** ⟨1.1⟩ n. *para* – beyond
मनः **the mind** ⟨2.1⟩ n. *manas* (*manaḥ*)
मनसः **than the mind** ⟨5.1⟩ n. *manas* (*manaḥ*) – mind
तु **but** ⟨*avyaya*⟩
परा **superior** ⟨1.1⟩ f. *parā* (*.ā[p]*) – beyond
बुद्धिः **intelligence** ⟨1.1⟩ f. *buddhi*
यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
बुद्धेः **than intelligence** ⟨5.1⟩ f. *buddhi*
परतः **superior** ⟨*avyaya*⟩ (*paratas*; *para* + *.tas[i]*) – farther, thereafter
तु **but** ⟨*avyaya*⟩
सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

Subodhinī: इन्द्रियाणि देहादिभ्यः ग्राह्येभ्यः पराणि (श्रेष्ठानि) आहुः, सूक्ष्मत्वात् प्रकाशकत्वात् च । अतएव तद्-व्यतिरिक्तत्वम् अपि अर्थात् उक्तम् भवति ।

इन्द्रियेभ्यः च सङ्कल्पात्मकम् मनः परम्, तद्-प्रवर्तकत्वात् । मनसः तु बुद्धिः निश्चयात्मिका परा, निश्चय-पूर्वकत्वात् सङ्कल्पस्य । यः तु बुद्धेः परतः, तद्-साक्षित्वेन अवस्थितः सर्व-अन्तरः, सः आत्मा, 'विमोहयति देहिनम्' (3.40) इति 'देहि'-शब्द-उक्तः आत्मा, 'सः' इति परामृश्यते ॥३.४२॥

उपसंहरति – 'एवम्' इति –

3.43

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥४३॥

हे महा-बाहो !	O Arjuna!
एवम् बुद्धेः परम् बुद्ध्वा	[after] thus knowing that which is superior to intelligence
आत्मना आत्मानम् संस्तभ्य	and [after] steadying the mind by intelligence
दुरासदम् काम-रूपम् शत्रुम्	the enemy in the form of lust, difficult to conquer
जहि !	slay!

"Thus knowing oneself to be transcendental to the material senses, mind and intelligence, O mighty-armed Arjuna, one should steady the mind by deliberate spiritual intelligence (Kṛṣṇa consciousness) and thus – by spiritual strength – conquer this insatiable enemy known as lust."

एवम् **thus** ⟨*avyaya*⟩
बुद्धेः **than intelligence** ⟨5.1⟩ f. *buddhi*
परम् **which is superior** ⟨2.1⟩ m. *para* – beyond
बुद्ध्वा **[after] knowing** ⟨*avyaya*⟩ √*budh[a]*...अवगमने – to understand, know; + *.[k]tvā*
संस्तभ्य **[after] steadying** ⟨*avyaya*⟩ from *sam.*√*stambh[u]* – to steady; + *.ya[p]*
आत्मानम् **the mind** ⟨2.1⟩ m. *ātman* (*ātmā*) – the self, soul
आत्मना **by intelligence** ⟨3.1⟩ m. *ātman* (*ātmā*) – the self, soul
जहि **you must kill** ⟨*vidhātā* 2.1⟩ √*han[a]*...हिंसा-गत्योः – to harm, kill; go
शत्रुम् **the enemy** ⟨2.1⟩ m. *śatru* – enemy, rival
महा-बाहो **O Arjuna!** ⟨8.1⟩ m. *mahā-bāhu* – 'who has mighty arms'
काम-रूपम् **in the form of desire** ⟨2.1⟩ m. *kāma-rūpa*
दुरासदम् **which is difficult to conquer** ⟨2.1⟩ m. *durāsada*

Subodhinī: बुद्धेः एव विषय-इन्द्रियादि-जन्याः कामादि-विक्रियाः, आत्मा तु निर्विकारः तद्-साक्षी इति, एवम् बुद्धेः परम् आत्मानम् बुद्ध्वा, आत्मना एवम्भूत-निश्चयात्मिकया बुद्ध्या आत्मानम् (मनः) संस्तभ्य (निश्चलम् कृत्वा), काम-रूपम् शत्रुम् जहि (मारय) । दुरासदम् (दुःखेन आसादनीयम्) दुर्विज्ञेय-गतिम् इति अर्थः ॥३.४३॥

Note: Rāmānujācārya comments that *saḥ* (in 3.42) refers to *kāma*. Knowing that *kāma* is higher even than *buddhi*, one should conquer it from the very beginning (3.41).

> ओं तत्सदिति
> श्रीमहाभारते शतसाहस्त्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि
> श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
> श्रीकृष्णार्जुनसंवादे कर्मयोगो नाम तृतीयो ऽध्यायः ॥३॥

अथ चतुर्थो ऽध्यायः

अथ चतुर्थः अध्यायः । now the fourth chapter

Subodhinī: एवम् तावत् अध्याय-द्वयेन कर्म-योग-उपायः ज्ञान-योग-उपायः च मोक्ष-साधनत्वेन उक्तः । तम् एव 'ब्रह्मार्पण'-आदि-गुण-विधानेन (4.24) 'तत्त्वम्' पद-अर्थ-विवेकादिना च प्रपञ्चयिष्यन्, प्रथमम् तावत् परम्परा-प्राप्तत्वेन स्तुवन्, [श्री-भगवान् उवाच] – 'इमम्' इति त्रिभिः –

4.1

श्रीभगवानुवाच

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।

> विवस्वान्मनवे प्राह मनुरिक्ष्वाकवे ऽब्रवीत् ॥१॥

श्री-भगवान् उवाच –	Śrī Kṛṣṇa said:
इमम् अ-व्ययम् योगम्	this imperishable (*karma-*) *yoga*
अहम् विवस्वते प्रोक्तवान्,	I instructed to Vivasvān,
विवस्वान् मनवे प्राह,	Vivasvān instructed Manu (his son),
मनुः इक्ष्वाकवे अब्रवीत् ।	Manu spoke to Ikṣvāku (his son)

"The Personality of Godhead, Lord Śrī Kṛṣṇa, said: I instructed this imperishable science of yoga to the sun-god, Vivasvān, and Vivasvān instructed it to Manu, the father of mankind, and Manu in turn instructed it to Ikṣvāku."

श्री-भगवान्	**Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'
उवाच	**he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
इमम्	**this** ⟨2.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
विवस्वते	**to Vivasvān** ⟨4.1⟩ m. *vivasvat* (*.vat[u]*) – 'having rays'; one who illuminates
योगम्	**the Yoga** ⟨2.1⟩ m. *yoga*
प्रोक्तवान्	**I declared** ⟨1.1⟩ m. *proktavat* (*pra.*√*vac[a]* – to declare; + *.[k]tavat[u]*) – 'one who declared'
अहम्	**I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
अ-व्ययम्	**imperishable** ⟨2.1⟩ m. *a-vyaya*
विवस्वान्	**Vivasvān** ⟨1.1⟩ m. *vivasvat*
मनवे	**to Manu** ⟨4.1⟩ m. *manu* – 'wise man'
प्राह	**he declared** ⟨*acyuta* opt. form with a past sense 1.1⟩ *pra.*√*brū[ñ]* – to declare
मनुः	**Manu** ⟨1.1⟩ m. *manu*
इक्ष्वाकवे	**to Ikṣvāku** ⟨4.1⟩ m. *ikṣvāku*

Vivasvān, the sun god, is the eighth son of Aditi. The son of Vivasvān, Śrāddhadeva, became the seventh (the present) 'Vaivasvata' Manu. His son was Ikṣvāku, founder of the solar dynasty of the kings of Ayodhyā, whose son was Nimi.

अब्रवीत् **he spoke** ⟨*bhūteśvara* 1.1⟩ √*brū[ñ]*...व्यक्तायां वाचि – to speak

Subodhinī: अव्यय-फलत्वात् अ-व्ययम्, इमम् योगम् पुरा अहम् विवस्वते (आदित्याय) कथितवान् । सः च स्व-पुत्राय मनवे (श्राद्धदेवाय) प्राह । सः च मनुः स्व-पुत्राय इक्ष्वाकवे अब्रवीत् ॥४.१॥

4.2

एवं परम्पराप्राप्तमिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परन्तप ॥२॥

एवम् परम्परा-प्राप्तम्	thus received by disciplic succession
इमम् राजर्षयः विदुः,	the saintly kings know it,
हे परन्तप !	O Arjuna!
महता कालेन	by a great period of time
इह सः योगः नष्टः ।	this *yoga* system is lost in this world

"This supreme science was thus received through the chain of disciplic succession, and the saintly kings understood it in that way. But in course of time the succession was broken, and therefore the science as it is appears to be lost."

एवम् **thus** ⟨*avyaya*⟩

परम्परा-प्राप्तम् **received by disciplic succession** ⟨2.1⟩ m. *paramparā-prāpta*...परम्परया प्राप्तः इति परम्परा-प्राप्तः

परम्परा (*param-parā*) – 'one after another', an uninterrupted series, succession

प्राप्त (*pra.√āp[l̤]* – to obtain; + *.[k]ta*) – obtained

इमम् **this** ⟨2.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this

राजर्षयः **saintly kings** ⟨1.3⟩ m. *rāja-_ṛṣi*... राज्ञाम् ऋषिः इति राजर्षिः – 'sage among kings'

ऋषि – sage or seer; there are sages among the *devas* (*devarṣis* like Nārada), among *brāhmaṇas* (*brahmarṣis* like Vasiṣṭha) and among kings (*rājarṣis* like Nimi, who was directly instructed by his father Ikṣvāku)

विदुः **they know** ⟨opt. for *vidanti*, *acyuta* 1.3⟩ √*vid[a]* 2P...ज्ञाने – to know

सः **that** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

कालेन **by time** ⟨3.1⟩ m. *kāla* (from √*kala*...गतौ सङ्ख्याने च – to go; count) – time, a fixed time, period, hour; (as cause:) destiny, as in *kālena* (in the course of time); (as destroyer:) death

(as in:) *kāla-cakra* – 'the wheel of time' as the Lord's energy or weapon

इह **here** ⟨*avyaya*⟩

महता **by great** ⟨3.1⟩ m. *mahat[u]* – great; long

योगः **the yoga** ⟨1.1⟩ m. *yoga*

नष्टः **is lost** ⟨1.1⟩ m. *naṣṭa* (√*naś[a]*...अदर्शने – to disappear, perish; + *.[k]ta*) – perished

परन्तप **O Arjuna!** ⟨8.1⟩ m. *param-_tapa* – 'who scorches the enemies'

Subodhinī: राजानः च ते ऋषयः च [इति राजर्षयः], अन्ये अपि राजर्षयः निमि-प्रमुखाः, स्व-पितृ-आदिभिः इक्ष्वाकु-प्रमुखैः प्रोक्तम्, इमम् योगम् विदुः (जानन्ति स्म) । अद्यतनानाम् अ-ज्ञाने कारणम् आह – हे परन्तप (शत्रुतापन), सः योगः काल-वशात् इह लोके नष्टः (विच्छिन्नः) ॥४.२॥

4.3

स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥३॥

सः एव अयम् पुरातनः योगः	that same ancient *yoga*
अद्य ते (तुभ्यम्) मया प्रोक्तः,	is today instructed by Me to you,
मे (मम) भक्तः सखा च असि इति,	[because] you are My devotee and friend,
एतद् हि उत्तमम् रहस्यम् ।	this is a supreme secret

"That very ancient science of the relationship with the Supreme is today told by Me to you because you are My devotee as well as My friend and can therefore understand the transcendental mystery of this science."

सः **that** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

एव **certainly** ⟨*avyaya*⟩

अयम् **this** ⟨1.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this

मया **by me** ⟨3.1⟩ *kṛṣṇanāma asmad* – (last person) I

ते **to you** ⟨opt. for *tubhyam* 4.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

अद्य **today** ⟨*avyaya*⟩ – today, now

योगः **Yoga** ⟨1.1⟩ m. *yoga*

प्रोक्तः **is declared** ⟨1.1⟩ m. *prokta* (*pra.√vac[a]* – to declare; + *.[k]ta*)

पुरातनः **the ancient** ⟨1.1⟩ m. *purātana* (from √*pur[a]*...अग्रगमने – to precede) – old , ancient (same as *purāna*)

भक्तः **a devotee** ⟨1.1⟩ m. *bhakta* (√*bhaj[a]* 1U...सेवायाम् – to serve, worship; + *.[k]ta*) – 'devoted', devotee

असि **you are** ⟨*acyuta* 2.1⟩ √*as[a]*...भुवि – to be, exist

मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I

सखा **friend** ⟨1.1⟩ m. *sakhi* – companion, friend

च **and** ⟨*avyaya*⟩

इति **thus** ⟨*avyaya*⟩

रहस्यम् **secret** ⟨1.1⟩ n. *rahasya* (from *rahas*) – secret, private; a secret, mystery, any subtle point or esoteric teaching

rahas (*rahaḥ*) (from *rah[a]*...त्यागे – to abandon) – alone, solitude; *rahita* (*rah[a]*...त्यागे – to abandon; + .*[k]ta*) – abandoned, deprived of, without

हि **indeed** ⟨*avyaya*⟩

एतद् **this** ⟨1.1⟩ n. *kṛṣṇanāma etad* – (first person) he, this

उत्तमम् **supreme** ⟨1.1⟩ n. *uttama* (from the particle *ud* – up, over, above; + .*tama*) – 'most high', highest, greatest, best (opp. to *adhama*)

(as in:) *uttama-śloka* – 'who is of excellent fame', name of God; *uttara* (*ud* + .*tara*) – 'more high', higher, greater, better (opp. to *adhara*); northern, right hand side; later, following, future; answer, reply; result, consequence; remainder, excess; (as in:) *uttarottara* (*uttara-uttara*:) – more and more

Subodhinī: सः एव अयम् योगः अद्य विच्छिन्ने सम्प्रदाये सति, पुनः च मया ते (तुभ्यम्) उक्तः, यतः त्वम् मम भक्तः असि सखा च इति। अन्यस्मै मया न उच्यते, हि यस्मात् इदम् उत्तमम् रहस्यम् ॥४.३॥

भगवतः विवस्वन्तम् प्रति योग-उपदेश-असम्भवम् पश्यन् –'अ-परम्' इति –

4.4

अर्जुन उवाच

अपरं भवतो जन्म परं जन्म विवस्वतः ।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥४॥

अर्जुनः उवाच -	Arjuna said:
भवतः जन्म अ-परम्,	Your birth is later
विवस्वतः जन्म परम्,	Vivasvān's birth is earlier,
त्वम् आदौ प्रोक्तवान् इति	that in the beginning You instructed [him]
एतद् कथम् विजानीयाम् ?	how should I understand this?

"Arjuna said: The sun-god Vivasvān is senior by birth to You. How am I to understand that in the beginning You instructed this science to him?"

अर्जुनः **Arjuna** ⟨1.1⟩ m. *arjuna* – white, 'who is pure in actions'

उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak

अ-परम् **later** ⟨1.1⟩ n. *kṛṣṇanāma a-para* – later, inferior, other

भवतः **your** ⟨6.1⟩ m. *bhavat[u]* – you (honorific)

जन्म **birth** ⟨1.1⟩ n. *janman* (*janma*)

परम् **earlier** ⟨1.1⟩ n. *para* – beyond, earlier

जन्म **birth** ⟨1.1⟩ n. *janman* (*janma*)

विवस्वतः **of Vivasvān** ⟨6.1⟩ m. *vivasvat* – Vivasvān

कथम् **how** ⟨*avyaya*⟩

एतद् **this** ⟨2.1⟩ n. *kṛṣṇanāma etad* – (first person) he, this

विजानीयाम् **I should understand** ⟨*vidhi* 3.1⟩ *vi.*√*jñā* – to understand

त्वम् **you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

आदौ **in the beginning** ⟨7.1⟩ m. *ādi* – beginning

प्रोक्तवान् **declared** ⟨1.1⟩ m. *proktavat* (*pra.*√*vac[a]* – to declare; + .*[k]tavat[u]*) – 'who declared'

इति **thus** ⟨*avyaya*⟩

Subodhinī: अ-परम् (अर्वाचीनम्) तव जन्म, परम् (प्राक् कालीनम्) विवस्वतः जन्म, तस्मात् तव आधुनिकत्वात् चिरन्तनाय विवस्वते 'त्वम् आदौ योगम् प्रोक्तवान्' इति, एतद् कथम् अहम् विजानीयाम् (ज्ञातुम् शक्नुयाम्) ॥४.४॥

इति पृष्टवन्तम् अर्जुनम् 'रूप-अन्तरेण उपदिष्टवान्' इति अभिप्रायेण उत्तरम् – 'बहूनि' इति –

4.5

श्रीभगवानुवाच

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ॥५॥

श्री-भगवान् उवाच - हे अर्जुन !	Śrī Kṛṣṇa said: O Arjuna!
मे (मम) तव च	of Me and you
बहूनि जन्मानि व्यतीतानि,	many births have passed,
हे परन्तप !	O Arjuna!
अहम् तानि सर्वाणि वेद,	I know them all,
त्वम् न वेत्थ ।	[but] you do not know

"The Personality of Godhead said: Many, many births both you and I have passed. I can remember all of them, but you cannot, O subduer of the enemy!"

श्री-भगवान् **Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'

उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak

बहूनि **many** ⟨1.3⟩ n. *bahu*

मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I

व्यतीतानि **which have passed** ⟨1.3⟩ n. *vyatīta* (*vi.ati.*√*i[n]* – to pass; + .*[k]ta*) – passed

जन्मानि **births** ⟨1.3⟩ n. *janman* (*janma*) – birth

तव **your** ⟨6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

च **and** ⟨*avyaya*⟩

अर्जुन **O Arjuna!** ⟨8.1⟩ m. *arjuna* – white, 'who is pure in actions'
तानि **them** ⟨2.3⟩ n. *kṛṣṇanāma tad* – (first person) he, that
अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
वेद **I know** ⟨*acyuta* opt. for *vedmi* 3.1⟩ √*vid[a]* 2P...ज्ञाने – to know
सर्वाणि **all** ⟨2.3⟩ n. *kṛṣṇanāma sarva*
न **not** ⟨*avyaya*⟩
त्वम् **you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
वेत्थ **you know** ⟨*acyuta* opt. for *vetsi* 2.1⟩ √*vid[a]* 2P...ज्ञाने – to know
परन्तप **O Arjuna!** ⟨8.1⟩ m. *param-_tapa* – 'who scorches the enemies'

Subodhinī: मम बहूनि जन्मानि तव च व्यतीतानि । तानि सर्वाणि अहम् वेद (जानामि), अलुप्त-विद्या-शक्तित्वात् । त्वम् तु न वेत्थ (न जानासि), अविद्या-आवृतत्वात् ॥४.५॥
ननु, अनादेः तव कुतः जन्म ? अ-विनाशिनः च कथम् पुनः पुनः जन्म ? येन 'बहूनि मे व्यतीतानि' इति उच्यते ? ईश्वरस्य च तव पुण्य-पाप-विहीनस्य कथम् जीववत् जन्म ? इति अतः आह – 'अजः अपि' इति –

4.6

अजो ऽपि सन्नव्ययात्मा भूतानामीश्वरो ऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥६॥

अजः अपि सन् अ-व्ययात्मा	though being unborn and imperishable
भूतानाम् ईश्वरः अपि सन्	and though being the Lord of all beings
स्वाम् प्रकृतिम् अधिष्ठाय	[after] presiding over My material energy
आत्म-मायया सम्भवामि ।	by My energy I manifest

"Although I am unborn and My transcendental body never deteriorates, and although I am the Lord of all living entities, I still appear in every millennium in My original transcendental form."

अजः **unborn** ⟨1.1⟩ m. *aja*
अपि **also** ⟨*avyaya*⟩
सन् **[while] being** ⟨1.1⟩ m. *sat* (√*as[a]*...भुवि – to be, exist; + *.[ś]at[r]*)
अ-व्ययात्मा **imperishable** ⟨1.1⟩ m. *a-vyaya-ātman* (*-ātmā*)
भूतानाम् **of beings** ⟨6.3⟩ m. *bhūta* (√*bhū*...सत्तायाम् – to be, exist, become; + *.[k]ta*) – past; an element, being, creature
ईश्वरः **the Lord** ⟨1.1⟩ m. *īśvara* – lord
अपि **also** ⟨*avyaya*⟩
सन् **[while] being** ⟨1.1⟩ m. *sat* (√*as[a]*...भुवि – to be, exist; + *.[ś]at[r]*)
प्रकृतिम् **nature** ⟨2.1⟩ f. *prakṛti*

स्वाम् **own** ⟨2.1⟩ f. *kṛṣṇanāma svā* (*.ā[p]*)
अधिष्ठाय **[after] presiding over** ⟨*avyaya*⟩ from *adhi.*√*sthā* – to preside over; + *.ya[p]*
सम्भवामि **I manifest** ⟨*acyuta* 3.1⟩ *sam.*√*bhū* – to take birth, be possible
आत्म-मायया **by my energy** ⟨3.1⟩ f. *ātma-māyā* – own energy
माया – art, wisdom, supernatural power; an illusory image; the Lord's energy, which is classified as internal (spiritual, *ātma-māyā, yoga-māyā*) and external (material, *mahā-māyā*, Māyādevī, Durgā, *prakṛti*); (in phil.) the illusion of the creations of the material energy (*mahā-māyā, prakṛti*)

Subodhinī: सत्यम्, एवम् तथापि अजः अपि सन् अहम्, तथा अ-व्ययात्मा अपि (अनश्वर-स्वभावः अपि) सन्, तथा ईश्वरः अपि (कर्म-पारतन्त्र्य-रहितः अपि) सन्, स्व-मायया सम्भवामि, सम्यक् अप्रच्युत-ज्ञान-बल-वीर्यादि-शक्त्या एव भवामि । ननु, तथापि षोडशकात्मक-लिङ्गदेह-शून्यस्य तव कुतः जन्म ? इति अतः उक्तम् – स्वाम् शुद्धसत्त्व-आत्मिकाम् प्रकृतिम् अधिष्ठाय (स्वीकृत्य), विशुद्ध-ऊर्जित-सत्त्व-मूर्त्या स्व-इच्छया अवतरामि इति अर्थः ॥४.६॥
'कदा सम्भवसि ?' इति अपेक्षायाम् आह – 'यदा यदा' इति –

4.7

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥७॥

हे भारत !	O Arjuna!
यदा यदा हि धर्मस्य ग्लानिः भवति,	whenever there is a decline of *dharma*,
अ-धर्मस्य अभ्युत्थानम्	[and] a rise of *a-dharma*,
तदा अहम् आत्मानम् सृजामि ।	at that time I manifest Myself

"Whenever and wherever there is a decline in religious practice, O descendant of Bharata, and a predominant rise of irreligion – at that time I descend Myself."

यदा यदा **whenever** ⟨*avyaya*⟩ *yadā* – when
हि **indeed** ⟨*avyaya*⟩
धर्मस्य **of *dharma*** ⟨6.1⟩ m. *dharma* – law, religious duty, beginning with *varṇāśrama*
ग्लानिः **a decline** ⟨1.1⟩ f. *glāni* (from √*glai*...हर्षक्षये – to be sad, fade) – exhaustion, depression, sickness; decrease
भवति **there is** ⟨*acyuta* 1.1⟩ √*bhū*...सत्तायाम् – to be, exist, become
भारत **O Arjuna!** ⟨8.1⟩ m. *bhārata* – 'descendant of Bharata'
अभ्युत्थानम् **the rise** ⟨1.1⟩ n. *abhyutthāna* (from *abhi.ud.*√*sthā* – to stand up)
अ-धर्मस्य **of *a-dharma*** ⟨6.1⟩ m. *a-dharma* – unlawfulness, irreligion
तदा **then** ⟨*avyaya*⟩
आत्मानम् **Myself** ⟨2.1⟩ m. *ātman* (*ātmā*) – the self, soul

सृजामि **I manifest** ⟨*acyuta* 3.1⟩ √*sṛj[a]*...विसर्गे – to let loose, create

अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

Subodhinī: धर्मस्य ग्लानिः (हानिः), अ-धर्मस्य अभ्युत्थानम् (आधिक्यम्) ॥४.७॥
किम् अर्थम् ? इति अपेक्षायाम् आह – 'परित्राणाय' इति –

4.8

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥८॥

साधूनाम् परित्राणाय	for the protection of the pious
दुष्कृताम् विनाशाय	for the destruction of the miscreants
धर्म-संस्थापनार्थाय च	and the establishment of *dharma*
युगे युगे सम्भवामि ।	I manifest in every millenium

"To deliver the pious and to annihilate the miscreants, as well as to reestablish the principles of religion, I Myself appear, millennium after millennium."

परित्राणाय **for the protection** ⟨4.1⟩ n. *paritrāṇa* (from *pari.*√*trai[ṇ]* – to protect) – protection

साधूनाम् **of the pious** ⟨6.3⟩ m. *sādhu* (from √*sādh[a]*...संसिद्धौ – to accomplish) – straight, right; well-disposed, kind; successful; peaceful; excellent; good, virtuous, honorable, righteous, noble, correct, pure; 'good!' 'well-done'!; a good or virtuous or honest man; a saint, sage

(also from √*sādh[a]*...संसिद्धौ): *sādhaka* – accomplishing; an efficient or skillful person, esp. an adept; a worshipper; *sādhana* – performance, accomplishment; any means of accomplishing; *sādhya* – to be accomplished; an object to be accomplished; "The symptoms of a *sādhu* are that he is tolerant, merciful and friendly to all living entities. He has no enemies, he is peaceful, he abides by the scriptures, and all his characteristics are sublime." (*SB.* 3.25.21)

विनाशाय **for the destruction** ⟨4.1⟩ m. *vināśa* – destruction

च **and** ⟨*avyaya*⟩

दुष्कृताम् **of the miscreants** ⟨6.3⟩ m. *duṣkṛta* – 'badly done', sinful activity; a criminal

धर्म-संस्थापनार्थाय **for the purpose of establishing *dharma*** ⟨4.1⟩ m. *dharma-saṁsthāpana-artha*...धर्मस्य संस्थापनस्य अर्थः इति धर्म-संस्थापनार्थः – 'the purpose of the establishment of *dharma*'

सम्भवामि **I manifest** ⟨*acyuta* 3.1⟩ *sam.*√*bhū* – to take birth, be possible

युगे युगे **in every *yuga*** ⟨7.1⟩ n. *yuga* – an age

The current (*yuga*), Kali-yuga, lasts 432,000 years, five thousand of which have passed. Preceding it were three other *yugas* – Satya, Tretā, and Dvāpara – the first four times as long as Kali, the second three times as long, and the third twice as long.

Subodhinī: साधूनाम् (स्वधर्म-वर्तिनाम्) रक्षणाय । दुष्टम् कर्म कुर्वन्ति इति दुष्कृतः, तेषाम् वधाय च । एवम् धर्मस्य संस्थापन-अर्थाय, साधु-रक्षणेन दुष्ट-वधेन च धर्मम् स्थिरी-कर्तुम्, युगे युगे तद्-तद्-अवसरे सम्भवामि इति अर्थः । न च एवम् दुष्ट-निग्रहम् कुर्वतः अपि, नैर्घृण्यम् शङ्कनीयम् । यथा च आहुः –
लालने ताडने मातुः न अ-कारुण्यम् यथा अर्भके ।
तद्वत् एव महेशस्य नियन्तुः गुण-दोषयोः ॥
इति ॥४.८॥
एवम्-विधानाम् ईश्वर-जन्म-कर्मणाम् ज्ञाने फलम् आह – 'जन्म कर्म' इति –

4.9

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सो ऽर्जुन ॥९॥

हे अर्जुन !	O Arjuna!
मे (मम) दिव्यम् जन्म कर्म च	My transcendental birth and activities
यः एवम् तत्त्वतः वेत्ति,	one who thus knows truly,
देहम् त्यक्त्वा	[after] leaving the body
सः पुनः जन्म न एति,	he does not take birth again,
माम् एति ।	he comes to Me

"One who knows the transcendental nature of My appearance and activities does not, upon leaving the body, take his birth again in this material world, but attains My eternal abode, O Arjuna."

जन्म **birth** ⟨2.1⟩ n. *janman* (*janma*)

कर्म **activity** ⟨2.1⟩ n. *karman* (*karma*) – activity

च **and** ⟨*avyaya*⟩

मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I

दिव्यम् **transcendental** ⟨2.1⟩ n. *divya* – divine, not material

एवम् **thus** ⟨*avyaya*⟩

यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

वेत्ति **he knows** ⟨*acyuta* 1.1⟩ √*vid[a]* 2P...ज्ञाने – to know

तत्त्वतः **truly** ⟨*avyaya*⟩ (*tattvatas*) – in truth, from the truth

त्यक्त्वा **[after] abandoning** ⟨*avyaya*⟩ √*tyaj[a]*...हानौ – to abandon; + *.[k]tvā*

देहम् **the body** ⟨2.1⟩ m. *deha*

पुनः **again** ⟨*avyaya*⟩ (*punar*)

जन्म **birth** ⟨2.1⟩ n. *janman* (*janma*)

न **not** ⟨*avyaya*⟩

एति he goes ⟨*acyuta* 1.1⟩ √*i[ṇ]*...गतौ – to go
माम् to me ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
एति he goes ⟨*acyuta* 1.1⟩ √*i[ṇ]*...गतौ – to go
सः he ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
अर्जुन O Arjuna! ⟨8.1⟩ m. *arjuna* – white, 'who is pure in actions'

Subodhinī: मे जन्म स्व-इच्छा-कृतम्, कर्म च धर्म-पालन-रूपम् दिव्यम् (अ-लौकिकम्), तत्त्वतः पर-अनुग्रहार्थम् एव इति यः वेत्ति, सः देह-अभिमानम् त्यक्त्वा, पुनः जन्म न एति (न प्राप्नोति), किन्तु माम् एव प्राप्नोति ॥४.९॥
कथम् जन्म-कर्म-ज्ञानेन त्वद्-प्राप्तिः स्यात् ? इति अत्र आह – 'वीत-राग' इति –

4.10

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥१०॥

वीत-राग-भय-क्रोधाः	freed from attachment, fear and anger
मन्मयाः माम् उपाश्रिताः	absorbed in Me, and taking shelter in Me
ज्ञान-तपसा पूताः	purified by knowledge and renunciation
बहवः मद्भावम् आगताः ।	many attained My transcendental nature

"Being freed from attachment, fear and anger, being fully absorbed in Me and taking refuge in Me, many, many persons in the past became purified by knowledge of Me – and thus they all attained transcendental love for Me."

वीत-राग-भय-क्रोधाः **who are freed from attachment, fear and anger** ⟨1.3⟩ m. *vīta-rāga-bhaya-krodha*...वीताः राग-भय-क्रोधाः यस्मात्, सः वीत-राग-भय-क्रोधः – 'from whom attachment, fear and anger are gone'
मन्मयाः **who are absorbed in me** ⟨1.3⟩ m. *mad-_maya* – absorbed in me
माम् **to me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
उपाश्रिताः **who have taken shelter** ⟨1.3⟩ m. *upāśrita* (*upa.ā.*√*śri[ñ]* – to take shelter; +.*[k]ta*) – taken shelter
बहवः **many** ⟨1.3⟩ m. *bahu*
ज्ञान-तपसा **by knowledge and renuciation** ⟨3.1⟩ n. *jñāna-tapas* (*tapaḥ*)...ज्ञानम् च तपः च इति ज्ञान-तपः – 'knowledge and renunciation' (*samāhāra*); or ज्ञानम् एव तपः इति ज्ञान-तपः – 'the austerity of knowledge'
तपस् (*tapaḥ*) (from √*tap[a]*...सन्तापे ऐश्वर्य्ये वा – to heat, burn; lord) – heat; the hot season; suffering; religious austerity, penance; a special observance (like learning or charity); (as in:) *tapo-vana* (*tapaḥ-_vana*) – a grove where austerities are performed; (derived:) *tapasvin* (*tapasvī*) – an ascetic; *tapasya*

– to undergo austerity; (also from √*tap[a]*:) *tapta* – heated, melted, as in *tapta-kāñcana* (molten gold)
पूताः **who are purified** ⟨1.3⟩ m. *pūta* (√*pū*...पवने – to purify; + .*[k]ta*) – purified
मद्भावम् **to my nature** ⟨2.1⟩ m. *mad-bhāva*...मम भावः इति मद्भावः
आगताः **who have come** ⟨1.3⟩ m. *āgata* (*ā.*√*gam[!]* – to come; + .*[k]ta*) – having come

Subodhinī: अहम् शुद्ध-सत्त्व-अवतारैः धर्म-परिपालनम् करोमि इति मदीयम् परम-कारुणिकत्वम् ज्ञात्वा, वीताः (विगताः) राग-भय-क्रोधाः येभ्यः ते, विक्षेप-अभावात् मद्-मया (मद्-एक-चित्ताः) भूत्वा, माम् एव उपाश्रिताः सन्तः, मद्-प्रसाद-लभ्यम् यद् आत्म-ज्ञानम् च, तपः च (तद्-परिपाक-हेतुः स्व-धर्मः), तयोः द्वन्द्व-एकवत्-भावः । तेन (ज्ञान-तपसा) पूताः (शुद्धाः, निरस्त-अज्ञान-तद्-कार्य-मलाः) सन्तः, मद्-भावम् (मद्-सायुज्यम्) प्राप्ताः बहवः । नतु अधुना एव प्रवृत्तः अयम् मद्-भक्ति-मार्गः इति अर्थः । तद् एवम् 'तानि अहम् वेद सर्वाणि' (4.5) इत्यादिना विद्या-अविद्या-उपाधिभ्याम् 'तद् त्वम्' पदार्थौ ईश्वर-जीवौ प्रदर्श्य, ईश्वरस्य च अविद्या-अभावेन नित्य-शुद्धत्वात्, जीवस्य च ईश्वर-प्रसाद-लब्ध-ज्ञानेन अज्ञान-निवृत्तेः शुद्धस्य सतः, चित्-अंशेन तद्-ऐक्यम् उक्तम् इति द्रष्टव्यम् ॥४.१०॥
ननु, तर्हि किम् त्वयि अपि वैषम्यम् अस्ति ? यस्मात् एवम् त्वद्-एक-शरणानाम् एव आत्म-भावम् ददासि, न अन्येषाम् स-कामानाम् इति अतः आह – 'ये यथा' इति –

4.11

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥११॥

यथा ये माम् प्रपद्यन्ते	as all surrender to Me
तथा एव अहम् तान् भजामि	I reward them accordingly,
हे पार्थ !	O Arjuna!
मनुष्याः	all men
मम वर्त्म सर्वशः अनुवर्तन्ते ।	follow My path in all respects

"As all surrender unto Me, I reward them accordingly. Everyone follows My path in all respects, O son of Pṛthā."

ये **those who** ⟨1.3⟩ m. *kṛṣṇanāma yad* – (relative) who, which
यथा **as** ⟨*avyaya*⟩
माम् **to me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
प्रपद्यन्ते **they surrender** ⟨*acyuta* 1.3⟩ *pra.*√*pad[a]* – to surrender
तान् **them** ⟨2.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

तथा एव **just the same way** ⟨*avyaya*⟩

भजामि **I serve** ⟨*acyuta* 3.1⟩ *bhaj[a]* 1U...सेवायाम् – to serve, worship
From this *dhātu* the words *bhakta* (devotee) and *bhakti* (devotion) are derived.

अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

मम **my** ⟨6.1⟩ *kṛṣṇanāma asmad* – (last person) I

वर्त्म **path** ⟨2.1⟩ n. *vartman (vartma)* – path, course

अनुवर्तन्ते **they follow** ⟨*acyuta* 1.3⟩ *anu.√vṛt[u]* – to act after, follow

मनुष्याः **men** ⟨1.3⟩ m. *manuṣya* – human

पार्थ **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'

सर्वशः **in all respect** ⟨*avyaya*⟩ (*sarvaśas*) – completely, altogether, in every way, on all sides

Subodhinī: यथा (येन प्रकारेण), स-कामतया निष्कामतया वा, ये माम् भजन्ति, तान् अहम् तथैव तद्-अपेक्षित-फल-दानेन भजामि (अनुगृह्णामि), नतु 'ये स-कामाः माम् विहाय, इन्द्रादीन् एव भजन्ते, तान् अहम् उपेक्षे' इति मन्तव्यम् । यतः सर्वशः (सर्व-प्रकारैः) इन्द्रादि-सेवकाः अपि मम एव वर्त्म (भजन-मार्गम्) अनुवर्तन्ते, इन्द्रादि-रूपेण अपि मम एव सेव्यत्वात् ॥४.११॥
'तर्हि मोक्षार्थम् एव किम् इति सर्वे त्वाम् न भजन्ति ?' इति अतः आह – 'काङ्क्षन्तः' इति –

Note: Either one worships the Supreme directly, without motivation (*niṣkāma*), or else through *devas* for material gain (*sakāma*) – everyone worships the Lord alone (follows His 'path of worship').

4.12

काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः ।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥१२॥

कर्मणाम् सिद्धिम् काङ्क्षन्तः	those desiring the fruit of activities
इह देवताः यजन्ते,	worship the *devas* in this world,
मानुषे लोके	[because] in the world of men
कर्मजा सिद्धिः क्षिप्रम् हि भवति ।	the fruit of work comes quickly

"Men in this world desire success in fruitive activities, and therefore they worship the demigods. Quickly, of course, men get results from fruitive work in this world."

काङ्क्षन्तः **who are desiring** ⟨1.3⟩ m. *kāṅkṣat* (√*kākṣ[i]*...काङ्क्षायाम् – to desire; + *.[ś]at[r]*) – [while] desiring

कर्मणाम् **of activities** ⟨6.3⟩ n. *karman (karma)* – activity

सिद्धिम् **success** ⟨2.1⟩ f. *siddhi*

यजन्ते **they worship** ⟨*acyuta* 1.3⟩ √*yaj[a]*...देवपूजा-सङ्गतिकरण-यजन-दानेषु – to worship; associate; sacrifice; give

इह **here** ⟨*avyaya*⟩

देवताः **demigods** ⟨2.3⟩ f. *devatā* (*.tā[p]*) – divinity, deity

क्षिप्रम् **quickly** ⟨*avyaya*⟩ from √*kṣip[a]*...प्रेरणे – to send, throw

हि **indeed** ⟨*avyaya*⟩

मानुषे **in the human** ⟨7.1⟩ m. *mānuṣa* (from *manuṣa* – man)

लोके **in the world** ⟨7.1⟩ m. *loka* – place, world, people

सिद्धिः **success** ⟨1.1⟩ f. *siddhi*

भवति **there is** ⟨*acyuta* 1.1⟩ √*bhū*...सत्तायाम् – to be, exist, become

कर्मजा **from work** ⟨1.1⟩ f. *karma-jā* (*.ā[p]*) – 'born from work'

Subodhinī: कर्मणाम् सिद्धिम् (फलम्) काङ्क्षन्तः, प्रायशः इह मनुष्य-लोके इन्द्रादि-देवताः एव यजन्ते, नतु साक्षात् माम् एव । हि यस्मात् कर्म-जा सिद्धिः (कर्म-जम् फलम्) शीघ्रम् भवति, नतु ज्ञान-फलम् (कैवल्यम्), दुष्प्राप्यत्वात् ज्ञानस्य ॥४.१२॥
ननु, केचिद् स-कामतया प्रवर्तन्ते, केचिद् निष्कामतया इति कर्म-वैचित्र्यम्, तद्-कर्तॄणाम् च ब्राह्मण-आदीनाम् उत्तम-मध्यमादि-वैचित्र्यम् कुर्वतः, तव कथम् वैषम्यम् न अस्ति ? इति आशङ्क्य आह – 'चातुर्वर्ण्यम्' इति –

4.13

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥१३॥

गुण-कर्म-विभागशः	according to the divisions of *guṇa* and *karma*
चातुर्वर्ण्यम् मया सृष्टम्,	the system of four *varṇas* was created by Me,
तस्य कर्तारम् अपि	though the creator of it
माम् अ-व्ययम् अ-कर्तारम् विद्धि !	know Me as the unchangeable non-doer!

"According to the three modes of material nature and the work associated with them, the four divisions of human society are created by Me. And although I am the creator of this system, you should know that I am yet the nondoer, being unchangeable."

चातुर्वर्ण्यम् **the system of four** ***varṇas*** ⟨1.1⟩ n. *cāturvarṇya* (same as *catur-varṇa*)

मया **by Me** ⟨3.1⟩ *kṛṣṇanāma asmad* – (last person) I

सृष्टम् **created** ⟨1.1⟩ n. *sṛṣṭa* (√*sṛj[a]*...विसर्गे – to let loose, create; + *.[k]ta*) – created

गुण-कर्म-विभागशः **by the divisions of the** ***guṇas*** **and** ***karmas*** ⟨*avyaya*⟩ (*guṇa-karma-vibhāgaśas*)...गुणानाम् च कर्मणाम् च विभागशः इति गुण-कर्म-विभागशः

The three *guṇas* are *sattva-guṇa*, *rajo-guṇa* and *tamo-guṇa*. The predominance of a certain *guṇa* or mixture determines the quality of one's work. The idea is that a person's profession (*varṇa*) is determined by his qualities, and not by mere birth. "Whatever symptoms are described, they indicate a person's *varṇa*, and if one shows different symptoms, one should be accepted accordingly." (*SB.* 7.11.35) *Jāti* (family background) can help of course, to perfect a certain quality.

तस्य **of that** ⟨6.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
कर्तारम् **the doer** ⟨2.1⟩ m. *kartṛ* (*kartā*) (√*[ḍu]kṛ[ñ]*...करणे – to do; + .*tṛ[n]*) – doer, maker, creator
अपि **also** ⟨*avyaya*⟩
माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
विद्धि **you must know** ⟨*vidhātā* 2.1⟩ √*vid[a]* 2P...ज्ञाने – to know
अ-कर्तारम् **the non-doer** ⟨2.1⟩ m. *a-kartṛ* (*-kartā*)
अ-व्ययम् **unchangeable** ⟨2.1⟩ m. *a-vyaya* – unchangeable, imperishable

Subodhinī: चत्वारः वर्णाः एव चातुर्वर्ण्यम्, स्वार्थे ष्यञ्-प्रत्ययः। अयम् अर्थः – सत्त्व-प्रधानाः ब्राह्मणाः, तेषाम् च शम-दमादीनि कर्माणि, सत्त्व-रजः-प्रधानाः क्षत्रियाः, तेषाम् च शौर्य-युद्धादीनि कर्माणि, रजः-तमः-प्रधानाः वैश्याः, तेषाम् कृषि-वाणिज्यादीनि कर्माणि, तमः-प्रधानाः शूद्राः तेषाम् च त्रैवर्णिक-शुश्रूषादि-कर्माणि इति एवम् गुणानाम् कर्मणाम् च विभागैः चातुर्वर्ण्यम् मया एव सृष्टम् इति सत्यम्, तथापि एवम् तस्य कर्तारम् अपि, फलतः अ-कर्तारम् एव माम् विद्धि। तत्र हेतुः – अ-व्ययम्, आसक्ति-राहित्येन नाश-रहितम् ॥४.१३॥
तद् एव दर्शयन्, आह – 'न माम्' इति –

4.14

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥१४॥

कर्माणि माम् न लिम्पन्ति,	activities do not stain Me,
कर्म-फले मे (मम) न स्पृहा,	nor do I have a desire for the fruit of activity,
इति यः माम् अभिजानाति	one who understands Me thus
सः कर्मभिः न बध्यते ।	he is [also] not bound by activities

"There is no work that affects Me; nor do I aspire for the fruits of action. One who understands this truth about Me also does not become entangled in the fruitive reactions of work."

न **not** ⟨*avyaya*⟩
माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
कर्माणि **activities** ⟨1.3⟩ n. *karman* (*karma*) – activity
लिम्पन्ति **they smear** ⟨*acyuta* 1.3⟩ √*lip[a]*...उपदेहे – to smear

(also from √*lip[a]*...उपदेहे): *lipi* – anointing, painting, writing, alphabet, manuscript
न **not** ⟨*avyaya*⟩
मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
कर्म-फले **in the fruit of activity** ⟨7.1⟩ n. *karma-phala*...कर्मणः फलम् इति कर्म-फलम् – the fruit of activity
स्पृहा **hankering** ⟨1.1⟩ f. *spṛhā*
इति **thus** ⟨*avyaya*⟩
माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
अभिजानाति **he understands** ⟨*acyuta* 1.1⟩ *abhi.*√*jñā* – to understand
कर्मभिः **by activities** ⟨3.3⟩ n. *karman* (*karma*) – activity
न **not** ⟨*avyaya*⟩
सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
बध्यते **he is bound** ⟨*acyuta* pass. 1.1⟩ √*bandh[a]*...बन्धने – to bind

Subodhinī: कर्माणि विश्व-सृष्टि-आदीनि अपि माम् न लिम्पन्ति (आसक्तम् न कुर्वन्ति), निरहङ्कारत्वात्, आप्त-कामत्वेन मम कर्म-फले स्पृहा-अभावात् च। 'माम् न लिम्पन्ति' इति किम् वक्तव्यम्? यतः कर्म-फले स्पृहा-राहित्येन माम्, यः अभिजानाति, सः अपि कर्मभिः न बद्ध्यते। मम निर्लेपत्वे कारणम् निरहङ्कारत्व-निःस्पृहत्व-आदिकम् जानतः, तस्य अपि अहङ्कारादि-शैथिल्यात् ॥४.१४॥
'ये यथा माम् प्रपद्यन्ते' (4.11) इत्यादि चतुर्भिः श्लोकैः, प्रासङ्गिकम् ईश्वरस्य वैषम्यम् परिहृत्य, पूर्व-उक्तम् एव कर्म-योगम् प्रपञ्चयितुम्, अनुस्मारयति – 'एवम्' इति –

4.15

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥१५॥

एवम् ज्ञात्वा	[after] knowing thus
पूर्वैः मुमुक्षुभिः अपि	even by the previous seekers for liberation
कर्म कृतम्,	work was performed,
तस्मात् त्वम्	therefore you
पूर्वैः पूर्वतरम् कृतम्	as done by the ancestors before
कर्म एव कुरु !	perform work!

"All the liberated souls in ancient times acted with this understanding of My transcendental nature. Therefore you should perform your duty, following in the

एवम्	**thus** ⟨*avyaya*⟩
ज्ञात्वा	**[after] knowing** ⟨*avyaya*⟩ √*jñā* 9P...अवबोधने – to know; + *.[k]tvā*
कृतम्	**done** ⟨2.1⟩ n. *kṛta* (√*[ḍu]kṛ[ñ]*...करणे – to do; + *.[k]ta*) – done
कर्म	**work** ⟨2.1⟩ n. *karman (karma)* – activity
पूर्वैः	**by the ancestors** ⟨3.3⟩ m. *kṛṣṇanāma pūrva* – previous
अपि	**also** ⟨*avyaya*⟩
मुमुक्षुभिः	**by the seekers of liberation** ⟨3.3⟩ m. *mumukṣu* (from √*muc[l]*...मोक्षणे – to release) – 'who desires liberation'
कुरु	**you must do** ⟨*vidhātā* 2.1⟩ √*[ḍu]kṛ[ñ]*...करणे – to do
कर्म	**work** ⟨2.1⟩ n. *karman (karma)* – activity
एव	**certainly** ⟨*avyaya*⟩
तस्मात्	**therefore** ⟨*avyaya*⟩
त्वम्	**you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
पूर्वैः	**by the ancestors** ⟨3.3⟩ m. *kṛṣṇanāma pūrva* – previous
पूर्वतरम्	**before** ⟨*avyaya*⟩ (*pūrva* + *.tara*) – 'more previous'
कृतम्	**done** ⟨2.1⟩ n. *kṛta* (√*[ḍu]kṛ[ñ]*...करणे – to do; + *.[k]ta*) – done

Subodhinī: अहङ्कारादि-राहित्येन कृतम् कर्म बन्धकम् न भवति इति एवम् ज्ञात्वा, पूर्वैः (जनकादिभिः) अपि मुमुक्षुभिः सत्त्व-शुद्धि-अर्थम् पूर्वतरम् (युग-अन्तरेषु) अपि कृतम्, तस्मात् त्वम् अपि प्रथमम् कर्म एव कुरु ॥४.१५॥
तद् [कर्म] च तत्त्व-विद्भिः सह विचार्य कर्तव्यम्, न लोक-परम्परा-मात्रेण इति आह – 'किम् कर्म' इति –

4.16

किं कर्म किमकर्मेति कवयो ऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसे ऽशुभात् ॥१६॥

किम् कर्म ? किम् अ-कर्म ?	what is *karma*? what is *a-karma*?
इति अत्र कवयः अपि मोहिताः,	here even the wise are bewildered,
यद् ज्ञात्वा	[after] knowing which
अ-शुभात् मोक्ष्यसे,	you will be freed from misfortune,
तद् कर्म ते (तुभ्यम्) प्रवक्ष्यामि ।	that *karma* I will explain to you

"Even the intelligent are bewildered in determining what is action and what is inaction. Now I shall explain to you what action is, knowing which you shall be liberated from all misfortune."

किम्	**what?** ⟨1.1⟩ n. *kṛṣṇanāma kim* – who/what
कर्म	*karma* ⟨1.1⟩ n. *karman (karma)*
किम्	**what?** ⟨1.1⟩ n. *kṛṣṇanāma kim* – who/what

अ-कर्म	*a-karma* ⟨1.1⟩ n. *a-karman (-karma)*
इति	**thus** ⟨*avyaya*⟩
कवयः	**the wise** ⟨1.3⟩ m. *kavi* (from √*kav[ṛ]*...वर्णे – to paint, describe)– a thinker, intelligent man, sage; singer, poet A *muni* contemplates the meaning of the *Vedas*, whereas a *kavi* knows *kāvya* (poetry). (as in:) *kavi-rāja* – a king of poets; (also from √*kav[ṛ]*...वर्णे): *kavitā* – poetry
अपि	**also** ⟨*avyaya*⟩
अत्र	**here** ⟨*avyaya*⟩
मोहिताः	**who are bewildered** ⟨1.3⟩ m. *mohita* (√*muh[a]*...वैचित्ये – to be bewildered; + *.[k]ta*) – bewildered
तद्	**that** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
ते	**to you** ⟨opt. for *tubhyam* 4.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
कर्म	*karma* ⟨2.1⟩ n. *karman (karma)* – activity
प्रवक्ष्यामि	**I will declare** ⟨*kalki* 3.1⟩ *pra.*√*vac[a]* – to declare
यद्	**that which** ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
ज्ञात्वा	**[after] knowing** ⟨*avyaya*⟩ √*jñā* 9P...अवबोधने – to know; + *.[k]tvā*
मोक्ष्यसे	**you will be released** ⟨*kalki* pass. 2.1⟩ √*muc[l]*...मोक्षणे – to release
अ-शुभात्	**from misfortune** ⟨5.1⟩ m. *a-śubha* – inauspiciousness, misfortune, sin

Subodhinī: किम् कर्म (कीदृशम् कर्म-करणम्), किम् अ-कर्म (कीदृशम् कर्म-अकरणम्) इति एतस्मिन् अर्थे विवेकिनः अपि मोहिताः, यतः यद् ज्ञात्वा (अनुष्ठाय) अ-शुभात् (संसारात्) मोक्ष्यसे (मुक्तः भविष्यसि), तद् कर्म अ-कर्म च तुभ्यम् अहम् प्रवक्ष्यामि, शृणु ॥४.१६॥
ननु, लोक-प्रसिद्धम् एव कर्म देहादि-व्यापार-आत्मकम्, अ-कर्म च तद्-अव्यापार-आत्मकम्, अतः कथम् उच्यते 'कवयः अपि अत्र मोहम् प्राप्ताः' ? इति तत्र आह – 'कर्मणः' इति –

4.17

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
अ-कर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥१७॥

कर्मणः हि अपि बोद्धव्यम्,	activity should be understood,
विकर्मणः च बोद्धव्यम्,	forbidden activity should be understood,
अ-कर्मणः च बोद्धव्यम्,	inactivity should be understood,
कर्मणः गतिः गहना ।	the way of *karma* is hard to understand

"The intricacies of action are very hard to understand. Therefore one should know properly what action is, what forbidden action is, and what inaction is."

कर्मणः **of activity** ⟨6.1⟩ n. *karman (karma)* – activity

हि **indeed** ⟨*avyaya*⟩

अपि **also** ⟨*avyaya*⟩

बोद्धव्यम् **to be understood** ⟨1.1⟩ n. *boddhavya* (√*budh[a]*...अवगमने – to understand, know; + *.[k]tavya*)

The implied word *gati* (way) is taken as the missing subject. But *boddhavyam* can also be taken as *bhāve prayoga* – 'the act of understanding should be done', and then there is no need of a subject.

बोद्धव्यम् **to be understood** ⟨1.1⟩ n. *boddhavya*

च **and** ⟨*avyaya*⟩

विकर्मणः **of forbidden activity** ⟨6.1⟩ n. *vikarman (-karma)* – forbidden activity

अ-कर्मणः **of inactivity** ⟨6.1⟩ n. *a-karman (-karma)* – inactivity

च **and** ⟨*avyaya*⟩

बोद्धव्यम् **to be understood** ⟨1.1⟩ n. *boddhavya*

गहना **hard to understand** ⟨1.1⟩ f. *gahanā (.ā[p])* – deep, dense, impenetrable, inexplicable

कर्मणः **of *karma*** ⟨6.1⟩ n. *karman (karma)* – activity

गतिः **the way** ⟨1.1⟩ f. *gati* – movement, goal

Subodhinī: कर्मणः (विहित-व्यापारस्य) अपि तत्त्वम् बोद्धव्यम् अस्ति, नतु लोक-सिद्ध-मात्रम् एव। अ-कर्मणः (अ-व्यापारस्य) अपि तत्त्वम् बोद्धव्यम् अस्ति। विकर्मणः अपि (निषिद्धस्य अपि) तत्त्वम् बोद्धव्यम् अस्ति, यतः कर्मणः गतिः गहना। 'कर्मणः' इति उपलक्षणार्थम्। कर्म-अकर्म-विकर्मणाम् तत्त्वम् दुर्विज्ञेयम् इति अर्थः ॥४.१७॥

तद् एव कर्मादीनाम् दुर्विज्ञेयत्वम् दर्शयन्, आह – 'कर्मणि अ-कर्म' इति –

4.18

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥१८॥

यः कर्मणि अ-कर्म पश्येत्	one who can see inactivity in activity
यः अ-कर्मणि कर्म च,	and who [can see] activity in inactivity,
सः मनुष्येषु बुद्धिमान्	he is intelligent amongst men
सः युक्तः, कृत्स्न-कर्म-कृत् ।	he is a *yogī*, [though] he does all work

"One who sees inaction in action, and action in inaction, is intelligent among men, and he is in the transcendental position, although engaged in all sorts of activities."

कर्मणि **in activity** ⟨7.1⟩ n. *karman (karma)* – activity

अ-कर्म **inactivity** ⟨2.1⟩ n. *a-karman (-karma)*

यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

पश्येत् **he should see** ⟨*vidhi* 1.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see

अ-कर्मणि **in inactivity** ⟨7.1⟩ n. *a-karman (-karma)*– inactivity

च **and** ⟨*avyaya*⟩

कर्म **activity** ⟨2.1⟩ n. *karman (karma)*

यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

बुद्धिमान् **who is intelligent** ⟨1.1⟩ m. *buddhimat (.mat[u])* – 'having *buddhi* (intelligence)'; intelligent

मनुष्येषु **among men** ⟨7.3⟩ m. *manuṣya* – human

सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

युक्तः **a *yogī*** ⟨1.1⟩ m. *yukta* (see 2.61)

कृत्स्न-कर्म-कृत् **who does all work** ⟨1.1⟩ m. *kṛtsna-karma-kṛt*...यः कृत्स्नम् कर्म करोति, सः कृत्स्न-कर्म-कृत्

Subodhinī: परमेश्वर-आराधन-लक्षणे कर्मणि विषये 'अ-कर्मङ्, कर्म इदम् न भवति इति यः पश्येत्, तस्य ज्ञान-हेतुत्वेन बन्धकत्व-अभावात्, अ-कर्मणि च (विहित-अकरणे) 'कर्म' यः पश्येत्, तस्य प्रत्यवाय-आपादकत्वेन बन्ध-हेतुत्वात्, मनुष्येषु (कर्म-कुर्वाणेषु) सः बुद्धिमान्, व्यवसायात्मिक-बुद्धिमत्त्वात् श्रेष्ठः। तम् स्तौति – सः युक्तः (योगी), तेन कर्मणा ज्ञानयोग-अवाप्तेः, सः एव कृत्स्न-कर्म-कर्ता च, 'सर्वतः सम्प्लुत-उदक'-स्थानीये (2.46) तस्मिन् कर्मणि सर्व-कर्म-फलानाम् अन्तः-भूतत्वात् तद् एवम् आरुरुक्षोः कर्म-योग-अधिकार-अवस्थायाम् 'न कर्मणाम् अनारम्भात्' (3.4) इत्यादिना उक्तः एव कर्म-योगः स्पुटी-कृतः। तद्-प्रपञ्च-रूपत्वात् च अस्य प्रकरणस्य न पौनः-उक्त्य-दोषः। अनेन एव, योग-आरूढ-अवस्थायाम् 'यः तु आत्म-रतिः एव स्यात्' (3.17) इत्यादिना, यः कर्म-अनुपयोगः उक्तः, तस्य अपि अर्थात् प्रपञ्चः कृतः वेदितव्यः। यदा आरुरुक्षोः अपि कर्म बन्धकम् न भवति, तदा आरूढस्य कुतः बन्धकम् स्यात्? इति अत्र अपि श्लोकः युज्यते – कर्मणि, देह-इन्द्रियादि-व्यापारे वर्तमाने अपि, आत्मनः देहादि-व्यतिरेक-अनुभवेन अ-कर्म (स्वाभाविकम् नैष्कर्म्यम्) इव यः पश्येत्, तथा अ-कर्मणि च, ज्ञान-रहिते दुःख-बुद्ध्या कर्मणाम् त्यागे, कर्म यः पश्येत्, तस्य प्रतिबन्धकत्वेन मिथ्या-आचारत्वात्। तद् उक्तम् 'कर्म-इन्द्रियाणि संयम्य यः आस्ते मनसा स्मरन्' (3.6) इति, यः एवम्-भूतः, सः तु सर्वेषु मनुष्येषु बुद्धिमान् पण्डितः। तत्र हेतुः – यतः कृत्स्नानि (सर्वाणि) यद्-ऋच्छया प्राप्तानि आहारादीनि कर्माणि कुर्वन् अपि, सः युक्तः एव, अकर्तृ-आत्म-ज्ञानेन समाधि-स्थः एव इति अर्थः। अनेन एव ज्ञानिनः स्व-भावात् आपन्नम् कलञ्ज-भक्षणादिकम् न दोषाय, अ-ज्ञस्य तु रागतः कृतम् दोषाय इति 'विकर्मणः' अपि तत्त्वम् निरूपितम् द्रष्टव्यम् ॥४.१८॥

'कर्मणि अ-कर्म यः पश्येत्' इति श्रुत्यर्थ-अर्थापत्तिभ्याम् यद् उक्तम् अर्थ-द्वयम्, तद् एव स्पष्टयति – 'यस्य' इत्यादि पञ्चभिः –

4.19

यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥१९॥

यस्य सर्वे समारम्भाः	he whose all endeavors
काम-सङ्कल्प-वर्जिताः,	are free from the desire for sense gratification,
बुधाः	the wise
तम् ज्ञानाग्नि-दग्ध-कर्माणम्	him whose *karma* is burned by the fire of knowledge
पण्डितम् आहुः ।	they call a learned man

"One is understood to be in full knowledge whose every endeavor is devoid of desire for sense gratification. He is said by sages to be a worker for whom the reactions of work have been burned up by the fire of perfect knowledge."

यस्य **he whose** ⟨6.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

सर्वे **all** ⟨1.3⟩ m. *kṛṣṇanāma sarva*

समारम्भाः **endeavors** ⟨1.3⟩ m. *samārambha* (from *sam.ā.√rabh[a]* – to begin) – undertaking, endeavor

काम-सङ्कल्प-वर्जिताः **free from the desire for sense gratification** ⟨1.3⟩ m. *kāma-saṅkalpa-varjita*...कामस्य सङ्कल्पेन वर्जितः काम-सङ्कल्प-वर्जितः
(from *√kṛp[ū]*...सामर्थ्ये – to be able): *kalpana* – forming, making; *kalpa* – creation, imagination, thought, desire; one day of Brahmā; (as in:) *kalpa-taru, kalpa-druma, kalpa-vṛkṣa* – desire tree
सङ्कल्प – desire, intention, determination; (as in:) *saṅkalpa-vikalpa* – (the two functions of the mind:) deciding and rejecting
वर्जित (*√vṛj[ī]*...वर्जने – to abandon; + *.[k]ta*) – abandoned

ज्ञानाग्नि-दग्ध-कर्माणम् **whose actions are burned by the fire of knowlege** ⟨2.1⟩ m. *jñāna-_agni-dagdha-karman* (*-karmā*)...ज्ञानस्य अग्निना दग्धानि कर्माणि यस्य, सः ज्ञानाग्नि-दग्ध-कर्मा
अग्नि – fire
दग्ध (*√dah[a]*...भस्मीकरणे – to burn to ashes; + *.[k]ta*) – burned to ashes; as in *agni-dagdha* (burned by fire); *dagdha-karman* (*karma*) refers here to a person 'whose *karma* is burned' and is declined like the masculine word *ātman* (*ātmā*)

तम् **him** ⟨2.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

आहुः **they spoke** ⟨*acyuta* opt. for *bruvanti* with a past sense 1.3⟩ *√brū[ñ]*...व्यक्तायां वाचि – to speak

पण्डितम् **a learned man** ⟨2.1⟩ m. *paṇḍita*

बुधाः **the wise** ⟨1.3⟩ m. *budha* – 'who is in knowledge'

Subodhinī: सम्यक् आरभ्यन्ते इति समारम्भाः (कर्माणि) । काम्यतः इति कामः (फलम्), तद्-सङ्कल्पेन वर्जिताः यस्य [समारम्भाः] भवन्ति, तम् पण्डितम् आहुः । तत्र हेतुः – यतः तैः समारम्भैः शुद्धे चित्ते सति, जातेन ज्ञान-अग्निना दग्धानि (अ-कर्मताम् नीतानि) कर्माणि यस्य तम् । आरूढ-अवस्थायाम् तु कामः फल-विषयः, 'तदर्थम् इदम् कर्म कर्तव्यम्' इति कर्म-विषयः सङ्कल्पः च, ताभ्याम् वर्जितः । शेषम् स्पष्टम् ॥४.१९॥

4.20

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तो ऽपि नैव किञ्चित्करोति सः ॥२०॥

कर्म-फलासङ्गम् त्यक्त्वा	[after] giving up attachment to the result of his activities
नित्य-तृप्तः निराश्रयः	ever satisfied and independent
कर्मणि अभिप्रवृत्तः अपि,	though fully engaged in work,
सः न एव किञ्चिद् करोति ।	he does not do anything

"Abandoning all attachment to the results of his activities, ever satisfied and independent, he performs no fruitive action, although engaged in all kinds of undertakings."

त्यक्त्वा **[after] abandoning** ⟨*avyaya*⟩ *√tyaj[a]*...हानौ – to abandon; + *.[k]tvā*

कर्म-फलासङ्गम् **attachment to the fruit of activity** ⟨2.1⟩ m. *karma-phala-_āsaṅga*...कर्मणः फले आसङ्गः इति कर्म-फलासङ्गः

नित्य-तृप्तः **who is ever satisfied** ⟨1.1⟩ m. *nitya-tṛpta* – always satisfied, without expectation
तृप्त (*√tṛp[a]*...प्रीणने – to please, be satisfied; + *.[k]ta*) – satisfied

निराश्रयः **who is without shelter** ⟨1.1⟩ m. *nirāśraya* (*nir.* + *āśraya*)

कर्मणि **in work** ⟨7.1⟩ n. *karman* (*karma*) – activity

अभिप्रवृत्तः **who is fully engaged** ⟨1.1⟩ m. *abhipravṛtta* (from *abhi.pra.√vṛt[u]* – to start to act; + *.[k]ta*)

अपि **also** ⟨*avyaya*⟩

न एव **never** ⟨*avyaya*⟩

किञ्चिद् **something** ⟨2.1⟩ n. *kṛṣṇanāma kim* (*kim*) + *.cid*

करोति **he does** ⟨*acyuta* 1.1⟩ *√[ḍu]kṛ[ñ]*...करणे – to do

सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

Subodhinī: कर्मणि तद्-फले च आसक्तिम् त्यक्त्वा, नित्येन निज-आनन्देन तृप्तः, अतएव योग-क्षेम-अर्थम् आश्रयणीय-रहितः, एवम्-भूतः यः स्वाभाविके विहिते च कर्मणि अभितः प्रवृत्तः अपि, किञ्चिद् अपि नैव करोति, तस्य कर्म अ-कर्मताम् आपद्यते इति अर्थः ॥४.२०॥

4.21

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥२१॥

निराशीः यत-चित्तात्मा	free from hankering and self-controlled
त्यक्त-सर्व-परिग्रहः	free from all proprietorship
केवलम् शारीरम् कर्म कुर्वन्	[while] working only for the bodily necessities
किल्बिषम् न आप्नोति ।	he does not incur sin

"Such a man of understanding acts with mind and intelligence perfectly controlled, gives up all sense of proprietorship over his possessions, and acts only for the bare necessities of life. Thus working, he is not affected by sinful reactions."

निराशीः **who has no expectation** ⟨1.1⟩ m. *nirāśiṣ* (*nirāśīḥ*) (from *nir.ā.√śās[u]* – to not desire) – no desire, hope, expectation

यत-चित्तात्मा **who is self-controlled** ⟨1.1⟩ m. *yata-citta-_ātman* (*-ātmā*)...यतौ चित्तम् च आत्मा च यस्य, सः यत-चित्तात्मा – 'whose mind and intelligence are controlled'
यत (√*yam[a]* 1P...उपरमे – to restrain; + *.[k]ta*) – restrained

त्यक्त-सर्व-परिग्रहः **who is free from all proprietorship** ⟨1.1⟩ m. *tyakta-sarva-parigraha*...त्यक्तः सर्वः परिग्रहः येन, सः त्यक्त-सर्व-परिग्रहः – 'by whom all proprietorship is given up'
परिग्रह (from *pari.√grah[a]* – to possess) – possession, proprietorship

शारीरम् **for bodily maintainance** ⟨2.1⟩ n. *śārīra* – related to the body, bodily; (or:) by the body [only], i.e. without desire

केवलम् **only** ⟨1.1⟩ n. *kevala* – exclusively, alone

कर्म **work** ⟨2.1⟩ n. *karman* (*karma*) – activity

कुर्वन् **[while] doing** ⟨1.1⟩ m. *kurvat* (√*[ḍu]kṛ[ñ]*...करणे – to do; + *.[ś]at[ṛ]*)

न **not** ⟨*avyaya*⟩

आप्नोति **he obtains** ⟨*acyuta* 1.1⟩ √*āp[ḷ]*...व्याप्तौ – to reach, obtain

किल्बिषम् **sin** ⟨2.1⟩ n. *kilbiṣa*

Subodhinī: निर्गताः आशिषः (कामनाः) यस्मात् । यतम् (नियतम्) चित्तम् आत्मा (शरीरम्) यस्य । त्यक्ताः सर्वे परिग्रहाः येन सः । शारीरम् (शरीर-मात्र-निर्वर्त्यम्), कर्तृत्व-अभिनिवेश-रहितम्, कर्म कुर्वन् अपि, किल्बिषम् (बन्धनम्) न प्राप्नोति । योग-आरूढ-पक्षे शरीर-निर्वाह-मात्र-उपयोगि स्वाभाविकम् भिक्षा-अटनादि कर्म कुर्वन् अपि, किल्बिषम् (विहित-अकरण-निमित्तम् दोषम्) न प्राप्नोति ॥४.२१॥

4.22

यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः ।
समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥२२॥

यदृच्छा-लाभ-सन्तुष्टः	one who is satisfied with whatever comes
द्वन्द्वातीतः विमत्सरः	free from duality (tolerant), non-envious
सिद्धौ अ-सिद्धौ च समः	and steady in success and failure
कृत्वा अपि	even [after] working
न निबध्यते ।	he is not bound

"He who is satisfied with gain which comes of its own accord, who is free from duality and does not envy, who is steady in both success and failure, is never entangled, although performing actions."

यदृच्छा-लाभ-सन्तुष्टः **who is satisfied with what comes by chance** ⟨1.1⟩ m. *yadṛcchā-lābha-santuṣṭa*...यदृच्छया लाभेन सन्तुष्टः इति यदृच्छा-लाभ-सन्तुष्टः
सन्तुष्ट (*sam.√tuṣ[a]* – to be completely satisfied; + *.[k]ta*) – satisfied

द्वन्द्वातीतः **who is free from duality** ⟨1.1⟩ m. *dvandva-_atīta*...द्वन्द्वम् अतीतः इति द्वन्द्वातीतः – who has transcended duality
द्वन्द्व – duality (of heat and cold, good and bad)
अतीत (*ati.√i[ṇ]* – to pass; + *.[k]ta*) – passed

विमत्सरः **who is not envious** ⟨1.1⟩ m. *vimatsara*
मत्सर – selfish, greedy, envious, hostile, wretched

समः **equal** ⟨1.1⟩ m. *sama* – same, without change

सिद्धौ **in success** ⟨7.1⟩ f. *siddhi* – success

अ-सिद्धौ **in failure** ⟨7.1⟩ f. *a-siddhi* – non-success, failure

च **and** ⟨*avyaya*⟩

कृत्वा **[after] doing** ⟨*avyaya*⟩ √*[ḍu]kṛ[ñ]*...करणे – to do; + *.[k]tvā*

अपि **also** ⟨*avyaya*⟩

न **not** ⟨*avyaya*⟩

निबध्यते **he is bound** ⟨*acyuta* pass. 1.1⟩ *ni.√bandh[a]* – to bind

Subodhinī: अप्रार्थित-उपस्थितः लाभः यद्-ऋच्छा-लाभः, तेन सन्तुष्टः । द्वन्द्वानि (शीत-उष्णादीनि) अतीतः (अतिक्रान्तः), तद्-सहन-शीलः इति अर्थः । विमत्सरः (निर्वैरः) । यद्-ऋच्छा-लाभस्य अपि सिद्धौ अ-सिद्धौ च समः (हर्ष-विषाद-रहितः), यः एवम्-भूतः, सः पूर्व-उत्तर-भूमिकयोः यथा-यथम् विहितम् स्वाभाविकम् वा कर्म कृत्वा अपि, न बन्धम् प्राप्नोति ॥४.२२॥

4.23

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥२३॥

गत-सङ्गस्य मुक्तस्य	of one who is free from attachment, liberated
ज्ञानावस्थित-चेतसः	situated in knowledge
यज्ञाय आचरतः,	and working for Yajña,
कर्म समग्रम् प्रविलीयते ।	*karma* completely dissolves

"The work of a man who is unattached to the modes of material nature and who is fully situated in transcendental knowledge merges entirely into transcendence."

गत-सङ्गस्य **of one who is free from attachment** ⟨6.1⟩ m. *gata-saṅga*...गतः सङ्गः यस्य, सः गत-सङ्गः – 'whose attachment is gone'

मुक्तस्य **of one who is liberated** ⟨6.1⟩ m. *mukta* (√*muc[l]*...मोक्षणे – to release; + *.[k]ta*) – released

ज्ञानावस्थित-चेतसः **of one whose mind is situated in knowledge** ⟨6.1⟩ m. *jñāna-_avasthita-cetas (-cetaḥ)*...ज्ञाने अवस्थितम् चेतः यस्य, सः ज्ञानावस्थित-चेतः – 'whose mind is established in knowledge'

यज्ञाय **for Yajña** ⟨4.1⟩ m. *yajña* – sacrifice, Yajña (a name of the Lord)

आचरतः **of one who is performing** ⟨6.1⟩ m. *ācarat* (*ā.*√*car[a]* – to behave, perform; + *.[ś]at[r]*) – [while] performing

कर्म **work** ⟨1.1⟩ n. *karman (karma)* – activity

समग्रम् **completely** ⟨*avyaya*⟩

प्रविलीयते **it dissolves** ⟨*acyuta* 1.1⟩ *pra.vi.*√*lī[ṅ]* – to dissolve

Subodhinī: गत-सङ्गस्य (निष्कामस्य), रागादिभिः मुक्तस्य । ज्ञाने अवस्थितम् चेतः यस्य तस्य, यज्ञाय (परमेश्वर-अर्थम्) कर्म आचरतः सतः, समग्रम् (स-वासनम्) कर्म प्रविलीयते (अ-कर्मभावम् आपद्यते) । आरूढ-योग-पक्षे 'यज्ञाय' इति यज्ञ-संरक्षणार्थम् (लोक-सङ्ग्रहार्थम्) एव कर्म कुर्वतः इति अर्थः ॥४.२३॥

तद् एवम् परमेश्वर-आराधन-लक्षणम् कर्म ज्ञान-हेतुत्वेन बन्धकत्व-अभावात् 'अ-कर्म' एव । आरूढ-अवस्थायाम् तु अकर्तृ-आत्म-ज्ञानेन बाधितत्वात् स्वाभाविकम् अपि कर्म 'अ-कर्म' एव इति 'कर्मणि अ-कर्म यः पश्येत्' (4.18) इति अनेन उक्तः कर्म-प्रविलयः प्रपञ्चितः । इदानीम्, कर्मणि तद्-अङ्गेषु च ब्रह्म एव अनुस्यूतम् पश्यतः, कर्म-प्रविलयम् आह – 'ब्रह्म अर्पणम्' इति –

4.24

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥२४॥

अर्पणम् ब्रह्म	the paraphernalia is spiritual
हविः ब्रह्म	the oblation is spiritual
ब्रह्मणा ब्रह्माग्नौ हुतम्,	and offered by the spirit into the spiritual fire,
तेन ब्रह्म-कर्म-समाधिना	by one [thus] absorbed in spiritual activities
ब्रह्म एव गन्तव्यम् ।	*brahma* alone is to be reached

"A person who is fully absorbed in Kṛṣṇa consciousness is sure to attain the spiritual kingdom because of his full contribution to spiritual activities, in which the consummation is absolute and that which is offered is of the same spiritual nature."

ब्रह्म **spiritual** ⟨1.1⟩ n. *brahman (brahma)* – spirit, soul, spiritual nature

अर्पणम् **the paraphernalia** ⟨1.1⟩ n. *arpaṇa* – offering; or 'that by which the act of offering is done'

ब्रह्म **spiritual** ⟨1.1⟩ n. *brahman (brahma)* – spirit, soul

हविः **the oblation** ⟨1.1⟩ n. *havis (haviḥ)* (from √*hu*...वह्नौ दाने – to offer in the fire, sacrifice) – oblation, like ghee or grains

(also from √*hu*...वह्नौ दाने): *homa* – an oblation; making an oblation

ब्रह्माग्नौ **in the spiritual fire** ⟨7.1⟩ m. *brahma-_agni*...ब्रह्मणः अग्निः इति ब्रह्माग्निः – 'the fire of *brahma*', the fire which is Brahman; or ब्रह्म एव अग्निः इति ब्रह्माग्निः – 'the fire which is *brahma*'

In the expression 'the fire of *brahma*', the word 'of' does not indicate possession, but identity, as in '*jīvasya svarūpam*' – the *svarūpa* of the *jīva*, or 'the city of Mathurā', which do not indicate that the *jīva* and its *svarūpa*, or 'city' and 'Mathurā' are different.

ब्रह्मणा **by the spiritual being** ⟨3.1⟩ n. *brahman (brahma)* – spirit, soul

हुतम् **which is offered** ⟨2.1⟩ n. *huta* (√*hu*...वह्नौ दाने – to offer in the fire, sacrifice; + *.[k]ta*) – offered in the fire

ब्रह्म **spiritual** ⟨1.1⟩ n. *brahman (brahma)* – spirit, soul

एव **certainly** ⟨*avyaya*⟩

तेन **by him** ⟨3.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

गन्तव्यम् **attained** ⟨1.1⟩ n. *gantavya* (√*gam[l]*...गतौ – to go; + *.tavya*) – 'to be reached'

ब्रह्म-कर्म-समाधिना **by one who is absorbed in spiritual activities** ⟨3.1⟩ m. *brahma-karma-samādhi*...ब्रह्म-कर्मणि समाधि यस्य, सः ब्रह्म-कर्म-समाधि – 'whose absorption is in *brahma-karma*'

Subodhinī: अर्प्यते अनेन इति अर्पणम् (स्रुवादि), तद् अपि ब्रह्म एव । अर्प्यमाणम् हविः अपि (घृतादिकम्) ब्रह्म एव । ब्रह्म एव अग्निः, तस्मिन् ब्रह्मणा (कर्त्रा) च हुतम् ब्रह्म एव, होमः अग्निः च कर्ता च क्रिया ब्रह्म एव इति अर्थः । एवम् ब्रह्मणि एव (कर्मात्मके) समाधिः (चित्त-एकाग्रयम्) यस्य, तेन ब्रह्म एव गन्तव्यम् (प्राप्यम्), नतु फल-अन्तरम् इति अर्थः ॥४.२४॥

एतद् एव, यज्ञत्वेन सम्पादितम्, सर्वत्र ब्रह्म-दर्शन-लक्षणम् ज्ञानम्, सर्व-यज्ञ-उपाय-प्राप्यत्वात्, सर्व-यज्ञेभ्यः श्रेष्ठम् इति एवम् स्तोतुम्, अधिकारि-भेदेन ज्ञान-उपाय-भूतान् बहून् यज्ञान् आह – 'दैवम्' इति अष्टभिः श्लोकैः –

4.25

दैवमेवापरे यज्ञं योगिनः पर्युपासते ।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥२५॥

अपरे योगिनः	other *yogīs* (*karma-yogīs*)
दैवम् यज्ञम् एव पर्युपासते,	perform sacrifice to the *devas*,
अपरे यज्ञेन एव	while others (*jñāna-yogīs*) by *yajña*
ब्रह्माग्नौ यज्ञम् उपजुह्वति ।	offer a sacrifice in the fire of Brahman

"Some yogīs perfectly worship the demigods by offering different sacrifices to them, and some of them offer sacrifices in the fire of the Supreme Brahman."

दैवम् **to the *devas*** ⟨2.1⟩ m. *daiva* – godly, the *devas*
एव **certainly** ⟨*avyaya*⟩
अ-परे **others** ⟨1.3⟩ m. *kṛṣnanāma a-para* – later, inferior, other
यज्ञम् **sacrifice** ⟨2.1⟩ m. *yajña*
daivam yajñam iti daiva-yajñaḥ – a sacrifice to the *devas*
योगिनः ***yogīs*** ⟨1.3⟩ m. *yogin* (*yogī*)
पर्युपासते **they perform** ⟨*acyuta* 1.3⟩ *pari.upa.√ās[a]* – to 'sit near', worship, perform
upa.√ās[a] – 'to sit near', be at hand for service, attend upon, worship; (derived:) *upāsanā* – worship
ब्रह्माग्नौ **in the fire of *brahma*** ⟨7.1⟩ m. *brahma-_agni* – 'the fire of *brahma*', the fire which is *brahma*
अपरे **others** ⟨1.3⟩ m. *kṛṣnanāma a-para* – later, inferior, other
यज्ञम् **sacrifice** ⟨2.1⟩ m. *yajña*
यज्ञेन **by means of sacrifice** ⟨3.1⟩ m. *yajña* – sacrifice
एव **certainly** ⟨*avyaya*⟩
उपजुह्वति **they offer in the fire** ⟨*acyuta* 1.3⟩ *upa.√hu* – to offer in the fire, sacrifice

Subodhinī: देवाः (इन्द्र-वरुणादयः) इज्यन्ते यस्मिन् । सः दैव-यज्ञः । । 'एव'-कारेण इन्द्रादिषु ब्रह्म-बुद्धि-रहित्यम् दर्शितम् । तम दैवम् एव यज्ञम् अपरे कर्म-योगिनः पर्युपासते (श्रद्धया अनुतिष्ठन्ति) । अपरे तु (ज्ञान-योगिनः) ब्रह्म-रूपे अग्नौ यज्ञेन एव उपाय-भूतेन 'ब्रह्म-अर्पणम्' (4.24) इति उक्त-प्रकारेण यज्ञम् उपजुह्वति । यज्ञादि-सर्व-कर्माणि प्रविलापयन्ति इति अर्थः । सः अयम् ज्ञान-यज्ञः ॥४.२५॥

4.26

श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति ।
शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति ॥२६॥

अन्ये	others (*brahmacārīs*)
श्रोत्रादीनि इन्द्रियाणि	the senses like hearing
संयमाग्निषु जुह्वति,	they offer in the fires of sense-control,
अन्ये	others (*gṛhasthas*)
शब्दादीन् विषयान्	the sense objects like sound
इन्द्रियाग्निषु जुह्वति ।	they offer all in the fires of the senses

"Some (the unadulterated brahmacārīs) sacrifice the hearing process and the senses in the fire of mental control, and others (the regulated householders) sacrifice the objects of the senses in the fire of the senses."

श्रोत्रादीनि **beginning with hearing** ⟨2.3⟩ n. *śrotra-_ādi*...श्रोत्रम् आदिः यस्य, सः श्रोत्रादिः – 'whose first is the ear (hearing)'
श्रोत्र (from √*śru*...श्रवणे – to hear, obey) – hearing; the ear
इन्द्रियाणि **the senses** ⟨2.3⟩ n. *indriya* – sense, sense organ
अन्ये **others** ⟨1.3⟩ m. *kṛṣnanāma anya* – other
संयमाग्निषु **in the fires of sense-control** ⟨7.3⟩ m. *saṁyama-_agni*...संयमस्य अग्निः इति संयमाग्निः – 'the fire of restraint'
The fire symbolizes sacrifice. To sacrifice some kind of personal sense gratification means to 'offer it' into a specific sacrificial fire.
जुह्वति **they offer in the fire** ⟨*acyuta* 1.3⟩ √*hu*...वह्नौ दाने – to offer in the fire, sacrifice
शब्दादीन् **beginning with sound** ⟨2.3⟩ m. *śabda-_ādi*
विषयान् **sense objects** ⟨2.3⟩ m. *viṣaya* – sense object
अन्ये **others** ⟨1.3⟩ m. *kṛṣnanāma anya* – other
इन्द्रियाग्निषु **in the fires of the senses** ⟨7.3⟩ m. *indriya-_agni*...इन्द्रियाणाम् अग्निः इति इन्द्रियाग्निः – 'fire of the senses'
जुह्वति **they offer in the fire** ⟨*acyuta* 1.3⟩ √*hu*...वह्नौ दाने – to offer in the fire, sacrifice

Subodhinī: अन्ये (नैष्ठिक-ब्रह्मचारिणः) तद्-तद्-इन्द्रिय-संयम-रूपेषु अग्निषु श्रोत्रादीनि जुह्वति (प्रविलापयन्ति) । इन्द्रियाणि निरुद्ध्य, संयम-प्रधानाः तिष्ठन्ति इति अर्थः । इन्द्रियाणि एव अग्नयः, तेषु शब्दादीन् अन्ये (गृहस्थाः) जुह्वति । विषय-भोग-समये अपि अनासक्ताः सन्तः, अग्नित्वेन भावितेषु इन्द्रियेषु हविष्ट्वेन भावितान् शब्दादीन् प्रक्षिपन्ति इति अर्थः ॥४.२६॥

Note: The *brahmacārīs* (celibate students) practice giving up all sense gratification, beginning

gṛhasthas (housholders) practice detachment by regulating their sense gratification according to the injunctions of the *Vedas*. "A *brāhmaṇa* refined by all the *saṁskāras* from birth to death, offers his activities into the working senses, which are illuminated by the fire of knowledge." (*SB.* 7.15.52)

4.27

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥२७॥

अपरे	others (*dhyāna-yogīs*)
सर्वाणि इन्द्रिय-कर्माणि	all sensory activities (like hearing)
प्राण-कर्माणि च	and the vital functions (like *prāṇa, apāṇa*)
ज्ञान-दीपिते आत्म-संयम-योगाग्नौ	in the fire of the *yoga* of self-control, kindled by knowledge
जुह्वति ।	they offer

"Others, who are interested in achieving self-realization through control of the mind and senses, offer the functions of all the senses, and of the life breath, as oblations into the fire of the controlled mind."

सर्वाणि **all** ⟨2.3⟩ n. *kṛṣnanāma sarva*

इन्द्रिय-कर्माणि **the activities of the senses** ⟨2.3⟩ n. *indriya-karman (-karma)*...इन्द्रियाणाम् कर्म इति इन्द्रिय-कर्म

प्राण-कर्माणि **the vital functions** ⟨2.3⟩ n. *prāṇa-karman (-karma)*...प्राणस्य कर्म इति प्राण-कर्म – vital activity (ten *prāṇas*)

च **and** ⟨*avyaya*⟩

अपरे **others** ⟨1.3⟩ m. *kṛṣṇanāma a-para* – later, inferior, other

आत्म-संयम-योगाग्नौ **in the fire of the *yoga* of self-control** ⟨7.1⟩ m. *ātma-saṁyama-yoga-_agni*...आत्मनः संयमः एव योगः तस्य अग्निः इति आत्म-संयम-योगाग्निः – 'the fire of the *yoga* of self-control'

जुह्वति **they offer in the fire** ⟨*acyuta* 1.3⟩ √*hu*...वह्नौ दाने – to offer in the fire, sacrifice

ज्ञान-दीपिते **in that which is kindled by knowledge** ⟨7.1⟩ m. *jñāna-dīpita*...ज्ञानेन दीपितः इति ज्ञान-दीपितः – kindled by knowledge

दीपित (same as *dīpta*) (√*dīp[ī]*...दीप्तौ – to shine, kindle; + *.[k]ta*) – kindled, blazing; (also from √*dīp[ī]*...दीप्तौ): *dīpa* – light, lamp

Subodhinī: अपरे (ध्यान-निष्ठाः) बुद्धि-इन्द्रियाणाम् (श्रोत्र-आदीनाम्) कर्माणि (श्रवण-दर्शनादीनि), कर्म-इन्द्रियाणाम् (वाक्-पाणि-आदीनाम्) कर्माणि (वचन-उपादानादीनि) च, प्राणानाम् च दशानाम् कर्माणि, 'प्राणस्य' बहिः-गमनम्,

'अपानस्य' अधः-नयनम्, 'व्यानस्य' व्यान-नयनम् आकुञ्चन-प्रसारणादि, 'समानस्य' अशित-पीतादीनाम् सम्यक् उन्नयनम् । 'उदानस्य' ऊर्ध्व-नयनम् ।
उद्गारे 'नागः' आख्यातः 'कूर्मः' उन्मीलने स्मृतः ।
'कृकरः' क्षुत-कृत् ज्ञेयः 'देवदत्तः' विजृम्भणे ।
न जहाति मृतम् च अपि सर्व-व्यापी 'धनञ्जयः' ॥
इति एवम्-रूपाणि जुह्वति । क्व ? आत्मनि संयमः (ध्यान-एकाग्रयम्) सः एव योगः सः एव अग्निः, तस्मिन् ज्ञानेन (ध्येय-विषयेण) दीपिते (प्रज्वलिते), ध्येयम् सम्यक् ज्ञात्वा, तस्मिन् मनः संयम्य, तानि सर्वाणि कर्माणि उपरमयन्ति इति अर्थः ॥४.२७॥

4.28

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥२८॥

तथा अपरे	and there are others
संशित-व्रताः यतयः	who endeavor, following strict vows
द्रव्य-यज्ञाः	who sacrifice through charity
तपोयज्ञाः	who sacrifice through austerity
योग-यज्ञाः	who sacrifice through *yoga*
स्वाध्याय-ज्ञान-यज्ञाः च ।	and who sacrifice through knowledge by study

"Having accepted strict vows, some become enlightened by sacrificing their possessions, and others by performing severe austerities, by practicing the yoga of eightfold mysticism, or by studying the Vedas to advance in transcendental knowledge."

द्रव्य-यज्ञाः **who sacrifice through charity** ⟨1.3⟩ m. *dravya-yajña*...द्रव्येण यज्ञः यस्य, सः द्रव्य-यज्ञः – 'whose sacrifice is by wealth'

द्रव्य – a substance, thing, object, the ingredient of anything; possession, wealth, goods, money

तपोयज्ञाः **who sacrifice through austerity** ⟨1.3⟩ m. *tapaḥ-_yajña*...तपः यज्ञः यस्य, सः तपोयज्ञः – 'whose sacrifice is austerity'

योग-यज्ञाः **who sacrifice through Yoga** ⟨1.3⟩ m. *yoga-yajña*...योगः यज्ञः यस्य, सः योग-यज्ञः – 'whose sacrifice is Yoga (mind control)'

तथा **and** ⟨*avyaya*⟩

अपरे **others** ⟨1.3⟩ m. *kṛṣṇanāma a-para* – later, inferior, other

स्वाध्याय-ज्ञान-यज्ञाः **who sacrifice through knowledge of the *Vedas*** ⟨1.3⟩ m. *svādhyāya-jñāna-yajña*...स्वाध्याय-ज्ञानेन यज्ञः यस्य, सः स्वाध्याय-ज्ञान-यज्ञः – 'whose sacrifice is through knowledge of the *Vedas*'

स्वाध्याय (*sva-_adhyāya*) – 'own study'; reciting sacred texts; esp. study of the *Vedas*

च **and** ⟨*avyaya*⟩

यतयः **those who endeavor** ⟨1.3⟩ m. *yati* (from *yat[ī]*...प्रयत्ने – to endeavor) – 'who endeavors', an ascetic, devotee

संशित-व्रताः **who have strict vows** ⟨1.3⟩ m. *saṁśita-vrata*...संशितानि व्रतानि यस्य, सः संशित-व्रतः – 'who has strict vows'

संशित (*sam.√śo* – to sharpen; + *.[k]ta*) – sharpened, ready, resolved, strict

व्रत – will, command; any resolve or practice, esp. a religious vow

Subodhinī: द्रव्य-दानम् एव यज्ञः येषाम्, ते द्रव्य-यज्ञाः । कृच्छ्र-चान्द्रायणादि-तपः एव यज्ञः येषाम्, ते तपोयज्ञाः । योगः (चित्तवृत्ति-निरोध-लक्षणः समाधिः), सः एव यज्ञः येषाम्, ते योग-यज्ञाः । स्वाध्यायेन (वेदेन श्रवण-मननादिना) यद् तद् अर्थ-ज्ञानम् तद् एव यज्ञः येषाम् ते । अथवा वेद-पाठ-यज्ञाः तद्-अर्थ-ज्ञान-यज्ञाः च इति द्विविधाः, यतयः (प्रयत्न-शीलाः), सम्यक् शितम् (निशितम्, तीक्ष्णी-कृतम्) व्रतम् येषाम्, ते [संशित-व्रताः] ॥४.२८॥

4.29

अपाने जुह्वति प्राणं प्राणे ऽपानं तथापरे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ।
अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ॥२९॥

अपरे प्राणायाम-परायणाः	others, dedicated to breath control
अपाने प्राणम् जुह्वति,	offer the exhalation into the inhalation,
तथा प्राणापान-गती रुद्ध्वा	and [after] stopping exhalation and inhalation
प्राणे अपानम्,	[offer] the inhalation into the exhalation,
नियताहाराः अपरे	others, regulating their eating
प्राणान् प्राणेषु जुह्वति ।	offer the *prāṇas* into the *prāṇas*

"Still others, who are inclined to the process of breath restraint to remain in trance, practice by offering the movement of the outgoing breath into the incoming, and the incoming breath into the outgoing, and thus at last remain in trance, stopping all breathing. Others, curtailing the eating process, offer the outgoing breath into itself as a sacrifice."

अपाने **in the inhalation** ⟨7.1⟩ m. *apāna* (from *apa.√an[a]* – to breath down) – 'the downward breath', inhalation

जुह्वति **they offer in the fire** ⟨*acyuta* 1.3⟩ *√hu*...वह्नौ दाने – to offer in the fire, sacrifice

प्राणम् **the exhalation** ⟨2.1⟩ m. *prāṇa* (from *pra.√an[a]* – to breath up) – 'the upward breath', exhalation

प्राणे **in the exhalation** ⟨7.1⟩ m. *prāṇa*

अपानम् **the inhalation** ⟨2.1⟩ m. *apāna*

तथा **also** ⟨*avyaya*⟩

अपरे **others** ⟨1.3⟩ m. *kṛṣṇanāma a-para* – later, inferior, other

प्राणापान-गती **the movements of *prāṇa* and *apāna*** ⟨2.2⟩ f. *prāṇa-_apāna-gati*...प्राणस्य च अपानस्य च गती इति प्राणापान-गती

रुद्ध्वा **[after] stopping** ⟨*avyaya*⟩ *√rudh[ir]*...आवरणे – to enclose, stop; + *.[k]tvā*

प्राणायाम-परायणाः **who are dedicated to breath control** ⟨1.3⟩ m. *prāṇāyāma-parāyaṇa*...प्राणायामः परायणम् यस्य, सः प्राणायाम-परायणः – 'who is dedicated to *prāṇāyāma*'

प्राणायाम (*prāṇa-_āyāma*) – breath expansion (in space and time), breath control

परायण (*para-ayana*) – 'supreme path', final refuge; *ayana* – going, path, course, refuge

अपरे **others** ⟨1.3⟩ m. *kṛṣṇanāma a-para* – later, inferior, other

नियताहाराः **whose eating is regulated** ⟨1.3⟩ m. *niyata-_āhāra*...नियतः आहारः यस्य, सः नियताहारः

नियत (*ni.√yam[a]* – to restrain; + *.[k]ta*) – restrained

आहार (*ā.√hṛ[ñ]* – to carry near) – taking (esp. food)

प्राणान् **the *prāṇas*** ⟨2.3⟩ m. *prāṇa* – vital air, sense

प्राणेषु **in the *prāṇas*** ⟨7.3⟩ m. *prāṇa*

जुह्वति **they offer in the fire** ⟨*acyuta* 1.3⟩ *√hu*...वह्नौ दाने – to offer in the fire, sacrifice

Subodhinī: अपाने (अधः-वृत्तौ) प्राणम् (ऊर्ध्व-वृत्तिम्) पूरकेण जुह्वति, पूरक-काले प्राणम् अपानेन एकी-कुर्वन्ति, तथा कुम्भकेन प्राण-अपानयोः ऊर्ध्व-अधः-गती रुद्ध्वा, रेचक-काले अपानम् प्राणे जुह्वति । एवम् पूरक-कुम्भक-रेचकैः प्राणायाम-परायणाः अपरे इति अर्थः । अपरे तु आहार-सङ्कोचम् अभ्यस्यन्तः, स्वयम् एव जीर्यमाणेषु इन्द्रियेषु तद्-तद्-इन्द्रिय-वृत्ति-लयम् होमम् भावयन्ति इति अर्थः । यद्वा – 'अपाने जुह्वति प्राणम् प्राणे अपानम् तथा अ-परे' इति अनेन पूरक-रेचकयोः आवर्त्यमानयोः 'हं-सः' 'सो ऽहं' इति अनुलोमतः प्रतिलोमतः च अभिव्यज्यमानेन अजपा-मन्त्रेण 'तद् त्वम्' पदार्थ-ऐक्यम् व्यतिहारेण भावयन्ति इति अर्थः । तद् उक्तम् योग-शास्त्रे –

'स'-कारेण बहिः याति 'ह'-कारेण विशेत् पुनः ।
प्राणः तत्र ?सः एव अहम्' 'हं-सः' इति अनुचिन्तयेत् ॥

इति । 'प्राण-अपान-गती रुद्ध्वा' इति अनेन तु श्लोकेन प्राणायाम-यज्ञाः अपरैः कथ्यन्ते । 'अपरे नियत-आहाराः' इति अत्र अयम् अर्थः –

द्वौ भागौ पूरयेत् अन्नैः तोयेन एकम् प्रपूरयेत् ।
मारुतस्य प्रचारार्थम् चतुर्थम् अवशेषयेत् ॥

इति एवम् आदि वचन-उक्तः नियतः आहारः येषाम्, ते कुम्भकेन प्राण-अपान-गती रुद्ध्वा, प्राणायाम-परायणाः सन्तः, प्राणान् (इन्द्रियाणि) प्राणेषु जुह्वति ।

कुम्भके हि सर्वे प्राणाः एकी-भवन्ति इति तत्र एव लीयमानेषु इन्द्रियेषु होमम् भावयन्ति इति अर्थः । तद् उक्तम् योग-शास्त्रे –

यथा यथा सदा अभ्यासात् मनसः स्थिरता भवेत् ।
वायु-वाक्-काय-दृष्टीनाम् स्थिरता च तथा तथा ॥

इति ॥४.२९॥

तद् एवम् उक्तानाम् द्वादशानाम् यज्ञ-विदाम् फलम् आह – 'सर्वे' इति –

4.30

सर्वे ऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ।
यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ॥३०॥

सर्वे अपि एते यज्ञ-विदः	and all these [twelve] who know sacrifice
यज्ञ-क्षपित-कल्मषाः,	are freed from sin by sacrifice,
यज्ञ-शिष्टामृत-भुजः	those who taste the nectar left after sacrifice
सनातनम् ब्रह्म यान्ति ।	reach the eternal spiritual abode

"All these performers who know the meaning of sacrifice become cleansed of sinful reactions, and, having tasted the nectar of the results of sacrifices, they advance toward the supreme eternal atmosphere."

सर्वे **all** ⟨1.3⟩ m. *kṛṣnanāma sarva*
अपि **also** ⟨*avyaya*⟩
एते **these** ⟨1.3⟩ m. *kṛṣnanāma etad* – (first person) he, this
यज्ञ-विदः **those who know sacrifice** ⟨1.3⟩ m. *yajña-vid* – 'who knows sacrifice'
यज्ञ-क्षपित-कल्मषाः **whose impurities are destroyed by sacrifice** ⟨1.3⟩ m. *yajña-kṣapita-kalmaṣa*...यज्ञेन क्षपितानि कल्मषाणि यस्य, सः यज्ञ-क्षपित-कल्मषः
क्षपित – diminished, destroyed
यज्ञ-शिष्टामृत-भुजः **those who taste the nectar left after sacrifice** ⟨1.3⟩ m. *yajña-śiṣṭa-_amṛta-bhuj (-bhuk)*...यः यज्ञ-शिष्टामृतम् भुङ्क्ते, सः यज्ञ-शिष्टामृत-भुक् – 'who eats the nectar left after sacrifice'
यज्ञ-शिष्ट – 'remnant of sacrifice', the grains left after a sacrifice; here it refers to the fruits of the many kinds of sacrifices mentioned above
Other words for 'nectar': *sudhā, pīyūṣa.*
यान्ति **they attain** ⟨*acyuta* 1.3⟩ √*yā*...प्राप्तौ – to attain, go
ब्रह्म **the spiritual abode** ⟨2.1⟩ n. *brahman (brahma)* – spirit, soul
सनातनम् **eternal** ⟨2.1⟩ n. *sanātana*

Subodhinī: यज्ञान् विन्दन्ति (लभन्ते) इति यज्ञ-विदः, यज्ञ-ज्ञाः इति वा । यज्ञैः क्षपितम् (नाशितम्) कल्मषम् यैः ते । यज्ञान् कृत्वा, अवशिष्टे काले अ-निषिद्धम् अन्नम्

अमृत-रूपम् भुञ्जते इति तथा ते सनातनम् (नित्यम्) ब्रह्म ज्ञान-द्वारेण प्राप्नुवन्ति ॥४.३०॥
तद्-अकरणे दोषम् आह – 'न अयम् लोकः' इति –

4.31

नायं लोको ऽस्त्ययज्ञस्य कुतो ऽन्यः कुरुसत्तम ॥३१॥

हे कुरु-सत्तम !	O Arjuna!
अ-यज्ञस्य	for one who does not perform sacrifice
न अयम् लोकः अस्ति,	is not even this world,
कुतः अन्यः ?	how then the other (heaven)?

"O best of the Kuru dynasty, without sacrifice one can never live happily on this planet or in this life: what then of the next?"

न **not** ⟨*avyaya*⟩
अयम् **this** ⟨1.1⟩ m. *kṛṣnanāma idam* – (first person) he, this
लोकः **world** ⟨1.1⟩ m. *loka* – place, world, people
अस्ति **it is** ⟨*acyuta* 1.1⟩ √*as[a]*...भुवि – to be, exist
अ-यज्ञस्य **of one who does not perform sacrifice** ⟨6.1⟩ m. *a-yajña* – who does not offer sacrifice
कुतः **how** ⟨*avyaya*⟩ (*kutas*; from *kim* + *.tas[i]*) – 'from where'
अन्यः **the other** ⟨1.1⟩ m. *kṛṣnanāma anya* – other
कुरु-सत्तम **O Arjuna!** ⟨8.1⟩ m. *kuru-sattama*...कुरूणाम् सत्तमः इति कुरु-सत्तमः – 'best of the Kurus'

Subodhinī: अयम् अल्प-सुखः अपि मनुष्य-लोकः अ-यज्ञस्य (यज्ञ-अनुष्ठान-शून्यस्य) न अस्ति, कुतः अन्यः (पर-लोकः) ? अतः यज्ञाः सर्वथा कर्तव्याः इति अर्थः ॥४.३१॥
ज्ञान-यज्ञम् स्तोतुम्, उक्तान् यज्ञान् उपसंहरति – 'एवम्' इति –

Note: Even in this material world (or this life) one has to perform sacrifice to become happy. And to attain heaven, where there is a much higher standard of happiness, one certainly has to perform sacrifice in this world (or life).

4.32

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।
कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥३२॥

एवम् बहु-विधाः यज्ञाः	thus the many types of sacrifices

ब्रह्मणः मुखे विततः,	are prescribed by means of the *Veda*,
तान् सर्वान् कर्म-जान् विद्धि !	know all these to be born from work!
एवम् ज्ञात्वा	and [after] knowing them as such
विमोक्ष्यसे ।	you will be liberated

"All these different types of sacrifice are approved by the Vedas, and all of them are born of different types of work. Knowing them as such, you will become liberated."

एवम् **thus** ⟨*avyaya*⟩
बहु-विधाः **which are of many kinds** ⟨1.3⟩ m. *bahu-vidha* – many kinds, manyfold
यज्ञाः **sacrifices** ⟨1.3⟩ m. *yajña* – sacrifice
विततः **which are spread** ⟨1.3⟩ m. *vitata* (*vi.√tan[u]* – to spread; + *.[k]ta*) – spread
ब्रह्मणः **of the *Veda*** ⟨6.1⟩ m. *brahman* (*brahma*) – spirit, soul; *Veda*
मुखे **by means** ⟨*avyaya*⟩ from *mukha* – mouth, face; a direction; opening; the fore part, front of anything; the upper part, head of anything; the principel, best; beginning, source, cause; *mukhe* is here explained as *mukhena* – by means
कर्म-जान् **which are born from work** ⟨2.3⟩ m. *karma-ja* – born from activity
विद्धि **you must know** ⟨*vidhātā* 2.1⟩ √*vid[a]* 2P...ज्ञाने – to know
तान् **them** ⟨2.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that
सर्वान् **all** ⟨2.3⟩ m. *kṛṣṇanāma sarva*
ज्ञात्वा **[after] knowing** ⟨*avyaya*⟩ √*jñā* 9P...अवबोधने – to know; + *.[k]tvā*
विमोक्ष्यसे **you will be released** ⟨*kalki* pass. 2.1⟩ *vi.√muc[ḷ]* – to release

Subodhinī: [यज्ञाः] ब्रह्मणः (वेदस्य) मुखे विततः, वेदेन साक्षात् विहिताः इति अर्थः । तथापि तान् सर्वान् वाक्-मनः-काय-कर्म-जनितान् आत्म-स्वरूप-संस्पर्श-रहितान् विद्धि (जानीहि), आत्मनः कर्म-अगोचरत्वात् । एवम् ज्ञात्वा ज्ञान-निष्ठः सन्, संसारात् विमुक्तः भविष्यसि ॥४.३२॥
कर्म-यज्ञात् ज्ञान-यज्ञः तु श्रेष्ठः इति आह – 'श्रेयान्' इति –

4.33

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥३३॥

हे परन्तप !	O Arjuna!
द्रव्यमयात् यज्ञात्	than the sacrifice with materials
ज्ञान-यज्ञः श्रेयान्,	the sacrifice through knowledge is better,
हे पार्थ !	O Arjuna!
सर्वम् अ-खिलम् कर्म	the whole complete *karma*
ज्ञाने परिसमाप्यते ।	is completed in knowledge

"O chastiser of the enemy, the sacrifice performed in knowledge is better than the mere sacrifice of material possessions. After all, O son of Pṛthā, all sacrifices of work culminate in transcendental knowledge."

श्रेयान् **better** ⟨1.1⟩ m. *śreyas* (*śreyaḥ*) – better, benefit
द्रव्यमयात् **consisting of materials** ⟨5.1⟩ m. *dravyamaya*
यज्ञात् **than sacrifice** ⟨5.1⟩ m. *yajña* – sacrifice
ज्ञान-यज्ञः **the sacrifice through knowledge** ⟨1.1⟩ m. *jñāna-yajña*...ज्ञानेन यज्ञः इति ज्ञान-यज्ञः – sacrifice through knowledge
परन्तप **O Arjuna!** ⟨8.1⟩ m. *param-_tapa* – 'who scorches the enemies'
सर्वम् **all** ⟨1.1⟩ n. *kṛṣnanāma sarva* – all
कर्म **activity** ⟨1.1⟩ n. *karman* (*karma*)
अ-खिलम् **complete** ⟨1.1⟩ n. *a-khila* – 'without a gap', complete, whole
खिल – the bare soil between cultivated fields, a gap not filled up
पार्थ **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
ज्ञाने **in knowledge** ⟨7.1⟩ n. *jñāna* – knowledge
परिसमाप्यते **it is completed** ⟨*acyuta* pass. 1.1⟩ *pari.sam.√āp[ḷ]* – to reach, obtain

Subodhinī: द्रव्य-मयात् अनात्म-व्यापार-जन्यात् दैवादि-यज्ञात् ज्ञान-यज्ञः श्रेयान् (श्रेष्ठः) । यद्यपि ज्ञान-यज्ञस्य अपि मनः-व्यापार-अधीनत्वम् अस्ति एव, तथापि आत्म-स्वरूपस्य ज्ञानस्य मनः-परिणामे अभिव्यक्ति-मात्रम्, नतु तद्-जन्यत्वम् इति द्रव्यमयात् विशेषः । श्रेष्ठत्वे हेतुः – सर्वम् कर्म अ-खिलम् फल-सहितम् ज्ञाने परिसमाप्यते । अन्तः भवति इति अर्थः । 'सर्वम् तद् अभिसमेति, यद् किञ्चिद् प्रजाः साधु कुर्वन्ति' (*Chāndogya-Up.* 4.1.4) इति श्रुतेः ॥४.३३॥
एवम्भूत-आत्मज्ञाने साधनम् आह – 'तद् विद्धि' इति –

4.34

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥३४॥

प्रणिपातेन परिप्रश्नेन सेवया	by submission, inquiry and service
तद् विद्धि !	you must understand that (knowledge)!
तत्त्व-दर्शिनः ज्ञानिनः	the wise who know the truth
ते (तुभ्यम्) उपदेक्ष्यन्ति	will teach you

"Just try to learn the truth by approaching a spiritual master. Inquire from him submissively and render service unto him. The self-realized souls can impart knowledge unto you because they have seen the truth."

तद् **that** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that

विद्धि **you must know** ⟨*vidhātā* 2.1⟩ √*vid[a]* 2P...ज्ञाने – to know

प्रणिपातेन **by submission** ⟨3.1⟩ m. *praṇipāta* (*pra.ni.*√*pat[l]* – to completely fall down) – 'falling down', bowing down, submission

परिप्रश्नेन **by enquiry** ⟨3.1⟩ m. *paripraśna* (from *pari.*√*pracch[a]* – to ask) (same as *praśna*) – question; point of issue

सेवया **by service** ⟨3.1⟩ f. *sevā* – service

उपदेक्ष्यन्ति **they will instruct** ⟨*kalki* 1.3⟩ *upa.*√*diś[a]* – to instruct

ते **to you** ⟨opt. for *tubhyam* 4.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

ज्ञानम् **knowledge** ⟨2.1⟩ n. *jñāna*

ज्ञानिनः **the wise** ⟨1.3⟩ m. *jñānin* (*jñānī*) – who has knowledge

तत्त्व-दर्शिनः **who know the truth** ⟨1.3⟩ m. *tattva-darśin* (*-darśī*) – 'who sees the truth'

Subodhinī: तद् ज्ञानम् विद्धि (प्राप्नुहि) । ज्ञानिनाम् प्रणिपातेन (दण्डवत्-नमस्कारेण), ततः परिप्रश्नेन, 'कुतः अयम् मम संसारः ? कथम् वा निवर्तते ?' इति प्रश्नेन, सेवया (शुश्रूषया) च, ज्ञानिनः (शास्त्र-ज्ञाः) तत्त्व-दर्शिनः (अपरोक्ष-अनुभव-सम्पन्नाः) च ते (तुभ्यम्) ज्ञानम् उपदेशेन सम्पादयिष्यन्ति ॥४.३४॥ ज्ञान-फलम् आह – 'यद् ज्ञात्वा' इति सार्धैः त्रिभिः

4.35

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।
येन भूतान्यशेषाणि द्रक्ष्यस्यात्मन्यथो मयि ॥३५॥

हे पाण्डव	O Arjuna!
यद् ज्ञात्वा	[after] knowing that (knowledge)
पुनः एवम् मोहम् न यास्यसि,	you will not again attain such illusion,
येन अ-शेषाणि भूतानि	that by which all beings
आत्मनि द्रक्ष्यसि,	you will see in the self,
अथो मयि ।	then in Me

"Having obtained real knowledge from a self-realized soul, you will never fall again into such illusion, for by this knowledge you will see that all living beings are but part of the Supreme, or, in other words, that they are Mine."

यद् **that which** ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which

ज्ञात्वा **[after] knowing** ⟨*avyaya*⟩ √*jñā* 9P...अवबोधने – to know; + *.[k]tvā*

न **not** ⟨*avyaya*⟩

पुनः **again** ⟨*avyaya*⟩ (*punar*)

मोहम् **illusion** ⟨2.1⟩ m. *moha*

एवम् **thus** ⟨*avyaya*⟩

यास्यसि **you will attain** ⟨*kalki* 2.1⟩ √*yā*...प्राप्तौ – to attain, go

पाण्डव **O Arjuna!** ⟨8.1⟩ m. *pāṇḍava* – 'son of Pāṇḍu'

येन **that by which** ⟨3.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

भूतानि **beings** ⟨2.3⟩ n. *bhūta* (√*bhū*...सत्तायाम् – to be, exist, become; + *.[k]ta*) – past; an element, being, creature

अशेषाणि **all** ⟨2.3⟩ n. *a-śeṣa* – 'without remainder', completely

द्रक्ष्यसि **you will see** ⟨*kalki* 2.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see

आत्मनि **in the soul** ⟨7.1⟩ m. *ātman* (*ātmā*) – the self, soul

अथो **therefore** ⟨*avyaya*⟩ (same as *atha*) – now, next, likewise, therefore

मयि **in me** ⟨7.1⟩ *kṛṣṇanāma asmad* – (last person) I

Subodhinī: यद् ज्ञानम् ज्ञात्वा (प्राप्य), पुनः बन्धुवधादि-निमित्तम् मोहम् न प्राप्स्यसि । तत्र हेतुः – येन (ज्ञानेन) भूतानि (पितृ-पुत्रादीनि, स्व-अविद्या-रचितानि) स्व-आत्मनि एव अ-भेदेन द्रक्ष्यसि । अथः अनन्तरम् आत्मानम् मयि (परमात्मनि) अ-भेदेन द्रक्ष्यसि इति अर्थः ॥४.३५॥

Note: There are some philosophers who like the idea of becoming one with God, or merging into the Supreme, and want to support it with the famous *Bhagavad-gītā*. They stress the fact that the individual soul is qualitatively similar to the Supersoul, namely conscious, but forget that the *ātmā* is very small (*anu*) and prone to be bewildered by the external energy (*māyā*), whereas the Paramātmā is the greatest soul (*vibhu*) and never under illusion. The *ātmā* can not become God. अन्तर्यामिणः अ-सङ्गत्वादिभिः गुणैः जीव-वैलक्षण्येन देह-अन्तः-वर्तित्वस्य प्रसिद्धत्वात् । (*Subodhinī* 8.4) 'Oneness' of *ātmā* and Paramātmā therefore refers either to 'similarity in nature', or to 'intimacy'.

An example for similarity is in the present verse:

(4.35) – भूतानि आत्मनि द्रक्ष्यसि – "You will see all beings in the *ātmā*." How? By appearance (*upādhitvena*), seeing the similarity of nature (*sāmyam*), which is consciousness. भूतानि मयि द्रक्ष्यसि – "You will see all beings in Me, the Supersoul, as My parts and parcels. In other words, they are Mine. Then you will not fall again into such illusion, thinking you will kill 'your' relatives."

The following three are examples for intimacy:

(11.54) – अनन्यया भक्त्या तु अहम् एवंविधः तत्त्वेन ज्ञातुम् द्रष्टुम् च प्रवेष्टुम् च शक्यः – "Only by unalloyed devotion can I be truly known, seen and entered into."

(5.17) – तस्मिन् आत्मा यस्य, सः तदात्मा – Whose heart/soul is in that, who is absorbed in that, he is *tad-ātmā*; not that he 'is that'. Just like, तस्मिन् बुद्धिः यस्य, सः तद्-बुद्धिः – Whose intelligence is in that, he is *tad-buddhi*. तस्मिन् निष्ठा यस्य, सः तन्निष्ठः – Whose faith is in that, he is *tan-niṣṭha*.

(*SB.* 1.15.19) – When Arjuna remembered his friend Śrī Kṛṣṇa, after the latter left this planet, he also speaks about 'oneness' (*aikya*) – "Generally both of us used to live together and sleep, sit and loiter together. And at the time of advertising oneself for acts of chivalry, sometimes, if there were any irregularity, because of 'oneness' (*aikya*), I used to reproach Him by saying, 'My friend, You are very truthful.'" He

obviously speaks about his friendship with another individual person, and not that he became one with Kṛṣṇa at any time.

See also the notes under verses 7.24, 13.13 and 14.27, where Kṛṣṇa describes that the Brahman only seems to be primeval, that *brahma* is *mat-para*, and *brahmaṇo hi pratiṣṭhāham*.

4.36

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ॥३६॥

अपि चेद् सर्वेभ्यः पापेभ्यः	even if, among all sinners
पाप-कृत्तमः असि,	you are the greatest sinner,
ज्ञान-प्लवेन एव	with the boat of knowledge alone
सर्वम् वृजिनम् सन्तरिष्यसि ।	you will cross all misery

"Even if you are considered to be the most sinful of all sinners, when you are situated in the boat of transcendental knowledge you will be able to cross over the ocean of miseries."

अपि **also** ⟨*avyaya*⟩
चेद् **if** ⟨*avyaya*⟩
असि **you are** ⟨*acyuta* 2.1⟩ √*as[a]*...भुवि – to be, exist
पापेभ्यः **among sinners** ⟨5.3⟩ m. *pāpa* – sinner
सर्वेभ्यः **among all** ⟨5.3⟩ m. *kṛṣṇanāma sarva* – all
पाप-कृत्तमः **the greatest sinner** ⟨1.1⟩ m. *pāpa-kṛttama* (*.tama*) – greatest sinner
सर्वम् **all** ⟨2.1⟩ n. *kṛṣṇanāma sarva*
ज्ञान-प्लवेन **with the boat of knowledge** ⟨3.1⟩ m. *jñāna-plava*...ज्ञानस्य प्लवः इति ज्ञान-प्लवः – 'boat of knowledge'
एव **certainly** ⟨*avyaya*⟩
वृजिनम् **misery** ⟨2.1⟩ n. *vṛjina* – bent, crooked (lit. and fig.); sin, wickedness; misery
सन्तरिष्यसि **you will cross** ⟨*kalki* 2.1⟩ *sam.*√*tṝ* – to cross

Subodhinī: सर्वेभ्यः पाप-कारिभ्यः यद्यपि अतिशयेन पाप-कारी त्वम् असि, तथापि सर्वम् पाप-समुद्रम् ज्ञान-पोतेन एव सम्यक् (अनायासेन) तरिष्यसि ॥४.३६॥
'समुद्रवत्-स्थितस्य एव पापस्य अतिलङ्घन-मात्रम् नतु पापस्य नाशः !' इति भ्रान्तिम् दृष्टान्तेन वारयन्, आह – 'यथा' इति –

4.37

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥३७॥

हे अर्जुन !	O Arjuna!
यथा समिद्धः अग्निः	as a blazing fire
एधांसि भस्मसात् कुरुते,	burns firewood to ashes,
तथा ज्ञानाग्निः	so does the fire of knowledge
सर्व-कर्माणि भस्मसात् कुरुते ।	burn to ashes all *karma*

"As a blazing fire turns firewood to ashes, O Arjuna, so does the fire of knowledge burn to ashes all reactions to material activities."

यथा **as** ⟨*avyaya*⟩
एधांसि **firewood** ⟨2.3⟩ n. *edhas* (*edhaḥ*) – fuel, fire wood
समिद्धः **a blazing** ⟨1.1⟩ m. *samiddha* (*sam.*√*[ñi]indh[ī]* – to shine, kindle; + *.[k]ta*) – kindled
अग्निः **fire** ⟨1.1⟩ m. *agni*
भस्मसात् **into ashes** ⟨*avyaya*⟩ from *bhasman*
भस्मन् (*bhasma*) – chewing, consuming, pulverizing; ashes
कुरुते **it does** ⟨*acyuta* 1.1⟩ √*[ḍu]kṛ[ñ]*...करणे – to do
अर्जुन **O Arjuna!** ⟨8.1⟩ m. *arjuna* – white, 'who is pure in actions'
ज्ञानाग्निः **the fire of knowledge** ⟨1.1⟩ m. *jñāna-_agni*...ज्ञानस्य अग्निः इति ज्ञानाग्निः
सर्व-कर्माणि **all *karma*** ⟨2.3⟩ n. *sarva-karman* (*-karma*) – all activity or *karma*
भस्मसात् **into ashes** ⟨*avyaya*⟩
कुरुते **it does** ⟨*acyuta* 1.1⟩ √*[ḍu]kṛ[ñ]*...करणे – to do
तथा **so** ⟨*avyaya*⟩

Subodhinī: एधांसि (काष्ठानि) प्रदीप्तः अग्निः यथा भस्मी-भावम् नयति, तथा आत्मज्ञान-रूपः अग्निः प्रारब्ध-कर्म-व्यतिरिक्तानि सर्वाणि कर्माणि भस्मी-करोति इति अर्थः ॥४.३७॥
तत्र हेतुम् आह – 'न हि' इति –

4.38

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥३८॥

ज्ञानेन सदृशम् पवित्रम्	as purifying as knowledge
इह न हि विद्यते,	there is nothing in this world,
योग-संसिद्धः	one who is perfected in *yoga*
कालेन	in due course of time
तद् स्वयम् आत्मनि विन्दति	he obtains that [knowledge] within himself

"In this world, there is nothing so sublime and pure as transcendental knowledge. Such knowledge is the mature fruit of all mysticism. And one who has become accomplished in the practice of devotional service enjoys this knowledge within himself in due course of time."

न हि **not at all** ⟨*avyaya*⟩
ज्ञानेन **like knowledge** ⟨3.1⟩ n. *jñāna* – knowledge
सदृशम् **similar** ⟨1.1⟩ n. *sa-dṛśa*
पवित्रम् **purifying** ⟨1.1⟩ n. *pavitra* – purifying, pure
इह **here** ⟨*avyaya*⟩
विद्यते **it exists** ⟨*acyuta* 1.1⟩ √*vid[a]* 4A...सत्तायाम् – to be, exist
तद् **that** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
स्वयम् **itself** ⟨*avyaya*⟩
योग-संसिद्धः **who is perfected in Yoga** ⟨1.1⟩ m. *yoga-saṁsiddha*...योगे संसिद्धः इति योग-संसिद्धः
संसिद्ध (*sam.*√*sidh[u]* 4P – to succeed; + *.[k]ta*) – succeeded
कालेन **by time** ⟨3.1⟩ m. *kāla* – time
आत्मनि **in the self** ⟨7.1⟩ m. *ātman* (*ātmā*) – the self, soul
विन्दति **he obtains** ⟨*acyuta* 1.1⟩ √*vid[!]*...लाभे – to obtain

Subodhinī: पवित्रम् (शुद्धि-करम्) इह तपस्-योग-आदिषु मध्ये ज्ञान-तुल्यम् न अस्ति एव। 'तर्हि सर्वे अपि आत्म-ज्ञानम् एव किम् न अभस्यन्ति ?' इति अतः आह – 'तद् स्वयम्' इति सार्धेन। तद् आत्मनि विषये ज्ञानम् कालेन (महता कर्म-योगेन) संसिद्धः (योग्यताम् प्राप्तः) सन्, स्वयम् एव अनायासेन लभते, नतु कर्म-योगम् विना इति अर्थः ॥४.३८॥

4.39

श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥३९॥

तत्परः संयतेन्द्रियः	being dedicated and sense-controlled
श्रद्धावान् ज्ञानम् लभते,	a faithful man obtains knowledge,
ज्ञानम् लब्ध्वा	and [after] obtaining such knowledge
अचिरेण पराम् शान्तिम् अधिगच्छति ।	quickly he attains supreme peace

"A faithful man who is dedicated to transcendental knowledge and who subdues his senses is eligible to achieve such knowledge, and having achieved it he quickly attains the supreme spiritual peace."

श्रद्धावान् **who is faithful** ⟨1.1⟩ n. *śraddhāvat* (*.vat[u]*) – 'having *śraddhā* (faith)'; faithful
लभते **he obtains** ⟨*acyuta* 1.1⟩ √*[ḍu]labh[aṣ]*...प्राप्तौ – to obtain

ज्ञानम् **knowledge** ⟨2.1⟩ n. *jñāna*
तत्परः **who is dedicated** ⟨1.1⟩ m. *tad-_para*...तद् परः यस्य, सः तत्परम् – 'whose supreme [shelter or master] is that', subordinate or devoted to that
संयतेन्द्रियः **whose senses are controlled** ⟨1.1⟩ m. *saṁyata-_indriya*...संयतानि इन्द्रियाणि यस्य, सः संयतेन्द्रियः
संयत (*sam.*√*yam[a]* – to restrain; + *.[k]ta*) – restrained
ज्ञानम् **knowledge** ⟨2.1⟩ n. *jñāna*
लब्ध्वा **[after] obtaining** ⟨*avyaya*⟩ √*[ḍu]labh[aṣ]*...प्राप्तौ – to obtain; + *.[k]tvā*
पराम् **supreme** ⟨2.1⟩ f. *parā* (*.ā[p]*) – beyond
शान्तिम् **peace** ⟨2.1⟩ f. *śānti* – peace of mind
अ-चिरेण **quickly** ⟨*avyaya*⟩ from *a-cira* – before long, without delay, soon
चिर – long (time), delay
अधिगच्छति **he attains** ⟨*acyuta* 1.1⟩ *adhi.*√*gam[!]* – to go over, attain

Subodhinī: श्रद्धावान् (गुरु-उपदिष्टे अर्थे आस्तिक्य-बुद्धिमान्), तद्-परः (तद्-एक-निष्ठः), संयत-इन्द्रियः च तद्-ज्ञानम् लभते, न अन्यः। अतः श्रद्धादि-सम्पत्त्या ज्ञान-लाभात् प्राक्, कर्म-योगः एव शुद्धि-अर्थम् अनुष्ठेयः। ज्ञान-लाभ-अनन्तरम् तु न तस्य किञ्चिद् कृत्यम् अस्ति इति आह – ज्ञानम् लब्ध्वा तु अ-चिरेण पराम् शान्तिम् (मोक्षम्) प्राप्नोति ॥४.३९॥
ज्ञान-अधिकारिणम् उक्त्वा, तद्-विपरीतम् अनधिकारिणम् आह – 'अज्ञः च' इति –

4.40

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोको ऽस्ति न परो न सुखं संशयात्मनः ॥४०॥

अ-ज्ञः च अ-श्रद्दधानः च	being ignorant and faithless
संशयात्मा विनश्यति,	one who is doubtful is lost,
संशयात्मनः अयम् लोकः न अस्ति,	for a doubtful man is neither this world,
न परः न सुखम् ।	nor the next, nor happiness

"But ignorant and faithless persons who doubt the revealed scriptures do not attain God consciousness; they fall down. For the doubting soul there is happiness neither in this world nor in the next."

अ-ज्ञः **who is ignorant** ⟨1.1⟩ m. *a-jña*...यः न जानाति, सः अ-ज्ञः – who does not know
च **and** ⟨*avyaya*⟩
अ-श्रद्दधानः **who is faithless** ⟨1.1⟩ m. *a-śraddadhāna* – [while] not having faith
श्रद्दधान (*śrad.*√*[ḍu]dhā[ñ]* + *.[ś]āna*) – '[while] putting *śrad* (the heart)', having faith

च **and** ⟨*avyaya*⟩

संशयात्मा **who is doubtful** ⟨1.1⟩ m. *saṁśaya-_ātman* (*-ātmā*)

संशय (from *sam.√śī[ṅ]* – to sleep, lie down) – irresolution, hesitation, doubt; (also from *√śī[ṅ]*...स्वप्ने – to sleep, lie down:) *śāyin* (*śāyī*) – who is resting, as in *śeṣa-śāyī* (Viṣṇu, resting on Śeṣa-nāga)

विनश्यति **he is lost** ⟨*acyuta* 1.1⟩ *vi.√naś[a]* – to perish

न **not** ⟨*avyaya*⟩

अयम् **this** ⟨1.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this

लोकः **world** ⟨1.1⟩ m. *loka* – place, world, people

अस्ति **it is** ⟨*acyuta* 1.1⟩ *√as[a]*...भुवि – to be, exist

न **not** ⟨*avyaya*⟩

परः **the other** ⟨1.1⟩ m. *para* – beyond

न **not** ⟨*avyaya*⟩

सुखम् **happiness** ⟨1.1⟩ n. *sukha* – easiness, happiness

संशयात्मनः **of one who is doubtful** ⟨6.1⟩ m. *saṁśaya-_ātman* (*-ātmā*) – 'whose mind is doubtful', a sceptic

Subodhinī: अज्ञः (गुरु-उपदिष्टार्थ-अनभिज्ञः), कथञ्चिद् ज्ञाने जाते अपि अ-श्रद्दधानः च, जातायाम् अपि श्रद्धायाम् 'मम इदम् सिद्ध्येत् वा न वा' इति संशय-आक्रान्त-चित्तः च नश्यति, स्व-अर्थात् भ्रश्यति । एतेषु त्रिषु अपि संशयात्मा सर्वथा नश्यति, यतः तस्य अयम् लोकः न अस्ति, धन-अर्जन-विवाहादि-असिद्धेः । नच पर-लोकः, धर्मस्य अ-निष्पत्तेः । नच सुखम्, संशयेन एव भोगस्य अपि अ-सम्भवात् ॥४.४०॥

अध्याय-द्वय-उक्ताम् पूर्व-अपर-भूमिका-भेदेन कर्म-ज्ञान-मयीम् द्विविधाम् ब्रह्म-निष्ठाम् उपसंहरति – 'योग' इति द्वाभ्याम् –

4.41

योगसन्न्यस्तकर्माणं ज्ञानसञ्छिन्नसंशयम् ।
आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय ॥४१॥

हे धनञ्जय !	O Arjuna!
योग-सन्न्यस्त-कर्माणम्	who has renounced work by *yoga*
ज्ञान-सञ्छिन्न-संशयम्	whose doubt is destroyed by knowledge
आत्मवन्तम्	and who is situated in the self
कर्माणि न निबध्नन्ति ।	activities do not bind [him]

"One who acts in devotional service, renouncing the fruits of his actions, and whose doubts have been destroyed by transcendental knowledge, is situated factually in the self. Thus he is not bound by the reactions of work, O conqueror of riches."

योग-सन्न्यस्त-कर्माणम् **who has renounced work by *yoga*** ⟨2.1⟩ m. *yoga-sannyasta-karman* (*-karma*)...योगेन सन्न्यस्तम् कर्म येन, सः योग-सन्न्यस्त-कर्मा – 'by whom [the fruit of] work is renounced by *yoga* (*niṣkāma-karma-yoga, bhakti-yoga*)'

सन्न्यस्त (*sam.ni.√as[u]* – to throw down, give up; + *.[k]ta*) – renounced

ज्ञान-सञ्छिन्न-संशयम् **whose doubt is destroyed by knowledge** ⟨2.1⟩ m. *jñāna-sañchinna-saṁśaya*...ज्ञानेन सञ्छिन्नः संशयः यस्य, सः ज्ञान-सञ्छिन्न-संशयः

सञ्छिन्न (*sam.√chid[ir]* – to cut; + *.[k]ta*) – cut, destroyed

आत्मवन्तम् **who is situated in the self** ⟨2.1⟩ m. *ātmavat* (*.vat[u]*) – 'having *ātmā* (the self)', situated in the self

न **not** ⟨*avyaya*⟩

कर्माणि **activities** ⟨1.3⟩ n. *karman* (*karma*) – activity

निबध्नन्ति **they bind** ⟨*acyuta* 1.3⟩ *ni.√bandh[a]* – to bind

धनञ्जय **O Arjuna!** ⟨8.1⟩ m. *dhanam-_jaya* – 'winner of riches'

Subodhinī: योगेन (परमेश्वर-आराधन-रूपेन) तस्मिन् सन्न्यस्तानि (समर्पितानि) कर्माणि येन, तम् पुरुषम् कर्माणि (स्व-फलैः) न निबध्नन्ति । अतः च ज्ञानेन (अकतृ-आत्म-बोधेन) सञ्छिन्नः संशयः (देहादि-अभिमान-लक्षणः) यस्य, तम् च आत्मवन्तम् अ-प्रमादिनम् कर्माणि (लोक-सङ्ग्रहार्थानि स्वाभाविकानि वा) न निबध्नन्ति ॥४.४१॥

यस्मात् एवम् – 'तस्मात्' इति –

4.42

तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः ।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥४२॥

तस्मात् हे भारत !	therefore, O Arjuna!
अज्ञान-सम्भूतम्	born from ignorance
हृत्स्थम् एनम् संशयम्	situated in the heart, this doubt
आत्मनः ज्ञानासिना छित्त्वा	[after] cutting it with the sword of knowledge of the self
योगम् आतिष्ठ !	resort to *yoga*!
उत्तिष्ठ !	stand up (to fight)!

"Therefore the doubts which have arisen in your heart out of ignorance should be slashed by the weapon of knowledge. Armed with yoga, O Bhārata, stand and fight."

तस्मात् **therefore** ⟨*avyaya*⟩

अ-ज्ञान-सम्भूतम् **born from ignorance** ⟨2.1⟩ m. *a-jñāna-sambhūta*...अज्ञानात् सम्भूतः इति अज्ञान-सम्भूतः

हृत्स्थम् **which is situated in the heart** ⟨2.1⟩ m. *hṛd-_stha*...यः हृदि तिष्ठति, सः हृत्स्थः

ज्ञानासिना **with the sword of knowledge** ⟨3.1⟩ m. *jñāna-_asi*...ज्ञानस्य असिः इति ज्ञानासिः – the sword of knowledge (the sword which is knowlege)
आत्मनः **of the self** ⟨6.1⟩ m. *ātman* (*ātmā*) – the self, soul
छित्त्वा **[after] cutting** ⟨*avyaya*⟩ √*chid[ir]*...द्वैधीकरणे – to divide into two; + *.[k]tvā*
एनम् **this** ⟨2.1⟩ m. *kṛṣṇanāma etad* – (first person) he, this
संशयम् **doubt** ⟨2.1⟩ m. *saṁśaya*
another word for doubt: *sandeha*
योगम् ***yoga*** ⟨2.1⟩ m. *yoga*
आतिष्ठ **you must resort to** ⟨*vidhātā* 2.1⟩ *ā.*√*sthā* – to attain, resort
उत्तिष्ठ **you must stand up** ⟨*vidhātā* 2.1⟩ *ud.*√*sthā* – to stand up
भारत **O Arjuna!** ⟨8.1⟩ m. *bhārata* – 'descendant of Bharata'

Subodhinī: आत्मनः अ-ज्ञानेन सम्भूतम्, हृदि स्थितम्, एनम् संशयम् (शोकादि-निमित्तम्) देह-आत्म-विवेक-ज्ञान-खड्गेन छित्त्वा, परमात्म-ज्ञान-उपाय-भूतम् कर्म-योगम् आतिष्ठ (आश्रय) । तत्र च प्रथमम्, प्रस्तुताय युद्धाय उत्तिष्ठ । 'हे भारत' इति क्षत्रियत्वेन युद्धस्य धर्म्यत्वम् दर्शितम् ॥४.४२॥

ओं तत्सदिति
श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि
श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे ज्ञानकर्मसन्न्यासयोगो नाम चतुर्थो ऽध्यायः ॥४॥

अथ पञ्चमो ऽध्यायः

अथ पञ्चमः अध्यायः । now the fifth chapter

Subodhinī: अज्ञान-सम्भूतम् संशयम् ज्ञान-असिना छित्त्वा कर्म-योगम् आतिष्ठ इति उक्तम्, तत्र पूर्व-अपर-विरोधम् मन्वानः [अर्जुनः उवाच] – 'सन्न्यासम्' इति –

5.1

अर्जुन उवाच
सन्न्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥१॥

अर्जुनः उवाच - हे कृष्ण !	Arjuna said: O Kṛṣṇa!
कर्मणाम् सन्न्यासम् शंससि	you praise renunciation of all work
पुनः योगम् च,	and then again *karma-yoga*,
यद् एतयोः श्रेयः	which is the better of the two
तद् एकम् मे (मह्यम्) सुनिश्चितम् ब्रूहि !	that alone tell me definitely!

"Arjuna said: O Kṛṣṇa, first of all You ask me to renounce work, and then again You recommend work with devotion. Now will You kindly tell me definitely which of the two is more beneficial?"

अर्जुनः **Arjuna** ⟨1.1⟩ m. *arjuna* – white, 'who is pure in actions'
उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
सन्न्यासम् **renunciation** ⟨2.1⟩ m. *sannyāsa*
कर्मणाम् **of all work** ⟨6.3⟩ n. *karman* (*karma*) – activity
कृष्ण **O Kṛṣṇa!** ⟨8.1⟩ m. *kṛṣṇa* – 'all-attractive', 'dark'
पुनः **again** ⟨*avyaya*⟩ (*punar*)
योगम् ***karma-yoga*** ⟨2.1⟩ m. *yoga*
च **and** ⟨*avyaya*⟩
शंससि **you praise** ⟨*acyuta* 2.1⟩ √*śaṁs[u]*...हिंसायां स्तुतौ च – to harm; praise
यद् **that which** ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
श्रेयः **better** ⟨1.1⟩ n. *śreyas* (*śreyaḥ*) – better, benefit
एतयोः **of these two** ⟨6.2⟩ m. *kṛṣṇanāma etad* – (first person) he, this
एकम् **alone** ⟨2.1⟩ n. *kṛṣṇanāma eka* – one
तद् **that** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
मे **me** ⟨opt. for *mahyam* 4.1⟩ *kṛṣṇanāma asmad* – (last person) I
ब्रूहि **you must speak** ⟨*vidhātā* 2.1⟩ √*brū[ñ]*...व्यक्तायां वाचि – to speak

सुनिश्चितम् **definitely** ⟨*avyaya*⟩ from *su.nir.*√*ci[ñ]* – to ascertain well; + *.[k]ta*) – well ascertained

Subodhinī: 'यः तु आत्म-रतिः एव स्यात्' (3.17) इत्यादिना 'सर्वम् कर्म अ-खिलम् पार्थ' (4.33) इत्यादिना च ज्ञानिनः कर्म-सन्न्यासम् कथयसि । 'ज्ञान-असिना संशयम् छित्त्वा योगम् आतिष्ठ' (4.42) इति पुनः योगम् च कथयसि । नच कर्म-सन्न्यासः कर्म-योगः च एकदा एव सम्भवतः, विरुद्ध-स्वरूपत्वात् । तस्मात् एतयोः मध्ये एकस्मिन् अनुष्ठातव्ये सति, मम यद् श्रेयः (श्रेष्ठम्), सुनिश्चितम् तद् एकम् ब्रूहि ॥५.१॥
अत्र उत्तरम् – 'सन्न्यासः' इति ।

5.2

श्रीभगवानुवाच

सन्न्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसन्न्यासात्कर्मयोगो विशिष्यते ॥२॥

श्री-भगवान् उवाच –	Śrī Kṛṣṇa said:
सन्न्यासः कर्म-योगः च	renunciation and *karma-yoga*
उभौ निःश्रेयस-करौ	both lead to liberation,
तयोः तु	but of the two
कर्म-सन्न्यासात् कर्म-योगः विशिष्यते ।	*karma-yoga* is better than renunciation of work

"The Personality of Godhead replied: The renunciation of work and work in devotion are both good for liberation. But, of the two, work in devotional service is better than renunciation of work."

श्री-भगवान् **Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'
उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
सन्न्यासः **renunciation** ⟨1.1⟩ m. *sannyāsa*
कर्म-योगः ***karma-yoga*** ⟨1.1⟩ m. *karma-yoga*
च **and** ⟨*avyaya*⟩
निःश्रेयस-करौ **which lead to liberation** ⟨1.2⟩ m. *niḥśreyasa-kara* – 'making for the best (liberation)'
निःश्रेयस (*nir.śreyasa*) – 'having nothing better', best, most excellent; final happiness, liberation
उभौ **both** ⟨1.2⟩ m. *kṛṣṇanāma ubha*
तयोः **of those two** ⟨6.2⟩ m. *kṛṣṇanāma tad* – (first person) he, that
तु **but** ⟨*avyaya*⟩
कर्म-सन्न्यासात् **than renunciation of work** ⟨5.1⟩ m. *karma-sannyāsa*...कर्मणः सन्न्यासः इति कर्म-सन्न्यासः – renunciation of work

कर्म-योगः *karma-yoga* ⟨1.1⟩ m. *karma-yoga* – *karma-yoga*
विशिष्यते **it is distinguished** ⟨*acyuta* pass. 1.1⟩ *vi.*√*śiṣ[l]* – to distinguish

Subodhinī: अयम् भावः – नहि वेदान्तवेद्य-आत्मतत्त्वविदम् प्रति कर्म-योगम् अहम् ब्रवीमि, यतः पूर्व-उक्तेन सन्न्यासेन विरोधः स्यात्, अपितु देहात्म-अभिमानिनम् त्वाम् 'बन्धुवधादि-निमित्त-शोक-मोहादि-कृतम् एनम् संशयम् देह-आत्म-विवेक-ज्ञान-असिना छित्त्वा परमात्म-ज्ञान-उपाय-भूतम् कर्म-योगम् आतिष्ठ' इति ब्रवीमि । कर्म-योगेण शुद्ध-चित्तस्य च आत्मतत्त्व-ज्ञाने जाते सति, तद्-परिपाकार्थम् ज्ञान-निष्ठा-अङ्गत्वेन सन्न्यासः पूर्वम् उक्तः । एवम् सति, अङ्ग-प्रधानयोः विकल्प-योगात्, 'सन्न्यासः कर्म-योगः च' इति एतौ उभौ अपि भूमिका-भेदेन समुच्चितौ एव निःश्रेयसम् साधयतः, तथापि तु तयोः मध्ये कर्म-सन्न्यासात् सकाशात् कर्म-योगः विशिष्यते (विशिष्टः भवति) ॥५.२॥
'कुतः ?' इति अपेक्षायाम्, सन्न्यासित्वेन कर्म-योगम् स्तुवन्, तस्य श्रेष्ठत्वम् दर्शयति – 'ज्ञेयः' इति –

5.3

ज्ञेयः स नित्यसन्न्यासी यो न द्वेष्टि न काङ्क्षति ।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥३॥

यः न द्वेष्टि न काङ्क्षति	he who neither hates nor desires
सः नित्य-सन्न्यासी ज्ञेयः,	he is to be known as always renounced,
हे महा-बाहो !	O Arjuna!
निर्द्वन्द्वः हि	being free from duality
बन्धात् सुखम् प्रमुच्यते ।	he is easily released from bondage

"One who neither hates nor desires the fruits of his activities is known to be always renounced. Such a person, free from all dualities, easily overcomes material bondage and is completely liberated, O mighty-armed Arjuna."

ज्ञेयः **to be known** ⟨1.1⟩ m. *jñeya* (√*jñā* 9P...अवबोधने – to know; + *.ya*)
सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
नित्य-सन्न्यासी **who is always renounced** ⟨1.1⟩ m. *nitya-sannyāsin* (*-sannyāsī*)
यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
न **not** ⟨*avyaya*⟩
द्वेष्टि **he hates** ⟨*acyuta* 1.1⟩ √*dviṣ[a]*...अप्रीतौ – to hate
काङ्क्षति **he desires** ⟨*acyuta* 1.1⟩ √*kākṣ[i]*...काङ्क्षायाम् – to desire
निर्द्वन्द्वः **who is free from duality** ⟨1.1⟩ m. *nirdvandva* – free from duality (*rāga-dveṣa*)
हि **indeed** ⟨*avyaya*⟩
महा-बाहो **O Arjuna!** ⟨8.1⟩ m. *mahā-bāhu* – 'who has mighty arms'

सुखम् **easily** ⟨*avyaya*⟩ from *sukha* – easiness, happiness
बन्धात् **from bondage** ⟨5.1⟩ m. *bandha* – bondage
प्रमुच्यते **he is released** ⟨*acyuta* pass. 1.1⟩ *pra.√muc[l]* – to release

Subodhinī: राग-द्वेषादि-राहित्येन परमेश्वरार्थम् कर्माणि यः अनुतिष्ठति, सः नित्यम् (कर्म-अनुष्ठान-काले अपि) 'सन्न्यासि' इति एव ज्ञेयः । तत्र हेतुः – निर्द्वन्द्वः (राग-द्वेषादि-द्वन्द्व-शून्यः) हि शुद्ध-चित्तः, ज्ञान-द्वारा सुखम् (अनायासेन) एव बन्धात् (संसारात्) प्रमुच्यते ॥५.३॥
यस्मात् एवम् अङ्ग-प्रधानत्वेन उभयोः अवस्था-भेदेन क्रम-समुच्चयः, अतः विकल्पम् अङ्गीकृत्य 'उभयोः कः श्रेष्ठः' इति प्रश्नः अ-ज्ञानिनाम् एव उचितः, न विवेकिनाम् इति आह – 'साङ्ख्य-योगौ' इति –

5.4

साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ॥४॥

साङ्ख्य-योगौ पृथक्	'*sāṅkhya* and *karma-yoga* are different'
बालाः प्रवदन्ति	[thus] the ignorant declare
न पण्डिताः,	not the learned, [because]
एकम् अपि सम्यक् आस्थितः	having resorted to just one completely
उभयोः फलम् विन्दते ।	one gets the result of both

"Only the ignorant speak of devotional service (karma-yoga) as being different from the analytical study of the material world (Sāṅkhya). Those who are actually learned say that he who applies himself well to one of these paths achieves the results of both."

साङ्ख्य-योगौ ***sāṅkhya* and *karma-yoga*** ⟨1.2⟩ m. *sāṅkhya-yoga*...साङ्ख्यः च योगः च इति साङ्ख्य-योगौ
पृथक् **different** ⟨*avyaya*⟩
बालाः **the ignorant** ⟨1.3⟩ m. *bāla* (same as *bālaka*) – young, childish, not full-grown or developed; ignorant, foolish; a child, boy
प्रवदन्ति **they declare** ⟨*acyuta* 1.3⟩ *pra.√vad[a]* – to declare
न **not** ⟨*avyaya*⟩
पण्डिताः **the learned** ⟨1.3⟩ m. *paṇḍita* – a learned man
एकम् **one** ⟨2.1⟩ n. *eka*
अपि **also** ⟨*avyaya*⟩
आस्थितः **having resorted to** ⟨1.1⟩ m. *āsthita* (*ā.√sthā* – to attain, resort; + *.[k]ta*) – resorted
सम्यक् **completely** ⟨*avyaya*⟩ (from *sam.*+ *añc* – to go together or completely) – together; completely, by all means; properly, well; distinctly, clear

उभयोः **of both** ⟨6.2⟩ m. *kṛṣṇanāma ubhaya* – both
विन्दते **he obtains** ⟨*acyuta* 1.1⟩ *√vid[l]*...लाभे – to obtain
फलम् **the result** ⟨2.1⟩ n. *phala* – fruit

Subodhinī: 'साङ्ख्य'-शब्देन ज्ञान-निष्ठा-वाचिना, तद्-अङ्गम् 'सन्न्यासम्' लक्षयति । सन्न्यास-कर्म-योगौ एक-फलौ सन्तौ, पृथक् (स्व-तन्त्रौ) इति बालाः (अ-ज्ञाः) एव प्रवदन्ति, नतु पण्डिताः । तत्र हेतुः – अनयोः एकम् अपि सम्यक् आस्थितः (आश्रितः) सन्, उभयोः अपि फलम् प्राप्नोति । तथा हि – कर्म-योगम् सम्यक् अनुतिष्ठन् शुद्ध-चित्तः सन्, ज्ञान-द्वारा यद् उभयोः फलम् (कैवल्यम्) तद् विन्दति । सन्न्यासम् सम्यक् आस्थितः अपि, पूर्वम् अनुष्ठितस्य कर्म-योगस्य अपि परम्परया ज्ञान-द्वारा यद् उभयोः फलम् (कैवल्यम्) तद् विन्दति इति, न पृथक् फलत्वम् अनयोः इति अर्थः ॥५.४॥
एतद् एव स्फुटयति – 'यद् साङ्ख्यैः' इति –

5.5

यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति ॥५॥

यद् स्थानम् साङ्ख्यैः प्राप्यते	the position which is attained by the Sāṅkhyas
तद् योगैः अपि गम्यते,	that is also reached by Karma-yogīs,
यः साङ्ख्यम् च योगम् च एकम् पश्यति	he who sees *sāṅkhya*- and *karma-yoga* as one
सः पश्यति ।	sees [truly]

"One who knows that the position reached by means of analytical study can also be attained by devotional service, and who therefore sees analytical study and devotional service to be on the same level, sees things as they are."

यद् **that which** ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
साङ्ख्यैः **by the Sāṅkhyas** ⟨3.3⟩ m. *sāṅkhya*
प्राप्यते **it is obtained** ⟨*acyuta* pass. 1.1⟩ *pra.√āp[l]* – to obtain
स्थानम् **the position** ⟨1.1⟩ n. *sthāna* – place, position
तद् **that** ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
योगैः **by the Karma-yogīs** ⟨3.3⟩ m. *yoga*
अपि **also** ⟨*avyaya*⟩
गम्यते **it is reached** ⟨*acyuta* pass. 1.1⟩ *√gam[l]*...गतौ – to go
एकम् **one** ⟨2.1⟩ n. *kṛṣṇanāma eka*
साङ्ख्यम् ***sāṅkhya*** ⟨2.1⟩ n. *sāṅkhya*
च **and** ⟨*avyaya*⟩
योगम् ***yoga*** ⟨2.1⟩ m. *yoga*

च	**and** ⟨*avyaya*⟩
यः	**he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
पश्यति	**he sees** ⟨*acyuta* 1.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see
सः	**he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
पश्यति	**he sees** ⟨*acyuta* 1.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see

Subodhinī: साङ्ख्यैः (ज्ञान-निष्ठैः, सन्न्यासिभिः) यद् स्थानम् (मोक्ष-आख्यम्) प्रकर्षेण (साक्षात्) अवाप्यते, योगैः (इति अत्र अर्श-आदित्वात् मतु-अर्थीयः अच्-प्रत्ययः द्रष्टव्यः), तेन कर्म-योगिभिः अपि तद् एव ज्ञान-द्वारेण गम्यते अवाप्यते इति अर्थः । अतः साङ्ख्यम् च योगम् च एक-फलत्वेन एकम् यः पश्यति, सः एव सम्यक् पश्यति ॥५.५॥

यदि कर्म-योगिनः अपि अन्ततः सन्न्यासेन एव ज्ञान-निष्ठा, तर्हि आदितः एव सन्न्यासः कर्तुम् युक्तः इति मन्वानम् प्रति आह – 'सन्न्यासः' इति –

5.6

सन्न्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।
योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ॥६॥

हे महा-बाहो !	O Arjuna!
अ-योगतः सन्न्यासः तु	but *sannyāsa* without *karma-yoga*
दुःखम् आप्तुम्,	is to obtain misery,
योग-युक्तः मुनिः	the sage who is engaged in *karma-yoga*
ब्रह्म न चिरेण अधिगच्छति ।	quickly attains the Supreme

"Merely renouncing all activities yet not engaging in the devotional service of the Lord cannot make one happy. But a thoughtful person engaged in devotional service can achieve the Supreme without delay."

सन्न्यासः	**renunciation** ⟨1.1⟩ m. *sannyāsa*
तु	**but** ⟨*avyaya*⟩
महा-बाहो	**O Arjuna!** ⟨8.1⟩ m. *mahā-bāhu* – 'who has mighty arms'
दुःखम्	**misery** ⟨2.1⟩ n. *duḥkha*
आप्तुम्	**to obtain** ⟨*avyaya*⟩ √*āp[ḷ]*...व्याप्तौ – to reach, obtain; + *.tum[u]* *sannyāsaḥ duḥkham āptum* – *sannyāsa* means to obtain misery; (or, another interpretation:) *sannyāsa* is difficult to obtain
अ-योगतः	**because of *a-yoga*** ⟨*avyaya*⟩ (*a-yogatas*; *a-yoga* + *.tas[i]*)
योग-युक्तः	**who is engaged in *karma-yoga*** ⟨1.1⟩ m. *yoga-yukta*...योगे युक्तः इति योग-युक्तः – engaged in *yoga*
मुनिः	**a sage** ⟨1.1⟩ m. *muni*
ब्रह्म	**the Supreme** ⟨2.1⟩ n. *brahman* (*brahma*) – spirit, soul

न	**not** ⟨*avyaya*⟩
चिरेण	**with delay** ⟨*avyaya*⟩ from *cira* – long time
अधिगच्छति	**he attains** ⟨*acyuta* 1.1⟩ *adhi.*√*gam[ḷ]* – to go over, attain

Subodhinī: अ-योगतः (कर्म-योगम् विना) सन्न्यासः प्राप्तुम् दुःखम् (दुःख-हेतुः), अ-शक्यः इति अर्थः । चित्त-शुद्धि-अभावेन ज्ञान-निष्ठायाः अ-सम्भवात् । योग-युक्तः तु (शुद्ध-चित्ततया) मुनिः (सन्न्यासी) भूत्वा, अ-चिरेण एव ब्रह्म अधिगच्छति (अ-परोक्षम् जानाति) । अतः चित्त-शुद्धेः प्राक्, कर्म-योगः एव सन्न्यासात् विशिष्यते इति पूर्व-उक्तम् सिद्धम् । तद् उक्तम् वार्तिक-कृद्भिः –

प्रमादिनः बहिः-चित्ताः पिशुनाः कलह-उत्सुकाः ।
सन्न्यासिनः अपि दृश्यन्ते दैव-सन्दूषित-आशयाः ॥

(*Bṛhad-Vārttika-sāra* 1.4) इति ॥५.६॥

कर्म-योगादि-क्रमेण ब्रह्म अधिगमे सति अपि, तद्-उपरितनेन कर्मणा बन्धः स्यात् एव इति आशङ्क्य आह – 'योग-युक्तः' इति –

5.7

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥७॥

योग-युक्तः विशुद्धात्मा	engaged in *karma-yoga* and pure-hearted
विजितात्मा जितेन्द्रियः	mind- and sense-controlled
सर्व-भूतात्म-भूतात्मा	and feeling for all beings
कुर्वन् अपि न लिप्यते ।	even [while] working he is not stained

"One who works in devotion, who is a pure soul, and who controls his mind and senses is dear to everyone, and everyone is dear to him. Though always working, such a man is never entangled."

योग-युक्तः	**who is engaged is *karma-yoga*** ⟨1.1⟩ m. *yoga-yukta*
विशुद्धात्मा	**whose heart is purified** ⟨1.1⟩ m. *viśuddha-_ātman* (*-ātmā*)...विशुद्धः आत्मा यस्य, सः विशुद्धात्मा विशुद्ध (*vi.*√*śudh[a]* – to wash, purify; + *.[k]ta*) – washed, purified
विजितात्मा	**by whom the mind is conquered** ⟨1.1⟩ m. *vijita-_ātman* (*-ātmā*)...विजितः आत्मा येन सः विजितात्मा विजित (*vi.*√*ji* – to conquer; + *.[k]ta*) – conquered
जितेन्द्रियः	**by whom the senses are conquered** ⟨1.1⟩ m. *jita-_indriya*...जितानि इन्द्रियाणि येन, सः जितेन्द्रियः
सर्व-भूतात्म-भूतात्मा	**whose heart feels for all beings like for oneself** ⟨1.1⟩ m. *sarva-bhūta-_ātma-bhūta-_ātman* (*-ātmā*)...सर्वेषाम् भूतानाम् आत्म-भूतः आत्मा यस्य, सः सर्वभूत-आत्मभूत-आत्मा – 'whose self has become the self of all beings', or (acc.

to Baladeva and Viśvanātha): 'whose body has become the abode of love for all beings'

कुर्वन् **[while] working** ⟨1.1⟩ m. *kurvat* (√*[ḍu]kṛ[ñ]*...करणे – to do; + *.[ś]at[ṛ]*)

अपि **also** ⟨*avyaya*⟩

न **not** ⟨*avyaya*⟩

लिप्यते **he is smeared** ⟨*acyuta* pass. 1.1⟩ √*lip[a]*...उपदेहे – to smear

Subodhinī: योगेन युक्तः, अतः विशुद्धः आत्मा (चित्तम्) यस्य, अतएव विजितः आत्मा (शरीरम्) येन, अतएव विजीतानि इन्द्रियाणि येन, ततः च सर्वेषाम् भूतानाम् आत्मभूतः आत्मा यस्य सः। लोक-सङ्ग्रहार्थम् स्वाभाविकम् वा कर्म कुर्वन् अपि न लिप्यते, तैः न बद्धयते ॥५.७॥

कर्म कुर्वन् अपि न लिप्यते इति 'एतद् विरुद्धम्' इति आशङ्क्य, कर्तृत्व-अभिमान-अभावात् न विरुद्धम् इति आह – 'नैव' इति द्वाभ्याम् –

5.8-9

नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यन् शृण्वन्स्पृशन् जिघ्रन्नश्नन्गच्छन्स्वपन् श्वसन् ॥८॥
प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥९॥

युक्तः तत्त्व-विद्	the knower of the truth, engaged in *karma-yoga*
पश्यन् शृण्वन् स्पृशन् जिघ्रन्	[while] seeing, hearing, touching, smelling
अश्नन् गच्छन् स्वपन् श्वसन्	[while] eating, walking, sleeping, breathing
प्रलपन् विसृजन् गृह्णन्	[while] talking, evacuating, taking
उन्मिषन् निमिषन् अपि,	and even [while] opening and closing the eyes,
इन्द्रियाणि इन्द्रियार्थेषु वर्तन्ते	'the senses are engaged in sense objects'
इति धारयन्,	[while] thus considering,
न एव किञ्चिद् करोमि	'I am not doing anything'
इति मन्येत।	thus he should think

"A person in the divine consciousness, although engaged in seeing, hearing, touching, smelling, eating, moving about, sleeping and breathing, always knows within himself that he actually does nothing at all. Because while speaking, evacuating, receiving, or opening or closing his eyes, he always knows that only the material senses are engaged with their objects and that he is aloof from them."

न एव **never** ⟨*avyaya*⟩

किञ्चिद् **something** ⟨2.1⟩ n. *kṛṣnanāma kim (kim) + .cid*

करोमि **I do** ⟨*acyuta* 3.1⟩ √*[ḍu]kṛ[ñ]*...करणे – to do

इति **thus** ⟨*avyaya*⟩

युक्तः **the *yogī*** ⟨1.1⟩ m. *yukta*

मन्येत **he should think** ⟨*vidhi* 1.1⟩ √*man[a]* 4A...बोधने – to know, think

तत्त्व-विद् **knower of the truth** ⟨1.1⟩ m. *tattva-vid*...यः तत्त्वम् वेत्ति, सः तत्त्व-विद्

पश्यन् **[while] seeing** ⟨1.1⟩ m. *paśyat* (√*dṛś[ir]*...प्रेक्षणे – to see; + *.[ś]at[ṛ]*)

शृण्वन् **[while] hearing** ⟨1.1⟩ m. *śṛṇvat* (√*śru*...श्रवणे – to hear, obey; + *.[ś]at[ṛ]*)

स्पृशन् **[while] touching** ⟨1.1⟩ m. *spṛśat* (√*spṛś[a]*...संस्पर्शे – to touch; + *.[ś]at[ṛ]*)

जिघ्रन् **[while] smelling** ⟨1.1⟩ m. *jighrat* (√*ghrā*...गन्धोपादाने – to smell; + *.[ś]at[ṛ]*)

अश्नन् **[while] eating** ⟨1.1⟩ m. *aśnat* (√*aś[a]*...भोजने – to eat, enjoy; + *.[ś]at[ṛ]*)

गच्छन् **[while] going** ⟨1.1⟩ m. *gacchat* (√*gam[l̥]*...गतौ – to go; + *.[ś]at[ṛ]*)

स्वपन् **[while] sleeping** ⟨1.1⟩ m. *svapat* (√*[ñi]svap*...शये – to lie down, sleep; + *.[ś]at[ṛ]*)

श्वसन् **[while] breathing** ⟨1.1⟩ m. *śvasat* (√*śvas[a]*...प्राणने – to breath; + *.[ś]at[ṛ]*)

प्रलपन् **[while] talking** ⟨1.1⟩ m. *pralapat* (*pra.*√*lap[a]* – to speak, whisper; + *.[ś]at[ṛ]*)

विसृजन् **[while] evacuating** ⟨1.1⟩ m. *visṛjat* (*vi.*√*sṛj[a]* – to let loose; + *.[ś]at[ṛ]*)

गृह्णन् **[while] taking** ⟨1.1⟩ m. *gṛhṇat* (√*grah[a]*...उपादाने – to take; + *.[ś]at[ṛ]*)

उन्मिषन् **[while] opening the eyes** ⟨1.1⟩ m. *unmiṣat* (*ud.*√*miṣ[a]* – to open the eyes; + *.[ś]at[ṛ]*)

निमिषन् **[while] closing the eyes** ⟨1.1⟩ m. *nimiṣat* (*ni.*√*miṣ[a]* – to close the eyes; + *.[ś]at[ṛ]*)

अपि **also** ⟨*avyaya*⟩

इन्द्रियाणि **the senses** ⟨1.3⟩ n. *indriya* – sense, sense organ

इन्द्रियार्थेषु **in the sense objects** ⟨7.3⟩ m. *indriya-_artha*...इन्द्रियस्य अर्थः इति इन्द्रियार्थः – sense object

वर्तन्ते **they act** ⟨*acyuta* 1.3⟩ √*vṛt[u]* 1A...वर्तने – to happen, act

इति **thus** ⟨*avyaya*⟩

धारयन् **[while] considering** ⟨1.1⟩ m. *dhārayat* (√*dhṛ[ñ]*...धारणे – to hold, support; caus.; + *.[ś]at[ṛ]*) – [while] causing to hold, considering

Subodhinī: कर्म-योगेन युक्तः क्रमेण तत्त्व-विद् भूत्वा, दर्शन-श्रवणादीनि कुर्वन् अपि, 'इन्द्रियाणि इन्द्रियार्थेषु वर्तन्ते' इति धारयन् (बुद्धया निश्चित्य), 'किञ्चिद् अपि अहम् न करोमि' इति मन्येत (मन्यते)। तत्र दर्शन-श्रवण-स्पर्शन-अवघ्राण-आशनानि चक्षुरादि-ज्ञानेन्द्रिय-व्यापाराः, गतिः पादयोः, स्वापः बुद्धेः, श्वासः प्राणस्य, प्रलपनम् वाक्-इन्द्रियस्य, विसर्गः पायु-उपस्थयोः, ग्रहणम् हस्तयोः, उन्मेषण-निमिषणे 'कूर्म'-आख्य-प्राणस्य इति विवेकः। एतानि कर्माणि कुर्वन् अपि, अभिमान-अभावात् ब्रह्म-विद् न लिप्यते। तथा च पारमर्षम् सूत्रम् – 'तद् अधिगमे उत्तर-पूर्व-अघयोः अश्लेष-विनाशौ तद्-व्यपदेशात्' (*Brahma-sūtra* 4.1.13) इति ॥५.८-९॥

तर्हि यस्य 'करोमि' इति अभिमानः अस्ति, तस्य कर्म-लेपः दुर्वारः, अविशुद्ध-चित्तत्वात् च सन्न्यासः अपि न अस्ति इति महत् सङ्कटम् आपन्नम्! इति आशङ्क्य, आह – 'ब्रह्मणि' इति –

5.10

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥१०॥

कर्माणि ब्रह्मणि आधाय	[after] dedicating the activities to the Lord
सङ्गम् त्यक्त्वा	and [after] giving up attachment
यः करोति	one who acts
सः पापेन न लिप्यते,	he is not stained by sin,
पद्म-पत्रम् इव अम्भसा ।	as a lotus leaf [is not touched] by water

"One who performs his duty without attachment, surrendering the results unto the Supreme Lord, is unaffected by sinful action, as the lotus leaf is untouched by water."

ब्रह्मणि **in the Supreme** ⟨7.1⟩ n. *brahman (brahma)* – spirit, soul

आधाय **[after] placing** ⟨*avyaya*⟩ *ā*.√*[du]dhā[ñ]* – to hold, place; + *.ya[p]*

कर्माणि **activities** ⟨2.3⟩ n. *karman (karma)* – activity

सङ्गम् **attachment** ⟨2.1⟩ m. *saṅga* – attachment

त्यक्त्वा **[after] abandoning** ⟨*avyaya*⟩ √*tyaj[a]*...हानौ – to abandon; + *.[k]tvā*

करोति **he does** ⟨*acyuta* 1.1⟩ √*[du]kr[ñ]*...करणे – to do

यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

लिप्यते **he is smeared** ⟨*acyuta* pass. 1.1⟩ √*lip[a]*...उपदेहे – to smear

न **not** ⟨*avyaya*⟩

सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

पापेन **by sin** ⟨3.1⟩ n. *pāpa* – sin

पद्म-पत्रम् **lotus-petal** ⟨1.1⟩ n. *padma-patra*...पद्मस्य पत्रम् इति पद्म-पत्रम् – petal of a lotus

पद्म – a lotus; (as in:) *padma-nābha* / *-locana* –'whose navel / eyes are like a lotus', names of the Lord

पत्र (or *pattra*) – a wing of a bird; a feather; a leaf, petal (of a tree or flower); a leaf for writing on, a paper, letter, document, book

इव **like** ⟨*avyaya*⟩

अम्भसा **by water** ⟨3.1⟩ n. *ambhas (ambhaḥ)* – water

Subodhinī: ब्रह्मणि आधाय (परमेश्वरे समर्प्य), तद्-फले च सङ्गम् त्यक्त्वा, यः कर्माणि करोति, असौ पापेन (बन्ध-हेतुतया पापिष्ठेन पुण्य-पापात्मकेन) कर्मणा न लिप्यते । यथा पद्म-पत्रम् अम्भसि स्थितम् अपि, अम्भसा न लिप्यते, तद्वत् ॥५.१०॥

बन्धकत्व-अभावम् उक्त्वा, मोक्ष-हेतुत्वम् सत्-आचारेण दर्शयति – 'कायेन' इति –

5.11

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ॥११॥

सङ्गम् त्यक्त्वा,	[after] giving up attachment,
कायेन मनसा बुद्ध्या	with body, mind, intelligence
केवलैः इन्द्रियैः अपि	and also with purified senses
आत्म-शुद्धये	for the purification of the mind
योगिनः कर्म कुर्वन्ति ।	the *karma-yogīs* perform work

"The yogīs, abandoning attachment, act with body, mind, intelligence and even with the senses, only for the purpose of purification."

कायेन **with the body** ⟨3.1⟩ m. *kāya* – body

मनसा **with the mind** ⟨3.1⟩ n. *manas (manaḥ)* – mind

बुद्ध्या **with the intelligence** ⟨3.1⟩ f. *buddhi*

केवलैः **with the purified** ⟨3.3⟩ n. *kevala* – exclusively, alone, only, mere; simple, pure; entire, all

इन्द्रियैः **with the senses** ⟨3.3⟩ n. *indriya* – sense, sense organ

अपि **also** ⟨*avyaya*⟩

योगिनः **the *karma-yogīs*** ⟨1.3⟩ m. *yogin (yogī)*

कर्म **work** ⟨2.1⟩ n. *karman (karma)* – activity

कुर्वन्ति **they do** ⟨*acyuta* 1.3⟩ √*[ḍu]kr[ñ]*...करणे – to do

सङ्गम् **attachment** ⟨2.1⟩ m. *saṅga*

त्यक्त्वा **[after] abandoning** ⟨*avyaya*⟩ √*tyaj[a]*...हानौ – to abandon; + *.[k]tvā*

आत्म-शुद्धये **for the purification of the mind** ⟨4.1⟩ f. *ātma-śuddhi*...आत्मनः शुद्धिः इति आत्म-शुद्धिः – purification of the mind

शुद्धि (from √*śudh[a]*...शौचे – to wash, purify) – purification, purity, holiness, innocence; (√*śudh[a]*...शौचे + *.[k]ta*): *śuddha* – purified, pure, clean, correct, unmixed (opp. to *miśra*), complete, authorised

Subodhinī: कायेन स्नानादि, मनसा ध्यानादि, बुद्ध्या तत्त्व-निश्चयादि, केवलैः (कर्म-अभिनिवेश-रहितैः) इन्द्रियैः च श्रवण-कीर्तनादि-लक्षणम् कर्म-फल-सङ्गम् त्यक्त्वा, चित्त-शुद्धये कर्म-योगिनः कर्म कुर्वन्ति ॥५.११॥

ननु तेन एव कर्मणा कश्चिद् मुच्यते कश्चिद् बध्यते इति व्यवस्था कथम् अतः आह – 'युक्तः' इति –

5.12

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥१२॥

युक्तः	the *karma-yogī*
कर्म-फलम् त्यक्त्वा	[after] giving up the fruit of work
नैष्ठिकीम् शान्तिम् आप्नोति,	attains perfect peace,
अ-युक्तः	one who is not in *karma-yoga*
काम-कारेण फले सक्तः	attached to the fruit because of desire
निबध्यते ।	becomes bound

"The steadily devoted soul attains unadulterated peace because he offers the result of all activities to Me; whereas a person who is not in union with the Divine, who is greedy for the fruits of his labor, becomes entangled."

युक्तः **the *karma-yogī*** ⟨1.1⟩ m. *yukta* (from any *yuj dhātu* + *.[k]ta*) – absorbed; restrained; united, engaged, endowed with

कर्म-फलम् **the fruit of activity** ⟨2.1⟩ n. *karma-phala*

त्यक्त्वा **[after] abandoning** ⟨*avyaya*⟩ √*tyaj[a]*...हानौ – to abandon; + *.[k]tvā*

शान्तिम् **peace** ⟨2.1⟩ f. *śānti* – peace of mind, tranquility

आप्नोति **he obtains** ⟨*acyuta* 1.1⟩ √*āp[l]*...व्याप्तौ – to reach, obtain

नैष्ठिकीम् **perfect** ⟨2.1⟩ f. *naiṣṭhikī* (from *niṣṭhā* – firmness) – firm, definite, perfect, supreme

अ-युक्तः **who is not in *karma-yoga*** ⟨1.1⟩ m. *a-yukta*

काम-कारेण **by the impulse of desire** ⟨3.1⟩ m. *kāma-kāra*...कामस्य कारः इति काम-कारः – impulse of desire

फले **in the fruit** ⟨7.1⟩ n. *phala* – fruit

सक्तः **who is attached** ⟨1.1⟩ m. *sakta* (√*sañj[a]*...सङ्गे – to embrace, stick; + *.[k]ta*) – attached

निबध्यते **he is bound** ⟨*acyuta* pass. 1.1⟩ *ni.*√*bandh[a]* – to bind

Subodhinī: युक्तः (परमेश्वर-एक-निष्ठः) सन्, कर्मणाम् फलम् त्यक्त्वा कर्माणि कुर्वन्, आत्यन्तिकीम् शान्तिम् (मोक्षम्) प्राप्नोति । अ-युक्तः तु (बहिः-मुखः) काम-कारेण (कामतः प्रवृत्त्या) फले आसक्तः नितराम् बन्धम् प्राप्नोति ॥५.१२॥
एवम् तावत् 'चित्त-शुद्धि-शून्यस्य सन्न्यासात् कर्म-योगः विशिष्यते' इति एतद् प्रपञ्चितम् । इदानीम् 'शुद्ध-चित्तस्य सन्न्यासः श्रेष्ठः' इति आह – 'सर्व-कर्माणि' इति –

5.13

सर्वकर्माणि मनसा सन्न्यस्यास्ते सुखं वशी ।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥१३॥

वशी देही	the self-controlled embodied being
सर्व-कर्माणि मनसा सन्न्यस्य	[after] renouncing all work mentally
न एव कुर्वन् न कारयन्	[while] neither acting nor causing to act
नव-द्वारे पुरे सुखम् आस्ते ।	resides happily in the city of nine gates

"When the embodied living being controls his nature and mentally renounces all actions, he resides happily in the city of nine gates (the material body), neither working nor causing work to be done."

सर्व-कर्माणि **all activities** ⟨2.3⟩ n. *sarva-karman (-karma)*

मनसा **with the mind** ⟨3.1⟩ n. *manas (manaḥ)* – mind

सन्न्यस्य **[after] renouncing** ⟨*avyaya*⟩ *sam.ni.*√*as[u]* – to throw down, give up; + *.ya[p]*

आस्ते **he resides** ⟨*acyuta* 1.1⟩ √*ās[a]*...उपवेशने विद्यमानतायां च – to sit; be present

सुखम् **happily** ⟨*avyaya*⟩ from *sukha* – easiness, happiness

वशी **who is controlled** ⟨1.1⟩ m. *vaśin (vaśī)* (from √*vaś[a]*...कान्तौ – to desire) – 'who desires, controls'

नव-द्वारे **of nine gates** ⟨7.1⟩ n. *nava-dvāra* – 'of nine gates'

पुरे **in the city** ⟨7.1⟩ n. *pura* – castle, city; residence

देही **the embodied soul** ⟨1.1⟩ m. *dehin (dehī)* – 'who possesses a body'

न एव **never** ⟨*avyaya*⟩

कुर्वन् **[while] doing** ⟨1.1⟩ m. *kurvat* (√*[ḍu]kṛ[ñ]*...करणे – to do; + *.[ś]at[r]*)

कारयन् **[while] causing to do** ⟨1.1⟩ m. *kārayat* (√*[ḍu]kṛ[ñ]*...करणे – to do; caus. ; + *.[ś]at[r]*)

Subodhinī: वशी (यत-चित्तः) । सर्वाणि कर्माणि विक्षेपकाणि मनसा (विवेक-युक्तेन) सन्न्यस्य, सुखम् यथा भवति एवम् ज्ञान-निष्ठः सन् आस्ते । 'क्व आस्ते ?' इति अतः आह – नव-द्वारे, नेत्रे नासिके कर्णौ मुखम् च इति सप्त शिरः-गतानि, अधः-गते द्वे पायु-उपस्थ-रूपे इति एवम् नव द्वाराणि यस्मिन्, तस्मिन् पुरे (पुरवत् अहम्-भाव-शून्ये देहे) देही अवतिष्ठते । अहङ्कार-अभावात् एव स्वयम् तेन देहेन नैव कुर्वन्, ममकार-अभावात् च न कारयन् इति अविशुद्ध-चित्तात् व्यावृत्तिः उक्ता । अशुद्ध-चित्तः हि सन्न्यस्य, पुनः करोति कारयति च । ननु अयम् तथा । अतः सुखम् आस्ते इति अर्थः ॥५.१३॥
ननु 'एषः एव साधु कर्म कारयति तम् यमेभ्यः लोकेभ्यः उन्निनीषते, एषः एव अ-साधु कर्म कारयति तम् यमेभ्यः लोकेभ्यः अधः निनीषते' (*Kauṣītaki-Up.* 3.9) इत्यादि श्रुतेः, परमेश्वरेण एव शुभ-अशुभ-फलेषु कर्मसु कर्तृत्वेन प्रयुज्यमानः

अ-स्वतन्त्रः पुरुषः कथम् तानि कर्माणि त्यजेत् ? ईश्वरेण एव ज्ञान-मार्गे प्रयुज्यमानः शुभानि अ-शुभानि च त्यक्ष्यति इति चेद्, एवम् सति, वैषम्य-नैर्घृण्याभ्याम् प्रयोजक-कर्तृत्वादि-ईश्वरस्य अपि पुण्य-पाप-सम्बन्धः स्यात् ! इति आशङ्क्य, आह – 'न कर्तृत्वम्' इति द्वाभ्याम् –

5.14

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥१४॥

प्रभुः लोकस्य न कर्तृत्वम् सृजति,	the soul does not create the doership of people,
न कर्माणि,	nor activities,
न कर्मफल-संयोगम्,	nor the connection with the fruit of work,
स्व-भावः तु प्रवर्तते ।	rather, one's nature acts

"The embodied spirit, master of the city of his body, does not create activities, nor does he induce people to act, nor does he create the fruits of action. All this is enacted by the modes of material nature."

न **not** ⟨*avyaya*⟩
कर्तृत्वम् **doership** ⟨2.1⟩ n. *kartṛtva* (*kartṛ* + *.tva*)
न **not** ⟨*avyaya*⟩
कर्माणि **activities** ⟨2.3⟩ n. *karman* (*karma*) – activity
लोकस्य **of people** ⟨6.1⟩ m. *loka* – place, world, people
सृजति **it creates** ⟨*acyuta* 1.1⟩ √*sṛj[a]*...विसर्गे – to let loose, create
प्रभुः **the master** ⟨1.1⟩ m. *prabhu* – master, lord

The word *prabhu* may refer to the *jīva* or to the Lord, and both meanings make sense. But in the context of the previous verse, it is proper to take it as refering to the master of 'the city of nine gates', the indiviual soul, as explained by Baladeva. The omnipresent Supreme Lord is refered to in the next verse as *vibhu*.

न **not** ⟨*avyaya*⟩
कर्मफल-संयोगम् **the result of work** ⟨2.1⟩ m. *karma-phala-saṁyoga*...कर्म-फलेन संयोगः इति कर्म-फल-संयोगः – 'the connection with the fruit of activity'
स्व-भावः **own nature** ⟨1.1⟩ m. *sva-bhāva* – own nature, disposition
तु **but** ⟨*avyaya*⟩
प्रवर्तते **it starts to act** ⟨*acyuta* 1.1⟩ *pra.*√*vṛt[u]* – to start to act

Subodhinī: प्रभुः (ईश्वरः) जीव-लोकस्य कर्तृत्वादिकम् न सृजति, किन्तु जीवस्य एव स्व-भावः (अविद्या) एव कर्तृत्वादि-रूपेण प्रवर्तते । अनादि-अविद्या-काम-वशात्

प्रवृत्ति-स्वभावम् जीव-लोकम् ईश्वरः कर्मसु नियुङ्क्ते, नतु स्वयम् एव कर्तृत्वादिकम् उत्पादयति इति अर्थः ॥५.१४॥
यस्मात् एवम् तस्मात् – 'न आदत्ते' इति –

5.15

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः ।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥१५॥

विभुः कस्यचिद् पापम् न आदत्ते	the Lord does not accept anyone's sin
न च एव सुकृतम्,	nor piety,
अ-ज्ञानेन ज्ञानम् आवृतम्	knowledge is covered by ignorance
तेन जन्तवः मुह्यन्ति ।	and thereby beings are bewildered

"Nor does the Supreme Lord assume anyone's sinful or pious activities. Embodied beings, however, are bewildered because of the ignorance which covers their real knowledge."

न **not** ⟨*avyaya*⟩
आदत्ते **he takes** ⟨*acyuta* 1.1⟩ *ā.*√*[ḍu]dā[ñ]* – to take
कस्यचिद् **of someone** ⟨6.1⟩ m. *kṛṣṇanāma kim* (*kaḥ*) + *.cid* – someone, something
पापम् **sin** ⟨2.1⟩ n. *pāpa*
न **not** ⟨*avyaya*⟩
च **and** ⟨*avyaya*⟩
एव **certainly** ⟨*avyaya*⟩
सुकृतम् **piety** ⟨2.1⟩ n. *sukṛta* (*su.*√*[ḍu]kṛ[ñ]* – to do well; + *.[k]ta*) – 'well done', a virtuous act
विभुः **the Supreme Lord** ⟨1.1⟩ m. *vibhu* – 'all-pervading', 'omnipresent'
अ-ज्ञानेन **by ignorance** ⟨3.1⟩ n. *a-jñāna* – ignorance
आवृतम् **covered** ⟨1.1⟩ n. *āvṛta* (*ā.*√*vṛ[ñ]* 5U – to cover; + *.[k]ta*)
ज्ञानम् **knowledge** ⟨1.1⟩ n. *jñāna*
तेन **by that** ⟨3.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
मुह्यन्ति **they are bewildered** ⟨*acyuta* 1.3⟩ √*muh[a]*...वैचित्ये – to be bewildered
जन्तवः **living beings** ⟨1.3⟩ m. *jantu* – creature

Subodhinī: प्रयोजकः अपि सन्, प्रभुः कस्यचिद् पापम् सुकृतम् च नैव आदत्ते (न भजते) । तत्र हेतुः – विभुः (परिपूर्णः), आप्त-कामः इति अर्थः । यदि हि स्वार्थ-कामनया कारयेत् तर्हि तथा स्यात्, नतु एतद् अस्ति । आप्त-कामस्य एव अचिन्त्य-निज-मायया तद्-तद्-पूर्व-कर्म-अनुसारेण प्रवर्तकत्वात् । ननु 'भक्तान् अनुगृह्णतः अ-भक्तान् निगृह्णतः च वैषम्य-उपलम्भात्, कथम् आप्त-कामत्वम् ?' इति अतः आह – 'अ-ज्ञानेन' इति । अ-ज्ञानेन, 'निग्रहः अपि

दण्ड-रूपः अनुग्रहः एव !' इति एवम् अ-ज्ञानेन, 'सर्वत्र समः परमेश्वरः' इति एवम्-भूतम् ज्ञानम् आवृतम् । तेन हेतुना जन्तवः (जीवाः) मुह्यन्ति, भगवति वैषम्यम् मन्यन्ते इति अर्थः ॥५.१५॥
ज्ञानिनः तु न मुह्यन्ति इति आह – 'ज्ञानेन' इति –

5.16

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥१६॥

येषाम् तु तद् अ-ज्ञानम्	but those whose such ignorance
आत्मनः ज्ञानेन नाशितम्,	is destroyed by knowledge of the self,
आदित्यवत् ज्ञानम्	sun-like knowledge
तेषाम् तद् परम् प्रकाशयति ।	reveals to them that Supreme

"When, however, one is enlightened with the knowledge by which nescience is destroyed, then his knowledge reveals everything, as the sun lights up everything in the daytime."

ज्ञानेन **by knowledge** ⟨3.1⟩ n. *jñāna* – knowledge
तु **but** ⟨*avyaya*⟩
तद् **that** ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
अ-ज्ञानम् **ignorance** ⟨1.1⟩ n. *kṛṣṇanāma a-jñāna*
येषाम् **of those whose** ⟨6.3⟩ m. *kṛṣṇanāma yad* – (relative) who, which
नाशितम् **it is destroyed** ⟨1.1⟩ n. *nāśita* (√*naś[a]*...अदर्शने – to disappear, perish; caus.; + *.[k]ta*)
आत्मनः **of the self** ⟨6.1⟩ m. *ātman (ātmā)* – the self, soul
तेषाम् **of those** ⟨6.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that
आदित्यवत् **like the sun** ⟨*avyaya*⟩ n. *ādityavat* (*āditya* – the sun; + *.vat[i]*)
आदित्य – 'son of Aditi', name of Vivasvān, the sun-god; the sun
Other words for 'sun': *sūra, sūrya, ravi, bhāskara, arka, vibhāvasu, tapana, savitā.*
ज्ञानम् **knowledge** ⟨1.1⟩ n. *jñāna*
प्रकाशयति **it makes visible** ⟨*acyuta* caus. 1.1⟩ *pra.*√*kāś[ṛ]* – to shine, become visible
तद् **that** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
परम् **supreme** ⟨2.1⟩ n. *para* – beyond

Subodhinī: आत्मनः (भगवतः) ज्ञानेन येषाम् तद्-वैषम्य-उपलम्भक-ज्ञानम् नाशितम्, तद् ज्ञानम् तेषाम् अ-ज्ञानम् नाशयित्वा, तद् परम् (परिपूर्णम् ईश्वर-स्वरूपम्) प्रकाशयति । यथा आदित्यः तमः निरस्य, समस्तम् वस्तु-जातम् प्रकाशयति, तद्वत् ॥५.१६॥
एवम्भूत-ईश्वर-उपासना-फलम् आह – 'तद्-बुद्धयः' इति –

Note: Rāmānujācārya reads *tad param jñānam prakāśayati* – that supreme knowledge reveals.

5.17

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥१७॥

तद्बुद्धयः तदात्मानः	their intelligence and mind fixed in the Supreme
तन्निष्ठाः तत्परायणाः	their faith and refuge fixed in the Supreme
ज्ञान-निर्धूत-कल्मषाः	their impurity removed by knowledge
अ-पुनरावृत्तिम् गच्छन्ति ।	they attain liberation

"When one's intelligence, mind, faith and refuge are all fixed in the Supreme, then one becomes fully cleansed of misgivings through complete knowledge and thus proceeds straight on the path of liberation."

तद्बुद्धयः **whose intelligence is fixed in the Supreme** ⟨1.3⟩ m. *tad-buddhi*...तस्मिन् बुद्धिः यस्य, सः तद्-बुद्धिः – 'whose intelligence is in that (the Supreme)'
तदात्मानः **whose mind is fixed in the Supreme** ⟨1.3⟩ m. *tad-ātman (-ātmā)*...तस्मिन् आत्मा यस्य, सः तदात्मा – 'whose mind is in that'
तन्निष्ठाः **whose faith is fixed in the Supreme** ⟨1.3⟩ m. *tad-_niṣṭha*...तस्मिन् निष्ठा यस्य, सः तन्निष्ठः – 'whose faith is in that'
तत्परायणाः **who are devoted to the Supreme** ⟨1.3⟩ m. *tad-_parāyaṇa*...तद् परम् अयनम् यस्य, सः तत्परायणः – 'whose supreme goal is that', subordinate or devoted to that
गच्छन्ति **they go** ⟨*acyuta* 1.3⟩ √*gam[ḷ]*...गतौ – to go
अ-पुनरावृत्तिम् **to liberation** ⟨2.1⟩ f. *a-punaḥ-_āvṛtti* – 'no return again', no rebirth
आवृत्ति (from *ā.*√*vṛt[u]* – to act reverse, return) – return
ज्ञान-निर्धूत-कल्मषाः **whose impurity is removed by knowledge** ⟨1.3⟩ m. *jñāna-nirdhūta-kalmaṣa*...ज्ञानेन निर्धूतम् कल्मषम् यस्य, सः ज्ञान-निर्धूत-कल्मषः – 'whose impurity is removed by knowledge'
निर्धूत (*nir.*√*dhū[ñ]* – to shake off, remove; + *.[k]ta*) – removed

Subodhinī: तस्मिन् एव बुद्धिः (निश्चयात्मिका) येषाम्, तस्मिन् एव आत्मा (मनः) येषाम्, तस्मिन् एव निष्ठा (तात्पर्यम्) येषाम्, तद् एव परम् अयनम् (आश्रयः) येषाम्, ततः च तद्-प्रसाद-लब्धेन आत्म-ज्ञानेन निर्धूतम् (निरस्तम्) कल्मषम् येषाम्, ते अपुनः-आवृत्तिम् (मुक्तिम्) यान्ति ॥५.१७॥
'कीदृशाः ते ज्ञानिनः, ये अपुनः-आवृत्तिम् गच्छन्ति ?' इति अपेक्षायाम् आह – 'विद्या-विनय-सम्पन्ने' इति –

5.18

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥१८॥

विद्या-विनय-सम्पन्ने ब्राह्मणे	in a learned and gentle *brāhmaṇa*
गवि हस्तिनि	a cow, an elephant
शुनि च एव श्वपाके च	a dog and also an outcaste
पण्डिताः सम-दर्शिनः ।	learned men see the same [the soul]

"The humble sages, by virtue of true knowledge, see with equal vision a learned and gentle brāhmaṇa, a cow, an elephant, a dog and a dog-eater (outcaste)."

विद्या-विनय-सम्पन्ने **endowed with learning and gentleness** ⟨7.1⟩ m. *vidyā-vinaya-sampanna*...विद्यया च विनयेन च सम्पन्नः इति विद्या-विनय-सम्पन्नः
विद्या (from √*vid[a]* 2P...ज्ञाने – to know) – knowledge, learning
विनय (from *vi.*√*nī[ñ]* – to lead, train) – leading, training, (esp.) moral training; discipline, conduct, modesty; (*vi.*√*nī[ñ]* – to lead, train; + *.[k]ta*): *vinīta* – trained, well-behaved, humble
सम्पन्न (*sam.*√*pad[a]* – to attain; + *.[k]ta*) – attained, endowed with

ब्राह्मणे **in a *brāhmaṇa*** ⟨7.1⟩ m. *brāhmaṇa* – 'related to *brahma*'; or ब्रह्म जानाति इति ब्राह्मणः 'who knows *brahma* (the self)'

गवि **in a cow** ⟨7.1⟩ f. *go* – cow

हस्तिनि **in an elephant** ⟨7.1⟩ m. *hastin* (*hastī*) – elephant
Other words for 'elephant': *gaja, kuñjara.*

शुनि **in a dog** ⟨7.1⟩ m. *śvan* (*śvā*) – dog

च एव **and also** ⟨*avyaya*⟩

श्वपाके **in an outcaste** ⟨7.1⟩ m. *śva-pāka* – 'who cooks dogs', a dog-eater
श्व (in compound for *śvan*) – dog
पाक (from √*[ḍu]pac[aṣ]*...पाके – to cook, digest) – cooking

च **and** ⟨*avyaya*⟩

पण्डिताः **learned men** ⟨1.3⟩ m. *paṇḍita* – a learned man

सम-दर्शिनः **who see the same** ⟨1.3⟩ m. *sama-darśin* (*-darśī*) – who sees the same

Subodhinī: विषमेषु अपि समम् ब्रह्म एव द्रष्टुम् शीलम् येषाम्, ते पण्डिताः (ज्ञानिनः) इति अर्थः । तत्र विद्या-विनयाभ्याम् युक्ते ब्राह्मणे च, शुनः यः पचति तस्मिन् श्व-पाके च इति कर्मणा वैषम्यम् । गवि हस्तिनि शुनि च इति जातितः वैषम्यम् दर्शितम् ॥५.१८॥
ननु 'विषमेषु सम-दर्शनम्, निषिद्धम् कुर्वन्तः अपि, कथम् ते पण्डिताः ? यथा आह गौतमः – 'सम-असमाभ्याम् विषम-समे पूजातः' (*Gauta.Gha.Sū.* 2.8.20)

इति । अस्य अर्थः – समाय पूजायाः विषमे प्रकारे कृते सति, विषमाय च समे प्रकारे कृते सति, सः पूजकः इह लोकात् पर-लोकात् च हीयते इति तत्र आह – 'इहैव' इति –

5.19

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद् ब्रह्मणि ते स्थिताः ॥१९॥

येषाम् मनः साम्ये स्थितम्	those whose mind is situated in sameness
इह एव	even in this life
तैः सर्गः जितः,	the material existence is conquered by them,
निर्दोषम् ब्रह्म समम् हि	the flawless Brahman is certainly equal
तस्मात् ते ब्रह्मणि स्थिताः ।	therefore they are situated in Brahman

"Those whose minds are established in sameness and equanimity have already conquered the conditions of birth and death. They are flawless like Brahman, and thus they are already situated in Brahman."

इह एव **even here** ⟨*avyaya*⟩ *iha_eva*

तैः **by those** ⟨3.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

जितः **conquered** ⟨1.1⟩ m. *jita* (√*ji*...जये – to conquer; + *.[k]ta*)

सर्गः **creation** ⟨1.1⟩ m. *sarga*

येषाम् **those whose** ⟨6.3⟩ m. *kṛṣṇanāma yad* – (relative) who, which

साम्ये **in sameness** ⟨7.1⟩ n. *sāmya* (from *sama* – same) – sameness

स्थितम् **situated** ⟨1.1⟩ n. *sthita* (√*sthā*...स्थाने – to stand; + *.[k]ta*)

मनः **the mind** ⟨1.1⟩ n. *manas* (*manaḥ*)

निर्दोषम् **faultless** ⟨1.1⟩ n. *nirdoṣa* (*nir.* + *doṣa*) – without fault

हि **indeed** ⟨*avyaya*⟩

समम् **same** ⟨1.1⟩ n. *sama*

ब्रह्म **the Supreme** ⟨1.1⟩ n. *brahman* (*brahma*) – spirit, soul

तस्मात् **therefore** ⟨*avyaya*⟩

ब्रह्मणि **in the Supreme** ⟨7.1⟩ n. *brahman* (*brahma*) – spirit, soul

ते **they** ⟨1.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

स्थिताः **are situated** ⟨1.3⟩ m. *sthita*

Subodhinī: इह एव जीवद्भिः एव तैः, सृज्यते इति सर्गः (संसारः), जितः (निरस्तः) । कैः ? येषाम् मनः साम्ये (समत्वे) स्थितम् । तत्र हेतुः – हि (यस्मात्) ब्रह्म समम् निर्दोषम् च, तस्मात् ते सम-दर्शिनः ब्रह्मणि एव स्थिताः, ब्रह्म-भावम्

प्राप्ताः इति अर्थः। गौतम-उक्तः तु दोषः ब्रह्म-भाव-प्राप्तेः पूर्वम् एव, 'पूजातः' इति पूजक-अवस्था-आश्रवणात् ॥५.१९॥

ब्रह्म-प्राप्तस्य लक्षणम् आह – 'न' इति –

5.20

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसम्मूढो ब्रह्मविद् ब्रह्मणि स्थितः ॥२०॥

स्थिर-बुद्धिः अ-सम्मूढः	with steady intelligence and unbewildered
ब्रह्मणि स्थितः ब्रह्म-विद्	the knower of transcendence, situated in Brahman
प्रियम् प्राप्य	[after] achieving what is pleasant
न प्रहृष्येत्,	he will not rejoice,
अ-प्रियम् च प्राप्य	and [after] achieving what is unpleasant
न उद्विजेत् ।	he will not be agitated

"A person who neither rejoices upon achieving something pleasant nor laments upon obtaining something unpleasant, who is self-intelligent, who is unbewildered, and who knows the science of God, is already situated in transcendence."

न	**not** ⟨*avyaya*⟩
प्रहृष्येत्	**he should rejoice** ⟨*vidhi* 1.1⟩ √*hṛṣ[a]*...तुष्टौ – to rejoice
प्रियम्	**what is pleasant** ⟨2.1⟩ n. *priya* – dear, desired
प्राप्य	**[after] obtaining** ⟨*avyaya*⟩ *pra.*√*āp[l]* – to obtain; + *.ya[p]*
न	**not** ⟨*avyaya*⟩
उद्विजेत्	**he should tremble** ⟨*vidhi* 1.1⟩ *ud.*√*[o]vij[ī]* – to fear; tremble
प्राप्य	**[after] obtaining** ⟨*avyaya*⟩ *pra.*√*āp[l]* – to obtain; + *.ya[p]*
च	**and** ⟨*avyaya*⟩
अ-प्रियम्	**what is unpleasant** ⟨2.1⟩ n. *a-priya* – not dear
स्थिर-बुद्धिः	**whose intelligence is steady** ⟨1.1⟩ m. *sthira-buddhi*...स्थिरा बुद्धिः यस्य, सः स्थिर-बुद्धिः
अ-सम्मूढः	**who is unbewildered** ⟨1.1⟩ m. *a-sammūḍha*
ब्रह्म-विद्	**who knows Brahman** ⟨1.1⟩ m. *brahma-vid*...यः ब्रह्म वेत्ति, सः ब्रह्म-विद्
ब्रह्मणि	**in Brahman** ⟨7.1⟩ n. *brahman (brahma)* – spirit, soul
स्थितः	**situated** ⟨1.1⟩ m. *sthita* (√*sthā*...स्थाने – to stand; + *.[k]ta*)

Subodhinī: यः ब्रह्म-विद् भूत्वा ब्रह्मणि एव स्थितः, सः प्रियम् प्राप्य न प्रहृष्येत् (न प्रहृष्यति), अ-प्रियम् च प्राप्य न उद्विजेत् (न विषीदति) इति अर्थः। यतः स्थिर-बुद्धिः (निश्चला बुद्धिः यस्य)। तद् कुतः? यतः अ-सम्मूढः (निवृत्त-मोहः) ॥५.२०॥

मोह-निवृत्त्या बुद्धि-स्थैर्य-हेतुम् आह – 'बाह्य-स्पर्शेषु' इति –

5.21

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥२१॥

बाह्य-स्पर्शेषु अ-सक्तात्मा	one who is unattached towards sense pleasures
आत्मनि यद् सुखम् विन्दति,	obtains that happiness which is in the self,
सः ब्रह्म-योग-युक्तात्मा	he, absorbed in the Supreme
अ-क्षयम् सुखम् अश्नुते ।	obtains unending happiness

"Such a liberated person is not attracted to material sense pleasure but is always in trance, enjoying the pleasure within. In this way the self-realized person enjoys unlimited happiness, for he concentrates on the Supreme."

बाह्य-स्पर्शेषु	**towards sense objects** ⟨7.3⟩ m. *bāhya-sparśa*...बाह्यः स्पर्शः इति बाह्य-स्पर्शः – 'external touch', contact with sense objects बाह्य (from *bahiḥ* – outside) – external; (as in:) *bahir-aṅga* – 'external limb', unessential, as opp. to *antar-aṅga* स्पर्श (from √*spṛś[a]*...संस्पर्शे – to touch) – touch
अ-सक्तात्मा	**who is unattached** ⟨1.1⟩ m. *a-sakta-ātman (-ātmā)*...अ-सक्तः आत्मा यस्य, सः अ-सक्तात्मा – 'whose mind is unattached' सक्त (√*sañj[a]*...सङ्गे – to embrace, stick; + *.[k]ta*) – attached
विन्दति	**he obtains** ⟨*acyuta* 1.1⟩ √*vid[l]*...लाभे – to obtain
आत्मनि	**in the self** ⟨7.1⟩ m. *ātman (ātmā)* – the self, soul
यद्	**that which** ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
सुखम्	**happiness** ⟨2.1⟩ n. *sukha* – easiness, happiness
सः	**he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
ब्रह्म-योग-युक्तात्मा	**who is absorbed in the Supreme** ⟨1.1⟩ m. *brahma-yoga-yukta-_ātman (-ātmā)*...ब्रह्मणि योगेन युक्तः आत्मा यस्य, सः ब्रह्म-योग-युक्तात्मा – 'whose mind is absorbed in Brahman by meditation' युक्त (from any *yuj dhātu* + *.[k]ta*) – absorbed; restrained; united, engaged, endowed with
सुखम्	**happiness** ⟨2.1⟩ n. *sukha* – easiness, happiness
अ-क्षयम्	**indestructible** ⟨2.1⟩ n. *a-kṣaya*
अश्नुते	**he obtains** ⟨*acyuta* 1.1⟩ √*aś[ūn]*...व्याप्तौ – to pervade, obtain

Subodhinī: इन्द्रियैः स्पृश्यन्ते इति स्पर्शाः (विषयाः), बाह्य-इन्द्रिय-विषयेषु अ-सक्तात्मा (अनासक्त-चित्तः) आत्मनि (अन्तः-करणे) यद् उपशमात्मकम् सात्त्विकम् सुखम् तद् विन्दति (लभते)। सः च उपशमात्मकम् सुखम् लब्ध्वा, ब्रह्मणि योगेन

(समाधिना) युक्तः (तद्-ऐक्यम् प्राप्तः) आत्मा यस्य, सः अ-क्षयम् सुखम् अश्नुते (प्राप्नोति) ॥५.२१॥
ननु 'प्रिय-विषय-भोगानाम् अपि निवृत्तेः, कथम् मोक्षः पुरुषार्थः स्यात् ?' तत्र आह – 'ये हि' इति –

5.22

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥२२॥

हे कौन्तेय !	O Arjuna!
ये हि संस्पर्श-जाः भोगाः	certainly those pleasures born from sense perception
ते दुःख-योनयः एव आद्यन्तवन्तः,	they are only sources of misery and are temporary,
बुधः तेषु न रमते ।	a wise man does not delight in them

"An intelligent person does not take part in the sources of misery, which are due to contact with the material senses. O son of Kuntī, such pleasures have a beginning and an end, and so the wise man does not delight in them."

ये **those which** ⟨1.3⟩ m. *kṛṣṇanāma yad* – (relative) who, which
हि **indeed** ⟨*avyaya*⟩
संस्पर्श-जाः **which arise from sense perception** ⟨1.3⟩ m. *saṁsparśa-ja* – 'born from contact (perception)'
भोगाः **pleasures** ⟨1.3⟩ m. *bhoga* – enjoyment, luxury
दुःख-योनयः **sources of misery** ⟨1.3⟩ f. *duḥkha-yoni*...दुःखस्य योनिः इति दुःख-योनिः – source of misery
एव **certainly** ⟨*avyaya*⟩
ते **they** ⟨1.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that
आद्यन्तवन्तः **which are temporary** ⟨1.3⟩ m. *ādi-_antavat* (*.vat[u]*) – 'having *ādi* (beginning) and *anta* (end)'; limited, temporary
कौन्तेय **O Arjuna!** ⟨8.1⟩ m. *kaunteya* – 'son of Kuntī'
न **not** ⟨*avyaya*⟩
तेषु **in those** ⟨7.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that
रमते **he rejoices** ⟨*acyuta* 1.1⟩ √*ram[u]*...क्रीडायाम् – to play, rejoice
बुधः **a wise man** ⟨1.1⟩ m. *budha*

Subodhinī: संस्पृश्यन्ते इति संस्पर्शाः (विषयाः), तेभ्यः जाताः ये भोगाः (सुखानि), ते हि वर्तमान-काले अपि स्पर्धा-असूयादि-व्याप्तत्वात् दुःखस्य एव योनयः (कारण-भूताः), तथा आदिमन्तः अन्तवन्तः च । अतः विवेकी तेषु न रमते ॥५.२२॥
तस्मात् मोक्षः एव परः पुरुषार्थः तस्य च काम-क्रोध-वेगः अतिप्रतिपक्षः अतः तद्-सहन-समर्थः एव मोक्ष-भाक् इति आह – 'शक्नोति' इति –

5.23

शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् ।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥२३॥

इह एव शरीर-विमोक्षणात् प्राक्	in this very life, up to death
यः काम-क्रोधोद्भवम् वेगम्	one who the urge born from lust and anger
सोढुम् शक्नोति	is able to tolerate
सः युक्तः,	he is a *yogī*,
सः सुखी नरः ।	he is a happy man

"Before giving up this present body, if one is able to tolerate the urges of the material senses and check the force of desire and anger, he is well situated and is happy in this world."

शक्नोति **he is able** ⟨*acyuta* 1.1⟩ √*śak[ḷ]*...शक्तौ – to be able
इह एव **even in this life** ⟨*avyaya*⟩ *iha_eva* – here certainly
यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
सोढुम् **to tolerate** ⟨*avyaya*⟩ √*sah[a]* 1A...मर्षणे – to tolerate; + *.tum[u]*
प्राक् **before** ⟨*avyaya*⟩ (from *pra.añc* – going towards)
शरीर-विमोक्षणात् **death** ⟨5.1⟩ n. *śarīra-vimokṣaṇa*...शरीरात् विमोक्षणः इति शरीर-विमोक्षणः – 'liberation from the body'
काम-क्रोधोद्भवम् **born from lust and anger** ⟨2.1⟩ m. *kāma-krodha-_udbhava*...कामात् च क्रोधात् च उद्भवः यस्य, सः काम-क्रोधोद्भवः – 'whose generation is from lust and anger'
वेगम् **the urge** ⟨2.1⟩ m. *vega* – force, impulse, urge
सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
युक्तः **a *yogī*** ⟨1.1⟩ m. *yukta* (from any *yuj dhātu* + *.[k]ta*) – absorbed; restrained; united, engaged, endowed with
सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
सुखी **who is happy** ⟨1.1⟩ m. *sukhin* (*sukhī*)
नरः **a man** ⟨1.1⟩ m. *nara*

Subodhinī: कामात् क्रोधात् च उद्भवति यः वेगः, मनः-नेत्रादि-क्षोभ-लक्षणः, तम् इहैव (तद्-उद्भव-समये एव) यः नरः सोढुम् (प्रतिरोद्धुम्) शक्नोति । तद् अपि न क्षण-मात्रम्, किन्तु शरीर-विमोक्षणात् प्राक्, यावत् देह-पातम् इति अर्थः । यः एवम्-भूतः, सः एव युक्तः (समाहितः) सुखी च भवति, न अन्यः । यद्वा, मरणात् ऊर्ध्वम् विलपन्तीभिः युवतीभिः आलिङ्ग्यमानः अपि, पुत्र-दारादिभिः दह्यमानः अपि, यथा प्राण-शून्यः काम-क्रोध-वेगम् सहते, तथा मरणात् प्राक् अपि (जीवन् एव) यः सहते, सः एव युक्तः सुखी च इति अर्थः । तद् उक्तम् वसिष्ठेन –

प्राणे गते यथा देहः सुखम् दुःखम् न विन्दनि ।
तथा चेद् प्राण-युक्तः अपि सः कैवल्य-आश्रयः भवेत् ॥

(*Nārada-parivrāja.* 3.27) इति ॥५.२३॥

न केवलम् काम-क्रोध-वेग-संहरण-मात्रेण मोक्षम् प्राप्नोति, अपितु – 'यः अन्तः' इति –

5.24

योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः ।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥२४॥

यः अन्तः-सुखः अन्तरारामः	one whose happiness and delight are within
तथा एव यः अन्तर्ज्योतिः,	and whose vision is within,
सः ब्रह्म-भूतः योगी	that self-realized *yogī*
ब्रह्म-निर्वाणम् अधिगच्छति ।	attains liberation in the Supreme

"One whose happiness is within, who is active and rejoices within, and whose aim is inward is actually the perfect mystic. He is liberated in the Supreme, and ultimately he attains the Supreme."

यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

अन्तः-सुखः **whose happiness is within** ⟨1.1⟩ m. *antaḥ-_sukha*...अन्तः सुखः यस्य, सः अन्तः-सुखः

अन्तरारामः **whose delight is within** ⟨1.1⟩ m. *antaḥ-_ārāma*...अन्तः आरामः यस्य, सः अन्तरारामः

तथा **so** ⟨*avyaya*⟩

अन्तर्ज्योतिः **whose light is within** ⟨1.1⟩ m. *antaḥ-_jyoti*...अन्तः ज्योतिः यस्य, सः अन्तर्ज्योतिः

ज्योतिस् (*jyotiḥ*) (from √*dyut[a]*...दीप्तौ – to shine) – light (of sun, moon, fire, lightning), brightness (of the sky); eye-light, the eye; light of heaven, intelligence; (also from √*dyut[a]*...दीप्तौ): *dyuti* – splendor, majesty; *jyotiṣa* – an astronomer, astronomy

एव **certainly** ⟨*avyaya*⟩

यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

सः **that** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

योगी ***yogī*** ⟨1.1⟩ m. *yogin* (*yogī*)

ब्रह्म-निर्वाणम् **liberation in the Supreme** ⟨2.1⟩ n. *brahma-nirvāṇa*

ब्रह्म-भूतः **self-realized** ⟨1.1⟩ m. *brahma-bhūta* – 'being Brahman', identification as spirit soul, self-realization

अधिगच्छति **he attains** ⟨*acyuta* 1.1⟩ *adhi.*√*gam[l]* – to go over, attain

Subodhinī: अन्तः (आत्मनि) एव सुखम् यस्य न विषयेषु, अन्तः एव आरामः (क्रीडा) यस्य न बहिः, अन्तः एव ज्योतिः (दृष्टिः) यस्य न गीत-नृत्यादिषु, सः एव ब्रह्मणि भूतः (स्थितः) सन् ब्रह्मणि निर्वाणम् (लयम्) अधिगच्छति (प्राप्नोति) ॥५.२४॥

5.25

लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥२५॥

छिन्न-द्वैधाः यतात्मानः	being free from doubt and self-controlled
सर्व-भूत-हिते रताः	engaged in the welfare of all beings
क्षीण-कल्मषाः ऋषयः	sages who are free from sin
ब्रह्म-निर्वाणम् लभन्ते ।	attain liberation

"Those who are beyond the dualities that arise from doubts, whose minds are engaged within, who are always busy working for the welfare of all living beings, and who are free from all sins achieve liberation in the Supreme."

लभन्ते **they obtain** ⟨*acyuta* 1.3⟩ √*[ḍu]labh[aṣ]*...प्राप्तौ – to obtain

ब्रह्म-निर्वाणम् **liberation in the Supreme** ⟨2.1⟩ n. *brahma-nirvāṇa*

ऋषयः **sages** ⟨1.3⟩ m. *ṛṣi* – sage

क्षीण-कल्मषाः **who are free from sin** ⟨1.3⟩ m. *kṣīṇa-kalmaṣa*...क्षीणानि कल्मषाणि यस्य, सः क्षीण-कल्मषः – 'whose impurities are destroyed'

क्षीण (from √*kṣi* 1P...क्षये – to decay) – destroyed, lost, ended

छिन्न-द्वैधाः **who are free from doubt** ⟨1.3⟩ m. *chinna-dvaidha*...छिन्नम् द्वैधम् यस्य, सः छिन्न-द्वैधः – 'whose doubt is cut'

रत (√*ram[u]*...क्रीडायाम् – to play, rejoice; + .*[k]ta*) – pleased, gratified; fond of, devoted to

द्वैध (from *dvidhā* – twofold) – 'duality', doubt

यतात्मानः **who are self-controlled** ⟨1.3⟩ m. *yata-_ātman* (*-ātmā*)...यतः आत्मा यस्य, सः यतात्मा – 'whose self is controlled'

यत (√*yam[a]* 1P...उपरमे – to restrain; + .*[k]ta*) – restrained

सर्व-भूत-हिते **in the welfare of all beings** ⟨7.1⟩ n. *sarva-bhūta-hita*...सर्वेषाम् भूतानाम् हितः इति सर्व-भूत-हितः – 'welfare of all beings'

रताः **who are dedicated** ⟨1.3⟩ m. *rata* (√*ram[u]*...क्रीडायाम् – to play, rejoice; + .*[k]ta*) – pleased, gratified; fond of, devoted

Subodhinī: ऋषयः (सम्यक्-दर्शिनः) क्षीणम् कल्मषम् येषाम्, छिन्नम् द्वैधम् (संशयः) येषाम्, यतः संयतः आत्मा (चित्तम्) येषाम्, सर्वेषाम् भूतानाम् हिते रताः, कृपालवः, ते ब्रह्म-निर्वाणम् (मोक्षम्) लभन्ते ॥५.२५॥

5.26

कामक्रोधविमुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥२६॥

काम-क्रोध-विमुक्तानाम्	being free from lust and anger
यत-चेतसाम् विदितात्मनाम्	self-controlled and realized
यतीनाम्	for those who endeavor
ब्रह्म-निर्वाणम् अभितः वर्तते ।	liberation is near

"Those who are free from anger and all material desires, who are self-realized, self-disciplined and constantly endeavoring for perfection, are assured of liberation in the Supreme in the very near future."

काम-क्रोध-विमुक्तानाम् **of those free from desire and anger** ⟨6.3⟩ m. *kāma-krodha-vimukta*...कामात् च क्रोधात् च विमुक्तः इति काम-क्रोध-विमुक्तः – free from desire and anger

यतीनाम् **for those who endeavor** ⟨6.3⟩ m. *yati* (from √*yat[I]* – to endeavor) – 'one who endeavors', an ascetic, *sannyāsī*, devotee

यत-चेतसाम् **for those who are self-controlled** ⟨6.3⟩ m. *yata-cetas (-cetaḥ)*...यतम् चेतः यस्य, सः यत-चेत: – 'whose mind is controlled'

यत (√*yam[a]* 1P...उपरमे – to restrain; + *.[k]ta*) – restrained

अभितः **near** ⟨*avyaya*⟩ (*abhitas*; *abhi* – towards; + *tas[i]*) – near, on both/all sides, before and after

Other words for 'near': *samīpa, nikaṭa, antika*.

ब्रह्म-निर्वाणम् **liberation in the Supreme** ⟨1.1⟩ n. *brahma-nirvāna*

वर्तते **there is** ⟨*acyuta* 1.1⟩ √*vṛt[u]* 1A...वर्तने – to happen, act

विदितात्मनाम् **for those who are self-realized** ⟨6.3⟩ m. *vidita-_ātman (-ātmā)*...विदितः आत्मा यस्य, सः विदितात्मा – 'whose self is known', who is self-realized

विदित (√*vid[a]* 2P...ज्ञाने – to know; + *.[k]ta*) – known, understood

Subodhinī: काम-क्रोधाभ्याम् वियुक्तानाम् यतीनाम् (सन्न्यासिनाम्) संयत-चित्तानाम् ज्ञात-आत्म-तत्त्वानाम्, अभितः (उभयतः, मृतानाम् जीवताम् च), न देह-अन्तः एव तेषाम् ब्रह्मणि लयः, अपितु जीवताम् अपि वर्तते इति अर्थः ॥५.२६॥
'स योगी ब्रह्म-निर्वाणम्' (5.24) इत्यादिषु योगी मोक्षम् अवाप्नोति इति उक्तम्, तम् एव योगम् सङ्क्षेपेण दर्शयन्, आह – 'स्पर्शान्' इति द्वाभ्याम् –

5.27...28

स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः ।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥२७॥

बाह्यान् स्पर्शान् बहिः कृत्वा	[after] shutting out all external perceptions
चक्षुः च एव भ्रुवोः अन्तरे	and [after fixing] the sight between the eyebrows
नासाभ्यन्तर-चारिणौ प्राणापानौ	and *prāṇa* and *apāna* which move inside the nose
समौ कृत्वा . . .	[after] balancing . . .

"Shutting out all external sense objects, keeping the eyes and vision concentrated between the two eyebrows, suspending the inward and outward breaths within the nostrils, ..."

स्पर्शान् **perceptions** ⟨2.3⟩ m. *sparśa* (from √*spṛś[a]*...संस्पर्शे – to touch) – touch, sense perception

कृत्वा **[after] doing** ⟨*avyaya*⟩ √*[ḍu]kṛ[ñ]*...करणे – to do; + *.[k]tvā*

बहिः **outside** ⟨*avyaya*⟩

बाह्यान् **external** ⟨2.3⟩ m. *bāhya*

चक्षुः **sight** ⟨2.1⟩ n. *cakṣus (cakṣuḥ)* – seeing; sight, look; eye

च एव **and also** ⟨*avyaya*⟩

अन्तरे **in between** ⟨*avyaya*⟩

भ्रुवोः **of the two eyebrows** ⟨6.2⟩ f. *bhrū* – eyebrow

प्राणापानौ **exhalation and inhalation** ⟨2.2⟩ m. *prāṇa-_apāna*

समौ **balancing** ⟨2.2⟩ m. *sama* – same

कृत्वा **[after] doing** ⟨*avyaya*⟩ √*[ḍu]kṛ[ñ]*...करणे – to do; + *.[k]tvā*

नासाभ्यन्तर-चारिणौ **which are moving inside the nose** ⟨2.2⟩ m. *nāsā-_abhyantara-cārin (-cārī)*...नासायाः अभ्यन्तरे चारी इति नासाभ्यन्तर-चारी – 'which moves inside the nose'

नासा (same as *nāsikā*) – nose

अभ्यन्तर (*abhi.antara*) – interior, inside

चारिन् (*cārī*) (from √*car[a]*...गतौ – to go, move) – which moves

Subodhinī: बाह्याः एव स्पर्शाः (रूप-रसादयः विषयाः) चिन्तिताः सन्तः अन्तः प्रविशन्ति, तान् तद्-चिन्ता-त्यागेन बहिः एव कृत्वा, चक्षुः च भ्रुवोः अन्तरे (भ्रू-मध्ये) एव कृत्वा, अत्यन्तम् नेत्रयोः निमीलने निद्रया मनः लीयते, उन्मीलने च बहिः प्रसरति । तद् उभय-दोष-परिहारार्थम् अर्ध-निमीलनेन भ्रू-मध्ये दृष्टिम् निधाय इति अर्थः । उच्छ्वास-निःश्वास-रूपेण नासिकयोः अभ्यन्तरे च चरन्तौ प्राण-अपानौ ऊर्ध्व-अधः-गति-निरोधेन समौ कृत्वा (कुम्भयित्वा) इति अर्थः । यद्वा, प्राणः यथा बहिः न निर्याति, यथा च अपानः अन्तः न प्रविशति, किन्तु नासा-मध्ये एव द्वौ अपि यथा चरतः, तथा मन्दाभ्याम् उच्छ्वास-निःश्वासाभ्याम् समौ कृत्वा इति ॥५.२७॥

5.28

यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥२८॥

. . . यः यतेन्द्रिय-मनोबुद्धिः	. . . controlling senses, mind and intelligence
विगतेच्छा-भय-क्रोधः	free from desire, fear and anger
मोक्ष-परायणः मुनिः,	a sage whose goal is liberation,
सः सदा मुक्तः एव ।	he is certainly always liberated

"... and thus controlling the mind, senses and intelligence, the transcendentalist aiming at liberation becomes free from desire, fear and anger. One who is always in this state is certainly liberated."

यतेन्द्रिय-मनोबुद्धिः **whose senses, mind and intelligence are controlled** ⟨1.1⟩ m. *yata-_indriya-manaḥ-_buddhi*...यताः इन्द्रियाणि च मनः च बुद्धिः च यस्य, सः यतेन्द्रिय-मनोबुद्धिः

मुनिः **the sage** ⟨1.1⟩ m. *muni*

मोक्ष-परायणः **whose goal is liberation** ⟨1.1⟩ m. *mokṣa-parāyaṇa*...मोक्षः परायणम् यस्य, सः मोक्ष-परायणः

विगतेच्छा-भय-क्रोधः **who is free from desire, fear and anger** ⟨1.1⟩ m. *vigata-_icchā-bhaya-krodha*...विगताः इच्छा च भयम् च क्रोधः च यस्य, सः विगतेच्छा-भय-क्रोधः – 'whose desire, fear and anger are gone'

विगत (*vi.√gam[a]* – to go away; + *.[k]ta*) – gone away

यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

सदा **always** ⟨*avyaya*⟩

मुक्तः **liberated** ⟨1.1⟩ m. *mukta* (*√muc[l]*...मोक्षणे – to release; + *.[k]ta*)

एव **certainly** ⟨*avyaya*⟩

सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

Subodhinī: अनेन उपायेन (यताः) संयताः इन्द्रिय-मनः-बुद्धयः यस्य, मोक्षः एव परम् अयनम् (प्राप्यम्) यस्य, अतएव विगताः इच्छा-भय-क्रोधाः यस्य, यः एवम्-भूतः मुनिः सः सदा (जीवन् अपि) मुक्तः एव इति अर्थः ॥५.२८॥

ननु, एवम् इन्द्रियादि-संयम-मात्रेण कथम् मुक्तिः स्यात् ? न तावत्-मात्रेण किन्तु ज्ञान-द्वारेण इति आह – 'भोक्तारम्' इति –

5.29

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥२९॥

यज्ञ-तपसाम् भोक्तारम्	as the enjoyer of all sacrifices and austerities
सर्व-लोक-महेश्वरम्	the Supreme Lord of all worlds
सर्व-भूतानाम् सुहृदम्	and the friend of all beings
माम् ज्ञात्वा	[after] knowing Me [thus]
शान्तिम् ऋच्छति ।	one attains peace

"A person in full consciousness of Me, knowing Me to be the ultimate beneficiary of all sacrifices and austerities, the Supreme Lord of all planets and demigods, and the benefactor and well-wisher of all living entities, attains peace from the pangs of material miseries."

भोक्तारम् **the enjoyer** ⟨2.1⟩ m. *bhoktṛ* (*bhoktā*) (*√bhuj[a]*...पालन-अभ्यवहारयोः – to govern; enjoy; + *tṛ[n]*)

यज्ञ-तपसाम् **of sacrifices and austerities** ⟨6.3⟩ n. *yajña-tapas* (*-tapaḥ*) – sacrifice and austerity

सर्व-लोक-महेश्वरम् **the great Lord of all worlds** ⟨2.1⟩ m. *sarva-loka-mahā-_īśvara*...सर्वेषाम् लोकानाम् महेश्वरः इति सर्व-लोक-महेश्वरः

सुहृदम् **the well-wisher** ⟨2.1⟩ m. *suhṛd* – well-wisher, friend

सर्व-भूतानाम् **of all beings** ⟨6.3⟩ m. *sarva-bhūta* – all beings

ज्ञात्वा **[after] knowing** ⟨*avyaya*⟩ *√jñā* 9P...अवबोधने – to know; + *.[k]tvā*

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

शान्तिम् **peace** ⟨2.1⟩ f. *śānti* – peace of mind

ऋच्छति **he reaches** ⟨*acyuta* 1.1⟩ *√ṛ*...गतौ प्रापणे च – to go; get (or from *√ṛcch[a]*)

Subodhinī: यज्ञानाम् तपसाम् च मद्-भक्तैः समर्पितानाम् यद्-ऋच्छया भोक्तारम् पालकम् इति वा । सर्वेषाम् लोकानाम् महान्तम् ईश्वरम्, सर्वेषाम् भूतानाम् सुहृदम् (निरपेक्ष-उपकारिणम् अन्तर्यामिणम्) माम् ज्ञात्वा, मद्-प्रसादेन शान्तिम् (मोक्षम्) ऋच्छति (प्राप्नोति) ॥५.२९॥

ओं तत्सदिति
श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि
श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे कर्मसन्न्यासयोगो नाम पञ्चमो ऽध्यायः ॥५॥

अथ षष्ठो ऽध्यायः

अथ षष्ठः अध्यायः । now the sixth chapter

Subodhinī: पूर्व-अध्याय-अन्ते सङ्क्षेपेण उक्तम् योगम् प्रपञ्चयितुम् षष्ठ-अध्याय-आरम्भः । तत्र तावत् 'सर्व-कर्माणि मनसा' (5.13) इति आरभ्य, सन्न्यास-पूर्विकायाः ज्ञान-निष्ठायाः तात्पर्येण अभिधानात्, दुःख-स्वरूपत्वात् च कर्मणः, सहसा सन्न्यास-अतिप्रसङ्गम् प्राप्तम् वारयितुम्, सन्न्यासात् अपि श्रेष्ठत्वेन कर्म-योगम् स्तुवन्, [श्री-भगवान् उवाच] – 'अनाश्रितः' इति द्वाभ्याम् –

6.1

श्रीभगवानुवाच

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।

स सन्न्यासी च योगी च न निरग्निर्न चाक्रियः ॥१॥

श्री-भगवान् उवाच -	Śrī Kṛṣṇa said:
यः कर्म-फलम् अनाश्रितः	one who, not resorting to the fruit of activity
कार्यम् कर्म करोति	does the prescribed duty
सः सन्न्यासी च योगी च,	he is a *sannyāsī* and a *yogī*,
न निरग्निः	not he who has no [sacrificial] fire
न च अ-क्रियः ।	or does not work

"The Supreme Personality of Godhead said: One who is unattached to the fruits of his work and who works as he is obligated is in the renounced order of life, and he is the true mystic, not he who lights no fire and performs no duty."

श्री-भगवान् **Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'
उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
अनाश्रितः **not resorting** ⟨1.1⟩ m. *an-āśrita* – not taken shelter
आश्रितः (*ā.√śri[ñ]* – to take shelter; + *.[k]ta*) – taken shelter
कर्म-फलम् **to the fruit of activity** ⟨2.1⟩ n. *karma-phala*
कार्यम् **prescribed** ⟨2.1⟩ n. *kārya* – to be done; duty, work
कर्म **work** ⟨2.1⟩ n. *karman (karma)* – activity
करोति **he does** ⟨*acyuta* 1.1⟩ √*[du]kr[ñ]*...करणे – to do
यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
सन्न्यासी **a *sannyāsī*** ⟨1.1⟩ m. *sannyāsin (sannyāsī)* (decl. like *yogin*) – renunciant

च **and** ⟨*avyaya*⟩
योगी **a *yogī*** ⟨1.1⟩ m. *yogin (yogī)*
च **and** ⟨*avyaya*⟩
न **not** ⟨*avyaya*⟩
निरग्निः **who has no fire** ⟨1.1⟩ m. *niragni (nir.agni)*
न **and not** ⟨*avyaya*⟩
अ-क्रियः **who does not work** ⟨1.1⟩ m. *a-kriya* – inactive

Subodhinī: कर्म-फलम् अनाश्रितः (अनपेक्षमाणः), अवश्यम् कर्तव्यतया विहितम् कर्म यः करोति, सः एव सन्न्यासी योगी च, नतु निरग्निः (अग्निसाध्य-इष्टाख्य-कर्म-त्यागी), नच अ-क्रियः (अनग्निसाध्य-पूर्ताख्य-कर्म-त्यागी च) ॥६.१॥
कुतः ? इति अपेक्षायाम्, कर्म-योगस्य एव सन्न्यासत्वम् सम्पादयन्, आह – 'यम्' इति –

6.2

यं सन्न्यासमिति प्राहुर्योगं तं विद्धि पाण्डव ।

न ह्यसन्न्यस्तसङ्कल्पो योगी भवति कश्चन ॥२॥

हे पाण्डव !	O Arjuna!
यम् सन्न्यासम् इति प्राहुः	that which is called *sannyāsa*
तम् योगम् विद्धि !	know that to be *yoga*!
न हि कश्चन अ-सन्न्यस्त-सङ्कल्पः	nobody who has not renounced desire
योगी भवति ।	becomes a *yogī*

"What is called renunciation you should know to be the same as *yoga*, or linking oneself with the Supreme, O son of Pāṇḍu, for one can never become a yogī unless he renounces the desire for sense gratification."

यम् **that which** ⟨2.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
सन्न्यासम् ***sannyāsa*** ⟨2.1⟩ m. *sannyāsa* – renunciation
इति **thus** ⟨*avyaya*⟩
प्राहुः **they declared** ⟨*acyuta* opt. form with a past sense 1.3⟩ *pra.√brū[ñ]* – to declare
योगम् ***yoga*** ⟨2.1⟩ m. *yoga*
तम् **that** ⟨2.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
विद्धि **you must know** ⟨*vidhātā* 2.1⟩ √*vid[a]* 2P...ज्ञाने – to know
पाण्डव **O Arjuna!** ⟨8.1⟩ m. *pāṇḍava* – 'son of Pāṇḍu'
न हि **not at all** ⟨*avyaya*⟩
अ-सन्न्यस्त-सङ्कल्पः **by whom desire is not renounced** ⟨1.1⟩ m. *a-sannyasta-saṅkalpa*...न सन्न्यस्तः सङ्कल्पः येन, सः अ-सन्न्यस्त-सङ्कल्पः

योगी **a yogī** ⟨1.1⟩ m. *yogin (yogī)* – transcendentalist

भवति **he becomes** ⟨*acyuta* 1.1⟩ √*bhū*...सत्तायाम् – to be, exist, become

कश्चन **someone** ⟨1.1⟩ m. *kṛṣṇanāma kim (kaḥ)* + .*cana* – someone, something

Subodhinī: यम् 'सन्न्यासम्' इति प्राहुः (प्रकर्षेण श्रेष्ठत्वेन आहुः) । 'न्यासः एव अत्यरेचयत्' (*Taittirīya Āraṇyaka* 10.62) इत्यादि श्रुतेः । केवलात् फल-सन्न्यसनात् हेतोः 'योगम्' एव तम् जानीहि । कुतः ? इति अपेक्षायाम्, 'इति'-शब्द-उक्तः हेतुः योगः अपि अस्ति इति आह – 'न हि' इति । न सन्न्यस्तः फल-सङ्कल्पः येन सः [असन्न्यस्त-सङ्कल्पः], कर्म-निष्ठः ज्ञान-निष्ठः वा कश्चिद् अपि नहि योगी भवति । अतः फल-सङ्कल्प-त्याग-साम्यात् 'सन्न्यासी' च । फल-सङ्कल्प-त्यागात् एव चित्त-विक्षेप-अभावात् 'योगी' च भवति एव सः इति अर्थः ॥६.२॥

तर्हि, यावत् जीवम् कर्म-योगः एव प्राप्तः ? इति आशङ्क्य, तस्य अवधिम् आह – 'आरुरुक्षोः' इति –

6.3

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥३॥

योगम् आरुरुक्षोः मुनेः	for a sage who wants to attain *yoga*
कर्म कारणम् उच्यते,	work is said to be the means,
तस्य एव योगारूढस्य	and for that one alone, who has attained *yoga*
शमः कारणम् उच्यते ।	cessation of work is said to be the means

"For one who is a neophyte in the eightfold yoga system, work is said to be the means; and for one who is already elevated in yoga, cessation of all material activities is said to be the means."

आरुरुक्षोः **of one who wants to attain** ⟨6.1⟩ m. *ārurukṣu* (from *ā.*√*ruh[a]* – to ascend) – 'who desires to ascend'
(also from *ā.*√*ruh[a]*:) *āroha* – ascending; (as in:) *āroha-panthāḥ* – the ascending path, inductive method; (opp. to:) *avaroha-panthāḥ* – the descending path, deductive method; *ārūḍha* (.[*k*]*ta*) ascended; *ārurukṣā* – the desire to ascend; *ārurukṣu* – who desires to ascend

मुनेः **of a sage** ⟨6.1⟩ m. *muni* – 'who is thoughtful', a sage

योगम् **to *yoga*** ⟨2.1⟩ m. *yoga*

कर्म **work** ⟨1.1⟩ n. *karman (karma)* – activity

कारणम् **the means** ⟨1.1⟩ n. *kāraṇa* – cause, method

उच्यते **it is said** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak

योगारूढस्य **of one who has attained *yoga*** ⟨6.1⟩ m. *yoga-_ārūḍha*...योगम् आरूढः इति योगारूढः – 'who has ascended to *yoga*'

तस्य **his** ⟨6.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

एव **certainly** ⟨*avyaya*⟩

शमः **tranquillity** ⟨1.1⟩ m. *śama*

कारणम् **the means** ⟨1.1⟩ n. *kāraṇa* – cause, method

उच्यते **it is said** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak

Subodhinī: ज्ञान-योगम् आरोढुम् (प्राप्तुम्) इच्छोः पुंसः, तद्-आरोहे कारणम् कर्म उच्यते, चित्त-शुद्धि-करत्वात् । ज्ञान-योगम् आरूढस्य तु, तस्य एव ज्ञान-निष्ठस्य, शमः (समाधिः, चित्त-विक्षेप-कर्म-उपरमः) ज्ञान-परिपाके कारणम् उच्यते ॥६.३॥
कीदृशः असौ योग-आरूढः, यस्य शमः कारणम् उच्यते ? इति अत्र आह – 'यदा हि' इति –

6.4

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते ।
सर्वसङ्कल्पसन्न्यासी योगारूढस्तदोच्यते ॥४॥

यदा हि सर्व-सङ्कल्प-सन्न्यासी	when one who has renounced all desires
न इन्द्रियार्थेषु न कर्मसु अनुषज्जते,	neither engages in sense objects nor in activities,
तदा योगारूढः उच्यते ।	then one is said to have attained *yoga*

"A person is said to be elevated in yoga when, having renounced all material desires, he neither acts for sense gratification nor engages in fruitive activities."

यदा **when** ⟨*avyaya*⟩

हि **indeed** ⟨*avyaya*⟩

न **not** ⟨*avyaya*⟩

इन्द्रियार्थेषु **in sense objects** ⟨7.3⟩ m. *indriya-_artha* – sense object

कर्मसु **in activities** ⟨7.3⟩ n. *karman (karma)* – activity

अनुषज्जते **he engages** ⟨*acyuta* 1.1⟩ *anu.*√*sasj[a]* – to go after, engage

सर्व-सङ्कल्प-सन्न्यासी **a renouncer of all desires** ⟨1.1⟩ m. *sarva-saṅkalpa-sannyāsin (-sannyāsī)*...सर्वेषाम् सङ्कल्पानाम् सन्न्यासी इति सर्व-सङ्कल्प-सन्न्यासी

योगारूढः **who has ascended *yoga*** ⟨1.1⟩ m. *yoga-_ārūḍha*

तदा **then** ⟨*avyaya*⟩

उच्यते **he is said** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak

Subodhinī: इन्द्रियार्थेषु (इन्द्रय-भोग्येषु शब्दादिषु) तद्-साधनेषु च कर्मसु यदा न अनुषज्जते (आसक्तिम् न करोति) । तत्र हेतुः – आसक्ति-मूल-भूतान् सर्वान् भोग-विषयान् कर्म-विषयान् च सङ्कल्पान् सन्न्यसितुम् (त्यक्तुम्) शीलम् यस्य सः, तदा योग-आरूढः उच्यते ॥६.४॥

अतः, विषय-आसक्ति-त्यागे मोक्षम्, तद्-आसक्तौ च बन्धम् पर्यालोच्य, रागादि-स्वभावम् त्यजेत् इति आह – 'उद्धरेत्' इति –

6.5

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥५॥

आत्मना आत्मानम् उद्धरेत्,	one should raise oneself by the mind,
आत्मानम् न अवसादयेत्,	and not lower oneself,
आत्मा एव हि आत्मनः बन्धुः,	[because] the mind alone is one's friend,
आत्मा एव आत्मनः रिपुः ।	and the mind alone is one's enemy

"One must deliver himself with the help of his mind, and not degrade himself. The mind is the friend of the conditioned soul, and his enemy as well."

उद्धरेत्	**he should raise** ⟨*vidhi* 1.1⟩ *ud.√hr[ñ]* – to carry up
आत्मना	**with the mind** ⟨3.1⟩ m. *ātman* (*ātmā*) – the self, soul
आत्मानम्	**the self** ⟨2.1⟩ m. *ātman* (*ātmā*) – the self, soul
न	**not** ⟨*avyaya*⟩
आत्मानम्	**the self** ⟨2.1⟩ m. *ātman* (*ātmā*) – the self, soul
अवसादयेत्	**he should lower** ⟨*vidhi* caus. 1.1⟩ *ava.√sad[l]* – to sink down
आत्मा	**the mind** ⟨1.1⟩ m. *ātman* (*ātmā*) – the self, soul
एव हि	**certainly** ⟨*avyaya*⟩
आत्मनः	**of the self** ⟨6.1⟩ m. *ātman* (*ātmā*) – the self, soul
बन्धुः	**a friend** ⟨1.1⟩ m. *bandhu*
आत्मा	**the mind** ⟨1.1⟩ m. *ātman* (*ātmā*) – the self, soul
एव	**certainly** ⟨*avyaya*⟩
रिपुः	**an enemy** ⟨1.1⟩ m. *ripu*
आत्मनः	**of the self** ⟨6.1⟩ m. *ātman* (*ātmā*) – the self, soul

Subodhinī: आत्मना (विवेक-युक्तेन) आत्मानम् संसारात् उद्धरेत्, नतु अवसादयेत् (अधः न नयेत्) । हि (यस्मात्) आत्मा एव, मनः-सङ्गात् उपरतः, आत्मनः (स्वस्य) बन्धुः (उपकारकः), रिपुः (अपकारकः) च ॥६.५॥

कथम्-भूतस्य आत्मा एव बन्धुः, कथम्-भूतस्य च आत्मा एव रिपुः ? इति अपेक्षायाम्, आह – 'बन्धुः' इति –

6.6

बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः ।
अनात्मनस्तु शत्रुत्वे वर्ततात्मैव शत्रुवत् ॥६॥

येन आत्मना आत्मा एव जितः	by whom the mind is conquered by the self
तस्य आत्मनः आत्मा बन्धुः	for his self the mind is a friend,
अनात्मनः तु	but for one who has not conquered the mind
आत्मा एव शत्रुवत् शत्रुत्वे वर्तेत ।	the mind, like an enemy, will act in enmity

"For him who has conquered the mind, the mind is the best of friends; but for one who has failed to do so, his mind will remain the greatest enemy."

बन्धुः	**a friend** ⟨1.1⟩ m. *bandhu*
आत्मा	**the mind** ⟨1.1⟩ m. *ātman* (*ātmā*) – the self, soul
आत्मनः	**of the self** ⟨6.1⟩ m. *ātman* (*ātmā*) – the self, soul
तस्य	**his** ⟨6.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
येन	**by whom** ⟨3.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
आत्मा	**the self** ⟨1.1⟩ m. *ātman* (*ātmā*) – the self, soul
एव	**certainly** ⟨*avyaya*⟩
आत्मना	**by the self** ⟨3.1⟩ m. *ātman* (*ātmā*) – the self, soul
जितः	**conquered** ⟨1.1⟩ m. *jita* (√*ji*...जये – to conquer; + .[k]ta)
अनात्मनः	**of one who has not [conquered] the mind** ⟨6.1⟩ m. *an-ātman* (-*ātmā*)...न [जितः] आत्मा यस्य, सः अनात्मा – who has not conquered the mind
तु	**but** ⟨*avyaya*⟩
शत्रुत्वे	**in enmity** ⟨7.1⟩ n. *śatrutva* (*śatru* – enemy; +.*tva*) – enmity
वर्तेत	**it would act** ⟨*vidhi* 1.1⟩ √*vrt[u]* 1A...वर्तने – to happen, act
आत्मा	**the mind** ⟨1.1⟩ m. *ātman* (*ātmā*) – the self, soul
एव	**certainly** ⟨*avyaya*⟩
शत्रुवत्	**like an enemy** ⟨*avyaya*⟩ *śatruvat* (*śatru* + *vat[i]*)

Subodhinī: येन आत्मना एव आत्मा (कार्य-कारण-सङ्घात-रूपः) जितः (वशी-कृतः), तस्य तथा-भूतस्य आत्मनः आत्मा एव बन्धुः । अनात्मनः (अजित-आत्मनः) तु आत्मा एव आत्मनः शत्रुत्वे (शत्रुवत् अपकारित्वे) वर्तेत ॥६.६॥

जित-आत्मनः स्वस्मिन् बन्धुत्वम् स्फुटयति – 'जित-आत्मनः' इति –

6.7

जितात्मनः प्रशान्तस्य परमात्मा समाहितः ।
शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥७॥

जितात्मनः प्रशान्तस्य	for one who has conquered the mind, [thus] pacified
शीतोष्ण-सुख-दुःखेषु	in cold and heat, happiness and distress
तथा मानापमानयोः	and in honor and dishonor
परमात्मा समाहितः ।	the Supersoul is established

"For one who has conquered the mind, the Supersoul is already reached, for he has attained tranquillity. To such a man happiness and distress, heat and cold, honor and dishonor are all the same."

जितात्मनः **of one whose mind is conquered** ⟨6.1⟩ m. *jita-ātman (-ātmā)*...जितः आत्मा यस्य, सः जितात्मा – whose mind is conquered

प्रशान्तस्य **of one who is pacified** ⟨6.1⟩ m. *praśānta (pra.√śam[u]* – to be pacified; + *.[k]ta)* – pacified

परमात्मा **the Supersoul** ⟨1.1⟩ m. *parama-_ātman (-ātmā)* (another reading:) *param ātmā* – the pure soul

समाहितः **established** ⟨1.1⟩ m. *samāhita (sam.ā.√[du]dhā[ñ]* – to establish; + *.[k]ta)*

शीतोष्ण-सुख-दुःखेषु **in cold and heat, happiness and distress** ⟨7.3⟩ n. *śīta-_uṣṇa-sukha-duḥkha* – cold and heat, happiness and distress

तथा **and** ⟨*avyaya*⟩

मानापमानयोः **in honor and dishonor** ⟨7.2⟩ m. *māna-_apamāna* – honor and dishonor

Subodhinī: जितः आत्मा येन, तस्य प्रशान्तस्य रागादि-रहितस्य एव परम् (केवलम्) आत्मा शीत-उष्णादिषु सत्सु अपि समाहितः (स्व-आत्म-निष्ठः भवति), न अन्यस्य । यद्वा, तस्य हृदि परमात्मा समाहितः (स्थितः भवति) ॥६.७॥
योग-आरूढस्य लक्षणम् श्रैष्ठ्यम् च उक्तम् उपपाद्य उपसंहरति – 'ज्ञान-विज्ञान-तृप्तात्मा' इति –

6.8

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।
युक्त इत्युच्यते योगी समलोष्ट्राश्मकाञ्चनः ॥८॥

ज्ञान-विज्ञान-तृप्तात्मा	being satisfied by knowledge and realization
कूट-स्थः विजितेन्द्रियः	situated in transcendence and sense-controlled
सम-लोष्ट्राश्म-काञ्चनः	regarding alike a lump of earth, stone and gold
योगी युक्तः इति उच्यते ।	the *yogī* is said to be 'situated in *yoga*'

"A person is said to be established in self-realization and is called a yogī (or mystic) when he is fully satisfied by virtue of acquired knowledge and realization. Such a person is situated in transcendence and is self-controlled. He sees everything – whether it be pebbles, stones or gold – as the same."

ज्ञान-विज्ञान-तृप्तात्मा **whose self is satisfied by knowledge and realization** ⟨1.1⟩ m. *jñāna-vijñāna-tṛpta-_ātman (-ātmā)*...ज्ञानेन विज्ञानेन च तृप्तः आत्मा यस्य, सः ज्ञान-विज्ञान-तृप्तात्मा

कूट-स्थः **who is situated in transcendence** ⟨1.1⟩ m. *kūṭa-stha* – 'standing on top', anything prominent, unmoving, changeless; situated in transcendence; the changeless spirit

विजितेन्द्रियः **whose senses are conquered** ⟨1.1⟩ m. *vijita-_indriya*...विजितानि इन्द्रियाणि यस्य, सः विजितेन्द्रियः

युक्तः **in *yoga*** ⟨1.1⟩ m. *yukta* (from any *yuj dhātu* + *.[k]ta*) – absorbed; restrained; united, engaged, endowed with

इति **thus** ⟨*avyaya*⟩

उच्यते **he is called** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak

योगी **the *yogī*** ⟨1.1⟩ m. *yogin (yogī)*

सम-लोष्ट्राश्म-काञ्चनः **for whom a lump of earth, stone and gold are the same** ⟨1.1⟩ m. *sama-loṣṭra-_aśma-kāñcana*...समानि लोष्ट्रम् च अश्मा च काञ्चनम् च यस्य, सः सम-लोष्ट्राश्म-काञ्चनः

लोष्ट्र (same as *loṣṭa* in 14.24) – a lump of earth or clay (as in *loṣṭavat* – 'like *loṣṭa*')
अश्मन् (*aśmā*) – a stone, rock; a precious stone
काञ्चन – gold; money, wealth, property
Other words for 'gold': *svarṇa, suvarṇa, hiraṇya, hema, rukma.*

Subodhinī: ज्ञानम् (औपदेशिकम्) विज्ञानम् (अपरोक्ष-अनुभवः), ताभ्याम् तृप्तः (निराकाङ्क्षः) आत्मा (चित्तम्) यस्य । अतः कूट-स्थः (निर्विकारः), अतएव विजितानि इन्द्रियाणि येन, अतएव समानि लोष्टादीनि यस्य, मृत्पिण्ड-पाषाण-सुवर्णेषु हेय-उपादेय-बुद्धि-शून्यः, सः 'युक्तः' (योग-आरूढः) इति उच्यते ॥६.८॥
सुहृद्-मित्रादिषु सम-बुद्धि-युक्तः ततः अपि श्रेष्ठः इति आह – 'सुहृद्' इति –

6.9

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥९॥

सुहृन्मित्रार्युदासीन-मध्यस्थ-द्वेष्य-बन्धुषु	towards well-wishers, friends, enemies, neutrals, mediators, hateful persons and relatives
साधुषु पापेषु अपि च	and also towards the pious and sinners
सम-बुद्धिः विशिष्यते ।	he who is equal-minded is [even] better

"A person is considered still further advanced when he regards honest well-wishers, affectionate benefactors, the neutral, mediators, the envious, friends and enemies, the pious and the sinners all with an equal mind."

सुहृन्मित्रार्युदासीन-मध्यस्थ-द्वेष्य-बन्धुषु **towards well-wishers, friends, enemies, neutrals, mediators, hateful persons and relatives** ⟨7.3⟩ m. *suhṛd-mitra-ari-udāsīna-madhyastha-dveṣya-bandhu* – well-wishers, friends, enemies, neutrals, mediators, hateful persons and relatives

उदासीन (from *ud.√ās[a]* – to sit above) – 'sitting above', indifferent, neutral; being neither a friend nor enemy

द्वेष्य (*dviṣ[a]*...अप्रीतौ – to hate; + *.ya*) – 'to be hated'

साधुषु **towards the pious** ⟨7.3⟩ m. *sādhu* – a pious man

अपि **also** ⟨*avyaya*⟩

च **and** ⟨*avyaya*⟩

पापेषु **towards the sinners** ⟨7.3⟩ m. *pāpa* – sinner

सम-बुद्धिः **whose intelligence is equal** ⟨1.1⟩ m. *sama-buddhi*...समा बुद्धिः यस्य, सः सम-बुद्धिः

विशिष्यते **he is distinguished** ⟨*acyuta* pass. 1.1⟩ *vi.√śiṣ[l]* – to distinguish

Subodhinī: सुहृद् (स्व-भावेन एव हित-आशंसी), मित्रम् (स्नेह-वशेन उपकारकः), अरिः (घातकः), उदासीनः (विवदमानयोः उभयोः अपि उपेक्षकः), मध्य-स्थः (विवदमानयोः उभयोः अपि हित-आशंसी), द्वेष्यः (द्वेष-विषयः), बन्धुः (सम्बन्धी), साधवः (सदाचाराः), पापाः (दुराचाराः), एतेषु समाः (राग-द्वेषादि-शून्याः) बुद्धिः यस्य, सः तु विशिष्टः ॥६.९॥

एवम् योग-आरूढस्य लक्षणम् उक्त्वा, इदानीम् तस्य स-अङ्गम् योगम् विधत्ते, 'योगी' (6.10) इत्यादिना 'सः योगी परमः मतः' (6.32) इति अन्तेन ग्रन्थेन – 'योगी' इति –

6.10

योगी युञ्जीत सततमात्मानं रहसि स्थितः ।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥१०॥

रहसि स्थितः एकाकी	living in seclusion and alone
यत-चित्तात्मा	his mind and body controlled
निराशीः अ-परिग्रहः	without desire or proprietorship
योगी आत्मानम् सततम् युञ्जीत ।	the *yogī* should always engage himself

"A transcendentalist should always engage his body, mind and self in relationship with the Supreme; he should live alone in a secluded place and should always carefully control his mind. He should be free from desires and feelings of possessiveness."

योगी **the *yogī*** ⟨1.1⟩ m. *yogin* (*yogī*)

युञ्जीत **he should engage** ⟨*vidhi* 1.1⟩ *√yuj[ir]*...योगे – to join, engage, gain

सततम् **constantly** ⟨*avyaya*⟩

आत्मानम् **himself** ⟨2.1⟩ m. *ātman* (*ātmā*) – the self, soul

रहसि **in seclusion** ⟨7.1⟩ n. *rahas* (*rahaḥ*) (from *rah[a]*...त्यागे – to abandon) – alone, solitude

स्थितः **staying** ⟨1.1⟩ m. *sthita* – standing, staying

एकाकी **who is alone** ⟨1.1⟩ m. *ekākin* (*ekākī*) (decl. like *yogin*)

यत-चित्तात्मा **whose mind and body are controlled** ⟨1.1⟩ m. *yata-citta-_ātman* (*-ātmā*)...यतौ चित्तम् च आत्मा च यस्य, सः यत-चित्तात्मा

निराशीः **who has no expectation** ⟨1.1⟩ m. *nirāśiṣ* (*nirāśīḥ*) (from *nir.ā.√śās[u]* – to not desire) – no desire, hope, expectation

अ-परिग्रहः **who is without proprietorship** ⟨1.1⟩ m. *a-parigraha*

परिग्रह – possession, proprietorship

Subodhinī: योगी (योग-आरूढः) आत्मानम् (मनः) युञ्जीत (समाहितम् कुर्यात्) । सततम् (निरन्तरम्) रहसि (एकान्ते) स्थितः सन्, एकाकी (सङ्ग-शून्यः), यतम् संयतम् चित्तम् आत्मा (देहः) च यस्य, निराशीः (निराकाङ्क्षः, निराहारः वा), अ-परिग्रहः (परिग्रह-शून्यः) च ॥६.१०॥

आसन-नियमम् दर्शयन्, आह – 'शुचौ' इति द्वाभ्याम् –

6.11...12

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥११॥

शुचौ देशे	in a sanctified place
न अत्युच्छ्रितम् न अतिनीचम्	neither too high nor too low
चैलाजिन-कुशोत्तरम्	with cloth and deerskin on *kuśa* grass
आत्मनः स्थिरम् आसनम् प्रतिष्ठाप्य . . .	[after thus] establishing one's firm seat . . .

"To practice yoga, one should go to a secluded place and should lay kuśa grass on the ground and then cover it with a deerskin and a soft cloth. The seat should be neither too high nor too low and should be situated in a sacred place."

शुचौ **in a sanctified** ⟨7.1⟩ m. *śuci* (from *√śuc[ir]*...पूतीभावे – to wet, be clean) – shining, bright; brilliantly white; clear, clean, pure, holy, innocent, honest, virtuous

(also from *√śuc[ir]*...पूतीभावे): *śukla* – white, bright, as in *śukla-pakṣa* (the bright half of the lunar month)

देशे **in a place** ⟨7.1⟩ m. *deśa* (from *√diś[a]*...दाने आज्ञापने कथने च – to give; instruct; narrate) – point, spot, place, part, region; a proper place; province, country, kingdom

(as in:) *deśa-kāla* – place and time; *deśī* – regional; (also from √ *diś[a]*...दाने आज्ञापने कथने च – to give; instruct; narrate): *upadeśa* – pointing out; instruction; *diś* (*dik*) – quarter or region pointed at, direction; (as in:) *dig-vijaya* – conquering all directions

प्रतिष्ठाप्य **[after] establishing** ⟨*avyaya*⟩ (*prati.√sthā* caus. – to stand firmly; + *.ya[p]*)

स्थिरम् **firm** ⟨2.1⟩ n. *sthira* – steady

आसनम् **a seat** ⟨2.1⟩ n. *āsana*

आसन (from *√ās[a]*...उपवेशने विद्यमानतायां च – to sit; be present) – sitting down; seat, place; sitting posture (there are 84 *āsanas*, like *padmāsana* – lotus-seat); (as in:) *simhāsana* (*simha-āsana*) – 'lion's-seat', 'king's-seat', a throne

आत्मनः **one's** ⟨6.1⟩ m. *ātman* (*ātmā*) – the self, soul

न **not** ⟨*avyaya*⟩

अत्युच्छ्रितम् **very much raised** ⟨2.1⟩ n. *atyucchrita* (*ati.ud.√śri[ñ]* – to raise very much; + *.[k]ta*)

न **not** ⟨*avyaya*⟩

अतिनीचम् **very low** ⟨2.1⟩ n. *atinīca*

नीच – low, short, deep; mean, inferior

चैलाजिन-कुशोत्तरम् **with cloth and deerskin on *kuśa* grass** ⟨2.1⟩ n. *cailājina-kuśottara* (*caila-_ajina-kuśa-_uttara*)...चैलम् च अजिनम् च कुशेभ्यः उत्तरे यस्मिन्, तद् चैलाजिन-कुशोत्तरम् – in which there is cloth and skin on *kuśa* grass

चैल = 'made of cloth (*cela*)'

अजिन – the hairy skin of an antelope or a tiger

कुश – the sacred grass used at ceremonies; (derived:) *kuśin* (*kuśī*) – 'furnished with *kuśa* grass'; *kuśala* – 'taking *kuśa*', well, competent; *kauśala* – virtue, cleverness

Subodhinī: शुद्धे स्थाने आत्मनः (स्वस्य) आसनम् स्थापयित्वा, कीदृशम् ? स्थिरम् (अ-चलम्), न अतीव-उन्नतम् नच अतिनीचम्। चैलम् (वस्त्रम्), अजिनम् (व्याघ्रादि-चर्म), चैल-अजिने कुशेभ्यः उत्तरे यस्मिन्। कुशानाम् उपरि चर्म, तद्-उपरि वस्त्रम् आस्तीर्य इति अर्थः ॥६.११॥

Note: This Yoga process is explained in the *Śrīmad-Bhāgavatam* thus: "Sitting on a level seat that is not too high or too low, keeping the body straight and erect yet comfortable, placing the two hands on one's lap and focusing the eyes on the tip of one's nose, one should purify the pathways of breathing by practicing the mechanical exercises of *pūraka*, *kumbhaka* and *recaka*, and then one should reverse the procedure. Having fully controlled the senses, one may thus practice *prāṇāyāma* step by step. Beginning from the *mūlādhāra-cakra*, one should move the life air continuously upward like the fibers in the lotus stalk until one reaches the heart, where the sacred syllable *om* is situated like the sound of a bell. One should thus continue raising the sacred syllable upward the distance of twelve *aṅgulas*, and there the *oṁkāra* should be joined with all other sounds. Keeping the eyes half closed and fixed on the tip of one's nose, being enlivened and alert, one should meditate on the lotus flower situated within the heart. This lotus has eight petals and is situated on an erect lotus

stalk. One should meditate on the sun, moon and fire, placing them one after the other within the whorl of that lotus flower. Placing My transcendental form within the fire, one should meditate upon it as the auspicious goal of all meditation. . . ." (*SB.* 11.14.32-46)

6.12

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ॥१२॥

...तत्र आसने उपविश्य	...[after] sitting down on that seat
मनः एकाग्रम् कृत्वा	[and after] concentrating the mind
यत-चित्तेन्द्रिय-क्रियः	controlling the activities of mind and senses
आत्म-विशुद्धये योगम् युञ्ज्यात् ।	he should practice *yoga* to purify the mind

"The yogī should then sit on it very firmly and practice yoga to purify the heart by controlling his mind, senses and activities and fixing the mind on one point."

तत्र **there** ⟨*avyaya*⟩

एकाग्रम् **one-pointed** ⟨2.1⟩ n. *eka-_agra*

मनः **the mind** ⟨2.1⟩ n. *manas* (*manaḥ*)

कृत्वा **[after] making** ⟨*avyaya*⟩ √*[ḍu]kṛ[ñ]*...करणे – to do; + *.[k]tvā*

यत-चित्तेन्द्रिय-क्रियः **whose activities of the mind and the senses are controlled** ⟨1.1⟩ m. *yata-citta-_indriya-kriya*...यताः चित्तस्य च इन्द्रियाणाम् च क्रियाः यस्य, सः यत-चित्तेन्द्रय-क्रियः

उपविश्य **[after] sitting down** ⟨*avyaya*⟩ *upa.√viś[a]* – to sit down; + *.ya[p]*

आसने **on the seat** ⟨7.1⟩ n. *āsana* – a seat

युञ्ज्यात् **he should perform** ⟨*vidhi* 1.1⟩ √*yuj[ir]*...योगे – to join, engage, gain

योगम् **Yoga** ⟨2.1⟩ m. *yoga*

आत्म-विशुद्धये **for the purification of the mind** ⟨4.1⟩ f. *ātma-viśuddhi*...आत्मनः विशुद्धिः इति आत्म-विशुद्धिः – purification of the mind

Subodhinī: तत्र (तस्मिन्) आसने उपविश्य, एकाग्रम् (विक्षेप-रहितम्) मनः कृत्वा, योगम् युञ्ज्यात् (अभ्यसेत्)। यताः (उपरताः) चित्तस्य इन्द्रियाणाम् च क्रियाः यस्य सः, आत्मनः (मनसः) विशुद्धये (उपशान्तये) ॥६.१२॥

चित्त-एकाग्रच-उपयोगिनीम् देहादि-धारणाम् दर्शयन् आह – 'समम्' इति द्वाभ्याम् –

6.13...14

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ।
सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥१३॥

काय-शिरोग्रीवम्	the trunk, head and neck
समम् अ-चलम् धारयन्	[while] holding straight and unmoving
स्थिरः,	[being] steady
स्वम् नासिकाग्रम् सम्प्रेक्ष्य	[after] staring at the tip of one's nose
दिशः च अनवलोकयन्...	and [while] not looking around...

"One should hold one's body, neck and head erect in a straight line and stare steadily at the tip of the nose."

समम् **straight** ⟨2.1⟩ m. *sama* – same, balanced

काय-शिरोग्रीवम् **body, head and neck** ⟨2.1⟩ m. *kāya-śiraḥ-_grīva*
शिरस् (*śiraḥ*) – the head; the upper or highest part of anything, top, peak; the first, leader; (as in:) *śiro-maṇi* – 'crest-jewel', best, chief
ग्रीव – neck; *grīvā* – the back part of the neck

धारयन् **[while] holding** ⟨1.1⟩ m. *dhārayat* (√*dhṛ[ñ]*...धारणे – to hold, support; + .*[ś]at[ṛ]*)

अ-चलम् **unmoving** ⟨2.1⟩ m. *a-cala*

स्थिरः **who is steady** ⟨1.1⟩ m. *sthira*

सम्प्रेक्ष्य **[after] staring** ⟨*avyaya*⟩ *sam.pra.*√*īkṣ[a]* – to stare; + .*ya[p]*

नासिकाग्रम् **at the tip of the nose** ⟨2.1⟩ n. *nāsikā-_agra*...नासिकायाः अग्रम् इति नासिकाग्रम्
अग्र – first, beginning; prominent, best; front, surface; tip, point; uppermost, top; (as in:) *bālāgra* (*bāla-_agra*) – 'tip of the hair'; *agra-ja* – 'first-born', an elder brother
nāsikā-agra, 'the forepart of the nose', can either mean the tip of the nose (Śrīdhara), or its highest part, which is between the eyebrows (Baladeva)

स्वम् **at the own** ⟨2.1⟩ n. *kṛṣṇanāma sva* – own

दिशः **directions** ⟨2.3⟩ f. *diś* (*dik*) – direction

च **and** ⟨*avyaya*⟩

अनवलोकयन् **[while] not seeing** ⟨1.1⟩ m. *an-avalokayat* (declined like *gacchat[ṛ]*)
अवलोकयत् (*ava.*√*lok[ṛ]* – to see; + .*[ś]at[ṛ]*) – [while] seeing

Subodhinī: 'कायः' इति देह-मध्य-भागः विवक्षितः, कायः च शिरः च ग्रीवा च काय-शिर-ग्रीवम्, मूलाधारात् आरभ्य मूर्धान्त-पर्यन्तम् समम् (अ-वक्रम्) अ-चलम् (निश्चलम्) धारयन्, स्थिरः (दृढ-प्रयत्नः भूत्वा) इति अर्थः । स्वकीयम् नासिका-अग्रम् सम्प्रेक्ष्य इति अर्ध-निमीलित-नेत्रः इति अर्थः, इतः (ततः) दिशः च अनवलोकयन्, 'आसीत' (6.14) इति उत्तरेण अन्वयः ॥६.१३॥

6.14

प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः ।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥१४॥

प्रशान्तात्मा विगत-भीः	being peaceful and fearless
ब्रह्मचारि-व्रते स्थितः	observing celibacy
मनः संयम्य	[after thus] controlling the mind
युक्तः मच्चित्तः मत्परः आसीत ।	the *yogī* should remain thinking of Me and devoted to Me

"Thus, with an unagitated, subdued mind, devoid of fear, completely free from sex life, one should meditate upon Me within the heart and make Me the ultimate goal of life."

प्रशान्तात्मा **who is peaceful** ⟨1.1⟩ m. *praśānta-_ātman* (-*ātmā*)...प्रशान्तः आत्मा यस्य, सः प्रशान्तात्मा – whose mind is peaceful

विगत-भीः **who is free from fear** ⟨1.1⟩ m. *vigata-bhī*...विगता भीः यस्य सः विगत-भीः – whose fear is gone

ब्रह्मचारि-व्रते **in the vow of celibacy** ⟨7.1⟩ n. *brahmacāri-vrata*...ब्रह्मचारिणः व्रतः इति ब्रह्मचारि-व्रतः – the vow of a *brahmacārī*

स्थितः **situated** ⟨1.1⟩ m. *sthita* (√*sthā*...स्थाने – to stand; + .*[k]ta*) – standing, staying

मनः **the mind** ⟨2.1⟩ n. *manas* (*manaḥ*)

संयम्य **[after] restraining** ⟨*avyaya*⟩ *sam.*√*yam[a]* – to restrain; + .*ya[p]*

मच्चित्तः **who thinks of me** ⟨1.1⟩ m. *mad-_citta*...मयि चित्तम् यस्य, सः मच्चित्तः – whose mind is in me

युक्तः **the *yogī*** ⟨1.1⟩ m. *yukta* (from any *yuj dhātu* + .*[k]ta*) – absorbed; restrained; united, engaged, endowed with

आसीत **he should sit** ⟨*vidhi* 1.1⟩ √*ās[a]*...उपवेशने विद्यमानतायां च – to sit; be present

मत्परः **devoted to Me** ⟨1.1⟩ m. *mad-_para*...अहम् परः यस्य, सः मत्परः – 'whose supreme [shelter or master] I am', subordinate or devoted to Me

Subodhinī: प्रशान्तः आत्मा (चित्तम्) यस्य, विगता भीः (भयम्) यस्य, ब्रह्मचारि-व्रते (ब्रह्मचर्ये) स्थितः (सन्), मनः संयम्य (प्रत्याहृत्य), मयि एव चित्तम् यस्य, अहम् एव परः (पुरुषार्थः) यस्य, सः मद्-परः । एवम् युक्तः भूत्वा आसीत (तिष्ठेत्) ॥६.१४॥
योग-अभ्यास-फलम् आह – 'युञ्जन् एवम्' इति –

6.15

युञ्जन्नेवं सदात्मानं योगी नियतमानसः ।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥१५॥

एवम् सदा आत्मानम् युञ्जन्	thus always engaging himself
नियत-मानसः योगी	the *yogī*, his mind controlled
मत्संस्थाम् निर्वाण-परमाम् शान्तिम्	the peace of liberation, which is My residence
अधिगच्छति ।	he attains

"Thus practicing constant control of the body, mind and activities, the mystic transcendentalist, his mind regulated, attains to the kingdom of God (or the abode of Kṛṣṇa) by cessation of material existence."

युञ्जन् **[while] engaging** ⟨1.1⟩ m. *yuñjat* (*√yuj[ir]*...योगे – to join, engage, gain; + *.[ś]at[r]*)

एवम् **thus** ⟨*avyaya*⟩

सदा **always** ⟨*avyaya*⟩

आत्मानम् **himself** ⟨2.1⟩ m. *ātman* (*ātmā*) – the self, soul

योगी **the *yogī*** ⟨1.1⟩ m. *yogin* (*yogī*) – transcendentalist

नियत-मानसः **whose mind is controlled** ⟨1.1⟩ m. *niyata-mānasa*...नियतम् मानसम् यस्य, सः नियत-मानसः

मानस (from *manaḥ*) – mental; mind

शान्तिम् **peace** ⟨2.1⟩ f. *śānti*

निर्वाण-परमाम् **in which the highest goal is liberation** ⟨2.1⟩ f. *nirvāṇa-paramā* (*.ā[p]*) ...निर्वाणम् परमम् यस्याम्, सा निर्वाण-परमा

मत्संस्थाम् **which is my residence** ⟨2.1⟩ f. *mad-_saṁsthā*

अधिगच्छति **he attains** ⟨*acyuta* 1.1⟩ *adhi.√gam[ḷ]* – to go over, attain

Subodhinī: एवम् (उक्त-प्रकारेण) सदा आत्मानम् (मनः) युञ्जन् (समाहितम् कुर्वन्), नियतम् (निरुद्धम्) मानसम् (चित्तम्) यस्य, सः शान्तिम् (संसार-उपरतिम्) प्रप्नोति । कथम्-भूताम् ? निर्वाणम् परमम् प्राप्यम् यस्याम्, ताम् मद्-संस्थाम् (मद्-रूपेण अवस्थितिम्) ॥६.१५॥
योग-अभ्यास-निष्ठस्य आहारादि-नियमम् आह – 'न' इति द्वाभ्याम् –

6.16

नात्यश्नतस्तु योगो ऽस्ति न चैकान्तमनश्नतः ।
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥१६॥

हे अर्जुन !	O Arjuna!
अत्यश्नतः तु योगः न अस्ति,	there is no *yoga* for one who eats too much,
न च एकान्तम् अनश्नतः,	or for one who is only fasting,
न च अतिस्वप्न-शीलस्य,	nor for one who sleeps too much,

न एव च जाग्रतः ।	and never for one who stays awake [too much]

"There is no possibility of one's becoming a yogī, O Arjuna, if one eats too much or eats too little, sleeps too much or does not sleep enough."

न **not** ⟨*avyaya*⟩

अत्यश्नतः **of one who is eating too much** ⟨6.1⟩ m. *atyaśnat* (*ati.√aś[a]* – to eat too much; + *.[ś]at[r]*) – [while] overeating

तु **but** ⟨*avyaya*⟩

योगः *yoga* ⟨1.1⟩ m. *yoga*

अस्ति **there is** ⟨*acyuta* 1.1⟩ *√as[a]*...भुवि – to be, exist

न **not** ⟨*avyaya*⟩

च **and** ⟨*avyaya*⟩

एकान्तम् **only** ⟨*avyaya*⟩ – solely, extremely

अनश्नतः **of one who is not eating** ⟨6.1⟩ m. *an-aśnat* – [while] not eating

न **not** ⟨*avyaya*⟩

च **and** ⟨*avyaya*⟩

अतिस्वप्न-शीलस्य **of one who sleeps too much** ⟨6.1⟩ m. *atisvapna-śīla*...अति स्वप्तुम् शीलम् यस्य, सः अतिस्वप्न-शीलः – whose habit is to sleep too much

शील – habit, usage, practise, conduct, tendency; (as in:) *suśīla* – good character, moral conduct; *anuśīlana* – repeated practise

जाग्रतः **of one who is staying awake** ⟨6.1⟩ m. *jāgrat* (*√jāgṛ*...निद्राक्षये – to be awake; + *.[ś]at[r]*) – [while] staying awake

न एव **never** ⟨*avyaya*⟩

च **and** ⟨*avyaya*⟩

अर्जुन **O Arjuna!** ⟨8.1⟩ m. *arjuna* – white, 'who is pure in actions'

Subodhinī: अत्यन्तम् (अधिकम्) भुञ्जानस्य, एकान्तम् (अत्यन्तम्) अ-भुञ्जानस्य अपि योगः (समाधिः) न भवति, तथा अतिनिद्रा-शीलस्य अतिजाग्रतः च योगः नैव अस्ति ॥६.१६॥
तर्हि कथम्-भूतस्य योगः भवति ? इति अतः आह – 'युक्त' इति –

6.17

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥१७॥

युक्ताहार-विहारस्य	for one whose eating and recreation are regulated
कर्मसु युक्त-चेष्टस्य	whose engagement in work is regulated
युक्त-स्वप्नावबोधस्य	whose sleeping and waking are regulated

दुःख-हा योगः भवति ।	there is *yoga*, which is the destroyer of miseries

"He who is regulated in his habits of eating, sleeping, recreation and work can mitigate all material pains by practicing the yoga system."

युक्ताहार-विहारस्य **of one whose eating and recreation are regulated** ⟨6.1⟩ m. *yukta-_āhāra-vihāra*...युक्तौ आहारः च विहारः च यस्य, सः युक्ताहार-विहारः – whose food and moving are regulated

युक्त – controlled, regulated, moderate

विहार – walking for pleasure, recreation

युक्त-चेष्टस्य **of one whose engagement is regulated** ⟨6.1⟩ m. *yukta-ceṣṭa*...युक्ता चेष्टा यस्य, सः युक्त-चेष्टः – whose engagement is regulated

चेष्टा – 'moving', behavior, activity, effort

कर्मसु in activities ⟨7.3⟩ n. *karman (karma)* – activity

युक्त-स्वप्नावबोधस्य **of one whose sleeping and waking are regulated** ⟨6.1⟩ m. *yukta-svapna-_avabodha*...युक्तौ स्वप्नः च अवबोधः च यस्य, सः युक्त-स्वप्नावबोधः – whose sleeping and waking are regulated

अवबोध (from *ava.√budh[ir]* – to know, be awake) – waking

योगः *yoga* ⟨1.1⟩ m. *yoga*

भवति **there is** ⟨*acyuta* 1.1⟩ *√bhū*...सत्तायाम् – to be, exist, become

दुःख-हा **the destroyer of miseries** ⟨1.1⟩ m. *duḥkha-han (-hā)*

han (-hā) (from *√han[a]*...हिंसा-गत्योः – to harm, kill; go) – the slayer

Subodhinī: युक्तः (नियतः) आहारः विहारः च (गतिः) यस्य, कर्मसु (कार्येषु) युक्ता (नियता) एव चेष्टा यस्य, युक्तौ (नियतौ) स्वप्न-अवबोधौ (निद्रा-जागरौ) यस्य, तस्य दुःख-निवर्तकः योगः भवति (सिद्ध्यति) ॥६.१७॥

कदा निष्पन्न-योगः पुरुषः भवति ? इति अपेक्षायाम् आह – 'यदा' इति –

6.18

यदा विनियतं चित्तमात्मन्येवावतिष्ठते ।
निस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥१८॥

यदा विनियतम् चित्तम्	when the well-controlled mind
आत्मनि एव अवतिष्ठते,	stays in the self alone,
तदा सर्व-कामेभ्यः निःस्पृहः	then, being free from hankering for all enjoyments
युक्तः इति उच्यते ।	one is said to be in *yoga*

"When the yogī, by practice of yoga, disciplines his mental activities and becomes situated in transcendence – devoid of all material desires – he is said to be well established in yoga."

यदा **when** ⟨*avyaya*⟩

विनियतम् **restrained** ⟨1.1⟩ n. *viniyata (vi.ni.√yam[a]* – to restrain; + *.[k]ta)*

चित्तम् **the mind** ⟨1.1⟩ n. *citta* – thought, mind

आत्मनि **in the self** ⟨7.1⟩ m. *ātman (ātmā)* – the self, soul

एव **certainly** ⟨*avyaya*⟩

अवतिष्ठते **it stays** ⟨*acyuta* 1.1⟩ *ava.√sthā* – to stay

निःस्पृहः **who is free from hankering** ⟨1.1⟩ m. *niḥspṛha*

सर्व-कामेभ्यः **from all desires** ⟨5.3⟩ m. *sarva-kāma* – all desires

युक्तः **in *yoga*** ⟨1.1⟩ m. *yukta* (from any *yuj dhātu* + *.[k]ta*) – absorbed; restrained; united, engaged, endowed with

इति **thus** ⟨*avyaya*⟩

उच्यते **he is called** ⟨*acyuta* pass. 1.1⟩ *√vac[a]*...परिभाषणे – to speak

तदा **then** ⟨*avyaya*⟩

Subodhinī: विनियतम् (विशेषेण निरुद्धम्) सत्-चित्तम् आत्मनि एव यदा निश्चलम् तिष्ठति, किंच, सर्व-कामेभ्यः (ऐहिक-आमुष्मिक-भोगेभ्यः) निःस्पृहः (विगत-तृष्णः) भवति, तदा 'युक्तः' (समाहित-चित्तः, प्राप्त-योगः) इति उच्यते ॥६.१८॥

आत्म-ऐक्य-आकारतया अवस्थितस्य चित्तस्य उपमानम् आह – 'यथा' इति –

6.19

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥१९॥

यथा निवात-स्थः दीपः	'as a lamp in a windless place
न इङ्गते,	does not flicker',
आत्मनः योगम् युञ्जतः	practicing meditation on the self
यत-चित्तस्य योगिनः	for a *yogī* of controlled mind
सा उपमा स्मृता ।	that comparison is given

"As a lamp in a windless place does not waver, so the transcendentalist, whose mind is controlled, remains always steady in his meditation on the transcendent self."

यथा **as** ⟨*avyaya*⟩

दीपः **a lamp** ⟨1.1⟩ m. *dīpa*

निवात-स्थः **which stands in a windless place** ⟨1.1⟩ m. *nivāta-stha*...यः निवाते तिष्ठति, सः निवात-स्थः

निवात (*ni.√vā* – to cease to blow; + *.[k]ta*) – 'not blown', no wind

न **not** ⟨*avyaya*⟩

इङ्गते **it flickers** ⟨*acyuta* 1.1⟩ *√ig[i]*...गत्यर्थाः – to go, flicker

सा **that** ⟨1.1⟩ f. *kṛṣṇanāma tad* – (first person) he, that
उपमा **comparison** ⟨1.1⟩ f. *upamā* – comparison, similarity
स्मृता **is given** ⟨1.1⟩ f. *smṛtā* (√*smṛ*...चिन्तायाम् – to think, remember; + .*[k]ta* + .*ā[p]*) – remembered, thought, recorded
योगिनः **of a** ***yogī*** ⟨6.1⟩ m. *yogin* (*yogī*) – transcendentalist
यत-चित्तस्य **of one whose mind is controlled** ⟨6.1⟩ m. *yata-citta*...यतम् चित्तम् यस्य, सः यत-चित्तः – whose mind is controlled
युञ्जतः **of one who is practicing** ⟨6.1⟩ m. *yuñjat* (√*yuj[ir]*...योगे – to join, engage, gain; + .*[ś]at[ṛ]*) – [while] engaging
योगम् ***yoga*** ⟨2.1⟩ m. *yoga*
आत्मनः **of the self** ⟨6.1⟩ m. *ātman* (*ātmā*) – the self, soul

Subodhinī: वात-शून्ये देशे स्थितः दीपः यथा न इङ्गते (न विचलति), सा उपमा (दृष्टान्तः) । कस्य ? आत्म-विषयम् योगम् युञ्जतः (अभ्यसतः) योगिनः, यतम् (नियतम्) चित्तम् यस्य, तस्य निष्कम्पतया प्रकाशकतया च चित्तम् तद्वत् तिष्ठति इति अर्थः ॥६.१९॥

'यम् सन्न्यासम् इति प्राहुः, योगम् तम् विद्धि पाण्डव' (6.2) इति आदौ 'कर्म' एव योग-शब्देन उक्तम्, 'न अत्यश्नतः तु योगः अस्ति' (6.16) इति आदौ तु 'समाधिः' योग-शब्देन उक्तः । तत्र मुख्यः योगः कः ? इति अपेक्षायाम्, 'समाधिम्' एव स्व-रूपतः फलतः च लक्षयन्, सः एव मुख्यः योगः इति आह – 'यत्र' इति सार्धैः त्रिभिः –

6.20...23

यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥२०॥

यत्र	in which [stage]
योग-सेवया निरुद्धम् चित्तम्	the mind, controlled by *yoga* practice
उपरमते,	becomes quite,
यत्र च	and in which
आत्मना आत्मानम् एव पश्यन्,	[while] seeing the self by the mind
आत्मनि तुष्यति . . .	one is satisfied in the self . . .

"In the stage of perfection called trance, or samādhi, one's mind is completely restrained from material mental activities by practice of yoga. This perfection is characterized by one's ability to see the self by the pure mind and to relish and rejoice in the self."

यत्र **where** ⟨*avyaya*⟩
उपरमते **it stops** ⟨*acyuta* 1.1⟩ *upa*.√*ram[u]* – to stop

चित्तम् **the mind** ⟨1.1⟩ n. *citta* – thought, mind
निरुद्धम् **controlled** ⟨1.1⟩ n. *niruddha* – restrained
योग-सेवया **by practice of** ***yoga*** ⟨3.1⟩ f. *yoga-sevā*...योगस्य सेवा इति योग-सेवा – 'service of *yoga*', spiritual practice
यत्र **where** ⟨*avyaya*⟩
च एव **and certainly** ⟨*avyaya*⟩
आत्मना **by the mind** ⟨3.1⟩ m. *ātman* (*ātmā*) – the self, soul
आत्मानम् **the self** ⟨2.1⟩ m. *ātman* (*ātmā*) – the self, soul
पश्यन् **[while] seeing** ⟨1.1⟩ m. *paśyat* (√*dṛś[ir]*...प्रेक्षणे – to see; + .*[ś]at[ṛ]*)
आत्मनि **in the self** ⟨7.1⟩ m. *ātman* (*ātmā*) – the self, soul
तुष्यति **he is satisfied** ⟨*acyuta* 1.1⟩ √*tuṣ[a]*...तुष्टौ – to be satisfied

Subodhinī: यत्र (यस्मिन् अवस्था-विशेषे) योग-अभ्यासेन निरुद्धम् चित्तम् उपरतम् भवति इति योगस्य स्वरूप-लक्षणम् उक्तम् । तथा च पातञ्जलम् सूत्रम् 'योगः चित्त-वृत्ति-निरोधः' (*Yoga-sūtras* 1.2) इति । इष्ट-प्राप्ति-लक्षणेन फलेन तम् एव लक्षयति, यत्र च (यस्मिन् अवस्था-विशेषे) आत्मना (शुद्धेन मनसा) आत्मानम् एव पश्यति, नतु देहादि, पश्यन् च आत्मनि एव तुष्यति, नतु विषयेषु । 'यत्र' इति आदिनाम् यद्-शब्दानाम् 'तम् योग-संज्ञितम् विद्यात्' (6.23) इति चतुर्थेन अन्वयः ॥६.२०॥

आत्मनि एव तोषे हेतुम् आह – 'सुखम्' इति –

6.21

सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम् ।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥२१॥

. . . यत्र	. . . in which
यद् तद् आत्यन्तिकम् अतीन्द्रियम्	that infinite and transcendental
बुद्धि-ग्राह्यम् सुखम्	happiness, experienced by intelligence
वेत्ति,	one knows,
स्थितः च	and being situated [in which]
अयम् तत्त्वतः न एव चलति	this [*yogī*] never diverts from the truth . . .

"In that joyous state, one is situated in boundless transcendental happiness, realized through transcendental senses. Established thus, one never departs from the truth. . . ."

सुखम् **happiness** ⟨2.1⟩ n. *sukha* – easiness, happiness
आत्यन्तिकम् **infinite** ⟨2.1⟩ n. *ātyantika* (from *atyanta* – beyond limit, very much) – unlimited; final; entire, universal (as the destruction of the world)
यद् तद् **that one** ⟨2.1⟩ n. *kṛṣṇanāmas yad, tad* – (relative) who/which, he/that

बुद्धि-ग्राह्यम् **to be grasped by intelligence** ⟨2.1⟩ n. *buddhi-grāhya*...बुद्ध्या ग्राह्यम् इति बुद्धि-ग्राह्यम्
ग्राह्य (√*grah[a]*...उपादाने – to take; + *.ya*) – to be taken

अतीन्द्रियम् **transcendental** ⟨2.1⟩ n. *atīndriya* (*ati.indriya*) – 'beyond the senses'

वेत्ति **he knows** ⟨*acyuta* 1.1⟩ √*vid[a]* 2P...ज्ञाने – to know

यत्र **where** ⟨*avyaya*⟩

न **not** ⟨*avyaya*⟩

च **and** ⟨*avyaya*⟩

एव **certainly** ⟨*avyaya*⟩

अयम् **he** ⟨1.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this

स्थितः **situated** ⟨1.1⟩ m. *sthita* (√*sthā*...स्थाने – to stand; + *.[k]ta*) – standing, staying

चलति **he moves** ⟨*acyuta* 1.1⟩ √*cal[a]*...कम्पने – to move, shake

तत्त्वतः **from the truth** ⟨*avyaya*⟩ (*tattvatas*; *tattva* + *.tas[i]*)

Subodhinī: यत्र (यस्मिन् अवस्था-विशेषे) यद् तद् (किमपि) निरतिशयम् आत्यन्तिकम् (नित्यम्) सुखम् वेत्ति। ननु 'तदा विषय-इन्द्रिय-सम्बन्ध-अभावात् कुतः सुखम् स्यात्?' तत्र आह – अतीन्द्रियम् (विषय-इन्द्रिय-सम्बन्ध-अतीतम्), केवलम् बुद्ध्या एव आत्म-आकारतया ग्राह्यम्। अतएव च यत्र स्थितः सन्, तत्त्वतः (आत्म-स्वरूपात्) नैव चलति ॥६.२१॥
अ-चलत्वम् एव उपपादयति – 'यम्' इति –

6.22

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते ॥२२॥

. . . यम् च लब्ध्वा	. . . and [after] gaining which
ततः अ-परम् लाभम्	another gain besides that
अधिकम् न मन्यते,	he does not think to be greater,
यस्मिन् स्थितः	being situated in which
गुरुणा दुःखेन अपि	even by great misery
न विचाल्यते . . .	he is not shaken . . .

". . . and upon gaining this he thinks there is no greater gain. Being situated in such a position, one is never shaken, even in the midst of greatest difficulty."

यम् **that which** ⟨2.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

लब्ध्वा **[after] obtaining** ⟨*avyaya*⟩ √*[du]labh[aṣ]*...प्राप्तौ – to obtain; + *.[k]tvā*

च **and** ⟨*avyaya*⟩

अ-परम् **another** ⟨2.1⟩ m. *kṛṣṇanāma a-para* – later, inferior, other

लाभम् **gain** ⟨2.1⟩ m. *lābha*

मन्यते **he thinks** ⟨*acyuta* 1.1⟩ √*man[a]* 4A...बोधने – to know, think

न **not** ⟨*avyaya*⟩

अधिकम् **more** ⟨2.1⟩ m. *adhika*

ततः **than that** ⟨*avyaya*⟩ (*tatas*; from *tad* + *.tas[i]*) – from/after/than that

यस्मिन् **in which** ⟨7.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

स्थितः **situated** ⟨1.1⟩ m. *sthita* (√*sthā*...स्थाने – to stand; + *.[k]ta*) – standing, staying

न **not** ⟨*avyaya*⟩

दुःखेन **by misery** ⟨3.1⟩ n. *duḥkha* – misery

गुरुणा **by heavy** ⟨3.1⟩ n. *guru* – heavy

अपि **also** ⟨*avyaya*⟩

विचाल्यते **he is shaken** ⟨*acyuta* pass. caus. 1.1⟩ *vi.*√*cal[a]* – to move, shake

Subodhinī: यम् (आत्म-सुख-रूप-लाभम्) लब्ध्वा, ततः अधिकम् अ-परम् लाभम् न मन्यते (न चिन्तयति), तस्य एव निरतिशय-सुखत्वात्। यस्मिन् च स्थितः, महता अपि शीत-उष्णादि-दुःखेन न विचाल्यते (न अभिभूयते)। एतेन अनिष्ट-निवृत्ति-फलेन अपि योग-लक्षणम् उक्तम् द्रष्टव्यम् ॥६.२२॥
यः एवम्-भूतः अवस्था-विशेषः, तम् आह – 'तम्' इति अर्धेन –

6.23

तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम् ॥२३॥

. . . तम् दुःख-संयोग-वियोगम् . . .	that [state of] freedom from misery
योग-संज्ञितम् विद्यात्।	one should know to be *yoga*

"This indeed is actual freedom from all miseries arising from material contact."

तम् **that** ⟨2.1⟩ m. *kṛṣnanāma tad* – (first person) he, that

विद्यात् **one should know** ⟨*vidhi* 1.1⟩ √*vid[a]* 2P...ज्ञाने – to know

दुःख-संयोग-वियोगम् **separation from contact with miseries** ⟨2.1⟩ m. *duḥkha-saṁyoga-viyoga*...दुःख-संयोगेन वियोगः इति दुःख-संयोग-वियोगः
वियोग – separation, loss, absence, substraction

योग-संज्ञितम् **called *yoga*** ⟨2.1⟩ m. *yoga-saṁjñita*
संज्ञित (*nāma-dhātu saṁjñā* + *[n]i* + *.[k]ta*) – assigned, designated; *saṁjñā* – agreement, harmony; clear understanding; a sign, direction, name, technical term ('called', 'named')

Subodhinī: दुःख-शब्देन दुःख-मिश्रितत्वात् वैषयिकम् सुखम् अपि गृह्यते। दुःखस्य संयोगेन स्पर्श-मात्रेण अपि वियोगः यस्मिन्, तम् अवस्था-विशेषम् योग-संज्ञितम् (योग-

शब्द-वाच्यम्) जानीयात् । परमात्मना क्षेत्र-ज्ञस्य योजनम् 'योगः' । यद्वा, दुःख-संयोगेन वियोगः एव, शूरे कातर-शब्दवत् विरुद्ध-लक्षणया, 'योगः' उच्यते । कर्मणि तु योग-शब्दः तद्-उपायत्वात् औपचारिकः एव इति भावः ॥६.२३॥

यस्मात् एवम् महा-फलः योगः, तस्मात् सः एव यत्नतः अभ्यसनीयः इति आह – 'सः' इति सार्धेन –

6.24...25

स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा ।
सङ्कल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः ।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥२४॥

निश्चयेन अ-निर्विण्ण-चेतसा	with determination and an undepressed mind
सः योगः योक्तव्यः,	that *yoga* is to be practiced,
सर्वान् सङ्कल्प-प्रभवान् कामान्	all sense gratifications born from desire
अ-शेषतः त्यक्त्वा	[after] completely giving up
मनसा एव	and with the mind
इन्द्रिय-ग्रामम् समन्ततः विनियम्य . . .	[after] completely controlling all the senses . . .

"One should engage oneself in the practice of yoga with determination and faith and not be deviated from the path. One should abandon, without exception, all material desires born of mental speculation and thus control all the senses on all sides by the mind."

सः **that** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
निश्चयेन **with determination** ⟨3.1⟩ m. *niścaya* – resolve, conviction
योक्तव्यः **to be practiced** ⟨1.1⟩ m. *yoktavya* (√*yuj[ir]*...योगे – to join, engage, gain; + .*tavya*)
योगः *yoga* ⟨1.1⟩ m. *yoga*
अ-निर्विण्ण-चेतसा **with an undepressed mind** ⟨3.1⟩ m. *a-nirviṇṇa-cetas* (-*cetaḥ*)...अ-निर्विण्णम् चेतः इति अ-निर्विण्ण-चेतः – a mind which is not depressed
निर्विण्ण – 'without indifference', undespondent, undepressed
सङ्कल्प-प्रभवान् **which are born from desire** ⟨2.3⟩ m. *saṅkalpa-prabhava*...सङ्कल्पात् प्रभवः यस्य, सः सङ्कल्प-प्रभवः – whose birth is from desire
कामान् **sense gratifications** ⟨2.3⟩ m. *kāma* – desire
त्यक्त्वा **[after] abandoning** ⟨*avyaya*⟩ √*tyaj[a]*...हानौ – to abandon; + .*[k]tvā*
सर्वान् **all** ⟨2.3⟩ m. *kṛṣṇanāma sarva*
अ-शेषतः **completely** ⟨*avyaya*⟩ (*a-śeṣatas*; *a-śeṣa* + .*tas[i]*) – without remainder
मनसा **with the mind** ⟨3.1⟩ n. *manas* (*manaḥ*) – mind
एव **certainly** ⟨*avyaya*⟩

इन्द्रिय-ग्रामम् **the group of the senses** ⟨2.1⟩ m. *indriya-grāma*...इन्द्रियाणाम् ग्रामः इति इन्द्रिय-ग्रामः
विनियम्य **[after] restraining** ⟨*avyaya*⟩ *vi.ni.*√*yam[a]* – to restrain; + .*ya[p]*
समन्ततः **completely** ⟨*avyaya*⟩ (*samantatas*) from *samanta* – complete; + .*tas[i]*

Subodhinī: सः योगः निश्चयेन (शास्त्र-आचार्य-उपदेश-जनितेन) योक्तव्यः (अभ्यसनीयः) । यद्यपि शीघ्रम् न सिद्ध्यति, तथापि अ-निर्विण्णेन (निर्वेद-रहितेन) चेतसा योक्तव्यः । दुःख-बुद्ध्या प्रयत्न-शैथिल्यम् 'निर्वेदः' । सङ्कल्पात् प्रभवः येषाम्, तान् योग-प्रतिकूलान् सर्वान् कामान् अ-शेषतः (स-वासनान्) त्यक्त्वा, मनसा एव (विषय-दोष-दर्शिना) सर्वतः प्रसरन्तम् इन्द्रिय-समूहम् विशेषेण नियम्य, 'योगः योक्तव्यः' इति पूर्वेण अन्वयः ॥६.२४॥

यदि तु प्राक्तन-कर्म-संस्कारेण मनः विचलेत्, तर्हि धारणया स्थिरी-कुर्यात् इति आह – 'शनैः' इति –

Note: Śrīdhara Svāmī here counts the first line of our verse 6.24, which says '*yogaḥ yoktavyaḥ*', to the previous verse 6.23. He then connects his verses 6.23-24, while other commentators connect the verses 6.24-25.

6.25

शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ॥२५॥

. . . धृति-गृहीतया बुद्ध्या	. . . and with firmly controlled intelligence
मनः आत्म-संस्थम् कृत्वा	[after] fixing the mind in the self
शनैः शनैः उपरमेत्,	one should gradually turn away,
न किञ्चिद् अपि चिन्तयेत् ।	[i.e.] one should think of nothing else

"Gradually, step by step, one should become situated in trance by means of intelligence sustained by full conviction, and thus the mind should be fixed on the self alone and should think of nothing else."

शनैः शनैः **gradually** ⟨*avyaya*⟩
उपरमेत् **one should stop** ⟨*vidhi* 1.1⟩ *upa.*√*ram[u]* – to stop
बुद्ध्या **with the intelligence** ⟨3.1⟩ f. *buddhi*
धृति-गृहीतया **controlled with determination** ⟨3.1⟩ f. *dhṛti-gṛhītā* (.*ā[p]*)...धृत्या गृहीता इति धृति-गृहीता – 'grasped by determination'
धृति – firmness, determination
गृहीत (√*grah[a]*...उपादाने – to take; + .*[k]ta*) – taken, controlled
आत्म-संस्थम् **established in the self** ⟨2.1⟩ n. *ātma-saṁstha*...यद् आत्मनि सम्यक् तिष्ठति, तद् आत्म-संस्थम्

मनः **the mind** ⟨2.1⟩ n. *manas (manaḥ)*
कृत्वा **[after] doing** ⟨*avyaya*⟩ √*[du]kr[ñ]* – to do; + *.[k]tvā*
न **not** ⟨*avyaya*⟩
किञ्चिद् **something** ⟨2.1⟩ n. *kṛṣṇanāma kim (kim)* + *.cid*
अपि **also** ⟨*avyaya*⟩
चिन्तयेत् **one should think** ⟨*vidhi* 1.1⟩ √*cit[i]*...चिन्त्याम् – to think, remember

Subodhinī: धृतिः (धारणा) तया गृहीतया (वशी-कृतया) बुद्ध्या आत्म-संस्थम् (आत्मनि एव सम्यक् स्थितम्, निश्चलम्) मनः कृत्वा, उपरमेत् । तद् च शनैः शनैः अभ्यास-क्रमेण, नतु सहसा । उपरम-स्वरूपम् आह – 'न किञ्चिद् अपि चिन्तयेत्', निश्चले मनसि स्वयम् एव प्रकाशमान-परमानन्द-स्वरूपः भूत्वा, आत्म-ध्यानात् अपि निवर्तेत इति अर्थः ॥६.२५॥
एवम् अपि रजोगुण-वशात् यदि मनः प्रचलेत्, तर्हि पुनः प्रत्याहारेण वशी-कुर्यात् इति आह – 'यतः' इति –

6.26

यतो यतो निश्चलति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥२६॥

यतः यतः	from wherever
चञ्चलम् अ-स्थिरम् मनः निश्चलति,	the flickering and unsteady mind wanders,
ततः ततः एतद् नियम्य	[after] restraining it from there
आत्मनि एव वशम् नयेत् ।	one shoulf bring it under the control of the self

"From wherever the mind wanders due to its flickering and unsteady nature, one must certainly withdraw it and bring it back under the control of the self."

यतः यतः **from wherever** ⟨*avyaya*⟩ (*yatas*; from *yad* + *.tas[i]*) – from where
निश्चलति **it moves** ⟨*acyuta* 1.1⟩ *nir.*√*cal[a]* – to move, shake
मनः **the mind** ⟨1.1⟩ n. *manas (manaḥ)*
चञ्चलम् **flickering** ⟨1.1⟩ n. *cañcala* (from √*cal[a]*...कम्पने – to move, shake)
अ-स्थिरम् **unsteady** ⟨1.1⟩ n. *a-sthira*
ततः ततः **from there** ⟨*avyaya*⟩ (*tatas*; from *tad* + *.tas[i]*) – from/after/than that
नियम्य **[after] restraining** ⟨*avyaya*⟩ *ni.*√*yam[a]* – to restrain; + *.ya[p]*
एतद् **it** ⟨2.1⟩ n. *kṛṣṇanāma etad* – (first person) he, this
आत्मनि **in the self** ⟨7.1⟩ m. *ātman (ātmā)* – the self, soul
एव **certainly** ⟨*avyaya*⟩
वशम् **to the control** ⟨2.1⟩ m. *vaśa* – control
नयेत् **one should lead** ⟨*vidhi* 1.1⟩ √*nī[ñ]*...प्रापणे – to reach, lead

Subodhinī: स्व-भावतः चञ्चलम्, धार्यमाणम् अपि अ-स्थिरम् मनः यम् यम् विषयम् प्रति निर्गच्छति, ततः ततः प्रत्याहृत्य, आत्मनि एव स्थिरम् कुर्यात् ॥६.२६॥
एवम् प्रत्याहार-आदिभिः पुनः पुनः मनः वशी-कुर्वन्तम्, रजोगुण-क्षये सति योग-सुखम् प्राप्नोति इति आह – 'प्रशान्त-मनसम्' इति –

6.27

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥२७॥

शान्त-रजसम् प्रशान्त-मनसम्	of calmed passions and pacified mind,
अ-कल्मषम् ब्रह्म-भूतम्	sinless and self-realized,
एनम् योगिनम् हि	to this *yogī*
उत्तमम् सुखम् उपैति ।	comes supreme happiness

"The yogī whose mind is fixed on Me verily attains the highest perfection of transcendental happiness. He is beyond the mode of passion, he realizes his qualitative identity with the Supreme, and thus he is freed from all reactions to past deeds."

प्रशान्त-मनसम् **whose mind is pacified** ⟨2.1⟩ m. *praśānta-manas (-manaḥ)*...प्रशान्तम् मनः यस्य, सः प्रशान्त-मनसः
प्रशान्त (*pra.*√*śam[u]* – to be pacified; + *.[k]ta*) – pacified
हि **indeed** ⟨*avyaya*⟩
एनम् **to this** ⟨2.1⟩ m. *kṛṣṇanāma etad* – (first person) he, this
योगिनम् ***yogī*** ⟨2.1⟩ m. *yogin (yogī)*
सुखम् **happiness** ⟨1.1⟩ n. *sukha* – easiness, happiness
उत्तमम् **supreme** ⟨1.1⟩ n. *uttama (.tama)* – highest, best
उपैति **it comes** ⟨*acyuta* 1.1⟩ *upa.*√*i[ṇ]* – to go near, attain
शान्त-रजसम् **whose passion is pacified** ⟨2.1⟩ m. *śānta-rajas (-rajaḥ)*...शान्तम् रजः यस्य, सः शान्त-रजसः
ब्रह्म-भूतम् **who is self-realized** ⟨2.1⟩ m. *brahma-bhūta* – 'being Brahman', identification as spirit soul, self-realization
अ-कल्मषम् **who is sinless** ⟨2.1⟩ m. *a-kalmaṣa* – spotless, pure

Subodhinī: एवम्-उक्तेन प्रकारेण शान्तम् रजः यस्य तम्, अतएव प्रशान्तम् मनः यस्य तम्, एनम् निष्कल्मषम् ब्रह्मत्वम् प्राप्तम् योगिनम् उत्तमम् सुखम् (समाधि-सुखम्) स्वयम् एव उपैति (प्राप्नोति) ॥६.२७॥
ततः च कृतार्थः भवति इति आह – 'युञ्जन्' इति –

Note: In this verse, *uttamam sukham* is the *kartā*, and *yoginam* is the *karma*.

6.28

युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥२८॥

एवम् आत्मानम् सदा युञ्जन्	[while] thus always engaging himself
विगत-कल्मषः योगी	the sinless *yogī*
ब्रह्म-संस्पर्शम्	with realization of the Supreme
अत्यन्तम् सुखम्	the unlimited happiness
सुखेन अश्नुते ।	easily obtains

"Thus the self-controlled yogī, constantly engaged in yoga practice, becomes free from all material contamination and achieves the highest stage of perfect happiness in transcendental loving service to the Lord."

युञ्जन् **[while] engaging** ⟨1.1⟩ m. *yuñjat* (√*yuj[ir]*...योगे – to join, engage, gain; + .*[ś]at[r]*)
एवम् **thus** ⟨*avyaya*⟩
सदा **always** ⟨*avyaya*⟩
आत्मानम् **himself** ⟨2.1⟩ m. *ātman* (*ātmā*) – the self, soul
योगी **the *yogī*** ⟨1.1⟩ m. *yogin* (*yogī*)
विगत-कल्मषः **who is sinless** ⟨1.1⟩ m. *vigata-kalmaṣa*...विगतः कल्मषः यस्य, सः विगत-कल्मषः – 'whose sin is completely gone'
सुखेन **easily** ⟨3.1⟩ n. *sukha* – easiness, happiness
ब्रह्म-संस्पर्शम् **with realization of the Supreme** ⟨2.1⟩ n. *brahma-saṁsparśa*...ब्रह्मणः संस्पर्शः यस्मिन्, तद् ब्रह्म-संस्पर्शम् – 'in which there is perception of the Supreme'
अत्यन्तम् **unlimited** ⟨2.1⟩ n. *atyanta* (*ati.anta*) – 'beyond limit'
सुखम् **happiness** ⟨2.1⟩ n. *sukha* – easiness, happiness
अश्नुते **he obtains** ⟨*acyuta* 1.1⟩ √*aś[ūṅ]*...व्याप्तौ – to pervade, obtain

Subodhinī: एवम् (अनेन प्रकारेण) सर्वदा आत्मानम् (मनः) युञ्जन् (वशी-कुर्वन्) विशेषेण (सर्वात्मना) गतम् कल्मषम् यस्य, सः योगी सुखेन (अनायासेन) ब्रह्मणः संस्पर्शः अविद्या-निवर्तकः साक्षात्कारः तद् एव अत्यन्तम् (सर्व-उत्तमम्) सुखम् अश्नुते, जीवन्-मुक्तः भवति इति अर्थः ॥६.२८॥
ब्रह्म-साक्षात्कारम् एव दर्शयति – 'सर्व-भूत-स्थम्' इति –

6.29

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥२९॥

सर्वत्र सम-दर्शनः	one who has equal vision everywhere
योग-युक्तात्मा	who is self-realized by *yoga*
आत्मानम् सर्व-भूत-स्थम् ईक्षते,	he sees the Supersoul situated in all beings,
सर्व-भूतानि च आत्मनि ।	and all beings in the Supersoul

"A true yogī observes Me in all beings and also sees every being in Me. Indeed, the self-realized person sees Me, the same Supreme Lord, everywhere."

सर्व-भूत-स्थम् **who is situated in all beings** ⟨2.1⟩ m. *sarva-bhūta-stha*...यः सर्वेषु भूतेषु तिष्ठति, सः सर्व-भूत-स्थः
आत्मानम् **the Supersoul** ⟨2.1⟩ m. *ātman* (*ātmā*) – the self, soul
The next verse clarifies – यः माम् सर्वत्र पश्यति, . . .; and Baladeva explains the word *ātmānam* as *paramātmānam*.
सर्व-भूतानि **all beings** ⟨2.3⟩ n. *sarva-bhūta*
च **and** ⟨*avyaya*⟩
आत्मनि **in the Supersoul** ⟨7.1⟩ m. *ātman* (*ātmā*) – the self, soul
ईक्षते **he sees** ⟨*acyuta* 1.1⟩ √*īkṣ[a]*...दर्शने – to see
योग-युक्तात्मा **who is self-realized by *yoga*** ⟨1.1⟩ m. *yoga-yukta-_ātman* (*-ātmā*)...योगेन युक्तः आत्मा यस्य, सः योग-युक्तात्मा – whose self is realized by *yoga*
सर्वत्र **everywhere** ⟨*avyaya*⟩
सम-दर्शनः **who has equal vision** ⟨1.1⟩ m. *sama-darśana*...समम् दर्शनम् यस्य, सः सम-दर्शनः

Subodhinī: योगेन अभ्यस्यमानेन युक्तात्मा (समाहित-चित्तः), सर्वत्र समम् ब्रह्म एव पश्यति इति सम-दर्शनः, स्वम् आत्मानम् अविद्या-कृत-देहादि-परिच्छेद-शून्यम् सर्व-भूतेषु (ब्रह्मादि-स्थावरान्तेषु) अवस्थितम् पश्यति, तानि च आत्मनि अ-भेदेन पश्यति ॥६.२९॥
एवम्भूत-आत्म-ज्ञानस्य सर्व-भूतात्मतया मद्-उपासनम् मुख्यम् कारणम् इति आह – 'यः' इति –

6.30

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥३०॥

यः माम् सर्वत्र पश्यति,	one who sees Me everywhere,
सर्वम् च मयि पश्यति,	and sees everything in Me,
तस्य अहम् न प्रणश्यामि,	for him I do not disappear,
सः च मे (मम) न प्रणश्यति ।	and he also does not disappear for Me

"For one who sees Me everywhere and sees everything in Me, I am never lost, nor is he ever lost to Me."

यः	**he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
माम्	**me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
पश्यति	**he sees** ⟨*acyuta* 1.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see
सर्वत्र	**everywhere** ⟨*avyaya*⟩
सर्वम्	**everything** ⟨2.1⟩ m. *kṛṣṇanāma sarva* – all
च	**and** ⟨*avyaya*⟩
मयि	**in Me** ⟨7.1⟩ *kṛṣṇanāma asmad* – (last person) I
पश्यति	**he sees** ⟨*acyuta* 1.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see
तस्य	**his** ⟨6.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
अहम्	**I am** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
न	**not** ⟨*avyaya*⟩
प्रणश्यामि	**I disappear** ⟨*acyuta* 3.1⟩ *pra.*√*naś[a]* – to disappear, perish
सः	**he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
च	**and** ⟨*avyaya*⟩
मे	**my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
न	**not** ⟨*avyaya*⟩
प्रणश्यति	**he disappears** ⟨*acyuta* 1.1⟩ *pra.*√*naś[a]* – to disappear, perish

Subodhinī: माम् (परमेश्वरम्) सर्वत्र (भूत-मात्रे) यः पश्यति, सर्वम् च (प्राणि-मात्रम् च) मयि यः पश्यति, तस्य अहम् न प्रणश्यामि (अ-दृश्यः न भवामि), सः च मम अ-दृश्यः न भवति। प्रत्यक्षः भूत्वा, कृपा-दृष्ट्या तम् विलोक्य, अनुगृह्णामि इति अर्थः ॥६.३०॥

नच एवम्-भूतः विधि-किङ्करः स्यात् इति आह – 'सर्व-भूत-स्थितम्' इति –

6.31

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानो ऽपि स योगी मयि वर्तते ॥३१॥

एकत्वम् आस्थितः	resorting to oneness*
यः सर्व-भूत-स्थितम् माम् भजति,	one who worships Me as being situated in all beings,
सर्वथा वर्तमानः अपि	although existing in all circumstances
सः योगी मयि वर्तते ।	that *yogī* lives in Me

"Such a yogī, who engages in the worshipful service of the Supersoul, knowing that I and the Supersoul are one, remains always in Me in all circumstances."

सर्व-भूत-स्थितम् **who is situated in all beings** ⟨2.1⟩ m. *sarva-bhūta-sthita*

यः	**he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
माम्	**Me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
भजति	**he worships** ⟨*acyuta* 1.1⟩ √*bhaj[a]* 1U...सेवायाम् – to serve, worship
एकत्वम्	**oneness** ⟨2.1⟩ n. *ekatva* (*eka* + *.tva*)
आस्थितः	**having resorted to** ⟨1.1⟩ m. *āsthita* (*ā.*√*sthā* – to attain, resort; + *.[k]ta*) – resorted
सर्वथा	**in every way** ⟨*avyaya*⟩
वर्तमानः	**[while] existing** ⟨1.1⟩ m. *vartamāna* (√*vṛt[u]* 1A...वर्तने – to happen, act; + *.[ś]āna*)
अपि	**also** ⟨*avyaya*⟩
सः	**that** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
योगी	*yogī* ⟨1.1⟩ m. *yogin* (*yogī*)
मयि	**in Me** ⟨7.1⟩ *kṛṣṇanāma asmad* – (last person) I
वर्तते	**he exists** ⟨*acyuta* 1.1⟩ √*vṛt[u]* 1A...वर्तने – to happen, act

Subodhinī: सर्वेषु भूतेषु स्थितम् माम् अ-भेदम् आस्थितः (आश्रितः) यः भजति, सः योगी (ज्ञानी) सन्, सर्वथा (कर्म-त्यागेन) अपि वर्तमानः, मयि एव वर्तते (मुच्यते), नतु भ्रश्यति इति अर्थः ॥६.३१॥

एवम् च माम् भजताम् योगिनाम् मध्ये सर्व-भूत-अनुकम्पी श्रेष्ठः इति आह – 'आत्म-औपम्येन' इति –

Note: Baladeva explains *ekatvam* as मद्विग्रहाणामेकत्वमभेदम् – the non-differentiation between the Lord and His Supersoul expansions."

6.32

आत्मौपम्येन सर्वत्र समं पश्यति यो ऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥३२॥

हे अर्जुन !	O Arjuna!
यः आत्मौपम्येन	one who, by comparison with himself
यदि सुखम् वा दुःखम् वा	whether happiness or distress
सर्वत्र समम् पश्यति,	sees everywhere as similar,
सः योगी परमः मतः ।	that *yogī* is considered best

"He is a perfect yogī who, by comparison to his own self, sees the true equality of all beings, in both their happiness and their distress, O Arjuna!"

आत्मौपम्येन **by comparison with himself** ⟨3.1⟩ n. *ātma-_aupamya*...आत्मनः औपम्यः इति आत्मौपम्यः – 'similarity to oneself'

औपम्य (from *upamā* – comparison, similarity) – the state of similarity

सर्वत्र **everywhere** ⟨*avyaya*⟩

समम् **the same** ⟨2.1⟩ n. *sama*
पश्यति **he sees** ⟨*acyuta* 1.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see
यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
अर्जुन **O Arjuna!** ⟨8.1⟩ m. *arjuna* – white, 'who is pure in actions'
सुखम् **happiness** ⟨2.1⟩ n. *sukha* – easiness, happiness
वा **or** ⟨*avyaya*⟩
यदि **if** ⟨*avyaya*⟩
वा **or** ⟨*avyaya*⟩
दुःखम् **distress** ⟨2.1⟩ n. *duḥkha*
सः **that** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
योगी ***yogī*** ⟨1.1⟩ m. *yogin (yogī)*
परमः **is best** ⟨1.1⟩ m. *parama* – highest
मतः **considered** ⟨1.1⟩ m. *mata* (√*man[a]* 4A...बोधने – to know, think; + .*[k]ta*) – thought; opinion

Subodhinī: आत्म-औपम्येन (स्व-सादृश्येन) 'यथा मम सुखम् प्रियम्, दुःखम् च अ-प्रियम्, तथा अन्येषाम् अपि' इति सर्वत्र समम् पश्यन्, सुखम् एव सर्वेषाम् यः वाञ्छति, नतु कस्य अपि दुःखम्, सः योगी श्रेष्ठः मम अभिमतः इति अर्थः ॥६.३२॥

उक्त-लक्षणस्य योगस्य अ-सम्भवम् मन्वानः, [अर्जुनः उवाच] – 'यः अयम्' इति –

6.33

अर्जुन उवाच

यो ऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ।
एतस्याहं न पश्यामि चञ्चलत्वात्स्थितिं स्थिराम् ॥३३॥

अर्जुनः उवाच – हे मधुसूदन !	Arjuna said: O Kṛṣṇa!
यः अयम् योगः	this *yoga* which
साम्येन त्वया प्रोक्तः	was described by You as equanimity,
चञ्चलत्वात्	because of unsteadiness [of the mind]
एतस्य स्थिराम् स्थितिम्	its stable position
अहम् न पश्यामि ।	I do not see

"Arjuna said: O Madhusūdana, the system of yoga which You have summarized appears impractical and unendurable to me, for the mind is restless and unsteady."

अर्जुनः **Arjuna** ⟨1.1⟩ m. *arjuna* – white, 'who is pure in actions'
उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak

यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
अयम् **this** ⟨1.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
योगः ***yoga*** ⟨1.1⟩ m. *yoga*
त्वया **by You** ⟨3.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
प्रोक्तः **declared** ⟨1.1⟩ m. *prokta* (*pra.*√*vac[a]* – to declare; + .*[k]ta*)
साम्येन **with equanimity** ⟨3.1⟩ n. *sāmya* – equanimity
मधुसूदन **O Kṛṣṇa!** ⟨8.1⟩ m. *madhu-sūdana* – 'the slayer of the Madhu demon'
एतस्य **of this** ⟨6.1⟩ m. *kṛṣṇanāma etad* – (first person) he, this
अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
न **not** ⟨*avyaya*⟩
पश्यामि **I see** ⟨*acyuta* 3.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see
चञ्चलत्वात् **because of unsteadiness** ⟨5.1⟩ n. *cañcalatva* (.*tva*) – unsteadiness
स्थितिम् **position** ⟨2.1⟩ f. *sthiti* – situation, position
स्थिराम् **steady** ⟨2.1⟩ f. *sthirā* (.*ā[p]*)

Subodhinī: साम्येन, मनसः लय-विक्षेप-शून्यतया केवल-आत्म-आकार-अवस्थानेन, यः अयम् योगः त्वया प्रोक्तः, एतस्य योगस्य स्थिराम् (दीर्घ-कालम्) स्थितिम् न पश्यामि, मनसः चञ्चलत्वात् ॥६.३३॥

एतत् स्फुटयति – 'चञ्चलम्' इति –

6.34

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥३४॥

हे कृष्ण !	O Kṛṣṇa!
मनः हि चञ्चलम्	the mind is restless
प्रमाथि बलवत् दृढम्,	turbulent, strong and obstinate,
तस्य निग्रहम् अहम् सुदुष्करम् मन्ये,	its control I think to be very difficult,
वायोः इव ।	like [the control] of the wind

"For the mind is restless, turbulent, obstinate and very strong, O Kṛṣṇa, and to subdue it, I think, is more difficult than controlling the wind."

चञ्चलम् **restless** ⟨1.1⟩ n. *cañcala*
हि **indeed** ⟨*avyaya*⟩
मनः **the mind** ⟨1.1⟩ n. *manas (manaḥ)*
कृष्ण **O Kṛṣṇa!** ⟨8.1⟩ m. *kṛṣṇa* – 'all-attractive', 'dark'
प्रमाथि **turbulent** ⟨1.1⟩ n. *pramāthin (pramāthi)* (from *pra.*√*math[e]* – to stir strongly) – troubling, destroying

बलवत् **strong** ⟨1.1⟩ n. *balavat* (.*vat[u]*) – 'having *bala* (strength); strong

दृढम् **obstinate** ⟨1.1⟩ n. *dṛḍha* – firm, hard

तस्य **of that** ⟨6.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that

अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

निग्रहम् **the control** ⟨2.1⟩ m. *nigraha* (from *ni.√grah[a]* – to control)

मन्ये **I think** ⟨*acyuta* 3.1⟩ √*man[a]* 4A...बोधने – to know, think

वायोः **of the wind** ⟨6.1⟩ m. *vāyu* – air, wind, Vāyu (decl. like *viṣṇu*)

इव **like** ⟨*avyaya*⟩

सुदुष्करम् **very difficult to do** ⟨2.1⟩ m. *suduṣkara* (from *su.dur.√[ḍu]kr[ñ]* – to do with great difficulty)

Subodhinī: चञ्चलम् (स्व-भावेन एव चपलम्), किंच प्रमाथि (प्रमथन-शीलम्), देह-इन्द्रिय-क्षोभकम् इति अर्थः। किंच बलवत् (विचारेण अपि जेतुम् अ-शक्यम्), किंच दृढम् (विषय-वासना-अनुबद्धतया दुर्भेदम्)। अतः यथा आकाशे दोधूयमानस्य वायोः कुम्भादिषु निरोधनम् अ-शक्यम्, तथा तस्य मनसः अपि निग्रहम् (निरोधम्) सुदुष्करम् (सर्वथा कर्तुम् अ-शक्यम्) मन्ये ॥६.३४॥

तद् उक्तम् चञ्चलत्वादिकम् अङ्गीकृत्य एव, मनः-निग्रह-उपायम् । [श्री-भगवान् उवाच] – 'अ-संशयम्' इति –

6.35

श्रीभगवानुवाच

असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥३५॥

श्री-भगवान् उवाच -	Śrī Kṛṣṇa said:
हे महा-बाहो कौन्तेय !	O mighty-armed Arjuna!
चलम् मनः	[Yes,] the restless mind
अ-संशयम् दुर्निग्रहम्,	is undoubtedly difficult to control,
अभ्यासेन तु वैराग्येण च	but by practice and detachment
गृह्यते ।	it is controlled

"Lord Śrī Kṛṣṇa said: O mighty-armed son of Kuntī, it is undoubtedly very difficult to curb the restless mind, but it is possible by suitable practice and by detachment."

श्री-भगवान् **Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'

उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak

अ-संशयम् **without doubt** ⟨*avyaya*⟩

महा-बाहो **O Arjuna!** ⟨8.1⟩ m. *mahā-bāhu* – 'who has mighty arms'

मनः **the mind** ⟨1.1⟩ n. *manas* (*manaḥ*)

दुर्निग्रहम् **difficult to control** ⟨1.1⟩ n. *durnigraha* (from *dur.ni.√grah[a]* – to control with difficulty)

चलम् **restless** ⟨1.1⟩ n. *cala*

अभ्यासेन **by practice** ⟨3.1⟩ m. *abhyāsa* (from *abhi.√as[u]* – to add, repeat) – discipline; repeated reading, study; practice; any repeated exercise; same as *abhyāsa-yoga* or *sādhana-bhakti* – repeated withdrawel of the mind from sense objects and concentration on the Lord

तु **but** ⟨*avyaya*⟩

कौन्तेय **O Arjuna!** ⟨8.1⟩ m. *kaunteya* – 'son of Kuntī'

वैराग्येण **by detachment** ⟨3.1⟩ n. *vairāgya* – detachment

च **and** ⟨*avyaya*⟩

गृह्यते **it is taken** ⟨*acyuta* pass. 1.1⟩ √*grah[a]*...उपादाने – to take

Subodhinī: 'चञ्चलत्वादिना मनः निरोद्धुम् अ-शक्यम्' इति यद् वदसि, एतद् निःसंशयम् एव, तथापि तु विषय-अचिन्तन-पूर्वकम् अभ्यासेन, परमात्म-आकार-प्रत्यया वृत्त्या, विषय-वैतृष्ण्येन च गृह्यते (निगृह्यते)। अभ्यासेन लय-प्रतिबन्धात् वैराग्येण च विक्षेप-प्रतिबन्धात् उपरत-वृत्तिकम् सत् परमात्म-आकारेण परिणतम् तिष्ठति इति अर्थः। तद् उक्तम् योग-शास्त्रे –

मनसः वृत्ति-शून्यस्य ब्रह्म-आकारतया स्थितिः ।
या 'सम्प्रज्ञात'-नामासौ समाधिः अभिधीयते ॥

इति ॥६.३५॥

एतावान् तु इह निश्चयः इति आह – 'असंयत-आत्मना' इति –

6.36

असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥३६॥

अ-संयतात्मना	by one whose mind is not controlled
योगः दुष्प्रापः	*yoga* is difficult to attain
इति मे (मम) मतिः,	this is My opinion,
वश्यात्मना तु	but by one whose mind is controlled
उपायतः यतता	and who endeavors by suitable means
अवाप्तुम् शक्यः ।	it is possible to attain

"For one whose mind is unbridled, self-realization is difficult work. But he whose mind is controlled and who strives by appropriate means is assured of success. That is My opinion."

अ-संयतात्मना **by one whose mind is not controlled** ⟨3.1⟩ m. *a-saṃyata-_ātman* (-*ātmā*)...अ-संयतः आत्मा यस्य, सः अ-संयतात्मा – whose mind is uncontrolled

योगः *yoga* ⟨1.1⟩ m. *yoga*

दुष्प्रापः **difficult to obtain** ⟨1.1⟩ m. *duṣprāpa* (from *dur.pra.√āp[ḷ]* – to obtain with difficulty)

इति **thus** ⟨*avyaya*⟩

मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I

मतिः **opinion** ⟨1.1⟩ f. *mati*

वश्यात्मना **by one whose mind is controlled** ⟨3.1⟩ m. *vaśya-_ātman (-ātmā)*...वश्यः आत्मा यस्य, सः वश्यात्मा – whose mind is controlled

तु **but** ⟨*avyaya*⟩

यतता **by one who is endeavoring** ⟨3.1⟩ m. *yatat* (*√yat[ī]*...प्रयत्ने – to endeavor; + *.[ś]at[ṛ]*) – [while] endeavoring

शक्यः **it is possible** ⟨1.1⟩ m. *śakya* (from *√śak[ḷ]*...शक्तौ – to be able) – able, possible

(also from *√śak[ḷ]*:) *śakti* – ability, strength, power, energy, faculty, skill; the energy of the Lord, who is *śaktimān* or the possessor of all *śakti*

अवाप्तुम् **to obtain** ⟨*avyaya*⟩ *√āp[ḷ]*...व्याप्तौ – to reach, obtain; + *.tum[u]*

उपायतः **through a means** ⟨*avyaya*⟩ (*upāyatas*; *upāya* – means; + *.tas[i]*)

Subodhinī: उक्त-प्रकारेण अभ्यास-वैराग्याभ्याम् अ-संयतः आत्मा (चित्तम्) यस्य, तेन पुरुषेण अयम् योगः दुष्प्रापः (प्राप्तुम् अ-शक्यः)। अभ्यास-वैराग्याभ्याम् वश्यः (वश-वर्ती) आत्मा (चित्तम्) यस्य, तेन पुरुषेण पुनः च अनेन एव उपायेन प्रयत्नम् कुर्वता योगः प्राप्तुम् शक्यः ॥६.३६॥

अभ्यास-वैराग्य-अभावेन कथञ्चिद् अप्राप्त-सम्यक्-ज्ञानः किम् फलम् आप्नोति ? इति [अर्जुनः उवाच] 'अयतिः' इति –

6.37

अर्जुन उवाच

अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥३७॥

अर्जुनः उवाच - हे कृष्ण !	Arjuna said: O Kṛṣṇa!
श्रद्धया उपेतः	[although] endowed with faith
योगात् चलित-मानसः अ-यतिः	the *ayati* whose mind deviates from *yoga*
योग-संसिद्धिम् अ-प्राप्य	[after] not attaining the success of *yoga*
काम् गतिम् गच्छति ?	what destination he attains?

"Arjuna said: O Kṛṣṇa, what is the destination of the unsuccessful transcendentalist, who in the beginning takes to the process of self-realization with faith but who later desists due to worldly-mindedness and thus does not attain perfection in mysticism?"

अर्जुनः **Arjuna** ⟨1.1⟩ m. *arjuna* – white, 'who is pure in actions'

उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ *√vac[a]*...परिभाषणे – to speak

अ-यतिः **who does not endeavor** ⟨1.1⟩ m. *a-yati*

यति (from *√yat[ī]*...प्रयत्ने – to endeavor) – 'one who endeavors', an ascetic, *sannyāsī*

श्रद्धया **with faith** ⟨3.1⟩ f. *śraddhā* – faith, trust

उपेतः **endowed** ⟨1.1⟩ m. *upeta* (*upa.√i[ṇ]* – to go near, attain; + *.[k]ta*) – attained

योगात् **from *yoga*** ⟨5.1⟩ m. *yoga*

चलित-मानसः **whose mind is moved** ⟨1.1⟩ m. *calita-mānasa*...चलितम् मानसम् यस्य, सः चलित-मानसः

चलित (*√cal[a]*...कम्पने – to move, shake; + *.[k]ta*) – moved, shaken, disturbed

अ-प्राप्य **[after] not attaining** ⟨*avyaya*⟩

प्राप्य (*pra.√āp[ḷ]* – to obtain; + *.ya[p]*) – [after] attaining

योग-संसिद्धिम् **the success of *yoga*** ⟨2.1⟩ f. *yoga-saṁsiddhi*...योगस्य संसिद्धिः इति योग-संसिद्धिः

काम् **what** ⟨2.1⟩ f. *kṛṣṇanāma kim* – who/what

गतिम् **goal** ⟨2.1⟩ f. *gati* – movement, goal

कृष्ण **O Kṛṣṇa!** ⟨8.1⟩ m. *kṛṣṇa* – 'all-attractive', 'dark'

गच्छति **he goes** ⟨*acyuta* 1.1⟩ *√gam[ḷ]*...गतौ – to go

Subodhinī: प्रथमम् श्रद्धया उपेतः एव योगे प्रवृत्तः, ननु मिथ्या-आचारतया, ततः परन्तु अ-यतिः (न सम्यक् यतते), शिथिल-अभ्यासः इति अर्थः, तथा योगात् चलितम् मानसम् (विषय-प्रवणम् चित्तम्) यस्य, मन्द-वैराग्यः इति अर्थः। एवम् अभ्यास-वैराग्य-शैथिल्यात्, योगस्य संसिद्धिम् (फलम्, ज्ञानम्) अ-प्राप्य, काम् गतिम् प्राप्नोति ? ॥६.३७॥

प्रश्न-अभिप्रायम् विवृणोति – 'कच्चिद्' इति –

6.38

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥३८॥

हे महा-बाहो !	O Kṛṣṇa!
ब्रह्मणः पथि विमूढः	bewildered on the spiritual path
अ-प्रतिष्ठः उभय-विभ्रष्टः	without support and fallen from both
कच्चिद् न	is it not that
छिन्नाभ्रम् इव न नश्यति ?	he perishes like a riven cloud?

"O mighty-armed Kṛṣṇa, does not such a man, who is bewildered from the path of transcendence, fall away from both spiritual and material success and perish like a riven cloud, with no position in any sphere?"

कच्चिद्	**is it that?** ⟨*avyaya*⟩
न	**not** ⟨*avyaya*⟩
उभय-विभ्रष्टः	**who is fallen from both** ⟨1.1⟩ m. *ubhaya-vibhraṣṭa*...उभयतः विभ्रष्टः यः, सः उभय-विभ्रष्टः विभ्रष्ट (*vi.√bhraṁś[u]* – to fall down; + *.[k]ta*) – fallen down; separated from; ruined, lost
छिन्नाभ्रम्	**a riven cloud** ⟨1.1⟩ n. *chinna-_abhra*...छिन्नम् अभ्रम् इति छिन्नाभ्रम् छिन्न (*√chid[ir]*...द्वैधीकरणे – to divide into two; + *.[k]ta*) – cut, riven अभ्र – 'water bearer', cloud
इव	**like** ⟨*avyaya*⟩
नश्यति	**he perishes** ⟨*acyuta* 1.1⟩ *√naś[a]*...अदर्शने – to disappear, perish
अ-प्रतिष्ठः	**who is without support** ⟨1.1⟩ m. *a-pratiṣṭha* – unstable
महा-बाहो	**O Arjuna!** ⟨8.1⟩ m. *mahā-bāhu* – 'who has mighty arms'
विमूढः	**who is bewildered** ⟨1.1⟩ m. *vimūḍha* (*vi.√muh[a]* – to be bewildered; + *.[k]ta*)
ब्रह्मणः	**of transcendence** ⟨6.1⟩ n. *brahman* (*brahma*) – spirit, soul
पथि	**on the path** ⟨7.1⟩ n. *pathin* (*panthāḥ*) – a way, path, road, course (lit. and fig.)

Subodhinī: कर्मणाम् ईश्वरे अर्पितत्वात्, अननुष्ठानात् च, न तावत् कर्म-फलम् स्वर्गादिकम् प्राप्नोति, योग-अनिष्पत्तेः च न मोक्षम् प्राप्नोति, एवम् उभयस्मात् भ्रष्टः अ-प्रतिष्ठः (निराश्रयः), अतएव ब्रह्मणः प्राप्ति-उपाये पथि (मार्गे) वुमूढः सन्, कच्चिद् (किम्) न नश्यति, किंवा नश्यति ? इति अर्थः । नाशे दृष्टान्तः – यथा छिन्नम् अभ्रम्, पूर्वस्मात् अभ्रात् विश्लिष्टम्, अभ्र-अन्तरम् च अ-प्राप्तम् सन्, मध्ये एव विलीयते, तद्वत् इति अर्थः ॥६.३८॥

त्वया एव सर्व-ज्ञेन अयम् मम सन्देहः निरसनीयः, त्वत्तः अन्यः तु एतद् सन्देह-निवर्तकः न अस्ति इति आह – 'एतद् मे' इति –

6.39

एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः ।
त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ॥३९॥

हे कृष्ण !	O Kṛṣṇa!
एतद् मे (मम) संशयम्	this my doubt
अ-शेषतः छेत्तुम् अर्हसि,	You should dispel completely,
त्वदन्यः अस्य संशयस्य छेत्ता	another dispeller of this doubt than You
न हि उपपद्यते ।	does not exist

"This is my doubt, O Kṛṣṇa, and I ask You to dispel it completely. But for You, no one is to be found who can destroy this doubt."

एतद्	**this** ⟨2.1⟩ n. *kṛṣṇanāma etad* – (first person) he, this The use of *etad* (neut.) with *saṁśayam* (masc.), instead of *enam* (masc.), is *ārṣa-prayoga*.
मे	**my** (opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
संशयम्	**doubt** ⟨2.1⟩ m. *saṁśaya* – hesitation, doubt
कृष्ण	**O Kṛṣṇa!** ⟨8.1⟩ m. *kṛṣṇa* – 'all-attractive', 'dark'
छेत्तुम्	**to cut** ⟨*avyaya*⟩ (*√chid[ir]*...द्वैधीकरणे – to divide into two; + *.tum[u]*)
अर्हसि	**you deserve** ⟨*acyuta* 2.1⟩ *√arh[a]*...पूजायाम् – to be worthy, fit, able
अ-शेषतः	**completely** ⟨*avyaya*⟩ (*a-śeṣatas*; *a-śeṣa* + *.tas[i]*) – without remainder
त्वदन्यः	**another than You** ⟨1.1⟩ m. *kṛṣṇanāma tvad-anya* – other than you
संशयस्य	**of the doubt** ⟨6.1⟩ m. *saṁśaya* – hesitation, doubt
अस्य	**of this** ⟨6.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
छेत्ता	**one who cuts** ⟨1.1⟩ m. *chettṛ* (*chettā*, from *√chid[ir]*...द्वैधीकरणे – to divide into two; + *.tṛ[n]*)
न हि	**not at all** ⟨*avyaya*⟩
उपपद्यते	**it exists** ⟨*acyuta* 1.1⟩ *upa.√pad[a]* – to attain, exist

Subodhinī: एतद् (एनम्) । छेत्ता (निवर्तकः) । स्पष्टम् अन्यत् ॥६.३९॥
अत्र उत्तरम् । श्री-भगवान् उवाच । – 'पार्थ' इति सार्धैः चतुर्भिः –

6.40

श्रीभगवानुवाच

पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ।
न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥४०॥

श्री-भगवान् उवाच –	Śrī Kṛṣṇa said:
हे पार्थ, तात !	my dear Arjuna!
न एव इह न अमुत्र	neither in this life nor the next
तस्य विनाशः विद्यते,	is there destruction for him,
कश्चिद् कल्याण-कृत्	[because] someone who does good
दुर्गतिम् न हि गच्छति ।	never attains misfortune

"The Supreme Personality of Godhead said: Son of Pṛthā, a transcendentalist engaged in auspicious activities does not meet with destruction either in this world or in the spiritual world; one who does good, My friend, is never overcome by evil."

श्री-भगवान् **Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'

उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak

पार्थ **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'

न एव **never** ⟨*avyaya*⟩

इह **here** ⟨*avyaya*⟩

न **not** ⟨*avyaya*⟩

अमुत्र **there** ⟨*avyaya*⟩ – there, in the other world

विनाशः **destruction** ⟨1.1⟩ m. *vināśa* (from *vi.*√*naś[a]* – to disappear, perish)

तस्य **his** ⟨6.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

विद्यते **there is** ⟨*acyuta* 1.1⟩ √*vid[a]* 4A...सत्तायाम् – to be, exist

न हि **not at all** ⟨*avyaya*⟩

कल्याण-कृत् **one who does good** ⟨1.1⟩ m. *kalyāṇa-kṛt*...यः कल्याणम् करोति, सः कल्याण-कृत्

कल्याण – good fortune, happiness, prosperity; good conduct, virtue (opp. to *pāpa*)

कश्चिद् **someone** ⟨1.1⟩ m. *kṛṣṇanāma kim (kaḥ)* + *.cid* – someone, something

दुर्गतिम् **to misfortune** ⟨2.1⟩ f. *durgati* – 'bad destination', misfortune, distress, poverty; hell

तात **O Arjuna!** ⟨8.1⟩ m. *tāta* – 'dear one', an affectionate address between seniors and juniors

गच्छति **he goes** ⟨*acyuta* 1.1⟩ √*gam[!]*...गतौ – to go

Subodhinī: 'इह लोके नाशः' उभय-भ्रंशात् पातित्यम्, 'अमुत्र (पर-लोके) नाशः' नरक-प्राप्तिः, तद् उभयम् तस्य न अस्ति एव, यतः कल्याण-कृत् (शुभ-कारी) कश्चिद् अपि दुर्गतिम् न गच्छति। अयम् च शुभ-कारी, श्रद्धया योगे प्रवृत्तत्वात् ! 'तात' इति लोक-रीत्या उपलालयन् सम्बोधयति ॥६.४०॥
तर्हि किम् असौ प्राप्नोति ? इति अपेक्षायाम् आह – 'प्राप्य' इति –

6.41

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टो ऽभिजायते ॥४१॥

पुण्य-कृताम् लोकान् प्राप्य	[after] attaining the planets of the pious
शाश्वतीः समाः उषित्वा	[and after] dwelling [there] many years
योग-भ्रष्टः	one who has fallen from *yoga*
शुचीनाम् श्रीमताम् गेहे	in the family of the pious and wealthy
अभिजायते ।	is born

"The unsuccessful yogī, after many, many years of enjoyment on the planets of the pious living entities, is born into a family of righteous people, or into a family of rich aristocracy."

प्राप्य **[after] obtaining** ⟨*avyaya*⟩ *pra.*√*āp[!]* – to obtain; + *.ya[p]*

पुण्य-कृताम् **of the pious** ⟨6.3⟩ m. *puṇya-kṛt* – who does pious acts, a pious man

लोकान् **the worlds** ⟨2.3⟩ m. *loka* – place, world, people

उषित्वा **[after] dwelling** ⟨*avyaya*⟩ √*vas[a]* 1P...निवासे – to dwell, live; + *.[k]tvā*

शाश्वतीः **endless** ⟨2.3⟩ f. *śāśvatī* (*.ī[p]*) – eternal

समाः **years** ⟨2.3⟩ f. *samā* – year

शुचीनाम् **of the pious** ⟨6.3⟩ m. *śuci* – brilliant, pure

श्रीमताम् **of the wealthy** ⟨6.3⟩ m. *śrīmat* (*.mat[u]*) – 'having *śrī* (beauty, fortune)'; beautiful, fortunate

गेहे **in a family** ⟨7.1⟩ n. *geha* (a form of *gṛha*) – dwelling; house, family, body

योग-भ्रष्टः **who is fallen from *yoga*** ⟨1.1⟩ m. *yoga-bhraṣṭa*...योगात् भ्रष्टः इति योग-भ्रष्टः

अभिजायते **he is born** ⟨*acyuta* 1.1⟩ *abhi.*√*jan[ī]* – to be born

Subodhinī: पुण्य-कारिणाम् (अश्वमेधादि-याजिनाम्) लोकान् प्राप्य, तत्र समाः (बहून् संवत्सरान्) उषित्वा (वास-सुखम् अनुभूय), शुचीनाम् (सत्-आचाराणाम्) श्रीमताम् (धनिनाम्) गेहे सः योग-भ्रष्टः जन्म प्राप्नोति ॥६.४१॥
अल्प-काल-अभ्यस्त-योग-भ्रंशे गतिः इयम् उक्ता, चिर-अभ्यस्त-योग-भ्रंशे तु पक्ष-अन्तरम् आह – 'अथवा' इति –

6.42

अथवा योगिनामेव कुले भवति धीमताम् ।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥४२॥

अथवा	or else
धीमताम् योगिनाम् एव कुले	certainly in the family of wise *yogīs*
भवति,	he is born,
ईदृशम् यद् जन्म	a birth like this
एतद् हि लोके दुर्लभतरम् ।	it is more rare in this world

"Or (if unsuccessful after long practice of yoga) he takes his birth in a family of transcendentalists who are surely great in wisdom. Certainly, such a birth is rare in this world."

अथवा **or else** ⟨*avyaya*⟩

योगिनाम् **of *yogīs*** ⟨6.3⟩ m. *yogin* (*yogī*)

एव **certainly** ⟨*avyaya*⟩

कुले **in a family** ⟨7.1⟩ n. *kula* – family

भवति **he is born** ⟨*acyuta* 1.1⟩ √*bhū*...सत्तायाम् – to be, exist, become

धीमताम् **of the intelligent** ⟨6.3⟩ m. *dhīmat* (*.mat[u]*) – 'having *dhī* (intelligence)'; intelligent

एतद् **this** ⟨1.1⟩ n. *kṛṣṇanāma etad* – (first person) he, this

हि **indeed** ⟨*avyaya*⟩

दुर्लभतरम् **more rare** ⟨1.1⟩ n. *durlabhatara* (from *dur.√[ḍu]labh[aṣ]* – to obtain with difficulty; + *.tara*) – more difficult to obtain

लोके **in the world** ⟨7.1⟩ m. *loka* – place, world, people

जन्म **a birth** ⟨1.1⟩ n. *janman (janma)*

यद् **that which** ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which

ईदृशम् **like this** ⟨1.1⟩ n. *īdṛśa* (a transformation of *idam*) – 'of this kind'

Subodhinī: योग-निष्ठानाम् धीमताम् (ज्ञानिनाम्) एव कुले जायते, नतु पूर्व-उक्तानाम् अनारूढ-योगानाम् कुले जायते । एतद् जन्म स्तौति – ईदृशम् यद् जन्म, एतद् हि लोके दुर्लभतरम्, मोक्ष-हेतुत्वात् ॥६.४२॥
ततः किम् ? अतः आह – 'तत्र' इति सार्धेन –

6.43

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् ।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥४३॥

हे कुरु-नन्दन !	O Arjuna!
तत्र	there
तम् पौर्वदेहिकम् बुद्धि-संयोगम्	contact with that previous life's intelligence
लभते,	he gets,
ततः च भूयः	and then again
संसिद्धौ यतते ।	he endeavors for perfection

"On taking such a birth, he revives the divine consciousness of his previous life, and he again tries to make further progress in order to achieve complete success, O son of Kuru."

तत्र **there** ⟨*avyaya*⟩

तम् **that** ⟨2.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

बुद्धि-संयोगम् **contact with intelligence** ⟨2.1⟩ m. *buddhi-saṁyoga*...बुद्ध्या संयोगः इति बुद्धि-संयोगः

लभते **he obtains** ⟨*acyuta* 1.1⟩ √[ḍu]labh[aṣ]...प्राप्तौ – to obtain

पौर्वदेहिकम् **of the previous incarnation** ⟨2.1⟩ m. *paurvadehika* (from *pūrva-deha* – previous body)

यतते **he endeavors** ⟨*acyuta* 1.1⟩ √yat[ī]...प्रयत्ने – to endeavor

च **and** ⟨*avyaya*⟩

ततः **then** ⟨*avyaya*⟩ (*tatas*; from *tad* + *.tas[i]*) – from/after/than that

भूयः **again** ⟨*avyaya*⟩

संसिद्धौ **towards perfection** ⟨7.1⟩ f. *saṁsiddhi* – success, perfection

कुरु-नन्दन **O Arjuna!** ⟨8.1⟩ m. *kuru-nandana* – 'delight of the Kurus'

Subodhinī: तत्र द्विः-प्रकारे अपि जन्मनि, पूर्व-देहे भवम् 'पौर्व-देहिकम्' तम् एव ब्रह्म-विषयया बुद्ध्या संयोगम् लभते । ततः च भूयः (अधिकम्) संसिद्धौ (मोक्षे) प्रयत्नम् करोति ॥६.४३॥
तत्र हेतुः – 'पूर्व' इति –

6.44

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशो ऽपि सः ।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥४४॥

तेन एव पूर्वाभ्यासेन	by that previous practice
अवशः अपि सः ह्रियते हि,	even unwillingly he is carried,
योगस्य जिज्ञासुः अपि	being even a mere inquirer into *yoga*
शब्द-ब्रह्म अतिवर्तते ।	he transcends the *Vedas*

"By virtue of the divine consciousness of his previous life, he automatically becomes attracted to the yogic principles – even without seeking them. Such an inquisitive transcendentalist stands always above the ritualistic principles of the scriptures."

पूर्वाभ्यासेन **by previous practice** ⟨3.1⟩ m. *pūrva-_abhyāsa*...पूर्वः अभ्यासः इति पूर्वाभ्यासः – previous practice

अभ्यास (from *abhi.√as[u]* – to add, repeat) – discipline; repeated reading, study; practice; any repeated exercise; same as *abhyāsa-yoga* or *sādhana-bhakti* – repeated withdrawel of the mind from sense objects and concentration on the Lord

तेन **by that** ⟨3.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

एव **certainly** ⟨*avyaya*⟩

ह्रियते **he is carried** ⟨*acyuta* pass. 1.1⟩ √hṛ[ñ]...हरणे – to carry, remove

हि **indeed** ⟨*avyaya*⟩

अवशः **unwillingly** ⟨1.1⟩ m. *a-vaśa* – 'not according to the wish'

अपि **also** ⟨*avyaya*⟩

सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

जिज्ञासुः **who desires to know** ⟨1.1⟩ m. *jijñāsu* (from √jñā 9P...अवबोधने – to know)

अपि **also** ⟨*avyaya*⟩

योगस्य **about *yoga*** ⟨6.1⟩ m. *yoga*

शब्द-ब्रह्म **the *Vedas*** ⟨2.1⟩ n. *śabda-brahma* – 'transcendence in the form of sound'

अतिवर्तते **he surpasses** ⟨*acyuta* 1.1⟩ *ati.√vṛt[u]* 1A – to surpass

Subodhinī: तेन एव पूर्व-देह-कृत-अभ्यासेन अवशः अपि (कुतश्चिद् अन्तरायात् अनिच्छन् अपि) संह्रियते, विषयेभ्यः परावर्त्य, ब्रह्म-निष्टः क्रियते। तद् एवम् पूर्व-अभ्यास-वशेन प्रयत्नम् कुर्वन्, शनैः मुच्यते इति इमम् अर्थम् कैमुत्य-न्यायेन स्फुटयति – 'जिज्ञासुः' इति सार्धेन। योगस्य स्व-रूपम् जिज्ञासुः एव केवलम्, नतु प्राप्त-योगः, एवम्-भूतः योगे प्रविष्ट-मात्रः अपि, पाप-वशात् योग-भ्रष्टः अपि, शब्द-ब्रह्म (वेदम्) अतिवर्तते, वेद-उक्त-कर्म-फलानि अतिक्रामति, तेभ्यः अधिकम् फलम् प्राप्य मुच्यते इति अर्थः ॥६.४४॥

6.45

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः ।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥४५॥

प्रयत्नात् यतमानः योगी तु	but the *yogī* who is endeavoring with effort
संशुद्ध-किल्बिषः	being completely purified
अनेक-जन्म-संसिद्धः	being perfected after many births
ततः पराम् गतिम् याति ।	then attains the supreme destination

"And when the yogī engages himself with sincere endeavor in making further progress, being washed of all contaminations, then ultimately, achieving perfection after many, many births of practice, he attains the supreme goal."

प्रयत्नात् **with effort** ⟨5.1⟩ m. *prayatna* – endeavor

यतमानः **[while] endeavoring** ⟨1.1⟩ m. *yatamāna* (√*yat[i]*...प्रयत्ने – to endeavor; + .*[ś]āna*)

तु **but** ⟨*avyaya*⟩

योगी **the *yogī*** ⟨1.1⟩ m. *yogin* (*yogī*)

संशुद्ध-किल्बिषः **whose sin is purified** ⟨1.1⟩ m. *saṁśuddha-kilbiṣa*...संशुद्धम् किल्बिषम् यस्य, सः संशुद्ध-किल्बिषः

संशुद्ध (*sam*.√*śudh[a]* – to wash, purify; + .*[k]ta*) – washed, purified

अनेक-जन्म-संसिद्धः **perfected by many births** ⟨1.1⟩ m. *an-eka-janma-saṁsiddha*...अनेक-जन्मभिः संसिद्धः इति अनेक-जन्म-संसिद्धः

ततः **then** ⟨*avyaya*⟩ (*tatas*; from *tad* + .*tas[i]*) – from/after/than that

याति **he attains** ⟨*acyuta* 1.1⟩ √*yā*...प्राप्तौ – to attain, go

पराम् **the supreme** ⟨2.1⟩ f. *parā* (.*ā[p]*) – beyond

गतिम् **destination** ⟨2.1⟩ f. *gati* – movement, goal

Subodhinī: यदा एवम् मन्द-प्रयत्नः अपि योगी पराम् गतिम् याति, तदा यः तु योगी प्रयत्नात् (उत्तरोत्तरम् अधिकम्) योगे यतमानः (यत्नम् कुर्वन्) योगेन एव संशुद्ध-किल्बिषः (विधूत-पापः), सः अनेकेषु जन्मसु उपचितेन योगेन संसिद्धः

(सम्यक्-ज्ञानी) भूत्वा, ततः श्रेष्ठाम् गतिम् याति इति किम् वक्तव्यम्! इति अर्थः ॥६.४५॥

यस्मात् एवम्, तस्मात् – 'तपस्विभ्यः' इति –

6.46

तपस्विभ्यो ऽधिको योगी ज्ञानिभ्यो ऽपि मतो ऽधिकः ।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥४६॥

हे अर्जुन !	O Arjuna!
योगी तपस्विभ्यः अधिकः मतः,	the *yogī* is considered greater than ascetics,
ज्ञानिभ्यः अपि अधिकः,	and greater even than *jñānīs*,
योगी कर्मिभ्यः च अधिकः,	the *yogī* is better also (of course) than the *karmīs*,
तस्मात् योगी भव !	therefore be a *yogī*!

"A yogī is greater than the ascetic, greater than the empiricist and greater than the fruitive worker. Therefore, O Arjuna, in all circumstances, be a yogī."

तपस्विभ्यः **than ascetics** ⟨5.3⟩ m. *tapasvin* (*tapasvī*) – ascetic (decl. like *yogin*)

अधिकः **greater** ⟨1.1⟩ m. *adhika* – more

योगी **the *yogī*** ⟨1.1⟩ m. *yogin* (*yogī*)

ज्ञानिभ्यः **than *jñānīs*** ⟨5.3⟩ m. *jñānin* (*jñānī*) – *jñāna-yogī*

अपि **also** ⟨*avyaya*⟩

मतः **considered** ⟨1.1⟩ m. *mata* (√*man[a]* 4A...बोधने – to know, think; + .*[k]ta*) – thought; opinion

अधिकः **greater** ⟨1.1⟩ m. *adhika* – more

कर्मिभ्यः **than *karmīs*** ⟨5.3⟩ m. *karmin* (*karmī*) – *karmī*, *karma-yogī*

च **and** ⟨*avyaya*⟩

अधिकः **greater** ⟨1.1⟩ m. *adhika* – more

योगी **the *yogī*** ⟨1.1⟩ m. *yogin* (*yogī*)

तस्मात् **therefore** ⟨*avyaya*⟩

योगी **a *yogī*** ⟨1.1⟩ m. *yogin* (*yogī*)

भव **you must be** ⟨*vidhātā* 2.1⟩ √*bhū*...सत्तायाम् – to be, exist, become

अर्जुन **O Arjuna!** ⟨8.1⟩ m. *arjuna* – white, 'who is pure in actions'

Subodhinī: कृच्छ्र-चान्द्रायणादि-तपोनिष्टेभ्यः अपि, ज्ञानिभ्यः (शास्त्र-ज्ञानवद्भ्यः) अपि, कर्मिभ्यः (इष्ट-पूर्तादि-कर्म-कारिभ्यः) अपि योगी श्रेष्ठः (अभिमतः), तस्मात् त्वम् योगी भव ॥६.४६॥

योगिनाम् अपि (यम-नियमादि-पराणाम् मध्ये) मद्-भक्तः श्रेष्ठः इति आह – 'योगिनाम्' इति –

6.47

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ॥४७॥

सर्वेषाम् योगिनाम् अपि	of all *yogīs*
यः श्रद्धावान्	one who, endowed with faith
मद्गतेन अन्तरात्मना	with his heart absorbed in Me
माम् भजते,	worships Me,
सः युक्ततमः मे (मम) मतः ।	he is considered the best *yogī* by Me

"And of all yogīs, the one with great faith who always abides in Me, thinks of Me within himself, and renders transcendental loving service to Me – he is the most intimately united with Me in yoga and is the highest of all. That is My opinion."

योगिनाम् **of the *yogīs*** ⟨6.3⟩ m. *yogin* (*yogī*)
अपि **also** ⟨*avyaya*⟩
सर्वेषाम् **of all** ⟨6.3⟩ m. *kṛṣṇanāma sarva* – all
मद्गतेन **absorbed in Me** ⟨3.1⟩ m. *mad-gata*
अन्तरात्मना **with the heart** ⟨3.1⟩ m. *antar-ātman* (*-ātmā*) – 'the inner self', the heart
श्रद्धावान् **who has faith** ⟨1.1⟩ m. *śraddhāvat* (*.vat[u]*) – 'having *śraddhā* (faith)'; faithful
भजते **he worships** ⟨*acyuta* 1.1⟩ √*bhaj[a]* 1U...सेवायाम् – to serve, worship
यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
माम् **Me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
युक्ततमः **the best *yogī*** ⟨1.1⟩ m. *yuktatama* (*.tama*)
मतः **considered** ⟨1.1⟩ m. *mata* (√*man[a]* 4A...बोधने – to know, think; + *.[k]ta*) – thought; opinion

Subodhinī: मद्-गतेन (मयि आसक्तेन) अन्तः-आत्मना (मनसा) यः माम् (परमेश्वरम्, वासुदेवम्) श्रद्धा-युक्तः सन् भजते, सः योग-युक्तेषु श्रेष्ठः मम सम्मतः, अतः मद्भक्तः भव इति भावः ॥६.४७॥

Note: The indicated order is *karmī – tapasvī – jñānī – yogī – bhakta*.

ओं तत्सदिति
श्रीमहाभारते शतसाहस्त्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि
श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे आत्मसंयमयोगो नाम षष्ठो ऽध्यायः ॥६॥

अथ सप्तमोऽध्यायः

अथ सप्तमः अध्यायः । now the seventh chapter

Subodhinī: पूर्व-अध्याय-अन्ते 'मद्-गतेन अन्तः-आत्मना यः माम् भजति, सः मे युक्ततमः मतः' (6.47) इति उक्तम्, तत्र कीदृशः त्वम् यस्य भक्तिः कर्तव्या ? इति अपेक्षायाम्, स्व-स्वरूपम् निरूपयिष्यन्, [श्री-भगवान् उवाच] – 'मयि आसक्त-मनाः' इति –

7.1

श्रीभगवानुवाच

मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥१॥

श्री-भगवान् उवाच - हे पार्थ !	Śrī Kṛṣṇa said: O Arjuna!
मयि आसक्त-मनाः	being absorbed in Me
मदाश्रयः योगम् युञ्जन्	[while] performing *yoga* under My shelter
यथा समग्रम् अ-संशयम्	how completely and without doubt
माम् ज्ञास्यसि	you will know Me,
तद् शृणु !	hear that!

"The Supreme Personality of Godhead said: Now hear, O son of Pṛthā, how by practicing yoga in full consciousness of Me, with mind attached to Me, you can know Me in full, free from doubt."

श्री-भगवान् **Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'

उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak

मयि **in me** ⟨7.1⟩ *kṛṣṇanāma asmad* – (last person) I

आसक्त-मनाः **whose mind is attached** ⟨1.1⟩ m. *āsakta-manas (-manaḥ)*...आसक्तम् मनः यस्य, सः आसक्त-मनः

आसक्त (*ā.*√*sañj[a]* – to stick; + *.[k]ta*) – attached

पार्थ **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'

योगम् *yoga* ⟨2.1⟩ m. *yoga*

युञ्जन् **[while] performing** ⟨1.1⟩ m. *yuñjat* (√*yuj[ir]*...योगे – to join, engage, gain; + *.[ś]at[ṛ]*)

मदाश्रयः **whose shelter I am** ⟨1.1⟩ m. *mad-āśraya*...अहम् आश्रयः यस्य, सः मदाश्रयः

अ-संशयम् **without doubt** ⟨*avyaya*⟩

समग्रम् **completely** ⟨*avyaya*⟩

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

यथा **as** ⟨*avyaya*⟩

ज्ञास्यसि **you will know** ⟨*kalki* 2.1⟩ √*jñā* 9P...अवबोधने – to know

तद् **that** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that

शृणु **you must hear** ⟨*vidhātā* 2.1⟩ √*śru*...श्रवणे – to hear, obey

Subodhinī: मयि (परमेश्वरे) आसक्तम् (अभिनिविष्टम्) मनः यस्य सः, मद्-आश्रयः अहम् एव आश्रयः यस्य, अनन्य-शरणः सन्, योगम् युञ्जन् (अभ्यस्यन्), अ-संशयम् यथा भवति, एवम् माम् समग्रम् (विभूति-बल-ऐश्वर्यादि-सहितम्) यथा (येन ज्ञानेन) ज्ञास्यसि, तद् इदम् मया वक्ष्यमाणम् शृणु ॥७.१॥

वक्ष्यमाणम् स्तौति – 'ज्ञानम्' इति –

7.2

ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः ।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते ॥२॥

स-विज्ञानम् इदम् ज्ञानम्	this knowledge and its realization
अहम् ते (तुभ्यम्) अ-शेषतः वक्ष्यामि,	I will speak to you in full,
यद् ज्ञात्वा	[after] knowing which
इह भूयः न अन्यत् ज्ञातव्यम् अवशिष्यते ।	there remains nothing else to be known here

"I shall now declare unto you in full this knowledge, both phenomenal and numinous. This being known, nothing further shall remain for you to know."

ज्ञानम् **knowledge** ⟨2.1⟩ n. *jñāna*

ते **to you** ⟨opt. for *tubhyam* 4.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

स-विज्ञानम् **together with realization** ⟨2.1⟩ n. *sa-vijñāna*

इदम् **this** ⟨2.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this

वक्ष्यामि **I will speak** ⟨*kalki* 3.1⟩ √*vac[a]*...परिभाषणे – to speak

अ-शेषतः **completely** ⟨*avyaya*⟩ (*a-śeṣatas*; *a-śeṣa* + *.tas[i]*) – without remainder

यद् **which** ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which

ज्ञात्वा **[after] knowing** ⟨*avyaya*⟩ √*jñā* 9P...अवबोधने – to know; + *.[k]tvā*

न **not** ⟨*avyaya*⟩

इह **here** ⟨*avyaya*⟩

भूयः **again** ⟨*avyaya*⟩

अन्यत् **other** ⟨1.1⟩ n. *kṛṣṇanāma anya*

ज्ञातव्यम् **to be known** ⟨1.1⟩ n. *jñātavya* (√*jñā* 9P...अवबोधने – to know; + *.tavya*)

अवशिष्यते **it remains** ⟨*acyuta* 1.1⟩ *ava.*√*śiṣ[a]* – to leave remaining

Subodhinī: ज्ञानम् (शास्त्रीयम्) विज्ञानम् (अनुभवः) तद्-सहितम्, इदम् मद्-विषयम् अ-शेषतः (साकल्येन) वक्ष्यामि । यद् ज्ञात्वा, इह श्रेयः-मार्गे वर्तमानस्य पुनः अन्यत् ज्ञातव्यम् अवशिष्टम् न भवति । तेन एव कृतार्थः भवति इति अर्थः ॥७.२॥

मद्-भक्तिम् विना तु मद्-ज्ञानम् दुर्लभम् इति आह – 'मनुष्याणाम्' इति –

7.3

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥३॥

मनुष्याणाम् सहस्रेषु	among thousands of men
कश्चिद् सिद्धये यतति,	someone endeavors for perfection,
यतताम् अपि सिद्धानाम्	and even among the endeavoring and perfected
कश्चिद् माम् तत्त्वतः वेत्ति ।	someone knows Me in truth

"Out of many thousands among men, one may endeavor for perfection, and of those who have achieved perfection, hardly one knows Me in truth."

मनुष्याणाम्	**among men** ⟨6.3⟩ m. *manuṣya* – human
सहस्रेषु	**among thousands** ⟨7.3⟩ m. *sahasra* – thousand
कश्चिद्	**someone** ⟨1.1⟩ m. *kṛṣṇanāma kim (kaḥ)* + *.cid* – someone, something
यतति	**he endeavors** ⟨*acyuta* 1.1⟩ √*yat[ī]*...प्रयत्ने – to endeavor
सिद्धये	**for perfection** ⟨4.1⟩ f. *siddhi* – perfection
यतताम्	**among those endeavoring** ⟨6.3⟩ m. *yatat* (√*yat[ī]*...प्रयत्ने – to endeavor; + *.[ś]at[ṛ]*) – [while] endeavoring
अपि	**also** ⟨*avyaya*⟩
सिद्धानाम्	**among those who are perfected** ⟨6.3⟩ m. *siddha* – perfected
कश्चिद्	**someone** ⟨1.1⟩ m. *kṛṣṇanāma kim (kaḥ)* + *.cid* – someone, something
माम्	**me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
वेत्ति	**he knows** ⟨*acyuta* 1.1⟩ √*vid[a]* 2P...ज्ञाने – to know
तत्त्वतः	**in truth** ⟨*avyaya*⟩ (*tattvatas*; *tattva* + *.tas[i]*)

Subodhinī: अ-सङ्ख्यातानाम् जीवानाम् मध्ये मनुष्य-व्यतिरिक्तानाम् श्रेयसि प्रवृत्तिः एव न अस्ति, मनुष्याणाम् तु सहस्रेषु मध्ये कश्चिद् एव प्रकृष्ट-पुण्य-वशात् आत्मानम् वेत्ति । तादृशानाम् च आत्म-ज्ञान-सिद्धानाम् सहस्रेषु कश्चिद् एव माम् परमात्मानम् मद्-प्रसादेन तत्त्वतः वेत्ति । तद् एवम् अतिदुर्लभम् अपि मद्-ज्ञानम् तुभ्यम् अहम् वक्ष्यामि इति अर्थः ॥७.३॥

एवम् श्रोतारम् अभिमुखी-कृत्या, इदानीम् प्रकृति-द्वारा सृष्ट्यादि-कर्तृत्वेन ईश्वर-तत्त्वम् प्रतिज्ञातम् निरूपयिष्यन्, पर-अपर-भेदेन प्रकृति-द्वयम् आह – 'भूमिः' इति द्वाभ्याम् –

7.4

भूमिरापो ऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥४॥

भूमिः आपः अनलः वायुः	earth, water, fire, air
खम् मनः बुद्धिः अहङ्कारः एव च	ether, mind, intelligence and also false ego
इति इयम्	this is
मे (मम) अष्टधा भिन्ना प्रकृतिः ।	My separated eightfold *prakṛti*

"Earth, water, fire, air, ether, mind, *buddhi* and false ego – all together these eight constitute My separated material energies."

भूमिः	**earth** ⟨1.1⟩ f. *bhūmi*
आपः	**waters** ⟨1.3⟩ f. *ap* – water
अनलः	**fire** ⟨1.1⟩ m. *anala*
वायुः	**air** ⟨1.1⟩ m. *vāyu* – air, wind, Vāyu
खम्	**ether** ⟨1.1⟩ n. *kha* – a cavity, hollow; an aperture of the body (of which there are nine, namely two eye holes, etc.), (hence) a sense organ; empty space, air, ether, sky; heaven
मनः	**the mind** ⟨1.1⟩ n. *manas (manaḥ)*
बुद्धिः	**intelligence** ⟨1.1⟩ f. *buddhi*
एव	**certainly** ⟨*avyaya*⟩
च	**and** ⟨*avyaya*⟩
अहङ्कारः	**the ego** ⟨1.1⟩ m. *ahaṅkāra* – 'I-maker', self-identification, false ego
इति	**thus** ⟨*avyaya*⟩
इयम्	**this** ⟨1.1⟩ f. *kṛṣṇanāma idam* – (first person) he, this
मे	**my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
भिन्ना	**separated** ⟨1.1⟩ f. *bhinnā* (√*bhid[ir]* – to split; + *.[k]ta* + *.ā[p]*) – split, divided, separated, detached
प्रकृतिः	**nature** ⟨1.1⟩ f. *prakṛti*
अष्टधा	**eightfold** ⟨*avyaya*⟩

Subodhinī: भूम्यादि-शब्दैः पञ्च-गन्धादि-तन्मात्रान् युच्यन्ते । मनः-शब्देन तद्-कारण-भूतः अहङ्कारः, बुद्धि-शब्देन तद्-कारणम् महत्-तत्त्वम्, अहङ्कार-शब्देन तद्-कारणम् अ-विद्या इति एवम् अष्टधा भिन्ना । यद्वा भूम्यादि-शब्दैः पञ्च-महा-भूतानि सूक्ष्मैः सहिकी-कृत्य गृह्यन्ते । अहङ्कार-शब्देन एव अहङ्कारः, तेन एव तद्-कार्याणि

इन्द्रियाणि अपि गृह्यन्ते । बुद्धिः इति महत्-तत्त्वम्, मनः-शब्देन तु मनसा एव उन्नेयम् अव्यक्त-रूपम् प्रधानम् इति अनेन प्रकारेण मे प्रकृतिः (माया-आख्या शक्तिः) अष्टधा भिन्ना (विभागम् प्राप्ता) । चतुर्विंशति-भेद-भिन्ना अपि, अष्टसु एव अन्तर्भाव-विवक्षया 'अष्टधा भिन्ना' इति उक्तम् । तथा च वक्ष्यमाण-क्षेत्र-अध्याये (ch.13) इमाम् एव प्रकृतिम् चतुर्विंशति-तत्त्वात्मना प्रपञ्चयिष्यति –

महा-भूतानि अहङ्कारः बुद्धिः अ-व्यक्तम् एव च ।
इन्द्रियाणि दश एकम् च पञ्च च इन्द्रिय-गोचराः ॥

(13.6) इति ॥७.४॥

अ-पराम् इमाम् प्रकृतिम् उपसंहरन्, पराम् प्रकृतिम् आह – 'अ-परा' इति –

7.5

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥५॥

हे महा-बाहो !	O Arjuna!
इयम् अ-परा,	this is [My] inferior [nature],
इतः तु अन्याम्	but besides this, another
मे (मम) पराम् जीव-भूताम् प्रकृतिम्	My superior nature in form of the *jīvas*
विद्धि !	you should know!
यया इदम् जगत् धार्यते ।	by which this world is sustained

"Besides these, O mighty-armed Arjuna, there is another, superior energy of Mine, which comprises the living entities who are exploiting the resources of this material, inferior nature."

अ-परा **inferior** ⟨1.1⟩ f. *kṛṣṇanāma a-parā (.ā[p])* – later, inferior, other
इयम् **this** ⟨1.1⟩ f. *kṛṣṇanāma idam* – (first person) he, this
इतः **than this** ⟨*avyaya*⟩ (*itas*; from *idam* + *.tas[i]*) – from this, than this
तु **but** ⟨*avyaya*⟩
अन्याम् **another** ⟨2.1⟩ f. *kṛṣṇanāma anyā (.ā[p])* – other
प्रकृतिम् **nature** ⟨2.1⟩ f. *prakṛti*
विद्धि **you must know** ⟨*vidhātā* 2.1⟩ √*vid[a]* 2P...ज्ञाने – to know
मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
पराम् **superior** ⟨2.1⟩ f. *parā (.ā[p])* – beyond
जीव-भूताम् **comprising the *jīvas*** ⟨2.1⟩ f. *jīva-bhūtā* – endowed with life, comprising the *jīvas*
जीव (from √*jīv[a]*...प्राणधारणे – to live) – living, existing; any living being; life, existence; the principle of life, the *jīvātmā* or individual soul (as distinct from *paramātmā* or Supersoul); (as in:) *jīva-loka* – the world of living beings; (also from √*jīv[a]*...प्राणधारणे): *jīvan* – [while] living (as in *jīvan-mukta* – liberated while still living (in this body)); *jīvana* – giving life, enlivening; life, livelihood

महा-बाहो **O Arjuna!** ⟨8.1⟩ m. *mahā-bāhu* – 'who has mighty arms'
यया **by which** ⟨3.1⟩ f. *kṛṣṇanāma yad* – (relative) who, which
इदम् **this** ⟨1.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this
धार्यते **it is supported** ⟨*acyuta* pass. caus. 1.1⟩ √*dhṛ[ñ]*...धारणे – to hold, support
जगत् **the world** ⟨1.1⟩ n. *jagat* (from √*gam[ḷ]*...गतौ – to go) – going; that which moves, men, mankind, animals; the world, universe, esp. this earth
(as in:) *jagat-traya* – the three worlds (lower, middle, higher); *jagat-pati, jagad-īśa, jagan-nātha* – the lord of the world, Viṣṇu or Kṛṣṇa; *jagad-aṇḍa* – the universal egg, universe

Subodhinī: अष्टधा उक्ता या प्रकृतिः इयम् अ-परा निकृष्टा जडत्वात् परार्थत्वात् च । इतः सकाशात् पराम् प्रकृष्टाम् अन्याम् जीव-स्वरूपाम् मे प्रकृतिम् विद्धि (जानीहि) । परत्वे हेतुः – यया चेतनया क्षेत्रज्ञ-रूपया स्वकर्म-द्वारेण इदम् जगत् धार्यते ॥७.५॥
अनयोः प्रकृतित्वम् दर्शयन्, स्वस्य तद्-द्वारा सृष्ट्यादि-कारणत्वम् आह – 'एतद्' इति –

7.6

एतद्योनीनि भूतानि सर्वाणीत्युपधारय ।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥६॥

सर्वाणि भूतानि एतद्योनीनि	all beings have these [two natures] as their source
इति उपधारय !	thus you must understand!
कृत्स्नस्य जगतः	and of the whole world
अहम् प्रभवः तथा प्रलयः ।	I am the origin and dissolution

"All created beings have their source in these two natures. Of all that is material and all that is spiritual in this world, know for certain that I am both the origin and the dissolution."

एतद्योनीनि **whose sources are these** ⟨1.3⟩ n. *etad-yoni*...एते योनी यस्य, तद् एतद्योनि
भूतानि **beings** ⟨1.3⟩ n. *bhūta* (√*bhū*...सत्तायाम् – to be, exist, become; + *.[k]ta*) – past; an element, being, creature
सर्वाणि **all** ⟨1.3⟩ n. *kṛṣṇanāma sarva*
इति **thus** ⟨*avyaya*⟩
उपधारय **you must consider** ⟨*vidhātā* caus. 2.1⟩ *upa.*√*dhṛ[ñ]* – to hold as, consider
अहम् **I am** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
कृत्स्नस्य **of the whole** ⟨6.1⟩ n. *kṛtsna* – whole
जगतः **of the world** ⟨6.1⟩ n. *jagat* – world, universe
प्रभवः **source** ⟨1.1⟩ m. *prabhava* – source, origin

प्रलयः **dissolution** ⟨1.1⟩ m. *pralaya* (from *pra.√lī[ṅ]* – to dissolve) – dissolution, annihilation, death; (esp.) the destruction of the world at the end of a *kalpa* (day of Brahmā)

तथा **so** ⟨*avyaya*⟩

Subodhinī: एते क्षेत्र-क्षेत्रज्ञ-रूपे प्रकृती योनी (कारण-भूते) येषाम्, तानि एतद्-योनीनि स्थावर-जङ्गमात्मकानि सर्वाणि भूतानि इति उपधारय (बुद्धयस्व)। तत्र जडा प्रकृतिः देह-रूपेण परिणमते। चेतना तु मद्-अंश-भूता भोक्तृत्वेन देहेषु प्रविश्य, स्व-कर्मणा तानि धारयति। ते च मदीये प्रकृती मत्तः सम्भूते। अतः अहम् एव कृत्स्नस्य स-प्रकृतिकस्य जगतः प्रभवः, 'प्रकर्षेण भवति अस्मात् इति प्रभवः', परम-कारणम् अहम् इति अर्थः। तथा 'प्रलीयते अनेन इति प्रलयः', संहर्ता अपि अहम् एव इति भावः ॥७.६॥
यस्मात् एवम् तस्मात – 'मत्तः' इति –

7.7

मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥७॥

हे धनञ्जय !	O Arjuna!
मत्तः परतरम्	superior to Me
अन्यत् किञ्चिद् न अस्ति,	there is nothing else,
सर्वम् इदम् मयि प्रोतम्	all this [world] is strung on Me
सूत्रे मणि-गणाः इव ।	like pearls on a thread

"O conqueror of wealth, there is no truth superior to Me. Everything rests upon Me, as pearls are strung on a thread."

मत्तः **than me** ⟨*avyaya*⟩ (*mattas*; from *asmad* + *.tas[i]*) – from me, than me

परतरम् **superior** ⟨1.1⟩ n. *paratara* (*.tara*) – more high

न **not** ⟨*avyaya*⟩

अन्यत् **other** ⟨1.1⟩ n. *kṛṣnanāma anya*

किञ्चिद् **something** ⟨1.1⟩ n. *kṛṣnanāma kim* (*kim*) + *.cid*

अस्ति **there is** ⟨*acyuta* 1.1⟩ √*as[a]*...भुवि – to be, exist

धनञ्जय **O Arjuna!** ⟨8.1⟩ m. *dhanam-_jaya* – 'winner of riches'

मयि **on me** ⟨7.1⟩ *kṛṣnanāma asmad* – (last person) I

सर्वम् **all** ⟨1.1⟩ n. *kṛṣnanāma sarva*

इदम् **this** ⟨1.1⟩ n. *kṛṣnanāma idam* – (first person) he, this

प्रोतम् **strung** ⟨1.1⟩ n. *prota* (*pra.√ve[ñ]* – to sew, weave; + *.[k]ta*) – sewn, woven

सूत्रे **on a thread** ⟨7.1⟩ n. *sūtra* (from √*siv[u]*...तन्तुसन्ताने – to sew) – a thread; a line; that which like a thread runs through, a rule, direction, a sketch, plan; a short sentence or aphoristic rule; a (philosophical) text book

(also from √*siv[u]*...तन्तुसन्ताने): *sūcanā* – pointing out, indication; *sūci* – a needle, any sharp point

मणि-गणाः **groups of pearls** ⟨1.3⟩ m. *maṇi-gaṇa*...मणीणाम् गणः इति मणि-गणः – a group of pearls

मणि – a jewel, gem, pearl, any ornament

गण (from √*gaṇ[a]*...सङ्ख्याने – to count) – a flock, troop, multitude, number, series, class; any assemblage or association of men; (as in:) *gaṇa-pati* – 'the leader of a (certain) group of Lord Śiva's attandants' Gaṇeśa

इव **like** ⟨*avyaya*⟩

Subodhinī: मत्तः सकाशात् परतरम् (श्रेष्ठम्), जगतः सृष्टि-संहारयोः स्वतन्त्रम् कारणम्, किञ्चिद् अपि न अस्ति। स्थिति-हेतुः अपि अहम् एव इति आह – 'मयि' इति। मयि सर्वम् इदम् जगत् प्रोतम् (ग्रथितम्), आश्रितम् इति अर्थः। दृष्टान्तः स्पष्टः ॥७.७॥
जगतः स्थिति-हेतुत्वम् प्रपञ्चयति – 'रसः अहम्' इति पञ्चभिः –

7.8

रसो ऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः ।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥८॥

हे कौन्तेय !	O Arjuna!
अप्सु अहम् रसः अस्मि,	in water I am the taste,
शशि-सूर्ययोः प्रभा	and in sun and moon [I am] the light
सर्व-वेदेषु प्रणवः	in all *Vedas* the *om*
खे शब्दः	in ether the sound
नृषु पौरुषम् ।	in men the ability

"O son of Kuntī, I am the taste of water, the light of the sun and the moon, the syllable *om* in the Vedic mantras; I am the sound in ether and ability in man."

रसः **the taste** ⟨1.1⟩ m. *rasa* – juice, essence, taste

अहम् **I** ⟨1.1⟩ *kṛṣnanāma asmad* – (last person) I

अप्सु **in water(s)** ⟨7.3⟩ f. *ap* – water

कौन्तेय **O Arjuna!** ⟨8.1⟩ m. *kaunteya* – 'son of Kuntī'

प्रभा **the light** ⟨1.1⟩ f. *prabhā* (from *pra.√bhā* – to shine) – light, splendour, beautiful appearance

अस्मि **I am** ⟨*acyuta* 3.1⟩ √*as[a]*...भुवि – to be, exist

शशि-सूर्ययोः **in moon and sun** ⟨7.2⟩ m. *śaśi-sūrya*...शशी च सूर्यः च इति शशि-सूर्यौ – moon and sun

शशिन् (*śaśī*) – 'marked with a *śaśa* or rabbit', the moon; same as *śaśāṅka* (*śaśa-_aṅka*)

Other words for 'moon': *soma, candra, indu.*

सूर्य – the sun; Sūryadeva (Vivasvān)

प्रणवः **the *om*** ⟨1.1⟩ m. *praṇava*

सर्व-वेदेषु **in all *Vedas*** ⟨7.3⟩ m. *sarva-veda* – all *Veda*

शब्दः **sound** ⟨1.1⟩ m. *śabda*

खे **in ether** ⟨7.1⟩ n. *kha* – sky, ether

पौरुषम् **ability** ⟨1.1⟩ n. *pauruṣa* (from *puruṣa*) – manhood, strength, courage, deed; force, semen virile

नृषु **in men** ⟨7.3⟩ m. *nṛ* (same as *nara*) – a man, person

Subodhinī: अप्सु रसः अहम्, रस-तन्मात्र-रूपया विभूत्या तद्-आश्रयत्वेन अप्सु स्थितः अहम् इति अर्थः । तथा शशि-सुर्ययोः प्रभा अस्मि, चन्द्रे अर्के च प्रकाश-रूपया विभूत्या तद्-आश्रयत्वेन स्थितः अहम् इति अर्थः । एवम् उत्तरत्र अपि द्रष्टव्यम् । सर्वेषु वेदेषु वैखरी-रूपेषु तद्-मूलभूतः प्रणवः (ओंकारः) अस्मि । खे (आकाशे) शब्दः तन्मात्र-रूपः अस्मि । नृषु (पुरुषेषु) पौरुषम् (उद्यमः) अस्मि, 'उद्यमे हि पुरुषाः तिष्ठन्ति' ॥७.८॥

7.9

पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥९॥

पृथिव्याम् पुण्यः गन्धः च	and in earth [I am] pure fragrance
विभावसौ तेजः च अस्मि,	and in fire I am the heat,
सर्व-भूतेषु जीवनम्	in all beings the life
तपस्विषु तपः च अस्मि ।	and in the ascetics I am penance

"I am the original fragrance of the earth, and I am the heat in fire. I am the life of all that lives, and I am the penances of all ascetics."

पुण्यः **pure** ⟨1.1⟩ m. *puṇya* – pure, holy, auspicious

गन्धः **fragrance** ⟨1.1⟩ m. *gandha* – aroma, smell

पृथिव्याम् **in earth** ⟨7.1⟩ f. *pṛthivī* (same as *pṛthvī*) (from *pṛthu* – broad, great, abundant)– the earth or world; land, ground; the earth element

च **and** ⟨*avyaya*⟩

तेजः **heat** ⟨1.1⟩ n. *tejas* (*tejaḥ*; from √*tij[a]*...निशाने क्षमायां च – to sharpen; tolerate) – sharpness; radiance, heat; brilliance, splendor; prowess, boldness; semen

(also from √*tij[a]*...निशाने क्षमायां च – to sharpen; tolerate) *titikṣā* – tolerance

अस्मि **I am** ⟨*acyuta* 3.1⟩ √*as[a]*...भुवि – to be, exist

विभावसौ **in fire** ⟨7.1⟩ m. *vibhāvasu* – fire

जीवनम् **life** ⟨1.1⟩ n. *jīvana*

सर्व-भूतेषु **in all beings** ⟨7.3⟩ m. *sarva-bhūta* – all beings

तपः **penance** ⟨1.1⟩ n. *tapas* (*tapaḥ*) – austerity, penance

अस्मि **I am** ⟨*acyuta* 3.1⟩ √*as[a]*...भुवि – to be, exist

तपस्विषु **in ascetics** ⟨7.3⟩ m. *tapasvin* (*tapasvī*) – 'who undergoes austerity', ascetic

Subodhinī: पुण्यः (अ-विकृतः) गन्धः, गन्ध-तन्मात्रम् पृथिव्याः आश्रय-भूतम् अहम् इति अर्थः । यद्वा, विभूति-रूपेण आश्रयत्वस्य विवक्षितत्वात्, सुरभि-गन्धस्य एव उत्कृष्टतया विभूतित्वात् पुण्यः गन्धः इति उक्तम् । तथा विभावसौ (अग्नौ) यद् तेजः (सहजा दीप्तिः), तद् अहम् । सर्व-भूतेषु जीवनम् (प्राण-धारणम् आयुः) अहम् इति अर्थः । तपस्विषु (वानप्रस्थ-आदिषु) द्वन्द्व-सहन-रूपम् तपः अस्मि ॥७.९॥

7.10

बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् ।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥१०॥

हे पार्थ !	O Arjuna!
सर्व-भूतानाम् सनातनम् बीजम्	as the eternal seed of all beings
माम् विद्धि !	know Me!
बुद्धिमताम् बुद्धिः अस्मि,	of the intelligent I am intelligence,
तेजस्विनाम् अहम् तेजः ।	of the powerful I am prowess

"O son of Pṛthā, know that I am the original seed of all existences, the intelligence of the intelligent, and the prowess of all powerful men."

बीजम् **seed** ⟨2.1⟩ n. *bīja* – seed, semen; seed-corn, grain; any germ, element, primary cause or principle, source, origin; the essential part of a *mantra*

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

सर्व-भूतानाम् **of all beings** ⟨6.3⟩ m. *sarva-bhūta* – all beings

विद्धि **you must know** ⟨*vidhātā* 2.1⟩ √*vid[a]* 2P...ज्ञाने – to know

पार्थ **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'

सनातनम् **eternal** ⟨2.1⟩ n. *sanātana*

बुद्धिः **intelligence** ⟨1.1⟩ f. *buddhi*

बुद्धिमताम् **of the intelligent** ⟨6.3⟩ m. *buddhimat* (*.mat[u]*) – 'having *buddhi* (intelligence)'; intelligent

अस्मि **I am** ⟨*acyuta* 3.1⟩ √*as[a]*...भुवि – to be, exist

तेजः **vigor** ⟨1.1⟩ n. *tejas* (*tejaḥ*; from √*tij[a]*...निशाने क्षमायां च – to sharpen; tolerate) – sharpness; radiance, heat; brilliance, splendor; prowess, boldness; semen

तेजस्विनाम् **of the powerful** ⟨6.3⟩ m. *tejasvin* (*tejasvī*) – 'who has prowess'

अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

Subodhinī: सर्वेषाम् चर-अचराणाम् भूतानाम् बीजम् (सजातीय-कार्य-उत्पादन-सामर्थ्यम्) सनातनम् (नित्यम्), उत्तरोत्तर-सर्व-कार्येषु अनुस्यूतम्, तद् एव बीजम् मद्-विभूतिम् विद्धि, नतु प्रति-व्यक्ति विनश्यम् । तथा बुद्धिमताम् बुद्धिः (प्रज्ञा) अहम् अस्मि । तेजस्विनाम् (प्रगल्भानाम्) तेजः (प्रागल्भ्यम्) अहम् ॥७.१०॥

7.11

बलं बलवतां चाहं कामरागविवर्जितम् ।
धर्माविरुद्धो भूतेषु कामो ऽस्मि भरतर्षभ ॥११॥

हे भरतर्षभ !	O Arjuna!
बलवताम् च	and of the strong
अहम् काम-राग-विवर्जितम् बलम्,	I am strength which is free from desire and attachment,
भूतेषु	in all beings
धर्माविरुद्धः कामः अस्मि ।	I am sex life which is not against *dharma*

"I am the strength of the strong, devoid of passion and desire. I am sex life which is not contrary to religious principles, O lord of the Bhāratas (Arjuna)."

बलम् **strength** ⟨1.1⟩ n. *bala*

बलवताम् **of the strong** ⟨6.3⟩ m. *balavat* (*.vat[u]*) – 'having *bala* (strength)'; strong

च **and** ⟨*avyaya*⟩

अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

काम-राग-विवर्जितम् **devoid of desire and attachment** ⟨1.1⟩ n. *kāma-rāga-vivarjita*
विवर्जित (*vi.*√*vṛj[ī]* – to abandon, avoid; + *.[k]ta*) – abandoned, avoided

धर्माविरुद्धः **not against *dharma*** ⟨1.1⟩ m. *dharma-_a-viruddha*...धर्मेण अ-विरुद्धः इति धर्माविरुद्धः
विरुद्ध (*vi.*√*rudh[ir]* – to enclose, oppose; + *.[k]ta*) – opposed, adverse, prohibited, dangerous

भूतेषु **in beings** ⟨7.3⟩ m. *bhūta* (√*bhū*...सत्तायाम् – to be, exist, become; + *.[k]ta*) – past; an element, being, creature

कामः **sex life** ⟨1.1⟩ m. *kāma* – desire, (esp.) sex life

अस्मि **I am** ⟨*acyuta* 3.1⟩ √*as[a]*...भुवि – to be, exist

भरतर्षभ **O Arjuna!** ⟨8.1⟩ m. *bharata-_ṛṣabha* – 'best of the descendants of Bharata'

Subodhinī: 'कामः' अ-प्राप्ते वस्तुनि अभिलाषः राजसः । रागः पुनः अभिलषिते अर्थे प्राप्ते अपि पुनः अधिके अर्थे चित्त-रञ्जनात्मकः तृष्णा-पर्यायः तामसः, ताभ्याम् विवर्जितम्, बलवताम् बलम् अहम् अस्मि । सात्त्विकम् स्वधर्म-अनुष्ठान-सामर्थ्यम् अहम् इति अर्थः । स्व-धर्मेण अ-विरुद्धः स्व-दारेषु पुत्र-उत्पत्ति-मात्र-उपयोगी कामः अहम् ॥७.११॥

7.12

ये चैव सात्त्विका भावा राजसास्तामसाश्च ये ।
मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥१२॥

ये च एव सात्त्विकाः भावाः	whichever states are in goodness
ये राजसाः तामसाः च	and also in passion and ignorance
मत्तः एव	are from Me
इति तान् विद्धि !	thus know them!
अहम् तु तेषु न	but I am not in them
ते मयि ।	they are in Me

"Know that all states of being – be they of goodness, passion or ignorance – are manifested by My energy. I am, in one sense, everything, but I am independent. I am not under the modes of material nature, for they, on the contrary, are within Me."

ये **those which** ⟨1.3⟩ m. *kṛṣṇanāma yad* – (relative) who, which

च **and** ⟨*avyaya*⟩

एव **certainly** ⟨*avyaya*⟩

सात्त्विकाः **which are in *sattva-guṇa*** ⟨1.3⟩ m. *sāttvika* (from *sattva*) – pertaining to *sattva-guṇa*

भावाः **states** ⟨1.3⟩ m. *bhāva* – state of being, nature, sentiment

राजसाः **which are in *rajo-guṇa*** ⟨1.3⟩ m. *rājasa* (from *rajas*) – pertaining to *rajo-guṇa*

तामसाः **which are in *tamo-guṇa*** ⟨1.3⟩ m. *tāmasa* (from *tamas*) – pertaining to *tamo-guṇa*
तमस् (*tamaḥ*) (from √*tam[u]*...ग्लानौ – to be tired) – darkness; the darkness of hell; mental darkness; a state of existence in *tamo-guṇa* is for example illusion, in *rajo-guṇa* pride, and in *sattva-guṇa* self-control

मत्तः **from me** ⟨*avyaya*⟩ (*mattas*; from *asmad* + *.tas[i]*) – from me, than me

इति **thus** ⟨*avyaya*⟩

तान् **them** ⟨2.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

विद्धि **you must know** ⟨*vidhātā* 2.1⟩ √*vid[a]* 2P...ज्ञाने – to know

न **not** ⟨*avyaya*⟩

तु **but** ⟨*avyaya*⟩

अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

तेषु **in them** ⟨7.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

ते **they** ⟨1.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

मयि **in me** ⟨7.1⟩ *kṛṣṇanāma asmad* – (last person) I

Subodhinī: ये च अन्ये अपि सात्त्विकाः भावाः (शम-दमादयः), राजसाः च (हर्ष-दर्पादयः), तामसाः च ये (शोक-मोहादयः) प्राणिनाम् स्वकर्म-वशात् जायन्ते, तान् सर्वान् मत्तः एव जातानि इति विद्धि, मदीय-प्रकृति-गुण-कार्यत्वात् । एवम् अपि तेषु अहम् न वर्ते । जीववत् तद्-अधीनः अहम् न भवामि इति अर्थः । ते तु मद्-अधीनाः सन्तः, मयि वर्तन्ते इति अर्थः ॥७.१२॥

एवम्-भूतम् त्वाम् परमेश्वरमयम् जनः किम् इति न जानाति ? इति अतः आह – 'त्रिभिः' इति –

7.13

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥१३॥

एभिः त्रिभिः गुणमयैः भावैः	by these three states made of the *guṇas*
मोहितम्	being deluded
इदम् सर्वम् जगत्	this whole world
एभ्यः परम् अ-व्ययम् माम्	Me, who am beyond these and unchangeable
न अभिजानाति ।	does not know

"Deluded by the three modes (goodness, passion and ignorance), the whole world does not know Me, who am above the modes and inexhaustible."

त्रिभिः **by the three** ⟨3.3⟩ m. *tri* – three

गुणमयैः **made of the *guṇas*** ⟨3.3⟩ m. *guṇamaya*

भावैः **by the states** ⟨3.3⟩ m. *bhāva* – state of being: nature, sentiment

एभिः **by these** ⟨3.3⟩ m. *kṛṣṇanāma idam* – (first person) he, this

सर्वम् **all** ⟨1.1⟩ n. *kṛṣṇanāma sarva*

इदम् **this** ⟨1.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this

जगत् **world** ⟨1.1⟩ n. *jagat* – world, universe

मोहितम् **bewildered** ⟨1.1⟩ n. *mohita* (√*muh[a]*...वैचित्ये – to be bewildered; + *.[k]ta*)

न **not** ⟨*avyaya*⟩

अभिजानाति **it understands** ⟨*acyuta* 1.1⟩ *abhi.*√*jñā* – to understand

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

एभ्यः **from these** ⟨5.3⟩ m. *kṛṣṇanāma idam* – (first person) he, this

परम् **beyond** ⟨2.1⟩ m. *para*

अ-व्ययम् **unchangeable** ⟨2.1⟩ m. *a-vyaya* – unchangeable, imperishable

Subodhinī: त्रिभिः (त्रिविधैः) एभिः (पूर्व-उक्तैः) काम-लोभादिभिः गुण-मयैः (गुण-विकारैः) भावैः (स्व-भावैः) मोहितम् इदम् जगत्, अतः माम् न अभिजानाति । कथम्-भूतम् ? एभ्यः भावेभ्यः परम् (एभिः अ-संस्पृष्टम्), एतेषाम् नियन्तारम्, अतएव अ-व्ययम् (निर्विकारम्) इति अर्थः ॥७.१३॥

के तर्हि त्वाम् जानन्ति ? इति अतः आह – 'दैवी' इति –

7.14

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥१४॥

एषा गुणमयी मम दैवी माया	this My divine Māyā, made of the *guṇas*
दुरत्यया हि,	is indeed difficult to overcome,
ये माम् एव प्रपद्यन्ते	[but] those who surrender to Me alone
ते एताम् मायाम् तरन्ति ।	they cross this Māyā

"This divine energy of Mine, consisting of the three modes of material nature, is difficult to overcome. But those who have surrendered unto Me can easily cross beyond it."

दैवी **divine** ⟨1.1⟩ f. *daivī* (from *deva* + *.ī[p]*) – 'godly'

हि **indeed** ⟨*avyaya*⟩

एषा **this** ⟨1.1⟩ f. *kṛṣṇanāma etad* – (first person) he, this

गुणमयी **made of the *guṇas*** ⟨1.1⟩ f. *guṇamayī* (*.ī[p]*)

मम **my** ⟨6.1⟩ *kṛṣṇanāma asmad* – (last person) I

माया **Māyā** ⟨1.1⟩ f. *māyā* – divine power, illusion

दुरत्यया **difficult to pass** ⟨1.1⟩ f. *duratyayā* (from *dur.ati.*√*i[ṇ]* – to pass with difficulty; + *.ā[p]*)

माम् **to me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

एव **certainly** ⟨*avyaya*⟩

ये **those who** ⟨1.3⟩ m. *kṛṣṇanāma yad* – (relative) who, which

प्रपद्यन्ते **they surrender** ⟨*acyuta* 1.3⟩ *pra.*√*pad[a]* – to surrender

मायाम् **Māyā** ⟨2.1⟩ f. *māyā* – divine power, illusion

एताम् **this** ⟨2.1⟩ f. *kṛṣṇanāma etad* – (first person) he, this

तरन्ति **they cross** ⟨*acyuta* 1.3⟩ √*tṝ*...प्लवन-तरणयोः – to swim; cross

ते **they** ⟨1.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

Subodhinī: दैवी (अ-लौकिकी) अत्यद्भुता इति अर्थः, गुण-मयी (सत्त्वादि-गुण-विकार-आत्मिका) मम परमेश्वरस्य शक्तिः (माया) दुरत्यया (दुस्तरा) हि, प्रसिद्धम्

एतद् । तथापि ये माम् एव इति एव-कारेण अ-व्यभिचारिण्या भक्त्या प्रपद्यन्ते (भजन्ति), ते मायाम् एताम् दुस्तराम् अपि तरन्ति । ततः माम् जानन्ति इति भावः ॥७.१४॥

किम् इति तर्हि सर्वे त्वाम् एव न भजन्ति ? तत्र आह – 'न माम्' इति –

7.15

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
माययापहृतज्ञाना आसुरं भावमाश्रिताः ॥१५॥

मूढाः नराधमाः	fools, lowest of men,
मायया अपहृत-ज्ञानाः	those whose knowledge is stolen by Māyā
आसुरम् भावम् आश्रिताः	who partake of an atheistic mentality
दुष्कृतिनः माम् न प्रपद्यन्ते ।	[these] sinners do not surrender to Me

"Those miscreants who are grossly foolish, who are lowest among mankind, whose knowledge is stolen by illusion, and who partake of the atheistic nature of demons do not surrender unto Me."

न **not** ⟨*avyaya*⟩

माम् **to me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

दुष्कृतिनः **sinners** ⟨1.3⟩ m. *duṣkṛtin* (*duṣkṛtī*; from *dur.√[du]kṛ[ñ]* – to do bad) – 'doer of evil', sinner

मूढाः **fools** ⟨1.3⟩ m. *mūḍha* (like *mohita* also from *√muh[a]*...वैचित्ये – to be bewildered; + *.[k]ta*) – 'who is bewildered', a fool

प्रपद्यन्ते **they surrender** ⟨*acyuta* 1.3⟩ *pra.√pad[a]* – to surrender

नराधमाः **lowest among men** ⟨1.3⟩ m. *nara-_adhama*...नरेषु अधमाः इति नराधमाः
अधम – lowest

मायया **by Māyā** ⟨3.1⟩ f. *māyā* – divine power, illusion

अपहृत-ज्ञानाः **whose knowledge is stolen** ⟨1.3⟩ m. *apahṛta-jñāna*...अपहृतम् ज्ञानम् यस्य, सः अपहृ-ज्ञानः
अपहृत (*apa.√hṛ[ñ]* – to carry away; + *.[k]ta*) – carried away, attracted, stolen

आसुरम् **demoniac** ⟨2.1⟩ m. *āsura* (from *asura* – demon)
Sura means 'a god'; (as in:) *surāri* (*sura-_ari*) – enemy of the gods, an *a-sura*; *surendra* (*sura-indra*) – chief of the gods; The *suras* are also called *devas* (gods) and their nature is called *daiva* (godly). "There are two mentalities in this world – *daiva* (godly) and *āsura* (demoniac). The devotees of Viṣṇu are called *daiva*, whereas those against the Lord are called *āsura*." (*Padma-Purāṇa*) The *asuras* (demons) are particularly identified with the sons of Kaśyapa by his wives Danu (as Dānavas) and Diti (as Daityas), and also called *indrāri* (enemy of Indra).

भावम् **disposition** ⟨2.1⟩ m. *bhāva* – state of being: nature, sentiment

आश्रिताः **who have taken shelter** ⟨1.3⟩ m. *āśrita* (*ā.√śri[ñ]* – to take shelter; + *.[k]ta*) – taken shelter

Subodhinī: नरेषु ये अधमाः ते माम् न प्रपद्यन्ते (न भजन्ति) । अधमत्वे हेतुः – मूढाः (विवेक-शून्याः) । तद् कृतः – दुष्कृतिनः (पाप-शीलाः) । अतः मायया अपहृतम् (निरस्तम्) शास्त्र-आचार्य-उपदेशाभ्याम् जातम् अपि ज्ञानम्, तेषाम् ते । अतएव 'दम्भः दर्पः अभिमानः च क्रोधः पारुष्यम् एव च' (16.4) इत्यादिना वक्ष्यमाणम् आसुरम् भावम् (स्व-भावम्) प्राप्ताः सन्तः, न माम् भजन्ति ॥७.१५॥

सुकृतिनः तु माम् भजन्ति, ते च सुकृत-तारतम्येन चतुर्विधा इति आह – 'चतुर्विधाः' इति –

7.16

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥१६॥

हे अर्जुन भरतर्षभ !	O Arjuna!
आर्तः जिज्ञासुः अर्थार्थी	the distressed, inquisitive, desirer of wealth
ज्ञानी च	and one in knowledge [of the self]
चतुर्विधाः सुकृतिनः जनाः	[these] four kinds of pious men
माम् भजन्ते	worship Me

"O best among the Bhāratas, four kinds of pious men begin to render devotional service unto Me – the distressed, the desirer of wealth, the inquisitive, and he who is searching for knowledge of the Absolute."

चतुर्विधाः **four kinds of** ⟨1.3⟩ m. *catur-vidha*

भजन्ते **they worship** ⟨*acyuta* 1.3⟩ *√bhaj[a]* 1U...सेवायाम् – to serve, worship

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

जनाः **men** ⟨1.3⟩ m. *jana* – man, person

सुकृतिनः **pious men** ⟨1.3⟩ m. *sukṛtin* (*sukṛtī*) – 'doer of good', pious man

अर्जुन **O Arjuna!** ⟨8.1⟩ m. *arjuna* – white, 'who is pure in actions'

आर्तः **who is distressed** ⟨1.1⟩ m. *ārta* (*ā.√r* – to reach, fall into; + *.[k]ta*) – fallen into (misfortune), afflicted

जिज्ञासुः **who desires to know** ⟨1.1⟩ m. *jijñāsu* (from *√jñā* 9P...अवबोधने – to know)

अर्थार्थी **who wants wealth** ⟨1.1⟩ m. *artha-_arthin* (*-arthī*)...अर्थम् अर्थयते इति अर्थार्थी – who wants *artha*
अर्थ – means of enjoyment

ज्ञानी **who is in knowledge** ⟨1.1⟩ m. *jñānin* (*jñānī*)

च **and** ⟨*avyaya*⟩

भरतर्षभ **O Arjuna!** ⟨8.1⟩ m. *bharata-_ṛṣabha* – 'best of the descendants of Bharata'

Subodhinī: पूर्व-जन्मसु ये कृत-पुण्याः जनाः, ते तु चतुर्विधाः । आर्तः (रोगादि-अभिभूतः), सः यदि पूर्वकृत-पुण्यः तर्हि माम् भजति, अन्यथा क्षुद्र-देवता-भजनेन संसरति, एवम् उत्तरत्र अपि द्रष्टव्यम् । जिज्ञासुः (आत्म-ज्ञान-इच्छुः) । अर्थ-अर्थी (अत्र वा परत्र वा भोग-साधन-भूतार्थ-लिप्सुः) । ज्ञानी च (आत्म-विद्) ॥७.१६॥
तेषाम् मध्ये ज्ञानी श्रेष्ठः इति आह – 'तेषाम्' इति –

7.17

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनो ऽत्यर्थमहं स च मम प्रियः ॥१७॥

तेषाम्	of those
नित्य-युक्तः एक-भक्तिः ज्ञानी	this *jñānī*, always engaged in exclusive devotion
विशिष्यते,	is best,
अहम् हि ज्ञानिनः अत्यर्थम् प्रियः,	of this *jñānī* I am the most beloved,
सः च मम प्रियः ।	and he is also My beloved

"Of these, the one who is in full knowledge and who is always engaged in pure devotional service is the best. For I am very dear to him, and he is dear to Me."

तेषाम् **of those** ⟨6.3⟩ m. *kṛṣnanāma tad* – (first person) he, that
ज्ञानी **the one in knowledge** ⟨1.1⟩ m. *jñānin* (*jñānī*)
नित्य-युक्तः **who is always engaged** ⟨1.1⟩ m. *nitya-yukta*
एक-भक्तिः **whose devotion is exclusive** ⟨1.1⟩ m. *eka-bhakti*...एकस्मिन् भक्तिः यस्य, सः
एक-भक्तिः – 'whose devotion is in one'
भक्ति (from √*bhaj[a]* 1U...सेवायाम् – to serve, worship) – devotion, attachment, love, homage, worship; (also from √*bhaj[a]* 1U...सेवायाम्): *bhajana* – worshiping
विशिष्यते **he is distinguished** ⟨*acyuta* pass. 1.1⟩ *vi*.√*śiṣ[l]* – to distinguish
प्रियः **the beloved** ⟨1.1⟩ m. *priya* – dear
हि **indeed** ⟨*avyaya*⟩
ज्ञानिनः **of the one in knowledge** ⟨6.1⟩ m. *jñānin* (*jñānī*) – who is in knowledge
अत्यर्थम् **very much** ⟨*avyaya*⟩ (*ati._artham*)
अहम् **I** ⟨1.1⟩ *kṛṣnanāma asmad* – (last person) I
सः **he** ⟨1.1⟩ m. *kṛṣnanāma tad* – (first person) he, that
च **and** ⟨*avyaya*⟩
मम **my** ⟨6.1⟩ *kṛṣnanāma asmad* – (last person) I
प्रियः **the beloved** ⟨1.1⟩ m. *priya*

Subodhinī: तेषाम् मध्ये ज्ञानी विशिष्टः । तत्र हेतवः – नित्य-युक्तः (सदा मद्-निष्ठः), एकस्मिन् (मयि एव) भक्तिः यस्य सः, ज्ञानिनः देहादि-अभिमान-अभावेन चित्त-विक्षेप-अभावात् नित्य-युक्तत्वम् एकान्त-भक्तित्वम् च सम्भवति, न अन्यस्य । अतएव हि तस्य अहम् अत्यन्तम् प्रियः, सः च मम, तस्मात् एतैः नित्य-युक्तत्वादिभिः चतुर्भिः हेतुभिः सः उत्तमः इति अर्थः ॥७.१७॥
तर्हि किम् इतरे त्रयः त्वद्-भक्ताः संसरन्ति ? 'नहि नहि' इति आह – 'उदाराः' इति –

7.18

उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥१८॥

एते सर्वे एव उदाराः,	all of these are certainly noble,
ज्ञानी तु	but the one in knowledge
आत्मा एव मे (मम) मतम्,	I consider as My very Self,
सः हि युक्तात्मा	[because] he, his mind fixed [on Me]
अनुत्तमाम् गतिम् माम् एव	to Me alone, the supreme goal
आस्थितः ।	has resorted

"All these devotees are undoubtedly magnanimous souls, but he who is situated in knowledge of Me I consider to be just like My own self. Being engaged in My transcendental service, he is sure to attain Me, the highest and most perfect goal."

उदाराः **noble** ⟨1.3⟩ m. *udāra* – high, exalted; great, best; noble, generous; upright, honest; liberal, gentle, munificient; sincere, proper; unperplexed; exciting; active, energetic
(derived:) *audārya* – generosity, nobility, magnanimity; liberality
सर्वे **all** ⟨1.3⟩ m. *kṛṣṇanāma sarva*
एव **certainly** ⟨*avyaya*⟩
एते **these** ⟨1.3⟩ m. *kṛṣṇanāma etad* – (first person) he, this
ज्ञानी **the one in knowledge** ⟨1.1⟩ m. *jñānin* (*jñānī*)
तु **but** ⟨*avyaya*⟩
आत्मा **the self** ⟨1.1⟩ m. *ātman* (*ātmā*) – the self, soul
मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
मतम् **opinion** ⟨1.1⟩ n. *mata* (.*[k]ta*) – opinion
आस्थितः **having resorted to** ⟨1.1⟩ m. *āsthita* (*ā*.√*sthā* – to attain, resort; + .*[k]ta*) – resorted
सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
हि **indeed** ⟨*avyaya*⟩
युक्तात्मा **whose mind is fixed** ⟨1.1⟩ m. *yukta-_ātman* (*-ātmā*)...युक्तः आत्मा यस्य, सः युक्तात्मा

माम्	**me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
अनुत्तमाम्	**the supreme** ⟨2.1⟩ f. *an-uttamā* (*.ā[p]*)...न अस्ति उत्तमा यस्याः, सा अनुत्तमा – 'whose superior does not exist'
गतिम्	**goal** ⟨2.1⟩ f. *gati* – movement, goal

Subodhinī: सर्वे अपि एते उदाराः (महान्तः), मोक्ष-भाजः एव इति अर्थः, ज्ञानी पुनः आत्मा एव इति मे मतम् निश्चयः । हि यस्मात् सः ज्ञानी युक्तात्मा (मद्-एक-चित्तः) सन्, न विद्यते उत्तमा यस्याः ताम् अनुत्तमाम् (सर्व-उत्तमाम्) गतिम् माम् एव आस्थितः (आश्रितवान्), मद्-व्यतिरिक्तम् अन्यत् फलम् न मन्यते इति अर्थः ॥७.१८॥

एवम्-भूतः मद्-भक्तः अतिदुर्लभः इति आह – 'बहूनाम्' इति –

7.19

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥१९॥

बहूनाम् जन्मनाम् अन्ते	after many births
सर्वम् वासुदेवः इति ज्ञानवान्	one who knows that 'everything is Vāsudeva'
माम् प्रपद्यते,	surrenders to Me,
सः महात्मा सुदुर्लभः ।	such a great soul is very rare

"After many births and deaths, he who is actually in knowledge surrenders unto Me, knowing Me to be the cause of all causes and all that is. Such a great soul is very rare."

बहूनाम्	**of many** ⟨6.3⟩ n. *bahu* – many
जन्मनाम्	**of births** ⟨6.3⟩ n. *janman* (*janma*) – birth
अन्ते	**at the end** ⟨7.1⟩ m. *anta* – end
ज्ञानवान्	**who has knowledge** ⟨1.1⟩ m. *jñānavat* (*.vat[u]*) – 'having *jñāna* (knowledge)'
माम्	**to me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
प्रपद्यते	**he surrenders** ⟨*acyuta* 1.1⟩ *pra.√pad[a]* – to surrender
वासुदेवः	**Śrī Kṛṣṇa** ⟨1.1⟩ m. *vāsudeva* – 'who resides in all beings', a name of Viṣṇu-Kṛṣṇa as Supersoul of the universe; or 'son of Vasudeva', a name of Kṛṣṇa
सर्वम्	**everything** ⟨1.1⟩ n. *kṛṣṇanāma sarva* – all
इति	**thus** ⟨*avyaya*⟩
सः	**that** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
महात्मा	**great soul** ⟨1.1⟩ m. *mahā-_ātman* (*-ātmā*)...महान् आत्मा यस्य, सः महात्मा – 'whose soul is great'
सुदुर्लभः	**very rare** ⟨1.1⟩ m. *sudurlabha* (from *su.dur.√[ḍu]labh[aṣ]* – to obtain with difficulty) – difficult to obtain

Subodhinī: बहूनाम् जन्मनाम् किञ्चिद् किञ्चिद् पुण्य-उपचयेन अन्ते (चरमे जन्मनि) ज्ञानवान् 'सर्वम् इदम् चर-अचरम् वासुदेवः एव' इति सर्व-आत्म-दृष्ट्या माम् प्रपद्यते (भजति), अतः सः महात्मा (अ-परिच्छिन्न-दृष्टिः) सुदुर्लभः ॥७.१९॥

तद् एवम् कामिनः अपि सन्तः, काम-प्राप्तये परमेश्वरम् एव ये भजन्ति, ते कामान् प्राप्य शनैः मुच्यन्ते इति उक्तम् । ये तु अत्यन्तम् राजसाः तामसाः च काम-अभिभूताः क्षुद्र-देवताः सेवन्ते, ते संसरन्ति इति आह – 'कामैः' इति चतुर्भिः –

7.20

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः ।
तं तं नियममास्थाय प्रकृत्या नियताः स्वया ॥२०॥

तैः तैः कामैः हृत-ज्ञानाः	their intelligence stolen by particular desires
स्वया प्रकृत्या नियताः	being controlled by their own nature
तम् तम् नियमम् आस्थाय	[after] resorting to a particular observance
अन्य-देवताः प्रपद्यन्ते ।	they worship other gods

"Those whose intelligence has been stolen by material desires surrender unto demigods and follow the particular rules and regulations of worship according to their own natures."

कामैः	**by desires** ⟨3.3⟩ m. *kāma* – desire
तैः तैः	**by those respective** ⟨3.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that
हृत-ज्ञानाः	**whose knowledge is stolen** ⟨1.3⟩ m. *hṛta-jñāna*
प्रपद्यन्ते	**they surrender** ⟨*acyuta* 1.3⟩ *pra.√pad[a]* – to surrender
अन्य-देवताः	**to other gods** ⟨2.3⟩ f. *anya-devatā* (*.tā[p]*) – another divinity
तम् तम्	**that respective** ⟨2.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
नियमम्	**observance** ⟨2.1⟩ m. *niyama* – rule of restraint
आस्थाय	**[after] resorting to** ⟨*avyaya*⟩ (*ā.√sthā* – to attain, resort; + *.ya[p]*)
प्रकृत्या	**by nature** ⟨3.1⟩ f. *prakṛti* – nature
नियताः	**restrained** ⟨1.3⟩ m. *niyata* (*ni.√yam[a]* – to restrain; + *.[k]ta*)
स्वया	**by the own** ⟨3.1⟩ f. *kṛṣṇanāma svā* (*.ā[p]*) – own

Subodhinī: ये तु तैः तैः पुत्र-कीर्ति-शत्रुजयादि-विषयैः कामैः अपहृत-विवेकाः सन्तः, अन्याः क्षुद्राः भूत-प्रेत-यक्षादि-देवताः भजन्ति । किम् कृत्वा ? तद् तद् देवता-आराधने यः यः नियम-उपवासादि-लक्षणः, तम् तम् नियमम् स्वीकृत्य । तत्र अपि स्वकीयया प्रकृत्या पूर्व-अभ्यास-वासनया नियताः (वशी-कृताः) सन्तः ॥७.२०॥

ये देवता-विशेषम् भजन्ति, तेषाम् मध्ये – 'यः यः याम्' इति –

7.21

यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥२१॥

यः यः भक्तः	the particular worshiper
याम् याम् तनुम्	whatever deity
श्रद्धया अर्चितुम् इच्छति,	he wants to worship with faith,
तस्य तस्य	of that particular [worshiper]
ताम् एव श्रद्धाम्	that very faith
अहम् अ-चलाम् विदधामि ।	I make steady

"I am in everyone's heart as the Supersoul. As soon as one desires to worship some demigod, I make his faith steady so that he can devote himself to that particular deity."

यः यः **whoever** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
याम् याम् **whichever** ⟨2.1⟩ f. *kṛṣṇanāma yad* – (relative) who, which
तनुम् **form** ⟨2.1⟩ f. *tanu* (from √*tan[u]*...विस्तारे – to spread, pervade) – body, person; form, manifestation
भक्तः **the worshiper** ⟨1.1⟩ m. *bhakta* – devotee
श्रद्धया **with faith** ⟨3.1⟩ f. *śraddhā* – faith, trust
अर्चितुम् **to worship** ⟨*avyaya*⟩ (√*arc[a]*...पूजायाम् – to worship, honor; + .*tum[u]*)
इच्छति **he desires** ⟨*acyuta* 1.1⟩ √*iṣ[u]*...इच्छायाम् – to wish, desire
तस्य तस्य **his respective** ⟨6.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
अ-चलाम् **steady** ⟨2.1⟩ f. *a-calā* (.*ā[p]*) – unmoving
श्रद्धाम् **faith** ⟨2.1⟩ f. *śraddhā* – faith, trust
ताम् **that** ⟨2.1⟩ f. *kṛṣṇanāma tad* – (first person) he, that
एव **certainly** ⟨*avyaya*⟩
विदधामि **I make** ⟨*acyuta* 3.1⟩ *vi*.√*[ḍu]dhā[ñ]* – to hold, make
अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

Subodhinī: यः यः भक्तः याम् याम् तनुम् (देवता-रूपाम्, मदीयाम् एव मूर्तिम्) श्रद्धया अर्चितुम् इच्छति (प्रवर्तते), तस्य तस्य भक्तस्य तद् तद् मूर्ति-विषयाम् ताम एव श्रद्धाम् अ-चलाम् (दृढाम्) अहम् अन्तर्यामी विदधामि (करोमि) ॥७.२१॥ ततः च – 'सः तया' इति –

7.22

स तया श्रद्धया युक्तस्तस्याराधनमीहते ।
लभते च ततः कामान्मयैव विहितान्हि तान् ॥२२॥

तया श्रद्धया युक्तः	endowed with that faith
सः तस्य आराधनम् ईहते,	he performs his worship,
ततः च	and from that [*deva*],
मया एव हि विहितान्	bestowed by Me alone
तान् कामान् लभते ।	he obtains those desires

"Endowed with such a faith, he endeavors to worship a particular demigod and obtains his desires. But in actuality these benefits are bestowed by Me alone."

सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
तया **with that** ⟨3.1⟩ f. *kṛṣṇanāma tad* – (first person) he, that
श्रद्धया **with faith** ⟨3.1⟩ f. *śraddhā* – faith, trust
युक्तः **endowed** ⟨1.1⟩ m. *yukta* – connected, engaged, endowed
तस्य **of that** ⟨6.1⟩ f. *kṛṣṇanāma tad* – (first person) he, that
The word *tasya* here may refer to the worshiper, who performs his worship. Or else, the *sandhi* can be split as *tasyā rādhanam*, to suit *tanu* of the previous verse, which is feminine – *tasyāḥ (tanoḥ) rādhanam*.
आराधनम् **the worship** ⟨2.1⟩ n. *ārādhana* (from *ā*.√*rādh[a]* – to accomplish) (also from √*rādh[a]*...संसिद्धौ – to accomplish:) *ārādhya* – to be made favorable, to be worshipped; *rādhā* – prosperity, success; name of a celebrated *gopī*
ईहते **he performs** ⟨*acyuta* 1.1⟩ √*īh[a]*...चेष्टा-वाञ्छयोः – to endeavor; desire
लभते **he obtains** ⟨*acyuta* 1.1⟩ √*[ḍu]labh[aṣ]*...प्राप्तौ – to obtain
च **and** ⟨*avyaya*⟩
ततः **from that** ⟨*avyaya*⟩ (*tatas*; from *tad* + .*tas[i]*) – from/after/than that
कामान् **desires** ⟨2.3⟩ m. *kāma* – desire
मया **by me** ⟨3.1⟩ *kṛṣṇanāma asmad* – (last person) I
एव **certainly** ⟨*avyaya*⟩
विहितान् **which are made** ⟨2.3⟩ m. *vihita* (*vi*.√*[ḍu]dhā[ñ]* – to hold, make; + .*[k]ta*) – held, made
हि **indeed** ⟨*avyaya*⟩
तान् **those** ⟨2.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

Subodhinī: सः भक्तः तया दृढया श्रद्धया तस्याः तनोः आराधनम् ईहते (करोति) । ततः च ये स्व-सङ्कल्पिताः कामाः, तान् कामान् ततः देवता-विशेषात् लभते, किन्तु मया एव (तद्-तद्-देवता-अन्तर्यामिणा) विहितान् (निर्मितान्) हि, स्फुटम् एतद् देवतानाम् अपि मद्-अधीनत्वात् मम मूर्तित्वात् च इति अर्थः ॥७.२२॥ तद् एवम् यद्यपि सर्वाः अपि देवताः मम एव मूर्तयः, अतः तद्-आराधनम् अपि वस्तुतः मद्-आराधनम् एव, तद्-तद्-फलदाता अपि च अहम् एव,

तथापि तु साक्षात् मद्-भक्तानाम् च तेषाम् च फल-वैषम्यम् भवति इति आह – 'अन्तवत्' इति –

7.23

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ।
देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि ॥२३॥

तेषाम् अल्प-मेधसाम् तु	but of those less intelligent
तद् फलम् अन्तवत् भवति,	that fruit is temporary, [because]
देव-यजः देवान् यान्ति,	worshipers of the *devas* attain the *devas*,
मद्भक्ताः अपि माम् यान्ति ।	but My devotees attain Me

"Men of small intelligence worship the demigods, and their fruits are limited and temporary. Those who worship the demigods go to the planets of the demigods, but My devotees ultimately reach My supreme planet."

अन्तवत् **temporary** ⟨1.1⟩ n. *antavat* (*.vat[u]*) – 'having *anta* (an end)', limited, temporary
तु **but** ⟨*avyaya*⟩
फलम् **the fruit** ⟨1.1⟩ n. *phala* – fruit, result
तेषाम् **of those** ⟨6.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that
तद् **that** ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
भवति **it is** ⟨*acyuta* 1.1⟩ √*bhū*...सत्तायाम् – to be, exist, become
अल्प-मेधसाम् **of those less intelligent** ⟨6.3⟩ m. *alpa-medhas* (*-medhāḥ*)...अल्पम् मेधस् यस्य, सः अल्प-मेधाः – whose intelligence is small
अल्प – small, minute, trifling, little
मेधस् (*medhaḥ*) – sacrifice; intelligence (same as *medhā*)
देवान् **to the *devas*** ⟨2.3⟩ m. *deva* – divine being
देव-यजः **those who worship *devas*** ⟨1.3⟩ m. *deva-yaj* (*-yaṭ/ḍ*)...देवान् यजति इति देव-यट् – who worships the *devas*
यान्ति **they attain** ⟨*acyuta* 1.3⟩ √*yā*...प्राप्तौ – to attain, go
मद्भक्ताः **my devotees** ⟨1.3⟩ m. *mad-bhakta*...मम भक्तः इति मद्भक्तः – my devotee
यान्ति **they attain** ⟨*acyuta* 1.3⟩ √*yā*...प्राप्तौ – to attain, go
माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
अपि **also** ⟨*avyaya*⟩

Subodhinī: अल्प-मेधसाम् परिच्छिन्न-दृष्टीनाम् मया दत्तम् अपि तद् फलम् अन्तवत् तु (विनाशि) भवति । तद् एव आह – देवान् यजन्ति इति देव-यजः, ते देवान् अन्तवतः यान्ति । मद्-भक्ताः तु माम् अनादि-अन्तम् परम-आनन्दम् प्राप्नुवन्ति ॥७.२३॥

ननु च, समाने प्रयासे महति च फल-विशेषे सति, सर्वे अपि किम् इति देवता-अन्तरम् हित्वा, त्वाम् एव न भजन्ति ? तत्र आह – 'अ-व्यक्तम्' इति –

7.24

अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः ।
परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥२४॥

अ-बुद्धयः	the unintelligent
मम अ-व्ययम् अनुत्तमम् परम् भावम्	My eternal, unsurpassed, spiritual nature
अ-जानन्तः,	not knowing,
अ-व्यक्तम् व्यक्तिम् आपन्नम्	as unmanifest and having assumed a personality
माम् मन्यन्ते ।	they consider Me

"Unintelligent men, who do not know Me perfectly, think that I, the Supreme Personality of Godhead, Kṛṣṇa, was impersonal before and have now assumed this personality. Due to their small knowledge, they do not know My higher nature, which is imperishable and supreme."

अ-व्यक्तम् **unmanifested** ⟨2.1⟩ m. *a-vyakta*
व्यक्त (*vi.*√*añj[ū]* – to make visible, manifest; + *.[k]ta*) – made visible, manifested
व्यक्तिम् **a manifestation** ⟨2.1⟩ f. *vyakti* – manifestation, personality
आपन्नम् **having attained** ⟨2.1⟩ m. *āpanna* (*ā.*√*pad* – to attain; + *.[k]ta*) – attained
मन्यन्ते **they think** ⟨*acyuta* 1.3⟩ √*man[a]* 4A...बोधने – to know, think
माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
अ-बुद्धयः **the unintelligent** ⟨1.3⟩ m. *a-buddhi* – who is unintelligent
परम् **supreme** ⟨2.1⟩ m. *para* – beyond
भावम् **nature** ⟨2.1⟩ m. *bhāva* – state of being: nature, sentiment
अ-जानन्तः **[while] not knowing** ⟨1.3⟩ m. *a-jānat*
जानत् (√*jñā* 9P...अवबोधने – to know; + *.[ś]at[ṛ]*) – [while] knowing
मम **my** ⟨6.1⟩ *kṛṣṇanāma asmad* – (last person) I
अ-व्ययम् **eternal** ⟨2.1⟩ m. *a-vyaya* – unchangeable, imperishable
अनुत्तमम् **unsurpassed** ⟨2.1⟩ m. *an-uttama*

Subodhinī: अ-व्यक्तम् (प्रपञ्च-अतीतम्) माम् व्यक्तिम् (मनुष्य-मत्स्य-कूर्मादि-भावम्) प्राप्तम् अल्प-बुद्धयः मन्यन्ते । तत्र हेतुः – मम परम् भावम् (स्व-रूपम्) अ-जानन्तः । कथम्-भूतम् ? अ-व्ययम् (नित्यम्), न विद्यते उत्तमः यस्मात् तम् भावम् । अतः जगत्-रक्षार्थम् लीलया आविष्कृत-नाना-विशुद्ध-ऊर्जित-सत्त्व-मूर्तिम् माम् परमेश्वरम् च, स्वकर्म-निर्मित-भौतिक-देहम् च देवता-अन्तर-समम् पश्यन्तः,

मन्द-मतयः माम् न अतीव आद्रियन्ते, प्रत्युत क्षिप्र-फलम् देवता-अन्तरम् एव भजन्ति, ते च उक्त-प्रकारेण अन्तवत्-फलम् प्राप्नुवन्ति इति अर्थः ॥७.२४॥
तेषाम् स्व-अज्ञाने हेतुम् आह – 'न अहम्' इति –

Note: There are some who consider the Lord to be assuming a material body, and therefore like one of the demigods. But when the Lord descends as an incarnation, He comes in His same spiritual body (4.6). He is not forced by *karma* to take a material body like us or the demigods. There are others also (the Māyāvādīs), who say that the Absolute Truth is ultimately impersonal (*avyaktam brahma*), and only under the influence of Māyā it seems to manifest a personal feature (*vyaktim āpannam*, Bhagavān). Both ideas are dismissed in this verse, by ascribing them to an undeveloped intelligence.

7.25

नाहं प्रकाशः सर्वस्य योगमायासमावृतः ।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥२५॥

योग-माया-समावृतः	[being] covered by Yoga-māyā
अहम् सर्वस्य न प्रकाशः,	I am not visible for all,
अयम् मूढः लोकः	this bewildered world
अ-जम् अ-व्ययम् माम् न अभिजानाति ।	does not know Me, the unborn and eternal

"I am never manifest to the foolish and unintelligent. For them I am covered by My internal potency, and therefore they do not know that I am unborn and infallible."

न **not** ⟨*avyaya*⟩

अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

प्रकाशः **visible** ⟨1.1⟩ m. *prakāśa* (from *pra.√kāś[r]* – to shine, become visible) – visible, bright, clear, manifest; clearness, lustre, light; appearance, manifestation; fame, glory; sunshine

(also from *√kāś[r]*...दीप्तौ): *kāśī* – 'shining', the sun; the city Kāśī (modern Vārāṇasī, Benares); *ākāśa* – 'viewing'; a free or open space; the ether, sky, atmosphere; (in phil.) the ether element

सर्वस्य **for all** ⟨6.1⟩ m. *kṛṣṇanāma sarva* – all

योग-माया-समावृतः **covered by Yoga-māyā** ⟨1.1⟩ m. *yoga-māyā-samāvṛta*...योग-मायया समावृतः इति योग-माया-समावृतः

योग-माया – 'illusion of union', the Lord's internal energy

समावृत (*sam.ā.√vṛ[ñ]* 5U – to cover completely; + *.[k]ta*) – completely covered

मूढः **bewildered** ⟨1.1⟩ m. *mūḍha* – bewildered, foolish

अयम् **this** ⟨1.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this

न **not** ⟨*avyaya*⟩

अभिजानाति **it understands** ⟨*acyuta* 1.1⟩ *abhi.√jñā* – to understand

लोकः **the world** ⟨1.1⟩ m. *loka* – place, world, people

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

अ-जम् **the unborn** ⟨2.1⟩ m. *a-ja*

अ-व्ययम् **the eternal** ⟨2.1⟩ m. *a-vyaya* – unchangeable, imperishable

Subodhinī: सर्वस्य लोकस्य न अहम् प्रकाशः (प्रकटः न भवामि), किन्तु मद्-भक्तानाम् एव, यतः योग-मायया समावृतः । योगः (युक्तिः), मदीयः कोऽपि अचिन्त्य-प्रज्ञा-विलासः, सः एव माया (अघटमान-घटना-चातुर्यम्), अनया सञ्छन्नः, अतएव मद्-स्वरूप-ज्ञाने मूढः सन्, अयम् लोकः अ-जम् अ-व्ययम् च माम् न जानाति ॥७.२५॥
'सर्व-उत्तमम् मद्-स्वरूपम् अ-जानन्तः' (7.24) इति उक्तम् – तद् एव स्वस्य सर्व-उत्तमत्वम् अनावृत-ज्ञान-शक्तित्वेन दर्शयन्, अन्येषाम् अ-ज्ञानम् एव आह – 'वेद' इति –

7.26

वेदाहं समतीतानि वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि मां तु वेद न कश्चन ॥२६॥

हे अर्जुन !	O Arjuna!
समतीतानि वर्तमानानि च भविष्याणि च भूतानि	past, present and future beings,
अहम् वेद,	I know,
माम् तु न कश्चन वेद ।	but Me no one knows

"O Arjuna, as the Supreme Personality of Godhead, I know everything that has happened in the past, all that is happening in the present, and all things that are yet to come. I also know all living entities; but Me no one knows."

वेद **I know** ⟨*acyuta* 3.1⟩ *√vid[a]* 2P...ज्ञाने – to know

अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

समतीतानि **which have passed** ⟨2.3⟩ n. *samatīta* (*sam.ati.√i[ṇ]* – to pass; + *.[k]ta*) – passed

वर्तमानानि **which are existing** ⟨2.3⟩ n. *vartamāna* (*√vṛt[u]* 1A...वर्तने – to happen, act; + *.[ś]āna*) – [while] happening

च **and** ⟨*avyaya*⟩

अर्जुन **O Arjuna!** ⟨8.1⟩ m. *arjuna* – white, 'who is pure in actions'

भविष्याणि **which are becoming** ⟨2.3⟩ n. *bhaviṣya* – 'becoming,' future

च **and** ⟨*avyaya*⟩

भूतानि **beings** ⟨2.3⟩ n. *bhūta* (*√bhū*...सत्तायाम् – to be, exist, become; + *.[k]ta*) – past; an element, being, creature

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

तु but ⟨avyaya⟩
वेद one knows ⟨acyuta 1.1⟩ √vid[a] 2P...ज्ञाने – to know
न not ⟨avyaya⟩
कश्चन someone ⟨1.1⟩ m. *kṛṣṇanāma kim (kaḥ) + .cana* – someone, something

Subodhinī: समतीतानि (विनष्टानि) वर्तमानानि भवीनि च त्रि-काल-वर्तीनि भूतानि स्थावर-जङ्गमानि सर्वाणि अहम् वेद (जानामि), माया-आश्रयत्वात् मम तस्याः स्व-आश्रय-व्यामोहकत्व-अभावात् इति प्रसिद्धम् । माम् तु न कोऽपि वेत्ति मद्-माया-मोहितत्वात् । प्रसिद्धम् हि लोके मायायाः स्व-आश्रय-अधीनत्वम् अन्य-मोहकत्वम् च ॥७.२६॥
तद् एवम् माया-विषयत्वेन जीवानाम् परमेश्वर-अज्ञानम् उक्तम् । तस्य एव अ-ज्ञानस्य दृढत्वे कारणम् आह – 'इच्छा-द्वेष-समुत्थेन' इति –

7.27

इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत ।
सर्वभूतानि सम्मोहं सर्गे यान्ति परन्तप ॥२७॥

हे भारत परन्तप !	O Arjuna!
इच्छा-द्वेष-समुत्थेन द्वन्द्व-मोहेन	by the illusion of dualities, arisen from desire and hatred,
सर्गे सर्व-भूतानि सम्मोहम् यान्ति ।	at birth all beings attain delusion

"O scion of Bharata, O conqueror of the foe, all living entities are born into delusion, bewildered by dualities arisen from desire and hate."

इच्छा-द्वेष-समुत्थेन **by that which has risen from desire and hatred** ⟨3.1⟩ m. *icchā-dveṣa-samuttha*...इच्छायाः च द्वेषात् च समुत्थः इति इच्छा-द्वेष-समुत्थः – risen from desire and hatred
समुत्थ (from *sam.ud.√sthā* – to stand up) – risen
द्वन्द्व-मोहेन **by the delusion of duality** ⟨3.1⟩ m. *dvandva-moha*...द्वन्द्वस्य मोहः इति द्वन्द्व-मोहः – delusion of duality
भारत **O Arjuna!** ⟨8.1⟩ m. *bhārata* – 'descendant of Bharata'
सर्व-भूतानि **all beings** ⟨1.3⟩ n. *sarva-bhūta*
सम्मोहम् **complete delusion** ⟨2.1⟩ m. *sammoha*
सर्गे **at birth** ⟨7.1⟩ m. *sarga* – creation, birth
यान्ति **they attain** ⟨acyuta 1.3⟩ √yā...प्राप्तौ – to attain, go
परन्तप **O Arjuna!** ⟨8.1⟩ m. *param-_tapa* – 'who scorches the enemies'

Subodhinī: सृज्यते इति सर्गः । सर्गे (स्थूल-देह-उत्पत्तौ सत्याम्), तद्-अनुकुले इच्छा तद्-प्रतिकूले च द्वेषः, ताभ्याम् समुत्थः (समुद्भूतः) यः शीत-उष्ण-सुख-दुःखादि-द्वन्द्व-निमित्तः मोहः (विवेक-भ्रंशः), तेन सर्व-भूतानि सम्मोहम्, 'अहम् एव

सुखी दुःखी च' इति गाढतरम् अभिनिवेशम् प्राप्नुवन्ति, अतः तानि मद्-ज्ञान-अभावात् न माम् भजन्ति इति भावः ॥७.२७॥
कुतः तर्हि केचन त्वाम् भजन्तः दृश्यन्ते ? तत्र आह – 'येषाम्' इति –

7.28

येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम् ।
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः ॥२८॥

येषाम् पुण्य-कर्मणाम् जनानाम् तु	but those men of pious acts
पापम् अन्त-गतम्,	whose sin is eradicated,
ते द्वन्द्व-मोह-निर्मुक्ताः	they, freed from the delusion of dualities
दृढ-व्रताः	firm in their vows
माम् भजन्ते ।	worship Me

"Persons who have acted piously in previous lives and in this life and whose sinful actions are completely eradicated are freed from the dualities of delusion, and they engage themselves in My service with determination."

येषाम् **of whom** ⟨6.3⟩ m. *kṛṣṇanāma yad* – (relative) who, which
तु **but** ⟨avyaya⟩
अन्त-गतम् **having come to an end** ⟨1.1⟩ n. *anta-gata*
पापम् **sin** ⟨1.1⟩ n. *pāpa*
जनानाम् **of men** ⟨6.3⟩ m. *jana* – man, person
पुण्य-कर्मणाम् **of those of pious acts** ⟨6.3⟩ m. *puṇya-karman (-karmā)*...पुण्यम् कर्म यस्य, सः पुण्य-कर्मा – 'whose work is pious'
ते **they** ⟨1.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that
द्वन्द्व-मोह-निर्मुक्ताः **who are freed from the delusion of dualities** ⟨1.3⟩ m. *dvandva-moha-nirmukta*...द्वन्द्व-मोहात् निर्मुक्तः इति द्वन्द्व-मोह-निर्मुक्तः – who is freed from the delusion of dualities
निर्मुक्त (*nir.√muc[l]* – to release; + *.[k]ta*) – released
भजन्ते **they worship** ⟨acyuta 1.3⟩ √bhaj[a] 1U...सेवायाम् – to serve, worship
माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
दृढ-व्रताः **whose vow is firm** ⟨1.3⟩ m. *dṛḍha-vrata*...दृढम् व्रतम् यस्य, सः दृढ-व्रतः

Subodhinī: येषाम् तु पुण्य-आचरण-शीलानाम् सर्वम् प्रतिबन्धकम् पापम् अन्त-गतम् (नष्टम्), ते द्वन्द्व-निमित्तेन मोहेन निर्मुक्ताः दृढ-व्रताः (एक-अन्तिनः) सन्तः, माम् भजन्ते ॥७.२८॥
एवम् च माम् भजन्तः, ते सर्वम् विज्ञेयम् विज्ञाय, कृतार्थाः भवन्ति इति आह – 'जरा-मरण' इति –

7.29

जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ।
ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम् ॥२९॥

माम् आश्रित्य	[after] taking shelter of Me
ये जरा-मरण-मोक्षाय यतन्ति,	those who endeavor for freedom from old age and death,
ते तद् ब्रह्म विदुः,	they know that *brahma*,
कृत्स्नम् अध्यात्मम् अ-खिलम् कर्म च	the complete *adhyātma* and all *karma*

"Intelligent persons who are endeavoring for liberation from old age and death take refuge in Me in devotional service. They are actually Brahman because they entirely know everything about transcendental activities."

जरा-मरण-मोक्षाय **for freedom from old age and death** ⟨4.1⟩ m. *jarā-maraṇa-mokṣa* – freedom from old age and death
माम् **to me** ⟨2.1⟩ *kṛṣnanāma asmad* – (last person) I
आश्रित्य **[after] taking shelter** ⟨*avyaya*⟩ *ā.*√*śri[ñ]* – to take shelter; + *.ya[p]*
यतन्ति **they endeavor** ⟨*acyuta* 1.3⟩ √*yat[ī]*...प्रयत्ने – to endeavor
ये **those who** ⟨1.3⟩ m. *kṛṣnanāma yad* – (relative) who, which
ते **they** ⟨1.3⟩ m. *kṛṣnanāma tad* – (first person) he, that
ब्रह्म **the Supreme** ⟨2.1⟩ n. *brahman (brahma)* – spirit, soul
तद् **that** ⟨2.1⟩ n. *kṛṣnanāma tad* – (first person) he, that
विदुः **they know** ⟨*acyuta* 1.3⟩ √*vid[a]* 2P...ज्ञाने – to know
कृत्स्नम् **complete** ⟨2.1⟩ n. *kṛtsna* – whole
अध्यात्मम् **the self** ⟨2.1⟩ n. *adhyātma* – 'governing the self'
कर्म **the process** ⟨2.1⟩ n. *karman (karma)* – activity
च **and** ⟨*avyaya*⟩
अ-खिलम् **complete** ⟨2.1⟩ n. *a-khila* – whole

Subodhinī: जरा-मरणयोः निरासार्थम् माम् आश्रित्य ये प्रयतन्ते, ते तद् परम् ब्रह्म विदुः, कृत्स्नम् अध्यात्मम् च विदुः । येन तद् [ब्रह्म] प्राप्तव्यम्, तम् देहादि-व्यतिरिक्तम् शुद्धम् आत्मानम् च जानन्ति इति अर्थः । तद्-साधन-भूतम् अ-खिलम् (स-रहस्यम्) कर्म च जानन्ति ॥७.२९॥
नच एवम्-भूतानाम् योग-भ्रंश-शङ्का अपि इति आह – 'स-अधिभूत' इति –

Note: Śrīla Prabhupāda's interpretation as *te brahma santi* is an interesting alternative, which is grammatically correct and supported by verses 4.24, 5.19 and 18.54.

7.30

साधिभूताधिदैवं मां साधियज्ञं च ये विदुः ।
प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः ॥३०॥

ये	those who
साधिभूताधिदैवम् साधियज्ञम् च	together with the *adhibhūta, adhidaiva* and *adhiyajña*
माम् विदुः,	know Me,
ते च युक्त-चेतसः	they also, their minds fixed [on Me]
प्रयाण-काले अपि	even at the time of death
माम् विदुः ।	know Me

"Those in full consciousness of Me, who know Me, the Supreme Lord, to be the governing principle of the material manifestation, of the demigods, and of all methods of sacrifice, can understand and know Me, the Supreme Personality of Godhead, even at the time of death."

साधिभूताधिदैवम् **with the *adhibhūta* and *adhidaiva*** ⟨2.1⟩ m. *sa-_adhibhūta-_adhidaiva* (see 8.3ff.)
माम् **me** ⟨2.1⟩ *kṛṣnanāma asmad* – (last person) I
साधियज्ञम् **with the *adhiyajña*** ⟨2.1⟩ m. *sa-_adhiyajña*
च **and** ⟨*avyaya*⟩
ये **those who** ⟨1.3⟩ m. *kṛṣnanāma yad* – (relative) who, which
विदुः **they know** ⟨*acyuta* 1.3⟩ √*vid[a]* 2P...ज्ञाने – to know
प्रयाण-काले **at the time of death** ⟨7.1⟩ m. *prayāṇa-kāla*...प्रयाणस्य कालः इति प्रयाण-कालः – time of death
प्रयाण (from *pra.*√*yā* – to depart) – departure
अपि **also** ⟨*avyaya*⟩
च **and** ⟨*avyaya*⟩
माम् **me** ⟨2.1⟩ *kṛṣnanāma asmad* – (last person) I
ते **they** ⟨1.3⟩ m. *kṛṣnanāma tad* – (first person) he, that
विदुः **they know** ⟨*acyuta* 1.3⟩ √*vid[a]* 2P...ज्ञाने – to know
युक्त-चेतसः **whose minds are absorbed** ⟨1.3⟩ m. *yukta-cetas (-cetaḥ)*...युक्तम् चेतः यस्य, सः युक्त-चेतः – whose mind is absorbed

Subodhinī: अधिभूतादि-शब्दानाम् अर्थम् भगवान् एव अनन्तर-अध्याये व्याख्यास्यति । अधिभूतेन अधिदैवेन च सह अधियज्ञेन च सहितम् ये माम् भजन्ति, ते युक्त-चेतसः (मयि-आसक्त-मनसः) प्रयाण-काले अपि (मरण-समये अपि) माम् विदुः, नतु तदा अपि व्याकुली-भूय माम् विस्मरन्ति, अतः मद्-भक्तानाम् न योग-भ्रंश-शङ्का इति अर्थः ॥७.३०॥

ओं तत्सदिति
श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि
श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे ज्ञानविज्ञानयोगो नाम सप्तमोऽध्यायः ॥७॥

अथाष्टमोऽध्यायः

अथ अष्टमः अध्यायः । now the eighth chapter

Subodhinī: पूर्व-अध्याय-अन्ते भगवत-उपक्षिप्तानाम् 'ब्रह्म'-'अध्यात्म'-आदि-सप्तानाम् पदार्थानाम् तत्त्वम् जिज्ञासुः [अर्जुनः उवाच] – 'किम् तद् ब्रह्म' इति द्वाभ्याम् –

8.1

अर्जुन उवाच
किं तद् ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम ।
अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥१॥

अर्जुनः उवाच - हे पुरुषोत्तम !	Arjuna said: O Kṛṣṇa!
तद् ब्रह्म किम् ?	what is that '*brahma*'?
अध्यात्मम् किम् ?	what is '*adhyātma*'?
कर्म किम् ?	what is '*karma*'?
किम् च अधिभूतम् प्रोक्तम् ?	and what is called '*adhibhūta*'?
किम् अधिदैवम् उच्यते ?	what is called '*adhidaiva*'?

"Arjuna inquired: O my Lord, O Supreme Person, what is Brahman? What is the self? What are fruitive activities? What is this material manifestation? And what are the demigods? Please explain this to me."

अर्जुनः	**Arjuna** ⟨1.1⟩ m. *arjuna* – white, 'who is pure in actions'
उवाच	**he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
किम्	**what** ⟨1.1⟩ n. *kṛṣnanāma kim* – who/what
तद्	**that** ⟨1.1⟩ n. *kṛṣnanāma tad* – (first person) he, that
ब्रह्म	***brahma*** ⟨1.1⟩ n. *kṛṣnanāma brahman (brahma)* – spirit, soul
किम्	**what** ⟨1.1⟩ n. *kṛṣnanāma kim* – who/what
अध्यात्मम्	***adhyātma*** ⟨1.1⟩ n. *adhyātma* – the self
किम्	**what** ⟨1.1⟩ n. *kṛṣnanāma kim* – who/what
कर्म	***karma*** ⟨1.1⟩ n. *karman (karma)* – activity
पुरुषोत्तम	**O Kṛṣṇa!** ⟨8.1⟩ m. *puruṣa-_uttama* – 'supreme person'
अधिभूतम्	***adhibhūta*** ⟨1.1⟩ n. *adhibhūta* – material nature
च	**and** ⟨*avyaya*⟩
किम्	**what** ⟨1.1⟩ n. *kṛṣnanāma kim* – who/what

प्रोक्तम्	**is declared** ⟨1.1⟩ n. *prokta* (*pra.*√*vac[a]* – to declare; + *.[k]ta*)
अधिदैवम्	*adhidaiva* ⟨1.1⟩ n. *adhidaiva* – presiding deity
किम्	**what** ⟨1.1⟩ n. *kṛṣnanāma kim* – who/what
उच्यते	**is called** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak

Subodhinī: स्पष्टः अर्थः ॥८.१॥

8.2

अधियज्ञः कथं को ऽत्र देहे ऽस्मिन्मधुसूदन ।
प्रयाणकाले च कथं ज्ञेयो ऽसि नियतात्मभिः ॥२॥

हे मधु-सूदन !	O Kṛṣṇa!
कः अधियज्ञः ?	who is '*adhiyajña*'?
कथम् अत्र अस्मिन् देहे ?	how [does He exist] here in this body?
प्रयाण-काले च	and at the time of death
कथम् नियतात्मभिः ज्ञेयः असि ?	how are You known by the self-controlled?

"Who is the Lord of sacrifice, and how does He live in the body, O Madhusūdana? And how can those engaged in devotional service know You at the time of death?"

अधियज्ञः	**the *adhiyajña*** ⟨1.1⟩ m. *adhiyajña* – the deity presiding sacrifices
कथम्	**how?** ⟨*avyaya*⟩
कः	**who?** ⟨1.1⟩ m. *kṛṣṇanāma kim* – who/what
अत्र	**here** ⟨*avyaya*⟩
देहे	**in the body** ⟨7.1⟩ m. *deha* – body
अस्मिन्	**in this** ⟨7.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
मधु-सूदन	**O Kṛṣṇa!** ⟨8.1⟩ m. *madhu-sūdana* – 'the slayer of the Madhu demon'
प्रयाण-काले	**at the time of death** ⟨7.1⟩ m. *prayāna-kāla* – time of death
च	**and** ⟨*avyaya*⟩
कथम्	**how**? ⟨*avyaya*⟩
ज्ञेयः	**to be known** ⟨1.1⟩ m. *jñeya* (√*jñā* 9P...अवबोधने – to know; + *.ya*)
असि	**you are** ⟨*acyuta* 2.1⟩ √*as[a]*...भुवि – to be, exist
नियतात्मभिः	**by those whose mind is controlled** ⟨3.3⟩ m. *niyata-_ātman* (*-ātmā*)...नियतः आत्मा यस्य, सः नियतात्मा – whose mind is controlled

Subodhinī: अत्र देहे यः यज्ञः वर्तते, तस्मिन् कः अधियज्ञः (अधिष्ठाता, प्रयोजकः), फल-दाता च कः इति अर्थः । स्व-रूपम् पृथक् पृष्ट्वा, अधिष्ठान-प्रकारम् पृच्छति – कथम् (केन प्रकारेण) असौ अस्मिन् देहे स्थितः यज्ञम् अधितिष्ठति इति अर्थः ।

'यज्ञ'-ग्रहणम् सर्व-कर्मणाम् उपलक्षणार्थम् । अन्त-काले च नियत-चित्तैः पुरुषैः कथम् (केन उपायेन) ज्ञेयः असि ॥८.२॥
प्रश्न-क्रमेण उत्तरम् ।श्री-भगवान् उवाच। – 'अक्षरम्' इति त्रिभिः –

8.3

श्रीभगवानुवाच
अक्षरं ब्रह्म परमं स्वभावो ऽध्यात्ममुच्यते ।
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ॥३॥

श्री-भगवान् उवाच –	Śrī Kṛṣṇa said:
परमम् अ-क्षरम् ब्रह्म,	the supreme indestructible is '*brahma*',
स्व-भावः अध्यात्मम् उच्यते,	its individual nature is called '*adhyātma*',
भूत-भावोद्भव-करः विसर्गः	the creation which manifests all beings
कर्म-संज्ञितः ।	is called '*karma*'

"The Supreme Personality of Godhead said: The indestructible, transcendental living entity is called Brahman, and his eternal nature is called adhyātma, the self. Action pertaining to the development of the material bodies of the living entities is called karma, or fruitive activities."

श्री-भगवान्	**Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'
उवाच	**he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
अ-क्षरम्	**which does not decay** ⟨1.1⟩ n. *a-ksara*...न क्षरति इति अ-क्षरम्
ब्रह्म	***brahma*** ⟨1.1⟩ n. *brahman* (*brahma*) – spirit, soul
परमम्	**the supreme** ⟨1.1⟩ n. *parama* – highest
स्व-भावः	**individual nature** ⟨1.1⟩ m. *sva-bhāva* – own nature
अध्यात्मम्	***adhyātma*** ⟨1.1⟩ n. *adhyātma* – spiritual
उच्यते	**is called** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak
भूत-भावोद्भव-करः	**making the generation of the manifestation of beings** ⟨1.1⟩ m. *bhūta-bhāva-_udbhava-kara*
विसर्गः	**creation** ⟨1.1⟩ m. *visarga*
कर्म-संज्ञितः	**designated as *karma*** ⟨1.1⟩ m. *karma-saṁjñita*

Subodhinī: न क्षरति न चलति इति अ-क्षरम् । ननु जीवः अपि अ-क्षरः, तत्र आह – परमम् यद् अ-क्षरम् जगतः मूल-कारणम् तद् ब्रह्म । 'एतद् वै तद् अ-क्षरम् गार्गि ब्राह्मणा अभिवदन्ति' (*Bṛhad-āraṇyaka-Up.* 3.8.8) इति श्रुतेः । स्वस्य एव ब्रह्मणः एव अंशतः जीव-रूपेण भवनम् 'स्व-भावः', सः एव आत्मानम् देहम् अधिकृत्य, भोक्तृत्वेन वर्तमानः, 'अध्यात्म'-शब्देन उच्यते इति अर्थः । भूतानाम् जरायुज-आदीनाम् भावः (उत्पत्तिः) उद्भवः च, उत्कृष्टत्वेन भवनम् उद्भवः –

अग्नौ प्रास्ताहुतिः सम्यक् आदित्यम् उपतिष्ठते ।
आदित्यात् जायते वृष्टिः वृष्टेः अन्नम् ततः प्रजाः ॥

(*Manu-saṁhitā* 3.76) इति उक्त-क्रमेण विवृद्धिः, तौ भूत-भाव-उद्भवौ करोति यः विसर्गः, देवता-उद्देशेन द्रव्य-त्याग-रूपः यज्ञः । सर्व-कर्मणाम् उपलक्षणम् एतद्, सः कर्म-शब्द-वाच्यः ॥८.३॥

8.4

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम् ।
अधियज्ञोऽहमेवात्र देहे देहभृतां वर ॥४॥

हे देह-भृताम् वर !	O best of the embodied!
क्षरः भावः अधिभूतम्,	the destructible nature (the body) is '*adhibhūta*',
पुरुषः च अधिदैवतम्,	and the [*virāṭa-*] *puruṣa* is '*adhidaiva*',
अहम् एव	I am Myself (as Supersoul)
अत्र देहे अधियज्ञः ।	the '*adhiyajña*' in this body

"O best of the embodied beings, the physical nature, which is constantly changing, is called adhibhūta (the material manifestation). The universal form of the Lord, which includes all the demigods, like those of the sun and moon, is called adhidaiva. And I, the Supreme Lord, represented as the Supersoul in the heart of every embodied being, am called adhiyajña (the Lord of sacrifice)."

अधिभूतम् **adhibhūta** ⟨1.1⟩ n. *adhibhūta* – material nature
क्षरः **destructible** ⟨1.1⟩ m. *kṣara*
भावः **nature** ⟨1.1⟩ m. *bhāva* – state of being: nature, sentiment
पुरुषः **the *puruṣa*** ⟨1.1⟩ m. *puruṣa* – person
च **and** ⟨*avyaya*⟩
अधिदैवतम् **adhidaiva** ⟨1.1⟩ n. *adhidaivata* – presiding deity
अधियज्ञः **adhiyajña** ⟨1.1⟩ m. *adhiyajña* – deity presiding sacrifices
अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
एव **certainly** ⟨*avyaya*⟩
अत्र **here** ⟨*avyaya*⟩
देहे **in the body** ⟨7.1⟩ m. *deha* – body
देह-भृताम् **of embodied beings** ⟨6.3⟩ m. *deha-bhṛt*...यः देहम् बिभर्ति, सः देह-भृत् – 'who holds a body', embodied being; the soul
वर **O best one!** ⟨8.1⟩ m. *vara* – best

Subodhinī: क्षरः (विनश्वरः) भावः (देहादि-पदार्थः), भूतम् (प्राणि-मात्रम्) अधिकृत्य भवति इति अधिभूतम् उच्यते । पुरुषः (वैराजः) सूर्य-मण्डलम् अध्यवर्ती, स्वांशभूत-

सर्व-देवतानाम् अधिपतिः, अधिदैवतम् उच्यते । अधिदैवतम् अधिष्ठात्री देवता –

सः वै शरीरी प्रथमः सः वै पुरुषः उच्यते ।
आदिकर्ता सः भूतानाम् ब्रह्माग्रे समवर्तत ॥

(*Bṛ.Vārtikasāra* 1.2.142) इति श्रुतेः । अत्र अस्मिन् देहे अन्तर्यामित्वेन स्थितः अहम् एव अधियज्ञः, यज्ञ-अधिष्ठात्री देवता यज्ञादि-कर्म-प्रवर्तकः तद्-फलदाता च । 'कथम् ?' (8.2) इति अस्य उत्तरम् अनेन एव उक्तम् द्रष्टव्यम् । अन्तर्यामिणः अ-सङ्गत्वादिभिः गुणैः जीव-वैलक्षण्येन देह-अन्तः-वर्तित्वस्य प्रसिद्धत्वात् । तथा च श्रुतिः –

द्वा सुपर्णा सयुजा सखाया समानम् वृक्षम् परिषस्वजाते ।
तयोः अन्यः पिप्पलम् स्वादु अत्ति अनश्नन् अन्यः अभिचाकशीति ॥

(*Muṇḍaka-Up.* 3.1.1; *Śvetā.* 4.6; *Ṛgveda* 2.3.17) इति । 'देह-भृताम् मध्ये श्रेष्ठः' इति सम्बोधयन् त्वम् अपि एवम्-भूतम् अन्तर्यामिणम् पराधीन-स्वप्रवृत्ति-निवृत्ति-अन्वय-व्यतिरेकाभ्याम् बोद्धुम् अर्हसि इति सूचयति ॥८.४॥ 'प्रयाण-काले च कथम् ज्ञेयः असि' इति अनेन पृष्टम् अन्त-काले ज्ञान-उपायम् तद्-फलम् च दर्शयति – 'अन्त-काले' इति –

8.5

अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम् ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥५॥

अन्त-काले च	and at the time of death
माम् एव स्मरन्	[while] remembering Me alone
कलेवरम् मुक्त्वा	[after] giving up the body
यः प्रयाति,	one who departs,
सः मद्भावम् याति,	he attains My nature,
अत्र संशयः न अस्ति ।	of this there is no doubt

"And whoever, at the end of his life, quits his body, remembering Me alone, at once attains My nature. Of this there is no doubt."

अन्त-काले **at the time of death** ⟨7.1⟩ m. *anta-kāla* – time of death
च **and** ⟨*avyaya*⟩
माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
एव **certainly** ⟨*avyaya*⟩
स्मरन् **[while] thinking** ⟨1.1⟩ m. *smarat* (√*smṛ*...चिन्तायाम् – to think, remember; + *.[ś]at[r]*)
मुक्त्वा **[after] giving up** ⟨*avyaya*⟩ √*muc[l]*...मोक्षणे – to release; + *.[k]tvā*

कलेवरम्	**the body** ⟨2.1⟩ m/n. *kalevara*
यः	**he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
प्रयाति	**he departs** ⟨*acyuta* 1.1⟩ *pra.*√*yā* – to depart
सः	**he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
मद्भावम्	**my nature** ⟨2.1⟩ m. *mad-bhāva*...मम भावः इति मद्भावः
याति	**he attains** ⟨*acyuta* 1.1⟩ √*yā*...प्राप्तौ – to attain, go
न	**not** ⟨*avyaya*⟩
अस्ति	**there is** ⟨*acyuta* 1.1⟩ √*as[a]*...भुवि – to be, exist
अत्र	**here** ⟨*avyaya*⟩
संशयः	**doubt** ⟨1.1⟩ m. *saṁśaya* – hesitation, doubt

Subodhinī: माम् एव उक्त-लक्षणम् अन्तर्यामि-रूपम् परमेश्वरम् स्मरन् देहम् त्यक्त्वा, यः प्रकर्षेण अर्चिरादि-मार्गेण याति, सः मद्-भावम् (मद्-रूपताम्) याति, अत्र च संशयः न अस्ति । स्मरणम् ज्ञान-उपायः, मद्-भाव-आपत्तिः च फलम् इति अर्थः ॥८.५॥

न केवलम् 'माम् स्मरन् मद्-भावम् प्राप्नोति' इति नियमः, किम् तर्हि ? – 'यम् यम्' इति –

8.6

यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥६॥

हे कौन्तेय !	O Arjuna!
अन्ते	at death
यम् यम् भावम् वा अपि स्मरन्	[while] remembering which particular existence
कलेवरम् त्यजति	he abandons the body
तम् तम् एव एति,	to that very [existence] he goes,
सदा तद्भाव-भावितः ।	being filled with that thought

"Whatever state of being one remembers when he quits his body, O son of Kuntī, that state he will attain without fail."

यम् यम्	**the particular** ⟨2.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
वा अपि	**moreover** ⟨*avyaya*⟩
स्मरन्	**[while] remembering** ⟨1.1⟩ m. *smarat* (√*smṛ*...चिन्तायाम् – to think, remember; + *.[ś]at[r]*)
भावम्	**nature** ⟨2.1⟩ m. *bhāva* – state of being: nature, sentiment
त्यजति	**he abandons** ⟨*acyuta* 1.1⟩ √*tyaj[a]*...हानौ – to abandon
अन्ते	**at death** ⟨7.1⟩ m. *anta* – end, death

कलेवरम्	**the body** ⟨2.1⟩ m/n. *kalevara*
तम् तम्	**to that particular** ⟨2.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
एव	**certainly** ⟨*avyaya*⟩
एति	**he goes** ⟨*acyuta* 1.1⟩ √*i[n]*...गतौ – to go
कौन्तेय	**O Arjuna!** ⟨8.1⟩ m. *kaunteya* – 'son of Kuntī'
सदा	**always** ⟨*avyaya*⟩
तद्भाव-भावितः	**filled with that thought** ⟨1.1⟩ m. *tad-bhāva-bhāvita*...तद्भावेन भावितः इति तद्भाव-भावितः

भावित (√*bhū*...सत्तायाम् – to be, exist, become; caus.; *.[k]ta*) – 'caused to be', manifested, made up, transformed

Subodhinī: यम् यम् भावम् देवता-अन्तरम् वा अन्यम् अपि वा अन्त-काले स्मरन् देहम् त्यजति, तम् तम् एव स्मर्यमाणम् भावम् प्राप्नोति । अन्त-काले भाव-विशेष-स्मरणे हेतुः – 'सदा' इति । सर्वदा तस्य भावः (भावना, अनुचिन्तनम्), तेन भावितः (वासित-चित्तः) ॥८.६॥

8.7

तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च ।
मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ॥७॥

तस्मात्	therefore
सर्वेषु कालेषु माम् अनुस्मर !	at all times remember Me!
युध्य च !	and fight!
मयि अर्पित-मनोबुद्धिः	having dedicated mind and intelligence to Me
माम् एव एष्यसि,	you will come to Me,
अ-संशयः ।	there is no doubt

"Therefore, Arjuna, you should always think of Me in the form of Kṛṣṇa and at the same time carry out your prescribed duty of fighting. With your activities dedicated to Me and your mind and intelligence fixed on Me, you will attain Me without doubt."

तस्मात्	**therefore** ⟨*avyaya*⟩
सर्वेषु	**at all** ⟨7.3⟩ m. *kṛṣṇanāma sarva* – all
कालेषु	**times** ⟨7.3⟩ m. *kāla* – time
माम्	**me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
अनुस्मर	**you must remember** ⟨*vidhātā* 2.1⟩ *anu.*√*smṛ* – to remember
युध्य	**you must fight** ⟨*vidhātā* 2.1⟩ √*yudh[a]*...सम्प्रहारे – to fight
च	**and** ⟨*avyaya*⟩
मयि	**in me** ⟨7.1⟩ *kṛṣṇanāma asmad* – (last person) I

अर्पित-मनोबुद्धिः **whose mind and intelligence are dedicated** ⟨1.1⟩ m. *arpita-manaḥ-buddhi*...अर्पिते मनः च बुद्धिः च येन, सः अर्पित-मनोबुद्धिः
अर्पित (√ṛ...गतौ प्रापणे च – to go; get; caus.; + *.[k]ta*) – caused to go, given

माम् **to me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
एव **certainly** ⟨*avyaya*⟩
एष्यसि **you will go** ⟨*kalki* 2.1⟩ √*i[ṇ]*...गतौ – to go
अ-संशयः **without doubt** ⟨1.1⟩ m. *a-saṁśaya*

Subodhinī: यस्मात् पूर्व-वासना एव अन्त-काले स्मृति-हेतुः, नहि तदा विवशस्य स्मरण-उद्यमः सम्भवति, तस्मात् सर्वदा माम् अनुस्मर (अनुचिन्तय)। सन्तत-स्मरणम् च चित्त-शुद्धिम् विना न भवति, अतः युद्धच च युद्धचस्व। चित्त-शुद्धचर्थम् युद्धादिकम् स्व-धर्मम् च अनुतिष्ठ इति अर्थः। एवम् मयि अर्पितम् मनः (सङ्कल्प-विकल्पात्मकम्) बुद्धिः च (व्यवसाय-आत्मिका) येन त्वया सः, त्वम् माम् एव प्राप्स्यसि, अ-संशयः (संशयः अत्र न अस्ति) ॥८.७॥
सन्तत-स्मरणस्य च अभ्यासः अन्तरङ्गम् साधनम् इति दर्शयन् आह – 'अभ्यास' इति –

8.8

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना ।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ॥८॥

हे पार्थ !	O Pārtha!
अभ्यास-योग-युक्तेन	concentrated by means of practice
न अन्य-गामिना चेतसा	with such an undeviating mind
दिव्यम् परमम् पुरुषम् अनुचिन्तयन्	[while] meditating on the effulgent Supreme Lord
याति ।	he attains [Him]

"He who meditates on Me as the Supreme Personality of Godhead, his mind constantly engaged in remembering Me, undeviated from the path, he, O Pārtha, is sure to reach Me."

अभ्यास-योग-युक्तेन **concentrated by practice** ⟨3.1⟩ n. *abhyāsa-yoga-yukta*...अभ्यास-योगेन युक्तः इति अभ्यास-योग-युक्तः
अभ्यास-योग...अभ्यासस्य योगः इति अभ्यास-योगः – 'the means of practice'; the same as *abhyāsa* or *sādhana-bhakti* – repeated withdrawel of the mind from sense objects and concentration on the Lord

चेतसा **with the mind** ⟨3.1⟩ n. *cetas* (*cetaḥ*) – consciousness, mind
न **not** ⟨*avyaya*⟩
अन्य-गामिना **deviating** ⟨3.1⟩ n. *anya-gāmin* (*-gāmī*)...अन्यम् गच्छति इति अन्य-गामि – which is going astray; deviating

गामिन् (*gāmī*, masc.) – going; attaining; directed towards

परमम् **the supreme** ⟨2.1⟩ m. *parama* – highest
पुरुषम् **person** ⟨2.1⟩ m. *puruṣa*
दिव्यम् **effulgent** ⟨2.1⟩ m. *divya* – divine
याति **he attains** ⟨*acyuta* 1.1⟩ √*yā*...प्राप्तौ – to attain, go
पार्थ **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
अनुचिन्तयन् **[while] contemplating** ⟨1.1⟩ m. *anucintayat* (*anu.√cit[i]* – to contemplate; + *.[ś]at[ṛ]*)

Subodhinī: अभ्यासः (सजातीय-प्रत्यय-प्रवाहः), सः एव योगः (उपायः), तेन युक्तेन (एकाग्रेण), अतएव न अन्यम् विषयम् गन्तुम् शीलम् यस्य, तेन चेतसा दिव्यम् (द्योतनात्मकम्) परमम् पुरुषम् (परमेश्वरम्) अनुचिन्तयन्, हे पार्थ, तम् एव याति इति ॥८.८॥
पुनः अपि अनुचिन्तनीयम् पुरुषम् विशिनष्टि – 'कविम्' इति द्वाभ्याम् –

8.9...10

कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः ।
सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं तमसः परस्तात् ॥९॥

कविम् पुराणम् अनुशासितारम्	on the wise, the ancient, the controller
अणोः अणीयांसम्	who is smaller than the smallest
सर्वस्य धातारम्, अचिन्त्य-रूपम्	the maintainer of all of inconceivable form
आदित्य-वर्णम्, तमसः परस्तात्	effulgent like the sun, beyond darkness
यः अनुस्मरेत्	one who can meditate [on that person] . . .

"One should meditate upon the Supreme Person as the one who knows everything, as He who is the oldest, who is the controller, who is smaller than the smallest, who is the maintainer of everything, who is beyond all material conception, who is inconceivable, and who is always a person. He is luminous like the sun, and He is transcendental, beyond this material nature."

कविम् **the wise** ⟨2.1⟩ m. *kavi* – thinker
पुराणम् **the ancient** ⟨2.1⟩ m. *purāṇa* – ancient
अनुशासितारम् **the controller** ⟨2.1⟩ m. *anuśāsitṛ* (*anuśāsitā*) from *anu.√śās[u]* – to instruct, govern
अणोः **than the subtle** ⟨5.1⟩ m. *aṇu* – fine, minute, atomic; an atom of matter
अणीयांसम् **more subtle** ⟨2.1⟩ m. *aṇīyas* (*aṇīyaḥ*, from *aṇu*)
अनुस्मरेत् **he should remember** ⟨*vidhi* 1.1⟩ *anu.√smṛ* – to remember
यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
सर्वस्य **of all** ⟨6.1⟩ m. *kṛṣṇanāma sarva* – all

धातारम् **the maintainer** ⟨2.1⟩ m. *dhātṛ* (*dhātā*; √*[ḍu]dhā[ñ]*...धारण-पोषणयोः – to hold; nourish; + *.tṛ[n]*) – holder, nourisher, maintainer

अचिन्त्य-रूपम् **whose form is inconceivable** ⟨2.1⟩ m. *a-cintya-rūpa*...अ-चिन्त्यम् रूपम् यस्य, सः अ-चिन्त्य-रूपः

आदित्य-वर्णम् **whose effulgence is that of the sun** ⟨2.1⟩ m. *āditya-varṇa*...आदित्यस्य वर्णः यस्य, सः आदित्य-वर्णः

तमसः **from darkness** ⟨5.1⟩ n. *tamas* (*tamaḥ*) – darkness, ignorance

परस्तात् **beyond** ⟨*avyaya*⟩

Subodhinī: कविम् (सर्व-ज्ञम् सर्व-विद्या-निर्मातारम्), पुराणम् (अनादि-सिद्धम्), अनुशासितारम् (नियन्तारम्), अणोः (सूक्ष्मात्) अपि अणीयांसम् (अतिसूक्ष्मम्), आकाश-काल-दिग्भ्यः अपि अतिसूक्ष्मतरम्, सर्वस्य धातारम् (पोषकम्) अपरिमित-महिमत्वात्, अ-चिन्त्य-रूपम् (मलीमसयोः मनोबुद्ध्योः अ-गोचरम् । आदित्यवत् (स्व-पर-प्रकाशात्मकः) वर्णः (स्व-रूपम्) यस्य तम्, तमसः (प्रकृतेः) परस्तात् वर्तमानम् –

वेद अहम् एतम् पुरुषम् महान्तम् आदित्य-वर्णम् तमसः परस्तात् ।

(*Yajur-Veda* 31.18; *Śvetāśvarata-Up.* 3.8) इति श्रुतेः ॥८.९॥

8.10

प्रयाणकाले मनसाचलेन भक्त्या युक्तो योगबलेन चैव ।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यम् ॥१०॥

...प्रयाण-काले अ-चलेन मनसा	...at the time of death with a steady mind
भक्त्या युक्तः	endowed with *bhakti*
योग-बलेन च एव	and by the strength of *yoga*
भ्रुवोः मध्ये	between the eyebrows
प्राणम् सम्यक् आवेश्य	[after] completely fixing the *prāṇa*
सः तम् दिव्यम् परम् पुरुषम् उपैति ।	he attains that effulgent Supreme Lord

"One who, at the time of death, fixes his life air between the eyebrows and, by the strength of yoga, with an undeviating mind, engages himself in remembering the Supreme Lord in full devotion, will certainly attain to the Supreme Personality of Godhead."

प्रयाण-काले **at the time of death** ⟨7.1⟩ m. *prayāṇa-kāla* – time of death

मनसा **with the mind** ⟨3.1⟩ n. *manas* (*manaḥ*)

अ-चलेन **steady** ⟨3.1⟩ n. *a-cala* – unmoving

भक्त्या **with *bhakti*** ⟨3.1⟩ f. *bhakti* – devotion

युक्तः **endowed** ⟨1.1⟩ m. *yukta* (*.[k]ta*) – connected, engaged endowed with

योग-बलेन **by the strength of *yoga*** ⟨3.1⟩ n. *yoga-bala* – strength of *yoga*

च एव **and also** ⟨*avyaya*⟩

भ्रुवोः **of the eyebrows** ⟨6.2⟩ f. *bhrū* – eyebrow

मध्ये **in the middle** ⟨7.1⟩ n. *madhya* – middle

प्राणम् **the *prāṇa*** ⟨2.1⟩ m. *prāṇa* – vital air

आवेश्य **[after] fixing** ⟨*avyaya*⟩ *ā.*√*viś[a]* – to enter; caus., *.ya[p]* – [after] causing to enter

सम्यक् **completely** ⟨*avyaya*⟩ completely, properly

सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

तम् **that** ⟨2.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

परम् **supreme** ⟨2.1⟩ m. *para* – beyond

पुरुषम् **person** ⟨2.1⟩ m. *puruṣa*

उपैति **he attains** ⟨*acyuta* 1.1⟩ *upa.*√*i[ṇ]* – to go near, attain

दिव्यम् **the effulgent** ⟨2.1⟩ m. *divya* – divine

Subodhinī: स-प्रपञ्च-प्रकृतिम् भित्त्वा यः तिष्ठति, एवम्-भूतम् पुरुषम् अन्त-काले भक्ति-युक्तः निश्चलेन विक्षेप-रहितेन मनसा यः अनुस्मरेत्, मनः-नैश्चल्ये हेतुः – योग-बलेन सम्यक् सुषुम्ना-मार्गेण भ्रुवोः मध्ये प्राणम् आवेश्य इति । सः तम् परम् पुरुषम् (परमात्म-स्वरूपम्) दिव्यम् (द्योतनात्मकम्) प्राप्नोति ॥८.१०॥

केवलात् अभ्यास-योगात् अपि प्रणव-धारम् अभ्यासम् अन्तरङ्गम् विधित्सुः प्रतिजानीते – 'यद् अ-क्षरम्' इति –

8.11

यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये ॥११॥

यद् वेद-विदः अ-क्षरम् वदन्ति,	that which the knowers of the *Vedas* call *om*,
यद् वीत-रागाः यतयः विशन्ति,	that which sages free from attachment enter,
यद् इच्छन्तः ब्रह्मचर्यम् चरन्ति,	desiring which they practice celibacy,
तद् पदम् ते (तुभ्यम्) सङ्ग्रहेण प्रवक्ष्ये ।	that destination I will explain to you in summary

"Persons who are learned in the Vedas, who utter *oṁkāra* and who are great sages in the renounced order enter into Brahman. Desiring such perfection, one practices celibacy. I shall now briefly explain to you this process by which one may attain salvation."

यद् **that which** ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which

अ-क्षरम् ***om*** ⟨2.1⟩ n. *a-kṣara* – indestructible; the *om*

The *akṣara* (*brahma*) has two forms – the *vācaka* (the denotation) is the *om*, and the *vācya* (the object itself) is the Supreme. Baladeva says that the *akṣara* of the first line is the *vācaka*, the *akṣara* of the second line is the *vācya*, and the *akṣara* of the third line refers to both.

वेद-विदः **the knowers of the *Vedas*** ⟨1.3⟩ m. *veda-vid* – knowing the *Vedas*

वदन्ति they call ⟨*acyuta* 1.3⟩ √*vad[a]*...व्यक्तायां वाचि – to speak
विशन्ति they enter ⟨*acyuta* 1.3⟩ √*viś[a]*...प्रवेशने – to enter
यद् that which ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
यतयः sages ⟨1.3⟩ m. *yati* – 'one who endeavors', ascetic, *sannyāsī*
वीत-रागाः who are free from attachment ⟨1.3⟩ m. *vīta-rāga*...वीतः रागः यस्य, सः वीत-रागः – whose attachment is gone
यद् that which ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
इच्छन्तः those desiring ⟨1.3⟩ m. *icchat* (√*iṣ[u]*...इच्छायाम् – to wish, desire; + .*[ś]at[ṛ]*) – [while] desiring
ब्रह्मचर्यम् celibacy ⟨2.1⟩ n. *brahmacarya* – celibate student life
चरन्ति they practice ⟨*acyuta* 1.3⟩ √*car[a]*...गतौ – to go, move
तद् that ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
ते to you ⟨opt. for *tubhyam* 4.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
पदम् destination ⟨2.1⟩ n. *pada*...पद्यते इति पदम् – 'that which is gone to', step, position; the same as *gati*...*gamyate*
सङ्ग्रहेण in summary ⟨3.1⟩ m. *saṅgraha* – collection, summary
प्रवक्ष्ये I will declare ⟨*kalki* 3.1⟩ *pra.*√*vac[a]* – to declare

Subodhinī: यद् अ-क्षरम् वेदान्त-ज्ञाः वदन्ति – 'एतस्य वा अ-क्षरस्य प्रशासने गार्गि ! सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' (*Bṛhad-āraṇyaka-Up.* 3.8.9) इति श्रुतेः । वीतः रागः येभ्यः ते वीत-रागाः, यतयः (प्रयत्नवन्तः) यद् विशन्ति । यद् च ज्ञातुम् इच्छन्तः गुरु-कुले ब्रह्मचर्यम् चरन्ति । तद् ते (तुभ्यम्) पदम् (पद्यते गम्यते इति पदम् प्राप्यम्) सङ्ग्रहेण (सङ्क्षेपेण) प्रवक्ष्ये, तद्-प्राप्ति-उपायम् कथयिष्यामि इति अर्थः ॥८.११॥

प्रतिज्ञातम् उपायम् स-अङ्गम् आह – 'सर्व' इति द्वाभ्याम् –

8.12...13

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च ।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥१२॥

सर्व-द्वाराणि संयम्य	[after] controlling all the gates
मनः हृदि निरुध्य च	and [after] fixing the mind in the heart
आत्मनः प्राणम् मूर्ध्नि आधाय	[after] placing one's *prāṇa* on the head
योग-धारणाम् आस्थितः . . .	having resorted to steadiness of *yoga* . . .

"The yogic situation is that of detachment from all sensual engagements. Closing all the doors of the senses and fixing the mind on the heart and the life air at the top of the head, one establishes himself in yoga."

सर्व-द्वाराणि all gates ⟨2.3⟩ n. *sarva-dvāra* – all gates (of the senses, like eyes etc.)

संयम्य [after] restraining ⟨*avyaya*⟩ *sam.*√*yam[a]* – to restrain; + .*ya[p]*
मनः the mind ⟨2.1⟩ n. *manas* (*manaḥ*)
हृदि in the heart ⟨7.1⟩ n. *hṛd* – heart
निरुध्य [after] confining ⟨*avyaya*⟩ *ni.*√*rudh[ir]* – to enclose, oppose; + .*ya[p]*
च and ⟨*avyaya*⟩
मूर्ध्नि on the head ⟨7.1⟩ m. *mūrdhan* (*mūrdhā*) – head
आधाय [after] placing ⟨*avyaya*⟩ *ā.*√*[du]dhā[ñ]* – to hold, place; + .*ya[p]*
आत्मनः one's ⟨6.1⟩ m. *ātman* (*ātmā*) – the self, soul
प्राणम् the vital air ⟨2.1⟩ m. *prāṇa*
आस्थितः having resorted to ⟨1.1⟩ m. *āsthita* (*ā.*√*sthā* – to attain, resort to; + .*[k]ta*) – resorted
योग-धारणाम् steadiness of *yoga* ⟨2.1⟩ f. *yoga-dhāraṇā*...योगस्य धारणा इति योग-धारणा

Subodhinī: सर्वाणि इन्द्रिय-द्वाराणि संयम्य (प्रत्याहृत्य), चक्षुरादिभिः बाह्य-विषय-ग्रहणम् अ-कुर्वन् इति अर्थः । मनः च हृदि निरुध्य, बाह्य-विषय-स्मरणम् अ-कुर्वन् इति अर्थः । मूर्ध्नि (भ्रुवोः मध्ये) प्राणम् आधाय, योगस्य धारणाम् (स्थैर्यम्) आस्थितः (आश्रितवान् सन्) ॥८.१२॥

Note: The eight steps of *aṣṭāṅga-yoga* are *yama* (preliminary sense 'control'), *niyama* (preliminary mind 'control'), *āsana* ('sitting' postures), *prāṇāyāma* ('breath restraint'), *pratyāhāra* ('withdrawal' of the senses – the 'gates'), *dhāraṇa* ('holding' or concentration), *dhyāna* ('meditation'), and *samādhi* ('absorption').

8.13

ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥१३॥

. . . ओम् इति एकाक्षरम् ब्रह्म व्याहरन्,	. . . [while] pronouncing *om*', the one-syllable Brahman
माम् अनुस्मरन्	[while] contemplating Me
देहम् त्यजन् यः प्रयाति,	who departs [while] giving up the body,
सः परमाम् गतिम् याति ।	he reaches the supreme destination (i.e. Me)

"After being situated in this yoga practice and vibrating the sacred syllable *om*, the supreme combination of letters, if one thinks of the Supreme Personality of Godhead and quits his body, he will certainly reach the spiritual planets."

ओम् *om* ⟨*avyaya*⟩
इति thus ⟨*avyaya*⟩
एकाक्षरम् the one-syllable ⟨2.1⟩ n. *eka-akṣara*
ब्रह्म Brahman ⟨2.1⟩ n. *brahman* (*brahma*) – spirit, soul
व्याहरन् [while] pronouncing ⟨1.1⟩ m. *vyāharat* (*vi.ā.*√*hṛ[ñ]* – to pronounce; + .*[ś]at[ṛ]*)

माम् **Me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
अनुस्मरन् **[while] remembering** ⟨1.1⟩ m. *anusmarat (anu.√smṛ* – to remember; + *.[ś]at[r])*
यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
प्रयाति **he departs** ⟨*acyuta* 1.1⟩ *pra.√yā* – to depart
त्यजन् **[while] abandoning** ⟨1.1⟩ m. *tyajat (√tyaj[a]*...हानौ – to abandon; + *.[ś]at[r])*
देहम् **the body** ⟨2.1⟩ m. *deha*
सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
याति **he attains** ⟨*acyuta* 1.1⟩ *√yā*...प्राप्तौ – to attain, go
परमाम् **the supreme** ⟨2.1⟩ f. *paramā (.ā[p])* – highest
गतिम् **destination** ⟨2.1⟩ f. *gati* – movement, goal

Subodhinī: ओम् इति एकम् यद् अ-क्षरम्, तद् एव ब्रह्म-वाचकत्वात् वा, प्रतिमादिवत् ब्रह्म-प्रतीकत्वात् वा ब्रह्म, तद्-व्याहरन् (उच्चारयन्) तद्-वाच्यम् च माम् अनुस्मरन् एव, देहम् त्यजन्, यः प्रकर्षेण याति अर्चिरादि-मार्गेण, सः परमाम् (श्रेष्ठाम्) गतिम् (मद्-गतिम्) याति (प्राप्नोति) ॥८.१३॥

एवम् च अन्त-काले धारणया मद्-प्राप्तिः नित्य-अभ्यासवतः एव भवति, न अन्यस्य इति पूर्व-उक्तम् एव अनुस्मारयति – 'अनन्य' इति –

8.14

अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥१४॥

हे पार्थ !	O Arjuna!
यः अनन्य-चेताः	one who is single-minded
नित्यशः सततम् माम् स्मरति,	and every day constantly thinks of Me,
तस्य नित्य-युक्तस्य योगिनः	for such a constantly absorbed *yogī*
अहम् सुलभः ।	I am easy to obtain

"For one who always remembers Me without deviation, I am easy to obtain, O son of Pṛthā, because of his constant engagement in devotional service."

अनन्य-चेताः **who is single-minded** ⟨1.1⟩ m. *an-anya-cetas (-cetaḥ)*...न अन्यस्मिन् चेतः यस्य, सः अनन्य-चेताः – whose mind is on nothing else
सततम् **constantly** ⟨*avyaya*⟩
यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
स्मरति **he thinks** ⟨*acyuta* 1.1⟩ *√smṛ*...चिन्तायाम् – to think, remember
नित्यशः **always** ⟨*avyaya*⟩
तस्य **his** ⟨6.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
सुलभः **easy to obtain** ⟨1.1⟩ m. *sulabha*
पार्थ **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
नित्य-युक्तस्य **who is always absorbed** ⟨6.1⟩ m. *nitya-yukta*
योगिनः **of the *yogī*** ⟨6.1⟩ m. *yogin (yogī)*

Subodhinī: न अस्ति अन्यस्मिन् चेतः यस्य, तथा-भूतः सन् यः माम् सततम् (निरन्तरम्) नित्यशः (प्रतिदिनम्) स्मरति, तस्य नित्य-युक्तस्य (समाहितस्य) अहम् सुखेन लभ्यः अस्मि, न अन्यस्य ॥८.१४॥

यद्यपि एवम् त्वम् सुलभः असि, ततः किम् ? अतः आह – 'माम्' इति –

8.15

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥१५॥

महात्मानः	great souls
माम् उपेत्य	[after] attaining Me
परमाम् संसिद्धिम् गताः	having achieved the supreme perfection
पुनः दुःखालयम् अ-शाश्वतम् जन्म	again a miserable and temporary birth
न आप्नुवन्ति ।	they do not take

"After attaining Me, the great souls, who are yogīs in devotion, never return to this temporary world, which is full of miseries, because they have attained the highest perfection."

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
उपेत्य **[after] attaining** ⟨*avyaya*⟩ *upa.√i[n]* – to go near, attain; + *.ya[p]*
पुनः **again** ⟨*avyaya*⟩ *(punar)*
जन्म **birth** ⟨2.1⟩ n. *janman (janma)*
दुःखालयम् **miserable** ⟨2.1⟩ n. *duḥkha-_ālaya* – 'place of miseries'
अ-शाश्वतम् **temporary** ⟨2.1⟩ n. *a-śāśvata* – impermanent
न **not** ⟨*avyaya*⟩
आप्नुवन्ति **they reach** ⟨*acyuta* 1.3⟩ *√āp[l]*...व्याप्तौ – to reach, obtain
महात्मानः **great souls** ⟨1.3⟩ m. *mahā-_ātman (-ātmā)* – great soul
संसिद्धिम् **perfection** ⟨2.1⟩ f. *saṁsiddhi*
परमाम् **supreme** ⟨2.1⟩ f. *paramā (.ā[p])*
गताः **having achieved** ⟨1.3⟩ m. *gata (√gam[l]*...गतौ – to go; + *.[k]ta)* – gone

Subodhinī: उक्त-लक्षणाः महात्मानः (मद्-भक्ताः) माम् प्राप्य, पुनः दुःख-आश्रयम् अ-नित्यम् च जन्म न प्राप्नुवन्ति । यतः ते परमाम् सम्यक् सिद्धिम् (मोक्षम्) एव

प्राप्ताः, पुनः-जन्मनः दुःखानाम् च आलयम् (स्थानम्) ते माम् उपेत्य न प्राप्नुवन्ति इति वा ॥८.१५॥

एतद् एव सर्वेषु अपि लोकेषु पुनः-आवृत्तिम् दर्शयन् निर्धारयति – 'आब्रह्म' इति –

8.16

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥१६॥

हे अर्जुन कौन्तेय !	O Arjuna!
आब्रह्म-भुवनात्	upto Brahma-loka
लोकाः पुनरावर्तिनः,	the worlds are places of rebirth,
माम् उपेत्य तु	but [after] attaining Me
पुनः जन्म न विद्यते ।	there is no more birth

"From the highest planet in the material world down to the lowest, all are places of misery wherein repeated birth and death take place. But one who attains to My abode, O son of Kuntī, never takes birth again."

आब्रह्म-भुवनात् **up to Brahma-loka** ⟨5.1⟩ n. (*ā* with) *brahma-bhuvana*...ब्रह्मणः भुवनः इति ब्रह्म-भुवनः – the world of Brahma

The *ā-* comes together with *pañcamī* in two meanings – 'up to' including what follows, and 'up to' excluding what follows. Therefore *ābrahma-bhuvanāt* can be taken as 'up to Brahma-loka, including or excluding it.'

लोकाः **the worlds** ⟨1.3⟩ m. *loka* – place, world, people

पुनरावर्तिनः **are subject to rebirth** ⟨1.3⟩ m. *punaḥ_āvartin* (*āvartī*) – which returns again
आवर्तिन् (from *ā.*√*vṛt[u]* – to act reverse, return) – which returns

अर्जुन **O Arjuna!** ⟨8.1⟩ m. *arjuna* – white, 'who is pure in actions'

माम् **me** ⟨2.1⟩ *kṛṣnanāma asmad* – (last person) I

उपेत्य **[after] attaining** ⟨*avyaya*⟩ *upa.*√*i[ṇ]* – to go near, attain; + *.ya[p]*

तु **but** ⟨*avyaya*⟩

कौन्तेय **O Arjuna!** ⟨8.1⟩ m. *kaunteya* – 'son of Kuntī'

पुनः **again** ⟨*avyaya*⟩ (*punar*)

जन्म **birth** ⟨1.1⟩ n. *janman* (*janma*)

न **not** ⟨*avyaya*⟩

विद्यते **there is** ⟨*acyuta* 1.1⟩ √*vid[a]* 4A...सत्तायाम् – to be, exist

Subodhinī: ब्रह्मणः भुवनम् (वास-स्थानम्) ब्रह्म-लोकः, तम् अभिव्याप्य सर्वे लोकाः पुनः-आवर्तन-शीलाः, ब्रह्म-लोकस्य अपि विनाशित्वात्, तद्-प्राप्तानाम् अनुत्पन्न-ज्ञानानाम् अवश्यम्-भावि पुनः-जन्म । ये एवम् क्रम-मुक्ति-फलाभिः उपासनाभिः

ब्रह्म-लोकम् प्राप्ताः, तेषाम् एव तत्र उत्पन्न-ज्ञानानाम् ब्रह्मणा सह मोक्षः, न अन्येषाम् । तथा च –

ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे ।
परस्य अन्ते कृतात्मानः प्रविशन्ति परम् पदम् ॥

परस्य अन्ते (ब्रह्मणः परम-आयुषः अन्ते), कृतात्मानः (ब्रह्मभाव-आपादित-मनोवृत्तयः), कर्म-द्वारेण येषाम् ब्रह्मलोक-प्राप्तिः तेषाम् न मोक्षः इति परिनिष्ठितिः । माम् उपेत्य वर्तमानानाम् तु पुनः-जन्म न अस्ति एव इति अर्थः ॥८.१६॥

ननु च –

तपस्विनः दान-शीलाः वीत-रागाः तितिक्षवः ।
त्रैलोक्याः उपरि-स्थानम् लभन्ते शोक-वर्जितम् ॥

इत्यादि पुराण-वाक्यैः त्रि-लोक्याः सकाशात् महर्लोकादीनाम् उत्कृष्टत्वम् गम्यते, विनाशित्वे च सर्वेषाम् अ-विशिष्टे, कथम् असौ विशेषः स्यात् ? इति आशङ्क्य, बहु-अल्प-काल-अवस्थायित्व-निमित्तः असौ विशेषः ! इति आशयेन स्व-मानेन शत-वर्ष-आयुषः ब्रह्मणः अहनि अहनि त्रि-लोक्याः उत्पत्तिः, निशि निशि च प्रलयः भवति इति दर्शयिष्यन्, ब्रह्मणः अहः-रात्रयोः प्रमाणम् आह – 'सहस्र' इति –

8.17

सहस्रयुगपर्यन्तमहर्यद् ब्रह्मणो विदुः ।
रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः ॥१७॥

यद् ब्रह्मणः अहः	that a day of Brahmā
सहस्र-युग-पर्यन्तम्	lasts one thousand *divya-yugas*
रात्रिम् युग-सहस्रान्ताम्	and a night lasts one thousand *divya-yugas*
विदुः,	[those who] know,
ते अहोरात्रि-विदः जनाः ।	they are men who know day and night

"By human calculation, a thousand ages taken together form the duration of Brahmā's one day. And such also is the duration of his night."

सहस्र-युग-पर्यन्तम् **whose extent is one thousand *divya-yugas*** ⟨2.1⟩ m. *sahasra-yuga-paryanta*...सहस्रम् युगानि पर्यन्तः यस्य, तद् सहस्र-युग-पर्यन्तः
पर्यन्त – circumference, limit, border

अहः **a day** ⟨2.1⟩ n. *ahan* (*ahaḥ*)
Other words for 'day': *dina, divasa, vāsara.*

यद् **that** ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which

ब्रह्मणः **of Brahmā** ⟨6.1⟩ m. *brahman* (*brahmā*) – Brahmā

Brahmā's other names are Ātmabhū, Svayambhū, Pitāmaha, Hiraṇyagarbha, Lokeśa, Dhātā, Viriñci, Sraṣṭā, Prajāpati, Vidhātā and Vidhi.

विदुः **they know** ⟨*acyuta* 1.3⟩ √*vid[a]* 2P...ज्ञाने – to know

रात्रिम् **the night** ⟨2.1⟩ f. *rātri* – night

युग-सहस्रान्ताम् **whose end is after one thousand *divya-yugas*** ⟨2.1⟩ f. *yuga-sahasra-_antā* (.*ā[p]*)...युगानाम् सहस्रेण अन्तः यस्याः, सा युग-सहस्रान्ता

ते **they** ⟨1.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

अहोरात्रि-विदः **knowers of day and night** ⟨1.3⟩ m. *ahaḥ-_rātri-vid*...यः अहः च रात्रिम् च वेत्ति, सः अहोरात्रि-विद् – who knows day and night

जनाः **men** ⟨1.3⟩ m. *jana* – man, person

Subodhinī: सहस्रम् युगानि पर्यन्तः (अवसानम्) यस्य तद् ब्रह्मणः यद् अहः, तद् (ये) विदुः, युग-सहस्रम् अन्तः यस्याः ताम् रात्रिम् च योग-बलेन ये विदुः ते एव सर्व-ज्ञाः जनाः अहः-रात्र-विदः । येषाम् तु केवलम् चन्द्र-अर्क-गत्या एव ज्ञानम्, ते तथा अहः-रात्र-विदः न भवन्ति, अल्प-दर्शित्वात् । 'युग'-शब्देन अत्र चतुः-युगम् अभिप्रेतम् । 'चतुर्युग-सहस्रम् तु ब्रह्मणः दिनम् उच्यते' (*Viṣṇu-P.* 6.3.11) इति विष्णु-पुराण-उक्तेः । 'ब्रह्मणः' इति च महर्लोकादि-वासिनाम् अपि उपलक्षण-अर्थम् । तत्र अयम् काल-गणना-प्रकारः – मनुष्याणाम् यद् वर्षम् तद् देवानाम् अहः-रात्रम् । तादृशैः अहः-रात्रैः पक्ष-मासादि-कल्पनया द्वादशभिः वर्ष-सहस्रैः चतुः-युगम् भवति । चतुर्युग-सहस्रम् च ब्रह्मणः दिनम्, तावत् परिमाणः एव रात्रिः । तादृशैः च अहः-रात्रैः पक्ष-मासादि-क्रमेण वर्ष-शतम् ब्रह्मणः परमायुः इति ॥८.१७॥

ततः किम् ? अतः आह – 'अव्यक्तात्' इति –

8.18

अव्यक्ताद् व्यक्तयः सर्वाः प्रभवन्त्यहरागमे ।
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके ॥१८॥

अहरागमे	at the advent of [Brahmā's] day
अ-व्यक्तात् सर्वाः व्यक्तयः प्रभवन्ति,	from the unmanifest all manifestations are born,
रात्र्यागमे	at the arrival of [his] night
तत्र एव अव्यक्त-संज्ञके प्रलीयन्ते ।	they dissolve into that very *a-vyakta*

"At the beginning of Brahmā's day, all living entities become manifest from the unmanifest state, and thereafter, when the night falls, they are merged into the unmanifest again."

अ-व्यक्तात् **from the unmanifest** ⟨5.1⟩ m. *a-vyakta* – not manifested

व्यक्त (*vi.*√*añj[u]* – to make visible; + .*[k]ta*) – made visible, manifested

व्यक्तयः **manifestations** ⟨1.3⟩ f. *vyakti* – manifestation, an individual

सर्वाः **all** ⟨1.3⟩ f. *kṛṣnanāma sarvā* (.*ā[p]*)

प्रभवन्ति **they are born** ⟨*acyuta* 1.3⟩ *pra.*√*bhū* – to become manifest

अहरागमे **at the advent of day** ⟨7.1⟩ m. *ahaḥ-_āgama*...अह्नः आगमः इति अहरागमः – the advent of day

रात्र्यागमे **at the arrival of night** ⟨7.1⟩ m. *rātri-_āgama*...रात्रेः आगमः इति रात्र्यागमः – the arrival of night

प्रलीयन्ते **they dissolve** ⟨*acyuta* 1.3⟩ *pra.*√*lī[ṅ]* – to dissolve

तत्र **there** ⟨*avyaya*⟩

एव **certainly** ⟨*avyaya*⟩

अ-व्यक्त-संज्ञके **into the '*a-vyakta*'** ⟨7.1⟩ m. *a-vyakta-saṁjñaka*...अ-व्यक्तः इति संज्ञा यस्य, सः अ-व्यक्त-संज्ञकः – whose name is '*a-vyakta*'

संज्ञक – having the *saṁjña* (name)

Subodhinī: कार्यस्य अ-व्यक्तम् रूपम् कारणात्मकम्, तस्मात् अ-व्यक्तात् कारण-रूपात् 'व्यज्यन्ते (अभिव्यज्यन्ते) इति व्यक्तयः' (चर-अचराणि भूतानि) प्रादुर्भवन्ति । कदा ? अहः-आगमे ब्रह्मणः दिनस्य उपक्रमे । तथा रात्रेः आगमे (ब्रह्म-शयने) तस्मिन् एव अव्यक्त-संज्ञके कारण-रूपे प्रलयम् यान्ति । यद्वा, 'ते अहोरात्र-विदः' (8.17) इति एतद् न विधीयते, किन्तु 'ते प्रसिद्धाः अहोरात्र-विदः जनाः यद् ब्रह्मणः अहः विदुः, तस्य अह्नः आगमे अ-व्यक्तात् व्यक्तयः प्रभवन्ति । याम् च रात्रिम् विदुः तस्याः रात्रेः आगमे प्रलीयन्ते' इति द्वयोः अन्वयः ॥८.१८॥

तत्र च कृतनाश-अकृताभ्यागम-शङ्काम् वारयन्, वैराग्यार्थम् सृष्टि-प्रलय-प्रवाहस्य अ-विच्छेदम् दर्शयति – 'भूत-ग्रामः' इति –

8.19

भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते ।
रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥१९॥

हे पार्थ !	O Arjuna!
सः एव अयम् भूत-ग्रामः	that very multitude of beings
भूत्वा भूत्वा	[after] being born again and again
रात्र्यागमे अ-वशः प्रलीयते,	at the arrival of night it helplessly dissolves,
अहरागमे प्रभवति ।	at the advent of day it manifests

"Again and again, when Brahmā's day arrives, all living entities come into being, and with the arrival of Brahmā's night they are helplessly annihilated."

भूत-ग्रामः **multitude of beings** ⟨1.1⟩ m. *bhūta-grāma* – multitude of beings, aggregate of elements (the body)

सः **that** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
एव **certainly** ⟨*avyaya*⟩
अयम् **this** ⟨1.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
भूत्वा भूत्वा **[after] being manifested again and again** ⟨*avyaya*⟩ √*bhū*...सत्तायाम् – to be, exist, become; + .*[k]tvā*
प्रलीयते **it dissolves** ⟨*acyuta* 1.1⟩ *pra.*√*lī[ṅ]* – to dissolve
रात्र्यागमे **at the arrival of night** ⟨7.1⟩ m. *rātri-_āgama* – the arrival of night
अ-वशः **helplesslly** ⟨1.1⟩ m. *a-vaśa* – 'not according to the wish', automatically, helplessly
पार्थ **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
प्रभवति **it becomes manifest** ⟨*acyuta* 1.1⟩ *pra.*√*bhū* – to become manifest
अहरागमे **at the advent of day** ⟨7.1⟩ m. *ahaḥ-_āgama* – the advent of day

Subodhinī: भूतानाम् चर-अचर-प्राणिनाम् ग्रामः (समुहः) यः प्राक् आसीत्, सः एव अयम् अहः-आगमे भूत्वा भूत्वा, रात्रेः आगमे प्रलीयते । प्रलीयः पुनः अपि अहः आगमे अवशः (कर्मादि-परतन्त्रः) प्रभवति, न अन्यः इति अर्थः ॥८.१९॥
लोकानाम् अ-नित्यत्वम् प्रपञ्च्य, परमेश्वर-स्वरूपस्य नित्यत्वम् प्रपञ्चयति – 'परः' इति द्वाभ्याम् –

8.20

परस्तस्मात्तु भावो ऽन्यो ऽव्यक्तो ऽव्यक्तात्सनातनः ।
यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥२०॥

तस्मात् अ-व्यक्तात् तु परः	but beyond that *avyakta* (unmanifested matter)
यः अन्यः अ-व्यक्तः भावः सनातनः,	the other *avyakta* nature which is eternal,
सर्वेषु भूतेषु नश्यत्सु	when all beings are perishing
सः न विनश्यति ।	that does not perish

"Yet there is another unmanifest nature, which is eternal and is transcendental to this manifested and unmanifested matter. It is supreme and is never annihilated. When all in this world is annihilated, that part remains as it is."

परः **supreme** ⟨1.1⟩ m. *para* – beyond
तस्मात् **than that** ⟨5.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
तु **but** ⟨*avyaya*⟩
भावः **nature** ⟨1.1⟩ m. *bhāva* – state of being: nature, sentiment
अन्यः **other** ⟨1.1⟩ m. *kṛṣṇanāma anya*
अ-व्यक्तः **unmanifested** ⟨1.1⟩ m. *a-vyakta*
अ-व्यक्तात् **than the *a-vyakta*** ⟨5.1⟩ m. *a-vyakta*
सनातनः **eternal** ⟨1.1⟩ m. *sanātana*

यः **that which** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
सः **that** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
सर्वेषु **when all** ⟨7.3⟩ m. *kṛṣṇanāma sarva* – all
भूतेषु **beings** ⟨7.3⟩ m. *bhūta* (√*bhū*...सत्तायाम् – to be, exist, become; + .*[k]ta*) – past; an element, being, creature
नश्यत्सु **when perishing** ⟨7.3⟩ m. *naśyat* (√*naś[a]*...अदर्शने – to disappear, perish; + .*[ś]at[r]*) – [while] perishing
न **not** ⟨*avyaya*⟩
विनश्यति **it perishes** ⟨*acyuta* 1.1⟩ *vi.*√*naś[a]* – to disappear, perish

Subodhinī: तस्मात् चराचर-कारण-भूतात् अ-व्यक्तात् परः, तस्य अपि कारण-भूतः, यः अन्यः तद्-विलक्षणः अ-व्यक्तः (चक्षुरादि-अगोचरः) भावः सनातनः (अनादिः) । सः तु सर्वेषु कार्य-कारण-लक्षणेषु भूतेषु नश्यत्सु अपि न विनश्यति ॥८.२०॥
अ-विनाशे प्रमाणम् दर्शयन् आह – 'अ-व्यक्तः' इति –

8.21

अव्यक्तो ऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ॥२१॥

अ-व्यक्तः अ-क्षरः इति उक्तः	the unmanifest which is called *akṣara*
तम् परमाम् गतिम् आहुः,	they call the supreme goal,
यम् प्राप्य न निवर्तन्ते	[after] attaining which they do not return
तद् मम परमम् धाम ।	that is My supreme abode

"That which the Vedāntists describe as unmanifest and infallible, that which is known as the supreme destination, that place from which, having attained it, one never returns – that is My supreme abode."

अ-व्यक्तः **the unmanifest** ⟨1.1⟩ m. *a-vyakta* – unmanifested
अ-क्षरः ***a-kṣara*** ⟨1.1⟩ m. *a-kṣara* – indestructible
इति **thus** ⟨*avyaya*⟩
उक्तः **designated** ⟨1.1⟩ m. *ukta* (√*vac[a]*...परिभाषणे – to speak; + .*[k]ta*) – spoken
तम् **that** ⟨2.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
आहुः **they spoke** ⟨*acyuta* opt. for *bruvanti* with a past sense 1.3⟩ √*brū[ñ]*...व्यक्तायां वाचि – to speak
परमाम् **the supreme** ⟨2.1⟩ f. *paramā* (.*ā[p]*) – highest
गतिम् **destination** ⟨2.1⟩ f. *gati* – movement, goal
यम् **that which** ⟨2.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
प्राप्य **[after] attaining** ⟨*avyaya*⟩ *pra.*√*āp[ḷ]* – to obtain; + .*ya[p]*
न **not** ⟨*avyaya*⟩

निवर्तन्ते	**they return** ⟨*acyuta* 1.3⟩ *ni.√vṛt[u]* – to stop to act; to return
तद्	**that** ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
धाम	**abode** ⟨1.1⟩ n. *dhāman* (*dhāma*; from *√[ḍu]dhā[ñ]*...धारण-पोषणयोः – to hold; nourish) – dwelling-place, house, abode, domain; esp. seat of the gods
परमम्	**supreme** ⟨1.1⟩ n. *parama* – highest
मम	**my** ⟨6.1⟩ *kṛṣṇanāma asmad* – (last person) I

Subodhinī: यः भावः अ-व्यक्तः (अतीन्द्रियः) अ-क्षरः (प्रवेश-नाश-शून्यः) इति, 'तथा अ-क्षरात् सम्भवति इह विश्वम्' (*Muṇḍaka-Up.* 1.1.7) इत्यादि श्रुतिषु 'अ-क्षरः' इति उक्तः, तम् परमाम् गतिम् (गम्यम् पुरुषार्थम्) आहुः, 'पुरुषात् न परम् किञ्चिद्, सा काष्ठा, सा परा गतिः' (*Katha-Up.* 1.3.11) इत्यादि श्रुतयः। परम-गतित्वम् एव आह – 'यम् प्राप्य पुनः न निवर्तन्ते' इति। तद् च मम एव धाम (स्व-रूपम्)। 'मम एव' इति उपचारे षष्ठी, राहोः शिरः इतिवत्। अतः 'अहम् एव परमा गतिः' इति अर्थः ॥८.२१॥

8.22

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम् ॥२२॥

हे पार्थ !	O Arjuna!
यस्य अन्तः-स्थानि भूतानि	in whom all beings reside
येन इदम् सर्वम् ततम्,	and by whom all this [world] is pervaded,
सः परः पुरुषः	that Supreme Lord
अनन्यया तु भक्त्या लभ्यः।	is to be attained only by unalloyed devotion

"The Supreme Personality of Godhead, who is greater than all, is attainable by unalloyed devotion. Although He is present in His abode, He is all-pervading, and everything is situated within Him."

पुरुषः	**the Lord** ⟨1.1⟩ m. *puruṣa* – person
सः	**that** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
परः	**supreme** ⟨1.1⟩ m. *para* – beyond
पार्थ	**O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
भक्त्या	**by devotion** ⟨3.1⟩ f. *bhakti* – devotion
लभ्यः	**to be obtained** ⟨1.1⟩ m. *labhya* (*√[ḍu]labh[aṣ]*...प्राप्तौ – to obtain; + *.ya*)
तु	**but** ⟨*avyaya*⟩
अनन्यया	**by unalloyed** ⟨3.1⟩ f. *an-anyā* (*.ā[p]*) – 'no other', unalloyed
यस्य	**whose** ⟨6.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

अन्तः-स्थानि	**who stay within** ⟨1.3⟩ n. *antaḥ-stha*...यद् अन्तः तिष्ठति, सः अन्तः-स्थः – which stays within
भूतानि	**beings** ⟨1.3⟩ n. *bhūta* (*√bhū*...सत्तायाम् – to be, exist, become; + *.[k]ta*) – past; an element, being, creature
येन	**by whom** ⟨3.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
सर्वम्	**all** ⟨1.1⟩ n. *kṛṣṇanāma sarva*
इदम्	**this** ⟨1.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this
ततम्	**pervaded** ⟨1.1⟩ n. *tata* (*√tan[u]*...विस्तारे – to spread, pervade; + *.[k]ta*)

Subodhinī: तद्-प्राप्तौ च भक्तिः अन्तरङ्ग-उपायः इति उक्तम् एव आह – 'पुरुषः' इति। सः च (अहम् परः पुरुषः) अनन्यया (न विद्यते अन्यः शरणत्वेन यस्याः तया) एकान्त-भक्त्या एव लभ्यः न अन्यथा, परत्वम् एव आह – यस्य कारण-भूतस्य अन्तः (मध्ये) भूतानि स्थितानि। येन च कारण-भूतेन सर्वम् इदम् जगत् ततम् (व्याप्तम्) ॥८.२२॥
तद् एवम् परमेश्वर-उपासकाः तद्-पदम् प्राप्य न निवर्तन्ते, अन्ये तु आवर्तन्ते इति उक्तम्। तत्र केन मार्गेण गताः न आवर्तन्ते, केन वा गताः च आवर्तन्ते ? इति अपेक्षायाम् आह – 'यत्र' इति –

8.23

यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः ।
प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥२३॥

हे भरतर्षभ !	O Arjuna!
यत्र काले तु प्रयाताः	the time at which having departed
योगिनः अनावृत्तिम् आवृत्तिम् च एव यान्ति,	*yogīs* attain libertion or rebirth,
तम् कालम् वक्ष्यामि।	that [respective] time I shall explain

"O best of the Bhāratas, I shall now explain to you the different times at which, passing away from this world, the yogī does or does not come back."

यत्र	**at which** ⟨*avyaya*⟩ – where
काले	**at the time** ⟨7.1⟩ m. *kāla* – time
तु	**but** ⟨*avyaya*⟩
अनावृत्तिम्	**liberation** ⟨2.1⟩ f. *an-āvṛtti* – non-return
आवृत्तिम्	**rebirth** ⟨2.1⟩ f. *āvṛtti* (from *ā.√vṛt[u]* – to act reverse, return) – return
च	**and** ⟨*avyaya*⟩
एव	**certainly** ⟨*avyaya*⟩
योगिनः	*yogīs* ⟨1.3⟩ m. *yogin* (*yogī*)
प्रयाताः	**having departed** ⟨1.3⟩ m. *prayāta* (*pra.√yā* – to depart; + *.[k]ta*) – departed

यान्ति	**they attain** ⟨*acyuta* 1.3⟩ √*yā*...प्राप्तौ – to attain, go
तम्	**that** ⟨2.1⟩ m. *kṛṣnanāma tad* – (first person) he, that
कालम्	**time** ⟨2.1⟩ m. *kāla*
वक्ष्यामि	**I will speak** ⟨*kalki* 3.1⟩ √*vac[a]*...परिभाषणे – to speak
भरतर्षभ	**O Arjuna!** ⟨8.1⟩ m. *bharata-_rṣabha* – 'best of the descendants of Bharata'

Subodhinī: यत्र (यस्मिन्) काले प्रयाताः योगिनः अनावृत्तिम् यान्ति, यस्मिन् च काले प्रयाताः आवृत्तिम् यान्ति, तम् कालम् वक्ष्यामि इति अन्वयः। अत्र च 'रश्मि-अनुसारी' (*Bra.Sū.* 4.2.18), 'अतः च अयने अपि दक्षिणे' (*Bra.Sū.* 4.2.20) इति सूत्रित-न्यायेन उत्तर-अयणादि-काल-विशेष-मरणस्य अ-विवक्षितत्वात् काल-शब्देन काल-अभिमानिनीभिः अतिवाहिकीभिः देवताभिः प्राप्यः मार्गः उपलक्ष्यते, अतः अयम् अर्थः – यस्मिन् काल-अभिमानि-देवता-उपलक्षिते मार्गे प्रयाताः योगिनः (उपासकाः कर्मिणः च) यथा-क्रमम् अनावृत्तिम् आवृत्तिम् च यान्ति, तम् काल-अभिमानि-देवता-उपलक्षितम् मार्गम् कथयिष्यामि इति। अग्नि-ज्योतिषोः काल-अभिमानित्व-अभावे अपि, भूयसाम् अहरादि-शब्द-उक्तानाम् काल-अभिमानित्वात्, तद्-साहचर्यात्, 'आम्र-वणम्' इत्यादिवत्, 'काल'-शब्देन उपलक्षणम् अ-विरुद्धम् ॥८.२३॥

तत्र अनावृत्ति-मार्गम् आह – 'अग्निः' इति –

8.24

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥२४॥

अग्निः ज्योतिः अहः शुक्लः	fire, light, day, the bright fortnight
उत्तरायणम् षण्मासाः	and the six months of the sun's northern course –
तत्र प्रयाताः	having there departed
ब्रह्म-विदः जनाः ब्रह्म गच्छन्ति ।	men who know Brahman attain Brahman

"Those who know the Supreme Brahman attain that Supreme by passing away from the world during the influence of the fiery god, in the light, at an auspicious moment of the day, during the fortnight of the waxing moon, or during the six months when the sun travels in the north."

अग्निः	**fire** ⟨1.1⟩ m. *agni*
ज्योतिः	**light** ⟨1.1⟩ n. *jyotis (jyotiḥ)* – light, flame
अहः	**day** ⟨1.1⟩ n. *ahan (ahaḥ)*
शुक्लः	**the bright fortnight** ⟨1.1⟩ m. *śukla* – bright, white The bright half of a lunar month is known as *śukla-pakṣa.*
षण्मासाः	**the six months** ⟨1.3⟩ m. *ṣaṣ-_māsa (ṣaṭ-_māsa)*
उत्तरायणम्	**the northern path** ⟨1.1⟩ n. *uttara-_ayana*

तत्र	**there** ⟨*avyaya*⟩
प्रयाताः	**having departed** ⟨1.3⟩ m. *prayāta*
गच्छन्ति	**they go** ⟨*acyuta* 1.3⟩ √*gam[l]*...गतौ – to go
ब्रह्म	**to Brahman** ⟨2.1⟩ n. *brahman (brahma)* – spirit, soul
ब्रह्म-विदः	**the knowers of Brahman** ⟨1.3⟩ m. *brahma-vid*...यः ब्रह्म वेत्ति, सः ब्रह्म-विद् – who knows Brahma
जनाः	**men** ⟨1.3⟩ m. *jana* – man, person

Subodhinī: 'अग्निः'-'ज्योतिः'-शब्दाभ्याम् 'ते अर्चिषम् अभिसम्भवन्ति' (*Chāndogya-Up.* 5.10.1) इति श्रुति-उक्त-अर्चिः-अभिमानिनी देवता उपलक्ष्यते। 'अहः' इति दिवस-अभिमानिनी, 'शुक्लः' इति शुक्ल-पक्ष-अभिमानिनी, 'उत्तर-अयण-रूपाः षड्-मासाः' इति उत्तरायण-अभिमानिनी, एतद् च अन्यासाम् अपि श्रुति-उक्तानाम् संवत्सर-देवलोकादि-देवतानाम् उपलक्षणार्थम्। एवम्-भूतः यः मार्गः तत्र प्रयाताः (गताः) भगवत्-उपासकाः जनाः ब्रह्म प्राप्नुवन्ति, यतः ते ब्रह्म-विदः। तथा च श्रुतिः – 'ते अर्चिषम् अभिसम्भवन्ति, अर्चिषः अहः, अह्नः आपूर्यमाण-पक्षम्, आपूर्यमाण-पक्षात् यान् षड्-मासान् उदङ्ङादित्य एति, मासेभ्यः देव-लोकम् इति' (*Bṛh.* 6.2.15) ॥८.२४॥

आवृत्ति-मार्गम् आह – 'धूमः' इति –

8.25

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥२५॥

धूमः रात्रिः कृष्णः	smoke, night, the dark fortnight
तथा दक्षिणायनम् षण्मासाः	and the six months of the sun's souther course –
तत्र योगी	there [having departed] the [*karma-*] *yogī*
चान्द्रमसम् ज्योतिः प्राप्य	[after] attaining the moon (*svarga*)
निवर्तते ।	he returns

"The mystic who passes away from this world during the smoke, the night, the fortnight of the waning moon, or the six months when the sun passes to the south reaches the moon planet but again comes back."

धूमः	**smoke** ⟨1.1⟩ m. *dhūma* – smoke, vapour, mist
रात्रिः	**night** ⟨1.1⟩ f. *rātri*
तथा	**so** ⟨*avyaya*⟩
कृष्णः	**the dark fortnight** ⟨1.1⟩ m. *kṛṣṇa* – 'all-attractive', 'dark' Other words for 'black': *śyāma, kāla, a-sita.*
षण्मासाः	**the six months** ⟨1.3⟩ m. *ṣaṣ-_māsa*

दक्षिणायनम्	**the southern path** ⟨1.1⟩ n. *dakṣiṇa-_ayána*
तत्र	**there** ⟨*avyaya*⟩
चान्द्रमसम्	**the lunar sphere** ⟨2.1⟩ n. *cāndramasa* – relating to the moon
ज्योतिः	**light** ⟨2.1⟩ n. *jyotis (jyotiḥ)*
योगी	**the *yogī*** ⟨1.1⟩ m. *yogin (yogī)*
प्राप्य	**[after] attaining** ⟨*avyaya*⟩ *pra.√āp[l̥]* – to obtain; + *.ya[p]*
निवर्तते	**he returns** ⟨*acyuta* 1.1⟩ *ni.√vṛt[u]* – to stop to act; to return

Subodhinī: धूमः धूम-अभिमानिनी देवता । रात्र्यादि-शब्दैः च पूर्ववत् एव रात्रि-कृष्णपक्ष-दक्षिणायनरूप-षण्मास-अभिमानिन्यः तिस्रः देवताः उपलक्ष्यन्ते । एताभिः देवताभिः उपलक्षितः यः मार्गः, तत्र प्रयातः कर्म-योगी चान्द्रमसम् ज्योतिः तद्-उपलक्षितम् स्वर्ग-लोकम् प्राप्य, तत्र इष्ट-पूर्त-कर्मफलम् भुक्त्वा, पुनः आवर्तते । अत्र अपि श्रुतिः – 'ते धूमम् अभिसम्भवन्ति' (*Chāndogya-Up.* 5.10.3) इत्यादि । तद् एवम् (1.) निवृत्ति-कर्म-संहत-उपासनया क्रम-मुक्तिः, (2.) काम्य-कर्मभिः च स्वर्ग-भोग-अनन्तरम् आवृत्तिः, निषिद्ध-कर्मभिः तु नरक-भोग-अनन्तरम् आवृत्तिः, क्षुद्र-कर्मणाम् तु जन्तूनाम् तु अत्र एव पुनः पुनः जन्म इति द्रष्टव्यम् ॥८.२५॥

उक्तौ मार्गौ उपसंहरति – 'शुक्ल' इति –

8.26

शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।
एकया यात्यनावृत्तिमन्ययावर्तते पुनः ॥२६॥

एते शुक्ल-कृष्णे जगतः गती	these two paths of the world – 'bright' and 'dark' –
शाश्वते मते हि,	are considered to be eternal,
एकया अनावृत्तिम् याति	by one (the 'bright') one attains liberation
अन्यया पुनः आवर्तते ।	by the other one again returns

"According to Vedic opinion, there are two ways of passing from this world – one in light and one in darkness. When one passes in light, he does not come back; but when one passes in darkness, he returns."

शुक्ल-कृष्णे	**bright and dark** ⟨1.2⟩ f. *śukla-kṛṣṇā (.ā[p])*...शुक्ला च कृष्णा च इति शुक्ल-कृष्णे
गती	**two paths** ⟨1.2⟩ f. *gati* – movement, goal, path
हि	**indeed** ⟨*avyaya*⟩
एते	**these two** ⟨1.2⟩ f. *kṛṣnanāma etad* – (first person) he, this
जगतः	**of the world** ⟨6.1⟩ n. *jagat* – universe
शाश्वते	**are eternal** ⟨1.2⟩ f. *śāśvatā (.ā[p])* – eternal

मते	**considered** ⟨1.2⟩ f. *matā (√man[a]* 4A...बोधने – to know, think; + *.[k]ta* + *.ā[p])* – thought; opinion
एकया	**by one** ⟨3.1⟩ f. *kṛṣnanāma ekā (.ā[p])* – one
याति	**he attains** ⟨*acyuta* 1.1⟩ *√yā*...प्राप्तौ – to attain, go
अनावृत्तिम्	**liberation** ⟨2.1⟩ f. *an-āvṛtti* – non-return
अन्यया	**by the other** ⟨3.1⟩ f. *kṛṣnanāma anyā (.ā[p])* – other
आवर्तते	**he returns** ⟨*acyuta* 1.1⟩ *ā.√vṛt[u]* – to act reverse, return
पुनः	**again** ⟨*avyaya*⟩ (*punar*)

Subodhinī: 'शुक्ला' अर्चिरादि-गतिः प्रकाश-मयत्वात्, 'कृष्णा' धूमादि-गतिः तमः-मयत्वात् । एते गती (मार्गौ) ज्ञान-कर्म-अधिकारिणः जगतः शाश्वते (अनादी) सम्मते, संसारस्य अनादित्वात् । तयोः एकया शुक्लया निवृत्तिम् (मोक्षम्) याति, अन्यया कृष्णया तु पुनः आवर्तते ॥८.२६॥

मार्ग-ज्ञान-फलम् दर्शयन्, भक्ति-योगम् उपसंहरति – 'न एते' इति –

8.27

नैते सृती पार्थ जानन्योगी मुह्यति कश्चन ।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥२७॥

हे पार्थ अर्जुन !	O Arjuna!
एते सृती जानन्	knowing these two paths
कश्चन योगी न मुह्यति,	any *yogī* is not bewildered,
तस्मात्	therefore
सर्वेषु कालेषु योग-युक्तः भव !	always be engaged in *yoga*!

"Although the devotees know these two paths, O Arjuna, they are never bewildered. Therefore be always fixed in devotion."

न	**not** ⟨*avyaya*⟩
एते	**these two** ⟨2.2⟩ f. *kṛṣnanāma etad* – (first person) he, this
सृती	**paths** ⟨2.2⟩ f. *sṛti* (from *√sṛ*...गतौ – to go) – path (same as *gati*)
पार्थ	**O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
जानन्	**[while] knowing** ⟨1.1⟩ m. *jānat (√jñā* 9P...अवबोधने – to know; + *.[ś]at[ṛ])*
योगी	**a *yogī*** ⟨1.1⟩ m. *yogin (yogī)*
मुह्यति	**he is bewildered** ⟨*acyuta* 1.1⟩ *√muh[a]*...वैचित्ये – to be bewildered
कश्चन	**someone** ⟨1.1⟩ m. *kṛṣnanāma kim (kaḥ)* + *.cana* – someone, something
तस्मात्	**therefore** ⟨*avyaya*⟩
सर्वेषु	**at all** ⟨7.3⟩ m. *kṛṣnanāma sarva* – all
कालेषु	**times** ⟨7.3⟩ m. *kāla* – time

योग-युक्तः **endowed with *yoga*** ⟨1.1⟩ m. *yoga-yukta*...योगेन युक्तः इति योग-युक्तः

भव **you must be!** ⟨*vidhātā* 2.1⟩ √*bhū*...सत्तायाम् – to be, exist, become

अर्जुन **O Arjuna!** ⟨8.1⟩ m. *arjuna* – white, 'who is pure in actions'

Subodhinī: एते सृती (मार्गौ) हे पार्थ मोक्ष-संसार-प्रापकौ जानन्, कश्चिद् अपि न मुह्यति। सुख-बुद्ध्या स्वर्गादि-फलम् न कामयते, किन्तु परमेश्वर-निष्ठः एव भवति इति अर्थः। स्पष्टम् अन्यत् ॥८.२७॥

अध्याय-अर्थम् अष्ट-प्रश्नार्थ-निर्णयम् स-फलम् उपसंहरति – 'वेदेषु' इति –

8.28

वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टम् ।
अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम् ॥२८॥

वेदेषु यज्ञेषु	through [study of] the *Vedas*, sacrifices
तपःसु दानेषु च एव	austerities and charities
यद् पुण्य-फलम् प्रदिष्टम्,	whatever result of piety is ordained,
योगी इदम् विदित्वा	the *yogī*, [after] knowing this (8.27)
तद् सर्वम् अत्येति,	surpasses all this,
परम् आद्यम् स्थानम् उपैति च।	and attains the original supreme abode

"A person who accepts the path of devotional service is not bereft of the results derived from studying the Vedas, performing austere sacrifices, giving charity or pursuing philosophical and fruitive activities. Simply by performing devotional service, he attains all these, and at the end he reaches the supreme eternal abode."

वेदेषु **through the *Vedas*** ⟨7.3⟩ m. *veda* – Veda

यज्ञेषु **through sacrifices** ⟨7.3⟩ m. *yajña* – sacrifice

तपःसु **through austerities** ⟨7.3⟩ n. *tapas* (*tapaḥ*) – austerity, penance

च **and** ⟨*avyaya*⟩

एव **certainly** ⟨*avyaya*⟩

दानेषु **through charities** ⟨7.3⟩ n. *dāna* (from √*[du]dā[ñ]*...दाने – to give) – donation, gift, charity
(also from √*[du]dā[ñ]*...दाने): *dātṛ* (*dātā*) – giver, donor

यद् **that which** ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which

पुण्य-फलम् **result of piety** ⟨2.1⟩ n. *puṇya-phala*...पुण्यस्य फलम् इति पुण्य-फलम्

प्रदिष्टम् **ordained** ⟨2.1⟩ n. *pradiṣṭa* (*pra.*√*diś[a]* – to prescribe, ordain; + .*[k]ta*)

अत्येति **he surpasses** ⟨*acyuta* 1.1⟩ *ati.*√*i[ṇ]* – to surpass

तद् **that** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that

सर्वम् **all** ⟨2.1⟩ n. *kṛṣṇanāma sarva*

इदम् **this** ⟨2.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this

विदित्वा **[after] knowing** ⟨*avyaya*⟩ √*vid[a]* 2P...ज्ञाने – to know; + .*[k]tvā*

योगी **the *yogī*** ⟨1.1⟩ m. *yogin* (*yogī*)

परम् **the supreme** ⟨2.1⟩ n. *para* – beyond

स्थानम् **abode** ⟨2.1⟩ n. *sthāna* – place, position

उपैति **he attains** ⟨*acyuta* 1.1⟩ *upa.*√*i[ṇ]* – to go near, attain

च **and** ⟨*avyaya*⟩

आद्यम् **the original** ⟨2.1⟩ n. *ādya* – first, original

Subodhinī: वेदेषु (अध्ययनादिभिः), यज्ञेषु अनुष्ठानादिभिः, तपःसु (काय-शोषणादिभिः), दानेषु (सत्-पात्र-अर्पणादिभिः, यद् पुण्य-फलम् उपदिष्टम् शास्त्रेषु, तद् सर्वम् अत्येति, ततः अपि श्रेष्ठम् योग-ऐश्वर्यम् प्राप्नोति। किम् कृत्वा ? इदम् अष्ट-प्रश्नार्थ-निर्णयेन उक्तम् तत्त्वम् विदित्वा, ततः च योगी (ज्ञानी) भूत्वा, परम् (उत्कृष्टम्) आद्यम् (जगत्-मूलभूत-स्थानम्) विष्णोः परमम् पदम् प्राप्नोति ॥८.२८॥

ओं तत्सदिति
श्रीमहाभारते शतसाहस्त्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि
श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे अक्षरब्रह्मयोगो नामाष्टमोऽध्यायः ॥८॥

अथ नवमो ऽध्यायः

अथ नवमः अध्यायः । now the ninth chapter

Subodhinī: एवम् तावत् सप्तम-अष्टमयोः स्वीयम् पारमेश्वरम् तत्त्वम् भक्त्या एव सुलभम् न अन्यथा इति उक्त्वा, इदानीम् अ-चिन्त्यम् स्वकीयम् ऐश्वर्यम् भक्तेः च अ-साधारण-प्रभावम् प्रपञ्चयिष्यन्, [श्री-भगवान् उवाच] – 'इदम् तु' इति –

9.1

श्रीभगवानुवाच

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसे ऽशुभात् ॥१॥

श्री-भगवान् उवाच –	Śrī Kṛṣṇa said:
इदम् तु गुह्यतमम् ज्ञानम्	this most confidential knowledge [about Me]
विज्ञान-सहितम्	along with its realization
अनसूयवे ते (तुभ्यम्) प्रवक्ष्यामि,	I will explain to you, who are not envious,
यद् ज्ञात्वा	[after] knowing which
अ-शुभात् मोक्ष्यसे ।	you will be freed from misfortune

"The Supreme Personality of Godhead said: My dear Arjuna, because you are never envious of Me, I shall impart to you this most confidential knowledge and realization, knowing which you shall be relieved of the miseries of material existence."

श्री-भगवान् **Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'
उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
इदम् **this** ⟨2.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this
तु **but** ⟨*avyaya*⟩
ते **to you** ⟨opt. for *tubhyam* 4.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
गुह्यतमम् **most secret** ⟨2.1⟩ n. *guhyatama* (*.tama*)
गुह्य (from √*guh[ū]*...संवरणे – to cover) – to be covered, secret, private, mystical; a secret, mystery; (√*guh[ū]*...संवरणे – to cover; + *.[k]ta*): *gūḍha* – covered, hidden, disguised
प्रवक्ष्यामि **I will declare** ⟨*kalki* 3.1⟩ *pra.*√*vac[a]* – to declare
अनसूयवे **to the not envious** ⟨4.1⟩ m. *an-asūyu* – who is not envious
ज्ञानम् **knowledge** ⟨2.1⟩ n. *jñāna*
विज्ञान-सहितम् **along with realization** ⟨2.1⟩ n. *vijñāna-sahita*...विज्ञानेन सहितम् इति विज्ञान-सहितम्

यद् **that which** ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
ज्ञात्वा **[after] knowing** ⟨*avyaya*⟩ √*jñā* 9P...अवबोधने – to know; + *.[k]tvā*
मोक्ष्यसे **you will be released** ⟨*kalki* pass. 2.1⟩ √*muc[!]*...मोक्षणे – to release
अ-शुभात् **from the inauspicious** ⟨5.1⟩ m. *a-śubha* – inauspicious

Subodhinī: विशेषेण ज्ञायते अनेन इति विज्ञानम् (उपासनम्), तद्-सहितम् ज्ञानम् ईश्वर-विषयम् इदम् तु अनसूयवे, 'पुनः पुनः स्व-माहात्म्यम् एव उपदिशति' इति, एवम् परम-कारुणिके मयि दोष-दृष्टि-रहिताय ते (तुभ्यम्) वक्ष्यामि । 'तु'-शब्दः वैशिष्ट्ये । तद् एव आह – 'गुह्यतमम्' इत्यादिना । गुह्यम् धर्म-ज्ञानम्, ततः देहादि-व्यतिरिक्त-आत्म-ज्ञानम् गुह्यतरम्, ततः अपि परमात्म-ज्ञानम् अतिरहस्यत्वात् गुह्यतमम्, यद् ज्ञात्वा अ-शुभात् (संसारात्) मोक्ष्यसे, सद्यः एव मुक्तः भविष्यसि ॥९.१॥

9.2

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥२॥

इदम् राज-विद्या राज-गुह्यम्	it is the king of education, most secret
उत्तमम् पवित्रम्	supremely purifying
प्रत्यक्षावगमम् धर्म्यम्	directly experienced, religious,
कर्तुम् सुसुखम्, अ-व्ययम् ।	very easy to perform and imperishable

"This knowledge is the king of education, the most secret of all secrets. It is the purest knowledge, and because it gives direct perception of the self by realization, it is the perfection of religion. It is everlasting, and it is joyfully performed."

राज-विद्या **the king of sciences** ⟨1.1⟩ f. *rāja-vidyā*...विद्यानाम् राजा इति राज-विद्या
In *rāja-vidyā* and *rāja-guhyam* the words *vidyā* and *guhyam* are secondary in import and normally first in the compound. The example given is the word *rāja-danta* (the king of teeth), which normally would be *danta-rāja*.
राज-गुह्यम् **the king of secrets** ⟨1.1⟩ n. *rāja-guhya*...गुह्यानाम् राजा इति राज-गुह्यम्
पवित्रम् **purifying** ⟨1.1⟩ n. *pavitra* – a means of purification; holy, pure
इदम् **this** ⟨1.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this
उत्तमम् **supreme** ⟨1.1⟩ n. *uttama* (*.tama*) – highest, best
प्रत्यक्षावगमम् **directly experienced** ⟨1.1⟩ n. *pratyakṣa-_avagama*...प्रत्यक्षेण अवगमः यस्य, सः प्रत्यक्षावगमम् – whose understanding is by direct perception
प्रत्यक्ष (*prati.akṣa*) – 'before the eyes', visible; clear, manifest; direct perception, one kind of *pramāṇa* or proof
अवगम (*ava.*√*gam[!]* – to go down, 'under-stand') – understanding
धर्म्यम् **religious** ⟨1.1⟩ n. *dharmya* (from *dharma*) – 'according to *dharma*'

सुसुखम् **very happily** ⟨*avyaya*⟩

कर्तुम् **to do** ⟨*avyaya*⟩ √*[du]kṛ[ñ]*...करणे – to do; + *.tum[u]*

अ-व्ययम् **imperishable** ⟨1.1⟩ n. *a-vyaya* – unchangeable, imperishable

Subodhinī: इदम् ज्ञानम् राज-विद्या (विद्यानाम् राजा), गुह्यानाम् च राजा, विद्यासु गोप्येषु च अतिश्रेष्ठम् इति अर्थः। राजदन्तादित्वात् उपसर्जनस्य परत्वम्। उत्तमम् पवित्रम् (अत्यन्त-पावनम्) इदम्। प्रत्यक्ष-अवगमम् च, प्रत्यक्षः (स्पष्टः) अवगमः (अवबोधः) यस्य तद् प्रत्यक्ष-अवगमम् (दृष्ट-फलम्) इति अर्थः। धर्म्यम् च धर्मात् अनपेतम्, सर्व-धर्म-फलत्वात्। कर्तुम् सुसुखम् च, सुखेन कर्तुम् शक्यम् इति अर्थः। अ-व्ययम् च अक्षय-फलत्वात् ॥९.२॥

ननु एवम् अस्य अतिसुकरत्वे, के नाम 'संसारिणः' स्युः ? तत्र आह – 'अ-श्रद्दधानाः' इति –

9.3

अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥३॥

हे परन्तप !	O Arjuna!
अस्य धर्मस्य अ-श्रद्दधानाः पुरुषाः	persons without faith for this *dharma*
माम् अ-प्राप्य	[after] not attaining Me
मृत्यु-संसार-वर्त्मनि निवर्तन्ते ।	they return to the path of birth and death

"Those who are not faithful in this devotional service cannot attain Me, O conqueror of enemies. Therefore they return to the path of birth and death in this material world."

अ-श्रद्दधानाः **who are faithless** ⟨1.3⟩ m. *a-śraddadhāna* – [while] not having faith

श्रद्दधान (*śrad.*√*[du]dhā[ñ]* + *.[ś]āna*) – '[while] putting śrad (the heart)', having faith

पुरुषाः **persons** ⟨1.3⟩ m. *puruṣa* – person

धर्मस्य **of the *dharma*** ⟨6.1⟩ m. *dharma* – religious duty

अस्य **of this** ⟨6.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this

परन्तप **O Arjuna!** ⟨8.1⟩ m. *param-_tapa* – 'who scorches the enemies'

अ-प्राप्य **[after] not attaining** ⟨*avyaya*⟩ *a-prāpya*

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

निवर्तन्ते **they return** ⟨*acyuta* 1.3⟩ *ni.*√*vṛt[u]* – to stop to act; to return

मृत्यु-संसार-वर्त्मनि **on the path of birth and death** ⟨7.1⟩ n. *mṛtyu-saṁsāra-vartman* (*vartma*)...मृत्यु-संसारस्य वर्त्म इति मृत्यु-संसार-वर्त्म – the path of the cycles of deaths

संसार (from *sam.*√*sṛ* – to go together) – going or wandering through; passage through a succession of states; circuit of mundane existence, transmigration; material existence, the material world

Subodhinī: 'अस्य भक्ति-लक्षण-ज्ञान-सहितस्य धर्मस्य' इति कर्मणि षष्ठ्यौ। इमम् धर्मम् अ-श्रद्दधानाः आस्तिक्येन अ-स्वीकुर्वन्तः, उपाय-अन्तरेण मद्-प्राप्तये कृत-प्रयत्नाः अपि, माम् अ-प्राप्य मृत्यु-युक्ते संसार-वर्त्मनि निमित्ते निवर्तन्ते, मृत्यु-व्याप्ते संसार-मार्गे परिभ्रमन्ति इति अर्थः ॥९.३॥

तद् एवम् वक्तव्यतया प्रस्तुतस्य ज्ञानस्य स्तुत्या श्रोतारम् अभिमुखी-कृत्य, तद् एव ज्ञानम् कथयति – 'मया' इति द्वाभ्याम् –

9.4

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥४॥

इदम् सर्वम् जगत्	all this world
अ-व्यक्त-मूर्तिना मया ततम्,	is pervaded by Me, whose form is unmanifested,
सर्व-भूतानि मत्स्थानि	all beings are situated in Me
अहम् च तेषु न अवस्थितः ।	but I am not situated in them

"By Me, in My unmanifested form, this entire universe is pervaded. All beings are in Me, but I am not in them."

मया **by Me** ⟨3.1⟩ *kṛṣṇanāma asmad* – (last person) I

ततम् **pervaded** ⟨1.1⟩ n. *tata* (√*tan[u]*...विस्तारे – to spread, pervade; + *.[k]ta*)

इदम् **this** ⟨1.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this

सर्वम् **all** ⟨1.1⟩ n. *kṛṣṇanāma sarva*

जगत् **world** ⟨1.1⟩ n. *jagat* – universe

अ-व्यक्त-मूर्तिना **by him whose form is unmanifested** ⟨3.1⟩ m. *a-vyakta-mūrti*...अ-व्यक्ता मूर्तिः यस्य, सः अव्यक्त-मूर्तिः – whose form is unmanifested

मूर्ति (f.) – any solid body or material form; embodiment, manifestation; anything which has definite shape; a person, form; an image, statue

मत्स्थानि **which are situated in me** ⟨1.3⟩ n. *mad-_stha*...मयि तिष्ठति इति मत्स्थम् – which is situated in me

सर्व-भूतानि **all beings** ⟨1.3⟩ n. *sarva-bhūta*

न **not** ⟨*avyaya*⟩

च **and** ⟨*avyaya*⟩

अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

तेषु **in them** ⟨7.3⟩ n. *kṛṣṇanāma tad* – (first person) he, that

अवस्थितः **situated** ⟨1.1⟩ m. *avasthita* (*ava.*√*sthā* – to stay; + *.[k]ta*)

Subodhinī: अ-व्यक्ता (अतीन्द्रिया) मूर्तिः (स्व-रूपम्) यस्य, तादृशेन मया कारण-भूतेन सर्वम् इदम् जगत् ततम् (व्याप्तम्), 'तद् सृष्ट्वा तद् एव अनुप्राविशत्' (*Taitt.-Up.* 2.6) इति श्रुतेः । अतएव कारण-भूते 'मयि तिष्ठन्ति' इति मद्-स्थानि सर्वाणि (चर-अचराणि) भूतानि । एवम् अपि, घटादिषु स्व-कार्येषु मृत्तिका इव, तेषु भूतेषु न अहम् अवस्थितः, आकाशवत्-अ-सङ्गत्वात् ॥९.४॥

9.5

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ।
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥५॥

भूतानि च न मत्स्थानि,	nor are the beings in Me,
मे (मम) ऐश्वरम् योगम् पश्य !	behold My uncommon mysticism!
मम आत्मा भूत-भावनः भूत-भृत्	My Self is the creator and maintainer of beings
न च भूत-स्थः ।	but not situated in the world

"And yet everything that is created does not rest in Me. Behold My mystic opulence! Although I am the maintainer of all living entities and although I am everywhere, I am not a part of this cosmic manifestation, for My Self is the very source of creation."

न **not** ⟨*avyaya*⟩
च **and** ⟨*avyaya*⟩
मत्स्थानि **which are situated in me** ⟨1.3⟩ n. *mad-_stha* – situated in me
भूतानि **beings** ⟨1.3⟩ n. *bhūta* (√*bhū*...सत्तायाम् – to be, exist, become; + .*[k]ta*) – past; an element, being, creature
पश्य **you must see!** ⟨*vidhātā* 2.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see
मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
योगम् **mysticism** ⟨2.1⟩ m. *yoga*
ऐश्वरम् **majestic** ⟨2.1⟩ m. *aiśvara*
भूत-भृत् **who maintains all beings** ⟨1.1⟩ m. *bhūta-bhṛt*...यः भूतानि बिभर्ति, सः भूत-भृत्
न **not** ⟨*avyaya*⟩
च **and** ⟨*avyaya*⟩
भूत-स्थः **who stays in all beings** ⟨1.1⟩ m. *bhūta-stha*...यः भूतेषु तिष्ठति, सः भूत-स्थः
मम **my** ⟨6.1⟩ *kṛṣṇanāma asmad* – (last person) I
आत्मा **self** ⟨1.1⟩ m. *ātman* (*ātmā*) – the self, soul
भूत-भावनः **who creates all beings** ⟨1.1⟩ m. *bhūta-bhāvana*...भूतानि भावयति इति भूत-भावनः

Subodhinī: नच मयि स्थितानि भूतानि अ-सङ्गत्वात् एव मम । ननु तर्हि व्यापकत्वम् आश्रयत्वम् च पूर्व-उक्तम् विरुद्धम्? इति आशङ्क्याह – 'पश्य' इति । मे

ऐश्वरम् (अ-साधारणम्) योगम् (युक्तिम्, अघटित-घटना-चातुर्यम्) इदम् पश्य ! मदीय-योगमाया-वैभवस्य अ-वितर्क्यत्वात् न विरुद्धम् किञ्चिद् इति अर्थः । अन्यत् अपि आश्चर्यम् पश्य ? इति आह – 'भूत' इति । भूतानि बिभर्ति (धारयति) इति भूत-भृत्, भूतानि भावयति (पालयति) इति भूत-भावनः, एवम्-भूतः अपि मम आत्मा (परम् स्व-रूपम्) भूत-स्थः न भवति । अयम् भावः – यथा जीवः देहम् बिभ्रत् (पालयन्) च अहङ्कारेण तद्-संश्लिष्टः तिष्ठति, एवम् अहम् भूतानि धारयन् पालयन् अपि न तेषु तिष्ठामि, निरहङ्कारत्वात् इति ॥९.५॥

अ-संश्लिष्टयोः अपि आधार-आधेय-भावम् दृष्टान्तेन आह – 'यथा' इति –

9.6

यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् ।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥६॥

यथा सर्वत्र-गः महान् वायुः	just as the great wind, blowing everywhere
नित्यम् आकाश-स्थितः,	stays always in the sky,
तथा सर्वाणि भूतानि मत्स्थानि	so do all beings stay in Me
इति उपधारय !	thus understand!

"Understand that as the mighty wind, blowing everywhere, rests always in the sky, all created beings rest in Me."

यथा **as** ⟨*avyaya*⟩
आकाश-स्थितः **situated in the sky** ⟨1.1⟩ m. *ākāśa-sthita*...आकाशे स्थितः इति आकाश-स्थितः
नित्यम् **always** ⟨*avyaya*⟩
वायुः **the wind** ⟨1.1⟩ m. *vāyu* – air, wind, Vāyu
सर्वत्र-गः **who goes everywhere** ⟨1.1⟩ m. *sarvatra-ga*...यः सर्वत्र गच्छति, सः सर्वत्र-गः
महान् **the great** ⟨1.1⟩ m. *mahat[u]*
तथा **so** ⟨*avyaya*⟩
सर्वाणि **all** ⟨1.3⟩ n. *kṛṣṇanāma sarva*
भूतानि **beings** ⟨1.3⟩ n. *bhūta* (√*bhū*...सत्तायाम् – to be, exist, become; + .*[k]ta*) – past; an element, being, creature
मत्स्थानि **are situated in me** ⟨1.3⟩ n. *mad-_stha* – situated in me
इति **thus** ⟨*avyaya*⟩
उपधारय **you must consider** ⟨*vidhātā* caus. 2.1⟩ *upa.*√*dhṛ[ñ]* – to hold as, consider

Subodhinī: अवकाशम् विना अवस्थान-अनुपपत्तेः, नित्यम् आकाश-स्थितः वायुः सर्वत्र-गः अपि महान् अपि न आकाशेन संश्लिष्यते, निरवयवत्वेन संश्लेष-अयोगात्, तथा सर्वाणि भूतानि मयि स्थितानि इति जानीहि ॥९.६॥

9.7

सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥७॥

हे कौन्तेय !	O Arjuna!
कल्प-क्षये	at the end of a *kalpa*
सर्व-भूतानि मामिकाम् प्रकृतिम् यान्ति,	all beings attain My *prakṛti*,
कल्पादौ	at the beginning of a *kalpa*
अहम् तानि पुनः विसृजामि ।	I create (release) them again

"O son of Kuntī, at the end of the millennium all material manifestations enter into My nature, and at the beginning of another millennium, by My potency, I create them again."

सर्व-भूतानि	**all beings** ⟨1.3⟩ n. *sarva-bhūta*
कौन्तेय	**O Arjuna!** ⟨8.1⟩ m. *kaunteya* – 'son of Kuntī'
प्रकृतिम्	**material energy** ⟨2.1⟩ f. *prakṛti* – nature
यान्ति	**they attain** ⟨*acyuta* 1.3⟩ √*yā*...प्राप्तौ – to attain, go
मामिकाम्	**my** ⟨2.1⟩ f. *māmikā* (.*ā*[*p*]) – my, mine
कल्प-क्षये	**at the end of a *kalpa*** ⟨7.1⟩ m. *kalpa-kṣaya*...कल्पस्य क्षयः इति कल्प-क्षयः – the decay or end of a *kalpa*
पुनः	**again** ⟨*avyaya*⟩ (*punar*)
तानि	**them** ⟨2.3⟩ n. *kṛṣṇanāma tad* – (first person) he, that
कल्पादौ	**at the beginning of a *kalpa*** ⟨7.1⟩ m. *kalpa-_ādi*...कल्पस्य आदिः इति कल्पादिः – the beginning of a *kalpa*
विसृजामि	**I create** ⟨*acyuta* 3.1⟩ *vi.*√*sṛj*[*a*] – to let loose, create
अहम्	**I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

Subodhinī: तद् एवम् अ-सङ्गस्य योग-मायया स्थिति-हेतुत्वम् उक्तम्, तया एव सृष्टि-प्रलय-हेतुत्वम् च आह – 'सर्व' इति । कल्प-क्षये (प्रलय-काले) सर्वाणि भूतानि मदीयाम् प्रकृतिम् यान्ति, त्रिगुण-आत्मिकायाम् मायायाम् लीयन्ते, पुनः कल्प-आदौ (सृष्टि-काले) तानि विसृजामि (विशेषेण सृजामि) ॥९.७॥
ननु अ-सङ्गः निर्विकारः च त्वम् कथम् सृजसि ? इति अपेक्षायाम् आह – 'प्रकृतिम्' इति –

9.8

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥८॥

स्वाम् प्रकृतिम् अवष्टभ्य	[after] presiding over My own *prakṛti*
प्रकृतेः वशात् अ-वशम्	helpless under the control of [their] nature
इमम् कृत्स्नम् भूत-ग्रामम्	this entire multitude of beings
पुनः पुनः विसृजामि ।	I create again and again

"The whole cosmic order is under Me. Under My will it is automatically manifested again and again, and under My will it is annihilated at the end."

प्रकृतिम्	**material energy** ⟨2.1⟩ f. *prakṛti* – nature
स्वाम्	**my own** ⟨2.1⟩ f. *kṛṣṇanāma svā* (.*ā*[*p*]) – own
अवष्टभ्य	**[after] holding** ⟨*avyaya*⟩ *ava.*√*stambh*[*u*] – to hold; + .*ya*[*p*]
विसृजामि	**I create** ⟨*acyuta* 3.1⟩ *vi.*√*sṛj*[*a*] – to let loose, create
पुनः पुनः	**again and again** ⟨*avyaya*⟩
भूत-ग्रामम्	**multitude of beings** ⟨2.1⟩ m. *bhūta-grāma* – aggregate of beings
इमम्	**this** ⟨2.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
कृत्स्नम्	**entire** ⟨2.1⟩ m. *kṛtsna* – whole
अ-वशम्	**helpless** ⟨2.1⟩ m. *a-vaśa* – 'not according to the wish'
प्रकृतेः	**of the material nature** ⟨6.1⟩ f. *prakṛti* – nature
वशात्	**because of the control** ⟨5.1⟩ m. *vaśa* – wish, control

Subodhinī: स्वाम् (स्वीयाम्, स्व-अधीनाम्) प्रकृतिम् अवष्टभ्य (अधिष्ठाय), प्रलये लीनम् सन्तम् चतुः-विधम् इमम् कृत्स्नम् सर्वम् भूत-ग्रामम् कर्मादि-परवशम् पुनः पुनः विविधम् सृजामि विशेषेण सृजामि इति वा । कथम् ? प्रकृतेः वशात्, प्राचीन-कर्म-निमित्त-तद्-स्वभाव-बलात् ॥९.८॥
ननु एवम् नाना-विधानि कर्माणि कुर्वतः, तव जीववत् बन्धः कथम् न स्यात् ? इति आशङ्क्य, आह – 'न च' इति –

9.9

न च मां तानि कर्माणि निबध्नन्ति धनञ्जय ।
उदासीनवदासीनमसक्तं तेषु कर्मसु ॥९॥

हे धनञ्जय !	O Arjuna!
तानि कर्माणि च	moreover, those acts (creation etc.)

माम् न निबध्नन्ति,	do not bind Me,
तेषु कर्मसु अ-सक्तम्	who am unattached to those activities
उदासीनवत् आसीनम् ।	being situated as if neutral

"O Dhanañjaya, all this work cannot bind Me. I am ever detached from all these material activities, seated as though neutral."

न — **not** ⟨*avyaya*⟩
च — **and** ⟨*avyaya*⟩
माम् — **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
तानि — **those** ⟨1.3⟩ n. *kṛṣṇanāma tad* – (first person) he, that
कर्माणि — **activities** ⟨1.3⟩ n. *karman* (*karma*) – activity
निबध्नन्ति — **they bind** ⟨*acyuta* 1.3⟩ *ni.√bandh[a]* – to bind
धनञ्जय — **O Arjuna!** ⟨8.1⟩ m. *dhanam-_jaya* – 'winner of riches'
उदासीनवत् — **as if neutral** ⟨*avyaya*⟩ *udāsīnavat* (*.vat[i]*)
उदासीन (from *ud.√ās[a]* – to sit above) – 'sitting above', indifferent, neutral
आसीनम् — **being seated** ⟨2.1⟩ m. *āsīna* (from *√ās[a]*...उपवेशने विद्यमानतायां च – to sit; be present) – sitting, seated
अ-सक्तम् — **unattached** ⟨2.1⟩ m. *a-sakta*
तेषु — **in those** ⟨7.3⟩ n. *kṛṣṇanāma tad* – (first person) he, that
कर्मसु — **in activities** ⟨7.3⟩ n. *karman* (*karma*) – activity

Subodhinī: तानि सृष्ट्यादीनि कर्माणि माम् न निबध्नन्ति, कर्म-आसक्तिः हि बन्ध-हेतुः । सा च आप्त-कामत्वात् मम न अस्ति । अतः उदासीनवत् वर्तमानस्य मे बन्धम् न उत्पादयन्ति । उदासीनत्वे कर्तृत्व-अनुपपत्तेः, कर्तृत्वे च उदासीनत्व-अनुपपत्तेः 'उदासीनवत् स्थितम्' इति उक्तम् ॥९.९॥

तद् एव उपपादयति – 'मया' इति –

9.10

मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥१०॥

हे कौन्तेय !	O Arjuna!
मया अध्यक्षेण	by Me as supervisor
प्रकृतिः	*prakṛti*
स-चराचरम् सूयते,	creates the moving and non-moving,
अनेन हेतुना जगत् विपरिवर्तते ।	by this cause the world revolves

"This material nature, which is one of My energies, is working under My direction, O son of Kuntī, producing all moving and nonmoving beings. Under its rule this manifestation is created and annihilated again and again."

मया — **by me** ⟨3.1⟩ *kṛṣṇanāma asmad* – (last person) I
अध्यक्षेण — **by the supervisor** ⟨3.1⟩ m. *adhyakṣa* – supervisor
प्रकृतिः — **material nature** ⟨1.1⟩ f. *prakṛti*
सूयते — **it gives birth** ⟨*acyuta* 1.1⟩ *√sū[ṅ]*...प्राणिगर्भविमोचने – to give birth
स-चराचरम् — **with the moving and non-moving** ⟨2.1⟩ n. *sa-cara-_a-cara*...चरैः च अ-चरैः च सह इति स-चराचरम्
हेतुना — **by the cause** ⟨3.1⟩ m. *hetu* – cause, desire
अनेन — **by this** ⟨3.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
कौन्तेय — **O Arjuna!** ⟨8.1⟩ m. *kaunteya* – 'son of Kuntī'
जगत् — **the world** ⟨1.1⟩ n. *jagat* – universe
विपरिवर्तते — **it revolves** ⟨*acyuta* 1.1⟩ *vi.pari.√vṛt[u]* – to revolve

Subodhinī: मया अध्यक्षेण (अधिष्ठात्रा) निमित्त-भूतेन प्रकृतिः स-चर-अचरम् विश्वम् सूयते (जनयति) । अनेन (मद्-अधिष्ठानेन) हेतुना इदम् जगत् विपरिवर्तते (पुनः पुनः जायते) । सन्निधि-मात्रेण अधिष्ठातृत्वात्, कर्तृत्वम् उदासीनत्वम् च अ-विरुद्धम् इति भावः ॥९.१०॥

ननु एवम्-भूतम् परमेश्वरम् त्वाम् किम् इति केचिद् न आद्रियन्ते ? तत्र आह – 'अवजानन्ति' इति द्वाभ्याम् –

9.11

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो मम भूतमहेश्वरम् ॥११॥

मूढाः	the fools
मम भूत-महेश्वरम् परम् भावम्	My supreme nature as the Lord of beings
अ-जानन्तः	not knowing
मानुषीम् तनुम् आश्रितम्	for having taken a human form
माम् अवजानन्ति ।	they deride Me

"Fools deride Me when I descend in the human form. They do not know My transcendental nature as the Supreme Lord of all that be."

अवजानन्ति — **they deride** ⟨*acyuta* 1.3⟩ *ava.√jñā* – to deride
माम् — **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
मूढाः — **fools** ⟨1.3⟩ m. *mūḍha* (*√muh[a]*...वैचित्ये – to be bewildered; + *.[k]ta*) – bewildered; a fool

मानुषीम् human ⟨2.1⟩ f. *mānuṣī (.ī[p])*

तनुम् body ⟨2.1⟩ f. *tanu*

आश्रितम् having taken ⟨2.1⟩ m. *āśrita* – sheltered

परम् supreme ⟨2.1⟩ m. *para* – beyond

भावम् nature ⟨2.1⟩ m. *bhāva* – state of being: nature, sentiment

अ-जानन्तः who are not knowing ⟨1.3⟩ m. *a-jānat* – [while] not knowing

मम my ⟨6.1⟩ *kṛṣṇanāma asmad* – (last person) I

भूत-महेश्वरम् **as the Supreme Lord of all beings** ⟨2.1⟩ m. *bhūta-mahā-_īśvara*...भूतानाम् महेश्वरः इति भूत-महेश्वरः

Subodhinī: सर्व-भूत-महेश्वर-रूपम् मदीयम् परम् भावम् (तत्त्वम्) अ-जानन्तः, मूढाः (मूर्खाः) माम् अवजानन्ति (अवमन्यन्ते) । अवज्ञाने हेतुः – शुद्ध-सत्त्व-मयीम् अपि तनुम् भक्त-इच्छा-वशात् मनुष्य-आकारम् आश्रितवन्तम् ॥९.११॥

9.12

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥१२॥

विचेतसः	the thoughtless who
राक्षसीम् आसुरीम् मोहिनीम् च एव प्रकृतिम्	of a demonic, atheistic and bewildering nature
श्रिताः,	have taken shelter,
मोघाशाः मोघ-कर्माणः मोघ-ज्ञानाः	they are of vain hopes, activities and knowledge

"Those who are thus bewildered are attracted by demonic and atheistic views. In that deluded condition, their hopes for liberation, their fruitive activities, and their culture of knowledge are all defeated."

मोघाशाः **whose hopes are fruitless** ⟨1.3⟩ m. *mogha-_āśa*...मोघाः आशाः यस्य, सः मोघाशः

मोघ – vain, fruitless, useless

मोघ-कर्माणः **whose activities are fruitless** ⟨1.3⟩ m. *mogha-karman (-karmā)*...मोघानि कर्माणि यस्य, सः मोघ-कर्मा

मोघ-ज्ञानाः **whose knowledge is fruitless** ⟨1.3⟩ m. *mogha-jñāna*...मोघम् ज्ञानम् यस्य, सः मोघ-ज्ञानः

विचेतसः **who are thoughtless** ⟨1.3⟩ m. *vicetas (vicetaḥ)* – without thought

राक्षसीम् **demoniac** ⟨2.1⟩ f. *rākṣasī (rākṣasa + .ī[p])*

राक्षस (from *rakṣas* – demon) – demoniac, evil; a Rākṣasa; *rakṣas (rakṣaḥ)* (from √*rakṣ[a]*...पालने – to protect) – protecting

There are three kinds of Rākṣasas, namely followers of Kuvera (as in *yakṣa-rakṣas*), Asuras (enemies of the *devas*), and evil spirits.

आसुरीम् **atheistic** ⟨2.1⟩ f. *āsurī (.ī[p])* – demoniac, atheistic

च एव **and certainly** ⟨*avyaya*⟩ *ca_eva*

प्रकृतिम् **nature** ⟨2.1⟩ f. *prakṛti*

मोहिनीम् **bewildering** ⟨2.1⟩ f. *mohinī (mohin + .ī[p])*

श्रिताः **taken shelter** ⟨1.3⟩ m. *śrita* (√*śri[ñ]*...सेवायाम् – to serve, take shelter; + *.[k]ta*) – taken shelter

Subodhinī: 'मत्तः अन्यत्-देवता अन्तरम् क्षिप्रम् फलम् दास्यति' इति एवम्-भूता मोघा (निष्फला) एव आशा येषाम् ते, अतएव मद्-विमुखत्वात् मोघानि (व्यर्थानि) कर्माणि येषाम् ते, मोघम् एव नाना-कुतर्क-आश्रितम् शास्त्र-ज्ञानम् येषाम् ते, अतएव विचेतसः (विक्षिप्त-चित्ताः) । सर्वत्र हेतुः – राक्षसीम् (तामसीम्) हिंसादि-प्रचुराम् आसुरीम् च (राजसीम्) काम-दर्पादि-बहुलाम् मोहिनीम् (बुद्धि-भ्रंश-करीम्) प्रकृतिम् (स्व-भावम्) श्रिताः सन्तः, माम् अवजानन्ति इति पूर्वेण एव अन्वयः ॥९.१२॥

के तर्हि त्वाम् आराधयन्ति ? इति अतः आह – 'महात्मानः' इति –

9.13

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥१३॥

हे पार्थ !	O Arjuna!
महात्मानः तु	but the great souls
दैवीम् प्रकृतिम् आश्रिताः,	who have taken shelter of the divine nature,
माम् भूतादिम् अ-व्ययम् ज्ञात्वा	[after] knowing Me as the source of creation and imperishable
अनन्य-मनसः भजन्ति ।	they worship [Me] without deviation

"O son of Pṛthā, those who are not deluded, the great souls, are under the protection of the divine nature. They are fully engaged in devotional service because they know Me as the Supreme Personality of Godhead, original and inexhaustible."

महात्मानः **great souls** ⟨1.3⟩ m. *mahā-_ātman (-ātmā)* – great soul

तु **but** ⟨*avyaya*⟩

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

पार्थ **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'

दैवीम् **divine** ⟨2.1⟩ f. *daivī (.ī[p])* – godly

प्रकृतिम् **nature** ⟨2.1⟩ f. *prakṛti*

आश्रिताः **who have taken shelter** ⟨1.3⟩ m. *āśrita* (*ā.√śri[ñ]* – to take shelter; + *.[k]ta*) – taken shelter

भजन्ति **they worship** ⟨*acyuta* 1.3⟩ *√bhaj[a]* 1U...सेवायाम् – to serve, worship

अनन्य-मनसः **who is single-minded** ⟨1.3⟩ m. *an-anya-manas* (*-manāḥ*)...न अन्यस्मिन् मनः यस्य, सः अनन्य-मनाः – whose mind is on nothing else

ज्ञात्वा **[after] knowing** ⟨*avyaya*⟩ *√jñā* 9P...अवबोधने – to know; + *.[k]tvā*

भूतादिम् **the origin of all beings** ⟨2.1⟩ m. *bhūta-_ādi*...भूतानाम् आदिः इति भूतादिः

अ-व्ययम् **the imperishable** ⟨2.1⟩ m. *a-vyaya* – unchangeable, imperishable

Subodhinī: महात्मानः (कामादि-अनभिभूत-चित्ताः), यतः 'अ-भयम् सत्त्व-संशुद्धिः' (16.1) इत्यादिना वक्ष्यमाणाम् दैवीम् प्रकृतिम् (स्व-भावम्) आश्रिताः, अतएव मद्-व्यतिरेकेण न अस्ति अन्यस्मिन् मनः येषाम्, ते भूतादिम् (जगत्-कारणम्) अ-व्ययम् (नित्यम्) च माम् ज्ञात्वा भजन्ति ॥९.१३॥
तेषाम् भजन-प्रकारम् आह – 'सततम्' इति द्वाभ्याम् –

9.14

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥१४॥

सततम् माम् कीर्तयन्तः	always glorifying Me
दृढ-व्रताः यतन्तः च	endeavoring with great determination
नमस्यन्तः च	and bowing down
नित्य-युक्ताः	beings always absorbed [in Me]
माम् भक्त्या उपासते ।	they worship Me with devotion

"Always chanting My glories, endeavoring with great determination, bowing down before Me, these great souls perpetually worship Me with devotion."

सततम् **constantly** ⟨*avyaya*⟩

कीर्तयन्तः **[while] glorifying** ⟨1.3⟩ m. *kīrtayat* (*√kṛt[a]*...संशब्दने – to glorify; + *.[ś]at[ṛ]*)

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

यतन्तः **[while] endeavoring** ⟨1.3⟩ m. *yatat* (*√yat[ī]*...प्रयत्ने – to endeavor; + *.[ś]at[ṛ]*)

च **and** ⟨*avyaya*⟩

दृढ-व्रताः **who observe strict vows** ⟨1.3⟩ m. *dṛḍha-vrata*...दृढम् व्रतम् यस्य, सः दृढ-व्रतः – whose has a strict vow
दृढ – fixed, firm, strong

नमस्यन्तः **[while] bowing down** ⟨1.3⟩ m. *namasyat* (*√namasya* + *.[ś]at[ṛ]*)
√namasya (from *namaḥ*) – to bow down, offer obeisances

च **and** ⟨*avyaya*⟩

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

भक्त्या **with devotion** ⟨3.1⟩ f. *bhakti* – devotion

नित्य-युक्ताः **who are always absorbed** ⟨1.3⟩ m. *nitya-yukta* – always engaged

उपासते **they worship** ⟨*acyuta* 1.3⟩ *upa.√ās[a]* – to worship

Subodhinī: सततम् (सर्वदा) स्तोत्र-मन्त्रादिभिः कीर्तयन्तः केचिद् माम् उपासते (सेवन्ते) । दृढानि व्रतानि (नियमाः) येषाम् ते, तादृशाः सन्तः यतन्तः च, ईश्वर-पूजादिषु इन्द्रिय-उपसंहारादिषु च प्रयत्नम् कुर्वन्तः च केचिद् भक्त्या नमस्यन्तः (प्रणमन्तः) च, अन्ये नित्य-युक्ताः (अनवरतम् अवहिताः) सेवन्ते । 'भक्त्या' इति 'नित्य-युक्ताः' इति च कीर्तनादिषु अपि द्रष्टव्यम् ॥९.१४॥

9.15

ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते ।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥१५॥

अन्ये अपि	and others
ज्ञान-यज्ञेन यजन्तः च	[while] also worshiping through the sacrifice of knowledge
एकत्वेन पृथक्त्वेन	through oneness, diversity,
विश्वतोमुखम्	or as universal form
माम् बहुधा उपासते ।	they worship Me in many ways

"Others, who engage in sacrifice by the cultivation of knowledge, worship the Supreme Lord as the one without a second, as diverse in many, and in the universal form."

ज्ञान-यज्ञेन **by the sacrifice of knowledge** ⟨3.1⟩ m. *jñāna-yajña*...ज्ञानेन यज्ञः इति ज्ञान-यज्ञः – sacrifice through knowledge

च अपि **and also** ⟨*avyaya*⟩

अन्ये **others** ⟨1.3⟩ m. *kṛṣṇanāma anya*

यजन्तः **[while] worshiping** ⟨1.3⟩ m. *yajat* (*√yaj[a]*...देवपूजा-सङ्गतिकरण-यजन-दानेषु – to worship; associate; sacrifice; give; + *.[ś]at[ṛ]*)

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

उपासते **they worship** ⟨*acyuta* 1.3⟩ *upa.√ās[a]* – to worship

एकत्वेन **through oneness** ⟨3.1⟩ n. *ekatva* (*.tva*) – oneness

पृथक्त्वेन **through diversity** ⟨3.1⟩ n. *pṛthaktva* (*.tva*) – difference

बहुधा **in many ways** ⟨*avyaya*⟩ – manyfold

विश्वतोमुखम् **as universal form** ⟨2.1⟩ m. *viśvataḥ-_mukha*...विश्वतः मुखम् यस्य, सः विश्वतोमुखः – 'whose face is [turned] everywhere', facing all sides, universal; the universal form

विश्वतः – from all sides, everywhere; (from:) *viśva* – all, every; whole, entire, universal; all-pervading, omnipresent (applied to Viṣṇu-Kṛṣṇa); the whole world, universe

Subodhinī: 'वासुदेवः सर्वम् इति' एवम् सर्वात्मत्व-दर्शनम् ज्ञानम्, तद् एव यज्ञः, तेन ज्ञान-यज्ञेन माम् यजन्तः (पूजयन्तः) अन्ये अपि उपासते । तत्र अपि केचिद् एकत्वेन, 'एकम् एव परम् ब्रह्म' इति परमार्थ-दर्शन-रूप-अभेद-भावनया, केचिद् पृथक्त्वेन, 'दासः अहम्' इति पृथक्-भावनया, केचिद् तु विश्वतः-मुखम् (सर्वात्मकम्) माम् बहुधा ब्रह्म-रुद्रादि-रूपेण उपासते ॥९.१५॥
सर्वात्मताम् प्रपञ्चयति – 'अहम्' इति चतुर्भिः –

9.16

अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् ।
मन्त्रो ऽहमहमेवाज्यमहमग्निरहं हुतम् ॥१६॥

अहम् क्रतुः, अहम् यज्ञः	I am *kratu (agniṣṭoma)*, I am *(pañca-) yajña*
अहम् स्वधा, अहम् औषधम्	I am *svadhā (śrāddha)*, I am the herb
अहम् मन्त्रः, अहम् एव आज्यम्	I am the *mantra*, I am the ghee
अहम् अग्निः, अहम् हुतम् ।	I am the fire, I am the oblation

"But it is I who am the ritual, I the sacrifice, the offering to the ancestors, the healing herb, the transcendental chant. I am the butter and the fire and the offering."

अहम् **I am** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
क्रतुः **the *kratu*** ⟨1.1⟩ m. *kratu* – intention, determinatin; power, ability; intelligence; Kratu as intelligence personified; a sacrificial rite
अहम् **I am** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
यज्ञः **the *yajña*** ⟨1.1⟩ m. *yajña* – sacrifice
स्वधा **the *svadhā*** ⟨1.1⟩ f. *svadhā* – oblation of food to the ancesters in *śrāddha*
अहम् **I am** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
अहम् **I am** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
औषधम् **the herb** ⟨1.1⟩ n. *auṣadha* – healing herb or grain
मन्त्रः **the *mantra*** ⟨1.1⟩ m. *mantra* – sacred hymn
अहम् **I am** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
अहम् **I am** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
एव **certainly** ⟨*avyaya*⟩
आज्यम् **ghee** ⟨1.1⟩ n. *ājya*
अहम् **I am** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
अग्निः **fire** ⟨1.1⟩ m. *agni*
अहम् **I am** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

हुतम् **the oblation** ⟨1.1⟩ n. *huta* (√*hu*...वह्नौ दाने – to offer in the fire, sacrifice; + *.[k]ta*) – 'offered in the fire', oblation; the ceremony itself

Subodhinī: क्रतुः श्रौतः अग्निष्टोम-आदिः, यज्ञः तु स्मार्तः पञ्च-महा-यज्ञादिः, स्वधा पित्रर्थे श्राद्धादिः, औषधम् ओषधि-प्रभवम् अन्नम् भेषजम् वा, मन्त्रः याज्यापुर-अनुवाक्या-आदिः, आज्यम् होमादि-साधनम्, अग्निः आहवनीय-आदिः, हुतम् होमः, एतद् सर्वम् अहम् एव ॥९.१६॥

9.17

पिताहमस्य जगतो माता धाता पितामहः ।
वेद्यं पवित्रमोंकार ऋक्साम यजुरेव च ॥१७॥

अहम् अस्य जगतः	I am of this world
पिता माता धाता पितामहः	the father, mother, maintainer and grandfather
वेद्यम् पवित्रम् ओंकारः	the knowable, the purifier, the syllable *om*
ऋक् साम यजुः एव च ।	*Rg-*, *Sāma-* and *Yajur-Vedas*

"I am the father of this universe, the mother, the support and the grandsire. I am the object of knowledge, the purifier and the syllable *om*. I am also the Rg, the Sāma and the Yajur Vedas."

पिता **the father** ⟨1.1⟩ m. *pitṛ (pitā)* – father, ancestor
अहम् **I am** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
अस्य **of this** ⟨6.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this
जगतः **of the world** ⟨6.1⟩ n. *jagat* – universe
माता **mother** ⟨1.1⟩ f. *mātṛ (mātā)*
धाता **maintainer** ⟨1.1⟩ m. *dhātṛ (dhātā*; √*[ḍu]dhā[ñ]*...धारण-पोषणयोः – to hold; nourish; + *.tṛ[n]*) – holder, nourisher, maintainer
पितामहः **grandfather** ⟨1.1⟩ m. *pitāmaha*
वेद्यम् **the knowable** ⟨1.1⟩ n. *vedya* (√*vid[a]* 2P...ज्ञाने – to know; + *.ya*) – to be known
पवित्रम् **means of purification** ⟨1.1⟩ n. *pavitra*
ओंकारः **the syllable *om*** ⟨1.1⟩ m. *oṁkāra*
ऋक् ***Rg-Veda*** ⟨1.1⟩ m. *ṛc (ṛk*; for *ṛk-_veda)*
साम ***Sāma-Veda*** ⟨1.1⟩ m. *sāman (sāma)*
यजुः ***Yajur-Veda*** ⟨1.1⟩ m. *yajus (yajuḥ)*
एव च **and certainly** ⟨*avyaya*⟩

Subodhinī: धाता कर्म-फल-विधाता, वेद्यम् ज्ञेयम् वस्तु, पवित्रम् शोधकम् प्रायश्चित्तात्मकम् वा, ओङ्कारः प्रणवः, ऋग्-वेद-आदयः वेदाः च अहम् एव, स्पष्टम् अन्यत् ॥९.१७॥

9.18

गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् ।
प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् ॥१८॥

गतिः भर्ता प्रभुः साक्षी	[I am] the goal, sustainer, master, witness
निवासः शरणम् सुहृद्	abode, shelter, friend
प्रभवः प्रलयः स्थानम्	origin, destruction, maintenance
निधानम् अ-व्ययम् बीजम्	resting place and eternal seed

"I am the goal, the sustainer, the master, the witness, the abode, the refuge, and the most dear friend. I am the creation and the annihilation, the basis of everything, the resting place and the eternal seed."

गतिः **the goal** ⟨1.1⟩ f. *gati* – movement, goal
भर्ता **sustainer** ⟨1.1⟩ m. *bhartṛ* (*.tṛ[n], bhartā*)
प्रभुः **master** ⟨1.1⟩ m. *prabhu* – master, lord
साक्षी **witness** ⟨1.1⟩ m. *sākṣin* (*sākṣī*)
साक्षिन् (*sākṣī*; from *sa-_akṣa* – with the eyes) – witness; the subject; (derived:) *sākṣāt* – 'with one's own eyes', directly, personally, clearly, really
निवासः **abode** ⟨1.1⟩ m. *nivāsa* – resting place, dwelling, house
शरणम् **shelter** ⟨1.1⟩ n. *śaraṇa*
सुहृद् **friend** ⟨1.1⟩ m. *suhṛd* – well-wisher
प्रभवः **origin** ⟨1.1⟩ m. *prabhava* – source, origin
प्रलयः **dissolution** ⟨1.1⟩ m. *pralaya* – dissolution, death
स्थानम् **maintenance** ⟨1.1⟩ n. *sthāna* – place, position; support
निधानम् **resting place** ⟨1.1⟩ n. *nidhāna* – resting place (at dissolution)
बीजम् **seed** ⟨1.1⟩ n. *bīja*
अ-व्ययम् **eternal** ⟨1.1⟩ n. *a-vyaya* – unchangeable, imperishable

Subodhinī: गम्यतः इति गतिः (फलम्) । भर्ता पोषण-कर्ता । प्रभुः नियन्ता । साक्षी शुभ-आशुभ-द्रष्टा । निवासः भोग-स्थानम् । शरणम् रक्षकः । सुहृद् हित-कर्ता । प्रकर्षेण भवति अनेन इति प्रभवः (स्त्रष्टा) । प्रलीयते अनेन इति प्रलयः (संहर्ता) । तिष्ठन्ति अस्मिन् इति स्थानम् (आधारः) । निधीयते अस्मिन् इति निधानम् (लय-स्थानम्) । बीजम् (कारणम्), तथापि अ-व्ययम् (अ-विनाशि) नतु व्रीहि-आदि-बीजवत् नश्वरम् इति अर्थः ॥९.१८॥

9.19

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥१९॥

हे अर्जुन !	O Arjuna!
अहम् तपामि,	[as sun] I give heat,
अहम् वर्षम् निगृह्णामि उत्सृजामि च,	I withhold and send forth the rain,
अहम् अ-मृतम् च एव मृत्युः च	I am immortality and death
सत् अ-सत् च ।	spirit and matter

"O Arjuna, I give heat, and I withhold and send forth the rain. I am immortality, and I am also death personified. Both spirit and matter are in Me."

तपामि **I heat** ⟨*acyuta* 3.1⟩ √*tap[a]*...सन्तापे ऐश्वर्य्ये वा – to heat, burn; lord
अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
वर्षम् **rain** ⟨2.1⟩ m. *varṣa* – rain, a shower; cloud; year; a division of the earth as separated off by certain mountain ranges (as in Bhārata-varṣa); (derived:) *varṣā* – the rainy season, monsoon
निगृह्णामि **I control** ⟨*acyuta* 3.1⟩ *ni.*√*grah[a]* – to control
उत्सृजामि **I release** ⟨*acyuta* 3.1⟩ *ud.*√*srj[a]* – to let loose, create
च **and** ⟨*avyaya*⟩
अ-मृतम् **immortality** ⟨1.1⟩ n. *a-mṛta*
च एव **and certainly** ⟨*avyaya*⟩
मृत्युः **death** ⟨1.1⟩ m. *mṛtyu*
च **and** ⟨*avyaya*⟩
सत् **existence** ⟨1.1⟩ n. *sat* – being, real, good
अ-सत् **non-existence** ⟨1.1⟩ n. *a-sat* – not being, unreal, bad
The words *sat* and *asat* are translated as: existence and non-existence, eternal and temporary, real and unreal, good and bad, visible and invisible, cause and effect.
च **and** ⟨*avyaya*⟩
अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
अर्जुन **O Arjuna!** ⟨8.1⟩ m. *arjuna* – white, 'who is pure in actions'

Subodhinī: आदित्य-आत्मना स्थित्वा निदाघ-समये तपामि, जगतः तापम् करोमि, वृष्टि-समये च वर्षम् उत्सृजामि (विमुञ्चामि), कदाचिद् तु वर्षम् निगृह्णामि (आकर्षामि) । अ-मृतम् च जीवनम्, मृत्युः च नाशः, सत् स्थूलम् (दृश्यम्), अ-सत् च सूक्ष्मम् (अ-दृश्यम्) । 'एतद् सर्वम् अहम् एव' इति मत्वा, माम् एव बहुधा उपासते इति पूर्वेण एव अन्वयः ॥९.१९॥

तद् एवम् 'अवजानन्ति माम् मूढाः' (9.11) इत्यादि श्लोक-द्वयेन क्षिप्र-फल-आशया देवता-अन्तरम् भजन्तः माम् न आद्रियन्ते इति अ-भक्ताः दर्शिताः । 'महात्मानः तु माम् पार्थ' (9.13) इत्यादिना च भक्ताः उक्ताः, तत्र एकत्वेन पृथक्त्वेन वा परमेश्वरम् श्री-वासुदेवम् ये न भजन्ति, तेषाम् जन्म-मृत्यु-प्रवाहः दुर्वारः इति आह – 'त्रैविद्याः' इति द्वाभ्याम् –

9.20

त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ।
ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान्दिवि देवभोगान् ॥२०॥

त्रैविद्याः	the knowers of the three *Vedas*
सोम-पाः पूत-पापाः	who drink *soma* and are [thus] purified of sin
यज्ञैः माम् इष्ट्वा	[after] worshiping Me with *yajñas*
स्वर्गतिम् प्रार्थयन्ते,	they pray for access to heaven,
पुण्यम् सुरेन्द्र-लोकम् आसाद्य	[after] attaining the pious planet of Indra
दिवि	in heaven
ते दिव्यान् देव-भोगान् अश्नन्ति ।	they enjoy celestial pleasures of the *devas*

"Those who study the Vedas and drink the soma juice, seeking the heavenly planets, worship Me indirectly. Purified of sinful reactions, they take birth on the pious, heavenly planet of Indra, where they enjoy godly delights."

त्रैविद्याः **who know the three *Vedas*** ⟨1.3⟩ m. *traividya*...तिस्रः विद्याः यस्य, सः त्रैविद्यः – who knows the three sciences (*Vedas*)

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

सोम-पाः **who drink *soma*** ⟨1.3⟩ m. *soma-pa*...यः सोमम् पिबति, सः सोम-पः – who drinks *soma*

सोम – extract, juice, (esp.) the juice of the Soma plant, which was collected by moon light, pressed, purified, prepared, fermented, offered in *yajña* and partaken by the *brāhmaṇas*; the moon or moon-god, as in *soma-vāra* or 'moon-day' (Monday); (derived:) *saumya* – relating to *soma* or having his nature, i.e. cool and moist (opp. to *āgneya*, hot and dry); 'resembling the moon', gentle, mild

पूत-पापाः **who are purified of sin** ⟨1.3⟩ m. *pūta-pāpa*...पूतम् पापम् यस्य, सः पूत-पापः – whose sin is purified

यज्ञैः **with sacrifices** ⟨3.3⟩ m. *yajña* – sacrifice

इष्ट्वा **[after] worshiping** ⟨*avyaya*⟩ √*yaj[a]*...देवपूजा-सङ्गतिकरण-यजन-दानेषु – to worship; associate; sacrifice; give; + *.[k]tvā*

स्वर्गतिम् **the way to heaven** ⟨2.1⟩ f. *svaḥ-_gati*

प्रार्थयन्ते **they pray** ⟨*acyuta* 1.3⟩ *pra.*√*artha* – to pray

ते **they** ⟨1.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

पुण्यम् **the pious** ⟨2.1⟩ m. *puṇya* – holy, auspicious

आसाद्य **[after] attaining** ⟨*avyaya*⟩ *ā.*√*sad[!]* – to settle down, attain; + *.ya[p]*

सुरेन्द्र-लोकम् **the planet of Indra** ⟨2.1⟩ m. *sura-_indra-loka*...सुराणाम् इन्द्रस्य लोकः इति सुरेन्द्र-लोकः – the planet of the king of the the *suras* (*devas*)

अश्नन्ति **they enjoy** ⟨*acyuta* 1.3⟩ √*aś[a]*...भोजने – to eat, enjoy

दिव्यान् **celestial** ⟨2.3⟩ m. *divya* – divine

दिवि **in heaven** ⟨7.1⟩ f. *div* (*dyauḥ*) – the sky, heaven

देव-भोगान् **enjoyments of the *devas*** ⟨2.3⟩ m. *deva-bhoga*...देवानाम् भोगः इति देव-भोगः – enjoyment of the *devas*

Subodhinī: ऋग्-यजुः-साम-लक्षणाः तिस्रः विद्या येषाम् ते त्रि-विद्याः, त्रि-विद्याः एव त्रैविद्याः, स्वार्थे तद्धितः । तिस्रः विद्या अधीयन्ते (जानन्ति) इति वा त्रैविद्याः, वेद-त्रय-उक्त-कर्म-तद्-पराः इति अर्थः । वेद-त्रय-विहितैः यज्ञैः माम् इष्ट्वा, 'मम एव रूपम् देवता-अन्तरम्' इति अ-जानन्तः अपि वस्तुतः इन्द्रादि-रूपेण माम् एव इष्ट्वा (सम्पूज्य), यज्ञ-शेषम् सोमम् पिबन्ति इति सोम-पाः, तेन एव पूत-पापाः (शोधित-कल्मषाः) सन्तः, स्वः-गतिम् (स्वर्गम् प्रति गतिम्) ये प्रार्थयन्ते, ते पुण्य-फल-रूपम् सुर-इन्द्रस्य लोकम् (स्वर्गम्) आसाद्य (प्राप्य), दिवि (स्वर्गे) दिव्यान् (उत्तमान्) देवानाम् भोगान् अश्नन्ति (भुञ्जते) ॥९.२०॥
ततः च – 'ते तम् भुक्त्वा' इति –

9.21

ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।
एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते ॥२१॥

तम् विशालम् स्वर्ग-लोकम् भुक्त्वा	[after] enjoying that vast heaven
पुण्ये क्षीणे	when [their] piety is exhausted
ते मर्त्य-लोकम् विशन्ति,	they enter [this] mortal world,
एवम् त्रयी-धर्मम् अनुप्रपन्नाः	thus following the principles of the *Vedas*
काम-कामाः	those who desire sense gratification
गतागतम् लभन्ते ।	achieve the result of 'going and coming'

"When they have thus enjoyed vast heavenly sense pleasure and the results of their pious activities are exhausted, they return to this mortal planet again. Thus those who seek sense enjoyment by adhering to the principles of the three Vedas achieve only repeated birth and death."

ते **they** ⟨1.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

तम् **that** ⟨2.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

भुक्त्वा **[after] enjoying** ⟨*avyaya*⟩ √*bhuj[a]*...पालन-अभ्यवहारयोः – to govern; enjoy + .*[k]tvā*

स्वर्ग-लोकम् **heaven** ⟨2.1⟩ m. *svarga-loka* – the world of heaven

विशालम् **vast** ⟨2.1⟩ m. *viśāla* – extensive, wide, large; great, important, mighty, eminent; abundant

क्षीणे **when exhausted** ⟨7.1, *sati-saptamī*⟩ m. *kṣīṇa* (from √*kṣi* 1P...क्षये – to decay) – destroyed, lost, diminished, ended

पुण्ये **the piety** ⟨7.1, *sati-saptamī*⟩ n. *puṇya* – holy, auspicious

मर्त्य-लोकम् **the mortal world** ⟨2.1⟩ m. *martya-loka*...मर्त्यानाम् लोकः इति मर्त्य-लोकः – the world of mortals; this earth

विशन्ति **they enter** ⟨*acyuta* 1.3⟩ √*viś[a]*...प्रवेशने – to enter

एवम् **thus** ⟨*avyaya*⟩

त्रयी-धर्मम् **the principles of the *Vedas*** ⟨2.1⟩ m. *trayī-dharma*...त्रय्याः धर्मः इति त्रयी-धर्मः – 'the *dharma* of *trayī* (the three *Vedas*)'

अनुप्रपन्नाः **who followed** ⟨1.3⟩ m. *anuprapanna* (*anu.pra.*√*pad[a]* – to follow; + .*[k]ta*) – followed

गतागतम् **going and coming** ⟨2.1⟩ n. *gata-_āgata*...गतः च आगतः च इति गतागतम्

काम-कामाः **those who desire sense gratification** ⟨1.3⟩ m. *kāma-kāma*...कामानाम् कामः यस्य, सः काम-कामः – whose desire is for sense gratifiaction

लभन्ते **they obtain** ⟨*acyuta* 1.3⟩ √*[ḍu]labh[aṣ]*...प्राप्तौ – to obtain

Subodhinī: ते स्वर्ग-कामाः तम् प्रार्थितम् स्वर्ग-लोकम् विपुलम् तद् सुखम् भुक्त्वा, भोग-प्रापके पुण्ये क्षीणे सति मर्त्य-लोकम् विशन्ति । पुनः अपि एवम् एव वेद-त्रय्या विहितम् धर्मम् अनुसृताः काम-कामाः (भोगान् कामयमानाः) गत-आगतम् (यात-आयातम्) लभन्ते ॥९.२१॥

मद्भक्ताः तु मद्-प्रसादेन कृतार्थाः भवन्ति इति आह – 'अनन्याः' इति –

9.22

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥२२॥

ये अनन्याः जनाः	those unalloyed persons
माम् चिन्तयन्तः पर्युपासते,	who worship Me by meditation on Me,
तेषाम् नित्याभियुक्तानाम्	for them who are always absorbed
योग-क्षेमम् अहम् वहामि ।	I supply their gain and safety

"But those who always worship Me with exclusive devotion, meditating on My transcendental form – to them I carry what they lack, and I preserve what they have."

अनन्याः **unalloyed** ⟨1.3⟩ m. *an-anya* – 'no other'

चिन्तयन्तः **by meditating** ⟨1.3⟩ m. *cintayat* (√*cit[i]*...चिन्त्याम् – to think, remember; + .*[ś]at[r]*) – [while] thinking

The *[ś]at[r] pratyaya* also indicates cause – 'by thinking'.

माम् **on Me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

ये **those who** ⟨1.3⟩ m. *kṛṣṇanāma yad* – (relative) who, which

जनाः **persons** ⟨1.3⟩ m. *jana* – man, person

पर्युपासते **they worship** ⟨*acyuta* 1.3⟩ *pari.upa.*√*ās[a]* – to worship

तेषाम् **for them** ⟨6.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

नित्याभियुक्तानाम् **who are always absorbed** ⟨6.3⟩ m. *nitya-_abhiyukta* – always absorbed

अभियुक्त – applied, intent on; diligent, versed in

योग-क्षेमम् **gain and safety** ⟨2.1⟩ n. *yoga-kṣema*...योगः च क्षेमः च इति योग-क्षेमम्

वहामि **I carry** ⟨*acyuta* 3.1⟩ √*vah[a]*...प्रापणे – to reach, carry, flow

अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

Subodhinī: अनन्याः न अस्ति मद्-व्यतिरेकेण अन्यत् काम्यम् भजनीयम् देवता-अन्तरम् येषाम्, तथा-भूताः ये जनाः माम् चिन्तयन्तः सेवन्ते, तेषाम् नित्य-अभियुक्तानाम् सर्वदा मद्-एक-निष्ठानाम् योगम् (धनादि-लाभम्) क्षेमम् च (तत् पालनम्) मोक्ष-आख्यम् च, तैः अ-प्रार्थितम् अपि अहम् एव वहामि (प्रापयामि) ॥९.२२॥

ननु च तद्-व्यतिरेकेण वस्तुतः देवता-अन्तरस्य अ-भावात् इन्द्रादि-सेविनः अपि त्वद्-भक्ताः एव ! इति कथम् ते गत-आगतम् लभेरन् ? तत्र आह – 'ये अपि' इति –

9.23

ये ऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः ।
ते ऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥२३॥

हे कौन्तेय !	O Arjuna!
ये अन्य-देवता-भक्ताः अपि	even those devotees of other *devatās*
श्रद्धया अन्विताः यजन्ते	who worship [them] endowed with faith,
ते अपि	even they
माम् एव अ-विधि-पूर्वकम् यजन्ति ।	worship Me alone, [though] irregularly

"Those who are devotees of other gods and who worship them with faith actually worship only Me, O son of Kuntī, but they do so in a wrong way."

ये **those who** ⟨1.3⟩ m. *kṛṣṇanāma yad* – (relative) who, which

अपि **also** ⟨*avyaya*⟩

अन्य-देवता-भक्ताः **devotees of other** *devatās* ⟨1.3⟩ m. *anya-devatā-bhakta*...अन्यासाम् देवतानाम् भक्तः इति अन्य-देवता-भक्तः – a devotee of other *devatās*

यजन्ते **they worship** ⟨*acyuta* 1.3⟩ √*yaj[a]*...देवपूजा-सङ्गतिकरण-यजन-दानेषु – to worship; associate; sacrifice; give

श्रद्धया **with faith** ⟨3.1⟩ f. *śraddhā* – faith, trust

अन्विताः **who are endowed** ⟨1.3⟩ m. *anvita* (*anu.*√*i[ṇ]* – to go along; + *.[k]ta*) – endowed with

ते **they** ⟨1.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

अपि **also** ⟨*avyaya*⟩

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

एव **certainly** ⟨*avyaya*⟩

कौन्तेय **O Arjuna!** ⟨8.1⟩ m. *kaunteya* – 'son of Kuntī'

यजन्ति **they worship** ⟨*acyuta* 1.3⟩ √*yaj[a]*...देवपूजा-सङ्गतिकरण-यजन-दानेषु – to worship; associate; sacrifice; give

अ-विधि-पूर्वकम् **not according to rule** ⟨*avyaya*⟩

विधि – a rule, formula, precept, law, direction; any prescribed act; use, application; method, may of acting, mode of life, conduct; any act, performance; the creator, name of Brahmā; (as in:) *vidhi-hīna* – destitute of rule, irregular; *vaidha* – enjoined by rule or precept, prescribed (as in *vaidhi-bhakti*)

पूर्वक – previous; *pūrvakam* – with, according to

Subodhinī: श्रद्धया उपेताः भक्ताः सन्तः, ये अपि जनाः यज्ञेन अन्य-देवताः (इन्द्रादि-रूपाः) यजन्ते, ते अपि माम् एव यजन्ति इति सत्यम्, किन्तु अ-विधि-पूर्वकम् (मोक्ष-प्रापकम् विधिम् विना) यजन्ति, अतः ते पुनः आवर्तन्ते ॥९.२३॥

एतद् एव विवृणोति – 'अहम्' इति –

9.24

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥२४॥

सर्व-यज्ञानाम्	of all sacrifices
अहम् हि भोक्ता च प्रभुः एव च,	I alone am the enjoyer and master,
ते तु माम् तत्त्वेन न अभिजानन्ति,	but they do not understand Me in truth,
अतः च्यवन्ति ।	therefore they fall down

"I am the only enjoyer and master of all sacrifices. Therefore, tho,e who do not recognize My true transcendental nature fall down."

अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

हि **indeed** ⟨*avyaya*⟩

सर्व-यज्ञानाम् **of all sacrifices** ⟨6.3⟩ m. *sarva-yajña*...सर्वः यज्ञः इति सर्व-यज्ञः – all or every sacrifice

भोक्ता **the enjoyer** ⟨1.1⟩ m. *bhoktṛ* (*.tṛ[n]*, *bhoktā*) – enjoyer

च **and** ⟨*avyaya*⟩

प्रभुः **master** ⟨1.1⟩ m. *prabhu* – master, lord

एव च **and certainly** ⟨*avyaya*⟩

न **not** ⟨*avyaya*⟩

तु **but** ⟨*avyaya*⟩

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

अभिजानन्ति **they understand** ⟨*acyuta* 1.3⟩ *abhi.*√*jñā* – to understand

तत्त्वेन **in truth** ⟨3.1⟩ n. *tattva* (*.tva*) – truth

अतः **therefore** ⟨*avyaya*⟩ (*atas*; from *idam* + *.tas[i]*) – 'from this', (time:) from now; (cause:) therefore

च्यवन्ति **they fall** ⟨*acyuta* 1.3⟩ √*cyu[ṅ]*...गतौ – to go, fall

ते **they** ⟨1.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

Subodhinī: सर्वेषाम् यज्ञानाम् तद् तद् देवता-रूपेण अहम् एव भोक्ताः प्रभुः च (स्वामी फल-दाता अपि च) अहम् एव इति अर्थः । एवम्-भूतम् माम् ते तत्त्वेन (यथावत्) न अभिजानन्ति, अतः च्यवन्ति (प्रच्यवन्ते) पुनः आवर्तन्ते । ये तु सर्व-देवतासु माम् एव अन्तर्यामिणम् पश्यन्तः यजन्ति, ते तु न अवर्तन्ते ॥९.२४॥

तद् एव उपपादयति – 'यान्ति' इति –

9.25

यान्ति देवव्रता देवान्पितॄन्यान्ति पितृव्रताः ।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥२५॥

देव-व्रताः देवान् यान्ति,	worshipers of the *devas* go to the *devas*,
पितृ-व्रताः पितॄन् यान्ति,	worshipers of the *pitṛs* go to the *pitṛs*,
भूतेज्याः भूतानि यान्ति,	worshipers of the *bhūtas* go to the *bhūtas*,
मद्याजिनः माम् अपि यान्ति ।	so My worshipers also go to Me

"Those who worship the demigods will take birth among the demigods; those who worship the ancestors go to the ancestors; those who worship ghosts and spirits will take birth among such beings; and those who worship Me will live with Me."

यान्ति **they go** ⟨*acyuta* 1.3⟩ √*yā*...प्राप्तौ – to attain, go

देव-व्रताः **worshipers of the** ***devas*** ⟨1.3⟩ m. *deva-vrata*...देवेषु व्रतम् यस्य, सः देव-व्रतः – whose vow is to the *devas*

देवान् **to the** ***devas*** ⟨2.3⟩ m. *deva* – divine being

पितॄन् **to the *pitṛs*** ⟨2.3⟩ m. *pitṛ (pitā)* – father, ancestor

यान्ति **they go** ⟨*acyuta* 1.3⟩ √*yā*...प्राप्तौ – to attain, go

पितृ-व्रताः **worshipers of the *pitṛs*** ⟨1.3⟩ m. *pitṛ-vrata*...पितृषु व्रतम् यस्य, सः पितृ-व्रतः – whose vow is to the *pitṛs*

भूतानि **to the *bhūtas*** ⟨2.3⟩ n. *bhūta* (√*bhū*...सत्तायाम् – to be, exist, become; + *.[k]ta*) – past; an element, being, creature

यान्ति **they go** ⟨*acyuta* 1.3⟩ √*yā*...प्राप्तौ – to attain, go

भूतेज्याः **worshipers of the *bhūtas*** ⟨1.3⟩ m. *bhūta-_ijya*...भूतेषु इज्या यस्य, सः भूतेज्यः – whose worship is to the *bhūtas*

यान्ति **they go** ⟨*acyuta* 1.3⟩ √*yā*...प्राप्तौ – to attain, go

मद्याजिनः **my worshipers** ⟨1.3⟩ m. *mad-yājin (-yājī)*...माम् यजते इति मद्याजी – who worships me

अपि **also** ⟨*avyaya*⟩

माम् **to me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

Subodhinī: देवेषु इन्द्रादिषु व्रतम् (नियमः) येषाम्, ते अन्तवतः देवान् यान्ति, अतः पुनः आवर्तन्ते । पितृषु व्रतम् येषाम् श्राद्धादि-क्रिया-पराणाम्, ते पितॄन् यान्ति । भूतेषु विनायक-मातृकादिषु इज्या (पूजा) येषाम्, ते भूतानि यान्ति । माम् यष्टुम् शीलम् येषाम् ते मद्-याजिनः, ते तु माम् एव अ-क्षयम् परमानन्द-रूपम् नारायणम् यान्ति ॥९.२५॥

तद् एवम् स्व-भक्तानाम् अक्षय-फलत्वम् उक्तम् । अनायासत्वम् स्व-भक्तेः दर्शयति – 'पत्रम्' इति –

9.26

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥२६॥

पत्रम् पुष्पम् फलम् तोयम्	[just] a leaf, flower, fruit or water
यः मे (मह्यम्) भक्त्या प्रयच्छति,	one who gives Me with devotion,
प्रयतात्मनः तद् भक्त्युपहृतम्	that devout offering of a pure soul
अहम् अश्नामि ।	I enjoy

"If one offers Me with love and devotion a leaf, a flower, fruit or water, I will accept it."

पत्रम् **a leaf** ⟨2.1⟩ n. *patra*

पुष्पम् **a flower** ⟨2.1⟩ n. *puṣpa*

फलम् **a fruit** ⟨2.1⟩ n. *phala*

तोयम् **water** ⟨2.1⟩ n. *toya*

यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

मे **to me** ⟨opt. for *mahyam* 4.1⟩ *kṛṣṇanāma asmad* – (last person) I

भक्त्या **with devotion** ⟨3.1⟩ f. *bhakti*

प्रयच्छति **he gives** ⟨*acyuta* 1.1⟩ *pra.*√*dā[ṇ]*...दाने – to give

तद् **that** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that

अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

भक्त्युपहृतम् **which is offered with devotion** ⟨2.1⟩ n. *bhakti-_upahṛta*...भक्त्या उपहृतम् इति भक्त्युपहृतम्

उपहृत (*upa.*√*hṛ[ñ]* – to carry near, offer; + *.[k]ta*) – offered

अश्नामि **I enjoy** ⟨*acyuta* 3.1⟩ √*aś[a]*...भोजने – to eat, enjoy

प्रयतात्मनः **of one whose mind is purified** ⟨6.1⟩ m. *prayata-_ātman (-ātmā)*...प्रयतः आत्मा यस्य, सः प्रयतात्मा – whose mind is purified

प्रयत (*pra.*√*yam[a]* – to restrain, purify; + *.[k]ta*) – restrained, purified

Subodhinī: पत्र-पुष्पादि-मात्रम् अपि मह्यम् भक्त्या (प्रीत्या) यः प्रयच्छति, तस्य प्रयतात्मनः (शुद्ध-चित्तस्य) निष्काम-भक्तस्य तद् पत्र-पुष्पादिकम् तेन भक्त्या उपहृतम् (समर्पितम्) अहम् अश्नामि (प्रीत्या गृह्णामि) । नहि महा-विभूति-पतेः परमेश्वरस्य मम क्षुद्र-देवतानाम् इव बहु-वित्त-साध्य-यागादिभिः परितोषः स्यात्, किन्तु भक्ति-मात्रेण । अतः भक्तेन समर्पितम् यद् किञ्चिद् पत्रादि-मात्रम् अपि तद्-अनुग्रहार्थम् एव अश्नामि इति भावः ॥९.२६॥

नच पत्र-पुष्पादिकम् अपि, यज्ञार्थम् पशु-सोमादि-द्रव्यवत्, मदर्थम् एव उद्यमैः आपाद्य समर्पणीयम्, किम् तर्हि – 'यद् करोषि' इति –

9.27

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥२७॥

हे कौन्तेय !	O Arjuna!
यद् करोषि, यद् अश्नासि,	whatever you do, or eat,
यद् जुहोषि, यद् ददासि,	whatever you sacrifice, or donate,
यद् तपस्यसि,	whatever austerity you perform,
तद् मदर्पणम् कुरुष्व !	[all] that make an offering to Me!

"Whatever you do, whatever you eat, whatever you offer or give away, and whatever austerities you perform – do that, O son of Kuntī, as an offering to Me."

यद् **that which** ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which

करोषि **you do** ⟨*acyuta* 2.1⟩ √*[ḍu]kṛ[ñ]*...करणे – to do

यद् **that which** ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which

अश्नासि **you eat** ⟨*acyuta* 2.1⟩ √*aś[a]*...भोजने – to eat, enjoy

यद् **that which** ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which

जुहोषि **you sacrifice** ⟨*acyuta* 2.1⟩ √*hu*...वह्नौ दाने – to offer in the fire, sacrifice

ददासि **you give** ⟨*acyuta* 2.1⟩ √*[ḍu]dā[ñ]*...दाने – to give

यद् **that which** ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which

यद् **that which** ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which

तपस्यसि **you undergo austerity** ⟨*acyuta* 2.1⟩ √*tapasya* (from *tapas*) – to undergo austerity

कौन्तेय **O Arjuna!** ⟨8.1⟩ m. *kaunteya* – 'son of Kuntī'

तद् **that** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that

कुरुष्व **you must do** ⟨*vidhātā* 2.1⟩ √*[ḍu]kṛ[ñ]*...करणे – to do

मदर्पणम् **an offering to me** ⟨2.1⟩ n. *mad-arpaṇa*...मयि अर्पणम् इति मदर्पणम्

Subodhinī: स्व-भावतः वा शास्त्रतः वा यद् किञ्चिद् कर्म करोषि, तथा यद् अश्नासि, यद् जुहोषि, यद् ददासि, यद् तपस्यसि (तपः करोषि), तद् सर्वम् मयि अर्पितम् यथा भवति एवम् कुरुष्व ॥९.२७॥

एवम् च यद् फलम् प्राप्स्यसि, तद् शृणु – 'शुभ-अशुभ' इति –

9.28

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।
सन्न्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥२८॥

एवम्	thus
शुभाशुभ-फलैः कर्म-बन्धनैः	from the bonds of *karma* with its good and bad results
मोक्ष्यसे,	you will be freed,
सन्न्यास-योग-युक्तात्मा विमुक्तः	endowed with renunciation and liberated
माम् उपैष्यसि ।	you will attain Me

"In this way you will be freed from bondage to work and its auspicious and inauspicious results. With your mind fixed on Me in this principle of renunciation, you will be liberated and come to Me."

शुभाशुभ-फलैः **from good and bad results** ⟨3.3⟩ n. *śubha-_a-śubha-phala*...शुभम् च अ-शुभम् च फले यस्य, तद् शुभाशुभ-फलम् – whose fruits are auspicious and inauspicious

एवम् **thus** ⟨*avyaya*⟩

मोक्ष्यसे **you will be released** ⟨*kalki* pass. 2.1⟩ √*muc[l]*...मोक्षणे – to release

कर्म-बन्धनैः **from the bonds of** ***karma*** ⟨3.3⟩ n. *karma-bandhana*...कर्मणाम् बन्धनः इति कर्म-बन्धनः – bondage of works

सन्न्यास-योग-युक्तात्मा **whose mind is endowed with the** ***yoga*** **of renunciation** ⟨1.1⟩ m. *sannyāsa-yoga-yukta-_ātman (-ātmā)*...सन्न्यासस्य योगेन युक्तः आत्मा यस्य, सः सन्न्यास-योग-युक्तात्मा

विमुक्तः **who is liberated** ⟨1.1⟩ m. *vimukta* (*vi.*√*muc[l]* – to release; + *.[k]ta*) – released

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

उपैष्यसि **you will attain** ⟨*kalki* 2.1⟩ *upa.*√*i[ṇ]* – to go near, attain

Subodhinī: एवम् कुर्वन्, कर्म-बन्धनैः (कर्म-निमित्तैः) इष्ट-अनिष्टैः फलैः मुक्तः भविष्यसि । कर्मणाम् मयि समर्पितत्वेन तव तद्-फल-सम्बन्ध-अनुपपत्तेः । तैः च विमुक्तः सन्, सन्न्यास-योग-युक्तात्मा, सन्न्यासः (कर्मणाम् मद्-अर्पणम्) सः एव योगः, तेन युक्तः आत्मा (चित्तम्) यस्य, तथा-भूतः त्वम् माम् प्राप्स्यसि ॥९.२८॥

यदि भक्तेभ्यः एव मोक्षम् ददासि न अ-भक्तेभ्यः, तर्हि तव अपि किम् राग-द्वेषादि-कृतम् वैषम्यम् अस्ति ? न ! इति आह – 'समः' इति –

9.29

समो ऽहं सर्वभूतेषु न मे द्वेष्यो ऽस्ति न प्रियः ।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥२९॥

अहम् सर्व-भूतेषु समः,	I am equal to all beings,
मे (मम) न द्वेष्यः न प्रियः अस्ति,	no one is My enemy, no one friend,
ये तु माम् भक्त्या भजन्ति	but those who worship Me with devotion
ते मयि,	they are in Me,
अहम् अपि च तेषु ।	and I am also in them

"I envy no one, nor am I partial to anyone. I am equal to all. But whoever renders service unto Me in devotion is a friend, is in Me, and I am also a friend to him."

समः **equal** ⟨1.1⟩ m. *sama* – same

अहम् **I am** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

सर्व-भूतेषु **to all beings** ⟨7.3⟩ m. *sarva-bhūta* – all beings

न **not** ⟨*avyaya*⟩

मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I

द्वेष्यः **enemy** ⟨1.1⟩ m. *dveṣya* (*dviṣ[a]*...अप्रीतौ – to hate; + *.ya*) – 'to be hated'

अस्ति **there is** ⟨*acyuta* 1.1⟩ √*as[a]*...भुवि – to be, exist

न **not** ⟨*avyaya*⟩

प्रियः **friend** ⟨1.1⟩ m. *priya* – dear

ये **those who** ⟨1.3⟩ m. *kṛṣṇanāma yad* – (relative) who, which

भजन्ति **they worship** ⟨*acyuta* 1.3⟩ √*bhaj[a]* 1U...सेवायाम् – to serve, worship

तु **but** ⟨*avyaya*⟩

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

भक्त्या **with devotion** ⟨3.1⟩ f. *bhakti* – devotion

मयि **in me** ⟨7.1⟩ *kṛṣṇanāma asmad* – (last person) I

ते **they** ⟨1.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

तेषु **in them** ⟨7.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

च **and** ⟨*avyaya*⟩

अपि **also** ⟨*avyaya*⟩

अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

Subodhinī: समः अहम् सर्वेषु अपि भूतेषु, अतः मे (मम) प्रियः च द्वेष्यः च न अस्ति एव । एवम् सति अपि, ये माम् भजन्ति, ते भक्ताः मयि वर्तन्ते । अहम् अपि तेषु अनुग्राहकतया वर्ते । अयम् भावः – यथा अग्नेः स्व-सेवकेषु एव तमः-शीतादि-दुःखम् अपाकुर्वतः अपि न वैषम्यम्, यथा वा कल्प-वृक्षस्य, तथैव भक्त-पक्षपातिनः अपि मम वैषम्यम् न अस्ति एव, किन्तु मद्-भक्तेः एव अयम् महिमा इति ॥९.२९॥

अपि च मद्-भक्तेः अ-वितर्क्यः प्रभावः इति दर्शयन् आह – 'अपि चेद्' इति –

9.30

अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥३०॥

सुदुराचारः अपि	even a very bad person
माम् अनन्य-भाक् भजते चेद्,	if he worships Me exclusively,
सः साधुः एव मन्तव्यः,	he is to be considered saintly,
सः हि सम्यक् व्यवसितः ।	[because] he has rightly resolved

"Even if one commits the most abominable action, if he is engaged in devotional service he is to be considered saintly because he is properly situated in his determination."

अपि **also** ⟨*avyaya*⟩

चेद् **if** ⟨*avyaya*⟩

सुदुराचारः **who has very bad behavior** ⟨1.1⟩ m. *sudurācāra* (*su.dur.ā.√car[a]* – to behave very badly) – very bad behavior

भजते **he worships** ⟨*acyuta* 1.1⟩ *√bhaj[a]* 1U...सेवायाम् – to serve, worship

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

अनन्य-भाक् **who is devoted to no other** ⟨1.1⟩ m. *an-anya-bhāj*...न अन्यम् भजति इति अनन्य-भाक्
भाज् (*bhāk*) – devoted to

साधुः **saintly** ⟨1.1⟩ m. *sādhu* – good, virtuous, righteous, saintly; a saint, sage

एव **certainly** ⟨*avyaya*⟩

सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

मन्तव्यः **to be considered** ⟨1.1⟩ m. *mantavya* (*√man[a]* 4A...बोधने – to know, think; + *.tavya*) – to be thought

सम्यक् **properly** ⟨*avyaya*⟩ completely, properly

व्यवसितः **resolved** ⟨1.1⟩ m. *vyavasita* (*vi.ava.√so* – to settle down, resolve; + *.[k]ta*)

हि **indeed** ⟨*avyaya*⟩

सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

Subodhinī: अत्यन्तम् दुराचारः अपि नरः, यदि पृथक्त्वेन देवता-अन्तर-भक्तिम् अ-कुर्वन्, माम् एव परमेश्वरम् श्री-नारायणम् भजते, तर्हि साधुः (श्रेष्ठः) एव सः मन्तव्यः । यतः असौ सम्यक् व्यवसितः – 'परमेश्वर-भजनेन एव कृतार्थः भविष्यामि' इति शोभनम् अध्यवसायम् कृतवान् ॥९.३०॥

ननु कथम् समीचीन-अध्यवसाय-मात्रेण 'साधुः' मन्तव्यः ? तत्र आह – 'क्षिप्रम्' इति –

9.31

क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥३१॥

क्षिप्रम् धर्मात्मा भवति,	he soon becomes righteous,
शश्वच्छान्तिम् निगच्छति,	he attains lasting peace,
हे कौन्तेय !	O Arjuna!
मे (मम) भक्तः न प्रणश्यति	'My devotee never perishes'
प्रतिजानीहि !	[thus] proclaim!

"He quickly becomes righteous and attains lasting peace. O son of Kuntī, declare it boldly that My devotee never perishes."

क्षिप्रम् **quickly** ⟨*avyaya*⟩ from *√kṣip[a]*...प्रेरणे – to send, throw

भवति **he becomes** ⟨*acyuta* 1.1⟩ *√bhū*...सत्तायाम् – to be, exist, become

धर्मात्मा **righteous** ⟨1.1⟩ m. *dharma-_ātman* (*-ātmā*) – religious

शश्वच्छान्तिम् **lasting peace** ⟨2.1⟩ f. *śaśvat-_śānti*

निगच्छति **he attains** ⟨*acyuta* 1.1⟩ *ni.√gam[l]* – to go down, attain

कौन्तेय **O Arjuna!** ⟨8.1⟩ m. *kaunteya* – 'son of Kuntī'

प्रतिजानीहि **you must promise** ⟨*vidhātā* 2.1⟩ *prati.√jñā* – to promise

न **not** ⟨*avyaya*⟩

मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I

भक्तः **devotee** ⟨1.1⟩ m. *bhakta*

प्रणश्यति **he perishes** ⟨*acyuta* 1.1⟩ *pra.√naś[a]* – to perish

Subodhinī: सुदुराचारः अपि माम् भजन् शीघ्रम् धर्म-चित्तः भवति । ततः च शश्वत्-शान्तिम् (शाश्वतीम् उपशान्तिम्) चित्त-उपप्लव-उपरम-रूपाम् परमेश्वर-निष्ठाम् नितराम्

गच्छति (प्राप्नोति) । 'कुतर्क-कर्कश-वादिनः न एतद् मन्येरन् ?' इति शङ्का-
व्याकुल-चित्तम् अर्जुनम् प्रोत्साहयति, हे कौन्तेय ! पटह-काहलादि-महा-घोष-
पूर्वकम् विवदमानानाम् सभाम् गत्वा, बाहुम् उत्क्षिप्य, निःशङ्कम् प्रतिजानीहि
(प्रतिज्ञाम् कुरु) । कथम् ? 'मे (परमेश्वरस्य) भक्तः सुदुराचारः अपि न
प्रणश्यति, अपितु कृतार्थः एव भवति !' इति । ततः च ते, तद्-प्रौढि-विजृम्भ-
विध्वंसित-कुतर्काः निःसंशयम् त्वाम् एव गुरुत्वेन आश्रयेरन् ॥९.३१॥
'आचार-भ्रष्टम् मद्-भक्तिः पवित्री-करोति' इति किम् अत्र चित्रम् ? यतः मद्-
भक्तिः दुष्कुलान् अपि अनधिकारिणः अपि संसारात् मोचयति ! इति आह –
'माम् हि' इति –

9.32

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥३२॥

हे पार्थ !	O Arjuna!
ये अपि पाप-योनयः स्युः	even those who may be lowborn
स्त्रियः वैश्याः तथा शूद्राः	and women, *vaiśyas* and *śūdras*
माम् हि व्यपाश्रित्य,	[after] taking shelter of Me,
ते अपि पराम् गतिम् यान्ति ।	they also attain the supreme destination

"O son of Pṛthā, those who take shelter in Me, though they be of lower birth – women, vaiśyas (merchants) and śūdras (workers) – can attain the supreme destination."

माम् — **of me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
हि — **indeed** ⟨*avyaya*⟩
पार्थ — **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
व्यपाश्रित्य — **[after] taking shelter** ⟨*avyaya*⟩ *vi.apa.ā.√śri[ñ]* – to take shelter; + *.ya[p]*
ये — **those who** ⟨1.3⟩ m. *kṛṣṇanāma yad* – (relative) who, which
अपि — **also** ⟨*avyaya*⟩
स्युः — **they may be** ⟨*vidhi* 1.3⟩ *√as[a]*...भुवि – to be, exist
पाप-योनयः — **who are of sinful birth** ⟨1.3⟩ m. *pāpa-yoni*...पापा योनिः यस्य, सः पाप-योनिः – whose birth is sinful or low
स्त्रियः — **women** ⟨1.3⟩ f. *strī* – a woman, female
वैश्याः — ***vaiśyas*** ⟨1.3⟩ m. *vaiśya*
वैश्य (from *√viś[a]*...प्रवेशने – to enter, settle down) – 'a man who settles on the soil', a working man, agriculturist, man of the third class whose duty is agriculture and trade
तथा — **so** ⟨*avyaya*⟩
शूद्राः — ***śūdras*** ⟨1.3⟩ m. *śūdra*

शूद्र (of doubtful derivation) – a worker, a member of the fourth class (but above the outcastes)
ते — **they** ⟨1.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that
अपि — **also** ⟨*avyaya*⟩
यान्ति — **they attain** ⟨*acyuta* 1.3⟩ *√yā*...प्राप्तौ – to attain, go
पराम् — **the supreme** ⟨2.1⟩ f. *parā* (*.ā[p]*) – beyond
गतिम् — **destination** ⟨2.1⟩ f. *gati* – movement, goal

Subodhinī: ये अपि पाप-योनयः स्युः, निकृष्ट-जन्मानः अन्त्यज-आदयः भवेयुः, ये अपि वैश्याः केवलम् कृष्यादि-निरताः, स्त्रियः, शूद्रादयः च अध्ययनादि-रहिताः, ते अपि माम् व्यपाश्रित्य (संसेव्य), पराम् गतिम् यान्ति, हि निश्चितम् ॥९.३२॥
यद् एवम्, तदा सत्-कुलाः सत्-आचाराः च मद्-भक्ताः पराम् गतिम् यान्ति इति किम् वक्तव्यम् ! इति आह – 'किम् पुनः' इति –

9.33

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥३३॥

किम् पुनः पुण्याः ब्राह्मणाः	then what [to speak of] pious *brāhmaṇas*
भक्ताः तथा राजर्षयः,	devotees and saintly kings,
इमम् अ-नित्यम् अ-सुखम् लोकम्	[therefore,] this temporary and miserable world
प्राप्य	[after] attaining
माम् भजस्व !	worship Me!

"How much more this is so of the righteous brāhmaṇas, the devotees and the saintly kings. Therefore, having come to this temporary, miserable world, engage in loving service unto Me."

किम् — **what** ⟨*avyaya*⟩
पुनः — **again** ⟨*avyaya*⟩ (*punar*)
ब्राह्मणाः — ***brāhmaṇas*** ⟨1.3⟩ m. *brāhmaṇa* – 'related to *brahma*'; or ब्रह्म जानाति इति ब्राह्मणः 'who knows *brahma* (the self)'
पुण्याः — **pious** ⟨1.3⟩ m. *puṇya* – holy, auspicious
भक्ताः — **devotees** ⟨1.3⟩ m. *bhakta* – devoted, devotee
(or:) *bhaktāḥ rājarṣayaḥ* – devoted *rājarṣis*
राजर्षयः — **saintly kings** ⟨1.3⟩ m. *rāja-_ṛṣi* – sage among kings
तथा — **so** ⟨*avyaya*⟩
अ-नित्यम् — **impermanent** ⟨2.1⟩ m. *a-nitya*
अ-सुखम् — **miserable** ⟨2.1⟩ m. *a-sukha* – unhappy
लोकम् — **world** ⟨2.1⟩ m. *loka* – place, world, people

इमम् **this** ⟨2.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
प्राप्य **[after] attaining** ⟨*avyaya*⟩ *pra.√āp[l̥] –* to obtain; + *.ya[p]*
भजस्व **you must worship** ⟨*vidhātā* 2.1⟩ *√bhaj[a]* 1U...सेवायाम् – to serve, worship
माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

Subodhinī: पुण्याः (सुकृतिनः) ब्राह्मणाः, तथा राजानः च ते ऋषयः च क्षत्रियाः, एवम्-भूताः पराम् गतिम् यान्ति इति किम् वक्तव्यम् इति अर्थः । अतः त्वम् इमम् राजर्षि-रूपम् लोकम् (देहम्) प्राप्य लब्ध्वा, माम् भजस्व । किंच, अ-नित्यम् (अ-ध्रुवम्) अ-सुखम् (सुख-रहितम्) च लोकम् (देहम्) प्राप्य, अ-नित्यत्वात् विलम्बम् अ-कुर्वन्, अ-सुखत्वात् च सुखार्थ-उद्यमम् हित्वा, माम् एव भजस्व इति अर्थः ॥९.३३॥
भजन-प्रकारम् दर्शयन् उपसंहरति – 'मन्मनाः' इति –

9.34

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥३४॥

मन्मनाः मद्भक्तः मद्याजी भव !	think of Me, become My devotee and worshiper!
माम् नमस्कुरु !	bow down to Me!
एवम् आत्मानम् युक्त्वा	[after] thus fixing the mind
मत्परायणः	devoted to Me
माम् एव एष्यसि ।	you will surely come to Me

"Engage your mind always in thinking of Me, become My devotee, offer obeisances to Me and worship Me. Being completely absorbed in Me, surely you will come to Me."

मन्मनाः **whose mind is in me** ⟨1.1⟩ m. *mad-_manas (-manaḥ)*...मयि मनः यस्य, सः मन्मनः
भव **you must become** ⟨*vidhātā* 2.1⟩ *√bhū*...सत्तायाम् – to be, exist, become
मद्भक्तः **my devotee** ⟨1.1⟩ m. *mad-bhakta*...मम भक्तः इति मद्भक्तः
मद्याजी **my worshiper** ⟨1.1⟩ m. *mad-yājin (-yājī)*...माम् यजते इति मद्याजी – who worships me
माम् **to me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
नमस्कुरु **you must offer obeisances** ⟨*vidhātā* 2.1⟩ *namas.√[ḍu]kṛ[ñ]* – to offer obeisances
माम् **to me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
एव **certainly** ⟨*avyaya*⟩
एष्यसि **you will go** ⟨*kalki* 2.1⟩ *√i[ṇ]*...गतौ – to go
युक्त्वा **[after] fixing** ⟨*avyaya*⟩ *√yuj[ir]*...योगे – to join, engage, gain; + *.[k]tvā*
एवम् **thus** ⟨*avyaya*⟩

आत्मानम् **the mind** ⟨2.1⟩ m. *ātman (ātmā)* – the self, soul
मत्परायणः **being devoted to Me** ⟨1.1⟩ m. *mad-_parāyaṇa*...अहम् परायणम् यस्य, सः मत्परायणः – 'whose supreme path (shelter) I am'

Subodhinī: मयि एव मनः यस्य सः मद्-मनाः त्वम् भव, तथा मद्-भक्तः (मद्-सेवकः) भव, मद्-याजी (मद्-यजन-शीलः) भव, माम् एव च नमः-कुरु, एवम् (एभिः प्रकारैः) मद्-परायणः सन्, आत्मानम् (मनः) मयि युक्त्वा (समाधाय), माम् एव परमानन्द-रूपम् एष्यसि (प्राप्स्यसि) ॥९.३४॥

ओं तत्सदिति
श्रीमहाभारते शतसाहस्त्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि
श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे राजविद्याराजगुह्ययोगो नाम नवमो ऽध्यायः ॥९॥

अथ दशमो ऽध्यायः

अथ दशमः अध्यायः । now the tenth chapter

Subodhinī: एवम् तावत् सप्तमादिभिः त्रिभिः अध्यायैः भजनीयम् परमेश्वर-रूपम् निरूपितम् । तद्-विभूतयः च सप्तमे 'रसः अहम् अप्सु कौन्तेय' (7.8) इत्यादिना सङ्क्षेपतः दर्शिताः । अष्टमे च 'किम् तद् ब्रह्म किम् अध्यात्मम्' (8.1) इत्यादिना अर्जुनाय सप्त पदार्थाः उपन्यस्ताः, ताः परमेश्वरस्य विभूतयः एव, 'स-अधिभूत-अधिदैवम्' (7.30) इति उक्तत्वात् । नवमे च 'अहम् क्रतुः अहम् यज्ञः' (9.16) इत्यादिना तद्-विभूतयः दर्शिताः । अथ इदानीम् ताः एव विभूतीः प्रपञ्चयिष्यन्, स्व-भक्तेः च अवश्य-करणीयत्वम् वर्णयिष्यन्, [श्री-भगवान् उवाच] – 'भूयः एव' इति –

10.1

श्रीभगवानुवाच

भूय एव महाबाहो शृणु मे परमं वचः ।
यत्ते ऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥१॥

श्री-भगवान् उवाच - हे महा-बाहो !	Śrī Kṛṣṇa said: Ō Arjuna!
भूयः एव	again
मे (मम) परमम् वचः शृणु !	hear My supreme word!
यद् अहम् हित-काम्यया	which I, wishing your welfare
प्रीयमाणाय ते (तुभ्यम्) वक्ष्यामि ।	speak to you, who is taking pleasure

"The Supreme Personality of Godhead said: Listen again, O mighty-armed Arjuna. Because you are My dear friend, for your benefit I shall speak to you further, giving knowledge that is better than what I have already explained."

श्री-भगवान् **Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'
उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
भूयः **again** ⟨*avyaya*⟩
एव **certainly** ⟨*avyaya*⟩
महा-बाहो **O Arjuna!** ⟨8.1⟩ m. *mahā-bāhu* – 'who has mighty arms'
शृणु **you must hear** ⟨*vidhātā* 2.1⟩ √*śru*...श्रवणे – to hear, obey
मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
परमम् **supreme** ⟨2.1⟩ n. *parama* – highest
वचः **word** ⟨2.1⟩ n. *vacas* (*vacaḥ*) – speech
यद् **that which** ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which

ते **to you** ⟨opt. for *tubhyam* 4.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
प्रीयमाणाय **to one who is taking pleasure** ⟨4.1⟩ m. *prīyamāṇa* (√*prī[ṅ]*...प्रीतौ – to please, be satisfied; + .*[ś]āna*) – [while] taking pleasure, loving
वक्ष्यामि **I will speak** ⟨*kalki* 3.1⟩ √*vac[a]*...परिभाषणे – to speak
हित-काम्यया **with the desire for benefit** ⟨3.1⟩ f. *hita-kāmyā*...हितस्य काम्या इति हित-काम्या – the desire for benefit

Subodhinī: महान्तौ युद्धादि-स्वधर्म-अनुष्ठाने, महत्-परिचर्यायाम् वा कुशलौ बाहू यस्य, हे महा-बाहो ! भूयः एव (पुनः अपि) मे वचः शृणु । कथम्-भूतम् ? परमम् (परमार्थ-निष्ठम्), मद्-वचन-अमृतेन एव प्रीतिम् प्राप्नुवते ते (तुभ्यम्) हित-काम्यया (हित-इच्छया) यद् अहम् वक्ष्यामि तद् ॥१०.१॥
उक्तस्य अपि पुनः वचने दुर्ज्ञेयत्वम् हेतुम् आह – 'न मे' इति –

10.2

न मे विदुः सुरगणाः प्रभवं न महर्षयः ।
अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥२॥

न सुर-गणाः न महर्षयः	neither the *devas*, nor the great sages
मे (मम) प्रभवम् विदुः,	know My origin,
देवानाम् महर्षीणाम् च	[because] of the *devas* and great sages
अहम् हि सर्वशः आदिः ।	I am the origin in all respects

"Neither the hosts of demigods nor the great sages know My origin or opulences, for, in every respect, I am the source of the demigods and sages."

न **not** ⟨*avyaya*⟩
मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
विदुः **they know** ⟨*acyuta* 1.3⟩ √*vid[a]* 2P...ज्ञाने – to know
सुर-गणाः **the hosts of devas** ⟨1.3⟩ m. *sura-gaṇa*...सुराणाम् गणः इति सुर-गणः – host of *suras*
प्रभवम् **origin** ⟨2.1⟩ m. *prabhava* – source, origin
न **not** ⟨*avyaya*⟩
महर्षयः **great sages** ⟨1.3⟩ m. *mahā-_ṛṣi* – great sage
अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
हि **indeed** ⟨*avyaya*⟩
आदिः **origin** ⟨1.1⟩ m. *ādi* – beginning
देवानाम् **of devas** ⟨6.3⟩ m. *deva* – divine being
महर्षीणाम् **of great sages** ⟨6.3⟩ m. *mahā-_ṛṣi* – great sage
च **and** ⟨*avyaya*⟩

सर्वशः **completely** ⟨*avyaya*⟩ (*sarvaśas*) – completely, altogether, in every way, on all sides

Subodhinī: मे (मम) प्रकृष्टम् भवम्, जन्म-रहितस्य अपि नाना-विभूतिभिः आविर्भावम्, सुरगणाः अपि महर्षयः (भृगु-आदयः) अपि न जानन्ति । तत्र हेतुः – अहम् हि देवानाम् महर्षीणाम् च आदिः (कारणम्), सर्वशः (सर्व-प्रकारैः) उत्पादकत्वेन बुद्ध्यादि-प्रवर्तकत्वेन च । अतः मद्-अनुग्रहम् विना माम् के अपि न जानन्ति इति अर्थः ॥१०.२॥

एवम्भूत-आत्मज्ञाने फलम् आह – 'यः माम्' इति –

10.3

यो मामजमनादिं च वेत्ति लोकमहेश्वरम् ।
असम्मूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥३॥

यः माम्	one who Me
अ-जम् अनादिम् लोक-महेश्वरम् च	as unborn and beginningless Supreme Lord of the worlds
वेत्ति,	knows,
सः मर्त्येषु अ-सम्मूढः	he, undeluded among men
सर्व-पापैः प्रमुच्यते ।	is freed from all sins

"He who knows Me as the unborn, as the beginningless, as the Supreme Lord of all the worlds – he only, undeluded among men, is freed from all sins."

यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

अ-जम् **as unborn** ⟨2.1⟩ m. *a-ja*

अनादिम् **as beginningless** ⟨2.1⟩ m. *an-ādi*...न आदिः यस्य, सः अनादिः – which has no end

च **and** ⟨*avyaya*⟩

वेत्ति **he knows** ⟨*acyuta* 1.1⟩ √*vid[a]* 2P...ज्ञाने – to know

लोक-महेश्वरम् **the great lord of the worlds** ⟨2.1⟩ m. *loka-mahā-_īśvara*...लोकानाम् महेश्वरः इति लोक-महेश्वरः

अ-सम्मूढः **not bewildered** ⟨1.1⟩ m. *a-sammūḍha*

सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

मर्त्येषु **among mortals** ⟨7.3⟩ m. *martya* – mortal

सर्व-पापैः **from all sins** ⟨3.3⟩ n. *sarva-pāpa*...सर्वः पापः इति सर्व-पापः – all sin

प्रमुच्यते **he is released** ⟨*acyuta* pass. 1.1⟩ *pra*.√*muc[l]* – to release

Subodhinī: सर्व-कारणत्वात् एव न विद्यते आदिः (कारणम्) यस्य तम् अनादिम् । अतएव अ-जम् (जन्म-शून्यम्) लोकानाम् महेश्वरम् च माम् यः वेत्ति, सः मनुष्येषु अ-सम्मूढः (सम्मोह-रहितः) सन्, सर्व-पापैः प्रमुच्यते ॥१०.३॥

लोक-महेश्वरताम् एव स्फुटयति – 'बुद्धिः' इति त्रिभिः –

10.4...5

बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः शमः ।
सुखं दुःखं भवो ऽभावो भयं चाभयमेव च ॥४॥

बुद्धिः ज्ञानम् अ-सम्मोहः	intelligence, knowledge, non-delusion
क्षमा सत्यम् दमः शमः	tolerance, truthfulness, sense- and mind-control
सुखम् दुःखम् भवः अ-भावः	happiness, distress, existence, non-existence
भयम् च अ-भयम् एव च . . .	fear and also fearlessness . . .

"Intelligence, knowledge, freedom from doubt and delusion, forgiveness, truthfulness, control of the senses, control of the mind, happiness and distress, birth, death, fear, fearlessness . . ."

बुद्धिः **intelligence** ⟨1.1⟩ f. *buddhi*

ज्ञानम् **knowledge** ⟨1.1⟩ n. *jñāna*

अ-सम्मोहः **non-bewilderment** ⟨1.1⟩ m. *a-sammoha*

क्षमा **tolerance** ⟨1.1⟩ f. *kṣamā* (same as *kṣānti*) (from √*kṣam[ū]*...सहने – to tolerate, forgive) – tolerance, forgiveness, patience

सत्यम् **truthfulness** ⟨1.1⟩ n. *satya* – true, real; truth

दमः **sense-control** ⟨1.1⟩ m. *dama* (from √*dam[u]*...उपशमे – to control, tame) – control, (esp.) sense-control; *damana* – taming, subduing (as in *kālīya-damana*)

शमः **mind-control** ⟨1.1⟩ m. *śama* (from √*śam[u]* 4P...उपशमे – to be pacified) – peace, calmness

सुखम् **happiness** ⟨1.1⟩ n. *sukha* – easiness, happiness

दुःखम् **distress** ⟨1.1⟩ n. *duḥkha* – misery

भवः **existence** ⟨1.1⟩ m. *bhava*

अ-भावः **non-existence** ⟨1.1⟩ m. *a-bhāva*

भयम् **fear** ⟨1.1⟩ n. *bhaya*

च **and** ⟨*avyaya*⟩

अ-भयम् **fearlessness** ⟨1.1⟩ n. *a-bhaya*

एव **certainly** ⟨*avyaya*⟩

च **and** ⟨*avyaya*⟩

Subodhinī: बुद्धिः सार-असार-विवेक-नैपुण्यम्, ज्ञानम् आत्म-विषयम्, अ-सम्मोहः व्याकुलत्व-अभावः, क्षमा सहिष्णुत्वम्, सत्यम् यथार्थ-भाषणम्, दमः बाह्य-इन्द्रिय-संयमः, शमः अन्तः-करण-संयमः, सुखम् अनुकूल-संवेदनीयम्, दुःखम्

च तद्-विपरीतम्, भवः उद्भवः अ-भावः तद्-विपरीतः, भयम् त्रासः, अ-भयम् तद्-विपरीतम्, अस्य श्लोकस्य 'मत्तः एव भवन्ति' (10.5) इति उत्तरेण अन्वयः ॥१०.४॥

10.5

अहिंसा समता तुष्टिस्तपो दानं यशो ऽयशः ।
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ॥५॥

. . . अ-हिंसा समता तुष्टिः	. . . non-violence, equality, satisfaction
तपः दानम् यशः अ-यशः	austerity, charity, fame, infamy –
भूतानाम् पृथग्विधाः भावाः	[these] various dispositions of beings
मत्तः एव भवन्ति ।	come from Me alone

". . . non-violence, equanimity, satisfaction, austerity, charity, fame and infamy – all these various qualities of living beings are created by Me alone."

अ-हिंसा **non-violence** ⟨1.1⟩ f. *a-hiṁsā*
समता **equanimity** ⟨1.1⟩ f. *samatā* (*.tā[p]*)
तुष्टिः **satisfaction** ⟨1.1⟩ f. *tuṣṭi*
तपः **austerity** ⟨1.1⟩ n. *tapas* (*tapaḥ*)
दानम् **charity** ⟨1.1⟩ n. *dāna* – donation
यशः **fame** ⟨1.1⟩ n. *yaśas* (*yaśaḥ*)
अ-यशः **infamy** ⟨1.1⟩ n. *a-yaśas* (*-yaśaḥ*)
भवन्ति **they become** ⟨*acyuta* 1.3⟩ √*bhū*...सत्तायाम् – to be, exist, become
भावाः **dispositions** ⟨1.3⟩ m. *bhāva* – state of being: nature, sentiment
भूतानाम् **of beings** ⟨6.3⟩ m. *bhūta* (√*bhū*...सत्तायाम् – to be, exist, become; + *.[k]ta*) – past; an element, being, creature
मत्तः **from me** ⟨*avyaya*⟩ (*mattas*; from *asmad* + *.tas[i]*) – from me, than me
एव **certainly** ⟨*avyaya*⟩
पृथग्विधाः **various kinds** ⟨1.3⟩ m. *pṛthak-_vidha*

Subodhinī: अ-हिंसा पर-पीडा-निवृत्तिः, समता राग-द्वैषादि-राहित्यम् मित्र-अमित्र-तुल्यता च, तुष्टिः दैव-लब्धेन सन्तोषः, तपः शारीरादि वक्ष्यमाणम्, दानम् न्याय-अर्जित-धनादेः सत्-पात्रे अर्पणम्, यशः सत्-कीर्तिः, अ-यशः अपकीर्तिः, एते बुद्धिः ज्ञानम् इत्यादयः तद्-विपरीताः च अ-बुद्ध्यादयः नाना-विधाः भावाः प्राणिनाम् मत्तः सकाशात् एव भवन्ति ॥१०.५॥

10.6

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ।
मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ॥६॥

सप्त महर्षयः, पूर्वे चत्वारः	the seven great sages, the previous four
तथा मनवः	and the Manus
मद्भावाः मानसाः जाताः,	come from Me, born from My mind,
येषाम् लोके इमाः प्रजाः ।	whose progeny are these in the world

"The seven great sages and before them the four other great sages and the Manus (progenitors of mankind) come from Me, born from My mind, and all the living beings populating the various planets descend from them."

महर्षयः **great sages** ⟨1.3⟩ m. *mahā-_ṛṣi* – great sage
The *saptarṣis* (*sapta_ṛṣis*) are different in each *manvantara* (age of Manu).
सप्त **seven** ⟨1.3⟩ m. *sapta*
पूर्वे **the previous ones** ⟨1.3⟩ m. *kṛṣṇanāma pūrva* – previous
चत्वारः **four** ⟨1.3⟩ m. *catus* (*catuḥ*)
मनवः **Manus** ⟨1.3⟩ m. *manu* – Manu
तथा **so** ⟨*avyaya*⟩
मद्भावाः **who are born from me** ⟨1.3⟩ m. *mad-bhāva*...मत्तः जन्म यस्य, सः मद्भावः – whose birth is from me
We follow the explanation of Viśvanātha. Others explain *mad-bhāva* as *mama bhāvaḥ yasmin* – in whom is my *bhāva* (*prabhāva* – power).
मानसाः **from the mind** ⟨1.3⟩ m. *mānasa* – 'related to the mind', mental
जाताः **they are born** ⟨1.3⟩ m. *jāta* (√*jan[ī]*...प्रादुर्भावे – to be born; + *.[k]ta*) – born
येषाम् **whose** ⟨1.3⟩ m. *kṛṣṇanāma yad* – (relative) who, which
लोके **in the world** ⟨7.1⟩ m. *loka* – place, world, people
इमाः **these** ⟨1.3⟩ f. *kṛṣṇanāma idam* – (first person) he, this
प्रजाः **progeny** ⟨1.3⟩ f. *prajā*

Subodhinī: सप्त महर्षयः भृगु-आदयः, 'सप्त ब्रह्माणः इति एते पुराणे निश्चयम् गताः' (*MB. Śānti-parva* 208.5) इत्यादि पुराण-प्रसिद्धाः । तेभ्यः अपि पूर्वे अन्ये चत्वारः महर्षयः सनकादयः, तथा मनवः स्वायम्भुवादयः, मद्भावाः मदीयः भावः (प्रभावः) येषु, ते हिरण्यगर्भ-आत्मनः मम एव मनसः (सङ्कल्प-मात्रात्) जाताः । प्रभावम् एव आह – 'येषाम्' इति । येषाम् (भृगु-आदीनाम् च सनकादीनाम् मनूनाम् च) इमाः ब्राह्मणाद्याः लोके वर्धमानाः यथा-यथम् पुत्र-पौत्रादि-रूपाः शिष्य-प्रशिष्यादि-रूपाः च प्रजाः जाताः (प्रवर्तन्ते) ॥१०.६॥
यथोक्त-विभूत्यादि-तत्त्व-ज्ञानस्य फलम् आह – 'एताम्' इति –

10.7

एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः ।
सो ऽविकल्पेन योगेन युज्यते नात्र संशयः ॥७॥

एताम् मम विभूतिम् योगम् च	this My opulence and power
यः तत्त्वतः वेत्ति,	one who knows in truth,
सः अ-विकल्पेन योगेन युज्यते	he meditates with unalloyed devotion
अत्र न संशयः ।	of this there is no doubt

"One who is factually convinced of this opulence and mystic power of Mine engages in unalloyed devotional service; of this there is no doubt."

एताम् **this** ⟨2.1⟩ f. *kṛṣṇanāma etad* – (first person) he, this
विभूतिम् **opulence** ⟨2.1⟩ f. *vibhūti* – opulence, might
योगम् **power** ⟨2.1⟩ m. *yoga* – mysticism
च **and** ⟨*avyaya*⟩
मम **my** ⟨6.1⟩ *kṛṣṇanāma asmad* – (last person) I
यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
वेत्ति **he knows** ⟨*acyuta* 1.1⟩ √*vid[a]* 2P...ज्ञाने – to know
तत्त्वतः **in truth** ⟨*avyaya*⟩ (*tattvatas*; *tattva* + *.tas[i]*)
सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
अ-विकल्पेन **with unalloyed** ⟨3.1⟩ m. *a-vikalpa* – 'no indecision'
विकल्प (*vi.*√*kḷp[ū]* – to be able) – option, indecision, hesitation, deviation, imagination
योगेन **with devotion** ⟨3.1⟩ m. *yoga* – attention
युज्यते **he meditates** ⟨*acyuta* 1.1⟩ √*yuj[a]* 4A...समाधौ – to meditate
न **not** ⟨*avyaya*⟩
अत्र **here** ⟨*avyaya*⟩
संशयः **doubt** ⟨1.1⟩ m. *saṁśaya* – hesitation, doubt

Subodhinī: एताम् भृग्वादि-लक्षणाम् मम विभूतिम् योगम् च ऐश्वर्य-लक्षणम् तत्त्वतः यः वेत्ति, सः अविकम्पेन (निःसंशयेन) योगेन (सम्यक्-दर्शनेन) युक्तः भवति । न अस्ति अत्र संशयः ॥१०.७॥
यथा च विभूति-योगयोः ज्ञानेन सम्यक्-ज्ञान-अवाप्तिः, तद् दर्शयति – 'अहम्' इत्यादि चतुर्भिः –

10.8

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥८॥

अहम् सर्वस्य प्रभवः,	I am the origin of everything,
मत्तः सर्वम् प्रवर्तते,	everything originates from Me,
इति मत्वा	[after] knowing this
बुधाः भाव-समन्विताः माम् भजन्ते ।	the wise worship Me with love

"I am the source of all spiritual and material worlds. Everything emanates from Me. The wise who perfectly know this engage in My devotional service and worship Me with all their hearts."

अहम् **I am** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
सर्वस्य **of all** ⟨6.1⟩ m. *kṛṣṇanāma sarva* – all
प्रभवः **the origin** ⟨1.1⟩ m. *prabhava* – source, origin
मत्तः **from me** ⟨*avyaya*⟩ (*mattas*; from *asmad* + *.tas[i]*) – from me, than me
सर्वम् **all** ⟨1.1⟩ m. *kṛṣṇanāma sarva*
प्रवर्तते **it originates** ⟨*acyuta* 1.1⟩ *pra.*√*vṛt[u]* – to start to act, originate
इति **thus** ⟨*avyaya*⟩
मत्वा **[after] knowing** ⟨*avyaya*⟩ √*man[a]* 4A...बोधने – to know, think; + *.[k]tvā*
भजन्ते **they worship** ⟨*acyuta* 1.3⟩ √*bhaj[a]* 1U...सेवायाम् – to serve, worship
माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
बुधाः **the wise** ⟨1.3⟩ m. *budha* – a wise
भाव-समन्विताः **with love** ⟨1.3⟩ m. *bhāva-samanvita*...भावेन समन्वितः इति भाव-समन्वितः – endowed with love

Subodhinī: अहम् सर्वस्य जगतः प्रभवः (भृग्वादि-रूप-विभूति-द्वारेण उत्पत्ति-हेतुः) । मत्तः एव च अस्य सर्वस्य 'बुद्धिः ज्ञानम् अ-सम्मोहः' (10.4) इत्यादि सर्वम् प्रवर्तते इति (एवम्) मत्वा (अवबुद्ध्य), बुधाः (विवेकिनः) भाव-समन्विताः (प्रीति-युक्ताः) माम् भजन्ते ॥१०.८॥
प्रीति-पूर्वकम् भजनम् एव आह – 'मद्-चित्ताः' इति –

10.9

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥९॥

मच्चित्ताः मद्गत-प्राणाः	thinking of Me, their lives devoted to Me
परस्परम् बोधयन्तः	enlightening each other

माम् नित्यम् कथयन्तः च	and always discussing Me
तुष्यन्ति च रमन्ति च ।	they are satisfied and enjoy

"The thoughts of My pure devotees dwell in Me, their lives are fully devoted to My service, and they derive great satisfaction and bliss from always enlightening one another and conversing about Me."

मच्चित्ताः **who think of me** ⟨1.3⟩ m. *mad-_citta*...मयि चित्तम् यस्य, सः मच्चित्तः – whose thought is in me

मद्गत-प्राणाः **whose lives are devoted to me** ⟨1.3⟩ m. *mad-gata-prāṇa*...माम् गतः प्राणः यस्य, सः मद्गत-प्राणः – whose life has gone to Me

बोधयन्तः **who are explaining** ⟨1.3⟩ m. *bodhayat* (√*budh[a]*...अवगमने – to understand, know; caus.; .*[ś]at[r]*) – [while] causing to know

परस्परम् **each other** ⟨*avyaya*⟩

कथयन्तः **who are telling** ⟨1.3⟩ m. *kathayat* (√*katha*...वाक्यप्रबन्धे – to tell; + .*[ś]at[r]*) – [while] telling

च **and** ⟨*avyaya*⟩

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

नित्यम् **always** ⟨*avyaya*⟩

तुष्यन्ति **they are satisfied** ⟨*acyuta* 1.3⟩ √*tuṣ[a]*...तुष्टौ – to be satisfied

च **and** ⟨*avyaya*⟩

रमन्ति **they rejoice** ⟨*acyuta* 1.3⟩ √*ram[u]*...क्रीडायाम् – to play, rejoice

च **and** ⟨*avyaya*⟩

Subodhinī: मयि एव चित्तम् येषाम् ते मद्-चित्ताः, माम् एव गताः (प्राप्ताः) प्राणाः (इन्द्रियाणि) येषाम् ते मद्-गत-प्राणाः, मद्-अर्पित-जीवनाः इति वा । एवम्-भूताः ते बुधाः अन्योन्यम् माम् न्याय-उपेतैः श्रुत्यादि-प्रमाणैः बोधयन्तः, बुद्ध्वा च माम् कथयन्तः (सङ्कीर्तयन्तः) सन्तः, नित्यम् तुष्यन्ति (अनुमोदनेन तुष्टिम् यान्ति), रमन्ति च (निर्वृतिम् यान्ति) ॥१०.९॥
एवम्-भूतानाम् च सम्यक्-ज्ञानम् अहम् ददामि इति आह – 'तेषाम्' इति –

10.10

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥१०॥

तेषाम् सतत-युक्तानाम्	to those who are constantly devoted
प्रीति-पूर्वकम् भजताम्	worshiping [Me] with love
तम् बुद्धि-योगम् ददामि,	I give that understanding,
येन ते माम् उपयान्ति ।	by which they attain Me

"To those who are constantly devoted to serving Me with love, I give the understanding by which they can come to Me."

तेषाम् **of those** ⟨6.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

सतत-युक्तानाम् **for those who are constantly devoted** ⟨6.3⟩ m. *satata-yukta* – constantly devoted

भजताम् **for those who are worshiping** ⟨6.3⟩ m. *bhajat* (√*bhaj[a]* 1U...सेवायाम् – to serve, worship; + .*[ś]at[r]*) – [while] worshiping

प्रीति-पूर्वकम् **with love** ⟨*avyaya*⟩

ददामि **I give** ⟨*acyuta* 3.1⟩ √*[ḍu]dā[ñ]*...दाने – to give

बुद्धि-योगम् **the understanding** ⟨2.1⟩ m. *buddhi-yoga*
See note under verse 2.39.

तम् **that** ⟨2.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

येन **by which** ⟨3.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

उपयान्ति **they attain** ⟨*acyuta* 1.3⟩ *upa.*√*yā* – to attain

ते **they** ⟨1.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

Subodhinī: एवम् सतत-युक्तानाम् मयि आसक्त-चित्तानाम् प्रीति-पूर्वकम् भजताम् तेषाम्, बुद्धि-रूपम् योगम् (उपायम्) ददामि । 'तम्' इति कम् ? येन उपायेन ते भक्ताः माम् प्राप्नुवन्ति ॥१०.१०॥
बुद्धि-योगम् दत्त्वा च, तस्य अनुभव-पर्यन्तम् तम् आपाद्य, अविद्या-कृतम् संसारम् नाशयामि इति आह – 'तेषाम्' इति –

10.11

तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥११॥

तेषाम् एव अनुकम्पार्थम्	out of compassion for them
अहम् आत्म-भाव-स्थः	I, situated in their heart
भास्वता ज्ञान-दीपेन	with the shining lamp of knowledge
अज्ञान-जम् तमः नाशयामि ।	destroy the darkness born of ignorance

"To show them special mercy, I, dwelling in their hearts, destroy with the shining lamp of knowledge the darkness born of ignorance."

तेषाम् **for them** ⟨6.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

एव **certainly** ⟨*avyaya*⟩

अनुकम्पार्थम् **for the sake of compassion** ⟨*avyaya*⟩ अनुकम्पायाः अर्थम् इति अनुकम्पार्थम्
अनुकम्पा (from *anu.*√*kap[i]* – to move, shake, feel compassion) – compassion

अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

अज्ञान-जम् which is born from ignorance ⟨2.1⟩ n. *ajñāna-ja*...यद् अ-ज्ञानात् जायते, तद् अज्ञान-जः

तमः **ignorance** ⟨2.1⟩ n. *tamas (tamaḥ)*

नाशयामि **I destroy** ⟨*acyuta* caus. 3.1⟩ √*naś[a]*...अदर्शने – to disappear, perish; (caus.: to cause to perish)

आत्म-भाव-स्थः **who stays in one's heart** ⟨1.1⟩ m. *ātma-bhāva-stha*...यः आत्मनः भावे तिष्ठति, सः आत्म-भाव-स्थः

ज्ञान-दीपेन **with the lamp of knowledge** ⟨3.1⟩ m. *jñāna-dīpa*...ज्ञानस्य दीपः इति ज्ञान-दीपः – lamp of knowledge

भास्वता **with the shining** ⟨3.1⟩ m. *bhāsvat (.vat[u])* – 'having *bhāḥ* (light)', shining

Subodhinī: तेषाम् अनुकम्पार्थम् (अनुग्रहार्थम्) एव अ-ज्ञानात् जातम् तमः 'संसार'-आख्यम् नाशयामि । कुत्र स्थितः सन्, केन वा साधनेन तमः नाशयसि ? इति अतः आह – आत्म-भाव-स्थः (बुद्धि-वृत्तौ स्थितः) सन्, भास्वता (विस्फुरता) ज्ञान-लक्षणेन दीपेन नाशयामि ॥१०.११॥

सङ्क्षेपेण उक्ता विभूतीः विस्तरेण जिज्ञासुः भगवन्तम् स्तुवन् ।अर्जुनः उवाच। – 'परम् ब्रह्म' इति सप्तभिः –

10.12-13

अर्जुन उवाच

परं ब्रह्म परं धाम पवित्रं परमं भवान् ।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥१२॥
आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ।
असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥१३॥

अर्जुनः उवाच -	Arjuna said:
भवान् परम् ब्रह्म	You are the Supreme Lord
परम् धाम, परमम् पवित्रम्,	the supreme abode and the supreme pure,
सर्वे ऋषयः	all the sages
देवर्षिः नारदः	[like] *devarṣi* Nārada
असितः देवलः तथा व्यासः	Asita, Devala and Vyāsa
त्वाम् शाश्वतम् दिव्यम् पुरुषम्	You, the eternal divine person
आदि-देवम् अ-जम् विभुम्	primeval Lord, unborn and all-pervading
आहुः	they call,
स्वयम् च एव मे (मह्यम्) ब्रवीषि ।	and You Yourself are also telling Me

"Arjuna said: You are the Supreme Personality of Godhead, the ultimate abode, the purest, the Absolute Truth. You are the eternal, transcendental, original person, the unborn, the greatest. All the great sages such as Nārada, Asita, Devala and Vyāsa confirm this truth about You, and now You Yourself are declaring it to me."

अर्जुनः **Arjuna** ⟨1.1⟩ m. *arjuna* – white, 'who is pure in actions'

उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak

परम् **supreme** ⟨1.1⟩ n. *para* – beyond

ब्रह्म ***brahma*** ⟨1.1⟩ n. *brahman (brahma)* – spirit, soul

परम् **supreme** ⟨1.1⟩ n. *para* – beyond

धाम **abode** ⟨1.1⟩ n. *dhāman (dhāma)*

पवित्रम् **purifyer** ⟨1.1⟩ n. *pavitra*

परमम् **supreme** ⟨1.1⟩ n. *parama* – highest

भवान् **you** ⟨1.1⟩ m. *bhavat[u]* – you (honorific)

पुरुषम् **person** ⟨2.1⟩ m. *puruṣa*

शाश्वतम् **eternal** ⟨2.1⟩ m. *śāśvata*

दिव्यम् **divine** ⟨2.1⟩ m. *divya*

आदि-देवम् **primeval lord** ⟨2.1⟩ m. *ādi-deva*...देवानाम् आदिः इति आदि-देवः – the first of gods

अ-जम् **unborn** ⟨2.1⟩ m. *a-ja*

विभुम् **all-pervading** ⟨2.1⟩ m. *vibhu*

आहुः **they spoke** ⟨*acyuta* opt. for *bruvanti* with a past sense 1.3⟩ √*brū[ñ]*...व्यक्तायां वाचि – to speak

त्वाम् **you** ⟨2.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

ऋषयः **sages** ⟨1.3⟩ m. *ṛṣi* – sage

सर्वे **all** ⟨1.3⟩ m. *kṛṣṇanāma sarva*

देवर्षिः **the *devarṣi*** ⟨1.1⟩ m. *deva-_ṛṣi* – 'sage among the *devas*'

There are sages among the *brāhmaṇas*, kings and *devas* – called *brahmarṣis* (like Vasiṣṭha), *rājarṣis* (like Parīkṣit) and *devarṣis* (like Nārada).

नारदः **Nārada** ⟨1.1⟩ m. *nārada*

In his previous life Nārada was the son of a maidservant, but by good association with pure devotees he became enlightened in devotional service, and was later born as a son and disciple of Brahmā. He is the principle *devarṣi*, or the chief sage amongst the demigods. He initiated famous kings, such as Prahlāda Mahārāja (while still in the womb of his mother), Dhruva Mahārāja, Yudhiṣṭhira Mahārāja, and even Vyāsadeva, the compiler of all Vedic literature.

तथा so ⟨*avyaya*⟩

असितः **Asita** ⟨1.1⟩ m. *asita*

Asita, Devala, Vaiśampāyana, Sumantu and Jaimini were disciples of Vyāsadeva, and prominent priests at the *sarpa-yajña* of King Janamejaya. Asita explained 1,500,000 verses from the *Mahābhārata*. By the blessing of Lord Śiva he got a son named Devala.

देवलः **Devala** ⟨1.1⟩ m. *devala*

Devala ('Asita Devala'), the son of Asita, also known as Aṣṭāvakra, was also a disciple of Vyāsa. After Vyāsa wrote the *Mahābhārata*, Nārada spread it among the *devas*, Devala among the *pitṛs*, Sukadeva among Gandharvas and Yakṣas, and Vaiśampāyana among men.

व्यासः	**Vyāsa** ⟨1.1⟩ m. *vyāsa*
स्वयम्	**yourself** ⟨*avyaya*⟩
च एव	**and certainly** ⟨*avyaya*⟩
ब्रवीषि	**you speak** ⟨*acyuta* 2.1⟩ √*brū[ñ]*...व्यक्तायां वाचि – to speak
मे	**to me** ⟨opt. for *mahyam* 4.1⟩ *kṛṣṇanāma asmad* – (last person) I

Subodhinī: परम् ब्रह्म च परम् धाम च आश्रयः परमम् च पवित्रम् भवान् एव । कुतः ? इति अतः आह – यतः शाश्वतम् (नित्यम्) पुरुषम् तथा दिव्यम् (द्योतनात्मकम् स्व-प्रकाशम् च), आदिः च असौ देवः च तम्, देवानाम् आदि-भूतम् इति अर्थः । तथा अ-जम् (अ-जन्मानम्) विभुम् च (व्यापकम्) त्वाम् एव आहुः ॥१०.१२॥ के ते ? इति अतः आह – 'आहुः' इति – ऋषयः (भृग्वादयः) सर्वे, देवर्षिः नारदः, असितः च देवलः च व्यासः च स्वयम् (त्वम् एव च साक्षात्) मे (मह्यम्) ब्रवीषि ॥१०.१३॥
अतः मम इदानीम् त्वद्-ऐश्वर्ये अ-सम्भावना निवृत्ता इति आह – 'सर्वम्' इति –

10.14

सर्वमेतदृतं मन्ये यन्मां वदसि केशव ।
न हि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः ॥१४॥

हे केशव !	O Kṛṣṇa!
यद् माम् वदसि	what You tell me
एतद् सर्वम् ऋतम् मन्ये,	all this I consider true,
हे भगवन् !	O Kṛṣṇa!
न हि देवाः न दानवाः	indeed, neither *devas* nor Dānavas
ते (तव) व्यक्तिम् विदुः ।	know Your personality

"O Kṛṣṇa, I totally accept as truth all that You have told me. Neither the demigods nor the demons, O Lord, can understand Your personality."

सर्वम्	**all** ⟨2.1⟩ n. *kṛṣṇanāma sarva*
एतद्	**this** ⟨2.1⟩ n. *kṛṣṇanāma etad* – (first person) he, this
ऋतम्	**true** ⟨2.1⟩ n. *ṛta* – proper, right, fit, able, honest, true; respected, enlightened; (*-am*) fixed or settled order, law, rule; divine law or truth; truth in general (related:) *ṛtu* – any fixed time, the right time, esp. for 'rituals'; a period, season

मन्ये	**I think** ⟨*acyuta* 3.1⟩ √*man[a]* 4A...बोधने – to know, think
यद्	**that which** ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
माम्	**to me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
वदसि	**you speak** ⟨*acyuta* 2.1⟩ √*vad[a]*...व्यक्तायां वाचि – to speak
केशव	**O Kṛṣṇa!** ⟨8.1⟩ m. *keśava* – 'who has beautiful hair' (*keśa.va*); or 'lord of Brahmā (*ka*) and Śiva (*īśa*)' (*ka-_īśa.va*)
न हि	**not at all** ⟨*avyaya*⟩
ते	**your** ⟨opt. for *tava* 6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
भगवन्	**O Kṛṣṇa!** ⟨8.1⟩ n. *bhagavat* (*.vat[u]*) – 'having *bhaga* (opulence, fortune)', opulent, fortunate; 'who has all opulences'
व्यक्तिम्	**personality** ⟨2.1⟩ f. *vyakti* – manifestation, personality
विदुः	**they know** ⟨*acyuta* 1.3⟩ √*vid[a]* 2P...ज्ञाने – to know
देवाः	***devas*** ⟨1.3⟩ m. *deva* – divine being
न	**not** ⟨*avyaya*⟩
दानवाः	**Dānavas** ⟨1.3⟩ m. *dānava*

Of the sixty daughters of Prajāpati Dakṣa, Kaśyapa Muni married thirteen, like Aditi, Diti, Danu, etc. The descendents of Aditi (the 'Ādityas' like Vāmana) are the *devas*, whereas the descendents of Diti (the 'Daityas' like Hiraṇyakaśipu) and Danu (the 'Dānavas' like Rāhu) are considered demons.

Subodhinī: एतद् 'भवान् एव परम् ब्रह्म' (10.12) इत्यादि सर्वम् अपि ऋतम् (सत्यम्) मन्ये । यद् माम् प्रति त्वम् कथयसि – 'न मे विदुः सुर-गणाः' (10.2) इत्यादि तद् अपि सत्यम् एव मन्ये इति आह – 'न हि' इति । हे भगवन्, ते (तव) व्यक्तिम् देवाः न विदुः, 'अस्मद्-अनुग्रहार्थम् इयम् अभिव्यक्तिः' इति न जानन्ति । दानवाः च 'अस्मद्-निग्रहार्थम्' इति न विदुः एव इति ॥१०.१४॥
किम् तर्हि ? – 'स्वयम्' इति –

10.15

स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम ।
भूतभावन भूतेश देवदेव जगत्पते ॥१५॥

हे पुरुषोत्तम भूत-भावन भूतेश	
देव-देव जगत्पते !	O Lord Kṛṣṇa!
त्वम् स्वयम् एव	only You Yourself
आत्मना आत्मानम् वेत्थ ।	know Yourself by Yourself

"Indeed, You alone know Yourself by Your own internal potency, O Supreme Person, origin of all, Lord of all beings, God of gods, Lord of the universe!"

स्वयम्	**yourself** ⟨*avyaya*⟩

एव	**certainly** ⟨*avyaya*⟩
आत्मना	**by yourself** ⟨3.1⟩ m. *ātman (ātmā)* – the self, soul
आत्मानम्	**yourself** ⟨2.1⟩ m. *ātman (ātmā)* – the self, soul
वेत्थ	**you know** ⟨*acyuta* opt. for *vetsi* 2.1⟩ √*vid[a]* 2P...ज्ञाने – to know
त्वम्	**you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
पुरुषोत्तम	**O Kṛṣṇa!** ⟨8.1⟩ m. *puruṣa-_uttama* – 'supreme person'
भूत-भावन	**O Kṛṣṇa!** ⟨8.1⟩ m. *bhūta-bhāvana*...भूतानि भावयति इति भूत-भावनः – 'who creates all beings'
भूतेश	**O Kṛṣṇa!** ⟨8.1⟩ m. *bhūta-_īśa*...भूतानाम् ईशः इति भूतेशः – 'lord of all beings'
देव-देव	**O Kṛṣṇa!** ⟨8.1⟩ m. *deva-deva*...देवानाम् देवः इति देव-देवः – 'god of all gods', Supreme Lord
जगत्पते	**O Kṛṣṇa!** ⟨8.1⟩ m. *jagat-pati*...जगतः पतिः इति जगत्पतिः – 'protector of the world'

Subodhinī: स्वयम् एव त्वम् आत्मानाम् वेत्थ (जानासि), न अन्यः। तद् अपि आत्मना स्वेन एव वेत्थ, न साधन-अन्तरेण। अत्यादरेण बहुधा सम्बोधयति – हे पुरुषोत्तम (पुरुषेषु उत्तम) पुरुषोत्तमत्वे हेतु-गर्भाणि विशेषणानि सम्बोधनानि – हे भूत-भावन (भूत-उत्पादक)! भूतानाम् ईश (नियन्त)! देवानाम् आदित्य-आदीनाम् देव (प्रकाशक)! जगत्-पते (विश्व-पालक)! ॥१०.१५॥

यस्मात् तव अभिव्यक्तिम् त्वम् एव वेत्सि, न देवादयः, तस्मात् – 'वक्तुम् अर्हसि' इति –

10.16

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥१६॥

अ-शेषेण वक्तुम् अर्हसि,	You should speak in detail,
याभिः विभूतिभिः	those opulences by which
इमान् लोकान् व्याप्य	[after] pervading these worlds
त्वम् तिष्ठसि	You exist
दिव्याः हि आत्म-विभूतयः ।	are indeed divine opulences

"Please tell me in detail of Your divine opulences by which You pervade all these worlds."

वक्तुम्	**to speak** ⟨*avyaya*⟩ √*vac[a]*...परिभाषणे – to speak; + .*tum[u]*
अर्हसि	**you deserve** ⟨*acyuta* 2.1⟩ √*arh[a]*...पूजायाम् – to be worthy, fit, able
अ-शेषेण	**completely** ⟨*avyaya*⟩ from *a-śeṣa* – without remainder
दिव्याः	**divine** ⟨1.3⟩ m. f. *divyā* ⟨.*ā[p]*⟩
हि	**indeed** ⟨*avyaya*⟩

आत्म-विभूतयः	**your opulences** ⟨1.3⟩ f. *ātma-vibhūti*...आत्मनः विभूतिः इति आत्म-विभूतिः – opulences of the self; own glory
याभिः	**those by which** ⟨3.3⟩ f. *kṛṣṇanāma yad* – (relative) who, which
विभूतिभिः	**by the opulences** ⟨3.3⟩ f. *vibhūti* – opulence, might
लोकान्	**worlds** ⟨2.3⟩ m. *loka* – place, world, people
इमान्	**these** ⟨2.3⟩ m. *kṛṣṇanāma idam* – (first person) he, this
त्वम्	**you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
व्याप्य	**[after] pervading** ⟨*avyaya*⟩ *vi.*√*āp[ḷ]* – to pervade; + .*ya[p]*
तिष्ठसि	**your are situated** ⟨*acyuta* 2.1⟩ √*sthā*...स्थाने – to stand

Subodhinī: याः आत्मनः (तव) दिव्याः (अत्यद्भुताः) विभूतयः, ताः सर्वाः वक्तुम् त्वम् एव अर्हसि (योग्यः भवसि) 'याभिः' इति विभूतीनाम् विशेषणम् स्पष्टार्थम् ॥१०.१६॥

कथन-प्रयोजनम् दर्शयन्, प्रार्थयते – 'कथम्' इति द्वाभ्याम् –

10.17

कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन् ।
केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया ॥१७॥

हे योगिन्	O Kṛṣṇa!
सदा परिचिन्तयन्	[while] always meditating
कथम् अहम् त्वाम् विद्याम् ?	how I may know You?
हे भगवन् !	O Kṛṣṇa!
केषु केषु भावेषु च	and in which particular forms
मया चिन्त्यः असि ?	are You to be remembered by me?

"O Kṛṣṇa, O supreme mystic, how shall I constantly think of You, and how shall I know You? In what various forms are You to be remembered, O Supreme Personality of Godhead?"

कथम्	**how** ⟨*avyaya*⟩
विद्याम्	**I may know** ⟨*vidhi* 3.1⟩ √*vid[a]* 2P...ज्ञाने – to know
अहम्	**I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
योगिन्	**O Kṛṣṇa!** ⟨8.1⟩ m. *yogin (yogī)* – 'who has all mystic power'
त्वाम्	**you** ⟨2.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
सदा	**always** ⟨*avyaya*⟩
परिचिन्तयन्	**[while] thinking about** ⟨1.1⟩ m. *paricintayat (pari.*√*cit[i]* – to think about; + .*[ś]at[ṛ]*)
केषु केषु	**in which particular** ⟨7.3⟩ m. *kṛṣṇanāma kim* – who/what
च	**and** ⟨*avyaya*⟩

भावेषु **in forms** ⟨7.3⟩ m. *bhāva* – state of being: nature, sentiment
चिन्त्यः **to be remembered** ⟨1.1⟩ m. *cintya* (√*cit[i]*...चिन्त्याम् – to think, remember; + *.ya*)
असि **you are** ⟨*acyuta* 2.1⟩ √*as[a]*...भुवि – to be, exist
भगवन् **O Kṛṣṇa!** ⟨8.1⟩ n. *bhagavat* (*.vat[u]*) – 'having *bhaga* (opulence, fortune)', opulent, fortunate; 'who has all opulences'
मया **by me** ⟨3.1⟩ *kṛṣṇanāma asmad* – (last person) I

Subodhinī: हे योगिन्, कथम् (कैः विभूति-भेदैः) सदा परिचिन्तयन् अहम् त्वाम् विद्याम् (जानीयाम्), विभूति-भेदेन चिन्त्यः अपि, त्वम् केषु केषु पदार्थेषु मया चिन्तनीयः असि ॥१०.१७॥
तद् एवम् बहिः-मुखे अपि चित्ते तत्र तत्र विभूति-भेदेन त्वद्-चिन्ता एव यथा भवेत्, तथा विस्तरेण कथय! इति आह – 'विस्तरेण' इति –

10.18

विस्तरेणात्मनो योगं विभूतिं च जनार्दन ।
भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम् ॥१८॥

हे जनार्दन !	O Kṛṣṇa!
आत्मनः योगम् विभूतिम् च	Your power and opulence
भूयः विस्तरेण कथय,	please tell again in detail,
अ-मृतम् शृण्वतः	[while] hearing this nectar
मे (मम) तृप्तिः हि न अस्ति ।	I feel no satiation

"O Janārdana, again please describe in detail the mystic power of Your opulences. I am never satiated in hearing about You, for the more I hear the more I want to taste the nectar of Your words."

विस्तरेण **extensively** ⟨3.1⟩ m. *vistara* – extensive, long; extent, extension, quantity; high degree, intensity; detail
आत्मनः **of your own** ⟨6.1⟩ m. *ātman* (*ātmā*) – the self, soul
योगम् **power** ⟨2.1⟩ m. *yoga*
विभूतिम् **opulence** ⟨2.1⟩ f. *vibhūti* – opulence, might
च **and** ⟨*avyaya*⟩
जनार्दन **O Kṛṣṇa!** ⟨8.1⟩ m. *jana-_ardana* – 'who destroys bad elements and grants desires', i.e. the Lord who maintains all
भूयः **again** ⟨*avyaya*⟩
कथय **you must tell** ⟨*vidhātā* 2.1⟩ √*katha*...वाक्यप्रबन्धे – to tell
तृप्तिः **satisfaction** ⟨1.1⟩ f. *tṛpti*
हि **indeed** ⟨*avyaya*⟩
शृण्वतः **[while] hearing** ⟨6.1⟩ m. *śṛṇvat* (√*śru*...श्रवणे – to hear, obey; + *.[ś]at[ṛ]*)

न **not** ⟨*avyaya*⟩
अस्ति **there is** ⟨*acyuta* 1.1⟩ √*as[a]*...भुवि – to be, exist
मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
अ-मृतम् **nectar** ⟨2.1⟩ m. *a-mṛta* – immortality

Subodhinī: आत्मनः (तव) योगम् (सर्व-ज्ञत्व-सर्व-शक्तित्वादि-लक्षणम् योग-ऐश्वर्यम्) विभूतिम् च विस्तरेण पुनः कथय। हि यस्मात् त्वद्-वाक्यम् अमृत-रूपम् शृण्वतः मम तृप्तिः (अलम्-बुद्धिः) न अस्ति ॥१०.१८॥
एवम् प्रार्थितः सन् [श्री-भगवान् उवाच] - 'हन्त' इति –

10.19

श्रीभगवानुवाच

हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः ।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥१९॥

श्री-भगवान् उवाच -	Śrī Kṛṣṇa said:
हन्त हे कुरु-श्रेष्ठ !	yes, Arjuna!
आत्म-विभूतयः दिव्याः हि,	my opulences are indeed divine,
ते (तुभ्यम्) प्राधान्यतः कथयिष्यामि,	I will tell them in essence to you,
मे (मम) विस्तरस्य	[because] of My expansion
अन्तः न अस्ति ।	there is no end

"The Supreme Personality of Godhead said: Yes, I will tell you of My splendorous manifestations, but only of those which are prominent, O Arjuna, for My opulence is limitless."

श्री-भगवान् **Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'
उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
हन्त **yes!** ⟨*avyaya*⟩ – particle to excite curiosity
ते **to you** ⟨opt. for *tubhyam* 4.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
कथयिष्यामि **I will tell** ⟨*kalki* 3.1⟩ √*katha*...वाक्यप्रबन्धे – to tell
दिव्याः **divine** ⟨1.3⟩ f. *divyā* (*.ā[p]*)
हि **indeed** ⟨*avyaya*⟩
आत्म-विभूतयः **own opulences** ⟨1.3⟩ f. *ātma-vibhūti*
प्राधान्यतः **in essence** ⟨*avyaya*⟩ (*prādhānyatas*; *pradhānya* – main; + *.tas[i]*) – chief, mainly, prominent
प्रधान – the most important or essential part of anything; a chief thing or person (as in *pradhāna-mantrī* – prime-minister); primary matter
कुरु-श्रेष्ठ **O Arjuna!** ⟨8.1⟩ m. *kuru-śreṣtha*...कुरूणाम् श्रेष्ठः इति कुरु-श्रेष्ठः – 'best of the Kurus'

न not ⟨*avyaya*⟩
अस्ति there is ⟨*acyuta* 1.1⟩ √*as[a]*...भुवि – to be, exist
अन्तः an end ⟨1.1⟩ m. *anta*
विस्तरस्य of the expansion ⟨6.1⟩ m. *vistara* – extent, expansion
मे my ⟨opt. for *mama* 6.1⟩ *kṛṣnanāma asmad* – (last person) I

Subodhinī: 'हन्त' इति अनुकम्पा-सम्बोधने । दिव्याः याः मम विभूतयः, ताः प्राधान्येन ते (तुभ्यम्) कथयिष्यामि । यतः अवान्तर-विभूति-विस्तरस्य मदीयस्य अन्तः न अस्ति, अतः प्रधान-भूताः कतिचिद् वर्णयिष्यामि ॥१०.१९॥
तत्र प्रथमम् ऐश्वरम् रूपम् कथयति – 'अहम्' इति –

Note: Arjuna has asked the Lord to speak in detail (*a-śeṣena*), but the Lord says that He can speak only selectively (*prādhānyataḥ*), because His *vibhūtis* are unlimited.

10.20

अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
अहमादिश्च मध्यं च भूतानामन्त एव च ॥२०॥

हे गुडाकेश !	O Arjuna!
अहम् सर्व-भूताशय-स्थितः आत्मा,	I am the Supersoul, situated in the heart of all beings
अहम् भूतानाम् आदिः च	I am the beginning (cause of birth) of all beings
मध्यम् च अन्तः एव च ।	the middle (existence) and also the end (death)

"I am the Supersoul, O Arjuna, seated in the hearts of all living entities. I am the beginning, the middle and the end of all beings."

अहम् **I am** ⟨1.1⟩ *kṛṣnanāma asmad* – (last person) I
आत्मा **the soul** ⟨1.1⟩ m. *ātman (ātmā)* – the self, soul
गुडाकेश **O Arjuna!** ⟨8.1⟩ m. *guḍākā-_īśa* – 'lord/conqueror of sleep/ignorance'
सर्व-भूताशय-स्थितः **situated in the heart of all beings** ⟨1.1⟩ m. *sarva-bhūta-_āśaya-sthita*...सर्व-भूतानाम् आशये स्थितः इति सर्व-भूताशय-स्थितः
आशय – resting-place, seat, place, abode; thought, intention, mind, heart
अहम् **I am** ⟨1.1⟩ *kṛṣnanāma asmad* – (last person) I
आदिः **beginning** ⟨1.1⟩ m. *ādi*
च **and** ⟨*avyaya*⟩
मध्यम् **middle** ⟨1.1⟩ n. *madhya*
च **and** ⟨*avyaya*⟩
भूतानाम् **of beings** ⟨6.3⟩ m. *bhūta* (√*bhū*...सत्तायाम् – to be, exist, become; + *.[k]ta*) – past; an element, being, creature
अन्तः **end** ⟨1.1⟩ m. *anta*

एव च **and certainly** ⟨*avyaya*⟩

Subodhinī: हे गुडाकेश ! सर्वेषाम् भूतानाम् आशयेषु (अन्तः-करणेषु) सर्व-ज्ञत्वादि-गुणैः नियन्तृत्वेन अवस्थितः परमात्मा अहम् । आदिः जन्म, मध्यम् स्थितिः, अन्तः संहारः, सर्व-भूतानाम् जन्मादि-हेतुः च अहम् एव इति अर्थः ॥१०.२०॥
इदानीम् विभूतीः कथयति – 'आदित्यानाम्' इत्यादिना यावत् अध्याय-समाप्तिम् –

10.21

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् ।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥२१॥

आदित्यानाम् अहम् विष्णुः	among the Ādityas I am Viṣṇu (Vāmana)
ज्योतिषाम् अंशुमान् रविः,	among luminaries the radiant sun,
मरुताम् मरीचिः अस्मि,	among the Maruts I am Marīci,
नक्षत्राणाम् अहम् शशी ।	among stars I am the moon

"Of the Ādityas I am Viṣṇu, of lights I am the radiant sun, of the Maruts I am Marīci, and among the stars I am the moon."

आदित्यानाम् **among the Ādityas** ⟨6.3⟩ m. *āditya* – 'son of Aditi'
अहम् **I am** ⟨1.1⟩ *kṛṣnanāma asmad* – (last person) I
विष्णुः **Viṣṇu** ⟨1.1⟩ m. *viṣṇu* – Śrī Viṣṇu, 'who pervades everything'
In His fifth incarnation Śrī Viṣṇu appeared as a son of Aditi, Vāmana. As a boy he attended the sacrifice of Bali Mahārāja, king of the demons, who had conquered Indra. Because it is the duty of a king to give charity, Vāmana asked Bali for just three steps of land. When this was granted, he expanded his body and took possession of the whole world.
ज्योतिषाम् **among luminaries** ⟨6.3⟩ n. *jyotis (jyotiḥ)* – light, luminary
रविः **the sun** ⟨1.1⟩ m. *ravi*
अंशुमान् **radiant** ⟨1.1⟩ m. *aṁśumat (.mat[u])* – 'having *aṁśu* (a ray)'; radiant
ततः **then** ⟨*avyaya*⟩ (*tatas*; from *tad* + .*tas[i]*) – from/after/than that
मे **to me** ⟨opt. for *mahyam* 4.1⟩ *kṛṣṇanāma asmad* – (last person) I
त्वम् **you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
दर्शय **you must show** ⟨*vidhātā* caus. 2.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see
आत्मानम् **yourself** ⟨2.1⟩ m. *ātman* (*ātmā*) – the self, soul
अ-व्ययम् **eternal** ⟨2.1⟩ m. *a-vyaya* – unchangeable, imperishable

Subodhinī: योगिनः एव योगाः तेषाम् ईश्वरः, मया (अर्जुनेन). तद् रूपम् द्रष्टुम् शक्यम् इति यदि मन्यसे, ततः (तर्हि) तद्-रूपवन्तम् आत्मानम् अ-व्ययम् (नित्यम्) मम दर्शय ॥११.४॥

एवम् प्रार्थितः सन्, अत्यद्भुतम् रूपम् दर्शयिष्यन्, 'सावधानः भव' इति एवम् अर्जुनम् अभिमुखी-करोति [श्री-भगवान् उवाच] – 'पश्य' इति चतुर्भिः –

11.5

श्रीभगवानुवाच

पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः ।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥५॥

श्री-भगवान् उवाच - हे पार्थ !	Śrī Kṛṣṇa said: O Arjuna!
नाना-विधानि नाना-वर्णाकृतीनि च	of various kinds, colors and shapes
शतशः अथ सहस्रशः	hundreds and thousands
मे (मम) दिव्यानि रूपाणि पश्य !	behold My divine forms!

"The Supreme Personality of Godhead said: My dear Arjuna, O son of Pṛthā, see now My opulences, hundreds of thousands of varied divine and multicolored forms."

श्री-भगवान् **Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'
उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
पश्य **you must see** ⟨*vidhātā* 2.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see
मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
पार्थ **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
रूपाणि **forms** ⟨2.3⟩ n. *rūpa* – a form
शतशः **hundreds** ⟨*avyaya*⟩
अथ **now** ⟨*avyaya*⟩
सहस्रशः **thousands** ⟨*avyaya*⟩
नाना-विधानि **which are of various kinds** ⟨2.3⟩ n. *nānā-vidha*
दिव्यानि **which are divine** ⟨2.3⟩ n. *divya* – divine
नाना-वर्णाकृतीनि **which are of various colors and shapes** ⟨2.3⟩ n. *nānā-varṇa-_ākṛti*
आकृति – shape, appearance; a well-formed shape; same as *ākāra* (as opp. to *nirākāra*, having no form)
च **and** ⟨*avyaya*⟩

Subodhinī: रूपस्य एकत्वे अपि, नाना-विधत्वात् रूपाणि इति बहु-वचनम् । अ-परिमितानि अनेक-प्रकाराणि दिव्यानि (अ-लौकिकानि) मम रूपाणि पश्य । वर्णाः (शुक्ल-कृष्णादयः), आकृतयः (अवयव-सन्निवेश-विशेषाः), नाना (अनेके) वर्णाः आकृतयः च येषाम्, तानि नाना-वर्ण-आकृतीनि च ॥११.५॥
तानि एव आह – 'पश्य' इति –

11.6

पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा ।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥६॥

हे भारत !	O Arjuna!
आदित्यान् वसून् रुद्रान्	the Ādityas, Vasus, Rudras
अश्विनौ तथा मरुतः पश्य !	the two Aśvins and the Maruts behold!
अदृष्ट-पूर्वाणि बहूनि आश्चर्याणि पश्य !	behold many wonders, never seen before

"O best of the Bhāratas, see here the different manifestations of Ādityas, Vasus, Rudras, Aśvinī-kumāras and all the other demigods. Behold the many wonderful things which no one has ever seen or heard of before."

पश्य **you must see** ⟨*vidhātā* 2.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see
आदित्यान् **the Ādityas** ⟨2.3⟩ m. *āditya* – 'coming from Aditi'
वसून् **the Vasus** ⟨2.3⟩ m. *vasu* – aVasus
रुद्रान् **the Rudras** ⟨2.3⟩ m. *rudra* – a Rudra
अश्विनौ **the two Aśvinīs** ⟨2.2⟩ m. *aśvin* (*aśvī*) – an Aśvī, Aśvinī-kumāra
The Aśvinīs Satya and Dasra, sons of Sūrya, are known as Aśvinī-kumāras. They are the physicians of the *devas*.
मरुतः **the Maruts** ⟨2.3⟩ m. *marut* – a Marut, a wind god
तथा **so** ⟨*avyaya*⟩
बहूनि **many** ⟨2.3⟩ n. *bahu*
अदृष्ट-पूर्वाणि **which are not seen before** ⟨2.3⟩ n. *a-dṛṣta-pūrva*...पूर्वम् अ-दृष्टम् इति अ-दृष्ट-पूर्वम् – which is not seen before
पश्य **you must see** ⟨*vidhātā* 2.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see
आश्चर्याणि **wonders** ⟨2.3⟩ n. *āścarya* – wonder, wonderful
भारत **O Arjuna!** ⟨8.1⟩ m. *bhārata* – 'descendant of Bharata'

Subodhinī: आदित्य-आदीन् मम देहे पश्य, मरुतः एकोन-पञ्चाशत् देव-विशेषान् । अदृष्ट-पूर्वाणि त्वया वा अन्येन वा पूर्वम् अ-दृष्टानि रूपाणि, आश्चर्याणि (अत्यद्भुतानि) ॥११.६॥

11.7

इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम् ।
मम देहे गुडाकेश यच्चान्यद् द्रष्टुमिच्छसि ॥७॥

हे गुडाकेश !	O Arjuna!
स-चराचरम् कृत्स्नम् जगत्	the whole world, the moving and non-moving
अद्य इह मम देहे एक-स्थम् पश्य !	now behold in this body of Mine, situated in one place!
यद् अन्यत् च द्रष्टुम् इच्छसि ।	and anything else that you want to see

"O Arjuna, whatever you wish to see, behold at once in this body of Mine! This universal form can show you whatever you now desire to see and whatever you may want to see in the future. Everything – moving and nonmoving – is here completely, in one place."

इह **here** ⟨*avyaya*⟩
एक-स्थम् **situated in one place** ⟨2.1⟩ n. *eka-stha*
जगत् **the universe** ⟨2.1⟩ n. *jagat*
कृत्स्नम् **the whole** ⟨2.1⟩ n. *kṛtsna*
पश्य **you must see** ⟨*vidhātā* 2.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see
अद्य **now** ⟨*avyaya*⟩ – today, now
स-चराचरम् **with the moving and non-moving** ⟨2.1⟩ n. *sa-cara-_a-cara*...चरैः च अ-चरैः च सह इति स-चराचरम्
मम **my** ⟨6.1⟩ *kṛṣnanāma asmad* – (last person) I
देहे **in the body** ⟨7.1⟩ m. *deha* – body
गुडाकेश **O Arjuna!** ⟨8.1⟩ m. *guḍākā-_īśa* – 'lord/conquerer of sleep/ignorance'
यद् **that which** ⟨2.1⟩ n. *kṛṣnanāma yad* – (relative) who, which
च **and** ⟨*avyaya*⟩
अन्यत् **other** ⟨2.1⟩ n. *kṛṣnanāma anya*
द्रष्टुम् **to see** ⟨*avyaya*⟩ √*dṛś[ir]*...प्रेक्षणे – to see; + .*tum[u]*
इच्छसि **you desire** ⟨*acyuta* 2.1⟩ √*iṣ[u]*...इच्छायाम् – to wish, desire

Subodhinī: तत्र तत्र परिभ्रमता वर्ष-कोटिभिः अपि द्रष्टुम् अ-शक्यम्, कृत्स्नम् अपि चर-अचर-सहितम् जगत् इह (अस्मिन्) मम देहे अवयव-रूपेण एकत्र एव स्थितम् अद्य (अधुना) एव पश्य । यद् च अन्यत् जगत्-आश्रय-भूतम् कारण-स्वरूपम् जगतः च, अवस्था-विशेषादिकम्, जय-पराजयादिकम् च, यद् अपि अन्यत् द्रष्टुम् इच्छसि, तद् सर्वम् पश्य ॥११.७॥
यद् उक्तम् अर्जुनेन 'मन्यसे यदि तद् शक्यम्' (11.4) इति तत्र आह – 'नतु माम्' इति –

11.8

न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥८॥

अनेन स्व-चक्षुषा एव तु	but just with this your vision
माम् द्रष्टुम् न शक्यसे,	you will not be able to see Me,

ते (तुभ्यम्) दिव्यम् चक्षुः ददामि,	[therefore] I give you divine vision,
मे (मम) ऐश्वरम् योगम् पश्य !	behold My majestic power!

"But you cannot see Me with your present eyes. Therefore I give you divine eyes. Behold My mystic opulence!"

न	**not** ⟨*avyaya*⟩
तु	**but** ⟨*avyaya*⟩
माम्	**me** ⟨2.1⟩ *kṛṣnanāma asmad* – (last person) I
शक्यसे	**you endure** ⟨*acyuta* 2.1⟩ √*śak[a]*...क्षमायाम् – to endure
द्रष्टुम्	**to see** ⟨*avyaya*⟩ √*dṛś[ir]*...प्रेक्षणे – to see; + *.tum[u]*
अनेन	**with this** ⟨3.1⟩ n. *kṛṣnanāma idam* – (first person) he, this
एव	**certainly** ⟨*avyaya*⟩
स्व-चक्षुषा	**with the own eye** ⟨3.1⟩ n. *sva-cakṣus (-cakṣuḥ)*...स्वस्य चक्षुः इति स्व-चक्षुः – own eye
दिव्यम्	**divine** ⟨2.1⟩ n. *divya*
ददामि	**I give** ⟨*acyuta* 3.1⟩ √*[ḍu]dā[ñ]*...दाने – to give
ते	**to you** ⟨opt. for *tubhyam* 4.1⟩ *kṛṣnanāma yuṣmad* – (middle person) you
चक्षुः	**eye** ⟨2.1⟩ n. *cakṣus (cakṣuḥ)*
पश्य	**you must see** ⟨*vidhātā* 2.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see
मे	**my** ⟨opt. for *mama* 6.1⟩ *kṛṣnanāma asmad* – (last person) I
योगम्	**power** ⟨2.1⟩ m. *yoga*
ऐश्वरम्	**majestic** ⟨2.1⟩ m. *aiśvara*

Subodhinī: अनेन एव तु स्वीयेन चर्म-चक्षुषा माम् द्रष्टुम् न शक्यसे (शक्तः न भविष्यसि) । अतः अहम् दिव्यम् (अलौकिकम् ज्ञानात्मकम्) चक्षुः तुभ्यम् ददामि । मम ऐश्वरम् (अ-साधारणम्) योगम् (युक्तिम्, अघटित-घटना-सामर्थ्यम्) पश्य ॥११.८॥

एवम् उक्त्वा, भगवान् अर्जुनाय रूपम् दर्शितवान् । तद् च रूपम् दृष्ट्वा, अर्जुनः श्री-कृष्णम् विज्ञापितवान् इति इमम् अर्थम् 'एवम् उक्त्वा' इत्यादिभिः षड्भिः श्लोकैः धृतराष्ट्रम् प्रति [सञ्जयः उवाच] – 'एवम् उक्त्वा' इति –

11.9...11

सञ्जय उवाच

एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः ।
दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥९॥

सञ्जयः उवाच - हे राजन् !	Sañjaya said: O Dhṛtarāṣṭra!
महा-योगेश्वरः हरिः	the great master of *yoga* Śrī Kṛṣṇa,

एवम् उक्त्वा	[after] speaking thus
ततः पार्थाय	then to Arjuna
परमम् ऐश्वरम् रूपम् दर्शयामास, . . .	He showed the supreme majestic form, . . .

"Sañjaya said: O King, having spoken thus, the Supreme Lord of all mystic power, the Personality of Godhead, displayed His universal form to Arjuna."

सञ्जयः	**Sañjaya** ⟨1.1⟩ m. *sam._jaya* – 'conquest'
उवाच	**he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
एवम्	**thus** ⟨*avyaya*⟩
उक्त्वा	**[after] speaking** ⟨*avyaya*⟩ √*vac[a]*...परिभाषणे – to speak; + *.[k]tvā*
ततः	**then** ⟨*avyaya*⟩ (*tatas*; from *tad* + *.tas[i]*) – from/after/than that
राजन्	**O King!** ⟨8.1⟩ m. *rājan (rājā)* – king
महा-योगेश्वरः	**the great master of Yoga** ⟨1.1⟩ m. *mahā-yoga-_īśvara*...महान् योगस्य ईश्वरः इति महा-योगेश्वरः
हरिः	**Śrī Kṛṣṇa** ⟨1.1⟩ m. *hari* – 'who takes away', i.e. who removes all suffering of His devotees and steals their hearts
दर्शयामास	**he showed** ⟨*adhokṣaja* caus. 1.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see Some take this form as two words (*darśayām* + *āsa*), but Jīva Gosvāmī explains it as one word, because *darśayām* is not an independent word. Furthermore, in *adhokṣaja* the *dhātu* √*as[a]*...भुवि is replaced by √*bhū*...सत्तायाम्, therefore the form *āsa* is also never seen independently.
पार्थाय	**to Arjuna** ⟨4.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
परमम्	**the supreme** ⟨2.1⟩ n. *parama* – highest
रूपम्	**form** ⟨2.1⟩ n. *rūpa*
ऐश्वरम्	**majestic** ⟨2.1⟩ n. *aiśvara*

Subodhinī: हे राजन् (धृतराष्ट्र), महान् च असौ योग-ईश्वरः च हरिः परमम् ऐश्वरम् रूपम् दर्शितवान् ॥११.९॥

कथम्-भूतम् ? तद् इति अतः आह – 'अनेक' इति –

11.10

अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥१०॥

. . . अनेक-वक्त्र-नयनम्	. . . which had many mouths and eyes
अनेकाद्भुत-दर्शनम्	many wonderful visions
अनेक-दिव्याभरणम्	many divine ornaments
दिव्यानेकोद्यतायुधम् . . .	divine upraised weapons . . .

"Arjuna saw in that universal form unlimited mouths, unlimited eyes, unlimited wonderful visions. The form was decorated with many celestial ornaments and bore many divine upraised weapons."

अनेक-वक्त्र-नयनम् **in which are many mouths and eyes** ⟨2.1⟩ n. *aneka-vaktra-nayana*...अनेकानि वक्त्राणि च नयनानि च यस्मिन्, तद् अनेक-वक्त्र-नयनम्

अनेकाद्भुत-दर्शनम् **in which are many wonderful visions** ⟨2.1⟩ n. *aneka-_adbhuta-darśana*...अनेकानि अद्भुतानि दर्शनानि यस्मिन्, तद् अनेकाद्भुत-दर्शनम्

अनेक-दिव्याभरणम् **in which are many divine ornaments** ⟨2.1⟩ n. *aneka-divya-_ābharaṇa*...अनेकानि दिव्यानि आभरणानि यस्मिन्, तद् अनेक-दिव्याभरणम्

आभरण – ornament, decoration

दिव्यानेकोद्यतायुधम् **in which are many divine upraised weapons** ⟨2.1⟩ n. *divya-_aneka-_udyata-_āyudha*...दिव्यानि अनेकानि उद्यतानि आयुधानि यस्मिन्, तद् दिव्यानेकोद्यतायुधम्

उद्यत (*ud.√yam[a]* – to raise; + *.[k]ta*) – raised

Subodhinī: अनेकानि वक्त्राणि नयनानि च यस्मिन् तद्, अनेकानाम् अद्भुतानाम् दर्शनम् यस्मिन् तद्, अनेकानि दिव्य-आभरणानि यस्मिन् तद्, दिव्यानि अनेकानि उद्यतानि आयुधानि च यस्मिन् तद् ॥११.१०॥

11.11

दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् ।
सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् ॥११॥

. . . दिव्य-माल्याम्बर-धरम्	. . . wearing many divine garlands and dresses
दिव्य-गन्धानुलेपनम्	anointed with divine scents
सर्वाश्चर्यमयम् देवम् अनन्तम् विश्वतोमुखम् ।	full of wonders, effulgent, unlimited, universal

". . . He wore celestial garlands and garments, and many divine scents were smeared over His body. All was wondrous, brilliant, unlimited, all-expanding."

दिव्य-माल्याम्बर-धरम् **which wears divine garlands and garments** ⟨2.1⟩ n. *divya-mālya-_ambara-dhara*...यद् दिव्यानि माल्यानि अम्बराणि च धरति, तद् दिव्य-माल्याम्बर-धरम्

माला – garland, necklace, rosary; a row, line, series

अम्बर – clothes, garment, as in *pītāmbara, nīlāmbara, raktāmbara* (wearing yellow, blue and red garments, respectively)

दिव्य-गन्धानुलेपनम् **whose ointment has divine scents** ⟨2.1⟩ n. *divya-gandha-_anulepana*...दिव्य-गन्धम् अनुलेपनम् यस्य, तद् दिव्य-गन्धानुलेपनम्

गन्ध – smell, odor, fragrance, parfume

सर्वाश्चर्यमयम् **which is full of all wonders** ⟨2.1⟩ n. *sarva-_āścaryamaya* – full of all wonders

देवम् **effulgent** ⟨2.1⟩ n. *deva*

अनन्तम् **unlimited** ⟨2.1⟩ n. *ananta*

विश्वतोमुखम् **universal** ⟨2.1⟩ n. *viśvataḥ-_mukha*...विश्वतः मुखम् यस्य, सः विश्वतोमुखः – 'whose face is [turned] everywhere', facing all sides, universal; the universal form

Subodhinī: दिव्यानि माल्य-अम्बराणि च धारयति इति तथा । दिव्यः गन्धः यस्य, तादृशम् अनुलेपनम् यस्य तद् । सर्व-आश्चर्यमयम् (अनेक-आश्चर्य-प्रायम्) । देवम् द्योतनात्मकम् । अनन्तम् अ-परिच्छिन्नम् । विश्वतः (सर्वतः) मुखानि यस्मिन् तद् ॥११.११॥

विश्वरूप-दीप्तेः निरुपमत्वम् आह – 'दिवि सूर्य' इति –

11.12

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ।
यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥१२॥

यदि सूर्य-सहस्रस्य भाः	if the effulgence of thousands of suns
दिवि युगपद उत्थिता भवेत्,	would be risen together in the sky,
सा	that (effulgence)
तस्य महात्मनः भासः	of the effulgence of the Supreme Lord
सदृशी स्यात् ।	would be like a resemblance

"If hundreds of thousands of suns were to rise at once into the sky, their radiance might resemble the effulgence of the Supreme Person in that universal form."

दिवि **in the sky** ⟨7.1⟩ f. *div* (*dyauḥ*) – the sky, heaven

सूर्य-सहस्रस्य **of a thousand of suns** ⟨6.1⟩ n. *sūrya-sahasra*...सूर्याणाम् सहस्रम् इति सूर्य-सहस्रम् – a thousand of suns

भवेत् **it would be** ⟨*vidhi* 1.1⟩ √*bhū*...सत्तायाम् – to be, exist, become

युगपद् **together** ⟨*avyaya*⟩ – 'being in one *yuga* or yoke'

उत्थिता **risen** ⟨1.1⟩ f. *utthitā* (*ud.√sthā* – to rise; + *.[k]ta* + *.ā[p]*)

यदि **if** ⟨*avyaya*⟩

भाः **effulgence** ⟨1.1⟩ f. *bhās* (*bhāḥ*; from √*bhās[r]*...दीप्तौ – to shine) – light, lustre, splendor, brightness; an image, reflection, shadow; glory, splendor, majesty

(as in:) *bhāskara* – 'making light', the sun; *bhāsas* (*bhāsaḥ*) – light, lustre; *ābhāsa* – splendor, light; color, appearance; semblance, phantom, mere appearance, reflection, as in *nāmābhāsa* (the *ābhāsa* of the holy name)

सदृशी **similar** ⟨1.1⟩ f. *sa-dṛśī*

सा **that** ⟨1.1⟩ f. *kṛṣṇanāma tad* – (first person) he, that

स्यात् **it would be** ⟨*vidhi* 1.1⟩ √*as[a]*...भुवि – to be, exist

भासः — **of the effulgence** ⟨6.1⟩ f. *bhās (bhāḥ)* – effulgence
तस्य — **of that** ⟨6.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
महात्मनः — **of the great soul** ⟨6.1⟩ m. *mahā-_ātman (-ātmā)* – 'great soul'

Subodhinī: दिवि (आकाशे) सूर्य-सहस्रस्य युगपद् उत्थितस्य यदि युगपद् उत्थिता भाः प्रभा भवेत्, तर्हि सा तदा महात्मनः (विश्व-रूपस्य) भासः (प्रभायाः) कथञ्चिद् सदृशी स्यात्, न अन्या उपमा अस्ति इति अर्थः । तथा-भूतम् 'रूपम्' 'दर्शयामास' (11.9) इति पूर्वेण एव अन्वयः ॥११.१२॥
ततः किम् वृत्तम् ? इति अपेक्षायाम् आह सञ्जयः – 'तत्र' इति –

11.13

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥१३॥

तदा पाण्डवः	then Arjuna
अनेकधा प्रविभक्तम्	[although] in many ways divided
कृत्स्नम् जगत्	the whole universe
तत्र देव-देवस्य शरीरे एक-स्थम्	there in the Kṛṣṇa's body in one place
अपश्यत् ।	he saw

"At that time Arjuna could see in the universal form of the Lord the unlimited expansions of the universe situated in one place although divided into many, many thousands."

तत्र — **there** ⟨*avyaya*⟩
एक-स्थम् — **situated in one place** ⟨2.1⟩ n. *eka-stha*
जगत् — **the universe** ⟨2.1⟩ n. *jagat*
कृत्स्नम् — **the whole** ⟨2.1⟩ n. *kṛtsna*
प्रविभक्तम् — **divided** ⟨2.1⟩ n. *pravibhakta (pra.vi.√bhaj[a] 10P – to divide; + .[k]ta)*
अनेकधा — **in many ways** ⟨*avyaya*⟩
अपश्यत् — **he saw** ⟨*bhūteśvara* 1.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see
देव-देवस्य — **of Śrī Kṛṣṇa** ⟨6.1⟩ m. *deva-deva* – 'god of all gods', Supreme Lord
शरीरे — **in the body** ⟨7.1⟩ n. *śarīra* – body
पाण्डवः — **Arjuna** ⟨1.1⟩ m. *pāṇḍava* – 'son of Pāṇḍu'
तदा — **then** ⟨*avyaya*⟩

Subodhinī: अनेकधा प्रविभक्तम् (नाना-विभागेन अवस्थितम्) कृत्स्नम् जगत् देव-देवस्य शरीरे तद्-अवयवत्वेन एकत्र एव पृथक् पृथक् अवस्थितम् तदा पाण्डवः (अर्जुनः) अपश्यत् ॥११.१३॥
एवम् दृष्ट्वा किम् कृतवान् ? इति अतः आह – 'ततः' इति –

11.14

ततः स विस्मयाविष्टो हृष्टरोमा धनञ्जयः ।
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत ॥१४॥

ततः विस्मयाविष्टः	then, filled with wonder
हृष्ट-रोमा सः धनञ्जयः	his hair standing on end, that Arjuna
देवम् शिरसा प्रणम्य	[after] bowing his head to the Lord
कृताञ्जलिः अभाषत ।	he spoke with folded hands

"Then, bewildered and astonished, his hair standing on end, Arjuna bowed his head to offer obeisances and with folded hands began to pray to the Supreme Lord."

ततः — **then** ⟨*avyaya*⟩ *(tatas*; from *tad* + .*tas[i])* – from/after/than that
सः — **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
विस्मयाविष्टः — **filled with wonder** ⟨1.1⟩ m. *vismaya-_āviṣṭa*...विस्मयेन आविष्टः इति विस्मयाविष्टः
विस्मय (from √*smi[ṅ]*...ईषद्-हसने – to smile) – wonder, surprise, amazement, bewilderment, perplexity; doubt, uncertainty; (derived:) *smita* – a smile, gentle laugh
हृष्ट-रोमा — **whose hairs stand on end** ⟨1.1⟩ m. *hṛṣṭa-roman (-romā)*...हृष्टानि रोमाणि यस्य, सः हृष्ट-रोमा
धनञ्जयः — **Arjuna** ⟨1.1⟩ m. *dhanam-_jaya* – 'winner of riches'
प्रणम्य — **[after] bowing** ⟨*avyaya*⟩ *pra.√nam[a]* – to bow; + .*ya[p]*
शिरसा — **with the head** ⟨3.1⟩ n. *śiras (śiraḥ)* – head
देवम् — **to the Lord** ⟨2.1⟩ m. *deva* – divine being
कृताञ्जलिः — **with folded hands** ⟨1.1⟩ m. *kṛta-_añjali*...कृतः अञ्जलिः येन, सः कृताञ्जलिः – 'by whom *añjali* is made'
अञ्जलि – joined palms (for begging); a reverent posture usually translated as 'folded hands'
अभाषत — **he spoke** ⟨*bhūteśvara* 1.1⟩ √*bhāṣ[a]*...व्यक्तायां वाचि – to speak

Subodhinī: ततः दर्शन-अनन्तरम् विस्मयेन आविष्टः (व्याप्तः) सन्, हृष्टानि (उत्पुलकितानि) रोमाणि यस्य, सः धनञ्जयः देवम् तम् एव शिरसा प्रणम्य, कृत-अञ्जलिः (सम्पुटी-कृत-हस्तः) भूत्वा अभाषत (उक्तवान्) ॥११.१४॥
भाषणम् एव आह – 'पश्यामि' इति सप्त-दशभिः –

11.15

अर्जुन उवाच

पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसङ्घान् ।
ब्रह्माणमीशं कमलासनस्थमृषींश्च च सर्वानुरगांश्च दिव्यान् ॥१५॥

अर्जुनः उवाच - हे देव !	Arjuna said: O Lord!
सर्वान् देवान्	all the *devas*
तथा भूत-विशेष-सङ्घान्	and the hosts of various beings
कमलासन-स्थम् ब्रह्माणम्, ईशम्,	Lord Brahmā on a lotus-seat and Śiva
सर्वान् ऋषीन् च, दिव्यान् उरगान् च	and all sages and divine serpents
तव देहे पश्यामि ।	I see in Your body

"Arjuna said: My dear Lord Kṛṣṇa, I see assembled in Your body all the demigods and various other living entities. I see Brahmā sitting on the lotus flower, as well as Lord Śiva and all the sages and divine serpents."

अर्जुनः **Arjuna** ⟨1.1⟩ m. *arjuna* – white, 'who is pure in actions'

उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak

पश्यामि **I see** ⟨*acyuta* 3.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see

देवान् **the *devas*** ⟨2.3⟩ m. *deva* – divine being

तव **your** ⟨6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

देव **O Lord!** ⟨8.1⟩ m. *deva* – divine being

देहे **in the body** ⟨7.1⟩ m. *deha* – body

सर्वान् **all** ⟨2.3⟩ m. *kṛṣṇanāma sarva*

तथा **so** ⟨*avyaya*⟩

भूत-विशेष-सङ्घान् **hosts of various beings** ⟨2.3⟩ m. *bhūta-viśeṣa-saṅgha*...भूतानाम् विशेषाणाम् सङ्घः इति भूत-विशेष-सङ्घः – a group of various beings

ब्रह्माणम् **Brahmā** ⟨2.1⟩ m. *brahman*

ईशम् **Śiva** ⟨2.1⟩ m. *īśa* – the lord

The word *īśa* (lord) has been taken by different Sanskrit commentators as either Śiva, Viṣṇu, or an adjective for Brahmā.

कमलासन-स्थम् **who is situated on a lotus-seat** ⟨2.1⟩ m. *kamala-_āsana-stha*...यः कमलस्य आसने तिष्ठति, सः कमलासन-स्थः

ऋषीन् **sages** ⟨2.3⟩ m. *ṛṣi* – sage

च **and** ⟨*avyaya*⟩

सर्वान् **all** ⟨2.3⟩ m. *kṛṣṇanāma sarva*

उरगान् **serpents** ⟨2.3⟩ m. *uraga* (*ura* + *ga*) – 'breast-going', serpent; a Nāga

दिव्यान् **divine** ⟨2.3⟩ m. *divya*

Subodhinī: हे देव ! तव देहे देवान् (आदित्यादीन्) पश्यामि, तथा सर्वान् भूत-विशेषाणाम् (जरायुज-अण्डजादीनाम्) सङ्घान् च, तथा दिव्यान् ऋषीन् (वसिष्ठादीन्) उरगान् च (तक्षकादीन्), तथा तेषाम् देवानाम् ईशम् (स्वामिनम्) ब्रह्माणम् च । कथम्-भूतम् ? कमल-आसन-स्थम्, पृथ्वी-पद्म-कर्णिकायाम् मेरौ स्थितम्, यद्वा त्वद्-नाभि-पद्म-आसन-स्थम् ॥११.१५॥

11.16

अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनन्तरूपम् ।
नान्तं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूप ॥१६॥

अनेक-बाहूदर-वक्त्र-नेत्रम्	having many arms, bellies, mouths and eyes
सर्वतः अनन्त-रूपम्	having unlimited forms on all sides
त्वाम् पश्यामि	I see You,
हे विश्वेश्वर विश्व-रूप !	O Lord, Universal Form!
तव न अन्तम् न मध्यम्	neither your end, nor middle
न पुनः तव आदिम् पश्यामि ।	and not the beginning I see

"O Lord of the universe, O universal form, I see in Your body many, many arms, bellies, mouths and eyes, expanded everywhere, without limit. I see in You no end, no middle and no beginning."

अनेक-बाहूदर-वक्त्र-नेत्रम् **whose are many arms, bellies, mouths and eyes** ⟨2.1⟩ m. *aneka-bāhu-_udara-vaktra-netra*...अनेकानि बाहूदर-वक्त्र-नेत्राणि यस्य, सः अनेक-बाहूदर-वक्त्र-नेत्रः

पश्यामि **I see** ⟨*acyuta* 3.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see

त्वाम् **you** ⟨2.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

सर्वतः **everywhere** ⟨*avyaya*⟩ (*sarvatas*; *sarva* + *_tas[i]*) – 'from all', on all sides

अनन्त-रूपम् **whose forms are unlimited** ⟨2.1⟩ m. *ananta-rūpa*...अनन्तानि रूपाणि यस्य, सः अनन्त-रूपः

न **not** ⟨*avyaya*⟩

अन्तम् **end** ⟨2.1⟩ m. *anta*

मध्यम् **middle** ⟨2.1⟩ n. *madhya*

पुनः **again** ⟨*avyaya*⟩ (*punar*)

तव **your** ⟨6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

आदिम् **beginning** ⟨2.1⟩ m. *ādi*

पश्यामि **I see** ⟨*acyuta* 3.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see

विश्वेश्वर **O Lord!** ⟨8.1⟩ m. *viśva-_īśvara*...विश्वस्य ईश्वरः इति विश्वेश्वरः – 'lord of the universe'

विश्व-रूप **O Universal Form!** ⟨8.1⟩ m. *viśva-rūpa*...विश्वम् रूपम् यस्य, सः विश्व-रूपः – 'whose form is the universe'

Subodhinī: अनेकानि बाहु-आदीनि यस्य, तादृशम् त्वाम् पश्यामि । अनन्तानि रूपाणि यस्य तम्, त्वाम् सर्वतः पश्यामि । तव तु अन्तम् मध्यम् आदिम् च न पश्यामि, सर्व-गतत्वात् ॥११.१६॥

11.17

किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमन्तम् ।
पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्दीप्तानलार्कद्युतिमप्रमेयम् ॥१७॥

किरीटिनम् गदिनम् चक्रिणम् च	with crown, club and disc
तेजोराशिम्, सर्वतः दीप्तिमन्तम्	a mass of light, shining on all sides
दुर्निरीक्ष्यम् दीप्तानलार्क-द्युतिम्	with a blinding lustre of blazing fire and the sun
अ-प्रमेयम्	[and therefore] immeasurable
त्वाम् समन्तात् पश्यामि ।	I see You everywhere

"Your form is difficult to see because of its glaring effulgence, spreading on all sides, like blazing fire or the immeasurable radiance of the sun. Yet I see this glowing form everywhere, adorned with various crowns, clubs and discs."

किरीटिनम् **who has a diadem or crown** ⟨2.1⟩ m. *kirīṭin (kirīṭī)*
गदिनम् **who has a club** ⟨2.1⟩ m. *gadin (gadī)*
चक्रिणम् **who has a disc** ⟨2.1⟩ m. *cakrin (cakrī)*
च **and** ⟨*avyaya*⟩
तेजोराशिम् **a mass of light** ⟨2.1⟩ m. *tejaḥ-_rāśi*...तेजसः राशिः इति तेजोराशिः
सर्वतः **everywhere** ⟨*avyaya*⟩ (*sarvatas*; *sarva* + *.tas[i]*) – 'from all', on all sides
दीप्तिमन्तम् **shining** ⟨2.1⟩ m. *dīptimat (.mat[u])* – 'having *dīpti* (light)'
पश्यामि **I see** ⟨*acyuta* 3.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see
त्वाम् **you** ⟨2.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
दुर्निरीक्ष्यम् **who is difficult to behold** ⟨2.1⟩ m. *durnirīkṣya (dur.nir.√īkṣ[a]* – to look at with difficulty; + *.ya)*
समन्तात् **everywhere** ⟨*avyaya*⟩
दीप्तानलार्क-द्युतिम् **whose lustre is like blazing fire and the sun** ⟨2.1⟩ m. *dīpta-_anala-_arka-dyuti*...दीप्तयोः अनलार्कयोः इव द्युतिः यस्य, सः दीप्तानलार्क-द्युतिः
अ-प्रमेयम् **who is immeasurable** ⟨2.1⟩ m. *a-prameya*

Subodhinī: किरीटिनम् (मुकुटवन्तम्), गदिनम् (गदावन्तम्), चक्रिणम् (चक्रवन्तम्) च । सर्वतः दीप्तिमन्तम्, तेजः-पुञ्ज-रूपम् च । तथा दुर्निरीक्ष्यम् (द्रष्टुम् अ-शक्यम्) । तत्र हेतुः – दीप्तयोः अनल-अर्कयोः द्युतिः इव, द्युतिः (तेजः) यस्य तम् । अतएव अ-प्रमेयम् एवम्-भूतः इति निश्चेतुम् अ-शक्यम् त्वाम् समन्ततः पश्यामि ॥११.१७॥
यस्मात् एवम् तव अ-तर्क्यम् ऐश्वर्यम्, तस्मात् – 'त्वम्' इति –

11.18

त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम् ।
त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे ॥१८॥

त्वम् अ-क्षरम् परमम् वेदितव्यम्,	You are the imperishable supreme object of knowledge,
त्वम् अस्य विश्वस्य परम् निधानम्,	You are the ultimate resting place of this universe,
त्वम् अ-व्ययः	You are unchangeable
शाश्वत-धर्म-गोप्ता,	the protector of the eternal religion,
त्वम् सनातनः पुरुषः मे (मम) मतः ।	You are considered by me to be the eternal Lord

"You are the supreme primal objective. You are the ultimate resting place of all this universe. You are inexhaustible, and You are the oldest. You are the maintainer of the eternal religion, the Personality of Godhead. This is my opinion."

त्वम् **you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
अ-क्षरम् **imperishable** ⟨1.1⟩ n. *a-kṣara* – indestructible
परमम् **supreme** ⟨1.1⟩ n. *parama* – highest
वेदितव्यम् **which is to be known** ⟨1.1⟩ n. *veditavya* (√*vid[a]* 2P...ज्ञाने – to know; + *.tavya*) – to be known
त्वम् **you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
अस्य **of this** ⟨6.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this
विश्वस्य **of the universe** ⟨6.1⟩ n. *viśva* – universe
परम् **supreme** ⟨1.1⟩ n. *para* – beyond
निधानम् **the resting place** ⟨1.1⟩ n. *nidhāna*
त्वम् **you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
अ-व्ययः **who is unchangeable** ⟨1.1⟩ m. *a-vyaya* – unchangeable, imperishable
शाश्वत-धर्म-गोप्ता **the protector of the eternal religion** ⟨1.1⟩ m. *śāśvata-dharma-goptṛ (-goptā, .tṛ[n])*...शाश्वतस्य धर्मस्य गोप्ता इति शाश्वत-धर्म-गोप्ता
सनातनः **eternal** ⟨1.1⟩ m. *sanātana*
त्वम् **you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
पुरुषः **person** ⟨1.1⟩ m. *puruṣa*
मतः **considered** ⟨1.1⟩ m. *mata* (√*man[a]* 4A...बोधने – to know, think; + *.[k]ta*) – thought
मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I

Subodhinī: त्वम् एव अ-क्षरम् परमम् (ब्रह्म) कथम्-भूतम् ? वेदितव्यम् (मुमुक्षुभिः ज्ञातव्यम्) । त्वम् एव अस्य विश्वस्य परम् निधानम्, निधीयते अस्मिन् इति निधानम्, प्रकृष्टः आश्रयः । अतएव त्वम् अ-व्ययः (नित्यः) शाश्वतस्य (नित्यस्य) धर्मस्य गोप्ता (पालकः), सनातनः (चिरन्तनः) पुरुषः मे (मम) मतः (सम्मतः) असि ॥११.१८॥

11.19

अनादिमध्यान्तमनन्तवीर्यमनन्तबाहुं शशिसूर्यनेत्रम् ।
पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपन्तम् ॥१९॥

अनादि-मध्यान्तम्	as one without beginning, middle, or end
अनन्त-वीर्यम् अनन्त-बाहुम्	with unlimited strength and innumerable arms
शशि-सूर्य-नेत्रम्	with moon and sun as eyes
दीप्त-हुताश-वक्त्रम्	blazing fire in the mouths
स्व-तेजसा इदम् विश्वम् तपन्तम्	scorching this universe with Your own radiance
त्वाम् पश्यामि	I see You

"You are without origin, middle or end. Your glory is unlimited. You have numberless arms, and the sun and moon are Your eyes. I see You with blazing fire coming forth from Your mouth, burning this entire universe by Your own radiance."

अनादि-मध्यान्तम् **who has no beginning, middle, or end** ⟨2.1⟩ m. *an-ādi-madhya-anta*...न आदिः मध्यम् अन्तः च यस्य, सः अनादि-मध्यान्तः

अनन्त-वीर्यम् **whose strength is unlimited** ⟨2.1⟩ m. *ananta-vīrya*...अनन्तम् वीर्यम् यस्य, सः अनन्त-वीर्यः

अनन्त-बाहुम् **whose arms are innumerable** ⟨2.1⟩ m. *ananta-bāhu*...अनन्ताः बाहवः यस्य, सः अनन्त-बाहुः

शशि-सूर्य-नेत्रम् **whose eyes are moon and sun** ⟨2.1⟩ m. *śaśi-sūrya-netra*...शशि-सूर्यौ नेत्रे यस्य, सः शशि-सूर्य-नेत्रः

पश्यामि **I see** ⟨*acyuta* 3.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see

त्वाम् **you** ⟨2.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

दीप्त-हुताश-वक्त्रम् **in whose mouths is blazing fire** ⟨2.1⟩ m. *dīpta-hutāśa-vaktra*...दीप्तः हुताशः वक्त्रेषु यस्य, सः दीप्त-हुताश-वक्त्रः
हुताश (*huta-āśa*) – 'oblation-eater', fire

स्व-तेजसा **with the own radiance** ⟨3.1⟩ n. *sva-tejas (-tejaḥ)* – own radiance

विश्वम् **the universe** ⟨2.1⟩ n. *viśva*

इदम् **this** ⟨2.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this

तपन्तम् **who is scorching** ⟨2.1⟩ m. *tapat* (√*tap[a]*...सन्तापे ऐश्वर्ये वा – to heat, burn; lord; + *.[ś]at[r]*) – [while] scorching

Subodhinī: अनादि-मध्य-अन्तम् (उत्पत्ति-स्थिति-लय-रहितम्) । अनन्त-वीर्यम्, अनन्तम् वीर्यम् प्रभावः यस्य तम् । अनन्त-बाहुम् अनन्ताः वीर्यवन्तः बाहवः यस्य तम् । शशि-सूर्यौ नेत्रे यस्य, तादृशम् त्वाम् पश्यामि । तथा दीप्तः हुत-आशः (अग्निः) वक्त्रेषु यस्य तम् । स्व-तेजसा इदम् विश्वम् तपन्तम् (सन्तापयन्तम्) पश्यामि ॥११.१९॥

11.20

द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः ।
दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन् ॥२०॥

हे महात्मन् !	O Kṛṣṇa!
द्यावा-पृथिव्योः इदम् अन्तरम्	the space between heaven and earth
त्वया एकेन व्याप्तम् हि,	is pervaded by You alone,
सर्वाः दिशः च,	as are also all directions,
तव इदम् अद्भुतम् उग्रम् रूपम् दृष्ट्वा	[after] seeing this Your wonderful terrible form
लोक-त्रयम् प्रव्यथितम् ।	the three worlds are perturbed

"Although You are one, You spread throughout the sky and the planets and all space between. O great one, seeing this wondrous and terrible form, all the planetary systems are perturbed."

द्यावा-पृथिव्योः **between heaven and earth** ⟨7.2⟩ f. *dyāvā-pṛthivī* – sky and earth
Dyāvā is a Vedic form of *div* (sky).

इदम् **this** ⟨1.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this

अन्तरम् **space** ⟨1.1⟩ n. *antara* – interior, difference

हि **indeed** ⟨*avyaya*⟩

व्याप्तम् **pervaded** ⟨1.1⟩ n. *vyāpta* (*vi.*√*āp[l]* – to pervade; + *.[k]ta*)

त्वया **by you** ⟨3.1⟩ *kṛṣnanāma yuṣmad* – (middle person) you

एकेन **by one** ⟨3.1⟩ m. *kṛṣnanāma eka* – one

दिशः **directions** ⟨1.3⟩ f. *diś (dik)* – direction

च **and** ⟨*avyaya*⟩

सर्वाः **all** ⟨1.3⟩ f. *kṛṣṇanāma sarvā (.ā[p])*

दृष्ट्वा **[after] seeing** ⟨*avyaya*⟩ √*dṛś[ir]*...प्रेक्षणे – to see + *.[k]tvā*

अद्भुतम् **wonderful** ⟨2.1⟩ n. *adbhuta*

रूपम् **form** ⟨2.1⟩ n. *rūpa*

उग्रम् **terrible** ⟨2.1⟩ n. *ugra*

तव **your** ⟨6.1⟩ *kṛṣnanāma yuṣmad* – (middle person) you

इदम् **this** ⟨2.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this

लोक-त्रयम् **the three worlds** ⟨1.1⟩ n. *loka-traya*...लोकानाम् त्रयम् इति लोक-त्रयम् – 'the triad of worlds'

प्रव्यथितम् **perturbed** ⟨1.1⟩ n. *pravyathita* (*pra.√vyath[a]* – to be perturbed; + *.[k]ta*)

महात्मन् **O Kṛṣṇa!** ⟨8.1⟩ m. *mahā-ātman* (*-ātmā*) – 'great soul'

Subodhinī: द्यावा-पृथिव्योः इदम् अन्तरम् हि (अन्तरिक्षम्) त्वया एकेन व्याप्तम्, दिशः च सर्वाः व्याप्ताः । अद्भुतम् (अदृष्ट-पूर्वम्) त्वदीयम् इदम् उग्रम् (घोरम्) रूपम् दृष्ट्वा, लोक-त्रयम् प्रव्यथितम् (अतिभीतम्) 'पश्यामि' इति पूर्वस्य एव अनुषङ्गः ॥११.२०॥

11.21

अमी हि त्वां सुरसङ्घा विशन्ति केचिद्भीताः प्राञ्जलयो गृणन्ति ।
स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः ॥२१॥

अमी सुर-सङ्घाः हि त्वाम् विशन्ति,	those hosts of *devas* enter into You,
केचिद् भीताः प्राञ्जलयः गृणन्ति,	some, being afraid, pray with folded hands,
महर्षि-सिद्ध-सङ्घाः	the hosts of great sages and Siddhas
स्वस्ति इति उक्त्वा	[after] calling out 'peace'
पुष्कलाभिः स्तुतिभिः त्वाम् स्तुवन्ति ।	they praise You with many prayers

"All the hosts of demigods are surrendering before You and entering into You. Some of them, very much afraid, are offering prayers with folded hands. Hosts of great sages and perfected beings, crying "All peace!" are praying to You by singing the Vedic hymns."

अमी **those** ⟨1.3⟩ m. *kṛṣnanāma adas* – that

हि **indeed** ⟨*avyaya*⟩

त्वाम् **you** ⟨2.1⟩ *kṛṣnanāma yuṣmad* – (middle person) you

सुर-सङ्घाः **hosts of *devas*** ⟨1.3⟩ m. *sura-saṅgha* – a host of *devas*

विशन्ति **they enter** ⟨*acyuta* 1.3⟩ *√viś[a]*...प्रवेशने – to enter

केचिद् **some** ⟨1.3⟩ m. *kṛṣnanāma kim* (*kaḥ*) + *.cid* – someone, something

भीताः **who are afraid** ⟨1.3⟩ m. *bhīta* (*√[ñi]bhī*...भये – to fear; + *.[k]ta*) – afraid, fearful

प्राञ्जलयः **with folded hands** ⟨1.3⟩ m. *prāñjali* (*pra._añjali*) – joined palms

गृणन्ति **they call out** ⟨*acyuta* 1.3⟩ *√gṝ* 9U...शब्दे – to sound, praise

स्वस्ति **peace** ⟨*avyaya*⟩ (*su.asti*) – 'well-being', hail

इति **thus** ⟨*avyaya*⟩

उक्त्वा **[after] speaking** ⟨*avyaya*⟩ *√vac[a]*...परिभाषणे – to speak; + *.[k]tvā*

महर्षि-सिद्ध-सङ्घाः **hosts of great sages and Siddhas** ⟨1.3⟩ m. *mahā-_ṛṣi-siddha-saṅgha*...महर्षीणाम् च सिद्धानाम् च सङ्घः इति महर्षि-सिद्ध-सङ्घः

स्तुवन्ति **they praise** ⟨*acyuta* 1.3⟩ *√stu[ñ]*...स्तुतौ – to praise

त्वाम् **you** ⟨2.1⟩ *kṛṣnanāma yuṣmad* – (middle person) you

स्तुतिभिः **with prayers** ⟨3.3⟩ f. *stuti* – prayer, hymn of praise

Other words for 'prayer': *stava, stotra.*

पुष्कलाभिः **with many** ⟨3.3⟩ f. *puṣkalā* (*.ā[p]*) – many, abundant; excellent, poweful; loud

Subodhinī: अमी सुर-सङ्घाः भीताः सन्तः, त्वाम् विशन्ति (शरणम् प्रविशन्ति) । तेषाम् मध्ये केचिद् अतिभीताः दूरतः एव स्थित्वा, कृत-सम्पुट-कर-युगलाः सन्तः गृणन्ति, 'जय जय रक्ष रक्ष' इति प्रार्थयन्ते । स्पष्टम् अन्यत् ॥११.२१॥

11.22

रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ।
गन्धर्वयक्षासुरसिद्धसङ्घा वीक्षन्ते त्वां विस्मिताश्चैव सर्वे ॥२२॥

रुद्रादित्याः वसवः ये च साध्याः	the Rudras, Ādityas, Vasus and those called Sādhyas
विश्वे अश्विनौ मरुतः ऊष्म-पाः च	the Viśvedevas, the two Aśvinīs, the Maruts and Pitṛs
गन्धर्व-यक्षासुर-सिद्ध-सङ्घाः च	the hosts of Gandharvas, Yakṣas, Asuras and Siddhas
सर्वे एव च विस्मिताः त्वाम् वीक्षन्ते ।	all of them look at You in surprise

"All the various manifestations of Lord Śiva, the Ādityas, the Vasus, the Sādhyas, the Viśvedevas, the two Aśvīs, the Maruts, the forefathers, the Gandharvas, the Yakṣas, the Asuras and the perfected demigods are beholding You in wonder."

रुद्रादित्याः **Rudras and Ādityas** ⟨1.3⟩ m. *rudra-_āditya*

वसवः **Vasus** ⟨1.3⟩ m. *vasu* – a Vasus

ये **those who** ⟨1.3⟩ m. *kṛṣnanāma yad* – (relative) who, which

च **and** ⟨*avyaya*⟩

साध्याः **Sādhyas** ⟨1.3⟩ m. *sādhya* – a Sādhya

विश्वे **Viśve-devas** ⟨1.3⟩ m. *viśve* – *viśve-deva*, a particular group of *devas*

अश्विनौ **Aśvinīs** ⟨1.2⟩ m. *aśvin* (*aśvī*) – an Aśvī, Aśvinī-kumāra

मरुतः **Maruts** ⟨1.3⟩ m. *marut* – a Marut

ऊष्मपाः **Pitrs** ⟨1.3⟩ m. *ūsma-pa* – 'imbibing the steam [of hot food]', i.e. they take the food so long as it is hot; name of a particular group of Pitrs

गन्धर्व-यक्षासुर-सिद्ध-सङ्घाः **hosts of Gandharvas, Yakṣas, Asuras and Siddhas** ⟨1.3⟩ m. *gandharva-yakṣa-_a-sura-siddha-saṅgha*...गन्धर्वाणाम् च यक्षाणाम् च • अ-सुराणाम् च सिद्धानाम् च सङ्घः इति गन्धर्व-यक्षासुर-सिद्ध-सङ्घः

वीक्षन्ते **they look at** ⟨*acyuta* 1.3⟩ *vi.√īkṣ[a]* – to look at

त्वाम् **you** ⟨2.1⟩ *kṛṣnanāma yuṣmad* – (middle person) you

विस्मिताः **who are surprised** ⟨1.3⟩ m. *vismita* (*vi.√smi[ṅ]* – to smile, be surprised; + *.[k]ta*) – surprised

च **and** ⟨*avyaya*⟩

एव **certainly** ⟨*avyaya*⟩

सर्वे **all** ⟨1.3⟩ m. *kṛṣnanāma sarva*

Subodhinī: रुद्राः च आदित्याः च वसवः च ये च साध्याः नाम देवाः, विश्वे-देवाः, अश्विनौ देवौ, मरुतः (मरुत्-गणाः), ऊष्माणम् पिबन्ति इति ऊष्म-पाः पितरः, [...] गन्धर्वाः च यक्षाः च असुराः च (विरोचनादयः), सिद्धानाम् सङ्घाः च, ते सर्वे एव हि विस्मिताः सन्तः त्वाम् वीक्षन्ते इति अन्वयः ॥११.२२॥

11.23

रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम् ।
बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहम् ॥२३॥

हे महा-बाहो !	O Lord!
बहु-वक्त्र-नेत्रम् बहु-बाहूरु-पादम्	with many mouths, eyes, arms, thighs and feet
बहूदरम् बहु-दंष्ट्रा-करालम्	with many bellies and dreadful with many tusks
ते (तव) महत् रूपम् दृष्ट्वा	[after] seeing Your great form
लोकाः प्रव्यथिताः,	the worlds are perturbed,
तथा अहम् ।	and so am I

"O mighty-armed one, all the planets with their demigods are disturbed at seeing Your great form, with its many faces, eyes, arms, thighs, legs, and bellies and Your many terrible teeth; and as they are disturbed, so am I."

रूपम् **the form** ⟨2.1⟩ n. *rūpa*

महत् **great** ⟨2.1⟩ n. *mahat[u]*

ते **your** ⟨opt. for *tava* 6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

बहु-वक्त्र-नेत्रम् **in which are many mouths and eyes** ⟨2.1⟩ n. *bahu-vaktra-netra*...बहूनि वक्त्र-नेत्राणि यस्मिन्, तद् बहु-वक्त्र-नेत्रम्

महा-बाहो **O Lord!** ⟨8.1⟩ m. *mahā-bāhu* – 'who has mighty arms'

बहु-बाहूरु-पादम् **in which are many arms, thighs and feet** ⟨2.1⟩ n. *bahu-bāhu-_ūru-pāda*...बहवः बाहवः ऊरवः पादाः च यस्मिन्, तद् बहु-बाहूरु-पादम्

बहूदरम् **in which are many bellies** ⟨2.1⟩ n. *bahu-_udara*...बहूनि उदराणि यस्मिन्, तद् बहूदरम्

बहु-दंष्ट्रा-करालम् **which is dreadful with many tusks** ⟨2.1⟩ n. *bahu-daṃṣṭrā-karāla*...बहु-दंष्ट्राभिः करालम् यद्, तद् बहु-दंष्ट्रा-करालम्

दंष्ट्रा (from √*daś[i]*...दशने – to bite) – a large tooth, tusk

कराल – opening wide, gaping; formidable, dreadful

दृष्ट्वा **[after] seeing** ⟨*avyaya*⟩ √*dṛś[ir]*...प्रेक्षणे – to see; + .*[k]tvā*

लोकाः **the worlds** ⟨1.3⟩ m. *loka* – place, world, people

प्रव्यथिताः **which are perturbed** ⟨1.3⟩ m. *pravyathita* (*pra.*√*vyath[a]* – to be perturbed; + .*[k]ta*) – perturbed

तथा **so** ⟨*avyaya*⟩

अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

Subodhinī: हे महा-बाहो, महत् (अत्यूर्जितम्) तव रूपम् दृष्ट्वा, लोकाः सर्वे प्रव्यथिताः (अतिभीताः), तथा अहम् च प्रव्यथितः अस्मि । कीदृशम् रूपम् दृष्ट्वा ? बहूनि वक्त्राणि नेत्राणि च यस्मिन् तद् । बहवः बाहवः ऊरवः पादाः च यस्मिन् तद् । बहूनि उदराणि यस्मिन् तद् । बहुभिः दंष्ट्राभिः करालम् (विकृतम्) रौद्रम् इति अर्थः ॥११.२३॥
न केवलम् भीतः अहम् इति एतावत् एव, अपितु – 'नभः-स्पृशम्' इति –

11.24

नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम् ।
दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो ॥२४॥

हे विष्णो !	O Lord!
नभः-स्पृशम् दीप्तम् अनेक-वर्णम्	touching the sky, blazing, many-colored,
व्यात्ताननम् दीप्त-विशाल-नेत्रम्	with gaping mouths and large glowing eyes
त्वाम् हि दृष्ट्वा	[after] seeing You
प्रव्यथितान्तरात्मा	being perturbed at heart
धृतिम् शमम् च न विन्दामि ।	I can not find patience and peace

"O all-pervading Viṣṇu, seeing You with Your many radiant colors touching the sky, Your gaping mouths, and Your great glowing eyes, my mind is perturbed by fear. I can no longer maintain my steadiness or equilibrium of mind."

नभः-स्पृशम् **who touches the sky** ⟨2.1⟩ m. *nabhaḥ-spṛś* (-*spṛk*)...नभः स्पृशति इति नभः-स्पृक्

दीप्तम् **who is blazing** ⟨2.1⟩ m. *dīpta* (√*dīp[ī]*...दीप्तौ – to shine, kindle; + .*[k]ta*)

अनेक-वर्णम् **who has many colors** ⟨2.1⟩ m. *aneka-varṇa*...अनेके वर्णाः यस्य, सः अनेक-वर्णः

व्यात्ताननम् **whose mouths are gaping** ⟨2.1⟩ m. *vyātta-_ānana*...व्यात्तानि आननानि यस्य, सः व्यात्ताननः

व्यात्त (*vi.ā.*√*[du]dā[ñ]* – to open wide; + .*[k]ta*) – wide opened

दीप्त-विशाल-नेत्रम् **whose eyes are blazing and large** ⟨2.1⟩ m. *dīpta-viśāla-netra*...दीप्तानि विशालानि नेत्राणि यस्य, सः दीप्त-विशाल-नेत्रः

दृष्ट्वा **[after] seeing** ⟨*avyaya*⟩ √*dṛś[ir]*...प्रेक्षणे – to see; + .*[k]tvā*

हि **indeed** ⟨*avyaya*⟩

त्वाम् **you** ⟨2.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

प्रव्यथितान्तरात्मा **whose mind is perturbed** ⟨1.1⟩ m. *pravyathita-_antaḥ-_ātman* (-*ātmā*)...प्रव्यथितः अन्तरात्मा यस्य, सः प्रव्यथितान्तरात्मा

धृतिम् **determination** ⟨2.1⟩ f. *dhṛti* – firmness, patience

न	**not** ⟨*avyaya*⟩
विन्दामि	**I obtain** ⟨*acyuta* 3.1⟩ √*vid[ḷ]*...लाभे – to obtain
शमम्	**peace** ⟨2.1⟩ m. *śama* – peace, mind-control
च	**and** ⟨*avyaya*⟩
विष्णो	**O Lord!** ⟨8.1⟩ m. *viṣṇu* – Śrī Viṣṇu, 'who pervades everything'

Subodhinī: नभः स्पृशति इति नभः-स्पृक् तम्, अन्तरिक्ष-व्यापिनम् इति अर्थः। दीप्तम् तेजः-युक्तम्। अनेके वर्णाः यस्य तम् अनेक-वर्णम्। व्यात्तानि (विवृतानि) आननानि यस्य तम्। दीप्तानि विशालानि नेत्राणि यस्य तम्। एवम्-भूतम् त्वाम् दृष्ट्वा, प्रव्यथितः अन्तरात्मा (मनः) यस्य सः, अहम् धृतिम् (धैर्यम्) उपशमम् च न लभे ॥११.२४॥

11.25

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि ।
दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास ॥२५॥

दंष्ट्रा-करालानि	dreadful with tusks
कालानल-सन्निभानि च	and blazing like the fire of dissolution
ते (तव) मुखानि दृष्ट्वा एव	[after] seeing Your mouths
दिशः न जाने,	I do not know the directions,
शर्म च न लभे,	and I do not get happiness,
हे देवेश जगन्निवास !	O Lord!
प्रसीद !	be merciful!

"O Lord of lords, O refuge of the worlds, please be gracious to me. I cannot keep my balance seeing thus Your blazing deathlike faces and awful teeth. In all directions I am bewildered."

दंष्ट्रा-करालानि	**which are dreadful with tusks** ⟨2.3⟩ n. *daṃṣṭrā-karāla*...दंष्ट्राभिः करालम् यद्, तद् दंष्ट्रा-करालम् – which is dreadful with tusks
च	**and** ⟨*avyaya*⟩
ते	**your** ⟨opt. for *tava* 6.1⟩ *kṛṣnanāma yuṣmad* – (middle person) you
मुखानि	**mouths** ⟨2.3⟩ n. *mukha* – mouth
दृष्ट्वा	**[after] seeing** ⟨*avyaya*⟩ √*dṛś[ir]*...प्रेक्षणे – to see; + .*[k]tvā*
एव	**certainly** ⟨*avyaya*⟩
कालानल-सन्निभानि	**which resemble the fire of dissolution** ⟨2.3⟩ n. *kāla-_anala-sannibha*...कालानलस्य सन्निभम् इति कालानल-सन्निभम् – which resembles the fire of destruction

	कालानल (*kāla-_anala*) – the 'fire of time', i.e. the fire which consumes the world at the time of dissolution
	सन्निभ – like, resembling
दिशः	**directions** ⟨2.3⟩ f. *diś* (*dik*) – direction
न	**not** ⟨*avyaya*⟩
जाने	**I know** ⟨*acyuta* 3.1⟩ √*jñā* 9U...अवबोधने – to know
लभे	**I obtain** ⟨*acyuta* 3.1⟩ √*[du]labh[aṣ]*...प्राप्तौ – to obtain
शर्म	**happiness** ⟨2.1⟩ n. *śarman* (*śarma*) – shelter, protection; joy, happiness; often at the end of names of *brāhmaṇas*, just as *varman* (protection) is added to names of *kṣatriyas*, and *gupta* (secret) to those of Vaiśyas
प्रसीद	**be merciful!** ⟨*vidhātā* 2.1⟩ *pra.*√*sad[ḷ]* – to settle down, (applied to the mind:) to become satisfied
देवेश	**O Lord!** ⟨8.1⟩ m. *deva-_īśa*...देवानाम् ईशः इति देवेशः – 'Lord of the *devas*'
जगन्निवास	**O Lord!** ⟨8.1⟩ m. *jagat-_nivāsa*...जगतः निवासः इति जगन्निवासः – 'who is the shelter of the world'

Subodhinī: भो देव-ईश, तव मुखानि दृष्ट्वा, भय-आवेशेन दिशः न जानामि, शर्म (सुखम्) च न लभे। भो जगत्-निवास, प्रसन्नः भव। कीदृशानि मुखानि ? दंष्ट्राभिः करालानि। काल-अनलः (प्रलय-अग्निः) तद्-सदृशानि ॥११.२५॥
'यद् च अन्यत् द्रष्टुम् इच्छसि' (11.7) इति अनेन अस्मिन् सङ्ग्रामे भावि-जय-पराजयादिकम् च 'मम देहे पश्य' इति यद् भगवत-उक्तम्, तद् इदानीम् पश्यन् आह – 'अमी च' इति पञ्चभिः –

11.26-27

अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसङ्घैः ।
भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः ॥२६॥
वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनान्तरेषु सन्दृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥२७॥

अमी च सर्वे धृतराष्ट्रस्य पुत्राः	and all those sons of Dhṛtarāṣṭra
अवनि-पाल-सङ्घैः सह एव	along with hosts of kings
भीष्मः द्रोणः तथा असौ सूत-पुत्रः	Bhīṣma, Drona, and also that Karṇa
अस्मदीयैः योध-मुख्यैः अपि सह	along with our generals also
त्वाम् त्वरमाणाः	[while] rushing towards You
ते (तव) दंष्ट्रा-करालानि भयानकानि वक्त्राणि	Your horrible mouths with dreadful teeth
विशन्ति,	they enter,
चूर्णितैः उत्तमाङ्गैः	with smashed heads

दशनान्तरेषु विलग्नाः	sticking between the teeth
केचिद् सन्दृश्यन्ते ।	some are seen

"All the sons of Dhṛtarāṣṭra, along with their allied kings, and Bhīṣma, Droṇa, Karṇa – and our chief soldiers also – are rushing into Your fearful mouths. And some I see trapped with heads smashed between Your teeth."

अमी **those** ⟨1.3⟩ m. *kṛṣṇanāma adas* – that
च **and** ⟨*avyaya*⟩
त्वाम् **to you** ⟨2.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
धृतराष्ट्रस्य **of Dhṛtarāṣṭra** ⟨6.1⟩ m. *dhṛtarāṣṭra* – King Dhṛtarāṣṭra
पुत्राः **the sons** ⟨1.3⟩ m. *putra* – son
सर्वे **all** ⟨1.3⟩ m. *kṛṣṇanāma sarva*
सह **together** ⟨*avyaya*⟩
एव **certainly** ⟨*avyaya*⟩
अवनि-पाल-सङ्घैः **with hosts of kings** ⟨3.3⟩ m. *avani-pāla-saṅgha*
अवनि-पाल – 'earth-protector', king
भीष्मः **Bhīṣma** ⟨1.1⟩ m. *bhīṣma* – 'awful'
द्रोणः **Droṇa** ⟨1.1⟩ m. *droṇa* – 'trough'
सूत-पुत्रः **Karṇa** ⟨1.1⟩ m. *sūta-putra*...सूतस्य पुत्रः इति सूत-पुत्रः – 'the son of a Sūta'
Sūta is a caste name of charioteers, heralds and attendants to a king. (See also 1.8)
तथा **so** ⟨*avyaya*⟩
असौ **that** ⟨1.1⟩ m. *kṛṣṇanāma adas*
सह **together** ⟨*avyaya*⟩
अस्मदीयैः **with ours** ⟨3.3⟩ m. *asmadīya* – our
अपि **also** ⟨*avyaya*⟩
योध-मुख्यैः **with generals** ⟨3.3⟩ m. *yodha-mukhya*...योधानाम् मुख्यः इति योध-मुख्यः – a chief of warriors, general

वक्त्राणि **mouths** ⟨2.3⟩ n. *vaktra* – mouth
ते **your** ⟨opt. for *tava* 6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
त्वरमाणाः **which are rushing** ⟨1.3⟩ m. *tvaramāna* (√*[ñi]tvar[ā]*...सम्भ्रमे – to rush; + *.[ś]āna*) – [while] rushing
विशन्ति **they enter** ⟨*acyuta* 1.3⟩ √*viś[a]*...प्रवेशने – to enter
दंष्ट्रा-करालानि **which are dreadful with tusks** ⟨2.3⟩ n. *daṃṣṭrā-karāla*...दंष्ट्राभिः करालम् यद्, तद् दंष्ट्रा-करालम् – which is dreadful with tusks
भयानकानि **which are dreadful** ⟨2.3⟩ n. *bhayānaka* – dreadful
केचिद् **some** ⟨1.3⟩ m. *kṛṣṇanāma kim (kaḥ) + .cid* – someone, something
विलग्नाः **who are stuck** ⟨1.3⟩ m. *vilagna* (*vi.*√*lag[e]* – to contact, stick; + *.[k]ta*) – stuck

दशनान्तरेषु **between the teeth** ⟨7.3⟩ m. *daśana-_antara*...दशनानाम् अन्तरः इति दशनान्तरः – in between the teeth
सन्दृश्यन्ते **they are seen** ⟨*acyuta* pass. 1.3⟩ *sam.*√*dṛś[ir]* – to look at, consider
चूर्णितैः **with crushed** ⟨3.3⟩ n. *cūrṇita* (√*cūrṇ[a]*...पेषणे – to grind; + *.[k]ta*) – ground, crushed
उत्तमाङ्गैः **with heads** ⟨3.3⟩ n. *uttama-_aṅga*...उत्तमम् अङ्गम् इति उत्तमाङ्गम् – 'the upper part', the head

Subodhinī: अमी धृतराष्ट्रस्य पुत्राः (दुर्योधनादयः) सर्वे, अवनि-पालानाम् (जयद्रथादीनाम् राज्ञाम्) सङ्घैः सह एव 'तव वक्त्राणि विशन्ति' (11.27) इति उत्तरेण अन्वयः । तथा भीष्मः च द्रोणः च असौ सूत-पुत्रः (कर्णः) च । न केवलम् ते एव विशन्ति, अपितु प्रतियोद्धारः ये अस्मदीयाः योध-मुख्याः (शिखण्डि-धृष्टद्युम्नादयः) तैः सह ॥११.२६॥ ये एते सर्वे त्वरमाणाः (धावन्तः), तव दंष्ट्राभिः करालानि वक्त्राणि विशन्ति, तेषाम् मध्ये केचिद् चूर्णी-कृतैः उत्तम-अङ्गैः (शिरोभिः) उपलक्षिताः, दन्त-सन्धिषु संश्लिष्टाः सन्दृश्यन्ते ॥११.२७॥
प्रवेशम् एव दृष्टान्तम् आह – 'यथा' इति –

11.28

यथा नदीनां बहवो ऽम्बुवेगाः समुद्रमेवाभिमुखा द्रवन्ति ।
तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभिविज्वलन्ति ॥२८॥

यथा नदीनाम् बहवः अम्बु-वेगाः	as the many currents of water of the rivers
समुद्रम् एव अभिमुखाः द्रवन्ति,	flow to the ocean alone,
तथा अमी नर-लोक-वीराः	so do those heroes among men
तव वक्त्राणि विशन्ति,	enter Your mouths,
अभिविज्वलन्ति ।	and they are blazing

"As the many waves of the rivers flow into the ocean, so do all these great warriors enter blazing into Your mouths."

यथा **as** ⟨*avyaya*⟩
नदीनाम् **of rivers** ⟨6.3⟩ f. *nadī* – river
बहवः **many** ⟨1.3⟩ m. *bahu*
अम्बु-वेगाः **currents of water** ⟨1.3⟩ m. *ambu-vega*...अम्बूनाम् वेगः इति अम्बु-वेगः – current of 'waters'
समुद्रम् **to the ocean** ⟨2.1⟩ m. *samudra* – ocean
एव **certainly** ⟨*avyaya*⟩
अभिमुखाः **which are approaching** ⟨1.3⟩ m. *abhimukha* – facing towards; approaching
द्रवन्ति **they flow** ⟨*acyuta* 1.3⟩ √*dru*...गतौ – to go, flow
तथा **so** ⟨*avyaya*⟩

तव **your** ⟨6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

अमी **those** ⟨1.3⟩ m. *kṛṣṇanāma adas* – that

नर-लोक-वीराः **heroes among men** ⟨1.3⟩ m. *nara-loka-vīra*...नर-लोके वीरः इति नर-लोक-वीरः – a hero in the world of men

विशन्ति **they enter** ⟨*acyuta* 1.3⟩ √*viś[a]*...प्रवेशने – to enter

वक्त्राणि **the mouths** ⟨2.3⟩ n. *vaktra* – mouth

अभिविज्वलन्ति **they are blazing** ⟨*acyuta* 1.3⟩ *abhi.vi.*√*jval[a]* – to blaze

(or else:) अभिविज्वलन्ति means 'which are blazing' ⟨2.3⟩ n. *abhivijvalat* (*abhi.vi.*√*jval[a]* – to blaze; + *.[ś]at[r]*) – [while] blazing; *abhivijvalanti vaktrāṇi* – blazing mouths

Subodhinī: नदीनाम् (अनेक-मार्ग-प्रवृत्तानाम्) बहवः अम्बूनाम् (वारीणाम्) वेगाः (प्रवाहाः) समुद्र-अभिमुखाः सन्तः, यथा समुद्रम् एव द्रवन्ति (प्रविशन्ति), तथा अमी ये नर-लोक-वीराः, ते अभिविज्वलन्ति (सर्वतः प्रदीप्यमानानि) तव वक्त्राणि प्रविशन्ति ॥११.२८॥

अवशत्वेन प्रवेशे नदी-वेगाः दृष्टान्तः उक्तः। बुद्धि-पूर्वक-प्रवेशे दृष्टान्तम् आह – 'यथा' इति –

11.29

यथा प्रदीप्तं ज्वलनं पतङ्गा विशन्ति नाशाय समृद्धवेगाः ।
तथैव नाशाय विशन्ति लोकास्तवापि वक्त्राणि समृद्धवेगाः ॥२९॥

यथा पतङ्गाः समृद्ध-वेगाः	as insects with great speed
नाशाय प्रदीप्तम् ज्वलनम् विशन्ति,	enter a blazing fire for destruction,
तथा एव लोकाः अपि समृद्ध-वेगाः	so also these pleople full speed
नाशाय तव वक्त्राणि विशन्ति ।	enter Your mouths for destruction

"I see all people rushing full speed into Your mouths, as moths dash to destruction in a blazing fire."

यथा **as** ⟨*avyaya*⟩

प्रदीप्तम् **blazing** ⟨2.1⟩ n. *pradīpta* (*pra.*√*dīp[ī]* – to shine, kindle; + *.[k]ta*)

ज्वलनम् **fire** ⟨2.1⟩ n. *jvalana* – 'burning', flame

पतङ्गाः **insects** ⟨1.3⟩ m. *pataṅga* – a flying insect

विशन्ति **they enter** ⟨*acyuta* 1.3⟩ √*viś[a]*...प्रवेशने – to enter

नाशाय **for destruction** ⟨4.1⟩ m. *nāśa* (from √*naś[a]*...अदर्शने – to disappear, perish) – destruction

समृद्ध-वेगाः **who have great speed** ⟨1.3⟩ m. *samṛddha-vega*...समृद्धः वेगः यस्य, सः समृद्ध-वेगः – whose speed is great

तथा **so** ⟨*avyaya*⟩

एव **certainly** ⟨*avyaya*⟩

नाशाय **for destruction** ⟨4.1⟩ m. *nāśa*

विशन्ति **they enter** ⟨*acyuta* 1.3⟩ √*viś[a]*...प्रवेशने – to enter

लोकाः **the people** ⟨1.3⟩ m. *loka* – place, world, people

तव **your** ⟨6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

अपि **also** ⟨*avyaya*⟩

वक्त्राणि **the mouths** ⟨2.3⟩ n. *vaktra* – mouth

समृद्ध-वेगाः **who have great speed** ⟨1.3⟩ m. *samṛddha-vega*

Subodhinī: प्रदीप्तम् ज्वलनम् (अग्निम्) पतङ्गाः (सूक्ष्म-पक्षि-विशेषाः) बुद्धि-पूर्वकम् समृद्धः वेगः येषाम् ते यथा नाशाय (मरणाय) एव विशन्ति, तथैव लोकाः (एते जनाः) अपि तव मुखानि प्रविशन्ति ॥११.२९॥

ततः किम् अतः आह – 'लेलिह्यसे' इति

11.30

लेलिह्यसे ग्रसमानः समन्ताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः ।
तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपन्ति विष्णो ॥३०॥

हे विष्णो !	O Lord!
समग्रान् लोकान्	all people
ज्वलद्भिः वदनैः ग्रसमानः	[while] devouring with flaming mouths
समन्तात् लेलिह्यसे,	You are licking on all sides,
तेजोभिः समग्रम् जगत् आपूर्य	[after] filling the whole world with its radiance
तव उग्राः भासः प्रतपन्ति ।	Your terrible effulgences are scorching

"O Viṣṇu, I see You devouring all people from all sides with Your flaming mouths. Covering all the universe with Your effulgence, You are manifest with terrible, scorching rays."

लेलिह्यसे **you are licking** ⟨*acyuta* 2.1, a 'intensive' form⟩ √*lih[a]*...आस्वादने – to taste, lick

ग्रसमानः **[while] eating** ⟨1.1⟩ m. *grasamāna* (√*gras[u]*...अदने – to eat; + *.[ś]āna*)

समन्तात् **everywhere** ⟨*avyaya*⟩

लोकान् **the people** ⟨2.3⟩ m. *loka* – place, world, people

समग्रान् **all** ⟨2.3⟩ m. *samagra* – all, each; entire, complete

वदनैः **with the mouths** ⟨3.3⟩ n. *vadana* – face, mouth

ज्वलद्भिः **with the flaming** ⟨3.3⟩ n. *jvalat* (√*jval[a]*...दीप्तौ – to shine, kindle; + *.[ś]at[r]*) – [while] shining, flaming

तेजोभिः **with radiance** ⟨3.3⟩ n. *tejas* (*tejaḥ*; from √*tij[a]*...निशाने क्षमायां च – to sharpen; tolerate) – sharpness; radiance, heat; brilliance, splendor; prowess, boldness; semen

आपूर्य **[after] filling** ⟨*avyaya*⟩ *ā.*√*pṝ* – to protect, nourish; fill; + *.ya[p]*

जगत्	**the universe** ⟨2.1⟩ n. *jagat*
समग्रम्	**whole** ⟨2.1⟩ n. *samagra* – all, each; entire, complete
भासः	**effulgences** ⟨1.3⟩ f. *bhās (bhāḥ)* – effulgence
तव	**your** ⟨6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
उग्राः	**terrible** ⟨1.3⟩ f. *ugrā (.ā[p])*
प्रतपन्ति	**they scorch** ⟨*acyuta* 1.3⟩ *pra.√tap[a]* – to scorch
विष्णो	**O Lord!** ⟨8.1⟩ m. *viṣṇu* – Śrī Viṣṇu, 'who pervades everything'

Subodhinī: ग्रसमानः (गिलन्), समग्रान् लोकान् (सर्वान् एतान् वीरान्) समन्तात् (सर्वतः) लेलिह्यसे (अतिशयेन भक्षयसि)। कैः ? ज्वलद्भिः वदनैः। किंच, हे विष्णो, तव भासः (दीप्तयः) तेजोभिः (विस्फुरणैः) समस्तम् जगत् व्याप्य, उग्राः (तीव्राः) सत्यः प्रतपन्ति (सन्तापयन्ति) ॥११.३०॥
यतः एवम् तस्मात् – 'आख्याहि' इति –

11.31

आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते देववर प्रसीद ।
विज्ञातुमिच्छामि भवन्तमाद्यं न हि प्रजानामि तव प्रवृत्तिम् ॥३१॥

उग्र-रूपः भवान् कः	who are You, of fierce form
मे (मह्यम्) आख्याहि !	tell me!
ते (तुभ्यम्) नमः अस्तु !	obeisances unto You!
हे देव-वर !	O Lord!
प्रसीद !	be merciful!
आद्यम् भवन्तम् विज्ञातुम् इच्छामि,	I want to understand You, the original being,
तव प्रवृत्तिम् हि न प्रजानामि ।	[because] I do not understand Your activity

"O Lord of lords, so fierce of form, please tell me who You are. I offer my obeisances unto You; please be gracious to me. You are the primal Lord. I want to know about You, for I do not know what Your mission is."

आख्याहि	**you must tell** ⟨*vidhātā* 2.1⟩ *ā.√khyā* – to tell
मे	**to me** ⟨opt. for *mahyam* 4.1⟩ *kṛṣṇanāma asmad* – (last person) I
कः	**who** ⟨1.1⟩ m. *kṛṣṇanāma kim* – who/what
भवान्	**you** ⟨1.1⟩ m. *bhavat[u]* – you (honorific)
उग्र-रूपः	**whose form is terrible** ⟨1.1⟩ m. *ugra-rūpa*...उग्रम् रूपम् यस्य, सः उग्र-रूपः
नमः	**obeisance** ⟨*avyaya*⟩ (*namas*; from *√nam[a]*...प्रह्वत्वे शब्दे च – to bow, be humble; sound) – reverential salutation (by gesture or word) (as in:) *namas-kāra* – the exclamation '*namaḥ*', salutation; (also from *√nam[a]*...प्रह्वत्वे शब्दे च) *namra* – 'bowing', submissive, humble; (derived:) *namratā* – being humble, humility

अस्तु	**it must be** ⟨*vidhātā* 1.1⟩ *√as[a]*...भुवि – to be, exist
ते	**to you** ⟨opt. for *tubhyam* 4.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
देव-वर	**O Lord** ⟨8.1⟩ m. *deva-vara*...देवानाम् वरः इति देववरः – 'best of the gods', Supreme Lord
प्रसीद	**be merciful!** ⟨*vidhātā* 2.1⟩ *pra.√sad[l]* – to settle down, (applied to the mind:) to become satisfied
विज्ञातुम्	**to understand** ⟨*avyaya*⟩ *vi.√jñā* – to understand; + *.tum[u]*
इच्छामि	**I desire** ⟨*acyuta* 3.1⟩ *√iṣ[u]*...इच्छायाम् – to wish, desire
भवन्तम्	**You** ⟨2.1⟩ m. *bhavat[u]* – you (honorific)
आद्यम्	**who is original** ⟨2.1⟩ m. *ādya* – 'being the first', original
न	**not** ⟨*avyaya*⟩
हि	**indeed** ⟨*avyaya*⟩
प्रजानामि	**I understand** ⟨*acyuta* 3.1⟩ *pra.√jñā* – to understand
तव	**your** ⟨6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
प्रवृत्तिम्	**activity** ⟨2.1⟩ f. *pravṛtti* – activity, tendency

Subodhinī: भवान् उग्र-रूपः कः ? इति आख्याहि (कथय)। ते (तुभ्यम्) नमः अस्तु, हे देववर, प्रसीद (प्रसन्नः भव)। भवन्तम् आद्यम् पुरुषम् विशेषेण ज्ञातुम् इच्छामि, यतः तव प्रवृत्तिम् च (इष्टाम्), किमर्थम् एवम प्रवृत्तः असि इति न जानामि। एवम्-भूतस्य तव प्रवृत्तिम् वार्ताम् अपि न जानामि इति वा ॥११.३१॥
एवम् प्रार्थितः सन् ।श्री-भगवान् उवाच। – 'कालः अस्मि' इति त्रिभिः –

11.32

श्रीभगवानुवाच

कालोऽस्मि लोकक्षयकृत्प्रवृद्धो लोकान्समाहर्तुमिह प्रवृत्तः ।
ऋतेऽपि त्वां न भविष्यन्ति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः ॥३२॥

श्री-भगवान् उवाच -	Śrī Kṛṣṇa said:
प्रवृद्धः लोक-क्षय-कृत् कालः अस्मि,	I am time, the mighty destroyer of the worlds,
लोकान् समाहर्तुम् इह प्रवृत्तः,	and engaged here to to destroy all these people,
त्वाम् ऋते अपि	except for you
प्रत्यनीकेषु ये योधाः अवस्थिताः	those soldiers who are present in both armies
सर्वे न भविष्यन्ति ।	they will all not live

"The Supreme Personality of Godhead said: Time I am, the great destroyer of the worlds, and I have come here to destroy all people. With the exception of you (the Pāṇḍavas), all the soldiers here on both sides will be slain."

श्री-भगवान् **Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'
उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
कालः **time** ⟨1.1⟩ m. *kāla*
अस्मि **I am** ⟨*acyuta* 3.1⟩ √*as[a]*...भुवि – to be, exist
लोक-क्षय-कृत् **who does the destruction of the worlds** ⟨1.1⟩ m. *loka-kṣaya-kṛt*...यः लोकानाम् क्षयम् करोति सः लोक-क्षय-कृत्
प्रवृद्धः **mighty** ⟨1.1⟩ m. *pravṛddha* – 'grown', great, mighty
लोकान् **the people** ⟨2.3⟩ m. *loka* – place, world, people
समाहर्तुम् **to destroy** ⟨*avyaya*⟩ *sam.ā.*√*hṛ[ñ]* – to withdraw, destroy; + .*tum[u]*
इह **here** ⟨*avyaya*⟩
प्रवृत्तः **engaged** ⟨1.1⟩ m. *pravṛtta* (*pra.*√*vṛt[u]* – to start to act; + .*[k]ta*)
ऋते **without** ⟨*avyaya*⟩ – without, except
अपि **also** ⟨*avyaya*⟩
त्वाम् **you** ⟨2.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
न **not** ⟨*avyaya*⟩
भविष्यन्ति **they will be** ⟨*kalki* 1.3⟩ √*bhū*...सत्तायाम् – to be, exist, become
सर्वे **all** ⟨1.3⟩ m. *kṛṣṇanāma sarva*
ये **those who** ⟨1.3⟩ m. *kṛṣṇanāma yad* – (relative) who, which
अवस्थिताः **who are situated** ⟨1.3⟩ m. *avasthita* (*ava.*√*sthā* – to stay; + .*[k]ta*) – situated
प्रत्यनीकेषु **in the opposed armies** ⟨7.3⟩ n. *pratyanīka* (*prati._anīka*) – opposed army
योधाः **warriors** ⟨1.3⟩ m. *yodha* – warrior

Subodhinī: लोकानाम् क्षय-कर्ता प्रवृद्धः (अत्युग्रः) कालः अस्मि, लोकान् (प्राणिनः) संहर्तुम्, इह लोके प्रवृत्तः अस्मि । अतः 'ऋते अपि त्वाम्' इति त्वाम् हन्तारम् विना अपि ।एते। न भविष्यन्ति (न जीविष्यन्ति) । यद्यपि त्वया न हन्तव्याः, एते तथापि मया कालात्मना ग्रस्ताः सन्तः मरिष्यन्ति एव । के ते ? प्रत्यनीकेषु (अनीकानि अनीकानि प्रति भीष्म-द्रोणादीनाम् सर्वासु सेनासु) ये योद्धारः अवस्थिताः, ते सर्वे अपि ॥११.३२॥
यस्मात् एवम् – 'तस्मात्' इति –

Note: There are two interpretations of *ṛte 'pi tvām*, and Baladeva mentions both. The first we have given in the *anvaya*, and the second is 'even without you [fighting]'.

11.33

तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्भुङ्क्ष्व राज्यं समृद्धम् ।
मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ॥३३॥

तस्मात् त्वम् उत्तिष्ठ, यशः लभस्व !	therefore arise and gain fame!
शत्रून् जित्वा	and [after] killing the enemies
समृद्धम् राज्यम् भुङ्क्ष्व !	enjoy a flourishing kingdom!
मया एव एते पूर्वम् एव निहताः,	by Me alone they have been killed already,
हे सव्य-साचिन् !	O Arjuna!
निमित्तमात्रम् भव !	be merely an instrument!

"Therefore get up. Prepare to fight and win glory. Conquer your enemies and enjoy a flourishing kingdom. They are already put to death by My arrangement, and you, O Savyasācī, can be but an instrument in the fight."

तस्मात् **therefore** ⟨*avyaya*⟩
त्वम् **you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
उत्तिष्ठ **you must stand up** ⟨*vidhātā* 2.1⟩ *ud.*√*sthā* – to stand up
यशः **fame** ⟨2.1⟩ n. *yaśas* (*yaśaḥ*)
लभस्व **you must obtain** ⟨*vidhātā* 2.1⟩ √*[ḍu]labh[aṣ]*...प्राप्तौ – to obtain
जित्वा **[after] conquering** ⟨*avyaya*⟩ √*ji*...जये – to conquer; + .*[k]tvā*
शत्रून् **the enemies** ⟨2.3⟩ m. *śatru* – enemy
भुङ्क्ष्व **you must enjoy** ⟨*vidhātā* 2.1⟩ √*bhuj[a]*...पालन-अभ्यवहारयोः – to govern; enjoy
राज्यम् **the kingdom** ⟨2.1⟩ n. *rājya*
समृद्धम् **flourishing** ⟨2.1⟩ n. *samṛddha*
मया **by me** ⟨3.1⟩ *kṛṣṇanāma asmad* – (last person) I
एव **certainly** ⟨*avyaya*⟩
एते **these** ⟨1.3⟩ *kṛṣṇanāma etad* – (first person) he, this
निहताः **which are killed** ⟨1.3⟩ m. *nihata* (*ni.*√*han[a]* – to strike down, kill; + .*[k]ta*) – killed
पूर्वम् **before** ⟨*avyaya*⟩
निमित्तमात्रम् **a mere instrument** ⟨1.1⟩ n. *nimittamātra*
निमित्त – mark, sign, omen (as in 1.30); cause, motive, reason, (in phil.) instrumental cause
भव **you must be** ⟨*vidhātā* 2.1⟩ √*bhū*...सत्तायाम् – to be, exist, become
सव्य-साचिन् **O Arjuna!** ⟨8.1⟩ m. *savya-sācin* (-*sācī*)...सव्येन साचितुम् शीलम् यस्य, सः सव्य-साची – 'who is able to throws arrows with the left [hand] (also)', i.e. ambidextrous

Subodhinī: तस्मात् त्वम् युद्धाय उत्तिष्ठ । देवैः अपि दुर्जयाः भीष्म-द्रोणादयः अर्जुनेन निर्जिताः इति एवम्-भूतम् यशः लभस्व (प्राप्नुहि) । अ-यत्नेन शत्रून् जित्वा, समृद्धम् राज्यम् भुङ्क्ष्व । एते च तव शत्रवः त्वदीय-युद्धात् पूर्वम् एव मया एव काल-आत्मना निहत-प्रायाः, तथापि त्वम् निमित्त-मात्रम् भव । हे सव्यसाचिन्, सव्येन (वाम-हस्तेन) साचितुम् (शरान् सन्धातुम्) शीलम् यस्य इति व्युत्पत्त्या वामेन अपि बाण-क्षेपात् सव्यसाची इति उच्यते ॥११.३३॥

'न च एतद् विद्मः कतरत् नः गरीयः' (2.6) इत्यादि या शङ्का, सा अपि न कार्य इति आह – 'द्रोणम्' इति –

11.34

द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान् ।
मया हतांस्त्वं जहि मा व्यथिष्ठा युध्यस्व जेतासि रणे सपत्नान् ॥३४॥

द्रोणम् च भीष्मम् च जयद्रथम् च	Droṇa, Bhīṣma and Jayadratha
कर्णम् तथा अन्यान् योध-वीरान् अपि	Karṇa and also the other great warriors
मया हतान् त्वम् जहि !	who are killed by Me, you must kill!
मा व्यथिष्ठाः ! युध्यस्व !	do not be perturbed! fight!
रणे स-पत्नान् जेतासि ।	you will conquer the enemies in battle

"Droṇa, Bhīṣma, Jayadratha, Karṇa and the other great warriors have already been destroyed by Me. Therefore, kill them and do not be disturbed. Simply fight, and you will vanquish your enemies in battle."

द्रोणम् **Droṇa** ⟨2.1⟩ m. *droṇa* – 'trough'
च **and** ⟨*avyaya*⟩
भीष्मम् **Bhīṣma** ⟨2.1⟩ m. *bhīṣma* – 'awful'
च **and** ⟨*avyaya*⟩
जयद्रथम् **Jayadratha** ⟨2.1⟩ m. *jayat-_ratha* – 'who has a conquering chariot'

Jayadratha was a king of the kingdom of Sindhu. He stopped Abhimanyu, the son of Arjuna, from leaving the *cakra-vyūha* formation of the Kauravas, which led to the killing of Abhimanyu. For this, Arjuna took a vow to kill Jayadratha.

च **and** ⟨*avyaya*⟩
कर्णम् **Karṇa** ⟨2.1⟩ m. *karṇa* – 'ear'
तथा **so** ⟨*avyaya*⟩
अन्यान् **others** ⟨2.3⟩ m. *kṛṣṇanāma anya* – other
अपि **also** ⟨*avyaya*⟩
योध-वीरान् **heroes among warriors** ⟨2.3⟩ m. *yodha-vīra*...योधानाम् वीरः इति योध-वीरः – a hero among warriors
मया **by me** ⟨3.1⟩ *kṛṣṇanāma asmad* – (last person) I
हतान् **who are killed** ⟨2.3⟩ m. *hata* (√*han[a]*...हिंसा-गत्योः – to harm, kill; go; + *.[k]ta*) – killed
त्वम् **you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
जहि **you must kill** ⟨*vidhātā* 2.1⟩ √*han[a]*...हिंसा-गत्योः – to harm, kill; go
मा **not** ⟨*avyaya*⟩

व्यथिष्ठाः **you must be perturbed** ⟨*bhūteśa* 2.1⟩ √*vyath[a]*...भय-चलनयोः – to fear; be perturbed

In combination with *mā* the prefix *a-* of *bhūteśa* (*avyatiṣṭhāḥ*) is not used, and *bhūteśa* has an imperative meaning.

युध्यस्व **you must fight** ⟨*vidhātā* 2.1⟩ √*yudh[a]*...सम्प्रहारे – to fight
जेतासि **you will conquer** ⟨*bālakalki* 2.1⟩ √*ji*...जये – to conquer
रणे **in battle** ⟨7.1⟩ n. *raṇa* – battle
स-पत्नान् **the rivals** ⟨2.3⟩ m. *sapatna* – a rival

Subodhinī: येभ्यः त्वम् शङ्कसे, तान् द्रोणादीन् मया एव हतान् त्वम् जहि (घातय) । मा व्यथिष्ठाः (भयम् मा कार्षीः), सपत्नान् (शत्रून्) रणे (युद्धे) निश्चितम् जेतासि (जेष्यसि) ॥११.३४॥

ततः यद् वृत्तम् ? तद् धृतराष्ट्रम् प्रति । सञ्जयः उवाच। – 'एतद्' इति –

11.35

सञ्जय उवाच

एतच्छ्रुत्वा वचनं केशवस्य कृताञ्जलिर्वेपमानः किरीटी ।
नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य ॥३५॥

सञ्जयः उवाच -	Sañjaya said [to Dhṛtarāṣṭra],
एतद् केशवस्य वचनम् श्रुत्वा	[after] hearing these words of Kṛṣṇa
वेपमानः कृताञ्जलिः किरीटी	trembling and with folded hands, Arjuna
कृष्णम् नमः कृत्वा	[after] offering obeisance to Kṛṣṇa
भीत-भीतः प्रणम्य	[after] bowing down, much afraid
स-गद्गदम् भूयः एव आह ।	he again spoke with faltering voice

"Sañjaya said to Dhṛtarāṣṭra: O King, after hearing these words from the Supreme Personality of Godhead, the trembling Arjuna offered obeisances with folded hands again and again. He fearfully spoke to Lord Kṛṣṇa in a faltering voice, as follows."

सञ्जयः **Sañjaya** ⟨1.1⟩ m. *sam._jaya* – 'conquest'
उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
एतद् **this** ⟨2.1⟩ n. *kṛṣṇanāma etad* – (first person) he, this
श्रुत्वा **[after] hearing** ⟨*avyaya*⟩ √*śru*...श्रवणे – to hear, obey; + *.[k]tvā*
वचनम् **the speech** ⟨2.1⟩ n. *vacana* – speech
केशवस्य **of Śrī Kṛṣṇa** ⟨6.1⟩ m. *keśava* – 'who has beautiful hair' (*keśa.va*); or 'lord of Brahmā (*ka*) and Śiva (*īśa*)' (*ka-_īśa.va*)
कृताञ्जलिः **whith folded hands** ⟨1.1⟩ m. *kṛta-_añjali*...कृतः अञ्जलिः येन, सः कृताञ्जलिः – 'by whom *añjali* is made'

वेपमानः **who is trembling** ⟨1.1⟩ m. *vepamāna* (√*[ṭu]vep[ṛ]*...चलने – to move, tremble; + *.[ś]āna*) – [while] trembling

किरीटी **Arjuna** ⟨1.1⟩ m. *kirīṭin (kirīṭī)* – 'who has a diadem or crown'

नमः **obeisance** ⟨*avyaya*⟩ (*namas*; from √*nam[a]*...प्रह्वत्वे शब्दे च – to bow, be humble; sound) – reverential salutation (by gesture or word)

कृत्वा **[after] doing** ⟨*avyaya*⟩ √*[ḍu]kṛ[ñ]*...करणे – to do; + *.[k]tvā*

नमस्कृत्वा is not a compound, because in that case *ya[p]* had to be applied.

भूयः **again** ⟨*avyaya*⟩

एव **certainly** ⟨*avyaya*⟩

आह **he spoke** ⟨*acyuta* opt. for *bravīti* with a past sense 1.1⟩ √*brū[ñ]*...व्यक्तायां वाचि – to speak

कृष्णम् **to Śrī Kṛṣṇa** ⟨2.1⟩ m. *kṛṣṇa* – 'all-attractive', 'dark'

स-गद्गदम् **with faltering** ⟨*avyaya*⟩ गद्गदेन सह इति स-गद्गदम्

भीत-भीतः **much afraid** ⟨1.1⟩ m. *bhīta-bhīta*

भीत (√*[ñi]bhī*...भये – to fear; + *.[k]ta*) – afraid, fearful

प्रणम्य **[after] bowing** ⟨*avyaya*⟩ *pra.*√*nam[a]* – to bow; + *.ya[p]*

Subodhinī: एतद् (पूर्व-श्लोक-त्रयात्मकम्) केशवस्य वचनम् श्रुत्वा, वेपमानः (कम्पमानः) किरीटी (अर्जुनः), कृत-अञ्जलिः (सम्पुटी-कृत-हस्तः) कृष्णम् नमस्कृत्य, पुनः अपि आह (उक्तवान्)। कथम् आह ? भय-हर्षादि-आवेश-वशात् गद्गदेन (कण्ठ-कम्पनेन) सह वर्तते इति स-गद्गदम् यथा भवति तथा। किंच, भीतात् अपि भीतः सन्, प्रणम्य (अवनतः भूत्वा) ॥११.३५॥

'स्थाने' इति एकादशभिः अर्जुनस्य उक्तिः –

11.36

अर्जुन उवाच

स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसङ्घाः ॥३६॥

अर्जुनः उवाच - स्थाने हे हृषीकेश !	Arjuna said: O Kṛṣṇa! this is befitting,
तव प्रकीर्त्या	by Your glorification
जगत् प्रहृष्यति अनुरज्यते च,	the world rejoices and is attracted,
भीतानि रक्षांसि दिशः द्रवन्ति,	the afraid demons flee in all directions,
सर्वे सिद्ध-सङ्घाः च नमस्यन्ति ।	and all the hosts of Siddhas bow down

"Arjuna said: O master of the senses, the world becomes joyful upon hearing Your name, and thus everyone becomes attached to You. Although the perfected beings offer You their respectful homage, the demons are afraid, and they flee here and there. All this is rightly done."

अर्जुनः **Arjuna** ⟨1.1⟩ m. *arjuna* – white, 'who is pure in actions'

उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak

स्थाने **it is befitting** ⟨*avyaya*⟩ 'in place'

हृषीकेश **O Kṛṣṇa!** ⟨8.1⟩ m. *hṛṣīka-_īśa* – 'lord of the senses', the supreme guide, Paramātmā

तव **your** ⟨6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

प्रकीर्त्या **by the glorification** ⟨3.1⟩ f. *prakīrti* (from *pra.*√*kṝt[a]* – to glorify) – glorification

जगत् **the universe** ⟨1.1⟩ n. *jagat*

प्रहृष्यति **it rejoices** ⟨*acyuta* 1.1⟩ *pra.*√*hṛṣ[a]* – to rejoice

अनुरज्यते **it is attracted** ⟨*acyuta* 1.1⟩ *anu.*√*rañj[a]* – to be attracted, love

च **and** ⟨*avyaya*⟩

रक्षांसि **the Rakṣasas** ⟨1.3⟩ n. *rakṣas (rakṣaḥ)* – a Rakṣas

भीतानि **who are afraid** ⟨1.3⟩ n. *bhīta* (√*[ñi]bhī*...भये – to fear; + *.[k]ta*) – afraid, fearful

दिशः **directions** ⟨2.3⟩ f. *diś (dik)* – direction

द्रवन्ति **they go** ⟨*acyuta* 1.3⟩ √*dru*...गतौ – to go

सर्वे **all** ⟨1.3⟩ m. *kṛṣṇanāma sarva*

नमस्यन्ति **they bow down** ⟨*acyuta* 1.3⟩ √*namasya* (from *namas*) – to bow down, offer obeisances

सिद्ध-सङ्घाः **the hosts of Siddhas** ⟨1.3⟩ m. *siddha-saṅgha* – a host of Siddhas

Subodhinī: 'स्थाने' इति अव्ययम् 'युक्तम्' इति अस्मिन् अर्थे। हे हृषीकेश ? यतः एवम् त्वम् अद्भुत-प्रभावः भक्त-वत्सलः च, अतः तव प्रकीर्त्या (माहात्म्य-सङ्कीर्तनेन) न केवलम् अहम् एव प्रहृष्यामि, किन्तु जगत् सर्वम् प्रहृष्यति (प्रकर्षेण हर्षम् प्राप्नोति)। एतद् तु स्थाने (युक्तम्) इति अर्थः। तथा जगत् अनुरज्यते च (अनुरागम् च उपैति) इति यद्, तथा रक्षांसि भीतानि सन्ति दिशः प्रति द्रवन्ति (पलायन्ते) इति यद्, सर्वे योग-तपः-मन्त्रादि-सिद्धानाम् सङ्घाः नमस्यन्ति (प्रणमन्ति) इति यद्, एतद् च स्थाने (युक्तम्) एव, न चित्रम् इति अर्थः ॥११.३६॥

तत्र हेतुम् आह – 'कस्मात्' इति –

11.37

कस्माच्च ते न नमेरन्महात्मन्गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ।
अनन्त देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ॥३७॥

हे महात्मन् अनन्त देवेश जगन्निवास !	O Lord!
ब्रह्मणः अपि गरीयसे आदि-कर्त्रे ते (तुभ्यम्)	to You, the original creator, greater even than Brahmā
कस्मात् च न नमेरन् ?	why should they not bow down?
त्वम् अ-क्षरम् सदसत्	You are the imperishable one, cause and effect
यद् परम तद् ।	and that which is beyond

"O great one, greater even than Brahmā, You are the original creator. Why then should they not offer their respectful obeisances unto You? O limitless one, God of gods, refuge of the universe! You are the invincible source, the cause of all causes, transcendental to this material manifestation."

कस्मात्	**why** ⟨*avyaya*⟩ (from *kṛṣṇanāma kim*)
च	**and** ⟨*avyaya*⟩
ते	**to you** ⟨opt. for *tubhyam* 4.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
न	**not** ⟨*avyaya*⟩
नमेरन्	**they should bow down** ⟨*vidhi* 1.3⟩ √*nam[a]*...प्रह्वत्वे शब्दे च – to bow, be humble; sound
महात्मन्	**O Lord!** ⟨8.1⟩ m. *mahā-ātman* (*-ātmā*) – 'great soul'
गरीयसे	**to one who is greater** ⟨4.1⟩ m. *garīyas* (*garīyaḥ*; from *guru* – great) – greater
ब्रह्मणः	**than Brahmā** ⟨5.1⟩ m. *brahman* (*brahma*) – spirit, soul
अपि	**also** ⟨*avyaya*⟩
आदि-कर्त्रे	**to the original creator** ⟨4.1⟩ m. *ādi-kartṛ* (*-kartā*, *.tr[n]*) – the original creator
अनन्त	**O Lord!** ⟨8.1⟩ m. *ananta* – 'who is unlimited', inexhaustible
देवेश	**O Lord!** ⟨8.1⟩ m. *deva-_īśa* – 'Lord of the *devas*', Supreme Lord
जगन्निवास	**O Lord!** ⟨8.1⟩ m. *jagat-_nivāsa* – 'who is the shelter of the world'
त्वम्	**you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
अ-क्षरम्	**the imperishable** ⟨1.1⟩ n. *a-kṣara* – indestructible
सदसत्	**cause and effect** ⟨1.1⟩ n. *sat-_a-sat*
तद्	**that** ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
परम्	**beyond** ⟨1.1⟩ n. *para*
यद्	**that which** ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which

Subodhinī: हे महात्मन्, हे अनन्त, हे देवेश, हे जगत्-निवास, कस्मात् हेतोः ते (तुभ्यम्) न नमेरन् (नमस्कारम् न कुर्युः)। कथम्-भूताय ? ब्रह्मणः अपि गरीयसे (गुरुतराय)। आदि-कर्त्रे च ब्रह्मणः अपि जनकाय। किंच, सत् (व्यक्तम्) अ-सत् (अ-व्यक्तम्) च ताभ्याम् परम् (मूल-कारणम्) यद् अ-क्षरम् (ब्रह्म) तद् च त्वम् एव। एतैः नवभिः हेतुभिः त्वाम् सर्वे नमस्यन्ति इति न चित्रम् इति अर्थः ॥११.३७॥

11.38

त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानम् ।
वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनन्तरूप ॥३८॥

त्वम् आदि-देवः, पुराणः पुरुषः,	You are the primeval Lord, the ancient person,
त्वम् अस्य विश्वस्य परम् निधानम्,	You are the ultimate resting place of this world,
वेत्ता वेद्यम् च परम् धाम च असि,	you are knower, knowable and supreme abode,
हे अनन्त-रूप !	O Lord!
त्वया विश्वम् ततम् ।	by You the world is pervaded

"You are the original Personality of Godhead, the oldest, the ultimate sanctuary of this manifested cosmic world. You are the knower of everything, and You are all that is knowable. You are the supreme refuge, above the material modes. O limitless form! This whole cosmic manifestation is pervaded by You!"

त्वम्	**you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
आदि-देवः	**the primeval Lord** ⟨1.1⟩ m. *ādi-deva*
पुरुषः	**person** ⟨1.1⟩ m. *puruṣa*
पुराणः	**ancient** ⟨1.1⟩ m. *purāṇa*
त्वम्	**you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
अस्य	**of this** ⟨6.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this
विश्वस्य	**of the universe** ⟨6.1⟩ n. *viśva* – universe
परम्	**supreme** ⟨1.1⟩ n. *para* – beyond
निधानम्	**resting place** ⟨1.1⟩ n. *nidhāna*
वेत्ता	**the knower** ⟨1.1⟩ m. *vettṛ* (*vettā*, *.tr[n]*)
असि	**you are** ⟨*acyuta* 2.1⟩ √*as[a]*...भुवि – to be, exist
वेद्यम्	**the knowable** ⟨1.1⟩ n. *vedya* (√*vid[a]* 2P...ज्ञाने – to know; + *.ya*) – to be known
च	**and** ⟨*avyaya*⟩
परम्	**supreme** ⟨1.1⟩ n. *para* – beyond
धाम	**the abode** ⟨1.1⟩ n. *dhāman* (*dhāma*)
त्वया	**by you** ⟨3.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
ततम्	**pervaded** ⟨1.1⟩ n. *tata* (√*tan[u]*...विस्तारे – to spread, pervade; + *.[k]ta*)
विश्वम्	**the universe** ⟨1.1⟩ n. *viśva*
अनन्त-रूप	**O Lord!** ⟨8.1⟩ m. *ananta-rūpa* – 'whose forms are innumerable'

Subodhinī: त्वम् आदि-देवः (देवानाम् आदिः)। यतः पुराणः (अनादिः) पुरुषः त्वम्, अतएव त्वम् अस्य विश्वस्य परम् निधानम् (लय-स्थानम्)। तथा विश्वस्य वेत्ता (वेदिता, ज्ञाता) च त्वम्, यद् च वेद्यम् वस्तु-जातम् च, धाम च (वैष्णवम् पदम्) तद् अपि त्वम् एव असि। अतएव हे अनन्त-रूप, त्वया एव विश्वम् इदम् ततम् (व्याप्तम्)। एतैः च सप्तभिः हेतुभिः त्वम् एव नमस्कार्यः इति भावः ॥११.३८॥

इतः च, त्वम् एव सर्वैः नमस्कार्यः सर्व-देवात्मकत्वात् इति स्तुवन्, स्वयम् अपि नमस्करोति – 'वायुः' इति –

11.39

वायुर्यमोऽग्निर्वरुणः शशाङ्कः प्रजापतिस्त्वं प्रपितामहश्च ।
नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते ॥३९॥

त्वम् वायुः यमः अग्निः वरुणः शशाङ्कः	You are Vāyu, Yama, Agni, Varuṇa, Candra
प्रजा-पतिः प्रपितामहः च,	Brahmā and Viṣṇu,
ते (तुभ्यम्) सहस्र-कृत्वः नमः नमः अस्तु !	thousands of repeated obeisances unto You!
पुनः च भूयः अपि	and again and again
ते (तुभ्यम्) नमः नमः ।	repeated obeisances unto You

"You are air, and You are the supreme controller! You are fire, You are water, and You are the moon! You are Brahmā, the first living creature, and You are the great-grandfather. I therefore offer my respectful obeisances unto You a thousand times, and again and yet again!"

वायुः	**Vāyu** ⟨1.1⟩ m. *vāyu* – air, wind
यमः	**Yamarāja** ⟨1.1⟩ m. *yama*
अग्निः	**Agni** ⟨1.1⟩ m. *agni* – fire
वरुणः	**Varuṇa** ⟨1.1⟩ m. *varuṇa*
शशाङ्कः	**Candra** ⟨1.1⟩ m. *śaśāṅka* – 'rabbit-marked', moon
प्रजा-पतिः	**Brahmā** ⟨1.1⟩ m. *prajā-pati* – 'lord of creatures'
त्वम्	**you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
प्रपितामहः	**Viṣṇu** ⟨1.1⟩ m. *prapitāmaha* – 'great-grandfather', i.e. the father of Brahmā
च	**and** ⟨*avyaya*⟩
नमः नमः	**repeated obeisances** ⟨*avyaya*⟩ नमः (*namas*; from √*nam[a]*...प्रह्वत्वे शब्दे च – to bow, be humble; sound) – reverential salutation (by gesture or word)
ते	**to you** ⟨opt. for *tubhyam* 4.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
अस्तु	**it must be** ⟨*vidhātā* 1.1⟩ √*as[a]*...भुवि – to be, exist
सहस्र-कृत्वः	**a thousand times** ⟨*avyaya*⟩
पुनः	**again** ⟨*avyaya*⟩ (*punar*)
च	**and** ⟨*avyaya*⟩
भूयः	**again** ⟨*avyaya*⟩
अपि	**also** ⟨*avyaya*⟩
नमः नमः	**repeated obeisances** ⟨*avyaya*⟩ नमः (*namas*; from √*nam[a]*...प्रह्वत्वे शब्दे च – to bow, be humble; sound) – reverential salutation (by gesture or word)
ते	**to you** ⟨opt. for *tubhyam* 4.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

Subodhinī: वायु-आदि-रूपः त्वम् इति सर्व-देवतात्मकत्व-उपलक्षणार्थम् उक्तम् । प्रजा-पतिः (पितामहः), तस्य अपि जनकत्वात् प्रपितामहः त्वम्, अतः ते (तुभ्यम्) सहस्र-कृत्वः (सहस्रशः) नमः अस्तु । भूयः अपि पुनः अपि सहस्र-कृत्वः नमः नमः इति भक्ति-श्रद्धा-भय-अतिरेकेण नमस्कारेषु तृप्तिम् अनधिगच्छन्, बहुशः प्रणमति ॥११.३९॥

11.40

नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व ।
अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः ॥४०॥

हे सर्व !	O Lord!
पुरस्तात् अथ पृष्ठतः	from the front and from behind
ते (तुभ्यम्) नमः,	obeisances to You,
सर्वतः एव ते (तुभ्यम्) नमः अस्तु !	from all sides obeisances to You!
हे अनन्त-वीर्य !	O Lord!
अमित-विक्रमः त्वम्	You, of boundless strenght
सर्वम् समाप्नोषि,	pervade everything,
ततः सर्वः असि ।	therefore You are everything

"Obeisances to You from the front, from behind and from all sides! O unbounded power, You are the master of limitless might! You are all-pervading, and thus You are everything!"

नमः	**obeisance** ⟨*avyaya*⟩ (*namas*; from √*nam[a]*...प्रह्वत्वे शब्दे च – to bow, be humble; sound) – reverential salutation (by gesture or word)
पुरस्तात्	**from the front** ⟨*avyaya*⟩ (from *puras* – before)
अथ	**now** ⟨*avyaya*⟩
पृष्ठतः	**from behind** ⟨*avyaya*⟩ (*pṛṣṭatas*; *pṛṣṭa* – the back; + *.tas[i]*)
ते	**to you** ⟨opt. for *tubhyam* 4.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
नमः	**obeisance** ⟨*avyaya*⟩
अस्तु	**it must be** ⟨*vidhātā* 1.1⟩ √*as[a]*...भुवि – to be, exist
सर्वतः	**from all sides** ⟨*avyaya*⟩ (*sarvatas*; *sarva* + *.tas[i]*) – 'from all'
एव	**certainly** ⟨*avyaya*⟩
सर्व	**O Lord!** ⟨8.1⟩ m. *kṛṣṇanāma sarva* – all, 'the soul of all'
अनन्त-वीर्य	**O Lord!** ⟨8.1⟩ m. *ananta-vīrya* – 'who has unlimited, inexhaustible strength'
अमित-विक्रमः	**whose strenght is boundless** ⟨1.1⟩ m. *amita-vikrama*...अ-मितः विक्रमः यस्य, सः अमित-विक्रमः
त्वम्	**you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
सर्वम्	**all** ⟨2.1⟩ m. *kṛṣṇanāma sarva*
समाप्नोषि	**you pervade** ⟨*acyuta* 2.1⟩ *sam.*√*āp[l]* – to reach, obtain
ततः	**therefore** ⟨*avyaya*⟩ (*tatas*; from *tad* + *.tas[i]*) – from/after/than that
असि	**you are** ⟨*acyuta* 2.1⟩ √*as[a]*...भुवि – to be, exist
सर्वः	**all** ⟨1.1⟩ m. *kṛṣṇanāma sarva*

Subodhinī: हे सर्व (सर्वात्मन्)! सर्वतः (सर्वासु अपि दिक्षु) तुभ्यम् नमः अस्तु। सर्वात्मकत्वम् उपपादयन् आह – अनन्तम् वीर्यम् (सामर्थ्यम्) यस्य, तथापि अ-मितः विक्रमः (पराक्रमः) यस्य सः, एवम्-भूतः त्वम् सर्वम् (विश्वम्) सम्यक् (अन्तः बहिः च) व्याप्नोषि, सुवर्णम् इव कटक-कुण्डलादि स्व-कार्यम् व्याप्य, वर्तसे, ततः सर्व-स्वरूपः असि ॥११.४०॥

इदानीम् भगवन्तम् क्षमापयति – 'सखा' इति द्वाभ्याम् –

11.41...42

सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति ।
अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वापि ॥४१॥

सखा इति मत्वा	[after] thinking [You] a friend
प्रमादात् प्रणयेन वा अपि	out of delusion or love
तव इदम् महिमानम् अ-जानता मया	by me, not knowing this greatness of Yours
यद् प्रसभम् उक्तम्	whatever was rashly said
हे कृष्ण हे यादव हे सखे इति ...	'O Kṛṣṇa, O Yādava, O friend!' ...

सखा **friend** ⟨1.1⟩ m. *sakhi* – companion, friend
इति **thus** ⟨*avyaya*⟩
मत्वा **[after] thinking** ⟨*avyaya*⟩ √*man[a]* 4A...बोधने – to know, think; + .*[k]tvā*
प्रसभम् **presumptuously** ⟨*avyaya*⟩
यद् **that which** ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
उक्तम् **spoken** ⟨1.1⟩ n. *ukta* (√*vac[a]*...परिभाषणे – to speak; + .*[k]ta*)
हे **oh!** ⟨*avyaya*⟩
कृष्ण **O Kṛṣṇa!** ⟨8.1⟩ m. *kṛṣṇa* – 'all-attractive', 'dark'
हे **oh!** ⟨*avyaya*⟩
यादव **O Kṛṣṇa!** ⟨8.1⟩ m. *yādava* – 'descendent of King Yadu'
हे **oh!** ⟨*avyaya*⟩
सखे **O friend** ⟨8.1⟩ m. *sakhi* – friend
इति **thus** ⟨*avyaya*⟩
अ-जानता **by not knowing** ⟨3.1⟩ m. *a-jānat* – [while] not knowing
महिमानम् **the greatness** ⟨2.1⟩ m. *mahiman* (*mahimā*)
तव **your** ⟨6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
इदम् **this** ⟨2.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this
The use of *idam* (neut.) with *mahimāna* (masc.), instead of *imam* (masc.), is *ārṣa-prayoga*.
मया **by me** ⟨3.1⟩ *kṛṣṇanāma asmad* – (last person) I
प्रमादात् **out of delusion** ⟨5.1⟩ m. *pramāda* – delusion, madness

प्रणयेन **with love** ⟨3.1⟩ m. *praṇaya* – love, affection
वा **or** ⟨*avyaya*⟩
अपि **also** ⟨*avyaya*⟩

Subodhinī: 'त्वम् प्राकृतः सखा' इति एवम् मत्वा, प्रसभम् (हठेन, तिरस्कारेण) यद् उक्तम्, 'तद् क्षामये त्वाम्) (11.42) इति उत्तरेण अन्वयः। किम् तद्? – 'हे कृष्ण, हे यादव, हे सखे' इति च। सन्धिः आर्षः। प्रसभ-उक्तौ हेतुः – तव महिमानम् इदम् च (विश्व-रूपम्) अ-जानता, मया प्रमादात् प्रणयेन (स्नेहेन) अपि वा यद् उक्तम् इति ॥११.४१॥

Note: The *sandhi* between *sakhe* and *iti* is *ārṣa-prayoga*.

11.42

यच्चावहासार्थमसत्कृतो ऽसि विहारशय्यासनभोजनेषु ।
एको ऽथवाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयम् ॥४२॥

... यद् च	... and that
विहार-शय्यासन-भोजनेषु	during sporting, sleeping, sitting and eating
एकः अथवा तत्समक्षम् अपि	either alone or even in company
अवहासार्थम् अ-सत्कृतः असि,	You are disrespected out of fun,
हे अच्युत !	O Kṛṣṇa!
तद् अ-प्रमेयम् त्वाम् अहम् क्षामये।	that I ask You, the immeasurable one, to forgive

"Thinking of You as my friend, I have rashly addressed You "O Kṛṣṇa," "O Yādava," "O my friend," not knowing Your glories. Please forgive whatever I may have done in madness or in love. I have dishonored You many times, jesting as we relaxed, lay on the same bed, or sat or ate together, sometimes alone and sometimes in front of many friends. O infallible one, please excuse me for all those offenses."

यद् च **and that** ⟨*avyaya*⟩
अवहासार्थम् **for the sake of fun** ⟨*avyaya*⟩ अवहासस्य अर्थम् इति अवहासार्थम्
अ-सत्कृतः **not respected** ⟨1.1⟩ m. *a-satkṛta*
असि **you are** ⟨*acyuta* 2.1⟩ √*as[a]*...भुवि – to be, exist
विहार-शय्यासन-भोजनेषु **during sporting, sleeping, sitting and eating** ⟨7.3⟩ n. *vihāra-śayyā-āsana-bhojana*
एकः **alone** ⟨1.1⟩ m. *kṛṣṇanāma eka* – one, alone
अथवा **or** ⟨*avyaya*⟩
अपि **also** ⟨*avyaya*⟩
अच्युत **O Kṛṣṇa!** ⟨8.1⟩ m. *a-cyuta* – 'who is unfailing'
तत्समक्षम् **in front of them** ⟨*avyaya*⟩

समक्ष (*sam.akṣa*) – 'before the eyes', presence

तद् **that** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that

क्षामये **I cause (ask) to forgive** ⟨*acyuta* caus. 3.1⟩ √*kṣam[ū]*...सहने – to tolerate, forgive

त्वाम् **you** ⟨2.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

अ-प्रमेयम् **who is immeasurable** ⟨2.1⟩ m. *a-prameya* – immeasurable

Subodhinī: हे अच्युत ! यद् च परिहास-अर्थम् क्रीडादिषु तिरस्कृतः असि, एकः (एकलः), सखीन् विना रहसि स्थितः इति अर्थः । अथवा तद्-समक्षम्, तेषाम् परिहसताम् सखीनाम् समक्षम् (पुरतः) अपि, तद् सर्वम् अपराध-जातम् त्वाम् अ-प्रमेयम् (अ-चिन्त्य-प्रभावम्) क्षामये (क्षमाम् कारयामि) ॥११.४२॥
अचिन्त्य-प्रभावम् एव आह – 'पिता' इति –

Note: "Generally both of us used to live together and sleep, sit and loiter together. And at the time of advertising oneself for acts of chivalry, sometimes, if there were any irregularity, I used to reproach Him by saying, "My friend, You are very truthful." (Arjuna to King Yudhiṣṭhira, *SB.* 1.15.19)

11.43

पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव ॥४३॥

हे अप्रतिम-प्रभाव !	O Lord!
त्वम् अस्य चराचरस्य लोकस्य	You are of this world, moving and non-moving
पिता, पूज्यः गुरुः, गरीयान् च असि,	the father, worshipable Guru, greater than any,
लोक-त्रये अपि त्वत्समः न अस्ति,	in the three worlds there is none equal to You,
अभ्यधिकः अन्यः कुतः ?	how is anyone greater?

"You are the father of this complete cosmic manifestation, of the moving and the nonmoving. You are its worshipable chief, the supreme spiritual master. No one is equal to You, nor can anyone be one with You. How then could there be anyone greater than You within the three worlds, O Lord of immeasurable power?"

पिता **the father** ⟨1.1⟩ m. *pitṛ (pitā)* – father, ancestor

असि **you are** ⟨*acyuta* 2.1⟩ √*as[a]*...भुवि – to be, exist

लोकस्य **of the world** ⟨6.1⟩ m. *loka* – place, world, people

चराचरस्य **of the moving and non-moving** ⟨6.1⟩ m. *cara-_a-cara* – moving and non-moving

त्वम् **you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

अस्य **of this** ⟨6.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this

पूज्यः **worshipable** ⟨1.1⟩ m. *pūjya* (√*pūj[a]*...पूजायाम् – to worship, honor; *.ya*) – to be worshiped

च **and** ⟨*avyaya*⟩

गुरुः **the Guru** ⟨1.1⟩ m. *guru* – great, Guru

गरीयान् **who is greater** ⟨1.1⟩ m. *garīyas* (*garīyaḥ*; from *guru* – great) – greater

न **not** ⟨*avyaya*⟩

त्वत्समः **who is equal to you** ⟨1.1⟩ m. *tvad-_sama*...तव समः इति तत्समः

अस्ति **there is** ⟨*acyuta* 1.1⟩ √*as[a]*...भुवि – to be, exist

अभ्यधिकः **who is greater** ⟨1.1⟩ m. *abhyadhika* – surpassing, greater

कुतः **how** ⟨*avyaya*⟩ (*kutas*; from *kim* + *.tas[i]*) – 'from where'

अन्यः **another** ⟨1.1⟩ m. *kṛṣṇanāma anya* – other

लोक-त्रये **in the three worlds** ⟨7.1⟩ m. *loka- traya*...लोकानाम् त्रयम् इति लोक-त्रयम् – 'the triad of worlds'

अपि **also** ⟨*avyaya*⟩

अप्रतिम-प्रभाव **O Lord!** ⟨8.1⟩ m. *a-pratima-prabhāva*...अ-प्रतिमः प्रभावः यस्य, सः अप्रतिम-प्रभावः – 'whose prowess is incomparable'

Subodhinī: न विद्यते प्रतिमा (उपमा) यस्य सः अ-प्रतिमः, तथा-विधः प्रभावः यस्य तव हे अप्रतिम-प्रभाव ! त्वम् अस्य चर-अचरस्य लोकस्य पिता (जनकः) असि । अतएव पूज्यः च, गुरुः च, गुरोः अपि गरीयान् (गुरुतरः) । अतः लोक-त्रये अपि त्वद्-समः एव तावत् अन्यः न अस्ति, परमेश्वरस्य अन्यस्य अ-भावात्, त्वत्तः अभ्यधिकः पुनः कुतः स्यात् ॥११.४३॥
यस्मात् एवम् – 'तस्मात्' इति –

11.44

तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुम् ॥४४॥

तस्मात्	therefore
ईड्यम् ईशम् त्वाम् प्रणम्य	[after] bowing down to You, the worshipable Lord
कायम् प्रणिधाय	[and after] prostrating the body
अहम् प्रसादये ।	I appease [You].
हे देव !	O Lord!
पुत्रस्य पिता इव	as the father [the offenses] of the son
सखा सख्युः इव, प्रियः प्रियायाः	as the friend of the friend, and the husband of the wife
सोढुम् अर्हसि ।	You may tolerate

"You are the Supreme Lord, to be worshiped by every living being. Thus I fall down to offer You my respectful obeisances and ask Your mercy. As a father tolerates the impudence of his

son, or a friend tolerates the impertinence of a friend, or a wife tolerates the familiarity of her partner, please tolerate the wrongs I may have done You."

तस्मात् **therefore** ⟨*avyaya*⟩
प्रणम्य **[after] bowing** ⟨*avyaya*⟩ *pra.√nam[a]* – to bow; + *.ya[p]*
प्रणिधाय **[after] prostrating** ⟨*avyaya*⟩ *pra.ni.√[ḍu]dhā[ñ]* – to hold down, prostrate; + *.ya[p]*
कायम् **the body** ⟨2.1⟩ m. *kāya*
प्रसादये **I appease** ⟨*acyuta* caus. 3.1⟩ *pra.√sad[ḷ]* – to settle down, (applied to the mind:) to become satisfied
त्वाम् **you** ⟨2.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
ईशम् **the Lord** ⟨2.1⟩ m. *īśa*
ईड्यम् **who is to be praised** ⟨2.1⟩ m. *īḍya* (*√īḍ[a]*...स्तुतौ – to praise; + *.ya*) – to be praised
पिता **a father** ⟨1.1⟩ m. *pitṛ* (*pitā*) – father, ancestor
इव **like** ⟨*avyaya*⟩
पुत्रस्य **of the son** ⟨6.1⟩ m. *putra* – son
सखा **a friend** ⟨1.1⟩ m. *sakhi* – companion, friend
इव **like** ⟨*avyaya*⟩
सख्युः **of a friend** ⟨6.1⟩ m. *sakhi* – companion, friend
प्रियः **a beloved** ⟨1.1⟩ m. *priya* – dear
प्रियायाः **of the beloved** ⟨6.1⟩ f. *priyā* (*.ā[p]*) – dear
अर्हसि **you deserve** ⟨*acyuta* 2.1⟩ *√arh[a]*...पूजायाम् – to be worthy, fit, able
देव **O Lord!** ⟨8.1⟩ m. *deva* – divine being
सोढुम् **to tolerate** ⟨*avyaya*⟩ *√sah[a]* 1A...मर्षणे – to tolerate; + *.tum[u]*

Subodhinī: तस्मात् त्वाम् ईशम् (जगतः स्वामिनम्) ईड्यम् (स्तुत्यम्) प्रसादये (प्रसादयामि)। कथम् ? कायम् प्रणिधाय (दण्डवत् निपात्य), प्रणम्य (प्रकर्षेण नत्वा)। अतः त्वम् मम अपराधम् सोढुम् (क्षन्तुम्) अर्हसि। कस्य कः इव ? पुत्रस्य अपराधम् कृपया पिता यथा सहते, सख्युः (मित्रस्य) अपराधम् सखा निरुपाधि-बन्धुः यथा, प्रियः च प्रियायाः अपराधम् तद्-प्रियार्थम् यथा, तद्वत् ॥११.४४॥
एवम् क्षमापयित्वा, प्रार्थयते – 'अदृष्ट-पूर्वम्' इति द्वाभ्याम् –

Note: Here we follow Viśvanātha, Baladeva and Śrīdhara, who explain *priyāyārhasi* as *priyāyāḥ arhasi*. *Viṣnusarga* is dropped by regular *sandhi* and again *sandhi* is made by *ārṣa-prayoga*. Rāmānuja explains *priyāyārhasi* as *priyāya arhasi*, with regular *sandhi* between them. According to him, *priyaḥ* refers to the Lord (the *parama-kāruṇikaḥ priyaḥ* – the most merciful loving person), and *priyāya* means 'for one who loves You [You forgive the offenses]'.

11.45

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे ।
तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवास ॥४५॥

अदृष्ट-पूर्वम् दृष्ट्वा	[after] seeing what was never seen before
हृषितः अस्मि,	I am overjoyed,
भयेन च मे (मम) मनः प्रव्यथितम्,	but my mind is also perturbed by fear,
हे देव !	O Lord!
तद् एव रूपम् मे (मह्यम्) दर्शय !	show me that very form!
हे देवेश जगन्निवास !	O Lord!
प्रसीद !	be merciful!

"After seeing this universal form, which I have never seen before, I am gladdened, but at the same time my mind is disturbed with fear. Therefore please bestow Your grace upon me and reveal again Your form as the Personality of Godhead, O Lord of lords, O abode of the universe."

अ-दृष्ट-पूर्वम् **not seen before** ⟨2.1⟩ n. *a-dṛṣṭa-pūrva*...न दृष्टम् पूर्वम् इति अदृष्ट-पूर्वम्
हृषितः **overjoyed** ⟨1.1⟩ m. *hṛṣita* (*√hṛṣ[a]*...तुष्टौ – to rejoice; + *.[k]ta*)
अस्मि **I am** ⟨*acyuta* 3.1⟩ *√as[a]*...भुवि – to be, exist
दृष्ट्वा **[after] seeing** ⟨*avyaya*⟩ *√dṛś[ir]*...प्रेक्षणे – to see; + *.[k]tvā*
भयेन **by fear** ⟨3.1⟩ n. *bhaya* – fear
च **and** ⟨*avyaya*⟩
प्रव्यथितम् **perturbed** ⟨1.1⟩ n. *pravyathita* (*pra.√vyath[a]* – to be perturbed; + *.[k]ta*)
मनः **the mind** ⟨1.1⟩ n. *manas* (*manaḥ*)
मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
तद् **that** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
एव **certainly** ⟨*avyaya*⟩
मे **to me** ⟨opt. for *mahyam* 4.1⟩ *kṛṣṇanāma asmad* – (last person) I
दर्शय **you must show** ⟨*vidhātā* caus. 2.1⟩ *√dṛś[ir]*...प्रेक्षणे – to see
देव **O Lord!** ⟨8.1⟩ m. *deva* – divine being
रूपम् **the form** ⟨2.1⟩ n. *rūpa*
प्रसीद **be merciful!** ⟨*vidhātā* 2.1⟩ *pra.√sad[ḷ]* – to settle down, (applied to the mind:) to become satisfied
देवेश **O Lord!** ⟨8.1⟩ m. *deva-_īśa* – 'Lord of the *devas*', Supreme Lord
जगन्निवास **O Lord!** ⟨8.1⟩ m. *jagat-_nivāsa* – 'who is the shelter of the world'

Subodhinī: हे देव, पूर्वम् अ-दृष्टम् तव रूपम् दृष्ट्वा, हृषितः (हृष्टः) अस्मि । तथा भयेन च मे मनः प्रव्यथितम् (प्रचलितम्) । तस्मात् मम व्यथा-निवृत्तये तद् एव रूपम् दर्शय, हे देवेश, हे जगत्-निवास, प्रसन्नः भव ॥११.४५॥
तद् एव रूपम् विशेषयन्, आह – 'किरीटिनम्' इति –

11.46

किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव ।
तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ॥४६॥

किरीटिनम् गदिनम् चक्र-हस्तम्	with crown, club and disc in hand
तथा एव अहम् त्वाम् द्रष्टुम् इच्छामि,	just so I want to see You,
हे सहस्र-बाहो विश्व-मूर्ते !	O Lord!
तेन एव चतुर्भुजेन रूपेण भव !	appear with that very four-armed form!

"O universal form, O thousand-armed Lord, I wish to see You in Your four-armed form, with helmeted head and with club, wheel, conch and lotus flower in Your hands. I long to see You in that form."

किरीटिनम् **who has a diadem or crown** ⟨2.1⟩ m. *kirīṭin (kirīṭī)*
गदिनम् **who has a club** ⟨2.1⟩ m. *gadin (gadī)*
चक्र-हस्तम् **in whose hand is a disc** ⟨2.1⟩ m. *cakra-hasta*...चक्रम् हस्ते यस्य, सः चक्र-हस्तः
इच्छामि **I desire** ⟨*acyuta* 3.1⟩ √*iṣ[u]*...इच्छायाम् – to wish, desire
त्वाम् **you** ⟨2.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
द्रष्टुम् **to see** ⟨*avyaya*⟩ √*dṛś[ir]*...प्रेक्षणे – to see; + .*tum[u]*
अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
तथा एव **just so** ⟨*avyaya*⟩
तेन **with that** ⟨3.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
एव **certainly** ⟨*avyaya*⟩
रूपेण **with the form** ⟨3.1⟩ n. *rūpa* – a form
चतुर्भुजेन **with the four-armed** ⟨3.1⟩ n. *catuḥ-_bhuja* – four-armed
सहस्र-बाहो **O Lord!** ⟨8.1⟩ m. *sahasra-bāhu* – 'who has a thousand arms'
भव **you must appear** ⟨*vidhātā* 2.1⟩ √*bhū*...सत्तायाम् – to be, exist, become
विश्व-मूर्ते **O Lord!** ⟨8.1⟩ m. *viśva-mūrti*...विश्वम् मूर्तिः यस्य, सः विश्व-मूर्तिः – 'whose form is the universe, i.e. everything'

Subodhinī: किरीटवन्तम् गदावन्तम् चक्र-हस्तम् च त्वाम् द्रष्टुम् इच्छामि, पूर्वम् यथा दृष्टः असि, तथैव । अतः हे सहस्र-बाहो, हे विश्व-मूर्ते ! इदम् विश्व-रूपम् संहृत्य, तेन एव किरीटादि-युक्तेन चतुर्भुजेन रूपेण भव (आविर्भव) । तद् अनेन श्री-कृष्णम् अर्जुनः पूर्वम् अपि किरीटादि-युक्तम् एव पश्यति इति गम्यते । यद् तु

पूर्वम् उक्तम् विश्वरूप-दर्शने 'किरीटिनम् गदिनम् चक्रिणम् च पश्यामि' इति तद् बहु-किरीटादि-अभिप्रायेण । यद्वा – एतावत् तम् कालम् यम् त्वाम् किरीटिनम् गदिनम् चक्रिणम् च सुप्रसन्नम् अपश्यम् तम् एव इदानीम् तेजः-राशिम् दुर्निरीक्ष्यम् पश्यामि इति एवम् तत्र बहु-वचन-व्यक्तिः इति अ-विरोधः ॥११.४६॥
एवम् प्रार्थितः सन्, तम् आश्वासयन् – 'मया' इति त्रिभिः –

11.47

श्रीभगवानुवाच
मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात् ।
तेजोमयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वम् ॥४७॥

श्री-भगवान् उवाच - हे अर्जुन !	Śrī Kṛṣṇa said: O Arjuna!
प्रसन्नेन	being pleased
इदम् मे (मम) परम्	this My supreme
तेजोमयम् विश्वम् अनन्तम् आद्यम् रूपम्	effulgent, universal, unlimited, primeval form
यद् त्वदन्येन न दृष्ट-पूर्वम्,	which was not seen before by other than you,
आत्म-योगात्	through My internal potency
प्रसन्नेन मया तव दर्शितम् ।	was shown by Me for you

"The Supreme Personality of Godhead said: My dear Arjuna, happily have I shown you, by My internal potency, this supreme universal form within the material world. No one before you has ever seen this primal form, unlimited and full of glaring effulgence."

श्री-भगवान् **Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'
उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
मया **by me** ⟨3.1⟩ *kṛṣṇanāma asmad* – (last person) I
प्रसन्नेन **by one who is pleased** ⟨3.1⟩ m. *prasanna* (*pra.*√*sad[l]* – to settle down; + .*[k]ta*) – settled; (applied to the mind:) satisfied
तव **for you** ⟨6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
अर्जुन **O Arjuna!** ⟨8.1⟩ m. *arjuna* – white, 'who is pure in actions'
इदम् **this** ⟨1.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this
रूपम् **the form** ⟨1.1⟩ n. *rūpa*
परम् **supreme** ⟨1.1⟩ n. *para* – beyond
दर्शितम् **shown** ⟨1.1⟩ n. *darśita* (√*dṛś[ir]*...प्रेक्षणे – to see; caus., + .*[k]ta*)
आत्म-योगात् **through the internal potency** ⟨5.1⟩ m. *ātma-yoga*...आत्मनः योगः इति आत्म-योगः – internal potency, Yogamāyā
तेजोमयम् **shining** ⟨1.1⟩ n. *tejomaya* – full of splendor

विश्वम् **universal** ⟨1.1⟩ n. *viśva* – universe
अनन्तम् **unlimited** ⟨1.1⟩ n. *an-anta*
आद्यम् **primeval** ⟨1.1⟩ n. *ādya*
यद् **that which** ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
त्वदन्येन **by anyone other than you** ⟨3.1⟩ m. *kṛṣṇanāma tvad-anya* – other than you
न **not** ⟨*avyaya*⟩
दृष्ट-पूर्वम् **seen before** ⟨1.1⟩ n. *dṛṣṭa-pūrva*

Subodhinī: हे अर्जुन ? किम् इति बिभेषि ? यतः मया प्रसन्नेन (कृपया) तव इदम् परम् (उत्तमम्) रूपम् दर्शितम्, आत्मनः (मम) योगात् (योगमाया-सामर्थ्यात्) । परत्वम् एव आह – तेजोमयम् विश्वम् (विश्वात्मकम्) अनन्तम् आद्यम् च, यद् मम रूपम् त्वद्-अन्येन (त्वादृशात् भक्तात् अन्येन) न पूर्वम् दृष्टम्, तद् ॥११.४७॥
एतद् दर्शनम् अतिदुर्लभम् लब्ध्वा, त्वम् कृतार्थः असि इति आह – 'न' इति –

11.48

न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः ।
एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर ॥४८॥

हे कुरु-प्रवीर !	O Arjuna!
न वेद-यज्ञाध्ययनैः, न दानैः	not by study of the *Vedas* and sacrifices, not by charity
न च क्रियाभिः, न उग्रैः तपोभिः	and not by ceremonies, not by severe austerities
नृ-लोके त्वदन्येन	in the world of men, by other than you
एवंरूपः अहम् द्रष्टुम् शक्यः ।	I can be seen in this form

"O best of the Kuru warriors, no one before you has ever seen this universal form of Mine, for neither by studying the Vedas, nor by performing sacrifices, nor by charity, nor by pious activities, nor by severe penances can I be seen in this form in the material world."

न **not** ⟨*avyaya*⟩
वेद-यज्ञाध्ययनैः **by study of the *Vedas* and of sacrifices** ⟨3.3⟩ n. *veda-yajña-_adhyayana*...वेदानाम् यज्ञानाम् च अध्ययनम् इति वेद-यज्ञाध्ययनम् – 'the study of the *Vedas* and of sacrifices'
न **not** ⟨*avyaya*⟩
दानैः **by charities** ⟨3.3⟩ n. *dāna* – gift
न **not** ⟨*avyaya*⟩
च **and** ⟨*avyaya*⟩
क्रियाभिः **by ceremonies** ⟨3.3⟩ f. *kriyā* – activity, ceremony

न **not** ⟨*avyaya*⟩
तपोभिः **by austerities** ⟨3.3⟩ n. *tapas* (*tapaḥ*) – austerity, penance
उग्रैः **by terrible** ⟨3.3⟩ n. *ugra* – terrible
एवंरूपः **in this form** ⟨1.1⟩ m. *evam-_rūpa*
शक्यः **possible** ⟨1.1⟩ m. *śakya* (from √*śak[l]*...शक्तौ – to be able) – able, possible
अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
नृ-लोके **in the world of men** ⟨7.1⟩ m. *nṛ-loka*...नृणाम् लोकः इति नृ-लोकः – the world of men; the earth
द्रष्टुम् **to see** ⟨*avyaya*⟩ √*dṛś[ir]*...प्रेक्षणे – to see; + .*tum[u]*
त्वदन्येन **by anyone other than you** ⟨3.1⟩ m. *kṛṣṇanāma tvad-anya* – other than you
कुरु-प्रवीर **O Arjuna!** ⟨8.1⟩ m. *kuru-pravīra*...कुरूणाम् प्रवीरः इति कुरु-प्रवीरः – 'hero of the Kurus'

Subodhinī: वेद-अध्ययन-अतिरेकेण यज्ञ-अध्ययनस्य अ-भावात्, 'यज्ञ'-शब्देन यज्ञ-विद्याः 'कल्प-सूत्र'-आद्याः लक्ष्यन्ते । वेदानाम् यज्ञ-विद्यानाम् च अध्ययनैः इति अर्थः । नच दानैः, नच क्रियाभिः (अग्नि-होत्रादिभिः), नच उग्रैः तपोभिः (चान्द्रायणादिभिः) एवम्-रूपः अहम् त्वद्-अन्येन मनुष्य-लोके द्रष्टुम् शक्यः । अपितु त्वम् एव केवलम्, मद्-प्रसादेन दृष्ट्वा, कृतार्थः असि ॥११.४८॥
एवम् अपि चेद् तव इदम् घोरम् रूपम् दृष्ट्वा व्यथा भवति तर्हि तद् एव रूपम् दर्शयामि इति आह – 'मा ते' इति –

Note: Between *śakyaḥ* and *aham* there could have been *sandhi* (*śakyo 'ham*), but instead *visarga* has been dropped (*ārṣa-prayoga*).

11.49

मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ् ममेदम् ।
व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य ॥४९॥

इदम् मम ईदृक् घोरम् रूपम् दृष्ट्वा	[after] seeing such a terrible form of Mine
ते (तव) व्यथा मा, विमूढ-भावः च मा,	be not perturbed or bewildered,
व्यपेत-भीः प्रीत-मनाः	[being] free from fear and happy in mind
तद् एव इदम् मे (मम) रूपम्	the very form of Mine (11.17)
पुनः त्वम् प्रपश्य !	again behold!

"You have been perturbed and bewildered by seeing this horrible feature of Mine. Now let it be finished. My devotee, be free again from all disturbances. With a peaceful mind you can now see the form you desire."

मा **not** ⟨*avyaya*⟩
ते **your** ⟨opt. for *tava* 6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

व्यथा perturbation ⟨1.1⟩ f. *vyathā* (from √*vyath[a]*...भय-चलनयोः – to fear; be perturbed)
मा not ⟨*avyaya*⟩
च and ⟨*avyaya*⟩
विमूढ-भावः **bewildered state** ⟨1.1⟩ m. *vimūḍha-bhāva*
दृष्ट्वा **[after] seeing** ⟨*avyaya*⟩ √*dṛś[ir]*...प्रेक्षणे – to see; + .[*k*]*tvā*
रूपम् **form** ⟨2.1⟩ n. *rūpa*
घोरम् **terrible** ⟨2.1⟩ n. *ghora*
ईदृक् **such** ⟨2.1⟩ n. *īdṛś* (*īdṛk*)
मम **my** ⟨6.1⟩ *kṛṣṇanāma asmad* – (last person) I
इदम् **this** ⟨2.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this
व्यपेत-भीः **whose fear is gone** ⟨1.1⟩ m. *vyapeta-bhī*...व्यपेता भीः यस्य, सः व्यपेत-भीः
व्यपेत (*vi.apa.*√*i[ṇ]* – to go away) – gone away
प्रीत-मनाः **whose mind is pleased** ⟨1.1⟩ m. *prīta-manas (-manaḥ)*...प्रीतम् मनः यस्य, सः प्रीत-मनाः
पुनः **again** ⟨*avyaya*⟩ (*punar*)
त्वम् **you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
तद् **that** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
एव **certainly** ⟨*avyaya*⟩
मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
रूपम् **form** ⟨2.1⟩ n. *rūpa*
इदम् **this** ⟨2.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this
प्रपश्य **you must see** ⟨*vidhātā* 2.1⟩ *pra.*√*dṛś[ir]* – to see clearly, understand

Subodhinī: ईदृक् (ईदृशम्) मदीयम् घोरम् रूपम् दृष्ट्वा, ते व्यथा मा अस्तु । विमूढ-भावः (विमूढत्वम्) च मा अस्तु । व्यपगत-भयः प्रीतमनाः च सन्, पुनः त्वम् तद् एव इदम् मम रूपम् प्रकर्षेण पश्य ॥११.४९॥
एवम् उक्त्वा, प्राक्तनम् एव रूपम् दर्शितवान् इति [सञ्जयः उवाच] – 'इति' इति –

11.50

सञ्जय उवाच

इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः ।
आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा ॥५०॥

सञ्जयः उवाच	Sañjaya said:
इति वासुदेवः	thus Śrī Kṛṣṇa
अर्जुनम् तथा उक्त्वा	[after] speaking in this ways to Arjuna
स्वकम् रूपम् भूयः दर्शयामास,	again showed His own form,

महात्मा	Śrī Kṛṣṇa
पुनः सौम्य-वपुः भूत्वा	[after] again assuming a pleasing form
एनम् भीतम् आश्वासयामास च ।	consoled the frightened one (Arjuna)

"Sañjaya said to Dhṛtarāṣṭra: The Supreme Personality of Godhead, Kṛṣṇa, having spoken thus to Arjuna, displayed His real four-armed form and at last showed His two-armed form, thus encouraging the fearful Arjuna."

सञ्जयः **Sañjaya** ⟨1.1⟩ m. *sam._jaya* – 'conquest'
उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
इति **thus** ⟨*avyaya*⟩
अर्जुनम् **to Arjuna** ⟨2.1⟩ m. *arjuna* – white, 'who is pure in actions'
वासुदेवः **Śrī Kṛṣṇa** ⟨1.1⟩ m. *vāsudeva* – 'son of Vasudeva'
तथा **so** ⟨*avyaya*⟩
उक्त्वा **[after] speaking** ⟨*avyaya*⟩ √*vac[a]*...परिभाषणे – to speak; + .[*k*]*tvā*
स्वकम् **the own** ⟨2.1⟩ n. *svaka*
रूपम् **form** ⟨2.1⟩ n. *rūpa*
दर्शयामास **he showed** ⟨*adhokṣaja* caus. 1.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see
भूयः **again** ⟨*avyaya*⟩
आश्वासयामास **he consoled** ⟨*adhokṣaja* caus. 1.1⟩ *ā.*√*śvas[a]* – to breath freely
च **and** ⟨*avyaya*⟩
भीतम् **afraid** ⟨2.1⟩ m. *bhīta* (√*[ñi]bhī*...भये – to fear; + .[*k*]*ta*) – afraid, fearful
एनम् **this** ⟨2.1⟩ m. *kṛṣṇanāma etad* – (first person) he, this
भूत्वा **[after] becoming** ⟨*avyaya*⟩ √*bhū*...सत्तायाम् – to be, exist, become; + .[*k*]*tvā*
पुनः **again** ⟨*avyaya*⟩ (*punar*)
सौम्य-वपुः **whose form is pleasing** ⟨1.1⟩ m. *saumya-vapus (-vapuḥ)*...सौम्यम् वपुः यस्य, सः सौम्य-वपुः
सौम्य – gentle, mild
महात्मा **Śrī Kṛṣṇa** ⟨1.1⟩ m. *mahā-ātman (-ātmā)* – 'great soul'

Subodhinī: श्री-वासुदेवः अर्जुनम् एवम् उक्त्वा, यथा पूर्वम् आसीत् तथैव किरीटादि-युक्तम् चतुर्भुजम् स्वीयम् रूपम् पुनः दर्शयामास । एनम् अर्जुनम् भीतम् एव प्रसन्न-वपुः भूत्वा पुनः अपि आश्वासितवान् । महात्मा विश्व-रूपः, कृपालुः इति वा ॥११.५०॥
ततः निर्भयः सन् [अर्जुनः उवाच] – 'दृष्ट्वा इदम्' इति –

Note: The question is whether Arjuna saw at the end the four-armed form of Kṛṣṇa or ultimately the two-armed humanlike form also. According to Viśvanātha, first Kṛṣṇa shows to Arjuna His four-armed form. Right after that – पुनः सः महात्मा सौम्य-वपुः [...] पीताम्बर-धरः द्विभुजः भूत्वा भीतम् एनम् आश्वासयामास – "Assuming again the pleasing two-armed form with yellow garments, Kṛṣṇa consoled the frightened

Arjuna." Commenting on verse 11.52, Baladeva confirms this by saying – इदम् मम कृष्ण-रूपम् ... यद् त्वम् सुचिरात् दृष्टवान् असि – "This is My form as Kṛṣṇa ... which you are seeing **since a long time.**" Although generally *dṛṣṭavān* gives the idea of past tense, the combination *dṛṣṭavān asi* has also a present tense connotation. Arjuna saw Kṛṣṇa all the time in a two-armed form, which made possible their friendship, and again he is seeing Him in this way.

11.51

अर्जुन उवाच

दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ।
इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥५१॥

अर्जुनः उवाच - हे जनार्दन !	Arjuna said: O Kṛṣṇa!
इदम् तव सौम्यम् मानुषम् रूपम् दृष्ट्वा	[after] seeing this pleasing human form of Yours
इदानीम् स-चेताः संवृत्तः अस्मि,	I have now become pacified,
प्रकृतिम् गतः ।	and come to normal condition

"When Arjuna thus saw Kṛṣṇa in His original form, he said: O Janārdana, seeing this humanlike form, so very beautiful, I am now composed in mind, and I am restored to my original nature."

अर्जुनः **Arjuna** ⟨1.1⟩ m. *arjuna* – white, 'who is pure in actions'
उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
दृष्ट्वा **[after] seeing** ⟨*avyaya*⟩ √*dṛś[ir]*...प्रेक्षणे – to see; + *.[k]tvā*
इदम् **this** ⟨2.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this
मानुषम् **human** ⟨2.1⟩ n. *mānuṣa*
रूपम् **form** ⟨2.1⟩ n. *rūpa*
तव **your** ⟨6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
सौम्यम् **pleasing** ⟨2.1⟩ n. *saumya* – mild
जनार्दन **O Kṛṣṇa!** ⟨8.1⟩ m. *jana-_ardana* – 'who destroys bad elements and grants desires', i.e. the Lord who maintains all
इदानीम् **now** ⟨*avyaya*⟩
अस्मि **I am** ⟨*acyuta* 3.1⟩ √*as[a]*...भुवि – to be, exist
संवृत्तः **having become** ⟨1.1⟩ m. *saṁvṛtta* (*sam.*√*vṛt[u]* – to become; + *.[k]ta*) – having become
स-चेताः **who is pacified** ⟨1.1⟩ m. *sa-cetas* (*-cetāḥ*) – with consciousness
प्रकृतिम् **to normal state** ⟨2.1⟩ f. *prakṛti* – nature, normal state
गतः **having come** ⟨1.1⟩ m. *gata* (√*gam[ḷ]*...गतौ – to go; + *.[k]ta*) – gone

Subodhinī: स-चेताः (प्रसन्न-चित्तः) इदानीम् संवृत्तः (जातः) अस्मि, प्रकृतिम् (स्वास्थ्यम्) च प्राप्तः अस्मि । शेषम् स्पष्टम् ॥११.५१॥

स्व-कृतस्य अनुग्रहस्य अतिदुर्लभत्वम् दर्शयन् । श्री-भगवान् उवाच । – 'सुदुर्दर्शम्' इति –

11.52

श्रीभगवानुवाच

सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ।
देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः ॥५२॥

श्री-भगवान् उवाच -	Śrī Kṛṣṇa said:
यद् मम रूपम् दृष्टवान् असि	the form of mine which you have seen
इदम् सुदुर्दर्शम्,	this one is very difficult to behold,
देवाः अपि	even the *devas*
अस्य रूपस्य नित्यम् दर्शन-काङ्क्षिणः ।	are always eager to see this form

"The Supreme Personality of Godhead said: My dear Arjuna, this form of Mine you are now seeing is very difficult to behold. Even the demigods are ever seeking the opportunity to see this form, which is so dear."

श्री-भगवान् **Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'
उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
सुदुर्दर्शम् **very difficult to behold** ⟨2.1⟩ n. *sudurdarśa*
इदम् **this** ⟨2.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this
रूपम् **form** ⟨2.1⟩ n. *rūpa*
दृष्टवान् **one who saw** ⟨1.1⟩ m. *dṛṣṭavat* (√*dṛś[ir]*...प्रेक्षणे – to see; + *.[k]tavat[u]*)
असि **you are** ⟨*acyuta* 2.1⟩ √*as[a]*...भुवि – to be, exist
dṛṣṭavān asi – you have seen
यद् **that which** ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
मम **my** ⟨6.1⟩ *kṛṣṇanāma asmad* – (last person) I
देवाः **the Devas** ⟨1.3⟩ m. *deva* – divine being
अपि **also** ⟨*avyaya*⟩
अस्य **of this** ⟨6.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this
रूपस्य **of the form** ⟨6.1⟩ n. *rūpa* – form
नित्यम् **always** ⟨*avyaya*⟩ from *nitya* – innate, fixed, eternal
दर्शन-काङ्क्षिणः **who desire to see** ⟨1.3⟩ m. *darśana-kāṅkṣin* (*-kāṅkṣī*)

Subodhinī: यद् मम विश्व-रूपम् त्वम् दृष्टवान् असि, इदम् सुदुर्दर्शम् (अत्यन्तम् द्रष्टुम् अ-शक्यम्), यतः देवाः अपि अस्य रूपस्य सर्वदा दर्शनम् इच्छन्ति, न केवलम् पुनः इदम् पश्यन्ति ॥११.५२॥

तत्र हेतुः – 'न अहम्' इति –

11.53

नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥५३॥

न वेदैः, न तपसा	not by [studying] the *Vedas*, not by austerity
न दानेन, न च इज्यया	not by charity and not by sacrifice
अहम् एवंविधः द्रष्टुम् शक्यः,	I can be seen in this way,
यथा माम् दृष्टवान् असि ।	as you have seen Me

"The form you are seeing with your transcendental eyes cannot be understood simply by studying the Vedas, nor by undergoing serious penances, nor by charity, nor by worship. It is not by these means that one can see Me as I am."

न	**not** ⟨*avyaya*⟩
अहम्	**I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
वेदैः	**by the *Vedas*** ⟨3.3⟩ m. *veda* – the *Vedas*
न	**not** ⟨*avyaya*⟩
तपसा	**by austerity** ⟨3.1⟩ n. *tapas* (*tapaḥ*) – austerity, penance
न	**not** ⟨*avyaya*⟩
दानेन	**by charity** ⟨3.1⟩ n. *dāna* – gift
न	**not** ⟨*avyaya*⟩
च	**and** ⟨*avyaya*⟩
इज्यया	**by worship** ⟨3.1⟩ f. *ijyā* – sacrifice, worship
शक्यः	**possible** ⟨1.1⟩ m. *śakya* (√*śak[l]*...शक्तौ – to be able; + *.ya*) – able, possible
एवंविधः	**in this form** ⟨1.1⟩ m. *evam-_vidha*
द्रष्टुम्	**to see** ⟨*avyaya*⟩ √*dṛś[ir]*...प्रेक्षणे – to see; + *.tum[u]*
दृष्टवान्	**one who saw** ⟨1.1⟩ m. *dṛṣṭavat* (√*dṛś[ir]*...प्रेक्षणे – to see; + *.[k]tavat[u]*)
असि	**you are** ⟨*acyuta* 2.1⟩ √*as[a]*...भुवि – to be, exist
माम्	**me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
यथा	**as** ⟨*avyaya*⟩

Subodhinī: स्पष्ट-अर्थः ॥११.५३॥
केन उपायेन तर्हि द्रष्टुम् शक्यः? इति तत्र आह 'भक्त्या' इति –

11.54

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥५४॥

हे परन्तप अर्जुन !	O Arjuna!
अनन्यया भक्त्या तु	but by unalloyed devotion
अहम् एवंविधः	I, in this form
तत्त्वेन ज्ञातुम् द्रष्टुम् च प्रवेष्टुम् च शक्यः ।	can be truly known, seen and entered into

"My dear Arjuna, only by undivided devotional service can I be understood as I am, standing before you, and can thus be seen directly. Only in this way can you enter into the mysteries of My understanding."

भक्त्या	**by devotion** ⟨3.1⟩ f. *bhakti* – devotion
तु	**but** ⟨*avyaya*⟩
अनन्यया	**by unalloyed** ⟨3.1⟩ f. *an-anyā* (*.ā[p]*) – 'no other', unalloyed
शक्यः	**possible** ⟨1.1⟩ m. *śakya* (from √*śak[l]*...शक्तौ – to be able) – able, possible
अहम्	**I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
एवंविधः	**in this form** ⟨1.1⟩ m. *evam-_vidha*
अर्जुन	**O Arjuna!** ⟨8.1⟩ m. *arjuna* – white, 'who is pure in actions'
ज्ञातुम्	**to know** ⟨*avyaya*⟩ √*jñā* 9P...अवबोधने – to know; + *.tum[u]*
द्रष्टुम्	**to see** ⟨*avyaya*⟩ √*dṛś[ir]*...प्रेक्षणे – to see; + *.tum[u]*
च	**and** ⟨*avyaya*⟩
तत्त्वेन	**truly** ⟨3.1⟩ n. *tattva* – truth
प्रवेष्टुम्	**to enter** ⟨*avyaya*⟩ *pra.*√*viś[a]* – to enter; + *.tum[u]*
परन्तप	**O Arjuna!** ⟨8.1⟩ m. *param-_tapa* – 'who scorches the enemies'

Subodhinī: अनन्यया (मद्-एक-निष्ठया) भक्त्या तु एवम्-भूतः (विश्व-रूपः) अहम् तत्त्वेन (परमार्थतः) ज्ञातुम् शक्यः शास्त्रतः, द्रष्टुम् प्रत्यक्षतः, प्रवेष्टुम् च ताद्-आत्म्येन शक्यः, न अन्यैः उपायैः ॥११.५४॥
अतः सर्व-शास्त्र-सारम् परमम् रहस्यम् शृणु इति आह – 'मद्-कर्म-कृत्' इति –

11.55

मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः ।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ॥५५॥

हे पाण्डव !	O Arjuna!
यः मत्कर्म-कृत् मत्परमः	one who works for Me, is fixed on Me
मद्भक्तः सङ्ग-वर्जितः	is My devotee, free from attachment
सर्व-भूतेषु निर्वैरः,	and without enmity towards any being,
सः माम् एति ।	he comes to Me

"My dear Arjuna, he who engages in My pure devotional service, free from the contaminations of fruitive activities and mental speculation, he who works for Me, who makes Me the supreme goal of his life, and who is friendly to every living being – he certainly comes to Me."

मत्कर्म-कृत्	**who does my work** ⟨1.1⟩ m. *mad-_karma-kṛt*...यः मम कर्म करोति, सः मत्कर्म-कृत्
मत्परमः	**who is devoted to Me** ⟨1.1⟩ m. *mad-_parama*...अहम् परमः यस्य, सः मत्परमः – 'whose supreme [shelter or master] I am', subordinate or devoted to Me
मद्भक्तः	**my devotee** ⟨1.1⟩ m. *mad-bhakta*...मम भक्तः इति मद्भक्तः
सङ्ग-वर्जितः	**who is free from attachment** ⟨1.1⟩ m. *saṅga-varjita*...सङ्गेन वर्जितः यः, सः सङ्ग-वर्जितः
निर्वैरः	**who is without enmity** ⟨1.1⟩ m. *nirvaira* – without enmity
सर्व-भूतेषु	**towards all beings** ⟨7.3⟩ n. *sarva-bhūta* – all beings
यः	**he who** ⟨1.1⟩ m. *kṛṣnanāma yad* – (relative) who, which
सः	**he** ⟨1.1⟩ m. *kṛṣnanāma tad* – (first person) he, that
माम्	**to me** ⟨2.1⟩ *kṛṣnanāma asmad* – (last person) I
एति	**he goes** ⟨*acyuta* 1.1⟩ √*i[ṇ]*...गतौ – to go
पाण्डव	**O Arjuna!** ⟨8.1⟩ m. *pāṇḍava* – 'son of Pāṇḍu'

Subodhinī: मदर्थम् कर्म करोति इति मद्-कर्म-कृत्, अहम् एव परमः पुरुषार्थः यस्य सः, मम एव भक्तः (माम् एव आश्रितः), पुत्रादिषु सङ्ग-वर्जितः, निर्वैरः च सर्व-भूतेषु । एवम्-भूतः यः, सः माम् प्राप्नोति, न अन्यः इति ॥११.५५॥

ओं तत्सदिति
श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि
श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे विश्वरूपदर्शनयोगो नामैकादशो ऽध्यायः ॥११॥

अथ द्वादशो ऽध्यायः

अथ द्वादशः अध्यायः । now the twelfth chapter

Subodhinī: पूर्व-अध्याय-अन्ते 'मत्कर्म-कृत् मत्परमः' (11.55) इति एवम् भक्ति-निष्ठस्य श्रेष्ठत्वम् उक्तम् । 'कौन्तेय प्रतिजानीहि' (9.31) इत्यादिना तत्र तस्य एव श्रेष्ठत्वम् वर्णितम् । तथा 'तेषाम् ज्ञानी नित्य-युक्तः एक-भक्तिः विशिष्यते' (7.17) इत्यादिना, 'सर्वम् ज्ञान-प्लवेन एव वृजिनम् सन्तरिष्यसि' (4.36) इत्यादिना च ज्ञान-निष्ठस्य श्रेष्ठत्वम् उक्तम् । एवम् उभयोः श्रेष्ठये अपि, विशेष-जिज्ञासया भगवन्तम् प्रति [अर्जुनः उवाच] – 'एवम्' इति

12.1

अर्जुन उवाच
एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥१॥

अर्जुनः उवाच -	Arjuna said:
एवम् सतत-युक्ताः	thus being constantly devoted
ये भक्ताः त्वाम् पर्युपासते,	those devotees who worship You,
ये च अपि अ-व्यक्तम् अ-क्षरम्,	and also those who [worship] the unmanifest Brahman,
तेषाम् के योग-वित्तमाः ?	of those [two classes] who are best in *yoga*?

"Arjuna inquired: Which are considered to be more perfect, those who are always properly engaged in Your devotional service or those who worship the impersonal Brahman, the unmanifested?"

अर्जुनः	**Arjuna** ⟨1.1⟩ m. *arjuna* – white, 'who is pure in actions'
उवाच	**he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
एवम्	**thus** ⟨*avyaya*⟩
सतत-युक्ताः	**who are constantly devoted** ⟨1.3⟩ m. *satata-yukta* – constantly devoted / engaged
ये	**those who** ⟨1.3⟩ m. *kṛṣnanāma yad* – (relative) who, which
भक्ताः	**devotees** ⟨1.3⟩ m. *bhakta* – devotee
त्वाम्	**you** ⟨2.1⟩ *kṛṣnanāma yuṣmad* – (middle person) you
पर्युपासते	**they worship** ⟨*acyuta* 1.3⟩ *pari.upa.*√*ās[a]* – to worship
ये	**those who** ⟨1.3⟩ m. *kṛṣnanāma yad* – (relative) who, which
च	**and** ⟨*avyaya*⟩
अपि	**also** ⟨*avyaya*⟩
अ-क्षरम्	**the indestructible** ⟨2.1⟩ n. *a-kṣara*

अ-व्यक्तम्	**the unmanifest** ⟨2.1⟩ n. *a-vyakta* – unmanifest, transcendental
तेषाम्	**of those** ⟨6.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that
के	**who are** ⟨1.3⟩ m. *kṛṣṇanāma kim* – who/what
योग-वित्तमाः	**the best of the knowers of *yoga*** ⟨1.3⟩ m. *yoga-vittama* (*.tama*)...योग-विदाम् श्रेष्ठः इति योग-वित्तमः योगविद् – who knows *yoga*; (+ *.tama*) *yogavittama*

Subodhinī: एवम् सर्व-कर्म-अर्पणादिना सततम् युक्ताः (त्वद्-निष्ठाः) सन्तः, ये भक्ताः त्वाम् विश्व-रूपम् सर्व-ज्ञम् सर्व-शक्तिम् पर्युपासते (ध्यायन्ति), ये च अपि अ-क्षरम् (ब्रह्म) अ-व्यक्तम् (निर्विशेषम्) उपासते, तेषाम् (उभयेषाम् मध्ये) अतिशयेन के योग-विदः श्रेष्ठाः इति अर्थः ॥१२.१॥

'तत्र प्रथमाः श्रेष्ठाः !' इति उत्तरम् [श्री-भगवान् उवाच] – 'मयि' इति –

12.2

श्रीभगवानुवाच

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥२॥

श्री-भगवान् उवाच -	Śrī Kṛṣṇa said:
परया श्रद्धया उपेताः	[being] endowed with transcendental faith
नित्य-युक्ताः	and constantly devoted
ये मनः मयि आवेश्य	those who, [after] absorbing [their] mind in Me
माम् उपासते,	worship Me,
ते मे (मम) युक्ततमाः मताः ।	they are considered the best *yogīs* by Me

"The Supreme Personality of Godhead said: Those who fix their minds on My personal form and are always engaged in worshiping Me with great and transcendental faith are considered by Me to be most perfect."

श्री-भगवान्	**Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'
उवाच	**he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
मयि	**in me** ⟨7.1⟩ *kṛṣṇanāma asmad* – (last person) I
आवेश्य	**[after] absorbing** ⟨*avyaya*⟩ (*ā.*√*viś[a]* – to enter; caus.; + *.ya[p]*)
मनः	**the mind** ⟨2.1⟩ n. *manas* (*manaḥ*)
ये	**those who** ⟨1.3⟩ m. *kṛṣṇanāma yad* – (relative) who, which
माम्	**me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
नित्य-युक्ताः	**who are constantly devoted** ⟨1.3⟩ m. *nitya-yukta* – constantly devoted
उपासते	**they worship** ⟨*acyuta* 1.3⟩ *upa.*√*ās[a]* – to worship
श्रद्धया	**with faith** ⟨3.1⟩ f. *śraddhā* – faith, trust

परया	**with supreme** ⟨3.1⟩ f. *parā* (*.ā[p]*) – beyond
उपेताः	**who have attained** ⟨1.3⟩ m. *upeta* (*upa.*√*i[n]* – to go near, attain; *.[k]ta*) – attained
ते	**they** ⟨1.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that
मे	**my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
युक्ततमाः	**best in *yoga*** ⟨1.3⟩ m. *yuktatama* (*.tama*)
मताः	**considered** ⟨1.3⟩ m. *mata* (√*man[a]* 4A...बोधने – to know, think; + *.[k]ta*) – thought

Subodhinī: मयि परमेश्वरे सर्व-ज्ञत्वादि-गुण-विशिष्टे मनः आवेश्य (एकाग्रम् कृत्वा), नित्य-युक्ताः (मदर्थ-कर्म-अनुष्ठानादिना मन्निष्ठाः) सन्तः, श्रेष्ठया श्रद्धया युक्ताः ये माम् आराधयन्ति, ते युक्ततमाः मताः (मम अभिमताः) ॥१२.२॥

तर्हि इतरे किम् न श्रेष्ठाः ? इति अतः आह – 'ये तु' इति द्वाभ्याम् –

12.3...4

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥३॥

ये तु	but those who
अ-निर्देश्यम् अ-व्यक्तम्	the indescribable, unmanifest
सर्वत्र-गम् अ-चिन्त्यम्	all-pervading, inconceivable
कूट-स्थम् अ-चलम् ध्रुवम् च अ-क्षरम्	changeless, unmoving and fixed Brahman
पर्युपासते, . . .	worship, . . .

"But those who fully worship the unmanifested, that which lies beyond the perception of the senses, the all-pervading, inconceivable, unchanging, fixed and immovable – the impersonal conception of the Absolute Truth – . . ."

ये	**those who** ⟨1.3⟩ m. *kṛṣṇanāma yad* – (relative) who, which
तु	**but** ⟨*avyaya*⟩
अ-क्षरम्	**Brahman** ⟨2.1⟩ n. *a-kṣara* – indestructible
अ-निर्देश्यम्	**the indescribable** ⟨2.1⟩ n. *a-nirdeśya* निर्देश्य (*nir.*√*diś[a]* – to describe; + *.ya*) – to be described
अ-व्यक्तम्	**the unmanifest** ⟨2.1⟩ n. *a-vyakta*
पर्युपासते	**they worship** ⟨*acyuta* 1.3⟩ *pari.upa.*√*ās[a]* – to worship
सर्वत्र-गम्	**the all-pervading** ⟨2.1⟩ n. *sarvatra-ga* – going everywhere
अ-चिन्त्यम्	**the inconceivable** ⟨2.1⟩ n. *a-cintya*
च	**and** ⟨*avyaya*⟩
कूट-स्थम्	**the changeless** ⟨2.1⟩ n. *kūṭa-stha* – 'standing on top', anything prominent, unmoving, changeless; situated in transcendence; the changeless spirit
अ-चलम्	**the unmoving** ⟨2.1⟩ n. *a-cala*

ध्रुवम् **fixed** ⟨2.1⟩ n. *dhruva* – fixed, firm, unchanging, constant; lasting, permanent; certain, sure

Subodhinī: ये तु अ-क्षरम् पर्युपासते (ध्यायन्ति), ते अपि माम् एव प्राप्नुवन्ति इति द्वयोः अन्वयः । अ-क्षरस्य लक्षणम् अ-निर्देश्यम् इत्यादि । 'अ-निर्देश्यम्' शब्देन निर्देष्टुम् अ-शक्यम्, यतः अ-व्यक्तम् (रूपादि-हीनम्), सर्वत्र-गम् सर्वव्यापि। । अ-व्यक्तत्वात् एव अ-चिन्त्यम्, कूट-स्थम् (कूटे माया-प्रपञ्चे अधिष्ठानत्वेन स्थितम्) । अ-चलम् (वृद्ध्यादि-रहितम्) अतएव ध्रुवम् (नित्यम्) ॥१२.३॥

12.4

सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥४॥

. . . इन्द्रिय-ग्रामम् सन्नियम्य	. . . [after] perfectly controlling all the senses
सर्वत्र सम-बुद्धयः	[being] equal-minded towards all
सर्व-भूत-हिते रताः	and engaged in the welfare of all
ते माम् एव प्राप्नुवन्ति ।	they [also] achieve Me alone

". . . by controlling the various senses and being equally disposed to everyone, such persons, engaged in the welfare of all, at last achieve Me."

सन्नियम्य **[after] restraining** ⟨*avyaya*⟩ *sam.ni.√yam[a]* – to restrain; + *.ya[p]*

इन्द्रिय-ग्रामम् **all the senses** ⟨2.1⟩ m. *indriya-grāma* – the senses collectively

सर्वत्र **everywhere** ⟨*avyaya*⟩

सम-बुद्धयः **who are equal-minded** ⟨1.3⟩ m. *sama-buddhi*...समा बुद्धिः यस्य, सः सम-बुद्धिः – whose intelligence is equal

ते **they** ⟨1.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

प्राप्नुवन्ति **they attain** ⟨*acyuta* 1.3⟩ *pra.√āp[l]* – to obtain

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

एव **certainly** ⟨*avyaya*⟩

सर्व-भूत-हिते **in the welfare of all beings** ⟨7.1⟩ n. *sarva-bhūta-hita*...सर्वेषाम् भूतानाम् हितः इति सर्व-भूत-हितः – the welfare of all beings

रताः **who are devoted** ⟨1.3⟩ m. *rata* (*√ram[u]*...क्रीडायाम् – to play, rejoice; + *[k]ta*) – pleased; devoted

Subodhinī: स्पष्टम् अन्यत् ॥१२.४॥

ननु च ते अपि त्वाम् एव प्राप्नुवन्ति, तर्हि इतरेषाम् युक्ततमत्वम् कुतः ? इति अपेक्षायाम् क्लेश-अक्लेश-कृतम् विशेषम् आह – 'क्लेशः' इति त्रिभिः –

12.5

क्लेशो ऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥५॥

तेषाम् अव्यक्तासक्त-चेतसाम्	for those attached to the unmanifest
क्लेशः अधिकतरः	the trouble is greater,
अ-व्यक्ता गतिः	the unmanifest goal
देहवद्भिः दुःखम् हि अवाप्यते ।	is only with difficulty achieved by embodied beings

"For those whose minds are attached to the unmanifested, impersonal feature of the Supreme, advancement is very troublesome. To make progress in that discipline is always difficult for those who are embodied."

क्लेशः **trouble** ⟨1.1⟩ m. *kleśa*

अधिकतरः **greater** ⟨1.1⟩ m. *adhikatara* (*.tara*)

तेषाम् **of those** ⟨6.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

अव्यक्तासक्त-चेतसाम् **of those whose minds are attached to the unmanifest** ⟨6.3⟩ m. *a-vyakta-_āsakta-cetas* (*-cetāḥ*)...अ-व्यक्ते आसक्तम् चेतः यस्य, सः अव्यक्तासक्त-चेताः – whose mind is attached to the unmanifest

अ-व्यक्ता **the unmanifest** ⟨1.1⟩ f. *a-vyaktā* (*.ā[p]*) – unmanifest, transcendental

हि **indeed** ⟨*avyaya*⟩

गतिः **the goal** ⟨1.1⟩ f. *gati* – movement, goal

दुःखम् **with difficulty** ⟨*avyaya*⟩

देहवद्भिः **by embodied beings** ⟨3.3⟩ m. *dehavat* (*.vat[u]*) – 'having *deha* (a body)'; embodied

अवाप्यते **it is obtained** ⟨*acyuta* pass. 1.1⟩ *ava.√āp[l]* – to obtain

Subodhinī: अ-व्यक्ते (निर्विशेषे अ-क्षरे) आसक्तम् चेतः येषाम्, तेषाम् क्लेशः अधिकतरः । हि (यस्मात्) अ-व्यक्त-विषया गतिः (निष्ठा) देह-अभिमानिभिः दुःखम् यथा भवति एवम् अवाप्यते देह-अभिमानिनाम् नित्यम् प्रत्यक्-प्रवणत्वस्य दुर्घटत्वात् इति भावः ॥१२.५॥

मद्-भक्तानाम् मद्-प्रसादात् अनायासेन एव सिद्धिः भवति इति आह – 'ये तु' इति द्वाभ्याम् –

12.6...7

ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥६॥

ये तु मत्पराः	but those who are fixed on Me
मयि सर्वाणि कर्माणि सन्न्यस्य	[after] surrendering all activities unto Me
अनन्येन एव योगेन माम् ध्यायन्तः	[while] meditating on Me with unalloyed devotion
उपासते . . .	worship [Me], . . .

"But those who worship Me, giving up all their activities unto Me and being devoted to Me without deviation, engaged in devotional service and always meditating upon Me, . . ."

ये	**those who** ⟨1.3⟩ m. *kṛṣnanāma yad* – (relative) who, which
तु	**but** ⟨*avyaya*⟩
सर्वाणि	**all** ⟨2.3⟩ n. *kṛṣnanāma sarva*
कर्माणि	**activities** ⟨2.3⟩ n. *karman (karma)* – activity
मयि	**in me** ⟨7.1⟩ *kṛṣnanāma asmad* – (last person) I
सन्न्यस्य	**[after] renouncing** ⟨*avyaya*⟩ *sam.ni.√as[u]* – to throw down, give up; + *.ya[p]*
मत्पराः	**who are devoted to Me** ⟨1.3⟩ m. *mad-_para*...अहम् परः यस्य, सः मत्परमः – 'whose supreme [shelter or master] I am', subordinate or devoted to Me
अनन्येन	**with unalloyed** ⟨3.1⟩ m. *an-anya* – 'no other', unalloyed
एव	**certainly** ⟨*avyaya*⟩
योगेन	**with *bhakti-yoga*** ⟨3.1⟩ m. *yoga*
माम्	**me** ⟨2.1⟩ *kṛṣnanāma asmad* – (last person) I
ध्यायन्तः	**[while] they are meditating** ⟨1.3⟩ m. *dhyāyat* (*√dhyai*...चिन्तायाम् – to think, meditate; + *.[Ś]at[ṛ]*) – [while] meditating
उपासते	**they worship** ⟨*acyuta* 1.3⟩ *upa.√ās[a]* – to worship

Subodhinī: मयि परमेश्वरे सर्वाणि कर्माणि सन्न्यस्य (समर्प्य), मत्पराः भूत्वा माम् ध्यायन्तः अनन्येन न विद्यते अन्यः भजनीयः यस्मिन् तेन एव एकान्त-भक्ति-योगेन उपासते इति अर्थः ॥१२.६॥

12.7

तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् ॥७॥

. . . हे पार्थ !	. . . O Arjuna!
तेषाम् मयि आवेशित-चेतसाम्	for those whose minds are absorbed in Me
मृत्यु-संसार-सागरात्	from the ocean of birth and death
अहम् समुद्धर्ता न चिरात् भवामि ।	I become the deliverer without delay

". . . having fixed their minds upon Me, O son of Pṛthā – for them I am the swift deliverer from the ocean of birth and death."

तेषाम्	**for those** ⟨6.3⟩ m. *kṛṣnanāma tad* – (first person) he, that
अहम्	**I** ⟨1.1⟩ *kṛṣnanāma asmad* – (last person) I
समुद्धर्ता	**the deliverer** ⟨1.1⟩ m. *samuddhartṛ* (*sam.ut.√hṛ[ñ]* – to extricate; + *.tṛ[n]*) – 'one who extricates'
मृत्यु-संसार-सागरात्	**from the ocean of birth and death** ⟨5.1⟩ m. *mṛtyu-saṁsāra-sāgara*...मृत्यु-संसारस्य सागरः इति मृत्यु-संसार-सागरः – the ocean of the cycles of deaths
भवामि	**I become** ⟨*acyuta* 3.1⟩ *√bhū*...सत्तायाम् – to be, exist, become
न चिरात्	**without delay** ⟨*avyaya*⟩ 'not a long time', before long, soon
पार्थ	**O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
मयि	**in me** ⟨7.1⟩ *kṛṣnanāma asmad* – (last person) I
आवेशित-चेतसाम्	**for those whose minds are absorbed** ⟨6.3⟩ m. *āveśita-cetas* (-*cetāḥ*)...आवेशितम् चेतः येन, सः आवेशित-चेताः – by whom the mind is absorbed

आवेशित (*ā.√viś[a]* – to enter; caus.; + *.[k]ta*) – caused to enter

Subodhinī: एवम् मयि आवेशितम् चेतः यैः, तेषाम् मृत्यु-युक्तात् संसार-सागरात् अहम् सम्यक् उद्धर्ता अ-चिरेण एव भवामि ॥१२.७॥
यस्मात् एवम् तस्मात् – 'मयि एव' इति –

12.8

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥८॥

मयि एव मनः आधत्स्व !	concentrate the mind on Me alone!
मयि बुद्धिम् निवेशय !	absorb your intelligence in Me!
अतः ऊर्ध्वम् मयि एव निवसिष्यसि,	hereafter you will live in Me,
न संशयः ।	there is no doubt

"Just fix your mind upon Me, the Supreme Personality of Godhead, and engage all your intelligence in Me. Thus you will live in Me always, without a doubt."

मयि	**in me** ⟨7.1⟩ *kṛṣnanāma asmad* – (last person) I
एव	**certainly** ⟨*avyaya*⟩
मनः	**the mind** ⟨2.1⟩ n. *manas (manaḥ)*
आधत्स्व	**you must concentrate** ⟨*vidhātā* 2.1⟩ *ā.√[du]dhā[ñ]* – to hold, concentrate
मयि	**on me** ⟨7.1⟩ *kṛṣnanāma asmad* – (last person) I
बुद्धिम्	**the intelligence** ⟨2.1⟩ f. *buddhi*
निवेशय	**you must cause to enter** ⟨*vidhātā* caus. 2.1⟩ *ni.√viś[a]* – to enter
निवसिष्यसि	**you will live** ⟨*kalki* for *nivatsyasi* 2.1⟩ *ni.√vas[a]* – to dwell, live

मयि **in me** ⟨7.1⟩ *kṛṣṇanāma asmad* – (last person) I

एव **certainly** ⟨*avyaya*⟩

अतः **from this** [time] ⟨*avyaya*⟩

ऊर्ध्वम् **onwards** ⟨*avyaya*⟩

न **not** ⟨*avyaya*⟩

संशयः **doubt** ⟨1.1⟩ m. *saṁśaya* – hesitation, doubt

Subodhinī: मयि एव सङ्कल्प-विकल्पात्मकम् मनः आधत्स्व (स्थिरी-कुरु) । बुद्धिम् अपि अध्यवसायात्मिकाम् मयि एव (निवेशय) । एवम् कुर्वन् मद्-प्रसादेन लब्ध-ज्ञानः सन्, अतः ऊर्ध्वम् (देहान्ते मरण-अन्तरम्) मयि एव निवसिष्यसि (निवत्स्यसि), मद्-आत्मना वासम् करिष्यसि, न अत्र संशयः । तथाच श्रुतिः – 'देहान्ते देवः तारकम् पर-ब्रह्म व्याचष्टे' (*Jābālo.* 1) इति ॥१२.८॥
अत्र अ-शक्तम् प्रति सुगम-उपायम् आह – 'अथ' इति –

Note: *Sandhi* was not made between *eva* and *ataḥ* (*ārṣa-prayoga*).

12.9

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ॥९॥

हे धनञ्जय !	O Arjuna!
अथ चित्तम्	if the mind
मयि स्थिरम् समाधातुम् न शक्नोषि,	you can not concentrate steadily on Me,
ततः अभ्यास-योगेन	then by means of practice (*sādhana-bhakti*)
माम् आप्तुम् इच्छ	you must desire to attain Me!

"My dear Arjuna, O winner of wealth, if you cannot fix your mind upon Me without deviation, then follow the regulative principles of bhakti-yoga. In this way develop a desire to attain Me."

अथ **now** ⟨*avyaya*⟩

चित्तम् **the mind** ⟨2.1⟩ n. *citta* (√*cit[ī]*...संज्ञाने । संज्ञानं निद्रादिविगमो ज्ञानमात्रं च – to be awake; be aware) – awareness

समाधातुम् **to concentrate** ⟨*avyaya*⟩ *sam.ā.*√*[du]dhā[ñ]* – to hold, concentrate; + *.tum[u]*

न **not** ⟨*avyaya*⟩

शक्नोषि **you are able** ⟨*acyuta* 2.1⟩ √*śak[l]*...शक्तौ – to be able

मयि **on me** ⟨7.1⟩ *kṛṣṇanāma asmad* – (last person) I

स्थिरम् **steadily** ⟨*avyaya*⟩

अभ्यास-योगेन **by means of practice** ⟨3.1⟩ m. *abhyāsa-yoga*...अभ्यासस्य योगः इति अभ्यास-योगः – 'the means of practice'

अभ्यास (from *abhi.*√*as[u]* – to add, repeat) – discipline; repeated reading, study; practice; any repeated exercise; *abhyāsa-yoga* is the same as *abhyāsa* or *sādhana-bhakti* – repeated withdrawel of the mind from sense objects and concentration on the Lord

ततः **then** ⟨*avyaya*⟩ (*tatas*; from *tad* + *.tas[i]*) – from/after/than that

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

इच्छ **you must desire** ⟨*vidhātā* 2.1⟩ √*iṣ[u]*...इच्छायाम् – to wish, desire

आप्तुम् **to achieve** ⟨*avyaya*⟩ √*āp[l]*...व्याप्तौ – to reach, obtain; + *.tum[u]*

धनञ्जय **O Arjuna!** ⟨8.1⟩ m. *dhanam-_jaya* – 'winner of riches'

Subodhinī: स्थिरम् यथा भवति एवम् मयि चित्तम् धारयितुम् यदि शक्तः न भवसि, तर्हि विक्षिप्तम् चित्तम् पुनः पुनः प्रत्याहृत्य, मम अनुस्मरण-लक्षणः यः अभ्यास-योगः तेन माम् प्राप्तुम् इच्छ (प्रयत्नम् कुरु) ॥१२.९॥
यदि पुनः न एवम्, तत्र आह – 'अभ्यासे' इति –

12.10

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि ॥१०॥

अभ्यासे अपि अ-समर्थः असि,	[if] you are also unable for practice,
मत्कर्म-परमः भव !	become devoted to work for Me!
मदर्थम् कर्माणि कुर्वन् अपि	even [while] performing activities for Me
सिद्धिम् अवाप्स्यसि ।	you will achieve perfection

"If you cannot practice the regulations of bhakti-yoga, then just try to work for Me, because by working for Me you will come to the perfect stage."

अभ्यासे **in practice** ⟨7.1⟩ m. *abhyāsa* (from *abhi.*√*as[u]* – to add, repeat) – discipline; repeated reading, study; practice; any repeated exercise; the same as *abhyāsa-yoga* or *sādhana-bhakti* – repeated withdrawel of the mind from sense objects and concentration on the Lord

अपि **also** ⟨*avyaya*⟩

अ-समर्थः **unable** ⟨1.1⟩ m. *a-samartha*

समर्थ – 'having a similar or suitable aim'; suitable or fit for; very strong, competent,capable

असि **you are** ⟨*acyuta* 2.1⟩ √*as[a]*...भुवि – to be, exist

मत्कर्म-परमः **who is devoted to work for Me** ⟨1.1⟩ m. *mad-_karma-parama*...मम कर्म परमम् यस्य, सः मत्कर्म-परमः – 'for whom my work is supreme'

भव **you must become** ⟨*vidhātā* 2.1⟩ √*bhū*...सत्तायाम् – to be, exist, become

मदर्थम् **for my sake** ⟨*avyaya*⟩

कर्माणि **activities** ⟨2.3⟩ n. *karman* (*karma*) – activity

कुर्वन् **[while] doing** ⟨1.1⟩ m. *kurvat* (√*[ḍu]kr[ñ]* 8U...करणे – to do; + .*[ś]at[r]*) – [while] doing

सिद्धिम् **perfection** ⟨2.1⟩ f. *siddhi*

अवाप्स्यसि **you will obtain** ⟨*kalki* 2.1⟩ *ava.*√*āp[l]* – to obtain

Subodhinī: अभ्यासे अपि यदि अ-शक्तः असि, तर्हि मद्-प्रीति-अर्थानि यानि कर्माणि एकादशी-उपवास-व्रत-चर्या-नामसङ्कीर्तन-आदीनि तद्-अनुष्ठानम् एव परमम् यस्य तादृशः भव। एवम्-भूतानि कर्माणि अपि मदर्थम् कुर्वन् मोक्षम् प्राप्स्यसि ॥१२.१०॥

अत्यन्तम् भगवद्-धर्म-परिनिष्ठायाम् अ-शक्तस्य पक्षान्तरम् आह – 'अथ एतद् अपि' इति –

12.11

अथैतदप्यशक्तो ऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥११॥

अथ एतद् अपि कर्तुम् अ-शक्तः असि,	if you are unable to do even this,
ततः मद्योगम् आश्रितः	then, being surrendered to My *yoga*
यतात्मवान्	and being self-controlled
सर्व-कर्म-फल-त्यागम् कुरु !	renounce the fruit of all activities!

"If, however, you are unable to work in this consciousness of Me, then try to act giving up all results of your work and try to be self-situated."

अथ **now** ⟨*avyaya*⟩

एतद् **this** ⟨2.1⟩ n. *kṛṣṇanāma etad* – (first person) he, this

अपि **also** ⟨*avyaya*⟩

अ-शक्तः **unable** ⟨1.1⟩ m. *a-śakta*

असि **you are** ⟨*acyuta* 2.1⟩ √*as[a]*...भुवि – to be, exist

कर्तुम् **to do** ⟨*avyaya*⟩ √*[ḍu]kr[ñ]*...करणे – to do; + .*tum[u]*

मद्योगम् **to my *yoga*** ⟨2.1⟩ m. *mad-yoga*...मम योगः इति मद्योगः – 'my *yoga*'

आश्रितः **being surrendered** ⟨1.1⟩ m. *āśrita* (.*[k]ta*)

सर्व-कर्म-फल-त्यागम् **the renunciation of the fruit of all activities** ⟨2.1⟩ m. *sarva-karma-phala-tyāga*...सर्व-कर्मणाम् फलस्य त्यागः इति सर्व-कर्म-फल-त्यागः

ततः **then** ⟨*avyaya*⟩ (*tatas*; from *tad* + .*tas[i]*) – from/after/than that

कुरु **you must do** ⟨*vidhātā* 2.1⟩ √*[ḍu]kr[ñ]*...करणे – to do

यतात्मवान् **who is self-controlled** ⟨1.1⟩ m. *yata-_ātmavat* (.*vat[u]*) – 'having a controlled self (mind)'

Subodhinī: यदि एतद् अपि कर्तुम् अ-शक्तः असि, तर्हि मद्-योगम् (मद्-एक-शरणत्वम्) आश्रितः सन्, सर्वेषाम् दृष्ट-अर्थानाम् आवश्यकानाम् च अग्निहोत्रादि-कर्मणाम् फलानि, नियत-चित्तः भूत्वा, परित्यज। एतद् उक्तम् भवति – 'मया तावत् ईश्वर-आज्ञया यथा-शक्ति कर्माणि कर्तव्यानि, फलम् पुनः दृष्टम् अ-दृष्टम् वा परमेश्वर-आधीनम्' इति एवम्, मयि भारम् आरोप्य, फल-आसक्तिम् परित्यज्य, वर्तमानः, मद्-प्रसादेन कृतार्थः भविष्यसि इति तात्पर्यम् ॥१२.११॥

तम् इमम् फल-त्यागम् स्तौति – 'श्रेयः' इति –

12.12

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद् ध्यानं विशिष्यते ।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥१२॥

अभ्यासात् ज्ञानम् हि श्रेयः ।	better than *abhyāsa* is indeed *jñāna*,
ज्ञानात् ध्यानम् विशिष्यते ।	better than *jñāna* is *dhyāna*,
ध्यानात् कर्म-फल-त्यागः ।	[better] than *dhyāna* [is] the renunciation of the fruit of work,
त्यागात् अनन्तरम् शान्तिः ।	after renunciation comes peace

"If you cannot take to this practice, then engage yourself in the cultivation of knowledge. Better than knowledge, however, is meditation, and better than meditation is renunciation of the fruits of action, for by such renunciation one can attain peace of mind."

श्रेयः **better** ⟨1.1⟩ n. *śreyas* (*śreyaḥ*) – better, benefit

हि **indeed** ⟨*avyaya*⟩

ज्ञानम् **knowledge** ⟨1.1⟩ n. *jñāna*

अभ्यासात् **than practice** ⟨5.1⟩ m. *abhyāsa* (from *abhi.*√*as[u]* – to add, repeat) – discipline; repeated reading, study; practice; any repeated exercise; same as *abhyāsa-yoga* or *sādhana-bhakti* – repeated withdrawal of the mind from sense objects and concentration on the Lord

ज्ञानात् **than knowledge** ⟨5.1⟩ n. *jñāna* – knowledge

ध्यानम् **meditation** ⟨1.1⟩ n. *dhyāna*

विशिष्यते **it is distinguished** ⟨*acyuta* pass. 1.1⟩ *vi.*√*śiṣ[l]* – to distinguish

ध्यानात् **than meditation** ⟨5.1⟩ n. *dhyāna* – meditation

कर्म-फल-त्यागः **the renunciation of the fruit of activities** ⟨1.1⟩ m. *karma-phala-tyāga*...कर्मणाम् फलस्य त्यागः इति कर्म-फल-त्यागः

त्यागात् **from renunciation** ⟨5.1⟩ m. *tyāga* – renunciation

शान्तिः **peace** ⟨1.1⟩ f. *śānti* – peace of mind

अनन्तरम् **after** ⟨*avyaya*⟩ from *an-antara* – 'without interval'; immediately; after

Subodhinī: सम्यक्-ज्ञान-रहितात् अभ्यासात् युक्ति-सहित-उपदेश-पूर्वकम् ज्ञानम् श्रेष्ठम्। तस्मात् अपि तद्-पूर्वकम् ध्यानम् विशिष्टम्। 'ततः तु तम् पश्यति निष्कलम्

ध्यायमानः (*Muṇḍaka-Up.* 3.1.8) इति श्रुतेः । तस्मात् अपि उक्तलक्षणः कर्म-फल-त्यागः श्रेष्ठः । तस्मात् एवम्-भूतात् कर्म-फल-त्यागात् कर्मसु तद्-फलेषु च आसक्ति-निवृत्त्या मद्-प्रसादेन च समनन्तरम् एव संसार-शान्तिः भवति ॥१२.१२॥

एवम्-भूतस्य भक्तस्य क्षिप्रम् एव परमेश्वर-प्रसाद-हेतून् धर्मान् आह – 'अ-द्वेष्टा' इति अष्टभिः –

Note: In the previous verses, *tyāga* came out to be inferior to *abhyāsa-yoga*. Now, *tyāga* is glorified as superior to *abhyāsa*. Therefore, this *abhyāsa* can not mean *abhyāsa-yoga*, but just 'practice'. Śrīdhara Svāmī explains *abhyāsāt jñānam śreyaḥ* as सम्यक्-ज्ञान-रहितात् अभ्यासात् ज्ञानम् श्रेष्ठम् – 'knowledge is better than practice without complete knowledge', i.e. *abhyāsa* here refers to 'common religious practice'. And Śrīla Prabhupāda explains *abhyāsāt jñānam śreyaḥ* in the sense of अभ्यासात् अनन्तरम् ज्ञानम् श्रेयः – 'after the practice [of *tyāga*] (*tyāga* is implied from the previous verse), *jñāna* is best'. The seven stages mentioned in verses (12.8-12) are:

1. (according to Śrīdhara) *abhyāsa* (12.12) – common religious practice
→ *abhyāsāt jñānaṁ śreyaḥ* (12.12)
2. *jñāna* – scriptural knowledge about the soul
→ *jñānāt dhyānaṁ viśiṣyate* (12.12)
3. *dhyāna* – meditation on the soul
→ *dhyānāt karma-phala-tyāga viśiṣyate* (12.12)
4. *tyāga* (12.11) – complete **renunciation** of the fruits of activities
→ *tyāgāt śāntiḥ* (12.12) – with the mind thus purified, transcendental **knowledge** comes
5. *mat-karma* (12.10) – work for the Lord
6. *abhyāsa-yoga* (12.9) – the regulative principles of *bhakti-yoga*, *sādhana-bhakti*, to deepen the **meditation** on the Lord
7. *mayi eva manaḥ ādhatsva* (12.8) – fixing the mind on the Lord, *samādhi*

The main stages are marked with bold type: renunciation (*tyāga*), knowledge about the Lord, and meditation on the Lord's pastimes (*mayi eva manaḥ ādhatsva*).

12.13...14

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥१३॥

सर्व-भूतानाम् अ-द्वेष्टा	one who is non-envious of all beings
मैत्रः करुणः एव च	but friendly and compassionate
निर्ममः निरहङ्कारः	free from proprietorship and false ego
सम-दुःख-सुखः क्षमी . . .	equal in distress and happiness, tolerant . . .

"One who is not envious but is a kind friend to all living entities, who does not think himself a proprietor and is free from false ego, who is equal in both happiness and distress, who is tolerant, . . ."

अ-द्वेष्टा **who is without enmity** ⟨1.1⟩ m. *a-dveṣṭr (-dveṣṭā)*
सर्व-भूतानाम् **of all beings** ⟨6.3⟩ n. *sarva-bhūta* – all beings
मैत्रः **friendly** ⟨1.1⟩ m. *maitra* (from *mitra* – friend)
करुणः **compassionate** ⟨1.1⟩ m. *karuṇa*
एव च **and certainly** ⟨*avyaya*⟩
निर्ममः **without proprietorship** ⟨1.1⟩ m. *nirmama* – without the notion of 'mine (*mama*)'
निरहङ्कारः **without egotism** ⟨1.1⟩ m. *nirahaṅkāra* – 'without false ego'
सम-दुःख-सुखः **for whom distress and happiness are the same** ⟨1.1⟩ m. *sama-duḥkha-sukha*...समे दुःख-सुखे यस्य, सः सम-दुःख-सुखः
क्षमी **who is tolerant** ⟨1.1⟩ m. *kṣamin (kṣamī)*

Subodhinī: सर्व-भूतानाम् यथायथम् अ-द्वेष्टा मैत्रः करुणः च, उत्तमेषु द्वेष-शून्यः, समेषु मित्रतया वर्तते इति मैत्रः, हीनेषु कृपालुः इति अर्थः । निर्ममः निरहङ्कारः च । कृपालुत्वात् एव अन्यैः सह समे दुःख-सुखे यस्य सः । क्षमी क्षमावान् ॥१२.१३॥

12.14

सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥१४॥

. . . सततम् सन्तुष्टः योगी	. . . always satisfied, a *yogī*
यतात्मा दृढ-निश्चयः	self-controlled and determined
मयि अर्पित-मनोबुद्धिः	his mind and intelligence fixed on Me
यः मद्भक्तः सः मे (मम) प्रियः ।	such a devotee of Mine is My beloved

". . . always satisfied, self-controlled, and engaged in devotional service with determination, his mind and intelligence fixed on Me – such a devotee of Mine is very dear to Me."

सन्तुष्टः **who is completely satisfied** ⟨1.1⟩ m. *santuṣṭa (sam.√tuṣ[a]* – to be completely satisfied; + *.[k]ta)*
सततम् **constantly** ⟨*avyaya*⟩
योगी **a *yogī*** ⟨1.1⟩ m. *yogin (yogī)*
यतात्मा **who is self-controlled** ⟨1.1⟩ m. *yata-_ātman (-ātmā)*
दृढ-निश्चयः **whose determination is firm** ⟨1.1⟩ m. *dṛḍha-niścaya*...दृढः निश्चयः यस्य, सः दृढ-निश्चयः
मयि **in me** ⟨7.1⟩ *kṛṣṇanāma asmad* – (last person) I
अर्पित-मनोबुद्धिः **by whom mind and intelligence are dedicated** ⟨1.1⟩ m. *arpita-manaḥ-_buddhi*...अर्पिते मनोबुद्धी येन, सः अर्पित-मनोबुद्धिः
यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

मद्भक्तः	**my devotee** ⟨1.1⟩ m. *mad-bhakta*
सः	**he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
मे	**my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
प्रियः	**beloved** ⟨1.1⟩ m. *priya* – dear

Subodhinī: सततम् लाभे अ-लाभे च सन्तुष्टः (प्रसन्न-चित्तः) योगी (अ-प्रमत्तः), यतात्मा (संयत-स्वभावः), दृढः मद्-विषयः निश्चयः यस्य, मयि अर्पिते मनोबुद्धी येन, एवम्-भूतः यः मद्-भक्तः सः मे प्रियः ॥१२.१४॥

12.15

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥१५॥

यस्मात् लोकः न उद्विजते,	by whom no one becomes disturbed,
यः च लोकात् न उद्विजते,	and who is not disturbed by anyone,
यः च हर्षामर्ष-भयोद्वेगैः मुक्तः,	who is free from jubilation, intolerance, fear and anxiety,
सः मे (मम) प्रियः ।	he is My beloved

"He for whom no one is put into difficulty and who is not disturbed by anyone, who is equipoised in happiness and distress, fear and anxiety, is very dear to Me."

यस्मात्	**he from whom** ⟨5.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which *Pañcamī* here indicates cause.
न	**not** ⟨*avyaya*⟩
उद्विजते	**one is disturbed** ⟨*acyuta* 1.1⟩ *ud.√[o]vij[ī]* – to fear; tremble
लोकः	**people** ⟨1.1⟩ m. *loka* – place, world, people *lokaḥ na udvijate* – 'the *loka* does not become disturbed' (active), no one becomes disturbed
लोकात्	**from people** ⟨5.1⟩ m. *loka* – place, world, people
न	**not** ⟨*avyaya*⟩
उद्विजते	**he becomes disturbed** ⟨*acyuta* 1.1⟩ *ud.√[o]vij[ī]* – to fear; tremble
च	**and** ⟨*avyaya*⟩
यः	**he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
हर्षामर्ष-भयोद्वेगैः	**from jubilation, intolerance, fear and anxiety** ⟨3.3⟩ m. *harṣa-_amarṣa-bhaya-_udvega*...हर्षः च अ-मर्षः च भयः च उद्वेगः च इति हर्षामर्ष-भयोद्वेगः – jubilation, impatience, fear and anxiety मर्ष – patience, tolerance
मुक्तः	**liberated** ⟨1.1⟩ m. *mukta* (√*muc[l]*...मोक्षणे – to release; + *.[k]ta*)
यः	**he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
सः	**he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

मे	**my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
प्रियः	**beloved** ⟨1.1⟩ m. *priya* – dear

Subodhinī: यस्मात् सकाशात् लोकः (जनः) न उद्विजते, भय-शङ्कया सङ्क्षोभम् न प्राप्नोति, यः च लोकात् न उद्विजते, यः च स्वाभाविकैः हर्षादिभिः मुक्तः, तत्र हर्षः स्वस्य इष्ट-अर्थ-लाभे उत्साहः, अ-मर्षः परस्य लाभे अ-सहनम्, भयम् त्रासः, उद्वेगः भयादि-निमित्त-चित्त-क्षोभः, एतैः विमुक्तः यः मद्-भक्तः सः च मे प्रियः ॥१२.१५॥

12.16

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥१६॥

अनपेक्षः शुचिः दक्षः	being without expectation, clean, expert
उदासीनः गत-व्यथः	neutral, free from anxiety
सर्वारम्भ-परित्यागी	completely detached [from the result] in all endeavors
यः मद्भक्तः सः मे (मम) प्रियः ।	such a devotee of Mine is My beloved

"My devotee who is not dependent on the ordinary course of activities, who is pure, expert, without cares, free from all pains, and not striving for some result, is very dear to Me."

अनपेक्षः	**who is without expectation** ⟨1.1⟩ m. *an-apekṣa* अपेक्ष (from *apa.√īkṣ[a]* – to look away) – looking around; *apekṣā* – expectation
शुचिः	**who is pure** ⟨1.1⟩ m. *śuci*
दक्षः	**who is expert** ⟨1.1⟩ m. *dakṣa* (from √*dakṣ[a]*...शीघ्रार्थे – to go in speed, be expert) – able, fit, expert, clever; ability, mental power; (derived:) *dakṣiṇa* – able, clever; right (opp. to left), south, southern; reward, a gift, donation
उदासीनः	**who is neutral** ⟨1.1⟩ m. *udāsīna* – indifferent, neutral
गत-व्यथः	**who is free from anxiety** ⟨1.1⟩ m. *gata-vyatha*...गता व्यथा यस्य, सः गत-व्यथः – 'anxiety gone'
सर्वारम्भ-परित्यागी	**who completely renounces all endeavors** ⟨1.1⟩ m. *sarva-_ārambha-parityāgin (-tyāgī)*...सर्वेषाम् आरम्भाणाम् परित्यागी इति सर्वारम्भ-परित्यागी
यः	**he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
मद्भक्तः	**my devotee** ⟨1.1⟩ m. *mad-bhakta*
सः	**he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
मे	**my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
प्रियः	**beloved** ⟨1.1⟩ m. *priya* – dear

Subodhinī: अनपेक्षः यदृच्छ-उपस्थिते अपि अर्थे निःस्पृहः, शुचिः बाह्य-अभ्यन्तर-शौच-सम्पन्नः, दक्षः अनलसः, उदासीनः पक्षपात-रहितः, गत-व्यथः आधि-शून्यः, सर्वान् दृष्ट-अदृष्टार्थान् आरम्भान् (उद्यमान्) परित्यक्तुम् शीलम् यस्य सः, एवम्भूतः सन् यः मद्भक्तः सः मे प्रियः ॥१२.१६॥

12.17

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥१७॥

यः न हृष्यति, न द्वेष्टि	who neither rejoices nor hates
न शोचति, न काङ्क्षति	neither laments nor desires
शुभाशुभ-परित्यागी	completely detached from good and bad
यः भक्तिमान् सः मे (मम) प्रियः ।	such a devotee is My beloved

"One who neither rejoices nor grieves, who neither laments nor desires, and who renounces both auspicious and inauspicious things – such a devotee is very dear to Me."

यः	**he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
न	**not** ⟨*avyaya*⟩
हृष्यति	**he rejoices** ⟨*acyuta* 1.1⟩ √*hṛṣ[a]*...तुष्टौ – to rejoice
न	**not** ⟨*avyaya*⟩
द्वेष्टि	**he hates** ⟨*acyuta* 1.1⟩ √*dviṣ[a]*...अप्रीतौ – to hate
न	**not** ⟨*avyaya*⟩
शोचति	**he laments** ⟨*acyuta* 1.1⟩ √*śuc[a]*...शोके – to grieve, lament
न	**not** ⟨*avyaya*⟩
काङ्क्षति	**he desires** ⟨*acyuta* 1.1⟩ √*kākṣ[i]*...काङ्क्षायाम् – to desire
शुभाशुभ-परित्यागी	**who completely renounces the auspicious and inauspicious** ⟨1.1⟩ m. *śubha-_aśubha-parityāgin* (*-tyāgī*)...शुभस्य च अ-शुभस्य च परित्यागी इति शुभाशुभ-परित्यागी
भक्तिमान्	**who has devotion** ⟨1.1⟩ m. *bhaktimat* (*.mat[u]*) – 'having *bhakti*'
यः	**he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
सः	**he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
मे	**my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
प्रियः	**beloved** ⟨1.1⟩ m. *priya* – dear

Subodhinī: प्रियम् प्राप्य यः न हृष्यति, अ-प्रियम् प्राप्य यः न द्वेष्टि, इष्ट-अर्थ-नाशे सति यः न शोचति, अ-प्राप्तम् अर्थम् यः न काङ्क्षति, शुभ-अशुभे (पुण्य-पापे) परित्यक्तुम् शीलम् यस्य सः, एवम्-भूतः भूत्वा यः मद्-भक्तिमान् सः मे प्रियः ॥१२.१७॥

12.18...19

समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥१८॥

शत्रौ च मित्रे च समः	equal towards friend and enemy
तथा मानापमानयोः	and towards honor and dishonor
शीतोष्ण-सुख-दुःखेषु समः	equal towards cold, heat, happiness and distress
सङ्ग-विवर्जितः . . .	and without attachments . . .

समः	**who is equal** ⟨1.1⟩ m. *sama* – same
शत्रौ	**towards an enemy** ⟨7.1⟩ m. *śatru* – enemy
च	**and** ⟨*avyaya*⟩
मित्रे	**towards a friend** ⟨7.1⟩ m. *mitra* – friend
च	**and** ⟨*avyaya*⟩
तथा	**so** ⟨*avyaya*⟩
मानापमानयोः	**towards honor and dishonor** ⟨7.2⟩ m. *māna-_apamāna*...मानः च अपमानः च इति मानापमानौ – honor and dishonor
शीतोष्ण-सुख-दुःखेषु	**towards cold, heat, happiness and distress** ⟨7.3⟩ n. *śīta-_uṣṇa-sukha-duḥkha* – cold, heat, happiness and distress
समः	**who is equal** ⟨1.1⟩ m. *sama* – same
सङ्ग-विवर्जितः	**free from attachment** ⟨1.1⟩ m. *saṅga-vivarjita*...सङ्गेन विवर्जितः इति सङ्ग-विवर्जितः विवर्जित (*vi.*√*vṛj[ī]* – to abandon, avoid; + *.[k]ta*) – abandoned, avoided

Subodhinī: शत्रौ च मित्रे च समः (एक-रूपः), मान-अपमानयोः अपि तथा समः एव, हर्ष-विषाद-शून्यः इति अर्थः, शीत-उष्णयोः सुख-दुःखयोः च समः, सङ्ग-विवर्जितः क्वचिद् अपि अनासक्तः ॥१२.१८॥

12.19

तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित् ।
अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥१९॥

. . . तुल्य-निन्दा-स्तुतिः, मौनी	. . . equal towards blame and praise, silent
येन केनचिद् सन्तुष्टः	satisfied with anything
अ-निकेतः स्थिर-मतिः	without [fixed] residence, steady in mind
भक्तिमान् मे (मम) प्रियः नरः ।	[such] a devotee is My beloved

"One who is equal to friends and enemies, who is equipoised in honor and dishonor, heat and cold, happiness and distress, fame and infamy, who is always free from contaminating association, always silent and satisfied with anything, who doesn't care for any residence, who is fixed in knowledge and who is engaged in devotional service – such a person is very dear to Me."

तुल्य-निन्दा-स्तुतिः **for whom blame and praise are equal** ⟨1.1⟩ m. *tulya-nindā-stuti*...तुल्ये निन्दा-स्तुती यस्य, सः तुल्य-निन्दा-स्तुतिः
तुल्य (from √*tul[a]*...उन्माने – to weight, measure) – equal, comparable, alike; (also from √*tul[a]*...उन्माने): *tulā* – a balance, weight; equality, resemblance

मौनी **who is silent** ⟨1.1⟩ m. *maunin (maunī)*
सन्तुष्टः **who is completely satisfied** ⟨1.1⟩ m. *santuṣṭa (sam.√tuṣ[a]* – to be satisfied; + *.[k]ta)* – completely satisfied
येन **with which** ⟨3.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
केनचिद् **with something** ⟨3.1⟩ n. *kṛṣṇanāma kim (kim) + .cid* – something
अ-निकेतः **who has no residence** ⟨1.1⟩ m. *a-niketa*...न विद्यते निकेतः यस्य, सः अ-निकेतः – whose residence does not exist
स्थिर-मतिः **whose mind is steady** ⟨1.1⟩ m. *sthira-mati*...स्थिरा मतिः यस्य सः स्थिर-मतिः
भक्तिमान् **who has devotion** ⟨1.1⟩ m. *bhaktimat (.mat[u])* – 'having *bhakti*'
मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
प्रियः **beloved** ⟨1.1⟩ m. *priya* – dear
नरः **man** ⟨1.1⟩ m. *nara*

Subodhinī: तुल्ये निन्दा-स्तुती यस्य, मौनी संयतवाक्, येन केनचिद् (यथा-लब्धेन) सन्तुष्टः, अ-निकेतः नियत-वास-शून्यः, स्थिर-मतिः व्यवस्थित-चित्तः, एवम्-भूतः मद्-भक्तिमान् यः सः मे प्रियः नरः ॥१२.१९॥
उक्तम् धर्म-जातम् स-फलम् उपसंहरति – 'ये तु' इति –

12.20

ये तु धर्मामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्ते ऽतीव मे प्रियाः ॥२०॥

ये तु श्रद्दधानाः मत्परमाः भक्ताः	but those who are faithful devotees and fixed on Me
यथा उक्तम् इदम् धर्मामृतम् पर्युपासते,	who follow this eternal religion just described,
ते मे (मम) अतीव प्रियाः ।	they are My very beloved

"Those who follow this imperishable path of devotional service and who completely engage themselves with faith, making Me the supreme goal, are very, very dear to Me."

ये **those who** ⟨1.3⟩ m. *kṛṣṇanāma yad* – (relative) who, which

तु **but** ⟨*avyaya*⟩
धर्मामृतम् **the eternal religion** ⟨2.1⟩ n. *dharma-_amṛta*...धर्मः एव अमृतम् or धर्मस्य अमृतम् इति धर्मामृतम् – '*dharma* is the *amṛta*' or 'the *amṛta* of *dharma*'
इदम् **this** ⟨2.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this
यथा **as** ⟨*avyaya*⟩
उक्तम् **spoken** ⟨2.1⟩ n. *ukta (√vac[a]*...परिभाषणे – to speak; + *.[k]ta)*
पर्युपासते **they honor** ⟨*acyuta* 1.3⟩ *pari.upa.√ās[a]* – to worship, honor
श्रद्दधानाः **who have faith** ⟨1.1⟩ m. *śraddadhāna (śrad.√[ḍu]dhā[ñ] + .[ś]āna)* – '[while] putting *śrad* (the heart)', having faith
मत्परमाः **who are devoted to Me** ⟨1.3⟩ m. *mad-_parama*...अहम् परमः यस्य, सः मत्परमः – 'whose supreme [shelter or master] I am', subordinate or devoted to Me
भक्ताः **devotees** ⟨1.3⟩ m. *bhakta* – devotee
ते **they** ⟨1.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that
अतीव **exceedingly** ⟨*avyaya*⟩
मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
प्रियाः **beloved** ⟨1.3⟩ m. *priya* – dear

Subodhinī: यथा उक्तम् (उक्त-प्रकारम्) धर्मम् एव अमृतम् अमृतत्व-साधनत्वात्, धर्म्य-अमृतम् इति केचिद् पठन्ति । तद् ये उपासते (अनुतिष्ठन्ति), श्रद्धाम् कुर्वन्तः मत्परमाः च सन्तः मद्-भक्ताः ते अतीव मे प्रियाः इति ॥१२.२०॥

ओं तत्सदिति
श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि
श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे भक्तियोगो नाम द्वादशो ऽध्यायः ॥१२॥

अथ त्रयोदशो ऽध्यायः

अथ त्रयोदशः अध्यायः । now the thirteenth chapter

13.1

अर्जुन उवाच

प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च ।

एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव ॥१॥

अर्जुनः उवाच - हे केशव !	Arjuna said: O Kṛṣṇa!
प्रकृतिम् पुरुषम् च एव	*prakṛti* and *puruṣa*
क्षेत्रम् क्षेत्र-ज्ञम् एव च	*kṣetra* and *kṣetrajña*
ज्ञानम् ज्ञेयम् च	*jñāna* and *jñeya*
एतद् वेदितुम् इच्छामि ।	this I want to know

"Arjuna said: O my dear Kṛṣṇa, I wish to know about prakṛti (nature), puruṣa (the enjoyer), and the field and the knower of the field, and of knowledge and the object of knowledge."

अर्जुनः	**Arjuna** ⟨1.1⟩ m. *arjuna* – white, 'who is pure in actions'
उवाच	**he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
प्रकृतिम्	***prakṛti*** ⟨2.1⟩ f. *prakṛti* – nature
पुरुषम्	***puruṣa*** ⟨2.1⟩ m. *puruṣa* – person
च	**and** ⟨*avyaya*⟩
एव	**certainly** ⟨*avyaya*⟩
क्षेत्रम्	***kṣetra*** ⟨2.1⟩ n. *kṣetra* – field, field of activities
क्षेत्र-ज्ञम्	***kṣetra-jña*** ⟨2.1⟩ m. *kṣetra-jña* – the knower of the field
एव	**certainly** ⟨*avyaya*⟩
च	**and** ⟨*avyaya*⟩
एतद्	**this** ⟨2.1⟩ n. *kṛṣṇanāma etad* – (first person) he, this
वेदितुम्	**to know** ⟨*avyaya*⟩ √*vid[a]* 2P...ज्ञाने – to know; + .*tum[u]*
इच्छामि	**I desire** ⟨*acyuta* 3.1⟩ √*iṣ[u]*...इच्छायाम् – to wish, desire
ज्ञानम्	***jñāna*** ⟨2.1⟩ n. *jñāna* – knowledge
ज्ञेयम्	***jñeya*** ⟨2.1⟩ n. *jñeya* (√*jñā* 9P...अवबोधने – to know; + .*ya*) – to be known, the knowable
च	**and** ⟨*avyaya*⟩
केशव	**O Kṛṣṇa!** ⟨8.1⟩ m. *keśava* – 'who has beautiful hair' (*keśa.va*); or 'lord of Brahmā (*ka*) and Śiva (*īśa*)' (*ka-īśa.va*)

Subodhinī: 'तेषाम् अहम् समुद्धर्ता मृत्यु-संसार-सागरात् भवामि' (12.7) इति पूर्वम् प्रतिज्ञातम्, तद् न च आत्म-ज्ञानम् विना संसारात् उद्धरणम् सम्भवति इति तत्त्व-ज्ञान-उपदेशार्थम् 'प्रकृति-पुरुष-विवेक'-अध्यायः आरभ्यते । तत्र यद् सप्तमे अध्याये 'अपरा' 'परा' च इति प्रकृति-द्वयम् उक्तम्, तयोः अ-विवेकात् जीव-भावम् आपन्नस्य चित्-अंशस्य अयम् संसारः याभ्याम् च जीव-उपभोगार्थम् ईश्वरः सृष्ट्यादिषु प्रवर्तते, तद् एव प्रकृति-द्वयम् उक्तम् 'क्षेत्र'-'क्षेत्रज्ञ'-शब्द-वाच्यम् परस्परम् विविक्तम् तत्त्वतः निरूपयिष्यन् [श्री-भगवान् उवाच] - 'इदम्' इति ।

Note: This verse is omitted in some editions. *Prakṛti* and *puruṣa* will be described in verses 13.20ff., *kṣetra* and *kṣetra-jña* in 13.2ff., *jñāna* in 13.8ff. and *jñeya* in 13.13ff..

13.2

श्रीभगवानुवाच

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।

एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥२॥

श्री-भगवान् उवाच - हे कौन्तेय !	Śrī Kṛṣṇa said: O Arjuna!
इदम् शरीरम् क्षेत्रम् इति अभिधीयते,	this body is called *kṣetra*,
यः एतद् वेत्ति	one who knows this
तद्विदः तम् क्षेत्र-ज्ञः इति प्राहुः ।	the wise call him *kṣetra-jña*

"The Supreme Personality of Godhead said: This body, O son of Kuntī, is called the field, and one who knows this body is called the knower of the field."

श्री-भगवान्	**Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'
उवाच	**he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
इदम्	**this** ⟨1.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this
शरीरम्	**body** ⟨1.1⟩ n. *śarīra*
कौन्तेय	**O Arjuna!** ⟨8.1⟩ m. *kaunteya* – 'son of Kuntī'
क्षेत्रम्	***kṣetra*** ⟨1.1⟩ n. *kṣetra* – field
इति	**thus** ⟨*avyaya*⟩
अभिधीयते	**it is called** ⟨*acyuta* pass. 1.1⟩ *abhi.*√*[du]dhā[ñ]* – to explain, name
एतद्	**this** ⟨2.1⟩ n. *kṛṣṇanāma etad* – (first person) he, this
यः	**he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
वेत्ति	**he knows** ⟨*acyuta* 1.1⟩ √*vid[a]* 2P...ज्ञाने – to know
तम्	**him** ⟨2.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
प्राहुः	**they declared** ⟨*acyuta* opt. form with a past sense 1.3⟩ *pra.*√*brū[ñ]* – to declare
क्षेत्र-ज्ञः	***kṣetra-jña*** ⟨1.1⟩ m. *kṣetra-jña*...यः क्षेत्रम् जानाति, सः क्षेत्र-ज्ञः – 'who knows the field'

तद्विदः the wise ⟨1.3⟩ m. *tad-vid* – 'who knows that'

Subodhinī: इदम् भोग-आयतनम् शरीरम् 'क्षेत्रम्' इति अभिधीयते, संसारस्य प्ररोह-भूमित्वात् । एतद् यः वेत्ति ('अहम् मम' इति मन्यते), तम् 'क्षेत्र-ज्ञः' इति प्राहुः, कृषीवलवत् तद्-फल-भोक्तृत्वात्, तद्-विदः (क्षेत्र-क्षेत्रज्ञयोः विवेक-ज्ञाः) ॥१३.२॥
तद् एवम् संसारिणः स्व-रूपम् उक्तिम्, इदानीम् तस्य एव पारमार्थिकम् अ-संसारि-स्वरूपम् आह – 'क्षेत्र-ज्ञम्' इति –

13.3

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥३॥

हे भारत !	O Arjuna!
सर्व-क्षेत्रेषु	in all bodies
माम् अपि च क्षेत्र-ज्ञम् विद्धि !	know Me also as the *kṣetra-jña*!
क्षेत्र-क्षेत्रज्ञयोः यद् ज्ञानम्,	the knowledge of *kṣetra* and *kṣetra-jña*,
तद् ज्ञानम् मम मतम् ।	that is *jñāna* in My opinion

"O scion of Bharata, you should understand that I am also the knower in all bodies, and to understand this body and its knower is called knowledge. That is My opinion."

क्षेत्र-ज्ञम् *kṣetra-jña* ⟨2.1⟩ m. *kṣetra-jña* – the knower of *kṣetra*
च and ⟨*avyaya*⟩
अपि also ⟨*avyaya*⟩
माम् me ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
विद्धि you must know ⟨*vidhātā* 2.1⟩ √*vid[a]* 2P...ज्ञाने – to know
सर्व-क्षेत्रेषु in all bodies ⟨7.3⟩ n. *sarva-kṣetra* – all fields
भारत O Arjuna! ⟨8.1⟩ m. *bhārata* – 'descendant of Bharata'
क्षेत्र-क्षेत्रज्ञयोः of *kṣetra* and *kṣetra-jña* ⟨6.2⟩ m. *kṣetra-kṣetrajña* – *kṣetra* and *kṣetra-jña*
ज्ञानम् knowledge ⟨1.1⟩ n. *jñāna*
यद् that which ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
तद् that ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
ज्ञानम् *jñāna* ⟨1.1⟩ n. *jñāna* – knowledge
मतम् opinion ⟨1.1⟩ n. *mata* (√*man[a]* 4A...बोधने – to know, think; + *.[k]ta*) – thought, opinion
मम my ⟨6.1⟩ *kṛṣṇanāma asmad* – (last person) I

Subodhinī: आदरार्थम् एव तद् ज्ञानम् स्तौति – क्षेत्र-क्षेत्रज्ञयोः यद् एवम् वैलक्षण्येन ज्ञानम्, तद् एव मोक्ष-हेतुत्वात् मम ज्ञानम् मतम् । अन्यत् तु वृथा पाण्डित्यम्, बन्ध-हेतुत्वात् इति अर्थः । तद् उक्तम् –

तद् कर्म यद् न बन्धाय सा विद्या या विमुक्तये ।
आयासाय अ-परम् कर्म विद्या अन्या शिल्प-नैपुणम् ॥

(*Viṣṇu-Purāṇa* 1.19.41) ॥१३.३॥
अत्र यद्यपि चतुर्विंशति-भेदैः भिन्ना प्रकृतिः 'क्षेत्रम्' इति अभिप्रेतम्, तथापि देह-रूपेण परिणतायाम् एव तस्याम् अहम्-भावेन अ-विवेकः स्फुटः इति, तद्-विवेकार्थम् इदम् शरीरम् 'क्षेत्रम्' इत्यादि उक्तम् । तद् एतद् प्रपञ्चयिष्यन्, प्रतिजानीते – 'तद् क्षेत्रम्' इति –

13.4

तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत् ।
स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥४॥

यद् तद् क्षेत्रम् च	(1) what that *kṣetra* is (its constitution)
यादृक् च	(2) what it is like (its qualities)
यद्विकारि	(3) what its transformations are
यतः	(4) from where it comes
यद् च	(5) and what it is (its form)
सः च यः	(6) and who he (the *kṣetra-jña*) is
यत्प्रभावः च	(7) and what his abilities are,
तद् समासेन मे (मम) शृणु !	that hear in summary from Me!

"Now please hear My brief description of this field of activity and how it is constituted, what its changes are, whence it is produced, who that knower of the field of activities is, and what his influences are."

तद् that ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
क्षेत्रम् *kṣetra* ⟨1.1⟩ n. *kṣetra* – field, body
यद् that which ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
च and ⟨*avyaya*⟩
यादृक् of what kind ⟨*avyaya*⟩ (*yādṛś*)
च and ⟨*avyaya*⟩
यद्विकारि which has which transformations ⟨1.1⟩ n. *yad-vikārin* (*-vikārī*) विकारिन् (*vikārī*) – who/which has *vikāras*; *vikāra* – transformation
यतः from where ⟨*avyaya*⟩ (*yatas*; from *yad* + *.tas[i]*)
च and ⟨*avyaya*⟩

यद्	that which ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
सः	he ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
च	and ⟨*avyaya*⟩
यः	he who ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
यत्प्रभावः	who has which abilities ⟨1.1⟩ m. *yad-_prabhāva*
च	and ⟨*avyaya*⟩
तद्	that ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
समासेन	in summary ⟨3.1⟩ m. *samāsa* – compound, summary
मे	my ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
शृणु	you must hear ⟨*vidhātā* 2.1⟩ √*śru*...श्रवणे – to hear, obey

Subodhinī: (1) यद् उक्तम् मया 'क्षेत्रम्', तद् च क्षेत्रम् यद्-स्वरूपतः (जडम् दृश्यादि-स्वभावम्), (2) यादृक् (यादृशम्) च इच्छादि-धर्मकम्, (3) यद्-विकारि (यैः इन्द्रियादि-विकारैः युक्तम्), (4) यतः च (प्रकृति-पुरुष-संयोगात्) भवति, (5) 'यद्' इति यैः स्थावर-जङ्गमादि-भेदैः भिन्नम् इति अर्थः । (6) सः च क्षेत्र-ज्ञः यः स्व-रूपतः, (7) यद्-प्रभावः च अचिन्त्य-ऐश्वर्य-योगेन यैः प्रभावैः सम्पन्नः, तद् सर्वम् सङ्क्षेपतः मत्तः शृणु ॥१३.४॥

कैः विस्तरेण उक्तस्य अयम् सङ्क्षेपः ? इति अपेक्षायाम् आह – 'ऋषिभिः' इति –

13.5

ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् ।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥५॥

ऋषिभिः, विविधैः छन्दोभिः	by sages and by the different *Vedas*
हेतुमद्भिः विनिश्चितैः	and, ascertained by arguments
ब्रह्म-सूत्र-पदैः च एव	by the words of the *Brahma-sūtra*,
पृथक् बहुधा गीतम् ।	it is differently described in many ways

"That knowledge of the field of activities and of the knower of activities is described by various sages in various Vedic writings. It is especially presented in Vedānta-sūtra with all reasoning as to cause and effect."

ऋषिभिः	by sages ⟨3.3⟩ m. *ṛṣi* – sage
बहुधा	manifold ⟨*avyaya*⟩
गीतम्	described ⟨1.1⟩ n. *gīta* (√*gai*... शब्दे – to sound, sing; + .*[k]ta*) – sung
छन्दोभिः	by the *Vedas* ⟨3.3⟩ n. *chandas* (*chandaḥ*) – the *Veda* (see 10.35)
विविधैः	by the manifold ⟨3.3⟩ n. *vividha* – manifold
पृथक्	each ⟨*avyaya*⟩ – separately, differently

ब्रह्म-सूत्र-पदैः	by the words of the *Brahma-sūtra* ⟨3.3⟩ n. *brahma-sūtra-pada* – word of the *Brahma-sūtra*
च	and ⟨*avyaya*⟩
एव	certainly ⟨*avyaya*⟩
हेतुमद्भिः	by arguments ⟨3.3⟩ n. *hetumat* (.*mat[u]*) – 'having *hetu* (a reason)', argument
विनिश्चितैः	ascertained ⟨3.3⟩ n. *viniścita* (*vi.nir.*√*ci[ñ]* – to ascertain; + .*[k]ta*) – ascertained

Subodhinī: ऋषिभिः वसिष्ठादिभिः योग-शास्त्रेषु ध्यान-धारणादि-विषयत्वेन वैराजादि-रूपेण बहुधा गीतम् (निरूपितम्) । विविधैः विचित्रैः च नित्य-नैमित्तिक-काम्य-विषयैः छन्दोभिः (वेदैः) नाना-यजनीय-देवतादि-रूपेण बहुधा गीतम् ॥१३.५॥

तत्र क्षेत्र-स्वरूपम् आह – 'महा-भूतानि' इति द्वाभ्याम् –

13.6...7

महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च ।
इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ॥६॥

महा-भूतानि अहङ्कारः	the [five] gross elements, ego
बुद्धिः अ-व्यक्तम् एव च,	intelligence and the unmanifested (*pradhāna*)
दश एकम् च इन्द्रियाणि	the eleven senses
पञ्च इन्द्रिय-गोचराः च . . .	and the five sense objects (*tan-mātras*) . . .

"The five great elements, false ego, intelligence, the unmanifested, the ten senses and the mind, the five sense objects, . . ."

महा-भूतानि	the gross elements ⟨1.3⟩ n. *mahā-bhūta*...महान् भूतः इति महा-भूतः – a great or gross element
अहङ्कारः	ego ⟨1.1⟩ m. *ahaṅkāra*
बुद्धिः	intelligence ⟨1.1⟩ f. *buddhi*
अ-व्यक्तम्	the unmanifested ⟨1.1⟩ n. *a-vyakta*
एव	certainly ⟨*avyaya*⟩
च	and ⟨*avyaya*⟩
इन्द्रियाणि	the senses ⟨1.3⟩ n. *indriya* – sense, sense organ
दश	ten ⟨1.3⟩ n. *daśa*
एकम्	one ⟨1.1⟩ n. *kṛṣṇanāma eka*
च	and ⟨*avyaya*⟩
पञ्च	five ⟨1.3⟩ m. *pañca*
च	and ⟨*avyaya*⟩
इन्द्रिय-गोचराः	the sense objects ⟨1.3⟩ m. *indriya-gocara*...इन्द्रियस्य गो-चरः इति इन्द्रिय-गोचरः – the 'pasturing ground' of the senses; sense oject

Subodhinī: महा-भूतानि भूमि-आदीनि पञ्च । अहङ्कारः तद्-कारण-भूतः । बुद्धिः ज्ञानात्मकम् महत्तत्त्वम् । अ-व्यक्तम् मूल-प्रकृतिः । इन्द्रियाणि बाह्यानि दश 'श्रोत्र-त्वच्-घ्राण-दृश्-जिह्वा-वाच्-दोः-मेढ्र-अङ्घ्रि-पायवः' इति, एकम् च मनः । इन्द्रिय-गोचराः च पञ्च-तन्मात्र-रूपाः एव शब्दादयः, आकाशादि-विशेष-गुणतया व्यक्ताः सन्तः इन्द्रिय-विषयाः पञ्च । तद् एवम् चतुर्विंशति-तत्त्वानि उक्तानि ॥१३.६॥

13.7

इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः ।
एतत्क्षेत्रं समासेन सविकारमुदाहृतम् ॥७॥

. . . इच्छा द्वेषः सुखम् दुःखम्	. . . desire, hatred, happiness, distress
सङ्घातः चेतना धृतिः	the body, awareness and determination
एतद् स-विकारम् क्षेत्रम्	this is the *kṣetra* and its transformations
समासेन उदाहृतम् ।	described in summary

". . . desire, hatred, happiness, distress, the aggregate, the life symptoms, and convictions – all these are considered, in summary, to be the field of activities and its interactions."

इच्छा **desire** ⟨1.1⟩ f. *icchā*
द्वेषः **hatred** ⟨1.1⟩ m. *dveṣa*
सुखम् **happiness** ⟨1.1⟩ n. *sukha* – easiness, happiness
दुःखम् **distress** ⟨1.1⟩ n. *duḥkha*
सङ्घातः **the body** ⟨1.1⟩ m. *saṅghāta* – any aggregate of matter
चेतना **awareness** ⟨1.1⟩ f. *cetanā* – consciousness, awareness
धृतिः **determination** ⟨1.1⟩ f. *dhṛti* – firmness, patience
एतद् **this** ⟨1.1⟩ n. *kṛṣṇanāma etad* – (first person) he, this
क्षेत्रम् **the *kṣetra*** ⟨1.1⟩ n. *kṣetra* – field
समासेन **in summary** ⟨3.1⟩ m. *samāsa* – compound, summary
स-विकारम् **together with transformations** ⟨1.1⟩ n. *sa-vikāra*
उदाहृतम् **declared** ⟨1.1⟩ n. *udāhṛta* (*ud.ā.√hṛ[ñ]* – to set up, declare, illustrate; + *.[k]ta*)
(also from *ud.ā.√hṛ[ñ]:*) *udāharaṇa* – illustration, example

Subodhinī: इच्छादयः प्रसिद्धाः । सङ्घातः शरीरम् । चेतना ज्ञानात्मिका मनः-वृत्तिः । धृतिः धैर्यम् । एते इच्छादयः दृश्यत्वात् न आत्म-धर्माः अपितु मनः-धर्माः एव । अतः 'क्षेत्र'-अन्तः-पातिनः एव । उपलक्षणम् च एतद् 'सङ्कल्प'-आदीनाम् । तथाच श्रुतिः – 'कामः सङ्कल्पः विचिकित्सा श्रद्धा अ-श्रद्धा धृतिः अ-धृतिः ह्रीः धीः भीः इति एतद् सर्वम् मनः एव' (*Bṛhad-āraṇyaka-Up.* 1.5.3) इति । अनेन च 'यादृक्' (13.4) इति प्रतिज्ञाताः क्षेत्र-धर्माः दर्शिताः । एतद् क्षेत्रम् स-विकारम् (इन्द्रियादि-विकार-सहितम्) सङ्क्षेपेण तुभ्यम् मया उक्तम् इति 'क्षेत्र'-उपसंहारः ॥१३.७॥

इदानीम्, उक्त-लक्षणात् क्षेत्रात् विविक्ततया ज्ञेयम् शुद्धम् क्षेत्र-ज्ञम् विस्तरेण वर्णयिष्यन्, तद्-ज्ञान-साधनानि आह – 'अ-मानित्वम्' इति पञ्चभिः –

13.8...12

अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥८॥

अ-मानित्वम् अ-दम्भित्वम्	pridelessness, non-deceit
अ-हिंसा क्षान्तिः आर्जवम्	non-violence, tolerance, simplicity
आचार्योपासनम् शौचम्	worship of the *guru*, purity
सैर्यम् आत्म-विनिग्रहः . . .	steadiness, self-control . . .

"Humility; pridelessness; nonviolence; tolerance; simplicity; approaching a bona fide spiritual master; cleanliness; steadiness; self-control; . . ."

अ-मानित्वम् **pridelessness** ⟨1.1⟩ n. *a-mānitva* (*.tva*)
अ-दम्भित्वम् **non-deceit** ⟨1.1⟩ n. *a-dambhitva* (*.tva*)
अ-हिंसा **non-violence** ⟨1.1⟩ f. *a-hiṁsā*
क्षान्तिः **tolerance** ⟨1.1⟩ f. *kṣānti*
आर्जवम् **simplicity** ⟨1.1⟩ n. *ārjava* – straight, honest, sincere; straightforwardness, honesty, sincerity
आचार्योपासनम् **worship of the *guru*** ⟨1.1⟩ n. *ācārya-_upāsana*...आचार्यस्य उपासनम् इति आचार्योपासनम्
शौचम् **purity** ⟨1.1⟩ n. *śauca*
स्थैर्यम् **steadiness** ⟨1.1⟩ n. *sthairya*
आत्म-विनिग्रहः **self-control** ⟨1.1⟩ m. *ātma-vinigraha*

Subodhinī: अ-मानित्वम् स्व-गुण-श्लाघा-राहित्यम् । अ-दम्भित्वम् दम्भ-राहित्यम् । अ-हिंसा पर-पीडा-वर्जनम् । क्षान्तिः सहिष्णुत्वम् । आर्जवम् अ-वक्रता । आचार्य-उपासनम् सद्-गुरु-सेवा । शौचम् बाह्यम् आभ्यन्तरम् च । तत्र बाह्यम् मृद्-जलादिना, आभ्यन्तरम् च रागादि-मल-क्षालनम् । तथाच स्मृतिः –

शौचम् तु द्विविधम् प्रोक्तम् बाह्यम् आभ्यन्तरम् तथा ।
मृद्जलाभ्याम् स्मृतम् बाह्यम् भावशुद्धिः तथा अन्तरम् ॥

(*Agni-P.* 372.17-18) इति । स्थैर्यम् सद्-मार्गे प्रवृत्तस्य तद्-एक-निष्ठता । आत्म-विनिग्रहः शरीर-संयमः । 'एतद् ज्ञानम् इति प्रोक्तम्' (13.12) इति पञ्चमेन अन्वयः ॥१३.८॥

13.9

इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च ।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥९॥

. . . इन्द्रियार्थेषु वैराग्यम्	. . . detachment from sense objects
अनहङ्कारः एव च	and absence of egotism,
जन्म-मृत्यु-जरा-व्याधि-	of birth, death, old age and disease
-दुःख-दोषानुदर्शनम् . . .	perceiving the evil of miseries . . .

". . . renunciation of the objects of sense gratification; absence of false ego; the perception of the evil of birth, death, old age and disease; . . ."

इन्द्रियार्थेषु **in sense objects** ⟨7.3⟩ m. *indriya-_artha*...इन्द्रियस्य अर्थः इति इन्द्रियार्थः – sense object

वैराग्यम् **detachment** ⟨1.1⟩ n. *vairāgya*

अनहङ्कारः **absence of egotism** ⟨1.1⟩ m. *an-ahaṅkāra*

एव **certainly** ⟨*avyaya*⟩

च **and** ⟨*avyaya*⟩

जन्म-मृत्यु-जरा-व्याधि-दुःख-दोषानुदर्शनम् **perceiving the evil of the misery of birth, death, old age and disease** ⟨1.1⟩ n. *janma-mṛtyu-jarā-vyādhi-duḥkha-doṣa-_anudarśana*...जन्म-मृत्यु-जरा-व्याधीनाम् दुःख-दोषस्य अनुदर्शनम् इति जन्म-मृत्यु-जरा-व्याधि-दुःख-दोषानुदर्शनम्

Subodhinī: जन्मादिषु दुःख-दोषयोः अनुदर्शनम् (पुनः पुनः आलोचनम्), दुःख-रूपस्य दोषस्य अनुदर्शनम् इति वा । स्पष्टम् अन्यत् ॥१३.९॥

13.10

असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥१०॥

. . . पुत्र-दार-गृहादिषु	. . . to son, wife, home, etc.
अ-सक्तिः अनभिष्वङ्गः	non-attachment and non-identification
इष्टानिष्टोपपत्तिषु च	and in good and bad events
नित्यम् सम-चित्तत्वम् च . . .	constant even-mindedness . . .

". . . detachment; freedom from entanglement with children, wife, home and the rest; even-mindedness amid pleasant and unpleasant events; . . ."

अ-सक्तिः **non-attachment** ⟨1.1⟩ f. *a-sakti*

अनभिष्वङ्गः **non-identification** ⟨1.1⟩ m. *an-abhiṣvaṅga*

पुत्र-दार-गृहादिषु **towards son, wife, home, etc.** ⟨7.3⟩ n. *putra-dāra-gṛha-_ādi* – son, wife, home, etc.

नित्यम् **constant** ⟨*avyaya*⟩ from *nitya* – innate, fixed, eternal

च **and** ⟨*avyaya*⟩

सम-चित्तत्वम् **even-mindedness** ⟨1.1⟩ n. *sama-cittatva* (.*tva*)

इष्टानिष्टोपपत्तिषु **in desired and undesired events** ⟨7.3⟩ f. *iṣṭa-_an-iṣṭa-_upapatti* – accrual of the desired and undesired

Subodhinī: अ-सक्तिः पुत्रादि-पदार्थेषु प्रीति-त्यागः । अनभिष्वङ्गः पुत्रादीनाम् सुखे दुःखे च 'अहम् एव सुखी दुःखी च' इति अध्यास-अतिरेक-अभावः । इष्ट-अनिष्टयोः उपपत्तिषु (प्राप्तिषु) नित्यम् (सर्वदा) समचित्तत्वम् ॥१३.१०॥

13.11

मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥११॥

. . . अनन्य-योगेन	. . . by exclusive meditation
मयि अ-व्यभिचारिणी भक्तिः च	undeviating devotion to Me also
विविक्त-देश-सेवित्वम्	inhabitation of a solitary place
जन-संसदि अ-रतिः . . .	detachment towards people in general . . .

". . . constant and unalloyed devotion to Me; aspiring to live in a solitary place; detachment from the general mass of people; . . ."

मयि **in me** ⟨7.1⟩ *kṛṣnanāma asmad* – (last person) I

च **and** ⟨*avyaya*⟩

अनन्य-योगेन **undivided meditation** ⟨3.1⟩ m. *an-anya-yoga*

भक्तिः **devotion** ⟨1.1⟩ f. *bhakti*

अ-व्यभिचारिणी **undeviating** ⟨1.1⟩ f. *a-vyabhicāriṇī* (.*ī[p]*) – which does not deviate
व्यभिचारिन् (*vyabhicārī*; from *vi.abhi.√car[a]* – to deviate) – 'which/who deviates'

विविक्त-देश-सेवित्वम् **inhabitation of a solitary place** ⟨1.1⟩ n. *vivikta-deśa-sevitva* (.*tva*)...विविक्त-देशस्य सेवित्वम् इति विविक्त-देश-सेवित्वम्
विविक्त – 'separated' pure
सेवित्व – service, attendance, resort

अ-रतिः **detachment** ⟨1.1⟩ f. *a-rati* – non-attachment

जन-संसदि **towards people in general** ⟨7.1⟩ f. *jana-saṁsad*...जनानाम् संसद् इति जन-संसद् – 'assembly of men', people in general

संसद् – 'sitting together', an assembly, crowd, multitude

Subodhinī: मयि परमेश्वरे अनन्य-योगेन (सर्व-आत्म-दृष्ट्या) अ-व्यभिचारिणी एकान्त-भक्तिः । विविक्तः (शुद्धः) चित्त-प्रसाद-करः, तम् देशम् सेवितुम् शीलम् यस्य, तस्य भावः तत्त्वम् । प्राकृतानाम् जनानाम् संसदि (सभायाम्) अ-रतिः (रति-अभावः) ॥१३.११॥

13.12

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतो ऽन्यथा ॥१२॥

. . . अध्यात्म-ज्ञान-नित्यत्वम्	. . . constancy in spiritual knowledge
तत्त्व-ज्ञानार्थ-दर्शनम्	search for the Absolute Truth
एतद् ज्ञानम् इति प्रोक्तम्,	all this is called *jñāna*,
यद् अतः अन्यथा, अ-ज्ञानम् ।	what is contrary, is ignorance

". . . accepting the importance of self-realization; and philosophical search for the Absolute Truth – all these I declare to be knowledge, and besides this whatever there may be is ignorance."

अध्यात्म-ज्ञान-नित्यत्वम् **constancy in spiritual knowledge** ⟨1.1⟩ n. *adhyātma-jñāna-nityatva*
नित्यत्व – eternality

तत्त्व-ज्ञानार्थ-दर्शनम् **contemplating the purpose of *tattva-jñāna*** ⟨1.1⟩ n. *tattva-jñāna-_artha-darśana*...तत्त्व-ज्ञानस्य अर्थस्य दर्शनम् इति तत्त्व-ज्ञानार्थ-दर्शनम्
दर्शन – seeing, contemplating; philosophy

एतद् **this** ⟨1.1⟩ n. *kṛṣṇanāma etad* – (first person) he, this
ज्ञानम् ***jñāna*** ⟨1.1⟩ n. *jñāna* – knowledge
इति **thus** ⟨*avyaya*⟩
प्रोक्तम् **declared** ⟨1.1⟩ n. *prokta* (*pra.√vac[a]* – to declare; + *.[k]ta*)
अ-ज्ञानम् **ignorance** ⟨1.1⟩ n. *a-jñāna*
यद् **that which** ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
अतः **than this** ⟨*avyaya*⟩ (*atas*; from *idam* + *.tas[i]*) – 'from this', (time:) from now; (cause:) therefore
अन्यथा **otherwise** ⟨*avyaya*⟩

Subodhinī: आत्मानम् अधिकृत्य वर्तमानम् ज्ञानम् अध्यात्म-ज्ञानम्, तस्मिन् नित्यत्वम् (नित्य-भावः) 'तत्त्वम्'-पदार्थ-शुद्धि-निष्ठत्वम् इति अर्थः । तत्त्व-ज्ञानस्य अर्थः (प्रयोजनम्) मोक्षः, तस्य दर्शनम् मोक्षस्य सर्व-उत्कृष्टता-आलोचनम् इति अर्थः । एतद् अ-मानित्वम् अ-दम्भित्वम् इत्यादि विंशति-सङ्ख्याकम् यद् उक्तम् एतद् 'ज्ञानम्' इति प्रोक्तम्, ज्ञान-साधनत्वात् । अतः अन्यथा (अस्मात्

विपरीतम्) मानित्वादि यद् एतद् 'अ-ज्ञानम्' इति प्रोक्तम् वसिष्ठादिभिः, ज्ञान-विरोधित्वात् । अतः सर्वथा त्याज्यम् इति अर्थः ॥१३.१२॥ एभिः साधनैः यद् ज्ञेयम् तद् आह – 'ज्ञेयम्' इति षड्भिः –

Note: All these 20 qualities are means for valid knowledge.

13.13

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते ।
अनादि मत्परं ब्रह्म न सत्तन्नासदुच्यते ॥१३॥

यद् ज्ञेयम् तद् प्रवक्ष्यामि,	I will explain what that *jñeya* is,
यद् ज्ञात्वा अ-मृतम् अश्नुते,	[after] knowing which one obtains immortality,
तद् अनादि मत्परम् ब्रह्म	that beginningless Brahman, subordinate to Me
न सत् न अ-सत् उच्यते	is said to be neither cause nor effect

"I shall now explain the knowable, knowing which you will taste the eternal. Brahman, the spirit, beginningless and subordinate to Me, lies beyond the cause and effect of this material world."

ज्ञेयम् **the *jñeya*** ⟨1.1⟩ n. *jñeya* (*√jñā* 9P...अवबोधने – to know; + *.ya*) – to be known, the knowable
यद् **that which** ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
तद् **that** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
प्रवक्ष्यामि **I will declare** ⟨*kalki* 3.1⟩ *pra.√vac[a]* – to declare
यद् **that which** ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
ज्ञात्वा **[after] knowing** ⟨*avyaya*⟩ *√jñā* 9P...अवबोधने – to know; + *.[k]tvā*
अ-मृतम् **immortality** ⟨2.1⟩ n. *a-mṛta* – 'not death', immortality, nectar
अश्नुते **he obtains** ⟨*acyuta* 1.1⟩ *√aś[ūṅ]*...व्याप्तौ – to pervade, obtain
अनादि **beginningless** ⟨1.1⟩ n. *an-ādi*...न आदिः यस्य, तद् अनादि
मत्परम् **which is subordinate to Me** ⟨1.1⟩ n. *mad-_para*...अहम् परः यस्य, तद् मत्परम् – 'whose supreme [shelter or master] I am', subordinate or devoted to Me
ब्रह्म **the Brahman** ⟨1.1⟩ n. *brahman* (*brahma*) – spirit, soul
न **not** ⟨*avyaya*⟩
सत् **cause** ⟨1.1⟩ n. *sat* – being, real, good
तद् **effect** ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
न **not** ⟨*avyaya*⟩
अ-सत् **effect** ⟨1.1⟩ n. *a-sat* – not being, unreal, bad
उच्यते **it is called** ⟨*acyuta* pass. 1.1⟩ *√vac[a]*...परिभाषणे – to speak

Subodhinī: यद् 'ज्ञेयम्' तद् प्रवक्ष्यामि । श्रोतुः आदर-सिद्धये ज्ञान-फलम् दर्शयति – यद् वक्ष्यमाणम् ज्ञात्वा अमृतम् (मोक्षम्) प्राप्नोति । किम् तद् ? अनादिमत् ।

आदिमत् न भवति इति अनादिमत् । परम् निरतिशयम् ब्रह्म । 'अनादि' इति एतावत् एव बहुव्रीहिणा अनादित्वे सिद्धे अपि, पुनः मतुपः प्रयोगः छान्दसः । यद्वा – 'अनादि' इति 'मद्-परम्' इति च पद-द्वयम्, मम विष्णोः परम् निर्विशेषम् रूपम् ब्रह्म इति अर्थः । तद् एव आह – 'न सत् न च अ-सत् उच्यते' । विधि-मुखेन प्रमाणस्य विषयः 'सत्'-शब्देन उच्यते । निषेधस्य विषयः तु 'अ-सत्'-शब्देन उच्यते । इदम् तु तद्-उभय-विलक्षणम्, अ-विषयत्वात् इति अर्थः ॥१३.१३॥

ननु एवम् ब्रह्मणः सत्-असत्-विलक्षणत्वे सति, 'सर्वम् खलु इदम् ब्रह्म' (*Chāndogya-Up.* 3.14.1) 'ब्रह्म एव इदम् सर्वम्' (*Nṛsiṁhatā.* 7.3) इत्यादि श्रुतिभिः विरुद्ध्येत इति आशङ्क्य, 'परा अस्य शक्तिः विविधा एव श्रूयते, स्वाभाविकी ज्ञान-बल-क्रिया च' (*Śvetāśvatara-Up.* 6.8) इत्यादि श्रुति-प्रसिद्धया अचिन्त्य-शक्त्या सर्व-आत्मताम् तस्य दर्शयन् आह – 'सर्वतः' इति पञ्चभिः –

Note: The words *an-ādi* ('beginningless', see 10.3,13.20) and *mat-para* ('subordinate to Me', see 2.61,6.14,12.6,12.20,18.57) are used with these meanings throughout the Gītā. That the impersonal Brahman is subordinate to the Supreme Person (*mat-para*) is an important point in the Gītā (7.7, 14.27). Some philosophers want to support a different view and therefore fix the syllable *mat* to *anādi* (*an-ādimat param*) as *pratyaya mat[u]*, indicating possession. But because a *pītāmbara-samāsa* like *an-ādi* itself signifies possession ('that which possesses no beginning'), to apply *mat[u]* is superfluous and grammatically wrong.

13.14

सर्वतः पाणिपादं तत्सर्वतो ऽक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥१४॥

सर्वतः पाणि-पादम्	with hands and legs everywhere
सर्वतः अक्षि-शिरोमुखम्	with eyes, heads and mouths everywhere
सर्वतः श्रुतिमत्	with ears everywhere
लोके सर्वम् आवृत्य	[after] pervading everything in the world
तद् तिष्ठति ।	that exists

"Everywhere are His hands and legs, His eyes, heads and faces, and He has ears everywhere. In this way the Supersoul exists, pervading everything."

सर्वतः **everywhere** ⟨*avyaya*⟩ (*sarvatas*; *sarva* + *.tas[i]*) – 'from all', on all sides

पाणि-पादम् **which has hands and feet** ⟨1.1⟩ n. *pāṇi-pāda*...पाणयः च पादाः च यस्य, तद् पाणि-पादम्

तद् **that** ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that

सर्वतः **everywhere** ⟨*avyaya*⟩ (*sarvatas*; *sarva* + *.tas[i]*) – 'from all', on all sides

अक्षि-शिरोमुखम् **which has eyes, heads and mouths** ⟨1.1⟩ n. *akṣi-śiraḥ-_mukha*...अक्षीणि च शिरांसि च मुखानि च यस्य, तद् अक्षि-शिरोमुखम्

सर्वतः **everywhere** ⟨*avyaya*⟩ (*sarvatas*; *sarva* + *.tas[i]*) – 'from all', on all sides

श्रुतिमत् **which has ears** ⟨1.1⟩ n. *śrutimat* (*.mat[u]*) – 'having *śruti* (ears)'

लोके **in the world** ⟨7.1⟩ m. *loka* – place, world, people

सर्वम् **all** ⟨2.1⟩ n. *kṛṣṇanāma sarva*

आवृत्य **[after] covering** ⟨*avyaya*⟩ *ā.√vṛ[ñ]* 5U – to cover; + *.ya[p]*

तिष्ठति **it stands** ⟨*acyuta* 1.1⟩ √*sthā*...स्थाने – to stand

Subodhinī: सर्वतः (सर्वत्र) पाणयः पादाः च यस्य तद्, सर्वतः अक्षीणि शिरांसि मुखानि च यस्य तद्, सर्वतः श्रुतिमत् श्रवण-इन्द्रियैः युक्तम् सत्, लोके सर्वम् आवृत्य (व्याप्य) तिष्ठति । सर्व-प्राणि-वृत्तिभिः पाण्यादिभिः उपादिभिः सर्व-व्यवहार-आस्पदत्वेन तिष्ठति इति अर्थः ॥१३.१४॥

13.15

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥१५॥

सर्वेन्द्रिय-गुणाभासम्	manifesting the functions of all senses
सर्वेन्द्रिय-विवर्जितम्	[although] without all senses
अ-सक्तम् सर्व-भृत् च एव	being unattached, [although] maintaining everything
निर्गुणम् गुण-भोक्तृ च ।	it is beyond the *guṇas*, [although] the master of the *guṇas*

"The Supersoul is the original source of all senses, yet He is without senses. He is unattached, although He is the maintainer of all living beings. He transcends the modes of nature, and at the same time He is the master of all the modes of material nature."

सर्वेन्द्रिय-गुणाभासम् **which manifests all senses and qualities** ⟨1.1⟩ n. *sarva-_indriya-guṇa-ābhāsa*...यद् सर्वाणि इन्द्रियाणि गुणान् च आभासयति, तद् सर्वेन्द्रिय-गुणाभासम्

आभास (from *ā.√bhās[ṛ]* – to shine) – the appearence, semblance, reflection; *ābhāsayati* – it shines upon, makes appear, manifests

सर्वेन्द्रिय-विवर्जितम् **which is devoid of all senses** ⟨1.1⟩ n. *sarva-_indriya-vivarjita*...सर्वैः इन्द्रियैः विवर्जितम् इति सर्वेन्द्रिय-विवर्जितम्

अ-सक्तम् **which is unattached** ⟨1.1⟩ n. *a-sakta* – unattached

सर्व-भृत् **which maintains all** ⟨1.1⟩ n. *sarva-bhṛt*...यद् सर्वम् बिभर्ति, तद् सर्व-भृत्

च **and** ⟨*avyaya*⟩

एव **certainly** ⟨*avyaya*⟩

निर्गुणम् **which is without** ***guṇas*** ⟨1.1⟩ n. *nirguṇa* – without *guṇa*

गुण-भोक्तृ **the master of the** ***guṇas*** ⟨1.1⟩ n. *guṇa-bhoktṛ (-bhoktṛ, .tṛ[n])*...गुणानाम् भोक्तृ इति गुण-भोक्तृ

च **and** ⟨*avyaya*⟩

Subodhinī: सर्वेषाम् चक्षुरादीनाम् इन्द्रियाणाम् गुणेषु (रूपादि-आकारासु वृत्तिषु) तद्-तद्-आकारेण भासते इति तथा, सर्वाणि इन्द्रियाणि गुणान् च तद्-तद्-विषयान् आभासयति इति वा । सर्व-इन्द्रियैः विवर्जितम् च । तथाच श्रुतिः – 'अ-पाणि-पादः जवनः ग्रहीता, पश्यति अ-चक्षुः, सः शृणोति अ-कर्णः' (*Śvetāśvatara-Up.* 3.19) इत्यादि । अ-सक्तम् सङ्ग-शून्यम् । तथापि, सर्वम् बिभर्ति इति सर्व-भृत्, सर्वस्य आधार-भूतम् । तद् एव निर्गुणम् (सत्त्वादि-गुण-रहितम्) । गुण-भोक्तृ गुणानाम् सत्त्वादीनाम् भोक्तृ च (पालकम्) ॥१३.१५॥

13.16

बहिरन्तश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥१६॥

भूतानाम् बहिः अन्तः च	being outside and inside of all beings
अ-चरम् चरम् एव च	non-moving and moving
सूक्ष्मत्वात् तद् अ-विज्ञेयम्	because of being subtle, it is unknowable
तद् दूर-स्थम् च अन्तिके च ।	it is situated far and near

"The Supreme Truth exists outside and inside of all living beings, in the moving and the nonmoving. Because He is subtle, He is beyond the power of the material senses to see or to know. Although far, far away, He is also near to all."

बहिः **outside** ⟨*avyaya*⟩

अन्तः **inside** ⟨*avyaya*⟩

च **and** ⟨*avyaya*⟩

भूतानाम् **of beings** ⟨6.3⟩ m. *bhūta* (√*bhū*...सत्तायाम् – to be, exist, become; + *.[k]ta*) – past; an element, being, creature

अ-चरम् **non-moving** ⟨1.1⟩ n. *a-cara*

चरम् **moving** ⟨1.1⟩ n. *cara*

एव **certainly** ⟨*avyaya*⟩

च **and** ⟨*avyaya*⟩

सूक्ष्मत्वात् **because of being subtle** ⟨5.1⟩ n. *sūkṣmatva (.tva)* – being subtle
सूक्ष्म (as opp. to *sthūla* – gross) – minute, small, fine, thin, feeble, insignificant; subtle, atomic, intangible

तद् **that** ⟨1.1⟩ n. *kṛṣnanāma tad* – (first person) he, that

अ-विज्ञेयम् **unknowable** ⟨1.1⟩ n. *a-vijñeya* – not to be known, incomprehensible

दूर-स्थम् **which is situated far** ⟨1.1⟩ n. *dūra-stha*...दूरे तिष्ठति इति दूर-स्थम्

च **and** ⟨*avyaya*⟩

अन्तिके **in the proximity** ⟨7.1⟩ n. *antika* – proximity

च **and** ⟨*avyaya*⟩

तद् **that** ⟨1.1⟩ n. *kṛṣnanāma tad* – (first person) he, that

Subodhinī: भूतानाम् चर-अचराणाम् स्व-कार्याणाम् बहिः च अन्तः च, तद् एव सुवर्णम् इव कटक-कुण्डलादीनाम् जल-तरङ्गाणाम् अन्तः बहिः च जलम् इव । अ-चरम् (स्थावरम्) चरम् (जङ्गमम्) भूत-जातम् तद् एव कारणात्मकत्वात् कार्यस्य । एवम् अपि सूक्ष्मत्वात् (रूपादि-हीनत्वात्) तद् अ-विज्ञेयम्, 'इदम् तद्' इति स्पष्ट-ज्ञान-अर्हम् न भवति । अतएव अ-विदुषाम् योजन-लक्ष-अन्तरितम् इव दूर-स्थम् च, स-विकारायाः प्रकृतेः परत्वात् विदुषाम् पुनः प्रत्यक्-आत्मत्वात् अन्तिके च, तद् नित्यम् सन्निहितम् । तथाच मन्त्रः –

तद् एजति तद् न एजति तद् दूरे तद् उ अन्तिके ।
तद् अन्तः अस्य सर्वस्य तद् उ सर्वस्य अस्य बाह्यतः ॥

(*Īśa-Up.* 5) इति । एजति (चलति), न एजति (न चलति), 'तद् उ अन्तिके' इति छेदः ॥१३.१६॥

13.17

अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥१७॥

भूतेषु अ-विभक्तम् च	[although] not divided in all beings
विभक्तम् इव च स्थितम्,	it is situated as if divided
भूत-भर्तृ ग्रसिष्णु च प्रभविष्णु च	the maintainer of all beings, the destroyer and creator
तद् ज्ञेयम् ।	that is the *jñeya*

"Although the Supersoul appears to be divided among all beings, He is never divided. He is situated as one. Although He is the maintainer of every living entity, it is to be understood that He devours and develops all."

अ-विभक्तम् **being undivided** ⟨1.1⟩ n. *a-vibhakta* – undivided

च **and** ⟨*avyaya*⟩

भूतेषु **in beings** ⟨7.3⟩ m. *bhūta* (√*bhū*...सत्तायाम् – to be, exist, become; + *.[k]ta*) – past; an element, being, creature

विभक्तम् **being divided** ⟨1.1⟩ n. *vibhakta (.[k]ta)*

इव **like** ⟨*avyaya*⟩

च **and** ⟨*avyaya*⟩

स्थितम् **being situated** ⟨1.1⟩ n. *sthita* (√*sthā*...स्थाने – to stand; + *.[k]ta*) – standing, staying

भूत-भर्तृ **the maintainer of beings** ⟨1.1⟩ n. *bhūta-bhartṛ (-bhartā, .tṛ[n])*

च	**and** ⟨*avyaya*⟩
तद्	**that** ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
ज्ञेयम्	**the *jñeya*** ⟨1.1⟩ n. *jñeya* (√*jñā* 9P...अवबोधने – to know; + *.ya*) – to be known
ग्रसिष्णु	**the swallower** ⟨1.1⟩ n. *grasiṣṇu* (from √*gras[u]*...अदने – to eat) – eater, swallower (√*gras[u]*...अदने – to eat; + *.[k]ta:*) *grasta* – eaten, swallowed
प्रभविष्णु	**the creator** ⟨1.1⟩ n. *prabhaviṣṇu*
च	**and** ⟨*avyaya*⟩

Subodhinī: भूतेषु स्थावर-जङ्गमात्मकेषु अ-विभक्तम् (कारणात्मना अ-भिन्नम्), कार्यात्मना विभक्तम् (भिन्नम्) इव अवस्थितम् च । तद् पूर्व-उक्तम् 'ज्ञेयम्' भूतानाम् भर्तृ च (पोषकम्) स्थिति-काले । प्रलय-काले च ग्रसिष्णु (ग्रसन-शीलम्) । सृष्टि-काले च प्रभविष्णु (नाना-कार्यात्मना प्रभवन-शीलम्) ॥१३.१७॥

13.18

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥१८॥

तद् ज्योतिषाम् अपि ज्योतिः	that is the light of even the lights
तमसः परम् उच्यते,	it is said to be beyond darkness,
ज्ञानम् ज्ञेयम्	it is knowledge, the object of knowledgeable
ज्ञान-गम्यम्	and to be attained by knowledge
सर्वस्य हृदि विष्ठितम् ।	being present in the heart of all

"He is the source of light in all luminous objects. He is beyond the darkness of matter and is unmanifested. He is knowledge, He is the object of knowledge, and He is the goal of knowledge. He is situated in everyone's heart."

ज्योतिषाम्	**of lights** ⟨6.3⟩ n. *jyotis* (*jyotiḥ*) – light, luminary
अपि	**also** ⟨*avyaya*⟩
तद्	**that** ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
ज्योतिः	**the light** ⟨1.1⟩ n. *kṛṣṇanāma jyotis* (*jyotiḥ*)
तमसः	**from darkness** ⟨5.1⟩ n. *tamas* (*tamaḥ*) – darkness, ignorance
परम्	**beyond** ⟨1.1⟩ n. *para*
उच्यते	**it is said** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak
ज्ञानम्	**the knowledge** ⟨1.1⟩ n. *jñāna*
ज्ञेयम्	**which is to be known** ⟨1.1⟩ n. *jñeya* (√*jñā* 9P...अवबोधने – to know; + *.ya*)
ज्ञान-गम्यम्	**to be reached by knowledge** ⟨1.1⟩ n. *jñāna-gamya*...ज्ञानेन गम्यम् इति ज्ञान-गम्यम्
हृदि	**in the heart** ⟨7.1⟩ n. *hṛd* – heart

सर्वस्य	**of all** ⟨6.1⟩ m. *kṛṣṇanāma sarva* – all
विष्ठितम्	**being situated** ⟨1.1⟩ n. *viṣṭhita* (*vi.*√*sthā* – to be situated; + *.[k]ta*) – situated

Subodhinī: ज्योतिषाम् चन्द्र-आदित्यादीनाम् अपि तद् ज्योतिः (प्रकाशकम्) तद् । 'येन सूर्यः तपति तेजसा इद्धः' (*Tai-Brā.* 3.12.9) [...] इत्यादि श्रुतेः । अतएव तमसः अ-ज्ञानात् परम्, तेन अ-संस्पृष्टम् उच्यते, 'आदित्य-वर्णम् तमसः परस्तात्' (*Śvetā.* 3.8, *Bg.* 8.9) इत्यादि श्रुतेः । ज्ञानम् तद् एव, बुद्धि-वृत्तौ अभिव्यक्तम् । तद् एव रूपादि-आकारेण ज्ञेयम् च, ज्ञानेन गम्यम् च, 'अ-मानित्वम् अ-दम्भित्वम्' (13.8) इत्यादि लक्षणेन पूर्व-उक्तेन ज्ञान-साधनेन प्राप्यम् इति अर्थः । 'ज्ञान-गम्यम्' विशिनष्टि – सर्वस्य प्राणिमात्रस्य हृदि विष्ठितम्, विशेषेण अप्रच्युत-स्वरूपेण नियन्तृतया स्थितम् ॥१३.१८॥
उक्तम् क्षेत्रादिकम् अधिकारि-फल-सहितम् उपसंहरति – 'इति' इति –

13.19

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥१९॥

इति क्षेत्रम् तथा ज्ञानम् ज्ञेयम् च	thus *kṣetra* (13.2ff.), *jñāna* (13.8ff.) and *jñeya* (13.13ff.)
समासतः उक्तम्,	are described in summary,
मद्भक्तः एतद् विज्ञाय	My devotee, [after] understanding this [all]
मद्भावाय उपपद्यते ।	is eligible for My nature

"Thus the field of activities (the body), knowledge and the knowable have been summarily described by Me. Only My devotees can understand this thoroughly and thus attain to My nature."

इति	**thus** ⟨*avyaya*⟩
क्षेत्रम्	***kṣetra*** ⟨1.1⟩ n. *kṣetra* – field
तथा	**so** ⟨*avyaya*⟩
ज्ञानम्	***jñāna*** ⟨1.1⟩ n. *jñāna* – knowledge
ज्ञेयम्	***jñeya*** ⟨1.1⟩ n. *jñeya* (√*jñā* 9P...अवबोधने – to know; + *.ya*) – to be known
च	**and** ⟨*avyaya*⟩
उक्तम्	**spoken** ⟨1.1⟩ n. *ukta* (√*vac[a]*...परिभाषणे – to speak; + *.[k]ta*)
समासतः	**in summary** ⟨*avyaya*⟩ (*samāsatas*; *samāsa* + *.tas[i]*)
मद्भक्तः	**my devotee** ⟨1.1⟩ m. *mad-bhakta*
एतद्	**this** ⟨2.1⟩ n. *kṛṣṇanāma etad* – (first person) he, this
विज्ञाय	**[after] understanding** ⟨*avyaya*⟩ *vi.*√*jñā* – to understand; + *.ya[p]*
मद्भावाय	**to my nature** ⟨4.1⟩ m. *mad-bhāva*...मम भावः इति मद्भावः – my nature
उपपद्यते	**he attains** ⟨*acyuta* 1.1⟩ *upa.*√*pad[a]* – to attain, exist

Subodhinī: इति (एवम्) क्षेत्रम् 'महा-भूत'-आदि (13.6) 'धृति'-अन्तम् (13.7), तथा ज्ञानम् च 'अमानित्व'-आदि (13.8) 'तत्त्व-ज्ञानार्थ-दर्शन'-अन्तम् (13.12), ज्ञेयम् च 'अनादि मद्-परम् ब्रह्म' (13.13) इत्यादि 'विष्ठितम्' (13.18) इति अन्तम् वसिष्ठादिभिः विस्तरेण उक्तम्, सर्वम् अपि मया सङ्क्षेपेण उक्तम् । एतद् च पूर्व-अध्याय-उक्त-लक्षणः (ch.12) मद्भक्तः विज्ञाय, मद्भावाय (ब्रह्मत्वाय) उपपद्यते (योग्यः भवति) ॥१३.१९॥

तद् एवम् 'तद् क्षेत्रम् यद् च यादृक् च' (13.4) इति एतावत् प्रपञ्चितम् । इदानीम् तु 'यद्-विकारि यतः च यद्, सः च यः यद्-प्रभावः च' (13.4) इति एतद् पूर्वम् प्रतिज्ञातम् एव प्रकृति-पुरुषयोः संसार-हेतुत्व-कथनेन प्रपञ्चयति – 'प्रकृतिम्' इति पञ्चभिः –

13.20

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान् ॥२०॥

प्रकृतिम् पुरुषम् च एव	*prakṛti* and *puruṣa*
उभौ अपि अनादी विद्धि !	know both as beginningless!
विकारान् च गुणान् च एव	and the transformations (senses) and *guṇas*
प्रकृति-सम्भवान् विद्धि !	know to be born from *prakṛti*!

"Material nature and the living entities should be understood to be beginningless. Their transformations and the modes of matter are products of material nature."

प्रकृतिम् **prakṛti** ⟨2.1⟩ f. *prakṛti* – nature
पुरुषम् **puruṣa** ⟨2.1⟩ m. *puruṣa* – person
च **and** ⟨*avyaya*⟩
एव **certainly** ⟨*avyaya*⟩
विद्धि **you must know** ⟨*vidhātā* 2.1⟩ √*vid[a]* 2P...ज्ञाने – to know
अनादी **beginningless** ⟨2.2⟩ m. *an-ādi*
उभौ **both** ⟨2.2⟩ m. *kṛṣṇanāma ubha*
अपि **also** ⟨*avyaya*⟩
विकारान् **the transformations** ⟨2.3⟩ m. *vikāra* – transformation
च **and** ⟨*avyaya*⟩
गुणान् **the *guṇas*** ⟨2.3⟩ m. *guṇa* – quality
च **and** ⟨*avyaya*⟩
एव **certainly** ⟨*avyaya*⟩
विद्धि **you must know** ⟨*vidhātā* 2.1⟩ √*vid[a]* 2P...ज्ञाने – to know
प्रकृति-सम्भवान् **born from *prakṛti*** ⟨2.3⟩ m. *prakṛti-sambhava*...प्रकृतेः सम्भवः यस्य, सः प्रकृति-सम्भवः – whose generation is from *prakṛti*

Subodhinī: तत्र प्रकृति-पुरुषयोः आदिमत्त्वे, तयोः अपि प्रकृति-अन्तरेण भाव्यम् इति अनवस्था-आपत्तिः स्यात्, अतः तौ उभौ अनादी विद्धि । अनादेः ईश्वरस्य शक्तित्वात् प्रकृतेः अनादिः, पुरुषः अपि तद्-अंशत्वात् अनादिः एव । अत्र च परमेश्वरस्य तद्-शक्तीनाम् च अनादित्वम् नित्यत्वम् च श्रीमत्-शङ्कर-भगवत्-भाष्य-कृद्भिः अतिप्रबन्धेन उपपादितम् इति न अस्माभिः प्रतयन्ते । विकारान् च (देह-इन्द्रियादीन्), गुणान् च (गुण-परिणामान् सुख-दुःख-मोहादीन्) प्रकृतेः सम्भवान् (सम्भूतान्) विद्धि ॥१३.२०॥

विकाराणाम् प्रकृति-सम्भवत्वम् दर्शयन्, पुरुषस्य संसार-हेतुत्वम् दर्शयति – 'कार्य-कारण' इति –

13.21

कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥२१॥

कार्य-कारण-कर्तृत्वे	in producing effect (body) and cause (senses)
प्रकृतिः हेतुः उच्यते,	*prakṛti* is said to be the cause,
सुख-दुःखानाम् भोक्तृत्वे	in experiencing happiness and distress
पुरुषः हेतुः उच्यते ।	the *puruṣa* is said to be the cause

"Nature is said to be the cause of all material causes and effects, whereas the living entity is the cause of the various sufferings and enjoyments in this world."

कार्य-कारण-कर्तृत्वे **in being the doer of effect and cause** ⟨7.1⟩ n. *kārya-kāraṇa-kartṛtva* (.*tva*)...कार्यस्य च कारणस्य च कर्तृत्वम् इति कार्य-कारण-कर्तृत्वम् – the doership of effect and cause
हेतुः **the cause** ⟨1.1⟩ m. *hetu* – cause, desire
प्रकृतिः **nature** ⟨1.1⟩ f. *prakṛti*
उच्यते **it is said** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak
पुरुषः **the *puruṣa*** ⟨1.1⟩ m. *puruṣa* – person
सुख-दुःखानाम् **of happiness and distress** ⟨6.3⟩ n. *sukha-duḥkha* – happiness and distress
भोक्तृत्वे **in being the enjoyer** ⟨7.1⟩ n. *bhoktṛtva* (.*tva*) – being the enjoyer
हेतुः **the cause** ⟨1.1⟩ m. *hetu* – cause, desire
उच्यते **it is said** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak

Subodhinī: कार्यम् (शरीरम्), कारणानि (सुख-दुःखादि-साधनानि इन्द्रियाणि), तेषाम् कर्तृत्वे (तद्-आकार-परिणामे) प्रकृतिः हेतुः उच्यते कपिलादिभिः । पुरुषः (जीवः) तद्-कृत-सुख-दुःखानाम् भोक्तृत्वे हेतुः उच्यते । [...] भोक्तृत्वम् च सुख-दुःख-संवेदनम्, तद् चेतन-धर्मः एव इति प्रकृति-सन्निधानात् पुरुषस्य भोक्तृत्वम् उच्यते इति ॥१३.२१॥

तथापि, अ-विकारिणः जन्म-रहितस्य [पुरुषस्य] भोक्तृत्वम् कथम्? इति अतः आह – 'पुरुषः' इति –

13.22

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणान् ।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥२२॥

प्रकृति-स्थः हि पुरुषः	the *puruṣa*, residing in *prakṛti* (a body)
प्रकृति-जान् गुणान् भुङ्क्ते,	experiences the *guṇas* born of *prakṛti*,
सदसद्योनि-जन्मसु	in births in high and low species
अस्य गुण-सङ्गः कारणम् ।	his contact with the *guṇas* is the cause

"The living entity in material nature thus follows the ways of life, enjoying the three modes of nature. This is due to his association with that material nature. Thus he meets with good and evil among various species."

पुरुषः **the *puruṣa*** ⟨1.1⟩ m. *puruṣa* – person
प्रकृति-स्थः **who stays in *prakṛti*** ⟨1.1⟩ m. *prakṛti-stha*...यः प्रकृतौ तिष्ठति, सः प्रकृति-स्थः
हि **indeed** ⟨*avyaya*⟩
भुङ्क्ते **he enjoys** ⟨*acyuta* 1.1⟩ √*bhuj[a]*...पालन-अभ्यवहारयोः – to govern; enjoy
प्रकृति-जान् **which are born from nature** ⟨2.3⟩ m. *prakṛti-ja*...यः प्रकृत्याः जायते, सः प्रकृति-जः – which is born from *praktṛi*
गुणान् **the *guṇas*** ⟨2.3⟩ m. *guṇa* – quality
कारणम् **the cause** ⟨1.1⟩ n. *kāraṇa*
गुण-सङ्गः **contact with the *guṇas*** ⟨1.1⟩ m. *guṇa-saṅga*...गुणैः सङ्गः इति गुण-सङ्गः
अस्य **his** ⟨6.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
सदसद्योनि-जन्मसु **in births in high and low species** ⟨7.3⟩ n. *sat-_a-sat-_yoni-janman* (-*janma*)...सदसद्योनिषु जन्म इति सदसद्योनि-जन्म – birth in high and low species

Subodhinī: हि (यस्मात्) प्रकृति-स्थः (तद्-कार्य-देहे तादात्म्येन स्थितः) पुरुषः, अतः तद्-जनितान् सुखादीन् भुङ्क्ते । अस्य च पुरुषस्य सतीषु देव-आदि-योनिषु अ-सतीषु तिर्यक्-आदि-योनिषु यानि यानि जन्मानि तेषु गुण-सङ्गः, गुणैः (शुभ-अशुभ-कर्म-कारिभिः इन्द्रियैः) सङ्गः, कारणम् इति अर्थः ॥१३.२२॥

13.23

उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः ॥२३॥

अस्मिन् देहे परः पुरुषः	in this body there is another *puruṣa*
उपद्रष्टा अनुमन्ता	the observer, permitter
भर्ता भोक्ता महेश्वरः च	maintainer, enjoyer and great lord
परमात्मा इति च अपि उक्तः	also called Supersoul

"Yet in this body there is another, a transcendental enjoyer, who is the Lord, the supreme proprietor, who exists as the overseer and permitter, and who is known as the Supersoul."

उपद्रष्टा **the observer** ⟨1.1⟩ m. *upadrṣṭṛ* (*upadraṣṭā*, *.tṛ[n]*)
अनुमन्ता **permitter** ⟨1.1⟩ m. *anumantṛ* (*anumantā*, *.tṛ[n]*)
च **and** ⟨*avyaya*⟩
भर्ता **maintainer** ⟨1.1⟩ m. *bhartṛ* (*bhartā*, *.tṛ[n]*)
भोक्ता **enjoyer** ⟨1.1⟩ m. *bhoktṛ* (*bhoktā*, *.tṛ[n]*)
महेश्वरः **great lord** ⟨1.1⟩ m. *mahā-_īśvara*
परमात्मा **Supersoul** ⟨1.1⟩ m. *parama-_ātman* (-*ātmā*)
इति **thus** ⟨*avyaya*⟩
च **and** ⟨*avyaya*⟩
अपि **also** ⟨*avyaya*⟩
उक्तः **called** ⟨1.1⟩ m. *ukta* (√*vac[a]*...परिभाषणे – to speak; + *.[k]ta*) – spoken
देहे **in the body** ⟨7.1⟩ m. *deha* – body
अस्मिन् **in this** ⟨7.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
पुरुषः **a *puruṣa*** ⟨1.1⟩ m. *puruṣa* – person
परः **another or supreme** ⟨1.1⟩ m. *para* – beyond

Subodhinī: अस्मिन् प्रकृति-कार्ये देहे च वर्तमानः अपि पुरुषः परः (भिन्नः) एव, न तद्-गुणैः युज्यते इति अर्थः । तत्र हेतवः – यस्मात् उपद्रष्टा, पृथक्-भूतः एव समीपे स्थित्वा द्रष्टा (साक्षी) इति अर्थः । तथा अनुमन्ता, अनुमोदिता इव सन्निधिमात्रेण अनुग्राहकः । [...] तथा ऐश्वरेण रूपेण भर्ता (विधारकः) इति च उक्तः, भोक्ता (पालकः) इति च, महान् च असौ ईश्वरः च, ब्रह्मादीनाम् अधिपतिः इति च, परमात्मा (अन्तर्यामी) इति च उक्तः श्रुत्या । [...] ॥१३.२३॥
एवम् प्रकृति-पुरुष-विवेक-ज्ञानिनम् स्तौति – 'यः एवम्' इति –

13.24

य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह ।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ॥२४॥

पुरुषम् प्रकृतिम् च गुणैः सह	the *puruṣa* and *prakṛti* with its *guṇas*
यः एवम् वेत्ति,	one who thus knows,

सर्वथा वर्तमानः अपि	although acting in all ways
सः भूयः न अभिजायते ।	he is not born again

"One who understands this philosophy concerning material nature, the living entity and the interaction of the modes of nature is sure to attain liberation. He will not take birth here again, regardless of his present position."

यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
एवम् **thus** ⟨*avyaya*⟩
वेत्ति **he knows** ⟨*acyuta* 1.1⟩ √*vid[a]* 2P...ज्ञाने – to know
पुरुषम् ***puruṣa*** ⟨2.1⟩ m. *puruṣa* – person
प्रकृतिम् ***prakṛti*** ⟨2.1⟩ f. *prakṛti* – nature
च **and** ⟨*avyaya*⟩
गुणैः **with the *guṇas*** ⟨3.3⟩ m. *guṇa* – quality
सह **together** ⟨*avyaya*⟩
सर्वथा **however** ⟨*avyaya*⟩ – in all respects, however
वर्तमानः **[while] acting** ⟨1.1⟩ m. *vartamāna* (√*vṛt[u]* 1A...वर्तने – to happen, act; + *.[ś]āna*)
अपि **also** ⟨*avyaya*⟩
न **not** ⟨*avyaya*⟩
सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
भूयः **again** ⟨*avyaya*⟩
अभिजायते **he is born** ⟨*acyuta* 1.1⟩ *abhi.*√*jan[ī]* – to be born

Subodhinī: एवम् उपद्रष्टृत्वादि-रूपेण पुरुषम् यः वेत्ति, प्रकृतिम् च गुणैः (सुख-दुःखादि-परिणामैः) सहिताम् यः वेत्ति, सः पुरुषः सर्वथा (विधिम् अभिलङ्घ्य) इह वर्तमानः अपि, पुनः न अभिजायते, मुच्यते एव इति अर्थः ॥१३.२४॥
एवम्भूत-विविक्त-आत्मज्ञाने साधन-विकल्पान् आह – 'ध्यानेन' इति द्वाभ्याम् –

13.25

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना ।
अन्ये साङ्ख्येन योगेन कर्मयोगेन चापरे ॥२५॥

केचिद्	some
आत्मनि आत्मानम्	the Supersoul in the heart
आत्मना ध्यानेन पश्यन्ति,	they see by *dhyāna* with the mind,
अन्ये साङ्ख्येन योगेन,	others by *sāṅkhya* and *yoga* (*aṣṭāṅga*),
अ-परे च कर्म-योगेन ।	and still others by *karma-yoga*

"Some perceive the Supersoul within themselves through meditation, others through the cultivation of knowledge, and still others through working without fruitive desires."

ध्यानेन **by *dhyāna*** ⟨3.1⟩ n. *dhyāna* – meditation
आत्मनि **in the heart** ⟨7.1⟩ m. *ātman* (*ātmā*) – the self, soul
पश्यन्ति **they see** ⟨*acyuta* 1.3⟩ √*dṛś[ir]*...प्रेक्षणे – to see
केचिद् **some** ⟨1.3⟩ m. *kṛṣṇanāma kim* (*kaḥ*) + *.cid* – someone, something
आत्मानम् **the Supersoul** ⟨2.1⟩ m. *ātman* (*ātmā*) – the self, soul
According to Baladeva, *ātmānam* here refers to the Paramātmā.
आत्मना **with the mind** ⟨3.1⟩ m. *ātman* (*ātmā*) – the self, soul
अन्ये **others** ⟨1.3⟩ m. *kṛṣṇanāma anya* – other
साङ्ख्येन **by *sāṅkhya*** ⟨3.1⟩ n. *sāṅkhya* – *sāṅkhya-yoga*, discrimination
योगेन **by *yoga*** ⟨3.1⟩ m. *yoga*
कर्म-योगेन **by *karma-yoga*** ⟨3.1⟩ m. *karma-yoga*
च **and** ⟨*avyaya*⟩
अ-परे **others** ⟨1.3⟩ m. *kṛṣṇanāma a-para* – later, inferior, other

Subodhinī: ध्यानेन (आत्मा-आकार-प्रत्यय-आवृत्त्या) आत्मनि (देहे) आत्मना (मनसा) एनम् आत्मानम् केचिद् पश्यन्ति । अन्ये तु साङ्ख्येन (प्रकृति-पुरुष-वैलक्षण्य-आलोचनेन), योगेन (अष्टाङ्गेन) अ-परे, अ-परे च कर्म-योगेन, 'पश्यन्ति' इति सर्वत्र-अनुषङ्गः । [...] ॥१३.२५॥
अतिमन्द-अधिकारिणाम् निस्तार-उपायम् आह – 'अन्ये' इति –

Note: Some commentaries explain *sāṅkhyena yogena* as *sāṅkhya-yogena* – by *Sāṅkhya-yoga*.

13.26

अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते ।
ते ऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥२६॥

अन्ये तु एवम् अ-जानन्तः	but others, though not knowing thus
अन्येभ्यः श्रुत्वा उपासते,	worship, [after] hearing from others
ते अपि च श्रुति-परायणाः	even they, being devoted to hearing (instructions)
मृत्युम् अतितरन्ति एव ।	certainly overcome death

"Again there are those who, although not conversant in spiritual knowledge, begin to worship the Supreme Person upon hearing about Him from others. Because of their tendency to hear from authorities, they also transcend the path of birth and death."

अन्ये **others** ⟨1.3⟩ m. *kṛṣṇanāma anya* – other
तु **but** ⟨*avyaya*⟩
एवम् **thus** ⟨*avyaya*⟩

अ-जानन्तः **who are not knowing** ⟨1.3⟩ m. *a-jānat* – [while] not knowing
श्रुत्वा **[after] hearing** ⟨*avyaya*⟩ √*śru*...श्रवणे – to hear, obey; + .*[k]tvā*
अन्येभ्यः **from others** ⟨5.3⟩ m. *kṛṣṇanāma anya* – other
उपासते **they worship** ⟨*acyuta* 1.3⟩ *upa.*√*ās[a]* – to worship
ते **they** ⟨1.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that
अपि **also** ⟨*avyaya*⟩
च **and** ⟨*avyaya*⟩
अतितरन्ति **they cross** ⟨*acyuta* 1.3⟩ *ati.*√*tṝ* – to cross
एव **certainly** ⟨*avyaya*⟩
मृत्युम् **death** ⟨2.1⟩ m. *mṛtyu*
श्रुति-परायणाः **who are dedicated to hearing** ⟨1.3⟩ m. *śruti-parāyaṇa*...श्रुतिः परायनम् यस्य सः श्रुति-परायणः – 'whose final refuge is *śruti* (hearing or scriptures)'

Subodhinī: अन्ये तु साङ्ख्य-योगादि-मार्गेण एवम्-भूतम् उपद्रष्टृत्वादि-लक्षणम् आत्मानम् साक्षात्-कर्तुम् अ-जानन्तः, अन्येभ्यः आचार्येभ्यः उपदेशेन श्रुत्वा, उपासते (ध्यायन्ति) । ते च श्रद्धया उपदेश-श्रवण-परायणाः सन्तः, मृत्युम् (संसारम्) शनैः अतितरन्ति एव ॥१३.२६॥

तत्र कर्म-योगस्य तृतीय-चतुर्थ-पञ्चमेषु प्रपञ्चितत्वात्, ध्यानस्य योगस्य च षष्ठ-अष्टमयोः प्रपञ्चितत्वात्, ध्यानादेः च साङ्ख्य-विविक्त-आत्म-विषयत्वात्, साङ्ख्यम् एव प्रपञ्चयन् आह – 'यावत्' इत्यादि अध्याय-समाप्तिम् –

13.27

यावत्सञ्जायते किञ्चित्सत्त्वं स्थावरजङ्गमम् ।
क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥२७॥

हे भरतर्षभ !	O Arjuna!
यावत् किञ्चिद्	whatever
स्थावर-जङ्गमम् सत्त्वम्	non-moving or moving being
सञ्जायते,	takes birth,
तद् क्षेत्र-क्षेत्रज्ञ-संयोगात्	that is from a combination of *kṣetra* and *kṣetrajña*
विद्धि !	know!

"O chief of the Bhāratas, know that whatever you see in existence, both the moving and the nonmoving, is only a combination of the field of activities and the knower of the field."

यावत् **as much** ⟨*avyaya*⟩ – as much, as long
सञ्जायते **it takes birth** ⟨*acyuta* 1.1⟩ *sam.*√*jan[ī]* – to be born together
किञ्चिद् **something** ⟨1.1⟩ n. *kṛṣṇanāma kim (kim)* + .*cid*

सत्त्वम् **being** ⟨1.1⟩ n. *sattva*
स्थावर-जङ्गमम् **stationary and movable** ⟨1.1⟩ n. *sthāvara-jaṅgama*...स्थावरम् च जङ्गमम् च इति स्थावर-जङ्गमम्
क्षेत्र-क्षेत्रज्ञ-संयोगात् **from the combination of *kṣetra* and *kṣetra-jña*** ⟨5.1⟩ m. *kṣetra-kṣetrajña-saṁyoga*...क्षेत्रस्य च क्षेत्र-ज्ञस्य च संयोगः इति क्षेत्र-क्षेत्रज्ञ-संयोगः – the combination of *kṣetra* and *kṣetra-jña*
तद् **that** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
विद्धि **you must know** ⟨*vidhātā* 2.1⟩ √*vid[a]* 2P...ज्ञाने – to know
भरतर्षभ **O Arjuna!** ⟨8.1⟩ m. *bharata-_ṛṣabha* – 'best of the descendants of Bharata'

Subodhinī: यावत् किञ्चिद् वस्तुमात्रम् सत्त्वम् उत्पद्यते, तद् सर्वम् क्षेत्र-क्षेत्रज्ञयोः योगात् (अ-विवेक-कृतात् तादात्म्य-अध्यासात्) भवति इति जानीहि ॥१३.२७॥

अ-विवेक-कृतम् संसार-उद्भवम् उक्त्वा, तद्-निवृत्तये विविक्त-आत्म-विषयम् सम्यक्-दर्शनम् आह – 'समम्' इति –

13.28

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥२८॥

सर्वेषु विनश्यत्सु भूतेषु	in all perishing beings
समम् तिष्ठन्तम्	equally residing
अ-विनश्यन्तम् परमेश्वरम्	the imperishable Supreme Lord
यः पश्यति,	one who sees,
सः पश्यति ।	he sees [truly]

"One who sees the Supersoul accompanying the individual soul in all bodies, and who understands that neither the soul nor the Supersoul within the destructible body is ever destroyed, actually sees."

समम् **equally** ⟨*avyaya*⟩
सर्वेषु **in all** ⟨7.3⟩ m. *kṛṣṇanāma sarva* – all
भूतेषु **in beings** ⟨7.3⟩ m. *bhūta* (√*bhū*...सत्तायाम् – to be, exist, become; + .*[k]ta*) – past; an element, being, creature
तिष्ठन्तम् **who is staying** ⟨2.1⟩ m. *tiṣṭhat* (√*sthā*...स्थाने – to stand; + .*[ś]at[ṛ]*) – [while] staying
परमेश्वरम् **the Supreme Lord** ⟨2.1⟩ m. *parama-_īśvara*
विनश्यत्सु **in those perishing** ⟨7.3⟩ m. *vinaśyat* (.*[ś]at[ṛ]*) – [while] perishing
अ-विनश्यन्तम् **the imperishable** ⟨2.1⟩ m. *a-vinaśyat* – [while] not perishing
यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
पश्यति **he sees** ⟨*acyuta* 1.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see

सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
पश्यति **he sees** ⟨*acyuta* 1.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see

Subodhinī: स्थावर-जङ्गमात्मकेषु भूतेषु निर्विशेषम् सद्-रूपेण समम् यथा भवति एवम् तिष्ठन्तम् परमात्मानम् यः पश्यति, अतएव तेषु विनश्यत्सु अपि अ-विनश्यन्तम् यः पश्यति, सः एव सम्यक् पश्यति, न अन्यः ॥१३.२८॥
कुतः ? इति अतः आह – 'समम्' इति –

13.29

समं पश्यन्हि सर्वत्र समवस्थितमीश्वरम् ।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ॥२९॥

सर्वत्र हि	everywhere
समम् समवस्थितम् ईश्वरम्	the equally residing Lord
पश्यन्	[while] seeing
आत्मना आत्मानम् न हिनस्ति,	he does not harm himself by the mind,
ततः पराम् गतिम् याति ।	and then he attains the supreme destination

"One who sees the Supersoul equally present everywhere, in every living being, does not degrade himself by his mind. Thus he approaches the transcendental destination."

समम् **equally** ⟨*avyaya*⟩
पश्यन् **[while] seeing** ⟨1.1⟩ m. *paśyat* (√*dṛś[ir]*...प्रेक्षणे – to see; + .*[ś]at[ṛ]*)
हि **indeed** ⟨*avyaya*⟩
सर्वत्र **everywhere** ⟨*avyaya*⟩
समवस्थितम् **being firmly situated** ⟨2.1⟩ m. *samavasthita* (*sam.ava.*√*sthā* – to stay; + .*[k]ta*) – firmly situated
ईश्वरम् **the Lord** ⟨2.1⟩ m. *īśvara*
न **not** ⟨*avyaya*⟩
हिनस्ति **he harms** ⟨*acyuta* 1.1⟩ √*his[i]*...हिंसायाम् – to harm
आत्मना **by the mind** ⟨3.1⟩ m. *ātman* (*ātmā*) – the self, soul
आत्मानम् **himself** ⟨2.1⟩ m. *ātman* (*ātmā*) – the self, soul
ततः **then** ⟨*avyaya*⟩ (*tatas*; from *tad* + .*tas[i]*) – from/after/than that
याति **he attains** ⟨*acyuta* 1.1⟩ √*yā*...प्राप्तौ – to attain, go
पराम् **the supreme** ⟨2.1⟩ f. *parā* (.*ā[p]*) – beyond
गतिम् **goal** ⟨2.1⟩ f. *gati* – movement, goal

Subodhinī: सर्वत्र (भूतमात्रे) समम् सम्यक् (अप्रच्युत-रूपेण) अवस्थितम् परमात्मानम् पश्यन्, हि यस्मात् आत्मना स्वेन एव आत्मानम् न हिनस्ति, अ-विद्यया सत्-

चित्-आनन्द-रूपम् आत्मानम् तिरस्कृत्य न विनाशयति, ततः च पराम् गतिम् (मोक्षम्) प्राप्नोति । यः तु एवम् न पश्यति, सः हि देह-आत्म-दर्शी देहेन सह आत्मानम् हिनस्ति । तथाच श्रुतिः –

असूर्याः नाम ते लोकाः अन्धेन तमसा अवृताः ।
तान् ते प्रेत्य अभिगच्छन्ति ये के च आत्म-हनः जनाः ॥

(*Īśa-Up.*3) इति ॥१३.२९॥

13.30

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।
यः पश्यति तथात्मानमकर्तारं स पश्यति ॥३०॥

कर्माणि	that activities
प्रकृत्या एव सर्वशः क्रियमाणानि	are being done in all respect by *prakṛti* alone
यः पश्यति,	one who sees,
तथा आत्मानम् अ-कर्तारम् च,	and also the soul as non-doer,
सः पश्यति ।	he sees [truly]

"One who can see that all activities are performed by the body, which is created of material nature, and sees that the self does nothing, actually sees."

प्रकृत्या **by** ***prakṛti*** ⟨3.1⟩ f. *prakṛti* – nature
एव **certainly** ⟨*avyaya*⟩
च **and** ⟨*avyaya*⟩
कर्माणि **activities** ⟨2.3⟩ n. *karman* (*karma*) – activity
क्रियमाणानि **which are being done** ⟨2.3⟩ n. *kriyamāṇa* (√*[ḍu]kṛ[ñ]*...करणे – to do; pass.; + .*[ś]āna*) – [while] being done
सर्वशः **completely** ⟨*avyaya*⟩ (*sarvaśas*) – completely, altogether, in every way, on all sides
यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
पश्यति **he sees** ⟨*acyuta* 1.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see
तथा **so** ⟨*avyaya*⟩
आत्मानम् **the self** ⟨2.1⟩ m. *ātman* (*ātmā*) – the self, soul
अ-कर्तारम् **as non-doer** ⟨2.1⟩ m. *a-kartṛ* (*-kartā*, .*tr[n]*) – non-doer
सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
पश्यति **he sees** ⟨*acyuta* 1.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see

Subodhinī: प्रकृत्या एव (देह-इन्द्रिय-आकारेण परिणतया) सर्वशः (सर्वैः प्रकारैः) क्रियमाणानि कर्माणि यः पश्यति, तथा आत्मानम् च अ-कर्तारम्, 'देह-अभिमानेन एव आत्मनः कर्तृत्वम्, न स्वतः' इति एवम् यः पश्यति, सः एव सम्यक् पश्यति, न आन्यः इति अर्थः ॥१३.३०॥

13.31

यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म सम्पद्यते तदा ॥३१॥

यदा भूत-पृथग्भावम्	when the separate existence of all beings
एक-स्थम् अनुपश्यति,	he sees in one (*prakṛti*),
ततः एव विस्तारम् च,	and their emanation from that alone,
तदा ब्रह्म सम्पद्यते ।	then he attains Brahman

"When a sensible man ceases to see different identities due to different material bodies and he sees how beings are expanded everywhere, he attains to the Brahman conception."

यदा **when** ⟨*avyaya*⟩
भूत-पृथग्भावम् **the separate existence of beings** ⟨2.1⟩ m. *bhūta-pṛthak-_bhāva*...भूतानाम् पृथक् भावः इति भूत-पृथग्भावः
एक-स्थम् **who stays in one** ⟨2.1⟩ m. *eka-stha*...यः एकस्मिन् तिष्ठति, सः एक-स्थः
अनुपश्यति **he sees** ⟨*acyuta* 1.1⟩ *anu.*√*dṛś[ir]* – to look at, consider
ततः **from that** ⟨*avyaya*⟩ (*tatas*; from *tad* + *.tas[i]*) – from/after/than that
एव **certainly** ⟨*avyaya*⟩
च **and** ⟨*avyaya*⟩
विस्तारम् **extension** ⟨2.1⟩ m. *vistāra*
ब्रह्म **Brahman** ⟨2.1⟩ n. *brahman* (*brahma*) – spirit, soul
सम्पद्यते **he attains** ⟨*acyuta* 1.1⟩ *sam.*√*pad[a]* – to attain
तदा **then** ⟨*avyaya*⟩

Subodhinī: यदा भूतानाम् स्थावर-जङ्गमानाम् पृथक्-भावम् (भेदम्, पृथक्त्वम्) एक-स्थम् (एकस्याम् एव ईश्वर-शक्ति-रूपायाम् प्रकृतौ स्थितम्) प्रलये अनुपश्यति (आलोचयति) । ततः एव च तस्या एव प्रकृतेः सकाशात् भूतानाम् विस्तारम् सृष्टि-समये अनुपश्यति, तदा प्रकृति-तावत्-मात्रत्वेन भूतानाम् अपि अ-भेदम् पश्यन्, परिपूर्णम् ब्रह्म सम्पद्यते, ब्रह्म एव भवति इति अर्थः ॥१३.३१॥
तथापि परमेश्वरस्य संसार-अवस्थायाम् देह-सम्बन्ध-निमित्तैः कर्मभिः तद्-फलैः च सुख-दुःखादिभिः वैषम्यम् दुष्परिहरम् इति कुतः सम-दर्शनम् ? तत्र आह – 'अनादित्वात्' इति –

13.32

अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः ।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥३२॥

हे कौन्तेय !	O Arjuna!
अनादित्वात् निर्गुणत्वात्	being beginningless and free from the *guṇas*
अयम् अ-व्ययः परमात्मा	this imperishable transcendental soul
शरीर-स्थः अपि	though residing in the body
न करोति न लिप्यते ।	neither acts nor is it stained

"Those with the vision of eternity can see that the imperishable soul is transcendental, eternal, and beyond the modes of nature. Despite contact with the material body, O Arjuna, the soul neither does anything nor is entangled."

अनादित्वात् **because of being beginningless** ⟨5.1⟩ n. *an-āditva* (*.tva*) – being without beginning
निर्गुणत्वात् **because of being free from the *guṇas*** ⟨5.1⟩ n. *nirguṇatva* (*.tva*) – being free from the *guṇas*
परमात्मा **the transcendental soul** ⟨1.1⟩ m. *parama-ātman* (*-ātmā*)
According to Baladeva, *paramātmā* here refers to the *jīva*. See also the context (13.29-34).
अयम् **this** ⟨1.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
अ-व्ययः **imperishable** ⟨1.1⟩ m. *a-vyaya* – unchangeable, imperishable
शरीर-स्थः **who stays in the body** ⟨1.1⟩ m. *śarīra-stha*...यः शरीरे तिष्ठति, सः शरीर-स्थः
अपि **also** ⟨*avyaya*⟩
कौन्तेय **O Arjuna!** ⟨8.1⟩ m. *kaunteya* – 'son of Kuntī'
न **not** ⟨*avyaya*⟩
करोति **he acts** ⟨*acyuta* 1.1⟩ √*[ḍu]kṛ[ñ]*...करणे – to do
न **not** ⟨*avyaya*⟩
लिप्यते **it is smeared** ⟨*acyuta* pass. 1.1⟩ √*lip[a]*...उपदेहे – to smear

Subodhinī: यद् उत्पत्तिमत्, तद् एव हि व्येति (विनाशम् एति) । यद् च गुणवत् वस्तु, तस्य गुण-नाशे व्ययः भवति । अयम् तु परमात्मा अनादिः निर्गुणः ततः अ-व्ययः अ-विकारी इति अर्थः । तस्मात् शरीरे स्थितः अपि, किञ्चिद् न करोति, नच कर्म-फलैः लिप्यते इति ॥१३.३२॥
तत्र दृष्टान्तम् आह – 'यथा' इति –

13.33

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥३३॥

यथा सर्व-गतम् आकाशम्	just as the all-pervading sky
सौक्ष्म्यात् न उपलिप्यते,	because of being subtle is not touched,
तथा देहे सर्वत्र अवस्थितः आत्मा	similarly, the soul, situated everywhere in the body

न उपलिप्यते ।	is not stained

"The sky, due to its subtle nature, does not mix with anything, although it is all-pervading. Similarly, the soul situated in Brahman vision does not mix with the body, though situated in that body."

यथा **as** ⟨*avyaya*⟩
सर्व-गतम् **all-pervading** ⟨1.1⟩ n. *sarva-gata*...सर्वत्र गतम् इति सर्व-गतम् – which has gone everywhere
सौक्ष्म्यात् **because of subtlety** ⟨5.1⟩ n. *saukṣmya* (from *sūkṣma* – subtle)
आकाशम् **the sky** ⟨1.1⟩ n. *ākāśa*
न **not** ⟨*avyaya*⟩
उपलिप्यते **he is smeared** ⟨*acyuta* pass. 1.1⟩ *upa.√lip[a]* – to smear
सर्वत्र **everywhere** ⟨*avyaya*⟩
अवस्थितः **being situated** ⟨1.1⟩ m. *avasthita* (*ava.√sthā* – to stay; + *.[k]ta*) – situated
देहे **in the body** ⟨7.1⟩ m. *deha* – body
तथा **so** ⟨*avyaya*⟩
आत्मा **the soul** ⟨1.1⟩ m. *ātman* (*ātmā*) – the self, soul
न **not** ⟨*avyaya*⟩
उपलिप्यते **it is smeared** ⟨*acyuta* pass. 1.1⟩ *upa.√lip[a]* – to smear

Subodhinī: यथा सर्वत्र पङ्कादिषु अपि स्थितम् आकाशम् सौक्ष्म्यात् अ-सङ्गत्वात् पङ्कादिभिः न उपलिप्यते, तथा सर्वत्र (उत्तमे मध्यमे अधमे वा) देहे अवस्थितः अपि आत्मा न उपलिप्यते, दैहिकैः गुण-दोषैः न युज्यते इति अर्थः ॥१३.३३॥
'अ-सङ्गत्वात् लेपः न अस्ति' इति आकाश-दृष्टान्तेन उक्तम्, 'प्रकाशकत्वात् च प्रकाश्य-धर्मैः न युज्यते' इति रवि-दृष्टान्तेन आह – 'यथा' इति –

13.34

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥३४॥

हे भारत !	O Arjuna!
यथा एकः रविः	just as one sun
इमम् कृत्स्नम् लोकम् प्रकाशयति,	illuminates this whole world,
तथा क्षेत्री	the soul similarly
कृत्स्नम् क्षेत्रम् प्रकाशयति ।	illuminates the whole body

"O son of Bharata, as the sun alone illuminates all this universe, so does the living entity, one within the body, illuminate the entire body by consciousness."

यथा **as** ⟨*avyaya*⟩
प्रकाशयति **it illuminates** ⟨*acyuta* 1.1⟩ *pra.√kāś[r]* – to shine, become visible
एकः **one** ⟨1.1⟩ m. *kṛṣṇanāma eka*
कृत्स्नम् **the whole** ⟨2.1⟩ m. *kṛtsna*
लोकम् **world** ⟨2.1⟩ m. *loka* – place, world, people
इमम् **this** ⟨2.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
रविः **the sun** ⟨1.1⟩ m. *ravi*
क्षेत्रम् **the body** ⟨2.1⟩ n. *kṣetra* – field
क्षेत्री **the soul** ⟨1.1⟩ m. *kṣetrin* (*kṣetrī*) – who owns the field
तथा **so** ⟨*avyaya*⟩
कृत्स्नम् **the whole** ⟨2.1⟩ n. *kṛtsna*
प्रकाशयति **it illuminates** ⟨*acyuta* 1.1⟩ *pra.√kāś[r]* – to shine, become visible
भारत **O Arjuna!** ⟨8.1⟩ m. *bhārata* – 'descendant of Bharata'

Subodhinī: स्पष्टार्थः ॥१३.३४॥
अध्याय-अर्थम् उपसंहरति – 'क्षेत्र-क्षेत्रज्ञयोः' इति –

13.35

क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा ।
भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम् ॥३५॥

क्षेत्र-क्षेत्रज्ञयोः अन्तरम्	the difference between *kṣetra* and *kṣetrajña*
भूत-प्रकृति-मोक्षम् च	and the liberation from material nature
ये ज्ञान-चक्षुषा एवम् विदुः,	those who thus know with the eye of knowledge,
ते परम् यान्ति ।	they attain the Supreme

"Those who see with eyes of knowledge the difference between the body and the knower of the body, and can also understand the process of liberation from bondage in material nature, attain to the supreme goal."

क्षेत्र-क्षेत्रज्ञयोः **of *kṣetra* and *kṣetra-jña*** ⟨6.2⟩ m. *kṣetra-kṣetrajña* – *kṣetra* and *kṣetra-jña*
एवम् **thus** ⟨*avyaya*⟩
अन्तरम् **the difference** ⟨2.1⟩ n. *antara* – interior, difference
ज्ञान-चक्षुषा **with the eyes of knowledge** ⟨3.1⟩ n. *jñāna-cakṣus* (*-cakṣuḥ*)...ज्ञानस्य चक्षुः इति ज्ञान-चक्षुः – the eye of knowledge
भूत-प्रकृति-मोक्षम् **liberation from the *prakṛti* of the beings** ⟨2.1⟩ m. *bhūta-prakṛti-mokṣa*...भूतानाम् प्रकृतेः मोक्षः इति भूत-प्रकृति-मोक्षः
च **and** ⟨*avyaya*⟩
ये **those who** ⟨1.3⟩ m. *kṛṣṇanāma yad* – (relative) who, which

विदुः	**they know** ⟨*acyuta* 1.3⟩ √*vid[a]* 2P...ज्ञाने – to know
यान्ति	**they attain** ⟨*acyuta* 1.3⟩ √*yā*...प्राप्तौ – to attain, go
ते	**they** ⟨1.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that
परम्	**the Supreme** ⟨2.1⟩ m. *para* – beyond

Subodhinī: एवम् उक्त-प्रकारेण क्षेत्र-क्षेत्रज्ञयोः अन्तरम् (भेदम्) विवेक-ज्ञान-लक्षणेन चक्षुषा ये विदुः, तथा च इयम् उक्ता भूतानाम् प्रकृतिः, तस्याः सकाशात् मोक्षम् (मोक्ष-उपायम्) ध्यानादिकम् च ये विदुः, ते परम् पदम् यान्ति ॥१३.३५॥

ओं तत्सदिति
श्रीमहाभारते शतसाहस्त्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि
श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे क्षेत्रक्षेत्रज्ञविभागयोगो नाम त्रयोदशो ऽध्यायः ॥१३॥

अथ चतुर्दशो ऽध्यायः

अथ चतुर्दशः अध्यायः । now the fourteenth chapter

Subodhinī: 'यावत् सञ्जायते किञ्चिद् सत्त्वम् स्थावर-जङ्गमम्, क्षेत्र-क्षेत्रज्ञ-संयोगात् तद् विद्धि भरतर्षभ' (13.27) इति उक्तम् । सः च क्षेत्र-क्षेत्रज्ञयोः संयोगः निरीश्वर-साङ्ख्यानाम् इव न स्वातन्त्र्येण, किन्तु ईश्वर-इच्छया एव इति कथन-पूर्वकम्, 'कारणम् गुण-सङ्गः अस्य सत्-असत्-योनि-जन्मसु' (13.22) इति अनेन उक्तम् सत्त्वादि-गुण-कृतम् संसार-वैचित्र्यम् प्रपञ्चयिष्यन्, एवम्-भूतम् वक्ष्यमाणम् अर्थम् स्तौति ।श्री-भगवान् उवाच। – 'परम् भूयः' इति द्वाभ्याम् –

14.1

श्रीभगवानुवाच
परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ।
यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥१॥

श्री-भगवान् उवाच -	Śrī Kṛṣṇa said:
परम् ज्ञानानाम् उत्तमम् ज्ञानम्	transcendental and best knowledge of all knowledge
भूयः प्रवक्ष्यामि	I will again explain,
यद् ज्ञात्वा सर्वे मुनयः	[after] knowing which, all sages
इतः पराम् सिद्धिम् गताः ।	have attained the supreme perfection hereafter

"The Supreme Personality of Godhead said: Again I shall declare to you this supreme wisdom, the best of all knowledge, knowing which all the sages have attained the supreme perfection."

श्री-भगवान्	**Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'
उवाच	**he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*... परिभाषणे – to speak
परम्	**supreme** ⟨2.1⟩ n. *para* – beyond
भूयः	**again** ⟨*avyaya*⟩
प्रवक्ष्यामि	**I will declare** ⟨*kalki* 3.1⟩ *pra.*√*vac[a]* – to declare
ज्ञानानाम्	**of all knowledge** ⟨6.3⟩ n. *jñāna* – knowledge
ज्ञानम्	**knowledge** ⟨2.1⟩ n. *jñāna*
उत्तमम्	**best** ⟨2.1⟩ n. *uttama* – highest, best
यद्	**that which** ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
ज्ञात्वा	**[after] knowing** ⟨*avyaya*⟩ √*jñā* 9P...अवबोधने – to know; + .*[k]tvā*
मुनयः	**the sages** ⟨1.3⟩ m. *muni* – sage
सर्वे	**all** ⟨1.3⟩ m. *kṛṣṇanāma sarva*

परम्	**the supreme** ⟨2.1⟩ f. *parā (.ā[p])* – beyond
सिद्धिम्	**perfection** ⟨2.1⟩ f. *siddhi*
इतः	**hereafter** ⟨*avyaya*⟩ (*itas*; from *idam* + *.tas[i]*) – from this, than this
गताः	**who have attained** ⟨1.3⟩ m. *gata* (√*gam[l]*...गतौ – to go; + *.[k]ta*) – gone

Subodhinī: परम् (परमार्थ-निष्ठम्), ज्ञायतः अनेन इति ज्ञानम् (उपदेशम्), भूयः अपि तुभ्यम् प्रकर्षेण वक्ष्यामि । कथम्-भूतम् ? ज्ञानानाम् (तपः-कर्मादि-विषयाणाम्) मध्ये उत्तमम्, मोक्ष-हेतुत्वात् । तद् एव आह – यद् ज्ञात्वा (प्राप्य) मुनयः (मनन-शीलाः) सर्वे इतः (देह-बन्धनात्) पराम् सिद्धिम् (मोक्षम्) गताः (प्राप्ताः) ॥१४.१॥

14.2

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥२॥

इदम् ज्ञानम् उपाश्रित्य	[after] practicing this knowledge
मम साधर्म्यम् आगताः	having attained My nature
सर्गे अपि न उपजायन्ते,	they are not born even at the time of creation,
प्रलये न व्यथन्ति च ।	and not perturbed at the time of destruction

"By becoming fixed in this knowledge, one can attain to the transcendental nature like My own. Thus established, one is not born at the time of creation or disturbed at the time of dissolution."

इदम्	**this** ⟨2.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this
ज्ञानम्	**knowledge** ⟨2.1⟩ n. *jñāna*
उपाश्रित्य	**[after] taking shelter** ⟨*avyaya*⟩ *upa.ā.*√*śri[ñ]* – to take shelter; + *.ya[p]*
मम	**my** ⟨6.1⟩ *kṛṣṇanāma asmad* – (last person) I
साधर्म्यम्	**the same nature** ⟨2.1⟩ n. *sādharmya* (from *sa-dharma*)
आगताः	**who have attained** ⟨1.3⟩ m. *āgata* (*ā.*√*gam[l]* – to come; + *.[k]ta*) – having come
सर्गे	**when there is creation** ⟨7.1, *sati-saptamī*⟩ m. *sarga* – creation
अपि	**also** ⟨*avyaya*⟩
न	**not** ⟨*avyaya*⟩
उपजायन्ते	**they are born** ⟨*acyuta* 1.3⟩ *upa.*√*jan[ī]* – to be born consequently
प्रलये	**when there is dissolution** ⟨7.1, *sati-saptamī*⟩ m. *pralaya* – dissolution, death
न	**not** ⟨*avyaya*⟩
व्यथन्ति	**they are perturbed** ⟨*acyuta* 1.3⟩ √*vyath[a]*...भय-चलनयोः – to fear; be perturbed
च	**and** ⟨*avyaya*⟩

Subodhinī: इदम् वक्ष्यमाणम् ज्ञानम् उपाश्रित्य, इदम् ज्ञान-साधनम् अनुष्ठाय, मम साधर्म्यम् मद्-रूपत्वम् प्राप्ताः सन्तः, सर्गे अपि ब्रह्मादिषु उत्पद्यमानेषु अपि न उत्पद्यन्ते । तथा प्रलये अपि न व्यथन्ति (प्रलय-दुःखानि न अनुभवन्ति), पुनः न आवर्तन्ते इति अर्थः ॥१४.२॥

तद् एवम् प्रशंसया श्रोतारम् अभिमुखी-कृत्य, परमेश्वर-अधीनयोः प्रकृति-पुरुषयोः सर्व-भूत-उत्पत्तिम् प्रति हेतुत्वम् नतु स्व-तन्त्रयोः इति इमम् विवक्षितम् अर्थम् कथयति – 'मम' इति –

14.3

मम योनिर्महद् ब्रह्म तस्मिन्गर्भं दधाम्यहम् ।
सम्भवः सर्वभूतानां ततो भवति भारत ॥३॥

हे भारत !	O Arjuna!
महत् ब्रह्म मम योनिः,	the *mahat brahma (pradhāna)* is My womb,
तस्मिन् अहम् गर्भम् दधामि,	in that I place the seed,
ततः सर्व-भूतानाम् सम्भवः भवति ।	and from that there is the creation of all beings

"The total material substance, called Brahman, is the source of birth, and it is that Brahman that I impregnate, making possible the births of all living beings, O son of Bharata."

मम	**my** ⟨6.1⟩ *kṛṣṇanāma asmad* – (last person) I
योनिः	**womb** ⟨1.1⟩ f. *yoni* – birth, origin
महत्	**the *mahat*** ⟨1.1⟩ n. *mahat[u]*
ब्रह्म	**brahma** ⟨1.1⟩ n. *brahman (brahma)* (from *bṛh* – to grow) – the great; spirit, soul
तस्मिन्	**in that** ⟨7.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
गर्भम्	**the seed** ⟨2.1⟩ m. *garbha* – interior, embryo, germ
दधामि	**I place** ⟨*acyuta* 3.1⟩ √*[du]dhā[ñ]*...धारण-पोषणयोः – to hold; nourish
अहम्	**I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
सम्भवः	**the creation** ⟨1.1⟩ m. *sambhava* – generation
सर्व-भूतानाम्	**of all beings** ⟨6.3⟩ m. *sarva-bhūta* – all beings
ततः	**from that** ⟨*avyaya*⟩ (*tatas*; from *tad* + *.tas[i]*) – from/after/than that
भवति	**there is** ⟨*acyuta* 1.1⟩ √*bhū*...सत्तायाम् – to be, exist, become
भारत	**O Arjuna!** ⟨8.1⟩ m. *bhārata* – 'descendant of Bharata'

Subodhinī: देशतः कालतः च अनवच्छिन्नत्वात् 'महत्', बृंहणत्वात् स्व-कार्याणाम् वृद्धि-हेतुत्वात् वा 'ब्रह्म', प्रकृतिः इति अर्थः । तद् महत् ब्रह्म मम परमेश्वरस्य योनिः (गर्भाधान-स्थानम्) । तस्मिन् अहम् गर्भम् (जगत्-विस्तार-हेतुम् चित्-आभासम्) दधामि (निक्षिपामि) । प्रलये मयि लीनम् सन्तम् अविद्या-काम-कर्म-अनुशयवन्तम् क्षेत्र-ज्ञम् सृष्टि-समये भोग्येन क्षेत्रेण संयोजयामि इति अर्थः ।

ततः गर्भाधानात् सर्व-भूतानाम् ब्रह्म-आदीनाम् सम्भवः (उत्पत्तिः) भवति ॥१४.३॥

न केवलम् सृष्टि-उपक्रमे एव मद्-अधिष्ठिताभ्याम् प्रकृति-पुरुषाभ्याम् अयम् भूत-उत्पत्ति-प्रकारः, अपितु सर्वदा एव इति आह – 'सर्व-योनिषु' इति –

14.4

सर्वयोनिषु कौन्तेय मूर्तयः सम्भवन्ति याः ।
तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥४॥

हे कौन्तेय !	O Arjuna!
सर्व-योनिषु	among all species
याः मूर्तयः सम्भवन्ति,	whatever forms take birth,
तासाम् योनिः महत् ब्रह्म,	their womb is material nature,
अहम् बीज-प्रदः पिता ।	and I am the seed-giving father

"It should be understood that all species of life, O son of Kuntī, are made possible by birth in this material nature, and that I am the seed-giving father."

सर्व-योनिषु **among all species** ⟨7.3⟩ f. *sarva-yoni* – 'all wombs', all species
कौन्तेय **O Arjuna!** ⟨8.1⟩ m. *kaunteya* – 'son of Kuntī'
मूर्तयः **forms** ⟨1.3⟩ f. *mūrti* – material form, image
सम्भवन्ति **they take birth** ⟨*acyuta* 1.3⟩ *sam.√bhū* – to take birth, be possible
याः **those which** ⟨1.3⟩ f. *kṛṣṇanāma yad* – (relative) who, which
तासाम् **of those** ⟨6.3⟩ f. *kṛṣṇanāma tad* – (first person) he, that
ब्रह्म **nature** ⟨1.1⟩ n. *brahman (brahma)* – spirit, soul
महत् **the great** ⟨1.1⟩ n. *mahat[u]* – great
योनिः **the womb** ⟨1.1⟩ f. *yoni* – birth, origin
अहम् **I am** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
बीज-प्रदः **who is giving the seed** ⟨1.1⟩ m. *bīja-prada*...बीजम् प्रददाति इति बीज-प्रदः
पिता **the father** ⟨1.1⟩ m. *pitṛ (pitā)* – father, ancestor

Subodhinī: सर्वासु योनिषु (मनुष्यादि-योनिषु) या मूर्तयः (स्थावर-जङ्गमात्मिका) उत्पद्यन्ते, तासाम् मूर्तीनाम् महत् ब्रह्म (प्रकृतिः) योनिः (मातृ-स्थानीया), अहम् च बीज-प्रदः (गर्भाधानादि-कर्ता) पिता ॥१४.४॥

तद् एवम् परमेश्वर-अधीनाभ्याम् प्रकृति-पुरुषाभ्याम् सर्व-भूत-उत्पत्तिम् निरूप्य, इदानीम् प्रकृति-संयोगेन पुरुषस्य संसारम् प्रपञ्चयति – 'सत्त्वम्' इत्यादि चतुर्भिः –

14.5

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥५॥

हे महा-बाहो !	O Arjuna!
सत्त्वम् रजः तमः	*sattva, rajaḥ* and *tamah* –
इति प्रकृति-सम्भवाः गुणाः	these qualities, born from *prakṛti*
अ-व्ययम् देहिनम् देहे निबध्नन्ति ।	bind the eternal living being in the body

"Material nature consists of three modes – goodness, passion and ignorance. When the eternal living entity comes in contact with nature, O mighty-armed Arjuna, he becomes conditioned by these modes."

सत्त्वम् *sattva* ⟨1.1⟩ n. *sattva* – goodness
रजः *rajaḥ* ⟨1.1⟩ n. *rajas (rajaḥ)* – passion
तमः *tamaḥ* ⟨1.1⟩ n. *tamas (tamaḥ)* – ignorance
इति **thus** ⟨*avyaya*⟩
गुणाः **qualities** ⟨1.3⟩ m. *guṇa* – quality
प्रकृति-सम्भवाः **born from *prakṛti*** ⟨1.3⟩ m. *prakṛti-sambhava*...प्रकृतेः सम्भवः यस्य, सः प्रकृति-सम्भवः – whose birth is from *prakṛti*
निबध्नन्ति **they bind** ⟨*acyuta* 1.3⟩ *ni.√bandh[a]* – to bind
महा-बाहो **O Arjuna!** ⟨8.1⟩ m. *mahā-bāhu* – 'who has mighty arms'
देहे **in the body** ⟨7.1⟩ m. *deha* – body
देहिनम् **the embodied soul** ⟨2.1⟩ m. *dehin (dehī)*
अ-व्ययम् **the eternal** ⟨2.1⟩ m. *a-vyaya* – unchangeable, imperishable

Subodhinī: सत्त्वम् रजः तमः इति एवम् सञ्ज्ञकाः त्रयः गुणाः प्रकृति-सम्भवाः, प्रकृतितः सम्भवः (उद्भवः) येषाम् ते तथा उक्ताः, गुण-साम्यम् प्रकृतिः, [गुणाः] तस्याः सकाशात् पृथक्त्वेन अभिव्यक्ताः सन्तः, प्रकृति-कार्ये देहे तादात्म्येन स्थितम् देहिनम् चित्-अंशम् वस्तुतः अ-व्ययम् (निर्विकारम्) एव सन् तम् निबध्नन्ति, स्व-कार्यैः सुख-दुःख-मोहादिभिः संयोजयन्ति इति अर्थः ॥१४.५॥

तत्र सत्त्वस्य लक्षणम् बन्धकत्व-प्रकारम् च आह – 'तत्र' इति –

14.6

तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥६॥

हे अनघ !	O Arjuna!

तत्र निर्मलत्वात्	among them, because of being spotless
प्रकाशकम् अनामयम् सत्त्वम्	the illuminating and faultless *sattva-guṇa*
सुख-सङ्गेन ज्ञान-सङ्गेन च	by association with happiness and knowledge
बध्नाति ।	it binds

"O sinless one, the mode of goodness, being purer than the others, is illuminating, and it frees one from all sinful reactions. Those situated in that mode become conditioned by a sense of happiness and knowledge."

तत्र **there** ⟨*avyaya*⟩

सत्त्वम् ***sattva-guṇa*** ⟨1.1⟩ n. *sattva*

निर्मलत्वात् **because of being spotless** ⟨5.1⟩ n. *nirmalatva* (*.tva*) – being without impurity, being pure

प्रकाशकम् **illuminating** ⟨1.1⟩ n. *prakāśaka* – shining

अनामयम् **faultless** ⟨1.1⟩ n. *an-āmaya* – free from evil, faultless, healthy

सुख-सङ्गेन **by association with happiness** ⟨3.1⟩ m. *sukha-saṅga*...सुखेन सङ्गः इति सुख-सङ्गः – association with happiness

बध्नाति **it binds** ⟨*acyuta* 1.1⟩ √*bandh[a]*...बन्धने – to bind

ज्ञान-सङ्गेन **by association with knowledge** ⟨3.1⟩ m. *jñāna-saṅga*...ज्ञानेन सङ्गः इति ज्ञान-सङ्गः – association with knowledge

च **and** ⟨*avyaya*⟩

अनघ **O Arjuna!** ⟨8.1⟩ m. *an-agha* – 'who is sinless'

Subodhinī: तत्र (तेषाम् गुणानाम् मध्ये) सत्त्वम् निर्मलत्वात् (स्वच्छत्वात्) स्फटिक-मणिः इव प्रकाशकम् (भास्वरम्) अनामयम् च (निरुपद्रवम्), शान्तम् इति अर्थः। अतः शान्तत्वात् स्व-कार्येण सुखेन यः सङ्गः तेन बध्नाति। प्रकाशकत्वात् च स्व-कार्येण ज्ञानेन यः सङ्गः तेन च बध्नाति, हे अनघ (निष्पाप)। 'अहम् सुखी ज्ञानी च' इति मनोधर्मान् तद्-अभिमानिनि क्षेत्र-ज्ञे संयोजयति इति अर्थः ॥१४.६॥

रजसः लक्षणम् बन्धकत्वम् च आह – 'रजः' इति –

14.7

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥७॥

हे कौन्तेय !	O Arjuna!
रजः रागात्मकम् विद्धि !	know *rajo-guṇa* as passionate!
तृष्णा-सङ्ग-समुद्भवम्	being the source of hankering and attachment

तद् देहिनम् कर्म-सङ्गेन निबध्नाति ।	it binds the soul by association with fruitive work

"The mode of passion is born of unlimited desires and longings, O son of Kuntī, and because of this the embodied living entity is bound to material fruitive actions."

रजः ***rajo-guṇa*** ⟨2.1⟩ n. *rajas* (*rajaḥ*)

रागात्मकम् **of the nature of passion** ⟨2.1⟩ n. *rāga-_ātmaka*

विद्धि **you must know** ⟨*vidhātā* 2.1⟩ √*vid[a]* 2P...ज्ञाने – to know

तृष्णा-सङ्ग-समुद्भवम् **the source of hankering and attachment** ⟨2.1⟩ n. *tṛṣṇā-saṅga-samudbhava*...तृष्णा-सङ्गयोः समुद्भवः यस्मात्, सः तृष्णा-सङ्ग-समुद्भवः – from which there is generation of hankering and attachment
तृष्णा – thirst, desire, hankering
समुद्भव – existence, production, origin

तद् **that** ⟨1.1⟩ n. *kṛṣnanāma tad* – (first person) he, that

निबध्नाति **it binds** ⟨*acyuta* 1.1⟩ *ni.*√*bandh[a]* – to bind

कौन्तेय **O Arjuna!** ⟨8.1⟩ m. *kaunteya* – 'son of Kuntī'

कर्म-सङ्गेन **by association with fruitive work** ⟨3.1⟩ m. *karma-saṅga* – association with *karma*

देहिनम् **the embodied soul** ⟨2.1⟩ m. *dehin* (*dehī*)

Subodhinī: 'रजः'-संज्ञकम् गुणम् रागात्मकम् (अनुरञ्जन-रूपम्) विद्धि, अतएव तृष्णा-सङ्ग-समुद्भवम्। तृष्णा अ-प्राप्ते अर्थे अभिलाषः, सङ्गः प्राप्ते अर्थे प्रीतिः (विशेषेण आसक्तिः), तयोः तृष्णा-सङ्गयोः समुद्भवः यस्मात्, तद् रजः देहिनम् दृष्ट-अदृष्टार्थेषु कर्मसु सङ्गेन (आसक्त्या) नितराम् बध्नाति। तृष्णा-सङ्गाभ्याम् हि कर्मसु आसक्तिः भवति ॥१४.७॥

तमसः लक्षणम् बन्धकत्वम् च आह – 'तमः' इति –

Note: The meaning of *samudbhava* at the end of a compound is either 'being the source of' or 'produced from'. Therefore, the translation of *rajo-guṇa* being 'produced from *tṛṣṇā-saṅga*' is also possible, and both ways are actually observed.

14.8

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥८॥

हे भारत !	O Arjuna!
तमः तु अज्ञान-जम् विद्धि !	but *tamo-guṇa* know as born from ignorance!
सर्व-देहिनाम् मोहनम्	being the delusion of all embodied beings
तद् प्रमादालस्य-निद्राभिः निबध्नाति ।	it binds by madness, laziness and sleep

"O son of Bharata, know that the mode of darkness, born of ignorance, is the delusion of all embodied living entities. The results of this mode are madness, indolence and sleep, which bind the conditioned soul."

तमः	***tamo-guṇa*** ⟨2.1⟩ n. tamas (tamaḥ)
तु	**but** ⟨*avyaya*⟩
अज्ञान-जम्	**which is born from ignorance** ⟨2.1⟩ n. *ajñāna-ja*...यद् अ-ज्ञानात् जायते, तद् अज्ञान-जम्
विद्धि	**you must know** ⟨*vidhātā* 2.1⟩ √*vid[a]* 2P...ज्ञाने – to know
मोहनम्	**bewildering** ⟨2.1⟩ n. *mohana*
सर्व-देहिनाम्	**of all embodied beings** ⟨6.3⟩ m. *sarva-dehin* (*-dehī*) – all embodied beings
प्रमादालस्य-निद्राभिः	**by madness, laziness and sleep** ⟨3.3⟩ f. *pramāda-_ālasya-nidrā*...प्रमादः च आलस्यः च निद्रा च इति प्रमादालस्य-निद्रा – madness, laziness and sleep
तद्	**that** ⟨1.1⟩ n. *kṛṣnanāma tad* – (first person) he, that
निबध्नाति	**it binds** ⟨*acyuta* 1.1⟩ *ni.*√*bandh[a]* – to bind
भारत	**O Arjuna!** ⟨8.1⟩ m. *bhārata* – 'descendant of Bharata'

Subodhinī: तमः तु अ-ज्ञानात् जातम् आवरण-शक्ति-प्रधानात् प्रकृति-अंशात् उद्भूतम् विद्धि इति अर्थः । अतः सर्वेषाम् देहिनाम् मोहनम् भ्रान्ति-जनकम्, अतएव प्रमादेन-आलस्येन निद्रया च तद् तमः देहिनम् निबध्नाति । तत्र प्रमादः अनवधानम्, आलस्यम् अनुद्यमः, निद्रा चित्तस्य अवसादः (लयः) ॥१४.८॥

सत्त्वादीनाम् एवम् स्व-कार्य-करणे सामर्थ्य-अतिशयम् आह – 'सत्त्वम्' इति –

14.9

सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत ।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥९॥

हे भारत !	O Arjuna!
सत्त्वम् सुखे सञ्जयति,	*sattva-guṇa* binds to happiness,
रजः कर्मणि,	*rajo-guṇa* towards work,
तमः तु ज्ञानम् आवृत्य	but *tamo-guṇa*, [after] covering knowledge
प्रमादे उत सञ्जयति	binds to madness [etc.]

"O son of Bharata, the mode of goodness conditions one to happiness; passion conditions one to fruitive action; and ignorance, covering one's knowledge, binds one to madness."

सत्त्वम्	***sattva-guṇa*** ⟨1.1⟩ n. *sattva*
सुखे	**to happiness** ⟨7.1⟩ n. *sukha* – easiness, happiness
सञ्जयति	**it causes attachment** ⟨*acyuta* caus. 1.1⟩ √*sañj[a]*...सङ्गे – to embrace, stick
रजः	***rajo-guṇa*** ⟨1.1⟩ n. *rajas* (*rajaḥ*)

कर्मणि	**to work** ⟨7.1⟩ n. *karman* (*karma*) – activity
भारत	**O Arjuna!** ⟨8.1⟩ m. *bhārata* – 'descendant of Bharata'
ज्ञानम्	**knowledge** ⟨2.1⟩ n. *jñāna*
आवृत्य	**[after] covering** ⟨*avyaya*⟩ *ā.*√*vṛ[ñ]* 5U – to cover; + *.ya[p]*
तु	**but** ⟨*avyaya*⟩
तमः	***tamo-guṇa*** ⟨1.1⟩ n. *tamas* (*tamaḥ*)
प्रमादे	**to madness** ⟨7.1⟩ m. *pramāda* – madness
सञ्जयति	**it causes attachment** ⟨*acyuta* caus. 1.1⟩ √*sañj[a]*...सङ्गे – to embrace, stick
उत	**also** ⟨*avyaya*⟩ – and, even (used for the sake of emphasis)

Subodhinī: सत्त्वम् सुखे सञ्जयति (संश्लेषयति), दुःख-शोकादि-कारणे सति अपि सुख-अभिमुखम् एव देहिनम् करोति इति अर्थः । एवम् सुखादि-कारणे सति अपि रजः कर्मणि एव सञ्जयति । तमः तु महत्-सङ्गेन उत्पद्यमानम् अपि ज्ञानम् आवृत्य (आच्छाद्य), प्रमादे सञ्जयति, महद्भिः उपदिश्यमानस्य अर्थस्य अनवधाने योजयति । 'उत' अपि, आलस्यादौ अपि संयोजयति इति अर्थः ॥१४.९॥

तत्र हेतुम् आह – 'रजः' इति –

14.10

रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥१०॥

हे भारत !	O Arjuna!
रजः तमः च अभिभूय	[after] overcoming *rajaḥ* and *tamaḥ*
सत्त्वम् भवति,	*sattva-guṇa* develops,
रजः सत्त्वम् तमः च एव,	and *rajo-guṇa* [overcoming] *sattva-* and *tamaḥ*,
तथा तमः सत्त्वम् रजः ।	and *tamo-guṇa* [overcoming] *sattva* and *rajaḥ*

"Sometimes the mode of goodness becomes prominent, defeating the modes of passion and ignorance, O son of Bharata. Sometimes the mode of passion defeats goodness and ignorance, and at other times ignorance defeats goodness and passion. In this way there is always competition for supremacy."

रजः	***rajo-guṇa*** ⟨2.1⟩ n. rajas (rajaḥ)
तमः	***tamo-guṇa*** ⟨2.1⟩ n. tamas (tamaḥ)
च	**and** ⟨*avyaya*⟩
अभिभूय	**[after] overcoming** ⟨*avyaya*⟩ (*abhi.*√*bhū* – to overcome; + *ya*)
सत्त्वम्	***sattva-guṇa*** ⟨1.1⟩ n. *sattva*
भवति	**it becomes** ⟨*acyuta* 1.1⟩ √*bhū*...सत्तायाम् – to be, exist, become

भारत **O Arjuna!** ⟨8.1⟩ m. *bhārata* – 'descendant of Bharata'
रजः *rajo-guṇa* ⟨1.1⟩ n. rajas (rajaḥ)
सत्त्वम् *sattva-guṇa* ⟨2.1⟩ n. *sattva*
तमः *tamo-guṇa* ⟨2.1⟩ n. tamas (tamaḥ)
च एव **and certainly** ⟨*avyaya*⟩
तमः *tamo-guṇa* ⟨1.1⟩ n. tamas (tamaḥ)
सत्त्वम् *sattva-guṇa* ⟨2.1⟩ n. *sattva*
रजः *rajo-guṇa* ⟨2.1⟩ n. rajas (rajaḥ)
तथा **so** ⟨*avyaya*⟩

Subodhinī: रजः तमः च इति गुण-द्वयम् अभिभूय (तिरस्कृत्य), सत्त्वम् भवति (अदृष्ट-वशात् उद्भवति)। ततः स्व-कार्ये सुखे ज्ञानादौ संयोजयति इति अर्थः। एवम् रजः अपि सत्त्वम् तमः च इति गुण-द्वयम् अभिभूय उद्भवति। ततः स्व-कार्ये तृष्णा-कर्मादौ संयोजयति। एवम् तमः अपि सत्त्वम् रजः च अभिभूय उद्भवति। ततः च स्व-कार्ये प्रमाद-आलस्यादौ संयोजयति इति अर्थः ॥१४.१०॥
इदानीम् सत्त्वादीनाम् वृद्धानाम् लिङ्गानि आह – 'सर्व-द्वारेषु' इति त्रिभिः –

14.11

सर्वद्वारेषु देहेऽस्मिन्प्रकाश उपजायते ।
ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत ॥११॥

यदा अस्मिन् देहे सर्व-द्वारेषु	when in this body in all gates
प्रकाशः ज्ञानम् उपजायते,	illumination, knowledge, develops,
तदा सत्त्वम् विवृद्धम्	then *sattva-guna* is prominent
इति उत विद्यात् ।	one should also understand

"The manifestations of the mode of goodness can be experienced when all the gates of the body are illuminated by knowledge."

सर्व-द्वारेषु **in all gates** ⟨7.3⟩ n. *sarva-dvāra* – all gates
देहे **in the body** ⟨7.1⟩ m. *deha* – body
अस्मिन् **in this** ⟨7.1⟩ m. *kṛṣnanāma idam* – (first person) he, this
प्रकाशः **light** ⟨1.1⟩ m. *prakāśa* – bright, clear
उपजायते **it is generated** ⟨*acyuta* 1.1⟩ *upa.√jan[ī]* – to be born consequently
ज्ञानम् **knowledge** ⟨1.1⟩ n. *jñāna*
यदा **when** ⟨*avyaya*⟩
तदा **then** ⟨*avyaya*⟩
विद्यात् **one should know** ⟨*vidhi* 1.1⟩ √*vid[a]* 2P...ज्ञाने – to know
विवृद्धम् **grown** ⟨1.1⟩ n. *vivṛddha* (*vi.√vṛdh[u]* – to grow; + *.[k]ta*)

सत्त्वम् *sattva-guṇa* ⟨1.1⟩ n. *sattva*
इति **thus** ⟨*avyaya*⟩
उत **also** ⟨*avyaya*⟩ – and, even (used for the sake of emphasis)

Subodhinī: अस्मिन् आत्मनः भोगायतने देहे सर्वेषु अपि द्वारेषु श्रोत्रादिषु यदा शब्दादि-ज्ञानात्मकः प्रकाशः उपजायते (उत्पद्यते), तदा अनेन प्रकाश-लिङ्गेन सत्त्वम् विवृद्धम् विद्यात् (जानीयात्)। 'उत'-शब्दात् सुखादि-लिङ्गेन अपि जानीयात् इति उक्तम् ॥१४.११॥

Note: Rāmānuja reads प्रकाश उपजायते as *prakāśe_ upajāyate* (different *sandhi*) – 'when there is illumination, [*jñāna*] develops'.

14.12

लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा ।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ॥१२॥

हे भरतर्षभ !	O Arjuna!
लोभः, प्रवृत्तिः, कर्मणाम् आरम्भः	greed, activity, undertaking of works
अ-शमः, स्पृहा	restlessness and hankering –
एतानि रजसि विवृद्धे जायन्ते ।	these develop when *rajo-guṇa* is prominent

"O chief of the Bhāratas, when there is an increase in the mode of passion the symptoms of great attachment, fruitive activity, intense endeavor, and uncontrollable desire and hankering develop."

लोभः **greed** ⟨1.1⟩ m. *lobha*
प्रवृत्तिः **activity** ⟨1.1⟩ f. *pravṛtti* – activity, tendency
आरम्भः **beginning** ⟨1.1⟩ m. *ārambha*
कर्मणाम् **of activities** ⟨6.3⟩ n. *karman* (*karma*) – activity
अ-शमः **restlessness** ⟨1.1⟩ m. *a-śama*
स्पृहा **hankering** ⟨1.1⟩ f. *spṛhā*
रजसि **when *rajo-guṇa*** ⟨7.1, *sati-saptamī*⟩ n. rajas (rajaḥ)
एतानि **these** ⟨1.3⟩ n. *kṛṣnanāma etad* – (first person) he, this
जायन्ते **they are generated** ⟨*acyuta* 1.3⟩ √*jan[ī]*...प्रादुर्भावे – to be born
विवृद्धे **when grown** ⟨7.1, *sati-saptamī*⟩ n. *vivṛddha* – grown
भरतर्षभ **O Arjuna!** ⟨8.1⟩ m. *bharata-_ṛṣabha* – 'best of the descendants of Bharata'

Subodhinī: लोभः धनादि-आगमे बहुधा जायमाने अपि पुनः पुनः वर्धमानः अभिलाषः। प्रवृत्तिः नित्यम् कुर्वत्-रूपता। कर्मणाम् आरम्भः गृहादि-निर्माण-उद्यमः। अ-शमः 'इदम् कृत्वा इदम् करिष्यामि' इत्यादि-सङ्कल्प-विकल्पान् उपरमः। स्पृहा

उच्च-अवचेषु दृष्टमात्रेषु वस्तुषु इतः ततः जिघृक्षा । रजसि विवृद्धे सति, एतानि लिङ्गानि जायन्ते, एतैः लिङ्गैः रजोगुणस्य वृद्धिम् विद्यात् इति अर्थः ॥१४.१२॥

14.13

अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥१३॥

हे कुरु-नन्दन !	O Arjuna!
अ-प्रकाशः अ-प्रवृत्तिः च	dullness and inactivity
प्रमादः मोहः एव च,	madness and delusion –
एतानि तमसि विवृद्धे जायन्ते ।	these develop when *tama-guṇa* is prominent

"When there is an increase in the mode of ignorance, O son of Kuru, darkness, inertia, madness and illusion are manifested."

अ-प्रकाशः **darkness** ⟨1.1⟩ m. *a-prakāśa* – no light
अ-प्रवृत्तिः **inactivity** ⟨1.1⟩ f. *a-pravṛtti*
च **and** ⟨*avyaya*⟩
प्रमादः **madness** ⟨1.1⟩ m. *pramāda*
मोहः **delusion** ⟨1.1⟩ m. *moha*
एव **certainly** ⟨*avyaya*⟩
च **and** ⟨*avyaya*⟩
तमसि **when *tamo-guṇa*** ⟨7.1, *sati-saptamī*⟩ n. *tamas (tamaḥ)*
एतानि **these** ⟨1.3⟩ n. *kṛṣṇanāma etad* – (first person) he, this
जायन्ते **they are generated** ⟨*acyuta* 1.3⟩ √*jan[ī]*...प्रादुर्भावे – to be born
विवृद्धे **when grown** ⟨7.1, *sati-saptamī*⟩ n. *vivṛddha* – grown
कुरु-नन्दन **O Arjuna!** ⟨8.1⟩ m. *kuru-nandana* – 'delight of the Kurus'

Subodhinī: अ-प्रकाशः विवेक-भ्रंशः, अ-प्रवृत्तिः अनुद्यमः, प्रमादः कर्तव्यार्थ-अनुसन्धान-राहित्यम्, मोहः मिथ्या-अभिनिवेशः । तमसि प्रवृद्धे, एतानि लिङ्गानि जायन्ते । एतैः तमसः वृद्धिम् जानीयात् इति अर्थः ॥१४.१३॥
मरण-समये एव वृद्धानाम् सत्त्वादीनाम् फल-विशेषम् आह – 'यदा' इति द्वाभ्याम् –

14.14

यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् ।
तदोत्तमविदां लोकानमलान्प्रतिपद्यते ॥१४॥

सत्त्वे प्रवृद्धे तु	but if *sattva-guṇa* is prominent
यदा देह-भृत्	when the embodied being
प्रलयम् याति,	meets death,
तदा उत्तम-विदाम् अ-मलान् लोकान्	then the pure worlds of the great sages
प्रतिपद्यते ।	he attains

"When one dies in the mode of goodness, he attains to the pure higher planets of the great sages."

यदा **when** ⟨*avyaya*⟩
सत्त्वे **when *sattva-guṇa*** ⟨7.1, *sati-saptamī*⟩ n. *sattva*
प्रवृद्धे **is grown** ⟨7.1, *sati-saptamī*⟩ n. *pravṛddha*
तु **but** ⟨*avyaya*⟩
प्रलयम् **dissolution** ⟨2.1⟩ m. *pralaya*
याति **he attains** ⟨*acyuta* 1.1⟩ √*yā*...प्राप्तौ – to attain, go
देह-भृत् **an embodied being** ⟨1.1⟩ m. *deha-bhṛt*...यः देहम् बिभर्ति, सः देह-भृत् – who holds a body
तदा **then** ⟨*avyaya*⟩
उत्तम-विदाम् **of those who know the supreme** ⟨6.3⟩ m. *uttama-vid*...यः उत्तमम् वेत्ति, सः उत्तम-विद् – who knows the supreme
लोकान् **the worlds** ⟨2.3⟩ m. *loka* – place, world, people
अ-मलान् **the pure** ⟨2.3⟩ m. *a-mala* – pure, effulgent: i.e. pleasurable
प्रतिपद्यते **he attains** ⟨*acyuta* 1.1⟩ *prati.*√*pad[a]* – to attain

Subodhinī: सत्त्वे प्रवृद्धे सति यदा जीवः मृत्युम् प्राप्नोति, तदा उत्तमान् (हिरण्यगर्भादीन्) विदन्ति (उपासते) इति उत्तम-विदः, तेषाम् ये अ-मलाः प्रकाशमयाः लोकाः सुख-उपभोग-स्थान-विशेषाः तान् प्रतिपद्यते (प्राप्नोति) ॥१४.१४॥

14.15

रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते ।
तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥१५॥

रजसि प्रलयम् गत्वा	[after] meeting death in *rajo-guṇa*
कर्म-सङ्गिषु जायते,	one is born among those attached to work,
तथा तमसि प्रलीनः	and one who has died in *tamo-guṇa*
मूढ-योनिषु जायते ।	one is born among foolish species

"When one dies in the mode of passion, he takes birth among those engaged in fruitive activities; and when one dies in the mode of ignorance, he takes birth in the animal kingdom."

रजसि **in *rajo-guṇa*** ⟨7.1⟩ n. *rajas (rajaḥ)*
प्रलयम् **dissolution** ⟨2.1⟩ m. *pralaya* – dissolution, death
गत्वा **[after] going** ⟨*avyaya*⟩ √*gam[l̥]*...गतौ – to go; + *.[k]tvā*
कर्म-सङ्गिषु **among those attached to work** ⟨7.3⟩ m. *karma-saṅgin (-saṅgī)*...कर्मणि सङ्गः यस्य, सः कर्म-सङ्गी – whose attachment is to work
जायते **he is born** ⟨*acyuta* 1.1⟩ √*jan[ī]*...प्रादुर्भावे – to be born
तथा **so** ⟨*avyaya*⟩
प्रलीनः **who has died** ⟨1.1⟩ m. *pralīna (pra.*√*lī[ṅ]* – to dissolve; + *.[k]ta)* – dissolved
तमसि **in *tamo-guṇa*** ⟨7.1⟩ n. *tamas (tamaḥ)*
मूढ-योनिषु **among foolish species** ⟨7.3⟩ f. *mūḍha-yoni*...मूढानाम् योनिः इति मूढ-योनिः – a species of fools (animals)
जायते **he is born** ⟨*acyuta* 1.1⟩ √*jan[ī]*...प्रादुर्भावे – to be born

Subodhinī: रजसि प्रवृद्धे सति मृत्युम् प्राप्य, कर्म-आसक्तेषु मनुष्येषु जायते । तथा तमसि प्रवृद्धे सति प्रलीनः (मृतः), मूढ-योनिषु पशु-आदिषु जायते ॥१४.१५॥
इदानीम् सत्त्वादीनाम् स्व-अनुरूप-कर्म-द्वारेण विचित्र-फल-हेतुत्वम् आह – 'कर्मणः' इति –

14.16

कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम् ।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥१६॥

सुकृतस्य कर्मणः फलम्	the result of pious work
सात्त्विकम् निर्मलम् आहुः	they (the wise) call to be in *sattva-guṇa* and pure,
रजसः तु फलम् दुःखम्,	but the result of [work in] *rajo-guṇa* is misery,
तमसः फलम् अ-ज्ञानम् ।	and that of *tamo-guṇa* is ignorance

"The result of pious action is pure and is said to be in the mode of goodness. But action done in the mode of passion results in misery, and action performed in the mode of ignorance results in foolishness."

कर्मणः **of work** ⟨6.1⟩ n. *karman (karma)* – activity
सुकृतस्य **of pious** ⟨6.1⟩ n. *sukṛta (su.*√*[ḍu]kṛ[ñ]* – to do good; + *.[k]ta)* – 'well done', virtue
आहुः **they spoke** ⟨*acyuta* opt. for *bruvanti* with a past sense 1.3⟩ √*brū[ñ]*...व्यक्तायां वाचि – to speak
सात्त्विकम् **in *sattva-guṇa*** ⟨1.1⟩ n. *sāttvika*
निर्मलम् **pure** ⟨1.1⟩ n. *nirmala* – spotless

फलम् **the fruit** ⟨1.1⟩ n. *phala*
रजसः **of *rajo-guṇa*** ⟨6.1⟩ n. *rajas (rajaḥ)*
तु **but** ⟨*avyaya*⟩
फलम् **the fruit** ⟨1.1⟩ n. *phala*
दुःखम् **misery** ⟨1.1⟩ n. *duḥkha*
अ-ज्ञानम् **ignorance** ⟨1.1⟩ n. *a-jñāna*
तमसः **of *tamo-guṇa*** ⟨6.1⟩ n. *tamas (tamaḥ)*
फलम् **the fruit** ⟨1.1⟩ n. *phala*

Subodhinī: सुकृतस्य सात्त्विक-कर्मणः सात्त्विकम् (सत्त्व-प्रधानम्) निर्मलम् (प्रकाश-बहुलम्) सुखम् फलम् आहुः कपिलादयः । 'रजसः' इति राजसस्य कर्मणः इति अर्थः, कर्म-फल-कथनस्य प्रकृतत्वात्, तस्य दुःखम् फलम् आहुः । 'तमसः' इति तामसस्य कर्मणः इति अर्थः । तस्य अ-ज्ञानम् (मूढत्वम्) फलम् आहुः, सात्त्विकादि-कर्म-लक्षणम् च 'नियतम् सङ्ग-रहितम्' (18.23) इत्यादिना अष्टादशे वक्ष्यति ॥१४.१६॥
तत्र एव हेतुम् आह – 'सत्त्वात्' इति –

14.17

सत्त्वात्सञ्जायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥१७॥

सत्त्वात् ज्ञानम् सञ्जायते,	from *sattva-guṇa* knowledge develops,
रजसः लोभः एव च,	and from *rajo-guṇa* greed,
तमसः प्रमाद-मोहौ भवतः	from *tamo-guṇa* come madness and illusion
अ-ज्ञानम् एव च ।	and also ignorance

"From the mode of goodness, real knowledge develops; from the mode of passion, greed develops; and from the mode of ignorance develop foolishness, madness and illusion."

सत्त्वात् **from *sattva-guṇa*** ⟨5.1⟩ n. *sattva*
सञ्जायते **it is generated** ⟨*acyuta* 1.1⟩ *sam.*√*jan[ī]* – to be born together
ज्ञानम् **knowledge** ⟨1.1⟩ n. *jñāna*
रजसः **from *rajo-guṇa*** ⟨5.1⟩ n. *rajas (rajaḥ)*
लोभः **greed** ⟨1.1⟩ m. *lobha*
एव **certainly** ⟨*avyaya*⟩
च **and** ⟨*avyaya*⟩
प्रमाद-मोहौ **madness and illusion** ⟨1.2⟩ m. *pramāda-moha*...प्रमादः च मोहः च इति प्रमाद-मोहौ
तमसः **from *tamo-guṇa*** ⟨5.1⟩ n. *tamas (tamaḥ)*

भवतः **they [two] become** ⟨*acyuta* 1.2⟩ √*bhū*...सत्तायाम् – to be, exist, become

अ-ज्ञानम् **ignorance** ⟨1.1⟩ n. *a-jñāna*

एव **certainly** ⟨*avyaya*⟩

च **and** ⟨*avyaya*⟩

Subodhinī: सत्त्वात् ज्ञानम् सञ्जायते । अतः सात्त्विकस्य कर्मणः प्रकाश-बहुलम् सुखम् फलम् भवति । रजसः लोभः जायते । तस्य च दुःख-हेतुत्वात् तद्-पूर्वकस्य कर्मणः दुःखम् फलम् भवति । तमसः तु प्रमाद-मोह-अज्ञानानि भवन्ति । ततः तामसस्य कर्मणः अज्ञान-प्रापकम् फलम् भवति इति युक्तम् एव इति अर्थः ॥१४.१७॥

इदानीम् सत्त्वादि-वृत्ति-शीलानाम् फल-भेदम् आह – 'ऊर्ध्वम्' इति –

14.18

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥१८॥

सत्त्व-स्थाः ऊर्ध्वम् गच्छन्ति,	those situated in *sattva-guṇa* go upward,
राजसाः मध्ये तिष्ठन्ति,	those in *rajo-guṇa* stay in the middle,
जघन्य-गुण-वृत्ति-स्थाः तामसाः	those in the lowest quality, the *tamo-guṇa*
अधः गच्छन्ति ।	go down

"Those situated in the mode of goodness gradually go upward to the higher planets; those in the mode of passion live on the earthly planets; and those in the abominable mode of ignorance go down to the hellish worlds."

ऊर्ध्वम् **upward** ⟨*avyaya*⟩

गच्छन्ति **they go** ⟨*acyuta* 1.3⟩ √*gam[ḷ]*...गतौ – to go

सत्त्व-स्थाः **those situated in *sattva-guṇa*** ⟨1.3⟩ m. *sattva-stha*...यः सत्त्वे तिष्ठति, सः सत्त्व-स्थः – who stays in *sattva-guṇa*

मध्ये **in the middle** ⟨7.1⟩ m. *madhya* – middle

तिष्ठन्ति **they stay** ⟨*acyuta* 1.3⟩ √*sthā*...स्थाने – to stand

राजसाः **those in *rajo-guṇa*** ⟨1.3⟩ m. *rājasa* – pertaining to *rajah*

जघन्य-गुण-वृत्ति-स्थाः **those situated in the lowest quality** ⟨1.3⟩ m. *jaghanya-guṇa-vṛtti-stha*...यः जघन्यस्य गुणस्य वृत्तौ तिष्ठति, सः जघन्य-गुण-वृत्ति-स्थः – who stays in the condition of the lowest quality

जघन्य – lowest, worst, abominable

अधः **downward** ⟨*avyaya*⟩ (*adhas*)

गच्छन्ति **they go** ⟨*acyuta* 1.3⟩ √*gam[ḷ]*...गतौ – to go

तामसाः **those in *tamo-guṇa*** ⟨1.3⟩ n. *tāmasa* – pertaining to *tamaḥ*

Subodhinī: सत्त्व-स्थाः (सत्त्व-वृत्ति-प्रधानाः) ऊर्ध्वम् गच्छन्ति । सत्त्व-उत्कर्ष-तारतम्यात् उत्तरोत्तर-शत-गुण-आनन्दान् मनुष्य-गन्धर्व-पितृ-देवादि-लोकान् सत्यलोक-पर्यन्तान् प्राप्नुवन्ति इति अर्थः । राजसाः तु तृष्णादि-आकुलाः मध्ये तिष्ठन्ति, मनुष्य-लोके एव उत्पद्यन्ते । जघन्यः (अतिनिकृष्टः) तमोगुणः तस्य वृत्तिः प्रमाद-मोहादिः तत्र स्थिताः अधः गच्छन्ति, तमोवृत्ति-तारतम्यात् 'तमिस्र'-आदिषु निरयेषु उत्पद्यन्ते ॥१४.१८॥

तद् एवम् प्रकृति-गुण-सङ्ग-कृतम् संसारम् स-प्रपञ्चम् उक्त्वा, इदानीम् तद्-विवेकतः मोक्षम् दर्शयति – 'न अन्यम्' इति –

14.19

नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति ।
गुणेभ्यश्च परं वेत्ति मद्भावं सो ऽधिगच्छति ॥१९॥

यदा द्रष्टा	when the seer
गुणेभ्यः अन्यम् कर्तारम्	another doer besides the *guṇas*
न अनुपश्यति,	he does not see,
गुणेभ्यः च परम् वेत्ति,	and knows the one beyond the *guṇas*,
सः मद्भावम् अधिगच्छति ।	he attains My nature

"When one properly sees that in all activities no other performer is at work than these modes of nature and he knows the Supreme Lord, who is transcendental to all these modes, he attains My spiritual nature."

न **not** ⟨*avyaya*⟩

अन्यम् **another** ⟨2.1⟩ m. *kṛṣṇanāma anya* – other

गुणेभ्यः **than the *guṇas*** ⟨5.3⟩ m. *guṇa* – quality

कर्तारम् **a doer** ⟨2.1⟩ m. *kartṛ* (*kartā*, .*tṛ[n]*)

यदा **when** ⟨*avyaya*⟩

द्रष्टा **the seer** ⟨1.1⟩ m. *draṣṭṛ* (*draṣṭā*, .*tṛ[n]*)

अनुपश्यति **he sees** ⟨*acyuta* 1.1⟩ *anu*.√*dṛś[ir]* – to look at, consider

गुणेभ्यः **than the *guṇas*** ⟨5.3⟩ m. *guṇa* – quality

च **and** ⟨*avyaya*⟩

परम् **who is beyond** ⟨2.1⟩ m. *para* – beyond

वेत्ति **he knows** ⟨*acyuta* 1.1⟩ √*vid[a]* 2P...ज्ञाने – to know

मद्भावम् **my nature** ⟨2.1⟩ m. *mad-bhāva*

सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

अधिगच्छति **he attains** ⟨*acyuta* 1.1⟩ *adhi*.√*gam[ḷ]* – to go over, attain

Subodhinī: यदा तु द्रष्टा, विवेकी भूत्वा, बुद्धि-आदि-आकार-परिणतेभ्यः गुणेभ्यः अन्यम् कर्तारम् न अनुपश्यति, अपितु गुणाः एव कर्माणि कुर्वन्ति इति पश्यति, गुणेभ्यः च परम् (व्यतिरिक्तम्) तद्-साक्षिणम् आत्मानम् वेत्ति, सः तु मद्-भावम् (ब्रह्मत्वम्) अधिगच्छति (प्राप्नोति) ॥१४.१९॥

ततः च गुण-कृत-सर्व-अनर्थ-निवृत्त्या कृतार्थः भवति इति आह – 'गुणान्' इति –

14.20

गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् ।
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥२०॥

देह-समुद्भवान् एतान् त्रीन् गुणान्	these three *guṇas*, which cause the body
अतीत्य	[after] transcending
देही	the embodied soul
जन्म-मृत्यु-जरा-दुःखैः विमुक्तः	free from the miseries of birth, death and old age
अ-मृतम् अश्नुते ।	attains immortality

"When the embodied being is able to transcend these three modes associated with the material body, he can become free from birth, death, old age and their distresses and can enjoy nectar even in this life."

गुणान् **the *guṇas*** ⟨2.3⟩ m. *guṇa* – quality
एतान् **these** ⟨2.3⟩ m. *kṛṣṇanāma etad* – (first person) he, this
अतीत्य **[after] surpassing** ⟨*avyaya*⟩ *ati.√i[ṇ]* – to pass; + *.ya[p]*
त्रीन् **the three** ⟨2.3⟩ m. *tri*
देही **the embodied soul** ⟨1.1⟩ m. *dehin* (*dehī*)
देह-समुद्भवान् **which cause the body** ⟨2.3⟩ m. *deha-samudbhava*...देहस्य समुद्भवः यस्मात्, सः देह-समुद्भवः – from which there is the generation of the body
जन्म-मृत्यु-जरा-दुःखैः **from the miseries of birth, death and old age** ⟨3.3⟩ n. *janma-mṛtyu-jarā-duḥkha*...जन्म-मृत्यु-जराणाम् दुःखम् इति जन्म-मृत्यु-जरा-दुःखम् – the misery of birth, death and old age
विमुक्तः **liberated** ⟨1.1⟩ m. *vimukta* (*vi.√muc[l]* – to release; + *.[k]ta*)
अ-मृतम् **immortality** ⟨2.1⟩ n. *a-mṛta* – immortality, nectar
अश्नुते **he obtains** ⟨*acyuta* 1.1⟩ *√aś[ūṅ]*...व्याप्तौ – to pervade, obtain

Subodhinī: देहादि-आकार-समुद्भवः परिणामः येषाम् ते देहसमुद्भवाः, एतान् त्रीन् अपि गुणान् अतीत्य (अतिक्रम्य), तद्-कृतैः जन्मादिभिः विमुक्तः सन्, अमृतम् अश्नुते, ब्रह्म-आनन्दम् प्राप्नोति ॥१४.२०॥

गुणान् एतान् अतीत्य अमृतम् अश्नुते' इति एतद् श्रुत्वा, गुण-अतीतस्य लक्षणम् आचारम् गुण-अत्यय-उपायम् च सम्यक् बुभुत्सुः [अर्जुनः उवाच] – 'कैः लिङ्गैः' इति –

14.21

अर्जुन उवाच
कैर्लिङ्गैस्त्रीन्गुणानेतानतीतो भवति प्रभो ।
किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्तते ॥२१॥

अर्जुनः उवाच – हे प्रभो !	Arjuna said: O Kṛṣṇa!
एतान् त्रीन् गुणान् अतीतः	one who has transcended these three *guṇas*
कैः लिङ्गैः भवति ?	by which symptoms is he [known]?
किम् आचारः ?	what is [his] conduct?
कथम् च	and how
एतान् त्रीन् गुणान् अतिवर्तते ?	does he transcend these three *guṇas*?

"Arjuna inquired: O my dear Lord, by which symptoms is one known who is transcendental to these three modes? What is his behavior? And how does he transcend the modes of nature?"

अर्जुनः **Arjuna** ⟨1.1⟩ m. *arjuna* – white, 'who is pure in actions'
उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ *√vac[a]*...परिभाषणे – to speak
कैः **by which** ⟨3.3⟩ n. *kṛṣṇanāma kim* – who/what
लिङ्गैः **by symptoms** ⟨3.3⟩ n. *liṅga* – a mark, sign, symptom, characteristic (same as *lakṣa*, *lakṣaṇa*); the sign of gender, (esp.) the male organ (as in *śiva-liṅga*); (in gram.) gender
त्रीन् **the three** ⟨2.3⟩ m. *tri*
गुणान् **the *guṇas*** ⟨2.3⟩ m. *guṇa* – quality
एतान् **these** ⟨2.3⟩ m. *kṛṣṇanāma etad* – (first person) he, this
अतीतः **who has surpassed** ⟨1.1⟩ m. *atīta* (*ati.√i[ṇ]* – to pass; + *.[k]ta*) – surpassed
भवति **he is** ⟨*acyuta* 1.1⟩ *√bhū*...सत्तायाम् – to be, exist, become
प्रभो **O Kṛṣṇa!** ⟨8.1⟩ m. *prabhu* – master, lord
किम् **what** ⟨*avyaya*⟩
आचारः **conduct** ⟨1.1⟩ m. *ācāra*
कथम् **how** ⟨*avyaya*⟩
च **and** ⟨*avyaya*⟩
एतान् **these** ⟨2.3⟩ m. *kṛṣṇanāma etad* – (first person) he, this
त्रीन् **the three** ⟨2.3⟩ m. *tri*
गुणान् **the *guṇas*** ⟨2.3⟩ m. *guṇa* – quality

अतिवर्तते **he surpasses** ⟨*acyuta* 1.1⟩ *ati.√vṛt[u]* 1A – to surpass

Subodhinī: हे प्रभो, कैः लिङ्गैः, कीदृशैः आत्मनि उत्पन्नैः चिह्नैः, गुणातीतः देही भवति ? इति लक्षण-प्रश्नः । कः आचारः यस्य इति किम् आचारः, कथम् वर्तते इति अर्थः । कथम् च (केन उपायेन) एतन् त्रीन् अपि गुणान् अतीत्य वर्तते, तद् कथय इति ॥१४.२१॥

'स्थित-प्रज्ञस्य का भाषा' (2.54) इत्यादिना द्वितीय-अध्याये पृष्टम् अपि दत्त-उत्तरम् अपि, '[अर्जुनः] पुनः विशेष-बुभुत्सया पृच्छति' इति ज्ञात्वा, प्रकार-अन्तरेण तस्य लक्षणादिकम् श्री-भगवान् उवाच – 'प्रकाशम् च' इत्यादि षड्भिः । तत्र एकेन लक्षणम् – 'प्रकाशम्' इति –

14.22...25

श्रीभगवानुवाच

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव ।
न द्वेष्टि सम्प्रवृत्तानि न निवृत्तानि काङ्क्षति ॥२२॥

श्री-भगवान् उवाच - हे पाण्डव !	Śrī Kṛṣṇa said: O Arjuna!
प्रकाशम् च प्रवृत्तिम् च	enlightenment and activity
मोहम् एव च	and also delusion
सम्प्रवृत्तानि न द्वेष्टि,	he does not hate when they occur,
निवृत्तानि न काङ्क्षति . . .	nor desires when they cease . . .

"The Supreme Personality of Godhead said: O son of Pāṇḍu, he who does not hate illumination, attachment and delusion when they are present or long for them when they disappear, . . ."

श्री-भगवान् **Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'
उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ *√vac[a]*...परिभाषणे – to speak
प्रकाशम् **enlightenment** ⟨2.1⟩ m. *prakāśa* – light
च **and** ⟨*avyaya*⟩
प्रवृत्तिम् **activity** ⟨2.1⟩ f. *pravṛtti* – activity, tendency
च **and** ⟨*avyaya*⟩
मोहम् **delusion** ⟨2.1⟩ m. *moha*
एव **certainly** ⟨*avyaya*⟩
च **and** ⟨*avyaya*⟩
पाण्डव **O Arjuna!** ⟨8.1⟩ m. *pāṇḍava* – 'son of Pāṇḍu'
न **not** ⟨*avyaya*⟩
द्वेष्टि **he hates** ⟨*acyuta* 1.1⟩ *√dviṣ[a]*...अप्रीतौ – to hate
सम्प्रवृत्तानि **when they occur** ⟨2.3⟩ n. *sampravṛtta* (*sam.pra.√vṛt[u]* – to start to act; + *.[k]ta*) – occured

निवृत्तानि **when they stop** ⟨2.3⟩ n. *nivṛtta* (*ni.√vṛt[u]* – to stop to act; to return; + *.[k]ta*) – stopped
काङ्क्षति **he desires** ⟨*acyuta* 1.1⟩ *√kākṣ[i]*...काङ्क्षायाम् – to desire

Subodhinī: प्रकाशम् च 'सर्व-द्वारेषु देहे अस्मिन्' (14.11) इति पूर्व-उक्तम् सत्त्व-कार्यम्, प्रवृतिम् च रजः-कार्यम्, मोहम् च तमः-कार्यम्, उपलक्षणम् एतद् । सत्त्वादीनाम् सर्वाणि अपि कार्याणि यथा-यथम् सम्प्रवृत्तानि (स्वतः प्राप्तानि) सन्ति, दुःख-बुद्ध्या यः न द्वेष्टि, निवृत्तानि च सन्ति, सुख-बुद्ध्या न काङ्क्षति, 'गुण-अतीतः सः उच्यते' (14.25) इति चतुर्थेन अन्वयः ॥१४.२२॥

तद् एवम् स्व-संवेद्यम् तस्य गुण-अतीतस्य लक्षणम् उक्त्वा, पर-संवेद्यम् तस्य लक्षणम् वक्तुम्, 'किम् आचारः ?' इति द्वितीय-प्रश्नस्य उत्तरम् आह – 'उदासीनवत्' इति त्रिभिः –

14.23

उदासीनवदासीनो गुणैर्यो न विचाल्यते ।
गुणा वर्तन्त इत्येवं यो ऽवतिष्ठति नेङ्गते ॥२३॥

. . . उदासीनवत् आसीनः	. . . remaining as neutral
यः गुणैः न विचाल्यते,	one who is not disturbed by the *guṇas*,
गुणाः वर्तन्ते इति एवम्	[knowing that] 'the *guṇas* are acting'
यः अवतिष्ठति	one who is steady,
न इङ्गते	and does not waver

". . . who is unwavering and undisturbed through all these reactions of the material qualities, remaining neutral and transcendental, knowing that the modes alone are active . . ."

उदासीनवत् **as neutral** ⟨*avyaya*⟩ (*.vat[i]*)
आसीनः **being situated** ⟨1.1⟩ m. *āsīna* (from *√ās[a]*...उपवेशने विद्यमानतायां च – to sit; be present)
गुणैः **by the *guṇas*** ⟨3.3⟩ m. *guṇa* – quality
यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
न **not** ⟨*avyaya*⟩
विचाल्यते **he is not moved** ⟨*acyuta* caus. pass. 1.1⟩ *vi.√cal[a]* – to move, shake
गुणाः **the *guṇas*** ⟨1.3⟩ m. *guṇa* – quality
वर्तन्ते **they act** ⟨*acyuta* 1.3⟩ *√vṛt[u]* 1A...वर्तने – to happen, act
इति **thus** ⟨*avyaya*⟩
एवम् **thus** ⟨*avyaya*⟩
यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
अवतिष्ठति **he stands firm** ⟨*acyuta* 1.1⟩ *ava.√sthā* – to stay

न not ⟨*avyaya*⟩

इङ्गते **he wavers** ⟨*acyuta* 1.1⟩ √*ig[i]*...गत्यर्थाः – to go, flicker

Subodhinī: उदासीनवत् (साक्षितया) आसीनः (स्थितः) सन्, गुणैः (गुण-कार्यैः, सुख-दुःखादिभिः) यः न विचाल्यते (स्व-रूपात् न प्रच्याव्यते), अपितु 'गुणाः एव स्व-कार्येषु वर्तन्ते, एतैः मम सम्बन्धः एव न अस्ति' इति विवेक-ज्ञानेन यः तूष्णीम् अवतिष्ठति । परस्मैपदम् आर्षम् । न इङ्गते न चलति ॥१४.२३॥

14.24

समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः ।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ॥२४॥

. . . सम-दुःख-सुखः	. . . who is equal in distress and happiness
स्व-स्थः	situated in the self
सम-लोष्टाश्म-काञ्चनः	who regards alike a lump of earth, stone and gold
तुल्य-प्रियाप्रियः	who is equal towards the pleasing and displeasing
धीरः तुल्य-निन्दात्म-संस्तुतिः . . .	who is sober, equal in blame and praise . . .

". . . who is situated in the self and regards alike happiness and distress; who looks upon a lump of earth, a stone and a piece of gold with an equal eye; who is equal toward the desirable and the undesirable; who is steady, situated equally well in praise and blame, . . ."

सम-दुःख-सुखः **for whom pain and pleasure are the same** ⟨1.1⟩ m. *sama-duḥkha-sukha*...समे दुःखम् च सुखम् च यस्य, सः सम-दुःख-सुखः

स्व-स्थः **who stays in the self** ⟨1.1⟩ m. *sva-stha*...यः स्वस्मिन् तिष्ठति, सः स्व-स्थः

सम-लोष्टाश्म-काञ्चनः **for whom a lump of earth, stone and gold are the same** ⟨1.1⟩ m. *sama-loṣṭa-_aśma-kāñcana*...समानि लोष्टः च अश्मा च काञ्चनम् च यस्य, सः सम-लोष्टाश्म-काञ्चनः

तुल्य-प्रियाप्रियः **for whom the pleasing and displeasing are equal** ⟨1.1⟩ m. *tulya-priya-_apriya*...तुल्यौ प्रियः च अ-प्रियः च यस्य, सः तुल्य-प्रियाप्रियः

धीरः **who is wise** ⟨1.1⟩ m. *dhīra* – who is wise, sober

तुल्य-निन्दात्म-संस्तुतिः **for whom own blame and praise are equal** ⟨1.1⟩ m. *tulya-nindā-_ātma-saṁstuti*...तुल्ये निन्दा च अत्मनः संस्तुतिः च यस्य, सः तुल्य-निन्दात्म-संस्तुतिः

Subodhinī: समे सुख-दुःखे यस्य । यतः स्व-स्थः (स्व-रूपः एव स्थितः), अतएव समानि लोष्ट-अश्म-काञ्चनानि यस्य, तुल्ये प्रिय-अप्रिये सुख-दुःख-हेतु-भूते यस्य, धीरः धीमान्, तुल्याः निन्दा च आत्म-संस्तुतिः च यस्य सः ॥१४.२४॥

14.25

मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ।
सर्वारम्भपरित्यागी गुणातीतः स उच्यते ॥२५॥

. . . मानापमानयोः तुल्यः	. . . who is equal in honor and dishonor
मित्रारि-पक्षयोः तुल्यः	who is equal towards friend and enemy
सर्वारम्भ-परित्यागी	and who renounces all material activities –
सः गुणातीतः उच्यते ।	he is said to have transcended the *guṇas*

". . . [who is situated equally] in honor and dishonor; who treats alike both friend and enemy; and who has renounced all material activities – such a person is said to have transcended the modes of nature."

मानापमानयोः **in honor and dishonor** ⟨7.2⟩ m. *māna-_apamāna*...मानः च अपमानः च इति मानापमानः – honor and dishonor

तुल्यः **who is equal** ⟨1.1⟩ m. *tulya* – equal

तुल्यः **who is equal** ⟨1.1⟩ m. *tulya* – equal

मित्रारिपक्षयोः **towards the sides of friend and enemy** ⟨7.2⟩ m. *mitra-_ari-pakṣa*...मित्रस्य च अरेः च पक्षौ इति मित्रारि-पक्षौ – the sides of friend and enemy
पक्ष – wing, feather; the side or half of anything, the half of a lunar month (as in *śukla-pakṣa* or bright half); a side, party; follower, friend; (derived:) *pakṣī* – 'winged', a bird

सर्वारम्भ-परित्यागी **a renouncer of all endeavor** ⟨1.1⟩ m. *sarva-_ārambha-parityāgin* (-*tyāgī*)...सर्वेषाम् आरम्भाणाम् परित्यागी इति सर्वारम्भ-परित्यागी

गुणातीतः **who is transcended the *guṇas*** ⟨1.1⟩ m. *guṇa-_atīta*...गुणान् अतीतः इति गुणातीतः

सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

उच्यते **is said** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak

Subodhinī: माने अपमाने च तुल्यः, मित्र-पक्षे अरि-पक्षे च तुल्यः, सर्वान् दृष्ट-अदृष्ट-अर्थान् आरम्भान् (उद्यमान्) परित्यक्तुम् शीलम् यस्य सः एवम्-भूत-आचार-युक्तः 'गुण-अतीतः' उच्यते ॥१४.२५॥
कथम् च एतान् त्रीन् गुणान् अतिवर्तते ? इति अस्य प्रश्नस्य उत्तरम् आह – 'माम् च' इति –

14.26

मां च यो ऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥२६॥

यः च	and one who
अ-व्यभिचारेण भक्ति-योगेन	with undiviating *bhakti-yoga*
माम् सेवते,	worships Me,
सः एतान् गुणान् समतीत्य	he, [after] transcending these *guṇas*
ब्रह्म-भूयाय कल्पते ।	is eligible for spiritual existence

"One who engages in full devotional service, unfailing in all circumstances, at once transcends the modes of material nature and thus comes to the level of Brahman."

माम्	**me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
च	**and** ⟨*avyaya*⟩
यः	**he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
अ-व्यभिचारेण	**with undeviating** ⟨3.1⟩ m. *a-vyabhicāra* – non-deviation
भक्ति-योगेन	**with *bhakti-yoga*** ⟨3.1⟩ m. *bhakti-yoga* – the *yoga* of devotion
सेवते	**he serves** ⟨*acyuta* 1.1⟩ √*sev[r]*...सेवने – to serve
सः	**he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
गुणान्	**the *guṇas*** ⟨2.3⟩ m. *guṇa* – quality
समतीत्य	**[after] surpassing** ⟨*avyaya*⟩ *sam.ati.*√*i[n]* – to pass; + *.ya[p]*
एतान्	**these** ⟨2.3⟩ m. *kṛṣṇanāma etad* – (first person) he, this
ब्रह्म-भूयाय	**for the state of Brahman** ⟨4.1⟩ m. *brahma-bhūya*...ब्रह्मणः भूयः इति ब्रह्म-भूयः – the state of Brahman
कल्पते	**he is able** ⟨*acyuta* 1.1⟩ √*kṛp[ū]*...सामर्थ्ये – to be able

Subodhinī: 'च'-शब्दः अवधारणार्थः । माम् एव परमेश्वरम् श्री-नारायणम् अ-व्यभिचारेण एकान्त-भक्ति-योगेन यः सेवते, सः एतान् गुणान् समतीत्य (सम्यक् अतिक्रम्य) ब्रह्म-भूयाय (ब्रह्म-भावाय, मोक्षाय) कल्पते (योग्यः भवति) ॥१४.२६॥
तत्र हेतुम् आह – 'ब्रह्मणः हि' इति –

14.27

ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च ।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥२७॥

अहम् हि ब्रह्मणः प्रतिष्ठा	I am the basis of Brahman
अ-व्ययस्य अ-मृतस्य च	and of imperishable immortality
शाश्वतस्य धर्मस्य च	and of the eternal *dharma*
ऐकान्तिकस्य सुखस्य च ।	and of ultimate happiness

"And I am the basis of the impersonal Brahman, which is immortal, imperishable and eternal and is the constitutional position of ultimate happiness."

ब्रह्मणः	**of the Brahman** ⟨6.1⟩ n. *brahman* (*brahma*) – spirit, soul
हि	**indeed** ⟨*avyaya*⟩
प्रतिष्ठा	**basis** ⟨1.1⟩ f. *pratiṣṭhā* (from *prati.*√*sthā* – to stand firmly) – standpoint, resting-place, basis, foundation, support, dwelling; pre-eminence, superiority
अहम्	**I am** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
अ-मृतस्य	**of immortality** ⟨6.1⟩ n. *a-mṛta* – immortality, nectar
अ-व्ययस्य	**of the imperishable** ⟨6.1⟩ n. *a-vyaya* – unchangeable, imperishable
च	**and** ⟨*avyaya*⟩
शाश्वतस्य	**of the eternal** ⟨6.1⟩ m. *śāśvata* – eternal
च	**and** ⟨*avyaya*⟩
धर्मस्य	**of *dharma*** ⟨6.1⟩ m. *dharma* – religious duty, constitutional position
सुखस्य	**of happiness** ⟨6.1⟩ n. *sukha* – easiness, happiness
ऐकान्तिकस्य	**of the ultimate** ⟨6.1⟩ n. *aikāntika* – exclusive
च	**and** ⟨*avyaya*⟩

Subodhinī: हि (यस्मात्) ब्रह्मणः अहम् प्रतिष्ठा (प्रतिमा), घनी-भूतम् ब्रह्म एव अहम् । यथा घनी-भूतः प्रकाशः एव सूर्य-मण्डलम् तद्वत् एव इति अर्थः । यथा अ-व्ययस्य (नित्यस्य) अमृतस्य (मोक्षस्य) च, नित्य-मुक्तत्वात् । तथा तद्-साधनस्य शाश्वतस्य च धर्मस्य, शुद्ध-सत्त्वात्मकत्वात् । तथा ऐकान्तिकस्य (अ-खण्डितस्य) सुखस्य च प्रतिष्ठा अहम्, परमानन्द-एक-रूपत्वात् । अतः मद्-सेविनः मद्-भावस्य अवश्यम्-भावित्वात्, युक्तम् एव उक्तम् 'ब्रह्म-भूयाय कल्पते' इति ॥१४.२७॥

Note: The Absolute Truth can be experienced in three features, namely as:
(1) impersonal all-pervading energy (Brahman) by the *jñānīs*,
(2) passive witness in the heart (Paramātmā) by the *yogīs*, and
(3) loving person in Vaikuṇṭha (Bhagavān) by the *bhaktas*.
Now, which is the original, ultimate feature? There are two lines of thought among all the philosophies and religions of the world. The impersonalist schools consider the Lord as a manifestation of the impersonal Brahman, whereas the personalist schools consider the Lord as the origin of the Brahman effulgence. This last view is supported in the Gītā (*brahmaṇo hi pratiṣṭhāham* 14.27; 7.24, 12.1-7).

ओं तत्सदिति
श्रीमहाभारते शतसाहस्त्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि
श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः ॥१४॥

अथ पञ्चदशोऽध्यायः

अथ पञ्चदशः अध्यायः । now the fifteenth chapter

Subodhinī: पूर्व-अध्याय-अन्ते 'माम् च यः अ-व्यभिचारेण भक्ति-योगेन सेवते' (14.26-27) इत्यादिना, परमेश्वरम् एकान्त-भक्त्या भजतः, तद्-प्रसाद-लब्ध-ज्ञानेन ब्रह्म-भावः भवति इति उक्तम् । नच एकान्त-भक्तिः ज्ञानम् वा अ-विरक्तस्य सम्भवति इति वैराग्य-पूर्वकम् ज्ञानम् उपदेष्टु-कामः, प्रथमम् तावत् सार्ध-श्लोकाभ्याम् संसार-स्वरूपम् वृक्ष-रूपक-अलङ्कारेण वर्णयन् । श्री-भगवान् उवाच । – 'ऊर्ध्व-मूलम्' इति –

15.1

श्रीभगवानुवाच

ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥१॥

श्री-भगवान् उवाच –	Śrī Kṛṣṇa said:
ऊर्ध्व-मूलम् अधः-शाखम्	with its root above and branches below
अ-व्ययम् अश्वत्थम् प्राहुः	they (scriptures) describe an imperishable Aśvattha tree
छन्दांसि यस्य पर्णानि,	whose leaves are the *Vedas*,
यः तम् वेद	one who knows that [tree]
सः वेद-विद् ।	knows the *Vedas*

"The Supreme Personality of Godhead said: It is said that there is an imperishable banyan tree that has its roots upward and its branches down and whose leaves are the Vedic hymns. One who knows this tree is the knower of the Vedas."

श्री-भगवान् **Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'

उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak

ऊर्ध्व-मूलम् **whose root is above** ⟨2.1⟩ m. *ūrdhva-mūla*...ऊर्ध्वम् मूलम् यस्य, सः ऊर्ध्व-मूलः

मूल – a root (of any plant or tree); the foot or lowest part or bottom of anything; basis, foundation, cause, origin, beginning; (derived:) *mūlya* – (original) value, price; wages, salery

अधः-शाखम् **whose branches are below** ⟨2.1⟩ m. *adhaḥ-śākha*...अधः शाखाः यस्य, सः अधः-शाखः

अश्वत्थम् **the Aśvattha tree** ⟨2.1⟩ m. *aśvattha*

Although Aśvattha is a name of the Pīpal tree (see note under 10.26), the description given in this chapter applies rather to the Nyagrodha or Vaṭa tree, also called Banyan (Ficus Indica – Indian fig tree). Aśvattha means 'under which horses are standing' (from *aśva* – horse, as in *aśva-medha* – horse-sacrifice). In this verse it describes the nature of the material world as *a-śvattha* – 'which does not last until tomorrow' (from *śvaḥ* – tomorrow), i.e. which is perishable (because always changing). At the same time it is *a-vyaya*, imperishable, like a continous stream.

प्राहुः **they declared** ⟨*acyuta* opt. form with a past sense 1.3⟩ *pra.*√*brū[ñ]* – to declare

अ-व्ययम् **imperishable** ⟨2.1⟩ m. *a-vyaya* – unchangeable, imperishable

छन्दांसि **the *Vedas*** ⟨1.3⟩ n. *chandas (chandaḥ)* – *Veda* (see 10.35)

यस्य **he whose** ⟨6.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which

पर्णानि **leaves** ⟨1.3⟩ n. *parṇa* – leaf

यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

तम् **that** ⟨2.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

वेद **he knows** ⟨*acyuta* 1.1⟩ √*vid[a]* 2P...ज्ञाने – to know

सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

वेद-विद् **who knows the *Vedas*** ⟨1.1⟩ m. *veda-vid*...यः वेदान् वेत्ति, सः वेद-विद्

Subodhinī: ऊर्ध्वम् उत्तमः क्षर-अक्षराभ्याम् उत्कृष्टः पुरुषोत्तमः मूलम् यस्य तम् । अधः इति ततः अर्वाचीनाः कार्य-उपाधयः हिरण्यगर्भ-आदयः गृह्यन्ते । ते तु शाखाः इव शाखाः यस्य तम् । विनश्वरत्वेन श्वः प्रभात-पर्यन्तम् अपि न स्थास्यति इति विश्वास-अनर्हत्वात् 'अश्वत्थम्' प्राहुः । प्रवाह-रूपेण-अविच्छेदात् 'अ-व्ययम्' च प्राहुः । 'ऊर्ध्व-मूलः अवाच्-शाखः एषः अश्वत्थः सनातनः' (*Kaṭha-Up.* 2.3.1) इत्याद्याः श्रुतयः । छन्दांसि (वेदाः) यस्य पर्णानि धर्म-अधर्म-प्रतिपादन-द्वारेण छाया-स्थानीयैः कर्म-फलैः संसार-वृक्षस्य सर्व-जीव-आश्रयणीयत्व-आपादनात् पर्ण-स्थानीयाः वेदाः । यः तम् एवम्-भूतम् अश्वत्थम् वेद, सः एव वेदार्थ-विद् । संसार-वृक्षस्य मूलम् ईश्वरः श्री-नारायणः, ब्रह्मा-आदयः तद्-अंशाः शाखा-स्थानीयाः । सः च संसार-वृक्षः विनश्वरः, प्रवाह-रूपेण नित्यः च । वेद-उक्तैः कर्मभिः सेव्यताम् आपादितः च इति एतावान् एव हि वेदार्थः, अतएव विद्वान् 'वेद-विद्' इति स्तूयते ॥१५.१॥

15.2

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ।
अधश्च मूलान्यनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके ॥२॥

गुण-प्रवृद्धाः	nourished by the *guṇas*
विषय-प्रवालाः	with twigs being sense objects
तस्य शाखाः	its branches
अधः ऊर्ध्वम् च प्रसृताः,	are extended downwards and upwards,
मनुष्य-लोके कर्मानुबन्धीनि मूलानि	the roots, binding as *karma* in the world of men
अधः च अनुसन्ततानि ।	are extending downwards also

"The branches of this tree extend downward and upward, nourished by the three modes of material nature. The twigs are the objects of the senses. This tree also has roots going down, and these are bound to the fruitive actions of human society."

अधः **downwards** ⟨*avyaya*⟩ (*adhas*)
च **and** ⟨*avyaya*⟩
ऊर्ध्वम् **upwards** ⟨*avyaya*⟩
प्रसृताः **being extended** ⟨1.3⟩ f. *prasṛtā* (*pra.√sṛ* – to extend; + *.[k]ta* + *.ā[p]*) – extended
तस्य **its** ⟨6.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
शाखाः **branches** ⟨1.3⟩ f. *śākhā* – branch
गुण-प्रवृद्धाः **which are nourished by the *guṇas*** ⟨1.3⟩ f. *guṇa-pravṛddhā* (*.ā[p]*)...गुणैः प्रवृद्धा इति गुण-प्रवृद्धा – nourished by the *guṇas*
प्रवृद्ध (*pra.√vṛdh[u]* – to grow up, raise; + *.[k]ta*) – grown, raised
विषय-प्रवालाः **whose twigs are sense objects** ⟨1.3⟩ f. *viṣaya-pravālā* (*.ā[p]*)...विषयाः प्रवालाः यस्याः, सा विषय-प्रवाला
प्रवाल – a young shout, sprout, new leaf or branch
अधः **downwards** ⟨*avyaya*⟩ (*adhas*)
मूलानि **roots** ⟨1.3⟩ n. *mūla* – root
अनुसन्ततानि **which are extended** ⟨1.3⟩ n. *anusantata* (*anu.sam.√tan[u]* – to spread; + *.[k]ta*) – spread
कर्मानुबन्धीनि **which result in *karma*** ⟨1.3⟩ n. *karma-_anubandhin* (*-anubandhi*)...कर्म अनुबन्धः यस्य, तद् कर्मानुबन्धि – whose result is *karma*
मनुष्य-लोके **in the world of men** ⟨7.1⟩ m. *manuṣya-loka*...मनुष्याणाम् लोकः इति मनुष्य-लोकः – the world of men

Subodhinī: हिरण्यगर्भ-आदयः कार्य-उपाधयः जीवाः शाखा-स्थानीयत्वेन उक्ताः, तेषु च ये दुष्कृतिनः ते अधः (पश्वादि-योनिषु) प्रसृताः (विस्तारम् गताः)। सुकृतिनः च ऊर्ध्वम् देवादि-योनिषु प्रसृताः तस्य संसार-वृक्षस्य शाखाः। किंच, गुणैः (सत्त्वादि-वृत्तिभिः) जल-सेचनैः इव यथा-यथम् प्रवृद्धाः (वृद्धिम् प्राप्ताः)। किंच, विषयाः (रूप-आदयः) प्रवालाः (पल्लव-स्थानीयाः) यासाम् ताः, प्रशाखा-स्थानीयाभिः इन्द्रिय-वृत्तिभिः संयुक्तत्वात्। किंच, अधः च 'च'-शब्दात् ऊर्ध्वम् च मूलानि अनुसन्ततानि (विरूढानि)। मुख्यम् मूलम् ईश्वरः एकः एव, इमानि तु अवान्तर-मूलानि तद्-तद्-भोग-वासना-लक्षणानि। तेषाम् कार्यम् आह - मनुष्य-लोके कर्म-अनुबन्धीनि, कर्म एव अनुबन्धि (अनन्तर-भावि) येषाम् तानि। ऊर्ध्व-अधः-लोकेषु यद् उपभुक्तम्, तद्-तद्-भोग-वासनाभिः हि कर्म-क्षये मनुष्य-लोकम् प्राप्तानाम् तद्-तद्-अनुरूपेषु कर्मसु प्रवृत्तिः भवति। एतस्मिन् एव हि कर्म-अधिकारः न अन्येषु लोकेषु। ततः 'मनुष्य-लोके' इति उक्तम् ॥१५.२॥

Note: Only in this world are good and bad *karma* created. This world is therefore called *karma-bhūmi*. After exhausting the fruit of such action by enjoyment in heaven or suffering in hell, souls are again embodied as human beings.

15.3...4

न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा ।
अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्त्वा ॥३॥

अस्य रूपम्	its form
इह तथा न उपलभ्यते,	is not perceived in this way in this world,
न अन्तः न च आदिः	not [its] end, not the beginning
न च सम्प्रतिष्ठा,	and not the foundation,
एनम् सुविरूढ-मूलम् अश्वत्थम्	this strongly rooted Aśvattha
दृढेन असङ्ग-शस्त्रेण	with the strong axe of detachment
छित्त्वा . . .	[after] cutting . .

"The real form of this tree cannot be perceived in this world. No one can understand where it ends, where it begins, or where its foundation is. But with determination one must cut down this strongly rooted tree with the weapon of detachment."

न **not** ⟨*avyaya*⟩
रूपम् **the form** ⟨1.1⟩ n. *rūpa*
अस्य **its** ⟨6.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
इह **here** ⟨*avyaya*⟩
तथा **so** ⟨*avyaya*⟩
उपलभ्यते **it is perceived** ⟨*acyuta* pass. 1.1⟩ *upa.√[du]labh[as]* – to perceive
न **not** ⟨*avyaya*⟩
अन्तः **the end** ⟨1.1⟩ m. *anta*
न **not** ⟨*avyaya*⟩
च **and** ⟨*avyaya*⟩
आदिः **the beginning** ⟨1.1⟩ m. *ādi*
न **not** ⟨*avyaya*⟩
च **and** ⟨*avyaya*⟩
सम्प्रतिष्ठा **foundation** ⟨1.1⟩ f. *sampratiṣṭhā* (from *sam.prati.√sthā* – to stand firmly)
अश्वत्थम् **the Aśvattha** ⟨2.1⟩ m. *aśvattha*
एनम् **this** ⟨2.1⟩ m. *kṛṣnanāma etad* – (first person) he, this
सुविरूढ-मूलम् **whose roots are very much developed** ⟨2.1⟩ m. *suvirūḍha-mūla*...सुविरूढानि मूलानि यस्य, सः सुविरूढ-मूलः
सुविरूढ (*su.vi.√ruh[a]* – to develop very much; + *.[k]ta*) – very much developed
असङ्ग-शस्त्रेण **with the weapon of detachment** ⟨3.1⟩ n. *a-saṅga-śastra*...अ-सङ्गस्य शस्त्रः इति असङ्ग-शस्त्रः – the weapon of detachment

दृढेन **with the strong** ⟨3.1⟩ n. *dṛḍha* – firm

छित्त्वा **[after] cutting** ⟨*avyaya*⟩ √*chid[ir]*...द्वैधीकरणे – to divide into two; + .*[k]tvā*

Subodhinī: इह (संसारे) स्थितैः प्राणिभिः अस्य संसार-वृक्षस्य तथा ऊर्ध्व-मूलत्वादि-प्रकारेण रूपम् न उपलभ्यते । नच अन्तः (अवसानम्), अ-पर्यन्तत्वात् । नच आदिः अनादित्वात् । नच सम्प्रतिष्ठा (स्थितिः), 'कथम् तिष्ठति ?' इति नच उपलभ्यते । यस्मात् एवम्-भूतत्वात् अयम् संसार-वृक्षः दुरुच्छेद्यः अनर्थ-करः च, तस्मात् एनम् दृढेन वैराग्येण शस्त्रेण छित्त्वा, तत्त्व-ज्ञाने यतेत इति आह – 'अश्वत्थम् एनम्' इति सार्धेन । एनम् अश्वत्थम् सुविरूढ-मूलम् (अत्यन्त-बद्ध-मूलम्) सन्तम्, अ-सङ्गः (सङ्ग-राहित्यम्) अहम्-ममता-त्यागः, तेन दृढेन शस्त्रेण (सम्यक्-विचारवता) छित्त्वा (पृथक्-कृत्य), [...] ॥१५.३॥

15.4

ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तन्ति भूयः ।
तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥४॥

. . . ततः तद् पदम् परिमार्गितव्यम्	. . . then that abode has to be sought
यस्मिन् गताः भूयः न निवर्तन्ति,	having reached which they do not return again,
तम् एव च आद्यम् पुरुषम् प्रपद्ये	[saying:] 'to that primeval Lord I surrender
यतः पुराणी प्रवृत्तिः प्रसृता ।	from whom this ancient manifestation has developed'

"Thereafter, one must seek that place from which, having gone, one never returns, and there surrender to that Supreme Personality of Godhead from whom everything began and from whom everything has extended since time immemorial."

ततः **then** ⟨*avyaya*⟩ (*tatas*; from *tad* + .*tas[i]*) – from/after/than that

पदम् **the abode** ⟨1.1⟩ n. *pada* – step, position

तद् **that** ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that

परिमार्गितव्यम् **to be sought** ⟨1.1⟩ n. *parimārgitavya* (*pari.*√*mārg[a]* – to seek; + .*tavya*)

यस्मिन् **that in which** ⟨7.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which

गताः **having gone** ⟨1.3⟩ m. *gata* (√*gam[l]*...गतौ – to go; + .*[k]ta*) – gone

न **not** ⟨*avyaya*⟩

निवर्तन्ति **they return** ⟨*acyuta* 1.3⟩ *ni.*√*vṛt[u]* – to stop to act; to return

भूयः **again** ⟨*avyaya*⟩

तम् **that** ⟨2.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

एव **certainly** ⟨*avyaya*⟩

च **and** ⟨*avyaya*⟩

आद्यम् **to the primeval** ⟨2.1⟩ m. *ādya*

पुरुषम् **person** ⟨2.1⟩ m. *puruṣa*

प्रपद्ये **I surrender** ⟨*acyuta* 3.1⟩ *pra.*√*pad[a]* – to surrender

यतः **from where** ⟨*avyaya*⟩ (*yatas*; from *yad* + .*tas[i]*)

प्रवृत्तिः **the manifestation** ⟨1.1⟩ f. *pravṛtti* – activity, tendency

प्रसृता **having extended** ⟨1.1⟩ f. *prasṛtā* (*pra.*√*sṛ* – to extend; + .*[k]ta* + .*ā[p]*) – extended

पुराणी **ancient** ⟨1.1⟩ f. *purāṇī* (.*ī[p]*)

Subodhinī: ततः तस्य मूल-भूतम् तद् पदम् वस्तु (वैष्णवम् पदम्) परिमार्गितव्यम् (अन्वेष्टव्यम्) । कीदृशम् ? यस्मिन् गताः (यद् पदम् प्राप्ताः) सन्तः, भूयः न निवर्तन्ति, न आवर्तन्ते इति अर्थः । अन्वेषण-प्रकारम् एव आह – यतः एषा पुराणी (चिरन्तनी) संसार-प्रवृत्तिः प्रसृता (विस्तृता), तम् एव च आद्यम् पुरुषम् प्रपद्ये (शरणम् व्रजामि) इति एवम् एकान्त-भक्त्या अन्वेष्टव्यम् इति अर्थः ॥१५.४॥

तद्-प्राप्तौ साधन-अन्तराणि दर्शयन्, आह – 'निर्माण' इति –

15.5

निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः ।
द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत् ॥५॥

निर्मान-मोहाः	being without pride and delusion
जित-सङ्ग-दोषाः	having conquered the evil of attachment
अध्यात्म-नित्याः विनिवृत्त-कामाः	always established in the self, free from lust
सुख-दुःख-संज्ञैः द्वन्द्वैः विमुक्ताः,	freed from the dualities of happiness and distress
अ-मूढाः	those who are not deluded
तद् अ-व्ययम् पदम् गच्छन्ति ।	attain that imperishable abode

"Those who are free from false prestige, illusion and false association, who understand the eternal, who are done with material lust, who are freed from the dualities of happiness and distress, and who, unbewildered, know how to surrender unto the Supreme Person attain to that eternal kingdom."

निर्मान-मोहाः **who are without pride and delusion** ⟨1.3⟩ m. *nirmāna-moha*...नर्गतौ मान-मोहौ यस्मत्, सः निर्मान-मोहः – from whom pride and delusion have departed

जित-सङ्ग-दोषाः **who have conquered the evil of attachment** ⟨1.3⟩ m. *jita-saṅga-doṣa*...जितः सङ्गस्य दोषः येन, सः जित-सङ्ग-दोषः – by whom the evil of attachment is conquered

अध्यात्म-नित्याः **who are always established in the self** ⟨1.3⟩ m. *adhyātma-nitya* – who is always established in the self

विनिवृत्त-कामाः **those whose lust has stopped** ⟨1.3⟩ m. *vinivṛtta-kāma*...विनिवृत्तः कामः यस्य, सः विनिवृत्त-कामः – whose lust has stopped

द्वन्द्वैः by dualities ⟨3.3⟩ n. *dvandva* – duality

विमुक्ताः who are freed ⟨1.3⟩ m. *vimukta* (*.[k]ta*) – freed

सुख-दुःख-संज्ञैः by those called happiness and distress ⟨3.3⟩ n. *sukha-duḥkha-saṁjña*...सुख-दुःखे संज्ञा यस्य, तद् सुख-दुःख-संज्ञम् – whose name is happiness and distress

गच्छन्ति they go ⟨*acyuta* 1.3⟩ √*gam[l̥]*...गतौ – to go

अ-मूढाः those who are not bewildered ⟨1.3⟩ m. *a-mūḍha* – not bewildered

पदम् the abode ⟨2.1⟩ n. *pada* – step, position

अ-व्ययम् the imperishable ⟨2.1⟩ n. *a-vyaya* – unchangeable, imperishable

तद् that ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that

Subodhinī: निर्गतौ मान-मोहौ (अहङ्कार-मिथ्या-अभिनिवेशौ) येभ्यः ते । जितः पुत्रादि-सङ्ग-रूपः दोषः यैः ते । अध्यात्मे (आत्म-ज्ञाने) नित्याः परिनिष्ठिताः । विशेषेण निवृत्तः कामः येभ्यः ते । सुख-दुःख-हेतुत्वात् सुख-दुःख-संज्ञानि शीत-उष्णादीनि द्वन्द्वानि तैः विमुक्ताः । अतएव अ-मूढाः (निवृत्त-अविद्याः) सन्तः, तद् अ-व्ययम् पदम् वैष्णवम् गच्छन्ति ॥१५.५॥

तद् एव गन्तव्यम् पदम् विशिनष्टि – 'न तद्' इति –

15.6

न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥६॥

सूर्यः तद् न भासयते	the sun does not illuminate that
न शशाङ्कः न पावकः,	nor the moon or fire,
यद् गत्वा न निवर्तन्ते	[after] attaining which they do not return
तद् मम परमम् धाम ।	that is My supreme abode

"That supreme abode of Mine is not illumined by the sun or moon, nor by fire or electricity. Those who reach it never return to this material world."

न not ⟨*avyaya*⟩

तद् that ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that

भासयते it illuminates ⟨*acyuta* caus. 1.1⟩ √*bhās[ṛ]*...दीप्तौ – to shine; (caus.:) to cause to shine, to illuminate

सूर्यः the sun ⟨1.1⟩ m. *sūrya*

न not ⟨*avyaya*⟩

शशाङ्कः the moon ⟨1.1⟩ m. *śaśa-_aṅka* – 'whose mark is a rabbit'

न not ⟨*avyaya*⟩

पावकः the fire ⟨1.1⟩ m. *pāvaka* – 'purifyer'

यद् that which ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which

गत्वा [after] having gone ⟨*avyaya*⟩ √*gam[l̥]*...गतौ – to go; + *.[k]tvā*

न not ⟨*avyaya*⟩

निवर्तन्ते they return ⟨*acyuta* 1.3⟩ *ni.*√*vṛt[u]* – to stop to act; to return

तद् that ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that

धाम abode ⟨1.1⟩ n. *kṛṣṇanāma dhāman* (*dhāma*)

परमम् supreme ⟨1.1⟩ n. *parama* – highest

मम my ⟨6.1⟩ *kṛṣṇanāma asmad* – (last person) I

Subodhinī: यद् पदम् सूर्यादयः न प्रकाशयन्ति, यद् प्राप्य न निवर्तन्ते योगिनः, तद् धाम (स्व-रूपम्) परमम् मम । सूर्यादि-प्रकाश-अविषयत्वेन जडत्व-शीत-उष्णादि-दोष-प्रसङ्गः निरस्तः ॥१५.६॥

ननु च त्वदीयम् धाम प्राप्ताः सन्तः यदि न निवर्तन्ते, तर्हि 'सति सम्पद्य, न विदुः सति सम्पद्यामहे' (*Chāndogya-Up.* 6.9.2) इत्यादि श्रुतेः । सुषुप्ति-प्रलय-समये त्वद्-प्राप्तिः सर्वेषाम् अस्ति इति को नाम 'संसारी' स्यात् ? इति आशङ्क्य, संसारिणम् दर्शयति – 'मम' इति पञ्चभिः –

15.7

ममैवांशो जीवलोके जीवभूतः सनातनः ।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥७॥

जीव-भूतः जीव-लोके	the living being in this world
मम एव सनातनः अंशः,	is certainly My eternal part,
प्रकृति-स्थानि मनः-षष्ठानि इन्द्रियाणि	the six senses, with the mind, situated in *prakṛti*
कर्षति ।	it pulls

"The living entities in this conditioned world are My eternal fragmental parts. Due to conditioned life, they are struggling very hard with the six senses, which include the mind."

मम my ⟨6.1⟩ *kṛṣṇanāma asmad* – (last person) I

एव certainly ⟨*avyaya*⟩

अंशः part ⟨1.1⟩ m. *aṁśa* – portion, particle

जीव-लोके in the world of living beings ⟨7.1⟩ m. *jīva-loka* – world of living beings

जीव-भूतः the living being ⟨1.1⟩ m. *jīva-bhūta* – endowed with life, living being

सनातनः eternal ⟨1.1⟩ m. *sanātana*

मनः-षष्ठानि of which the sixth is the mind ⟨2.3⟩ n. *manaḥ-ṣaṣṭha*

इन्द्रियाणि senses ⟨2.3⟩ n. *indriya* – sense, sense organ

प्रकृति-स्थानि which are situated in nature ⟨2.3⟩ n. *prakṛti-stha* – situated in nature

कर्षति he pulls ⟨*acyuta* 1.1⟩ *kṛṣ[a]*...विलेखने आकर्षणे च – to draw, plough; attract

Subodhinī: मम एव अंशः, यः अयम् अ-विद्यया जीव-भूतः सनातनः (सर्वदा) संसारित्वेन प्रसिद्धः, असौ सुषुप्ति-प्रलययोः प्रकृतौ लीनतया स्थितानि मनः षष्ठम् येषाम् तानि इन्द्रियाणि पुनः जीव-लोके (संसारे) भोगार्थम् आकर्षति । एतद् च कर्म-इन्द्रियाणाम् प्राणस्य च उपलक्षणार्थम् । अयम् भावः – सत्यम्, सुषुप्ति-प्रलययोः अपि मद्-अंशत्वात् सर्वस्य अपि जीवमात्रस्य मयि लयात् अस्ति एव मद्-प्राप्तिः, तथापि अ-विद्यया आवृतस्य स-अनुशयस्य स-प्रकृतिके मयि लयः, नतु शुद्धे । तद् उक्तम् – 'अ-व्यक्तात् व्यक्तयः सर्वाः प्रभवन्ति' (8.18) इत्यादिना । अतः च पुनः संसाराय निर्गच्छन्, अ-विद्वान् प्रकृतौ लीनतया स्थितानि स्व-उपाधि-भूतानि इन्द्रियाणि आकर्षति । विदुषाम् तु (शुद्ध-स्वरूप-प्राप्तेः) न आवृत्तिः इति ॥१५.७॥

तानि आकृष्य, किम् करोति ? इति अत्र आह – 'शरीरम्' इति –

Note: According to Baladeva, the soul is 'dragging' (*karṣati*) the six senses like a person bound from the feet with chains. According to Śrīdhara Svāmī, a soul 'attracts' (*karṣati*) a set of material senses at the time of creation.

15.8

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥८॥

ईश्वरः यद् शरीरम् अवाप्नोति,	when the lord (the soul) obtains a body,
यद् च अपि उत्क्रामति,	and also when he leaves it,
वायुः आशयात् गन्धान् इव	as the air [takes] aromas from its place
एतानि गृहीत्वा	[after] taking these [senses]
संयाति ।	he attains [another body]

"The living entity in the material world carries his different conceptions of life from one body to another as the air carries aromas. Thus he takes one kind of body and again quits it to take another."

शरीरम् **a body** ⟨2.1⟩ n. *śarīra*
यद् **that which** ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
अवाप्नोति **he obtains** ⟨*acyuta* 1.1⟩ *ava.√āp[l]* – to obtain
यद् **that which** ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
च **and** ⟨*avyaya*⟩
अपि **also** ⟨*avyaya*⟩
उत्क्रामति **he leaves** ⟨*acyuta* 1.1⟩ *ud.√kram[u]* – to step out, leave
ईश्वरः **the lord** ⟨1.1⟩ m. *īśvara*
गृहीत्वा **[after] taking** ⟨*avyaya*⟩ *√grah[a]*...उपादाने – to take; + *.[k]tvā*
एतानि **these** ⟨2.3⟩ n. *kṛṣṇanāma etad* – (first person) he, this

संयाति **he attains** ⟨*acyuta* 1.1⟩ *sam.√yā* – to attain
वायुः **the air** ⟨1.1⟩ m. *vāyu* – air, wind, Vāyu
गन्धान् **aromas** ⟨2.3⟩ m. *gandha* – aroma, smell
इव **like** ⟨*avyaya*⟩
आशयात् **from the resting place** ⟨5.1⟩ m. *āśaya* – resting place

Subodhinī: यद् (-यदा) शरीर-अन्तरम् कर्म-वशात् अवाप्नोति, यतः च शरीरात् उत्क्रामति, ईश्वरः (देहादीनाम् स्वामी), तदा पूर्वस्मात् शरीरात् एतानि गृहीत्वा, तद् शरीर-अन्तरम् सम्यक् याति । शरीरे सति, एव इन्द्रिय-ग्रहणे दृष्टान्तः – आशयात् (स्व-स्थानात्, कुसुम-आदेः सकाशात्) गन्धान् (गन्धवतः सूक्ष्मान् अंशान्) गृहीत्वा, यथा वायुः गच्छति तद्वत् ॥१५.८॥

तानि एव इन्द्रियाणि दर्शयन्, यद्-अर्थम् गृहीत्वा गच्छति, तद् आह – 'श्रोत्रम्' इति –

15.9

श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चायं विषयानुपसेवते ॥९॥

श्रोत्रम् चक्षुः स्पर्शनम् च	ears, eyes and the sense of touch
रसनम् घ्राणम् एव च मनः च	tongue, nose and mind
अधिष्ठाय	[after] presiding over
अयम् विषयान् उपसेवते ।	this [soul] enjoys sense objects

"The living entity, thus taking another gross body, obtains a certain type of ear, eye, tongue, nose and sense of touch, which are grouped about the mind. He thus enjoys a particular set of sense objects."

श्रोत्रम् **the ear** ⟨2.1⟩ n. *śrotra*
चक्षुः **the eye** ⟨2.1⟩ n. *cakṣus (cakṣuḥ)*
स्पर्शनम् **the sense of touch** ⟨2.1⟩ n. *sparśana* – 'touching'
च **and** ⟨*avyaya*⟩
रसनम् **the tongue** ⟨2.1⟩ n. *rasana* – 'tasting'
घ्राणम् **the nose** ⟨2.1⟩ n. *ghrāṇa* – 'smelling'
एव **certainly** ⟨*avyaya*⟩
च **and** ⟨*avyaya*⟩
अधिष्ठाय **[after] presiding** ⟨*avyaya*⟩ *adhi.√sthā* – to presiding; + *.ya[p]*
मनः **the mind** ⟨2.1⟩ n. *manas (manaḥ)*
च **and** ⟨*avyaya*⟩
अयम् **this** ⟨1.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this

विषयान् **sense objects** ⟨2.3⟩ m. *viṣaya* – sense object
उपसेवते **he serves** ⟨*acyuta* 1.1⟩ *upa.√sev[r]* – to serve

Subodhinī: श्रोत्रादीनि बाह्य-इन्द्रियाणि मनः च (अन्तः-करणम्) अधिष्ठाय (आश्रित्य), शब्दादीन् विषयान् अयम् जीवः उपभुङ्क्ते ॥१५.९॥
ननु च कार्य-कारण-सङ्घात-व्यतिरेकेण एवम्-भूतम् आत्मानम् सर्वे अपि किम् न पश्यन्ति ? तत्र आह – 'उत्क्रामन्तम्' इति –

15.10

उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम् ।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥१०॥

उत्क्रामन्तम्, स्थितम् वा अपि, भुञ्जानम् वा	either leaving, staying or enjoying
गुणान्वितम्	[the *jīva*] endowed with senses
विमूढाः न अनुपश्यन्ति,	the fools do not understand,
ज्ञान-चक्षुषः पश्यन्ति ।	[but] those with the eye of knowledge see

"The foolish cannot understand how a living entity can quit his body, nor can they understand what sort of body he enjoys under the spell of the modes of nature. But one whose eyes are trained in knowledge can see all this."

उत्क्रामन्तम् **him who is leaving** ⟨2.1⟩ m. *utkrāmat* (*ud.√kram[u]* – to step out, leave; + *.[ś]at[r]*) – [while] leaving
स्थितम् **him who stays** ⟨2.1⟩ m. *sthita* (*√sthā*...स्थाने – to stand; + *.[k]ta*) – standing, staying, remaining
वा **or** ⟨*avyaya*⟩
अपि **also** ⟨*avyaya*⟩
भुञ्जानम् **him who enjoys** ⟨2.1⟩ m. *bhuñjāna* (*√bhuj[a]*...पालन-अभ्यवहारयोः – to govern; enjoy; + *.[ś]āna*) – [while] enjoying
वा **or** ⟨*avyaya*⟩
गुणान्वितम् **him who is endowed with senses** ⟨2.1⟩ m. *guṇa-_anvita*...गुणैः अन्वितः इति गुणान्वितः – endowed with the *guṇas* or senses
विमूढाः **those who are bewildered** ⟨1.3⟩ m. *vimūḍha* – bewildered
न **not** ⟨*avyaya*⟩
अनुपश्यन्ति **they see** ⟨*acyuta* 1.3⟩ *anu.√dṛś[ir]* – to look at, consider
पश्यन्ति **they see** ⟨*acyuta* 1.3⟩ *√dṛś[ir]*...प्रेक्षणे – to see
ज्ञान-चक्षुषः **he whose eye is knowledge** ⟨1.3⟩ m. *jñāna-cakṣus (-cakṣuḥ)*...ज्ञानम् चक्षुः यस्य, सः ज्ञान-चक्षुः

Subodhinī: उत्क्रामन्तम् देहात् देह-अन्तरम् गच्छन्तम्, तस्मिन् एव देहे स्थितम् वा, विषयान् भुञ्जानम् वा, गुण-अन्वितम् (इन्द्रियादि-युक्तम्) जीवम् विमूढाः न अनुपश्यन्ति (न आलोकयन्ति), ज्ञानम् एव चक्षुः येषाम् ते विवेकिनः पश्यन्ति ॥१५.१०॥
दुर्ज्ञेयः च अयम्, यतः विवेकिषु अपि केचिद् एव पश्यन्ति, केचिद् न पश्यन्ति इति आह – 'यतन्तः' इति –

15.11

यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम् ।
यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ॥११॥

यतन्तः योगिनः च	the endeavoring *yogīs* also
एनम् आत्मनि अवस्थितम् पश्यन्ति,	see this [soul] situated in themselves,
यतन्तः अपि	but although endeavoring
अ-चेतसः अ-कृतात्मानः	the unintelligent unenlightened
एनम् न पश्यन्ति ।	do not see it

"The endeavoring transcendentalists, who are situated in self-realization, can see all this clearly. But those whose minds are not developed and who are not situated in self-realization cannot see what is taking place, though they may try to."

यतन्तः **those who are endeavoring** ⟨1.3⟩ m. *yatat* (*√yat[ī]*...प्रयत्ने – to endeavor; + *.[ś]at[r]*) – [while] endeavoring
योगिनः ***yogīs*** ⟨1.3⟩ m. *yogin (yogī)*
च **and** ⟨*avyaya*⟩
एनम् **this** ⟨2.1⟩ m. *kṛṣṇanāma etad* – (first person) he, this
पश्यन्ति **they see** ⟨*acyuta* 1.3⟩ *√dṛś[ir]*...प्रेक्षणे – to see
आत्मनि **in the self** ⟨7.1⟩ m. *ātman (ātmā)* – the self, soul
अवस्थितम् **situated** ⟨2.1⟩ m. *avasthita* (*ava.√sthā* – to stay; + *.[k]ta*)
यतन्तः **those who are endeavoring** ⟨1.3⟩ m. *yatat* (*√yat[ī]*...प्रयत्ने – to endeavor; + *.[ś]at[r]*) – [while] endeavoring
अपि **also** ⟨*avyaya*⟩
अ-कृतात्मानः **those whose mind is not made [pure]** ⟨1.3⟩ m. *a-kṛta-_ātman (-ātmā)*
न **not** ⟨*avyaya*⟩
एनम् **this** ⟨2.1⟩ m. *kṛṣṇanāma etad* – (first person) he, this
पश्यन्ति **they see** ⟨*acyuta* 1.3⟩ *√dṛś[ir]*...प्रेक्षणे – to see
अ-चेतसः **unintelligent** ⟨1.3⟩ m. *a-cetas (-cetaḥ)* – without consciousness

Subodhinī: यतन्तः (ध्यानादिभिः प्रयतमानाः) योगिनः केचिद् एनम् आत्मानम् आत्मनि (देहे) अवस्थितम् विविक्तम् पश्यन्ति । शास्त्र-अभ्यासादिभिः प्रयत्नम् कुर्वाणाः अपि, अकृत-आत्मानः अविशुद्ध-चित्ताः अतएव अ-चेतसः (मन्द-मतयः) एनम् न पश्यन्ति ॥१५.११॥

तद् एवम् 'न तद् भासयते सूर्यः (15.6) इत्यादिना पारमेश्वरम् परम् धाम उक्तम्, तद्-प्राप्तानाम् च अपुनः-आवृत्तिः उक्ता । तत्र च संसारिणः अ-भावम् आशङ्क्य, संसारि-स्वरूपम् देहादि-व्यतिरिक्तम् दर्शितम् । इदानीम् तद् एव पारमेश्वरम् रूपम् अनन्त-शक्तित्वेन निरूपयति – 'यद्' इत्यादि चतुर्भिः –

15.12

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥१२॥

यद् आदित्य-गतम् तेजः	the splendor in the sun which
अ-खिलम् जगत् भासयते,	illuminates the whole world,
यद् चन्द्रमसि, यद् अग्नौ च,	and also that which is in the moon and fire,
तद् तेजः मामकम् विद्धि !	that splendor know to be Mine!

"The splendor of the sun, which dissipates the darkness of this whole world, comes from Me. And the splendor of the moon and the splendor of fire are also from Me."

यद् **that which** ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which

आदित्य-गतम् **situated in the sun** ⟨1.1⟩ n. *āditya-gata*...आदित्ये गतम् इति आदित्य-गतम् – gone or residing in the sun

तेजः **the splendor** ⟨1.1⟩ n. *tejas* (*tejaḥ*; from √*tij[a]*...निशाने क्षमायां च – to sharpen; tolerate) – sharpness; radiance, heat; brilliance, splendor; prowess, boldness; semen

जगत् **the world** ⟨2.1⟩ n. *jagat* – universe

भासयते **it illuminates** ⟨*acyuta* caus. 1.1⟩ √*bhās[r]*...दीप्तौ – to shine; caus.: to cause to shine, to illuminate

अ-खिलम् **the complete** ⟨2.1⟩ n. *a-khila*

यद् **that which** ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which

चन्द्रमसि **in the moon** ⟨7.1⟩ m. *candramas* (*candramaḥ*) – moon

यद् **that which** ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which

च **and** ⟨*avyaya*⟩

अग्नौ **in fire** ⟨7.1⟩ m. *agni* – fire

तद् **that** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that

तेजः **the splendor** ⟨2.1⟩ n. *tejas* (*tejaḥ*; from √*tij[a]*...निशाने क्षमायां च – to sharpen; tolerate) – sharpness; radiance, heat; brilliance, splendor; prowess, boldness; semen

विद्धि **you must know** ⟨*vidhātā* 2.1⟩ √*vid[a]* 2P...ज्ञाने – to know

मामकम् **mine** ⟨2.1⟩ n. *kṛṣṇanāma māmaka*

Subodhinī: आदित्यादिषु स्थितम् यद् अनेक-प्रकारम् तेजः विश्वम् प्रकाशयति, तद् सर्वम् तेजः मदीयम् एव जानीहि ॥१५.१२॥

15.13

गामाविश्य च भूतानि धारयाम्यहमोजसा ।
पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥१३॥

गाम् च आविश्य	[after] entering the earth
अहम् भूतानि ओजसा धारयामि,	I sustain [all] beings by [My] energy,
रसात्मकः सोमः च भूत्वा	and [after] becoming the nectar-moon
सर्वाः ओषधीः पुष्णामि ।	I nourish all plants

"I enter into each planet, and by My energy they stay in orbit. I become the moon and thereby supply the juice of life to all vegetables."

गाम् **the earth** ⟨2.1⟩ f. *go* (from √*gam[l]*...गतौ – to go) – 'which goes', the earth; cow and also sense organ ('which goes out to the sense objects')
(words with *go*:) *go-kula* – a herd of cows; *gopa*, *go-pāla* – a cowherd; *go-loka* – the spiritual world where Kṛṣṇa tends cows; *go-śāla* – cow-shed; *go-svāmin* (*-svāmī*) – 'master of cows' or 'master of the senses' (the *guru*)

आविश्य **[after] entering** ⟨*avyaya*⟩ *ā.*√*viś[a]* – to enter; + *.ya[p]*

च **and** ⟨*avyaya*⟩

भूतानि **beings** ⟨2.3⟩ n. *bhūta* (√*bhū*...सत्तायाम् – to be, exist, become; + *.[k]ta*) – past; an element, being, creature

धारयामि **I support** ⟨*acyuta* 3.1⟩ √*dhṛ[ñ]*...धारणे – to hold, support

अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

ओजसा **by energy** ⟨3.1⟩ n. *ojas* (*ojaḥ*) – strength, energy

पुष्णामि **I nourish** ⟨*acyuta* 3.1⟩ √*puṣ[a]*...पुष्टौ – to nourish
(also from √*puṣ[a]*...पुष्टौ): *poṣaṇa* – nourishing, maintaining

ओषधीः **plants** ⟨2.3⟩ f. *auṣadhi* (same as *auṣadhi*) – plant, herb

सर्वाः **all** ⟨2.3⟩ f. *kṛṣṇanāma sarvā* (*.ā[p]*)

सोमः **the moon** ⟨1.1⟩ m. *soma*

भूत्वा **[after] becoming** ⟨*avyaya*⟩ √*bhū*...सत्तायाम् – to be, exist, become; + *.[k]tvā*

रसात्मकः **nectar-made** ⟨1.1⟩ m. *rasa-_ātmaka*...रसः आत्मा यस्य, सः रसात्मकः – whose essence is nectar, taste

Subodhinī: गाम् (पृथ्वीम्) ओजसा (बलेन) आधिष्ठाय, अहम् एव चर-अचराणि भूतानि धारयामि । अहम् एव रसमयः सोमः भूत्वा, व्रीहि-आदि-ओषधीः सर्वाः संवर्धयामि ॥१५.१३॥

15.14

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥१४॥

अहम् वैश्वानरः भूत्वा	I, [after] becoming the fire of digestion
प्राणिनाम् देहम् आश्रितः	having entered the body of [all] beings
प्राणापान-समायुक्तः	endowed with *prāṇa* and *apāna*
चतुर्विधम् अन्नम् पचामि ।	digest four kinds of food

"I am the fire of digestion in the bodies of all living entities, and I join with the air of life, outgoing and incoming, to digest the four kinds of foodstuff."

अहम्	**I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
वैश्वानरः	**the fire of digestion** ⟨1.1⟩ m. *vaiśvānara* (from *viśvā-nara*) – 'belonging to all men', omnipresent, universal; the sun; a special fire: the fire of digestion
भूत्वा	**[after] becoming** ⟨*avyaya*⟩ √*bhū*...सत्तायाम् – to be, exist, become; + *.[k]tvā*
प्राणिनाम्	**of living beings** ⟨6.3⟩ m. *prāṇin* (*prāṇī*) – living being
देहम्	**the body** ⟨2.1⟩ m. *deha*
आश्रितः	**taken shelter** ⟨1.1⟩ m. *āśrita* (*ā.*√*śri[ñ]* – to take shelter; + *.[k]ta*)
प्राणापान-समायुक्तः	**endowed with *prāṇa* and *apāna*** ⟨1.1⟩ m. *prāṇa-_apāna-samāyukta*...प्राणेन च अपानेन च समायुक्तः इति प्राणापान-समायुक्तः समायुक्त (*sam.ā.*√*yuj[ir]* – to join; + *.[k]ta*) – united, joined, endowed
पचामि	**I digest** ⟨*acyuta* 3.1⟩ √*[ḍu]pac[aṣ]*...पाके – to cook, digest
अन्नम्	**food** ⟨2.1⟩ n. *anna* – food, grain
चतुर्विधम्	**four kinds** ⟨2.1⟩ n. *catuḥ-_vidha*

Subodhinī: वैश्वानरः (जाठरः) भूत्वा, प्राणिनाम् देहस्य अन्तः प्रविश्य, प्राण-अपानाभ्याम् तद्-उद्दीपकाभ्याम् सहितः, प्राणिभिः भुक्तम् 'भक्ष्यम् भोज्यम् लेह्यम् चोष्यम् च' इति चतुर्विधम् अन्नम् पचामि । तत्र यद् दन्तैः अवखण्ड्य अवखण्ड्य भक्ष्यते अपूपादि, तद् 'भक्ष्यम्' । यद् तु केवलम् जिह्वया विलोड्य निगीर्यते पायसादि, तद् 'भोज्यम्' । यद् तु जिह्वायाम् निक्षिप्य रस-आस्वादेन क्रमशः निगीर्यते द्रवी-भूतम् गुडादि, तद् 'लेह्यम्' । यद् तु दंष्ट्रादिभिः निष्पीड्य रस-अंशम् निगीर्य अवशिष्टम् त्यज्यते इक्षु-दण्डादि, तद् 'चोष्यम्' इति भेदः ॥१५.१४॥

15.15

सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च ।
वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ॥१५॥

अहम् सर्वस्य च हृदि सन्निविष्टः,	I am seated in the heart of all beings,
मत्तः स्मृतिः ज्ञानम् अपोहनम् च,	from Me [come] memory, knowledge and forgetfulness,
सर्वैः वेदैः च अहम् एव वेद्यः,	I alone am to be known through all the *Vedas*,
अहम् वेदान्त-कृत् वेद-विद् एव च ।	I am indeed the author of *Vedānta* and the knower of the *Vedas*

"I am seated in everyone's heart, and from Me come remembrance, knowledge and forgetfulness. By all the Vedas, I am to be known. Indeed, I am the compiler of Vedānta, and I am the knower of the Vedas."

सर्वस्य	**of all** ⟨6.1⟩ m. *kṛṣṇanāma sarva* – all
च	**and** ⟨*avyaya*⟩
अहम्	**I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
हृदि	**in the heart** ⟨7.1⟩ n. *hṛd* – heart
सन्निविष्टः	**entered** ⟨1.1⟩ m. *sanniviṣṭa* (*sam.ni.*√*viś[a]* – to enter; + *.[k]ta*)
मत्तः	**from me** ⟨*avyaya*⟩ (*mattas*; from *asmad* + *.tas[i]*) – from me, than me
स्मृतिः	**memory** ⟨1.1⟩ f. *smṛti*
ज्ञानम्	**knowledge** ⟨1.1⟩ n. *jñāna*
अपोहनम्	**forgetting** ⟨1.1⟩ n. *apohana* – 'taking away'
च	**and** ⟨*avyaya*⟩
वेदैः	**through the *Vedas*** ⟨3.3⟩ m. *veda* – the *Veda*
च	**and** ⟨*avyaya*⟩
सर्वैः	**through all** ⟨3.3⟩ m. *kṛṣṇanāma sarva* – all
अहम्	**I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
एव	**certainly** ⟨*avyaya*⟩
वेद्यः	**who is to be known** ⟨1.1⟩ m. *vedya* (√*vid[a]* 2P...ज्ञाने – to know; + *.ya*) – to be known
वेदान्त-कृत्	**who makes the *Vedānta*** ⟨1.1⟩ m. *vedānta-kṛt*...यः वेदान्तम् करोति, सः वेदान्त-कृत्
वेद-विद्	**who knows the *Vedas*** ⟨1.1⟩ m. *veda-vid*...यः वेदान् वेत्ति, सः वेद-विद्
एव	**certainly** ⟨*avyaya*⟩
च	**and** ⟨*avyaya*⟩
अहम्	**I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

Subodhinī: सर्वस्य प्राणि-जातस्य हृदि सम्यक् अन्तर्यामि-रूपेण प्रविष्टः अहम् । अतः च मत्तः एव हेतोः प्राणिमात्रस्य पूर्व-अनुभूतार्थ-विषया स्मृतिः भवति । ज्ञानम् च विषय-इन्द्रिय-सम्प्रयोग-जम् भवति । अपोहनम् च तयोः प्रमोषः भवति । वेदैः च सर्वैः तद्-तद्-देवतादि-रूपेण अहम् एव वेद्यः । वेदान्त-कृत् (तद्-सम्प्रदाय-प्रवर्तकः) च, ज्ञान-दः गुरुः अहम् इति अर्थः । वेद-विद् एव च, वेदार्थ-विद् अहम् एव ॥१५.१५॥

इदानीम् 'तद् धाम परमम् मम' (15.6) इति यद् उक्तम् तद् स्वकीयम् सर्वोत्तमत्वम् दर्शयति – 'द्वौ इमौ' इति त्रिभिः –

15.16

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥१६॥

लोके इमौ द्वौ पुरुषौ	there are two beings in the world –
क्षरः च अ-क्षरः एव च,	the *kṣara* (perishable) and *a-kṣara* (imperishable),
क्षरः सर्वाणि भूतानि	all created beings are *kṣara*
कूट-स्थः अ-क्षरः उच्यते ।	the changeless [spirit] is called *a-kṣara*

"There are two classes of beings, the fallible and the infallible. In the material world every living entity is fallible, and in the spiritual world every living entity is called infallible."

द्वौ **two** ⟨1.2⟩ m. *dvi*
इमौ **these** ⟨1.2⟩ m. *kṛṣṇanāma idam* – (first person) he, this
पुरुषौ **persons** ⟨1.2⟩ m. *puruṣa* – person
लोके **in the world** ⟨7.1⟩ m. *loka* – place, world, people
क्षरः **the *kṣara*** ⟨1.1⟩ m. *kṣara* – perishable
च **and** ⟨*avyaya*⟩
अ-क्षरः **the *a-kṣara*** ⟨1.1⟩ m. *a-kṣara* – imperishable
एव **certainly** ⟨*avyaya*⟩
च **and** ⟨*avyaya*⟩
क्षरः ***kṣara*** ⟨1.1⟩ m. *kṣara* – perishable
सर्वाणि **all** ⟨1.3⟩ n. *kṛṣṇanāma sarva*
भूतानि **beings** ⟨1.3⟩ n. *bhūta* (√*bhū*...सत्तायाम् – to be, exist, become; + *.[k]ta*) – past; an element, being, creature
कूट-स्थः **the changeless** ⟨1.1⟩ m. *kūṭa-stha* – 'standing on top', anything prominent, unmoving, changeless; situated in transcendence; the changeless spirit
अ-क्षरः ***a-kṣara*** ⟨1.1⟩ m. *a-kṣara* – imperishable
उच्यते **they are called** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak

Subodhinī: क्षरः च अ-क्षरः च इति द्वौ इमौ पुरुषौ लोके प्रसिद्धौ । तौ एव आह – तत्र क्षरः पुरुषः नाम सर्वाणि भूतानि ब्रह्म-आदि-स्थावर-अन्तानि शरीराणि, अ-विवेकि-लोकस्य शरीरेषु एव 'पुरुषत्व'-प्रसिद्धेः । कूटः (शिला-राशिः पर्वतः इव) देहेषु नश्यत्सु अपि निर्विकारतया तिष्ठति इति कूट-स्थः चेतनः भोक्ता, सः तु अक्षरः पुरुषः इति उच्यते विवेकिभिः ॥१५.१६॥
यद् अर्थम् एतौ लक्षितौ, तम् आह – 'उत्तमः' इति –

15.17

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥१७॥

उत्तमः पुरुषः तु अन्यः	but the Supreme Person is another
परमात्मा इति उदाहृतः,	known as Paramātmā,
यः अ-व्ययः ईश्वरः	the imperishable Lord who
लोक-त्रयम् आविश्य बिभर्ति ।	[after] entering the three worlds, sustains them

"Besides these two, there is the greatest living personality, the Supreme Soul, the imperishable Lord Himself, who has entered the three worlds and is maintaining them."

उत्तमः **the supreme** ⟨1.1⟩ m. *uttama* – highest, best
पुरुषः **person** ⟨1.1⟩ m. *puruṣa*
तु **but** ⟨*avyaya*⟩
अन्यः **another** ⟨1.1⟩ m. *kṛṣṇanāma anya* – other
परमात्मा **Supersoul** ⟨1.1⟩ m. *parama-_ātman (-ātmā)*
इति **thus** ⟨*avyaya*⟩
उदाहृतः **who is named** ⟨1.1⟩ m. *udāhṛta* (*ud.ā.*√*hṛ[ñ]* – to set up, declare, illustrate; + *.[k]ta*) – declared
यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
लोक-त्रयम् **the three worlds** ⟨2.1⟩ m. *loka- traya*...लोकानाम् त्रयम् इति लोक-त्रयम् – 'the triad of worlds'
आविश्य **[after] entering** ⟨*avyaya*⟩ *ā.*√*viś[a]* – to enter; + *ya[p]*
बिभर्ति **he sustains** ⟨*acyuta* 1.1⟩ √*[du]bhṛ[ñ]*...धारण-पोषणयोः – to hold; nourish
अ-व्ययः **the imperishable** ⟨1.1⟩ m. *a-vyaya* – unchangeable, imperishable
ईश्वरः **the Lord** ⟨1.1⟩ m. *īśvara*

Subodhinī: एताभ्याम् क्षर-अक्षराभ्याम् अन्यः विलक्षणः तु उत्तमः पुरुषः । वैलक्षण्यम् एव आह – 'परमः' च असौ 'आत्मा' इति च उदाहृतः (उक्तः) श्रुतिभिः । आत्मत्वेन क्षरात् (अ-चेतनात्) विलक्षणः, परमत्वेन अ-क्षरात् चेतनात् भोक्तुः विलक्षणः इति अर्थः । परमात्मत्वम् एव दर्शयति – 'यः लोक-त्रयम्' इति । यः ईश्वरः (ईशन-शीलः) अ-व्ययः च (निर्विकारः) एव सन्, लोक-त्रयम् कृत्स्नम् आविश्य, बिभर्ति (पालयति) ॥१५.१७॥
एवम्-भूतम् पुरुषोत्तमत्वम् आत्मनः नाम-निर्वचनेन दर्शयति – 'यस्मात्' इति –

15.18

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥१८॥

यस्मात् अहम् क्षरम् अतीतः	because I am beyond the *kṣara*
अ-क्षरात् अपि च उत्तमः,	and also superior to the *a-kṣara,*
अतः लोके वेदे च	therefore, in this world and in the *Veda*
प्रथितः पुरुषोत्तमः अस्मि ।	I am the celebrated Supreme Person

"Because I am transcendental, beyond both the fallible and the infallible, and because I am the greatest, I am celebrated both in the world and in the Vedas as that Supreme Person."

यस्मात्	**because** ⟨5.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
क्षरम्	**the *kṣara*** ⟨2.1⟩ m. *kṣara* – perishable
अतीतः	**surpassed** ⟨1.1⟩ m. *atīta (ati.√i[ṇ]* – to pass; + *.[k]ta)*
अहम्	**I am** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
अ-क्षरात्	**than the *a-kṣara*** ⟨5.1⟩ m. *a-kṣara* – indestructible
अपि	**also** ⟨*avyaya*⟩
च	**and** ⟨*avyaya*⟩
उत्तमः	**superior** ⟨1.1⟩ m. *uttama* – highest, best
अतः	**therefore** ⟨*avyaya*⟩ (*atas;* from *idam* + *.tas[i]*) – 'from this', (time:) from now; (cause:) therefore
अस्मि	**I am** ⟨*acyuta* 3.1⟩ √*as[a]*...भुवि – to be, exist
लोके	**in the world** ⟨7.1⟩ m. *loka* – place, world, people
वेदे	**in the *Veda*** ⟨7.1⟩ m. *veda* – the *Veda*
च	**and** ⟨*avyaya*⟩
प्रथितः	**celebrated** ⟨1.1⟩ m. *prathita* (√*prath[a]*...प्रख्याने – to become famous; + *.[k]ta)*
पुरुषोत्तमः	**the Supreme Person** ⟨1.1⟩ m. *puruṣa-_uttama*

Subodhinī: यस्मात् क्षरम् (जड-वर्गम्) अतिक्रान्तः अहम् नित्य-मुक्तत्वात्, अ-क्षरात् (चेतन-वर्गात्) अपि उत्तमः च नियन्तृत्वात्, अतः लोके वेदे च 'पुरुषोत्तमः' इति प्रथितः (प्रख्यातः) अस्मि । तथाच श्रुतिः – 'सः वा अयम् आत्मा सर्वस्य वशी, सर्वस्य ईशानः, सर्वस्य अधिपति, सर्वम् इदम् प्रशास्ति' (*Bṛhad-āraṇyaka-Up.* 5.6.1) इत्यादिः ॥१५.१८॥

एवम्-भूत-ईश्वरस्य ज्ञातुः फलम् आह – 'यः माम्' इति –

15.19

यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् ।
स सर्वविद्भजति मां सर्वभावेन भारत ॥१९॥

हे भारत !	O Arjuna!
यः अ-सम्मूढः	one who, undeluded
एवम् माम् पुरुषोत्तमम् जानाति,	knows Me thus as the Supreme Person,
सः सर्व-विद्	he knows everything
सर्व-भावेन माम् भजति ।	and worships Me with all his heart

"Whoever knows Me as the Supreme Personality of Godhead, without doubting, is the knower of everything. He therefore engages himself in full devotional service to Me, O son of Bharata."

यः	**he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
माम्	**me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
एवम्	**thus** ⟨*avyaya*⟩
अ-सम्मूढः	**being undeluded** ⟨1.1⟩ m. *a-sammūḍha*
जानाति	**he knows** ⟨*acyuta* 1.1⟩ √*jñā* 9P...अवबोधने – to know
पुरुषोत्तमम्	**the Supreme Person** ⟨2.1⟩ m. *puruṣa-_uttama*
सः	**he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
सर्व-विद्	**who knows everything** ⟨1.1⟩ m. *sarva-vid*...यः सर्वम् वेत्ति, सः सर्व-विद्
भजति	**he worships** ⟨*acyuta* 1.1⟩ √*bhaj[a]* 1U...सेवायाम् – to serve, worship
माम्	**me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
सर्व-भावेन	**with all his heart** ⟨3.1⟩ m. *sarva-bhāva* – whole heart
भारत	**O Arjuna!** ⟨8.1⟩ m. *bhārata* – 'descendant of Bharata'

Subodhinī: एवम्-उक्त-प्रकारेण अ-सम्मूढः (निश्चित-मतिः) सन्, यः माम् पुरुषोत्तमम् जानाति, सः सर्व-भावेन (सर्व-प्रकारेण) माम् एव भजति । ततः सर्व-विद् (सर्व-ज्ञः) भवति ॥१५.१९॥

अध्यायार्थम् उपसंहरति – 'इति' इति –

15.20

इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ।
एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ॥२०॥

हे अनघ !	O Arjuna!
इति इदम् गुह्यतमम् शास्त्रम्	thus this most confidential teaching

मया उक्तम्,	was spoken by Me,
हे भारत !	O Arjuna!
एतद् बुद्ध्वा	[after] knowing this
बुद्धिमान् कृतकृत्यः च स्यात् ।	one will be wise and accomplished

"This is the most confidential part of the Vedic scriptures, O sinless one, and it is disclosed now by Me. Whoever understands this will become wise, and his endeavors will know perfection."

इति **thus** ⟨*avyaya*⟩
गुह्यतमम् **the most secret** ⟨1.1⟩ n. *guhyatama* (*.tama*)
शास्त्रम् **teaching** ⟨1.1⟩ n. *śāstra* – teaching, scripture
इदम् **this** ⟨1.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this
उक्तम् **spoken** ⟨1.1⟩ n. *ukta* (√*vac[a]*...परिभाषणे – to speak; + *.[k]ta*)
मया **by me** ⟨3.1⟩ *kṛṣṇanāma asmad* – (last person) I
अनघ **O Arjuna!** ⟨8.1⟩ m. *an-agha* – 'who is sinless'
एतद् **this** ⟨2.1⟩ n. *kṛṣṇanāma etad* – (first person) he, this
बुद्ध्वा **[after] knowing** ⟨*avyaya*⟩ √*budh[a]*...अवगमने – to understand, know; + *.[k]tvā*
बुद्धिमान् **one who is wise** ⟨1.1⟩ m. *buddhimat* (*.mat[u]*) – 'having *buddhi* (intelligence)'
स्यात् **he would be** ⟨*vidhi* 1.1⟩ √*as[a]*...भुवि – to be, exist
कृत-कृत्यः **one who is accomplished** ⟨1.1⟩ m. *kṛta-kṛtya*...कृतम् कृत्यम् येन, सः कृत-कृत्यः – 'by whom the duty is done'
च **and** ⟨*avyaya*⟩
भारत **O Arjuna!** ⟨8.1⟩ m. *bhārata* – 'descendant of Bharata'

Subodhinī: इति अनेन सङ्क्षेप-प्रकारेण गुह्यतमम् (अतिरहस्यम्) सम्पूर्णम् शास्त्रम् एव मया उक्तम्, न पुनः विंशति-श्लोकम् अध्यायमात्रम्, हे अनघ (व्यसन-शून्य) । अतः एतद् मद्-उक्तम् शास्त्रम् बुद्ध्वा, बुद्धिमान् (सम्यक्-ज्ञानी) कृत-कृत्यः च स्यात्, यः अपि कः अपि – 'हे भारत, त्वम् कृत-कृत्यः असि !' इति किम् वक्तव्यम् इति भावः ॥१५.२०॥

ओं तत्सदिति
श्रीमहाभारते शतसाहस्त्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि
श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगो नाम पञ्चदशो ऽध्यायः ॥१५॥

अथ षोडशो ऽध्यायः

अथ षोडशः अध्यायः । now the sixteenth chapter

Subodhinī: पूर्व-अध्याय-अन्ते 'एतद् बुद्ध्वा बुद्धिमान् स्यात् कृत-कृत्यः च भारत' (15.20) इति उक्तम् । तत्र 'कः एतद् तत्त्वम् बुद्ध्यते, कः वा न बुद्ध्यते ?' इति अपेक्षायाम् तत्त्व-ज्ञाने अधिकारिणः अनधिकारिणः च विवेकार्थम् षोडश-अध्याय-आरम्भः । निरूपिते हि कार्यार्थे अधिकारि-जिज्ञासा भवति । तद् उक्तम् भट्टैः –

भारः यः येन वोढव्यः सः प्राक् आन्दोलितः यदा ।
तदा कः तस्य वोढ इति शक्यम् कर्तुम् निरूपणम् ॥

इति । तत्र अधिकारि-विशेषण-भूताम् दैवीम् सम्पदम् आह [श्री-भगवान् उवाच] – 'अ-भयम्' इति त्रिभिः –

16.1...3

श्रीभगवानुवाच
अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥१॥

श्री-भगवान् उवाच –	Śrī Kṛṣṇa said:
अ-भयम् सत्त्व-संशुद्धिः	fearlessness, purity of heart
ज्ञान-योग-व्यवस्थितिः	steadfastness in spiritual knowledge
दानम् दमः च यज्ञः च	charity, sense-control and sacrifice
स्वाध्यायः तपः आर्जवम्...	study of the *Vedas*, austerity, simplicity...

"The Supreme Personality of Godhead said: Fearlessness; purification of one's existence; cultivation of spiritual knowledge; charity; self-control; performance of sacrifice; study of the Vedas; austerity; simplicity; . . ."

श्रीभगवान् **Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'
उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
अ-भयम् **fearlessness** ⟨1.1⟩ n. *a-bhaya*
सत्त्व-संशुद्धिः **purity of being** ⟨1.1⟩ f. *sattva-saṁśuddhi*...सत्त्वस्य संशुद्धिः इति सत्त्व-संशुद्धिः
ज्ञान-योग-व्यवस्थितिः **steadfastness in spiritual knowledge** ⟨1.1⟩ f. *jñāna-yoga-vyavasthiti*...ज्ञान-योगे व्यवस्थितिः इति ज्ञान-योग-व्यवस्थितिः
दानम् **charity** ⟨1.1⟩ n. *dāna* – donation
दमः **sense-control** ⟨1.1⟩ m. *dama*
च **and** ⟨*avyaya*⟩

यज्ञः **sacrifice** ⟨1.1⟩ m. *yajña*

च **and** ⟨*avyaya*⟩

स्वाध्यायः **study of the *Vedas*** ⟨1.1⟩ m. *sva-_adhyāya* – 'own study', reciting sacred texts to oneself, study of the *Vedas*

तपः **austerity** ⟨1.1⟩ n. *tapas* (*tapaḥ*)

आर्जवम् **simplicity** ⟨1.1⟩ n. *ārjava* – straightforwardness, honesty, sincerity

Subodhinī: अ-भयम् भय-अभावः । सत्त्वस्य (चित्तस्य) संशुद्धिः सुप्रसन्नता । ज्ञान-योगे आत्म-ज्ञान-उपाये व्यवस्थितिः (परिनिष्ठा) । दानम् स्व-भोज्यस्य अन्न-आदेः यथा-उचितम् संविभागः । दमः बाह्य-इन्द्रिय-संयमः । यज्ञः यथा-अधिकारम् 'दर्श-पूर्णमास'-आदिः । स्वाध्यायः ब्रह्म-यज्ञादिः जप-यज्ञः वा । तपः उत्तर-अध्याये वक्ष्यमाणम् शारीरादि । आर्जवम् अ-वक्रता ॥१६.१॥

16.2

अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥२॥

. . . अ-हिंसा सत्यम् अ-क्रोधः	. . . non-violence, truthfulness, absence of anger
त्यागः शान्तिः अ-पैशुनम्	renunciation, peacefulness, absence of faultfinding
भूतेषु दया अ-लोलुप्त्वम्	compassion for all beings, absence of greed
मार्दवम् ह्रीः अ-चापलम् . . .	gentleness, modesty, steadiness . . .

". . . nonviolence; truthfulness; freedom from anger; renunciation; tranquillity; aversion to faultfinding; compassion for all living entities; freedom from covetousness; gentleness; modesty; steady determination . . ."

अ-हिंसा **non-violence** ⟨1.1⟩ f. *a-hiṁsā*

सत्यम् **truthfulness** ⟨1.1⟩ n. *satya* – true, real; truth

अ-क्रोधः **absence of anger** ⟨1.1⟩ m. *a-krodha*

त्यागः **renunciation** ⟨1.1⟩ m. *tyāga*

शान्तिः **peacefulness** ⟨1.1⟩ f. *śānti* – peace of mind

अ-पैशुनम् **absence of faultfinding** ⟨1.1⟩ n. *a-paiśuna*
from *piśuna* – backbitings, landerous, treacherous, malignant, base, wicked; (derived:) *piśāca* – a develish being

दया **compassion** ⟨1.1⟩ f. *dayā* (from √*day[a]*...दान-गति-हिंसा-दानेषु रक्षणे च – to give; go; harm; take; protect)

भूतेषु **towards beings** ⟨7.3⟩ n. *bhūta* (√*bhū*...सत्तायाम् – to be, exist, become; + .[*k*]*ta*) – past; an element, being, creature

अ-लोलुप्त्वम् **non-greediness** ⟨1.1⟩ n. *a-loluptva*
लोलुप्त्व (*lolupa*, 'greed' + .*tva* → *lolupatva*; the dropping of *a* is *ārṣa-prayoga*) – greediness

मार्दवम् **gentleness** ⟨1.1⟩ n. *mārdava* (from *mṛdu* – soft) – softness, soft-heartedness, kindness

ह्रीः **modesty** ⟨1.1⟩ f. *hrī* – shame, shyness, timidity

अ-चापलम् **absence of fickleness** ⟨1.1⟩ n. *a-cāpala*

Subodhinī: अ-हिंसा पर-पीडा-वर्जनम् । सत्यम् यथा-दृष्टार्थ-भाषणम् । अ-क्रोधः ताडितस्य अपि चित्ते क्षोभ-अनत्पत्तिः । त्यागः औदार्यम् । शान्तिः चित्त-उपरतिः । पैशुनम् परोक्षे पर-दोष-प्रकाशनम्, तद्-वर्जनम् अ-पैशुनम् । भूतेषु दीनेषु दया । अ-लोलुप्त्वम् लोभ-अभावः । अ-वर्ण-लोपः आर्षः । मार्दवम् मृदुत्वम् अ-क्रूरता । ह्रीः अ-कार्य-प्रवृत्तौ लोक-लज्ञा । अ-चापलम् व्यर्थ-क्रिया-राहित्यम् ॥१६.२॥

16.3

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥३॥

. . . तेजः क्षमा धृतिः शौचम्	. . . vigor, forgiveness, firmness, purity
अ-द्रोहः न अतिमानिता	absence of malice, not expecting honor –
हे भारत !	O Arjuna!
दैवीम् सम्पदम् अभिजातस्य भवन्ति ।	[these] belong to one born with godly nature

". . . vigor; forgiveness; fortitude; cleanliness; and freedom from envy and from the passion for honor – these transcendental qualities, O son of Bharata, belong to godly men endowed with divine nature."

तेजः **vigor** ⟨1.1⟩ n. *tejas* (*tejaḥ*; from √*tij[a]*...निशाने क्षमायां च – to sharpen; tolerate) – sharpness; radiance, heat; brilliance, splendor; prowess, boldness; semen

क्षमा **forgiveness** ⟨1.1⟩ f. *kṣamā*

धृतिः **firmness** ⟨1.1⟩ f. *dhṛti*

शौचम् **purity** ⟨1.1⟩ n. *śauca*

अ-द्रोहः **absence of malice** ⟨1.1⟩ m. *a-droha*

न **not** ⟨*avyaya*⟩

अतिमानिता **absence of excessive pride** ⟨1.1⟩ f. *atimānitā* (.*tā*[*p*])

भवन्ति **they are** ⟨*acyuta* 1.3⟩ √*bhū*...सत्तायाम् – to be, exist, become

सम्पदम् **the wealth** ⟨2.1⟩ f. *sampad* – success, accomplishment, perfection; bargain, attainment, acquisition, enjoyment, advantage, benefit, blessing; being, existence; right condition or method; excellence, glory, beauty; excess, abundance; fate, destiny

दैवीम् **godly** ⟨2.1⟩ f. *daivī*

अभिजातस्य **of one who is born with** ⟨6.1⟩ m. *abhijāta* (.[*k*]*ta*) – born with

भारत **O Arjuna!** ⟨8.1⟩ m. *bhārata* – 'descendant of Bharata'

Subodhinī: तेजः प्रागल्भ्यम् । क्षमा परिभव-आदिषु उत्पद्यमानेषु क्रोध-प्रतिबन्धः । धृतिः दुःखादिभिः अवसीदतः चित्तस्य स्थिरी-करणम् । शौचम् बाह्य-अभ्यन्तर-शुद्धिः । अ-द्रोहः जिघांसा-राहित्यम् । अतिमानिता आत्मनि अतिपूज्यत्व-अभिमानः तद्-अभावः 'न अतिमानिता' । एतानि अभय-आदिनी षड्विंशतिः लक्षणानि दैवीम् सम्पदम् अभिजातस्य भवन्ति । देव-योग्याम् सात्त्विकीम् सम्पदम् अभिजातस्य (तद्-आभिमुख्येन जातस्य) भावि-कल्याणस्य पुंसः भवन्ति इति अर्थः ॥१६.३॥ आसुरीम् सम्पदम् आह – 'दम्भः' इति –

16.4

दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम् ॥४॥

हे पार्थ !	O Arjuna!
दम्भः दर्पः अभिमानः च	deceit, pride and conceit
क्रोधः पारुष्यम् एव च अ-ज्ञानम् च	anger, harshness and ignorance
आसुरीम् सम्पदम् अभिजातस्य ।	belong to one born with demoniac nature

"Pride, arrogance, conceit, anger, harshness and ignorance – these qualities belong to those of demoniac nature, O son of Pṛthā."

दम्भः	**deceit** ⟨1.1⟩ m. *dambha* (from √*dambh[u]*...दम्भे – to cheat, hurt) – deceit, fraud, feigning, hypocrisy
दर्पः	**pride** ⟨1.1⟩ m. *darpa* (from √*dṛp[a]*...गर्व्वे – to be proud) – pride, arrogance, haughtiness, insolence, conceit; (derived: *darpaṇa* – 'causing pride', a mirror
अभिमानः	**conceit** ⟨1.1⟩ m. *abhimāna*
च	**and** ⟨*avyaya*⟩
क्रोधः	**anger** ⟨1.1⟩ m. *krodha*
पारुष्यम्	**harshness** ⟨1.1⟩ n. *pāruṣya* (from *paruṣa* – hard, rough) – harshness, roughness
एव	**certainly** ⟨*avyaya*⟩
च	**and** ⟨*avyaya*⟩
अ-ज्ञानम्	**ignorance** ⟨1.1⟩ n. *a-jñāna*
च	**and** ⟨*avyaya*⟩
अभिजातस्य	**of one who is born with** ⟨6.1⟩ m. *abhijāta* (*.[k]ta*) – born with
पार्थ	**O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
सम्पदम्	**the wealth** ⟨2.1⟩ f. *sampad*
आसुरीम्	**demoniac** ⟨2.1⟩ f. *āsurī* (*.ī[p]*)

Subodhinī: दम्भः धर्म-ध्वजित्वम् । दर्पः धन-विद्यादि-निमित्तः चित्तस्य उत्सेकः । अभिमानः व्याख्यातः । क्रोधः प्रसिद्धः । पारुष्यम् निष्ठुरत्वम् । अ-ज्ञानम् अ-विवेकः ।

आसुरीम् इति उपलक्षणम्, असुराणाम् राक्षसानाम् च या सम्पद् ताम् आसुरीम् अभिलक्ष्य जातस्य एतानि दम्भादीनि भवन्ति इति अर्थः ॥१६.४॥
एतयोः सम्पदोः कार्यम् दर्शयन् आह – 'दैवी सम्पद्' इति –

16.5

दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता ।
मा शुचः सम्पदं दैवीमभिजातोऽसि पाण्डव ॥५॥

दैवी सम्पद् विमोक्षाय	the godly nature is for liberation
आसुरी निबन्धाय मता,	the demoniac is considered to be for bondage,
हे पाण्डव !	O Arjuna!
मा शुचः !	do not worry!
दैवीम् सम्पदम् अभिजातः असि ।	you are born with godly nature

"The transcendental qualities are conducive to liberation, whereas the demoniac qualities make for bondage. Do not worry, O son of Pāṇḍu, for you are born with the divine qualities."

दैवी	**godly** ⟨1.1⟩ f. *daivī* (*.ī[p]*)
सम्पद्	**wealth** ⟨1.1⟩ f. *sampad*
विमोक्षाय	**for liberation** ⟨4.1⟩ m. *vimokṣa* – liberation
निबन्धाय	**for bondage** ⟨4.1⟩ m. *nibandha* – bondage
आसुरी	**demoniac** ⟨1.1⟩ f. *āsurī* (*.ī[p]*)
मता	**it is considered** ⟨1.1⟩ f. *matā* (√*man[a]* 4A...बोधने – to know, think; + *.[k]ta* + *.ā[p]*)
मा	**not** ⟨*avyaya*⟩
शुचः	**you must worry** ⟨*bhūteśa* 2.1⟩ √*śuc[a]*...शोके – to grieve, lament In combination with *mā* the prefix *a-* of *bhūteśa* (*aśucaḥ*) is not used, and *bhūteśa* has an imperative meaning.
सम्पदम्	**the wealth** ⟨2.1⟩ f. *sampad*
दैवीम्	**godly** ⟨2.1⟩ f. *daivī* (*.ī[p]*)
अभिजातः	**one who is born** ⟨1.1⟩ m. *abhijāta* (*.[k]ta*)
असि	**you are** ⟨*acyuta* 2.1⟩ √*as[a]*...भुवि – to be, exist
पाण्डव	**O Arjuna!** ⟨8.1⟩ m. *pāṇḍava* – 'son of Pāṇḍu'

Subodhinī: दैवी या सम्पद् तया युक्तः, मया उक्ते तत्त्व-ज्ञाने अधिकारी । आसुर्या सम्पदा युक्तः तु नित्यम् संसारी इति अर्थः । एतद् श्रुत्वा, 'किम् अहम् अत्र अधिकारी न वा ?' इति सन्देह-व्याकुल-चित्तम् अर्जुनम् आश्वासयति – हे पाण्डव, मा शुचः (शोकम् मा कार्षीः), यतः त्वम् दैवीम् सम्पदम् अभिजातः असि ॥१६.५॥

आसुरी सम्पद् सर्वात्मना वर्जयितव्यः इति एतद् अर्थम् आसुरीम् सम्पदम् प्रपञ्चयितुम् आह – 'द्वौ' इति –

16.6

द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च ।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥६॥

हे पार्थ !	O Arjuna!
अस्मिन् लोके द्वौ भूत-सर्गौ	in this world there are two natures of beings –
दैवः आसुरः एव च,	godly and demoniac.
दैवः विस्तरशः प्रोक्तः,	the godly has been described at length,
आसुरम् मे शृणु !	hear from Me of the demoniac!

"O son of Pṛthā, in this world there are two kinds of created beings. One is called the divine and the other demoniac. I have already explained to you at length the divine qualities. Now hear from Me of the demoniac."

द्वौ	**two** ⟨1.2⟩ m. *dvi*
भूत-सर्गौ	**natures of beings** ⟨1.2⟩ m. *bhūta-sarga*...भूतानाम् सर्गः इति भूत-सर्गः
लोके	**in the world** ⟨7.1⟩ m. *loka* – place, world, people
अस्मिन्	**in this** ⟨7.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
दैवः	**godly** ⟨1.1⟩ m. *daiva*
आसुरः	**demoniac** ⟨1.1⟩ m. *āsura*
एव	**certainly** ⟨*avyaya*⟩
च	**and** ⟨*avyaya*⟩
दैवः	**the godly** ⟨1.1⟩ m. *daiva*
विस्तरशः	**extensively** ⟨*avyaya*⟩
प्रोक्तः	**declared** ⟨1.1⟩ m. *prokta* (*pra.*√*vac[a]* – to declare; + *.[k]ta*)
आसुरम्	**the demoniac** ⟨2.1⟩ m. *āsura*
पार्थ	**O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
मे	**my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
शृणु	**you must hear** ⟨*vidhātā* 2.1⟩ √*śru*...श्रवणे – to hear, obey

Subodhinī: द्वौ (द्वि-प्रकारौ) भूतानाम् सर्गौ मे (मद्-वचनात्) शृणु । आसुर-राक्षस-प्रकृत्योः एकी-करणेन द्वौ इति उक्तम् । अतः 'राक्षसीम् आसुरीम् च एव प्रकृतिम् मोहिनीम् श्रिताः' (9.12) इत्यादिना नवम-अध्याय-उक्त-प्रकृति-त्रैविध्येन अ-विरोधः । स्पष्टम् अन्यत् ॥१६.६॥

आसुरीम् विस्तरशः निरूपयति – 'प्रवृत्तिम् च' इत्यादि द्वादशभिः –

Note: In the ninth chapter three types of nature were described – the *daivī prakṛti* (9.13), of which the *mahātmā* takes shelter, and the *rākṣasī* and *āsurī* natures (9.12). The last two are combinedly described as *āsurī* in this verse.

16.7

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥७॥

आसुराः जनाः	demoniac persons
प्रवृत्तिम् च निवृत्तिम् च	what is to be done and what is not to be done
न विदुः,	they do not know,
न शौचम् न आचारः अपि न च सत्यम्	neither cleanliness, behavior, or truthfulness
तेषु विद्यते ।	exists in them

"Those who are demoniac do not know what is to be done and what is not to be done. Neither cleanliness nor proper behavior nor truth is found in them."

प्रवृत्तिम्	**activity** ⟨2.1⟩ f. *pravṛtti* – activity, tendency
च	**and** ⟨*avyaya*⟩
निवृत्तिम्	**cessation** ⟨2.1⟩ f. *nivṛtti*
च	**and** ⟨*avyaya*⟩
जनाः	**persons** ⟨1.3⟩ m. *jana* – man, person
न	**not** ⟨*avyaya*⟩
विदुः	**they know** ⟨*acyuta* 1.3⟩ √*vid[a]* 2P...ज्ञाने – to know
आसुराः	**demoniac** ⟨1.3⟩ m. *āsura*
न	**not** ⟨*avyaya*⟩
शौचम्	**cleanliness** ⟨1.1⟩ n. *śauca* – purity
न	**not** ⟨*avyaya*⟩
अपि	**also** ⟨*avyaya*⟩
च	**and** ⟨*avyaya*⟩
आचारः	**good behaviour** ⟨1.1⟩ m. *ācāra* – conduct, (esp.) good behavior
न	**not** ⟨*avyaya*⟩
सत्यम्	**thruthfulness** ⟨1.1⟩ n. *satya* – true, real; truth
तेषु	**in them** ⟨7.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that
विद्यते	**it exists** ⟨*acyuta* 1.1⟩ √*vid[a]* 4A...सत्तायाम् – to be, exist

Subodhinī: धर्मे प्रवृत्तिम् अ-धर्मात् निवृत्तिम् च आसुर-स्वभावाः जनाः न जानन्ति । अतः शौचम् आचारः सत्यम् च तेषु न अस्ति एव ॥१६.७॥

ननु वेद-उक्तयोः धर्म-अधर्मयोः प्रवृत्तिम् निवृत्तिम् च कथम् न विदुः ? कुतः वा धर्म-अधर्मयोः अनङ्गी-कारे जगतः सुख-दुःखादि-व्यवस्था स्यात् ? कथम् वा शौच-आचारादि-विषयाम् ईश्वर-आज्ञाम् अतिवर्तेरन् ? ईश्वर-आनङ्गीकारे च कुतः जगत् उत्पत्तिः स्यात् ? अतः आह – 'अ-सत्यम्' इति –

16.8

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
अपरस्परसम्भूतं किमन्यत्कामहैतुकम् ॥८॥

जगत्	the world is
अ-सत्यम् अ-प्रतिष्ठम् अनीश्वरम्	unreal, without foundation and controller
अपरस्पर-सम्भूतम् काम-हैतुकम्	evolved by mutual union, because of lust
किम् अन्यत् ?	what else?
ते आहुः	[thus] they say

"They say that this world is unreal, with no foundation, no God in control. They say it is produced of sex desire and has no cause other than lust."

अ-सत्यम् **unreal** ⟨1.1⟩ n. *a-satya*
अ-प्रतिष्ठम् **without foundation** ⟨1.1⟩ n. *a-pratiṣṭha*
ते **they** ⟨1.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that
जगत् **the world** ⟨1.1⟩ n. *jagat* – universe
आहुः **they spoke** ⟨*acyuta* opt. for *bruvanti* with a past sense 1.3⟩ √*brū[ñ]*...व्यक्तायां वाचि – to speak
अनीश्वरम् **without controller** ⟨1.1⟩ n. *an-īśvara*
अपरस्पर-सम्भूतम् **born from mutual union** ⟨1.1⟩ n. *aparaḥ-_para-sambhūta*...अपरः-पराभ्याम् सम्भूतम् इति अपरस्पर-सम्भूतम्
किम् **what** ⟨1.1⟩ n. *kṛṣṇanāma kim* – who/what
अन्यत् **else** ⟨1.1⟩ n. *kṛṣṇanāma anya* – other
काम-हैतुकम् **caused by lust** ⟨1.1⟩ n. *kāma-haituka*...कामः हेतुः यस्य, तद् काम-हैतुकम्

Subodhinī: न अस्ति सत्यम् (वेद-पुराणादि-प्रमाणम्) यस्मिन् तादृशम् जगत् आहुः । वेदादीनाम् प्रामाण्यम् न मन्यन्ते इति अर्थः । तद् उक्तम् 'त्रयः वेदस्य कर्तारः भण्ड-धूर्त-निशाचराः' (*Cārvāka-darśana*) इत्यादि । अतएव न अस्ति धर्म-अधर्म-रूपा प्रतिष्ठा, व्यवस्था-हेतुः यस्य तद् । स्वाभाविकम् जगत्-वैचित्र्यम् आहुः इति अर्थः । अतएव न अस्ति ईश्वरः (कर्ता व्यवस्थापकः च) यस्य, तादृशम् जगत् आहुः । तर्हि कुतः अस्य जगतः उत्पत्तिम् वदन्ति ? इति अतः आह – 'अ-परस्पर-सम्भूतम्' इति । अ-परः च परः च इति अपरस्परम्, अपरस्परतः (अन्योन्यतः) स्त्री-पुरुष-मिथुनात् सम्भूतम् जगत् । किम् अन्यत्

कारणम् अस्य, न अस्ति अन्यत् किञ्चित्, किन्तु काम-हैतुकम्, स्त्री-पुरुषयोः कामः एव प्रवाह-रूपेण हेतुः अस्य इति आहुः इति अर्थः ॥१६.८॥

16.9

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥९॥

एताम् दृष्टिम् अवष्टभ्य	[after] holding this view
नष्टात्मानः	having lost their souls
अल्प-बुद्धयः उग्र-कर्माणः	of small intellect and horrible works
अ-हिताः	the enemies
जगतः क्षयाय प्रभवन्ति ।	flourish for the destruction of the world

"Following such conclusions, the demoniac, who are lost to themselves and who have no intelligence, engage in unbeneficial, horrible works meant to destroy the world."

एताम् **this** ⟨2.1⟩ f. *kṛṣṇanāma etad* – (first person) he, this
दृष्टिम् **view** ⟨2.1⟩ f. *dṛṣṭi*
अवष्टभ्य **[after] holding** ⟨*avyaya*⟩ *ava.*√*stambh[u]* – to hold; + *.ya[p]*
नष्टात्मानः **whose soul is lost** ⟨1.3⟩ m. *naṣṭa-_ātman (-ātmā)*...नष्टः आत्मा यस्य, सः नष्टात्मा
अल्प-बुद्धयः **whose intelligence is small** ⟨1.3⟩ m. *alpa-buddhi*...अल्पा बुद्धिः यस्य, सः अल्प-बुद्धिः
प्रभवन्ति **they are born** ⟨*acyuta* 1.3⟩ *pra.*√*bhū* – to appear, increase, become powerful, rule
उग्र-कर्माणः **whose activities are terrible** ⟨1.3⟩ m. *ugra-karman (-karmā)*...उग्रम् कर्म यस्य, सः उग्र-कर्मा
क्षयाय **for the destruction** ⟨4.1⟩ m. *kṣaya* – destruction
जगतः **of the world** ⟨6.1⟩ n. *jagat* – universe
अ-हिताः **those who are unbeneficial, enemies** ⟨1.3⟩ m. *a-hita* – unbeneficial; enemy

Subodhinī: एताम् लोकायतिकानाम् दृष्टिम् (दर्शनम्) आश्रित्य, नष्ट-आत्मानः (मलिन-चित्ताः सन्तः) अल्प-बुद्धयः दृष्टार्थमात्र-मतयः, अतएव उग्रम् (हिंस्रम्) कर्म येषाम् ते, अ-हिताः (वैरिणः) भूत्वा, जगतः क्षयाय प्रभवन्ति (उद्भवन्ति) इति अर्थः ॥१६.९॥

Note: The word *ahitāḥ* is connected to *jagataḥ* – *jagataḥ ahitāḥ* – the enemies of the world.

16.10

काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः ।
मोहाद्गृहीत्वासद्ग्राहान्प्रवर्तन्तेऽशुचिव्रताः ॥१०॥

दम्भ-मान-मदान्विताः	being full of deceit, pride and madness
अशुचि-व्रताः	devoted to unclean habits
दुष्पूरम् कामम् आश्रित्य	[after] resorting to unsatiable desires
मोहात् असद्-ग्राहान् गृहीत्वा	[after] accepting temporary things out of illusion
प्रवर्तन्ते ।	they act

"Taking shelter of insatiable lust and absorbed in the conceit of pride and false prestige, the demoniac, thus illusioned, are always sworn to unclean work, attracted by the impermanent."

कामम् **desire** ⟨2.1⟩ m. *kāma*
आश्रित्य **[after] taking shelter** ⟨*avyaya*⟩ *ā.√śri[ñ]* – to take shelter; + *.ya[p]*
दुष्पूरम् **unsatiable** ⟨2.1⟩ m. *duṣpūra* – difficult to fill
दम्भ-मान-मदान्विताः **who are endowed with deceit, pride and madness** ⟨1.3⟩ m. *dambha-māna-mada-_anvita*... दम्भ-मान-मदैः अन्विताः इति दम्भ-मान-मदान्विताः – endowed with deceit, pride and madness
मोहात् **out of illusion** ⟨5.1⟩ m. *moha* – illusion
गृहीत्वा **[after] taking** ⟨*avyaya*⟩ *√grah[a]*...उपादाने – to take; + *.[k]tvā*
असद्-ग्राहान् **false views** ⟨2.3⟩ m. *a-sat-_grāha* – a false view
प्रवर्तन्ते **they start to act** ⟨*acyuta* 1.3⟩ *pra.√vṛt[u]* – to start to act
अशुचि-व्रताः **who are of unclean vows** ⟨1.3⟩ m. *a-śuci-vrata* – an unclean vow

Subodhinī: दुष्पूरम् (पूरयितुम् अ-शक्यम्) कामम् आश्रित्य, दम्भादिभिः युक्ताः सन्तः, क्षुद्र-देवता-आराधनादौ प्रवर्तन्ते । कथम् ? असत्-ग्राहान् गृहीत्वा, 'अनेन मन्त्रेण एताम् देवताम् आराध्य, महा-निधीन् साधयिष्यामः' इत्यादि दुराग्रहान् मोहमात्रेण स्वीकृत्य, प्रवर्तन्ते । अशुचि-व्रताः, अ-शुचीनि मद्य-मांसादि-विषयाणि व्रतानि येषाम् ते ॥१६.१०॥

16.11...12

चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः ।
कामोपभोगपरमा एतावदिति निश्चिताः ॥११॥

प्रलयान्ताम् अ-परिमेयाम् च चिन्ताम्	unlimited anxiety, up to death
उपाश्रिताः	having accepted

कामोपभोग-परमाः	addicted to sense gratification
एतावत् इति निश्चिताः . . .	that this is all; being convinced . . .

"They believe that to gratify the senses is the prime necessity of human civilization. Thus until the end of life their anxiety is immeasurable. . ."

चिन्ताम् **anxiety** ⟨2.1⟩ f. *cintā* – thought, anxiety
अ-परिमेयाम् **immeasurable** ⟨2.1⟩ f. *a-parimeyā* (*.ā[p]*)
च **and** ⟨*avyaya*⟩
प्रलयान्ताम् **up to death** ⟨2.1⟩ f. *pralaya-_antā* (*.ā[p]*)...प्रलयः अन्तः यस्याः, सा प्रलयान्ता – 'whose end is death'
उपाश्रिताः **who have taken shelter** ⟨1.3⟩ m. *upāśrita* (*upa.ā.√śri[ñ]* – to take shelter; + *.[k]ta*)
कामोपभोग-परमाः **whose goal is the gratification of desires** ⟨1.3⟩ m. *kāma-_upabhoga-parama*... कामानाम् उपभोगः परमः यस्य, सः कामोपभोग-परमः
एतावत् **this much** ⟨1.1⟩ n. *etāvat*
इति **thus** ⟨*avyaya*⟩
निश्चिताः **who are convinced** ⟨1.3⟩ m. *niścita* (*nir.√ci[ñ]* – to ascertain; + *.[k]ta*) – ascertained

Subodhinī: प्रलयः (मरणम्) एव अन्तः यस्याः ताम् । अ-परिमेयाम् (परिमातुम् अ-शक्याम्) चिन्ताम् आश्रिताः, नित्यम् चिन्ता-परायणाः इति अर्थः । काम-उपभोगः एव परमः येषाम् ते । 'एतावत्' इति काम-उपभोगः एव परमः पुरुषार्थः, 'न अन्यत् अस्ति' इति कृत-निश्चयाः 'अर्थ-सञ्चयान् ईहन्ते' (16.12) इति उत्तरेण अन्वयः । तथाच बार्हस्पत्यम् सूत्रम् – 'कामः एव एकः पुरुषार्थः' इति, 'चैतन्य-विशिष्टः कायः पुरुषः' इति च ॥१६.११॥

16.12

आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ॥१२॥

. . . आशा-पाश-शतैः बद्धाः	. . . being bound by hundreds of ropes of expectations
काम-क्रोध-परायणाः	and given to lust and anger
काम-भोगार्थम्	for sense gratification
अ-न्यायेन अर्थ-सञ्चयान् ईहन्ते ।	they covet heaps of wealth by illegal means

". . . Bound by a network of hundreds of thousands of desires and absorbed in lust and anger, they secure money by illegal means for sense gratification."

आशा-पाश-शतैः **by hundreds of ropes of expectations** ⟨3.3⟩ n. *āśā-pāśa-śata*...आशायाः पाशानाम् शतम् इति आशा-पाश-शतम् – a hundred of ropes of expectations
pāśa – a snare, trap, noose, bond, cord, chain

बद्धाः **who are bound** ⟨1.3⟩ m. *baddha* (√*bandh[a]*...बन्धने – to bind; + *.[k]ta*) – bound

काम-क्रोध-परायणाः **who are given to lust and anger** ⟨1.3⟩ m. *kāma-krodha-parāyaṇa*...काम-क्रोधौ परायनम् यस्य, सः काम-क्रोध-परायणः – 'whose final refuge are lust and anger'

ईहन्ते **they desire** ⟨*acyuta* 1.3⟩ √*īh[a]*...चेष्टा-वाञ्छयोः – to endeavor; desire

काम-भोगार्थम् **for the satisfaction of lust** ⟨*avyaya*⟩ *kāma-bhoga-_artham*

अ-न्यायेन **by illegal means** ⟨3.1⟩ m. *a-nyāya* – not just

अर्थ-सञ्चयान् **heaps of wealth** ⟨2.3⟩ m. *artha-sañcaya* – a collection of wealth

Subodhinī: आशाः एव पाशाः, तेषाम् शतानि, तैः बद्धाः (इतः ततः आकृष्यमाणाः), काम-क्रोधौ परम् अयनम् (आश्रयः) येषाम् ते, काम-भोगार्थम् अ-न्यायेन चौर्यादिना अर्थानाम् सञ्चयान् (राशीनि) ईहन्ते (इच्छन्ति) ॥१६.१२॥ तेषाम् मनोराज्यम् कथयन्, नरक-प्राप्तिम् आह – 'इदम् अद्य' इति चतुर्भिः –

16.13

इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥१३॥

मया अद्य इदम् लब्धम्	'this has been gained today by me
इमम् मनोरथम् प्राप्स्ये,	and this desired object I will gain',
इदम् अस्ति	'this is [mine]
इदम् धनम् अपि	and this wealth
पुनः मे (मम) भविष्यति ।	will be mine too'

"The demoniac person thinks:"So much wealth do I have today, and I will gain more according to my schemes. So much is mine now, and it will increase in the future, more and more."

इदम् **this** ⟨1.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this

अद्य **today** ⟨*avyaya*⟩ – today, now

मया **by me** ⟨3.1⟩ *kṛṣṇanāma asmad* – (last person) I

लब्धम् **obtained** ⟨1.1⟩ n. *labdha* (√*[ḍu]labh[as]*...प्राप्तौ – to obtain; + *.[k]ta*)

इमम् **this** ⟨2.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this

प्राप्स्ये **I will obtain** ⟨*kalki* 3.1⟩ *pra.*√*āp[l]* – to obtain

मनोरथम् **desired object** ⟨2.1⟩ m. *manaḥ-_ratha* – 'chariot of the mind'

इदम् **this** ⟨1.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this

अस्ति **it is** ⟨*acyuta* 1.1⟩ √*as[a]*...भुवि – to be, exist

इदम् **this** ⟨1.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this

अपि **also** ⟨*avyaya*⟩

मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I

भविष्यति **it will be** ⟨*kalki* 1.1⟩ √*bhū*...सत्तायाम् – to be, exist, become

पुनः **again** ⟨*avyaya*⟩ (*punar*)

धनम् **wealth** ⟨1.1⟩ n. *dhana*

Subodhinī: प्राप्स्ये (प्राप्स्यामि), मनोरथम् मनसः प्रियम् । शेषम् स्पष्टम् । एषाम् च त्रयाणाम् श्लोकानाम् – 'इति अज्ञान-विमोहिताः' (16.15) इति सन्तः, 'नरके पतन्ति' (16.16) इति चतुर्थेन अन्वयः ॥१६.१३॥

16.14

असौ मया हतः शत्रुर्हनिष्ये चापरानपि ।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी ॥१४॥

असौ शत्रुः मया हतः	'that enemy has been slain by me
अ-परान् च अपि हनिष्ये,	and others also I will slay',
अहम् ईश्वरः, अहम् भोगी	'I am the controller, I am the enjoyer
अहम् सिद्धः बलवान् सुखी ।	I am successful, powerful and happy'

"He is my enemy, and I have killed him, and my other enemies will also be killed. I am the lord of everything. I am the enjoyer. I am perfect, powerful and happy."

असौ **this** ⟨1.1⟩ m. *kṛṣṇanāma adas* – that

मया **by me** ⟨3.1⟩ *kṛṣṇanāma asmad* – (last person) I

हतः **who is killed** ⟨1.1⟩ m. *hata* (√*han[a]*...हिंसा-गत्योः – to harm, kill; go; + *.[k]ta*) – killed

शत्रुः **enemy** ⟨1.1⟩ m. *śatru*

हनिष्ये **I will kill** ⟨*kalki* 3.1⟩ √*han[a]*...हिंसा-गत्योः – to harm, kill; go

च **and** ⟨*avyaya*⟩

अ-परान् **others** ⟨2.3⟩ m. *kṛṣṇanāma a-para* – later, inferior, other

अपि **also** ⟨*avyaya*⟩

ईश्वरः **a lord** ⟨1.1⟩ m. *īśvara*

अहम् **I am** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

अहम् **I am** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

भोगी **enjoyer** ⟨1.1⟩ m. *bhogin* (*bhogī*)

सिद्धः **who is accomplished** ⟨1.1⟩ m. *siddha* (√*sidh[u]* 4P...संराद्धौ – to succeed; + *.[k]ta*) – succeeded

अहम् **I am** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

बलवान् **one who has strength** ⟨1.1⟩ m. *balavat* (*.vat[u]*) – 'having *bala* (strength)'; strong

सुखी **one who is happy** ⟨1.1⟩ m. *sukhin* (*sukhī*)

Subodhinī: सिद्धः कृत-कृत्यः । स्पष्टम् अन्यत् ॥१६.१४॥

16.15

आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥१५॥

आढ्यः अभिजनवान् अस्मि,	'I am wealthy and of noble descent',
मया सदृशः अन्यः कः अस्ति ?	'who else is equal to me?'
यक्ष्ये दास्यामि मोदिष्ये	'I will sacrifice, give charity and rejoice' –
इति अज्ञान-विमोहिताः ।	thus they are deluded by ignorance

"I am the richest man, surrounded by aristocratic relatives. There is none so powerful and happy as I am. I shall perform sacrifices, I shall give some charity, and thus I shall rejoice." In this way, such persons are deluded by ignorance."

आढ्यः **who is wealthy** ⟨1.1⟩ m. *āḍhya* – wealthy

अभिजनवान् **who is of noble descent** ⟨1.1⟩ m. *abhijanavat* (*.vat[u]*) – 'having *abhijana* (family)'; noble

अस्मि **I am** ⟨*acyuta* 3.1⟩ √*as[a]*...भुवि – to be, exist

कः **who** ⟨1.1⟩ m. *kṛṣṇanāma kim* – who/what

अन्यः **else** ⟨1.1⟩ m. *kṛṣṇanāma anya* – other

अस्ति **he is** ⟨*acyuta* 1.1⟩ √*as[a]*...भुवि – to be, exist

सदृशः **similar** ⟨1.1⟩ m. *sa-dṛśa*

मया **with me** ⟨3.1⟩ *kṛṣṇanāma asmad* – (last person) I

यक्ष्ये **I will sacrifice** ⟨*kalki* 3.1⟩ √*yaj[a]*...देवपूजा-सङ्गतिकरण-यजन-दानेषु – to worship; associate; sacrifice; give

दास्यामि **I will give** ⟨*kalki* 3.1⟩ √*[ḍu]dā[ñ]*...दाने – to give

मोदिष्ये **I will rejoice** ⟨*kalki* 3.1⟩ √*mud[a]*...हर्षे – to rejoice

इति **thus** ⟨*avyaya*⟩

अज्ञान-विमोहिताः **those who are deluded by ignorance** ⟨1.3⟩ m. *a-jñāna-vimohita* – deluded by ignorance

Subodhinī: आढ्यो धनादि-सम्पन्नः । अभिजनवान् कुलीनः । यक्ष्ये योगादि-अनुष्ठानेन अपि दीक्षित-अन्तरेभ्यः सकाशात् महतीम् प्रतिष्ठाम् प्राप्स्यामि । दास्यामि स्तावकेभ्यः । मोदिष्ये (हर्षम् प्राप्स्यामि) इति एवम् अ-ज्ञानेन विमोहिताः (मिथ्या-अभिनिवेशम् प्रापिताः) ॥१६.१५॥
एवम्-भूताः यद् प्राप्नुवन्ति तद् शृणु – 'अनेक' इति –

16.16

अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥१६॥

अनेक-चित्त-विभ्रान्ताः	deluded by many desires
मोह-जाल-समावृताः	covered by a net of illusion
काम-भोगेषु प्रसक्ताः	and attached to sense gratification
अ-शुचौ नरके पतन्ति ।	they fall into dirty hell

"Thus perplexed by various anxieties and bound by a network of illusions, they become too strongly attached to sense enjoyment and fall down into hell."

अनेक-चित्त-विभ्रान्ताः **who are bewildered by a mind absorbed in many desires** ⟨1.3⟩ m. *an-eka-citta-vibhrānta*

मोह-जाल-समावृताः **who are covered by a net of illusion** ⟨1.3⟩ m. *moha-jāla-samāvṛta*...मोह-जालेन समावृतः इति मोह-जाल-समावृतः – covered by a net of illusion
जाल – a net (for catching birds, fish, etc.), any net, snare; a cob-web; deception, illusion, magic

प्रसक्ताः **who are attached** ⟨1.3⟩ m. *prasakta* (*pra.*√*sañj[a]* – to stick completely; + *.[k]ta*) – attached

काम-भोगेषु **towards sense gratification** ⟨7.3⟩ m. *kāma-bhoga*...कामस्य भोगः इति काम-भोगः – gratification of desire

पतन्ति **they fall** ⟨*acyuta* 1.3⟩ √*pat[l]*...गतौ – to go (fall)

नरके **into hell** ⟨7.1⟩ m. *naraka* – hell

अ-शुचौ **in dirty** ⟨7.1⟩ m. *a-śuci* – unclean

Subodhinī: अनेकेषु मनोरथेषु प्रवृत्तम् चित्तम् 'अनेक-चित्तम्', तेन विभ्रान्ताः (विक्षिप्ताः), तेन एव मोहमयेन जालेन समावृताः, मत्स्याः इव सूत्रमयेण जालेन यन्त्रिताः । एवम् काम-भोगेषु प्रसक्ताः (अभिनिविष्टाः) सन्तः, अ-शुचौ (कश्मले) नरके पतन्ति ॥१६.१६॥
'यक्ष्ये' इति च, यः तेषाम् मनोरथः उक्तः, सः केवलम् दम्भ-अहङ्कारादि-प्रधानः एव, नतु सात्त्विकः इति अभिप्रायेण आह – 'आत्म-सम्भाविताः' इति द्वाभ्याम् –

16.17

आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥१७॥

आत्म-सम्भाविताः स्तब्धाः	being self-complacent and arrogant
धन-मान-मदान्विताः	filled with pride and intoxicated due to wealth
दम्भेन अ-विधि-पूर्वकम्	proudly disregarding the prescription
ते नाम-यज्ञैः यजन्ते ।	they sacrifice in name only

"Self-complacent and always impudent, deluded by wealth and false prestige, they sometimes proudly perform sacrifices in name only, without following any rules or regulations."

आत्म-सम्भाविताः **who are self-complacent** ⟨1.3⟩ m. *ātma-sambhāvita*...आत्मना सम्भावितः इति आत्म-सम्भावितः – who is glorified by himself

स्तब्धाः **who are arrogant** ⟨1.3⟩ m. *stabdha (stambh[u]*...रोधने धारणे च – to obstruct; support; + .*[k]ta*) – obstructed, stopped; immovable, paralyzed, senseless, dull; obstinate, stubborn, hard-hearted; proud, arrogant

धन-मान-मदान्विताः **who are filled with pride and intoxicated due to wealth** ⟨1.3⟩ m. *dhana-māna-mada-_anvita*...धनस्य मानेन च मदेन च अन्वितः यः सः धन-मान-मदान्वितः – who is filled with pride and madness due to wealth

यजन्ते **they sacrifice** ⟨*acyuta* 1.3⟩ √*yaj[a]*...देवपूजा-सङ्गतिकरण-यजन-दानेषु – to worship; associate; sacrifice; give

नाम-यज्ञैः **with sacrifices in name only** ⟨3.3⟩ m. *nāma-yajña* – sacrifice in name

ते **they** ⟨1.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

दम्भेन **with deceit** ⟨3.1⟩ m. *dambha* – deceit

अ-विधि-पूर्वकम् **not according to rule** ⟨*avyaya*⟩

Subodhinī: आत्मना एव सम्भाविताः (पूज्यताम् नीताः), ननु साधुभिः कैश्चिद् । स्तब्धाः (अ-नम्राः), धनेन यः मानः मदः ते ताभ्याम् अन्विताः सन्तः ते, नाम-मात्रेण ये यज्ञाः ते नाम-यज्ञाः । यद्वा 'दीक्षितः' 'सोम-याजी' इति एवम् आदि नाम-मात्र-प्रसिद्धये ये यज्ञाः तैः यजन्ते । कथम् ? दम्भेन ननु श्रद्धया, अ-विधि-पूर्वकम् च यथा भवति तथा ॥१६.१७॥

अ-विधि-पूर्वकत्वम् एव प्रपञ्चयति – 'अहङ्कारम्' इति

16.18...19

अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तो ऽभ्यसूयकाः ॥१८॥

अहङ्कारम् बलम् दर्पम् कामम् क्रोधम् च संश्रिताः,	of false ego, power, pride, lust and anger who are possessed,
आत्म-पर-देहेषु माम्	Me, in their own and other bodies
प्रद्विषन्तः,	who are hating,
अभ्यसूयकाः . . .	those who are envious . . .

"Bewildered by false ego, strength, pride, lust and anger, the demons become envious of the Supreme Personality of Godhead, who is situated in their own bodies and in the bodies of others, and blaspheme against the real religion."

अहङ्कारम् **egotism** ⟨2.1⟩ m. *ahaṅkāra*

बलम् **strength** ⟨2.1⟩ m. *bala*

दर्पम् **pride** ⟨2.1⟩ m. *darpa*

कामम् **desire** ⟨2.1⟩ m. *kāma*

क्रोधम् **anger** ⟨2.1⟩ m. *krodha*

च **and** ⟨*avyaya*⟩

संश्रिताः **who have taken shelter** ⟨1.3⟩ m. *saṁśrita (sam.√śri[ñ]* – to take shelter; + .*[k]ta*) – taken shelter

माम् **Me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

आत्म-पर-देहेषु **in one's own and other's bodies** ⟨7.3⟩ m. *ātma-para-deha* – one's own and another's body

प्रद्विषन्तः **who are hating** ⟨1.3⟩ m. *pradviṣat (pra.√dviṣ[a]* – to hate; + .*[ś]at[r]*)

अभ्यसूयकाः **who are envious** ⟨1.3⟩ m. *abhyasūyaka* – who is envious

Subodhinī: अहङ्कारादि-संश्रिताः सन्तः, आत्म-पर-देहेषु (स्व-देहेषु पर-देहेषु च) चित्-अंशेन स्थितम् माम् प्रद्विषन्तः यजन्ते । दम्भ-यज्ञेषु श्रद्धायाः अ-भावात् आत्मनः वृथा एव पीडा भवति । तथा पशु-आदीनाम् अपि अ-विधिना हिंसायाम् चैतन्य-द्रोह-मात्रम् एव अवशिष्यते इति 'प्रद्विषन्तः' इति उक्तम् । अभ्यसूयकाः सत्-मार्ग-वर्तिनाम् गुणेषु दोष-आरोपकाः ॥१६.१८॥

तेषाम् च कदाचिद् अपि आसुर-स्वभाव-प्रच्युतिः न भवति इति आह – 'तान्' इति द्वाभ्याम् –

16.19

तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥१९॥

. . . तान् द्विषतः क्रूरान्	. . . those hateful and cruel men
अ-शुभान् नराधमान्	who are inauspicious and lowest of men
संसारेषु आसुरीषु योनिषु एव	into cycles of rebirths in demoniac species
अहम् अ-जस्रम् क्षिपामि ।	I perpetually cast

"Those who are envious and mischievous, who are the lowest among men, I perpetually cast into the ocean of material existence, into various demoniac species of life."

तान् **them** ⟨2.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I

द्विषतः **those haters** ⟨2.3⟩ m. *dviṣat (√dviṣ[a]*...अप्रीतौ – to hate; + .*[ś]at[r]*) – [while] hating

क्रूरान् **those who are cruel** ⟨2.3⟩ m. *krūra* – cruel

संसारेषु **into cycles of rebirth** ⟨7.3⟩ m. *saṁsāra* – cycle of rebirth, transmigration

नराधमान् **those lowest of men** ⟨2.3⟩ m. *nara-_adhama*...नरेषु अधमः इति नराधमः – lowest among men

क्षिपामि **I throw** ⟨*acyuta* 3.1⟩ √*kṣip[a]*...प्रेरणे – to send, throw

अ-जस्रम् **perpetually** ⟨*avyaya*⟩

अ-शुभान् **those who are inauspicious** ⟨2.3⟩ m. *a-śubha* – inauspicious

आसुरीषु **in demoniac** ⟨7.3⟩ f. *āsurī* (*.ī[p]*) – demoniac

एव **certainly** ⟨*avyaya*⟩

योनिषु **in species** ⟨7.3⟩ f. *yoni* – birth, origin

Subodhinī: तान् अहम् माम् द्विषतः क्रूरान् संसारेषु (जन्म-मृत्यु-मार्गेषु), तत्रापि आसुरीषु एव अतिक्रूरासु व्याघ्रादि-योनिषु अ-जस्रम् (अनवरतम्) क्षिपामि, तेषाम् पाप-कर्मणाम् तादृशम् फलम् ददामि इति अर्थः ॥१६.१९॥

16.20

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥२०॥

हे कौन्तेय !	O Arjuna!
मूढाः	such fools
जन्मनि जन्मनि	in birth after birth
आसुरीम् योनिम् आपन्नाः	having attained a demoniac body
माम् अ-प्राप्य एव	[after] certainly not attaining Me
ततः अधमाम् गतिम् यान्ति ।	then achieve the lowest destination

"Attaining repeated birth amongst the species of demoniac life, O son of Kuntī, such persons can never approach Me. Gradually they sink down to the most abominable type of existence."

आसुरीम् **an demoniac** ⟨2.1⟩ f. *āsurī* (*.ī[p]*)

योनिम् **species** ⟨2.1⟩ f. *yoni* – birth, origin

आपन्नाः **those who have attained** ⟨1.3⟩ m. *āpanna* (*ā.*√*pad[a]* – to attain; + *.[k]ta*) – attained

मूढाः **those who are bewildered** ⟨1.3⟩ m. *mūḍha* (√*muh[a]*...वैचित्ये – to be bewildered; + *.[k]ta*) – bewildered

जन्मनि जन्मनि **in birth after birth** ⟨7.1⟩ n. *janman* (*janma*) – birth

माम् **me** ⟨2.1⟩ *kṛṣnanāma asmad* – (last person) I

अ-प्राप्य **[after] not obtaining** ⟨*avyaya*⟩ *a-prāpya*

एव **certainly** ⟨*avyaya*⟩

कौन्तेय **O Arjuna!** ⟨8.1⟩ m. *kaunteya* – 'son of Kuntī'

ततः **then** ⟨*avyaya*⟩ (*tatas*; from *tad* + *.tas[i]*) – from/after/than that

यान्ति **they attain** ⟨*acyuta* 1.3⟩ √*yā*...प्राप्तौ – to attain, go

अधमाम् **the lowest** ⟨2.1⟩ f. *adhamā* (*.ā[p]*)

गतिम् **destination** ⟨2.1⟩ f. *gati* – movement, goal

Subodhinī: ते च 'माम् अ-प्राप्य एव' इति 'एव'-कारेण मद्-प्राप्ति-शङ्का कुतः तेषाम् । मद्-प्राप्ति-उपायम् सत्-मार्गम् अपि अ-प्राप्य, ततः अपि अधमाम् कृमि-कीटादि-योनिम् गतिम् च यान्ति इति उक्तम् । शेषम् स्पष्टम् ॥१६.२०॥ उक्तानाम् आसुर-दोषाणाम् मध्ये सकल-दोष-मूल-भूतम् दोष-त्रयम् सर्वथा वर्जनीयम् इति आह – 'त्रिविधम्' इति –

16.21

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥२१॥

कामः क्रोधः तथा लोभः	lust, anger and greed –
इदम् त्रि-विधम् नरकस्य द्वारम्	this threefold gate to hell
आत्मनः नाशनम्,	is the destruction of the self,
तस्मात् एतद् त्रयम् त्यजेत् ।	therefore one should give up these three

"There are three gates leading to this hell – lust, anger and greed. Every sane man should give these up, for they lead to the degradation of the soul."

त्रिविधम् **threefold** ⟨1.1⟩ n. *tri-vidha*

नरकस्य **of hell** ⟨6.1⟩ m. *naraka* – hell

इदम् **this** ⟨1.1⟩ n. *kṛṣnanāma idam* – (first person) he, this

द्वारम् **door** ⟨1.1⟩ n. *dvāra*

नाशनम् **destruction** ⟨1.1⟩ n. *nāśana* – destroying

आत्मनः **of the self** ⟨6.1⟩ m. *ātman* (*ātmā*) – the self, soul

कामः **desire** ⟨1.1⟩ m. *kāma*

क्रोधः **anger** ⟨1.1⟩ m. *krodha*

तथा **so** ⟨*avyaya*⟩

लोभः **greed** ⟨1.1⟩ m. *lobha*

तस्मात् **therefore** ⟨*avyaya*⟩

एतद् **this** ⟨2.1⟩ n. *kṛṣnanāma etad* – (first person) he, this

त्रयम् **triad** ⟨2.1⟩ n. *traya*

त्यजेत् **one should abandon** ⟨*vidhi* 1.1⟩ √*tyaj[a]*...हानौ – to abandon

Subodhinī: कामः क्रोधः लोभः इदम् त्रिविधम् नरकस्य द्वारम् । अतएव आत्मनः नाशनम् (नीच-योनि-प्रापकम्), तस्मात् एतद् त्रयम् सर्व-आत्मना त्यजेत् ॥१६.२१॥ त्यागे च विशिष्ट-फलम् आह – 'एतैः' इति –

16.22

एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः ।
आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥२२॥

हे कौन्तेय !	O Arjuna!
एतैः त्रिभिः तमोद्वारैः	from these three gates of darkness
विमुक्तः नरः	the man who is free
आत्मनः श्रेयः आचरति,	performs what is good for the self,
ततः पराम् गतिम् याति ।	and then attains the supreme destination

"The man who has escaped these three gates of hell, O son of Kuntī, performs acts conducive to self-realization and thus gradually attains the supreme destination."

एतैः	**by these** ⟨3.3⟩ n. *kṛṣṇanāma etad* – (first person) he, this
विमुक्तः	**who is freed** ⟨1.1⟩ m. *vimukta* (*vi.√muc[!]* – to release; + *.[k]ta*) – released
कौन्तेय	**O Arjuna!** ⟨8.1⟩ m. *kaunteya* – 'son of Kuntī'
तमोद्वारैः	**by the gates to darkness** ⟨3.3⟩ n. *tamaḥ-_dvāra*...तमसः द्वारम् तमोद्वारम् – the door of darkness
त्रिभिः	**by the three** ⟨3.3⟩ n. *tri* – three
नरः	**a man** ⟨1.1⟩ m. *nara*
आचरति	**he performs** ⟨*acyuta* 1.1⟩ *ā.√car[a]* – to behave, perform
आत्मनः	**of the self** ⟨6.1⟩ m. *ātman* (*ātmā*) – the self, soul
श्रेयः	**the benefit** ⟨2.1⟩ n. *śreyas* (*śreyaḥ*) – better, benefit
ततः	**then** ⟨*avyaya*⟩ (*tatas*; from *tad* + *.tas[i]*) – from/after/than that
याति	**he attains** ⟨*acyuta* 1.1⟩ *√yā*...प्राप्तौ – to attain, go
पराम्	**the supreme** ⟨2.1⟩ f. *parā* (*.ā[p]*) – beyond
गतिम्	**destination** ⟨2.1⟩ f. *gati* – movement, goal

Subodhinī: तमसः (नरकस्य) द्वार-भूतैः एतैः त्रिभिः कामादिभिः विमुक्तः नरः आत्मनः श्रेयः-साधनम् (तपः-योगादि कर्म) आचरति, ततः च मोक्षम् प्राप्नोति ॥१६.२२॥
कामादि-त्यागः च स्व-धर्म-आचरणम् विना न भवति इति आह – 'यः' इति –

16.23

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥२३॥

शास्त्र-विधिम् उत्सृज्य	[after] discarding the order of *śāstra*

यः काम-कारतः वर्तते,	one who acts whimsically,
सः सिद्धिम् न अवाप्नोति,	he does not attain perfection,
न सुखम्, न पराम् गतिम् ।	nor happiness, nor the supreme destination

"He who discards scriptural injunctions and acts according to his own whims attains neither perfection, nor happiness, nor the supreme destination."

यः	**he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
शास्त्र-विधिम्	**the order of *śāstra*** ⟨2.1⟩ m. *śāstra-vidhi*...शास्त्राणाम् विधिः इति शास्त्र-विधिः
उत्सृज्य	**[after] discarding** ⟨*avyaya*⟩ *ud.√sṛj[a]* – to let loose; + *.ya[p]*
वर्तते	**he acts** ⟨*acyuta* 1.1⟩ *√vṛt[u]* 1A...वर्तने – to happen, act
काम-कारतः	**who is prompted by desire** ⟨*avyaya*⟩ (*-kāratas*; *-kāra* + *.tas[i]*)
न	**not** ⟨*avyaya*⟩
सः	**he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
सिद्धिम्	**perfection** ⟨2.1⟩ f. *siddhi*
अवाप्नोति	**he obtains** ⟨*acyuta* 1.1⟩ *pra.√āp[!]* – to obtain
न	**not** ⟨*avyaya*⟩
सुखम्	**happiness** ⟨2.1⟩ n. *sukha* – easiness, happiness
न	**not** ⟨*avyaya*⟩
पराम्	**the supreme** ⟨2.1⟩ f. *parā* (*.ā[p]*) – beyond
गतिम्	**destination** ⟨2.1⟩ f. *gati* – movement, goal

Subodhinī: शास्त्र-विधिम् (वेद-विहितम् धर्मम्) उत्सृज्य, यः काम-कारतः यथा-इच्छम् वर्तते, सः सिद्धिम् (तत्त्व-ज्ञानम्) न प्राप्नोति । नच सुखम् (उपशमम्), नच पराम् गतिम् (मुक्तिम्) प्राप्नोति ॥१६.२३॥
फलितम् आह – 'तस्मात्' इति –

16.24

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥२४॥

तस्मात् कार्याकार्य-व्यवस्थितौ	therefore, in ascertaining duty and non-duty
शास्त्रम् ते (तव) प्रमाणम्,	*śāstra* is your authority,
शास्त्र-विधानोक्तम् कर्म ज्ञात्वा	[after] knowing the duty ordered by *śāstra*
इह कर्तुम् अर्हसि ।	you should work here

"One should therefore understand what is duty and what is not duty by the regulations of the scriptures. Knowing such rules and regulations, one should act so that he may gradually be elevated."

तस्मात्	therefore ⟨*avyaya*⟩
शास्त्रम्	**śāstra** ⟨1.1⟩ n. *śāstra* – teaching, scripture
प्रमाणम्	**authority** ⟨1.1⟩ n. *pramāṇa* – standard
ते	**your** ⟨opt. for *tava* 6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
कार्याकार्य-व्यवस्थितौ	**in ascertaining duty and non-duty** ⟨7.1⟩ f. *kārya-_a-kārya-vyavasthiti*
ज्ञात्वा	**[after] knowing** ⟨*avyaya*⟩ √*jñā* 9P...अवबोधने – to know; + .*[k]tvā*
शास्त्र-विधानोक्तम्	**said by the order of** ***śāstra*** ⟨2.1⟩ n. *śāstra-vidhāna-_ukta*...शास्त्रस्य विधानेन उक्तम् इति शास्त्र-विधानोक्तम्
कर्म	**work** ⟨2.1⟩ n. *karman (karma)* – activity
कर्तुम्	**to do** ⟨*avyaya*⟩ √*[ḍu]kṛ[ñ]* 8U...करणे – to do; + .*tum[u]*
इह	**here** ⟨*avyaya*⟩
अर्हसि	**you deserve** ⟨*acyuta* 2.1⟩ √*arh[a]*...पूजायाम् – to be worthy, fit, able

Subodhinī: इदम् कार्यम् इदम् अ-कार्यम् इति अस्याम् व्यवस्थायाम् ते (तव) शास्त्रम् (श्रुति-स्मृति-पुराणादिकम्) एव प्रमाणम् । अतः शास्त्र-विधान-उक्तम् कर्म ज्ञात्वा, इह कर्म-अधिकारे वर्तमानः यथा-अधिकारम् कर्म कर्तुम् अर्हसि । तद्-मूलत्वात् सत्त्व-शुद्धि-सम्यक्-ज्ञान-मुक्तीनाम् इति अर्थः ॥१६.२४॥

ओं तत्सदिति
श्रीमहाभारते शतसाहस्त्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि
श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे दैवासुरसम्पद्विभागयोगो नाम षोडशो ऽध्यायः ॥१६॥

अथ सप्तदशो ऽध्यायः

अथ सप्तदशः अध्यायः । now the seventeenth chapter

Subodhinī: पूर्व-अध्याय-अन्ते 'यः शास्त्र-विधिम् उत्सृज्य वर्तते काम-कारतः न सः सिद्धिम् अवाप्नोति' (16.23) इति अनेन शास्त्र-उक्त-विधिम् उत्सृज्य काम-कारेण वर्तमानस्य ज्ञाने अधिकारः न अस्ति इति उक्तम्, तत्र शास्त्र-विधिम् उत्सृज्य काम-कारम् विना श्रद्धया वर्तमानानाम् किम् अधिकारः अस्ति न अस्ति वा ? इति बुभुत्सया – 'ये' इति –

17.1

अर्जुन उवाच
ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः ।
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ॥१॥

अर्जुनः उवाच - हे कृष्ण !	Arjuna said: O Kṛṣṇa!
शास्त्र-विधिम् उत्सृज्य	[after] discarding the order of *śāstra*
ये श्रद्धया अन्विताः यजन्ते,	those who sacrifice with faith,
तेषाम् तु निष्ठा का	but what is their status –
सत्त्वम् आहो रजः तमः ?	*sattva-guṇa* or *rajo-guṇa* or *tamo-guṇa*?

"Arjuna inquired: O Kṛṣṇa, what is the situation of those who do not follow the principles of scripture but worship according to their own imagination? Are they in goodness, in passion or in ignorance?"

अर्जुनः	**Arjuna** ⟨1.1⟩ m. *arjuna* – white, 'who is pure in actions'
उवाच	**he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
ये	**those who** ⟨1.3⟩ m. *kṛṣṇanāma yad* – (relative) who, which
शास्त्र-विधिम्	**the order of** ***śāstra*** ⟨2.1⟩ m. *śāstra-vidhi*...शास्त्राणाम् विधिः इति शास्त्र-विधिः
उत्सृज्य	**[after] discarding** ⟨*avyaya*⟩ *ud.*√*srj[a]* – to let loose; + .*ya[p]*
यजन्ते	**they sacrifice** ⟨*acyuta* 1.3⟩ √*yaj[a]*...देवपूजा-सङ्गतिकरण-यजन-दानेषु – to worship; associate; sacrifice; give
श्रद्धया	**with faith** ⟨3.1⟩ f. *śraddhā* – faith, trust
अन्विताः	**who are endowed** ⟨1.3⟩ m. *anvita* (*anu.*√*i[ṇ]* – to go along; + .*[k]ta*) – gone along
तेषाम्	**their** ⟨6.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that
निष्ठा	**position** ⟨1.1⟩ f. *niṣṭhā*
तु	**but** ⟨*avyaya*⟩
का	**what** ⟨1.1⟩ f. *kṛṣṇanāma kim* – who/what

कृष्ण	**O Kṛṣṇa!** ⟨8.1⟩ m. *kṛṣṇa* – 'all-attractive', 'dark'
सत्त्वम्	***sattva-guṇa*** ⟨1.1⟩ n. *sattva*
आहो	**or** ⟨*avyaya*⟩
रजः	***rajo-guṇa*** ⟨1.1⟩ n. *rajas* (*rajaḥ*)
तमः	***tamo-guṇa*** ⟨1.1⟩ n. *tamas* (*tamaḥ*)

Subodhinī: अत्र 'शास्त्र-विधिम् उत्सृज्य यजन्ते' इति अनेन शास्त्रार्थम् बुद्ध्वा तम् उल्लङ्घ्य वर्तमानाः न गृह्यन्ते, तेषाम् श्रद्धया यजन-अनुपपत्तेः, आस्तिक्य-बुद्धिः हि श्रद्धा । नच असौ शास्त्र-ज्ञानवताम् शास्त्र-विरुद्धे अर्थे सम्भवति । तान् एव अधिकृत्य, 'त्रिविधा भवति श्रद्धा' (17.2), 'यजन्ते सात्त्विकाः देवान्' (17.4) इत्यादि उत्तर-अनुपपत्तेः च । अतः न अत्र शास्त्र-अतिलङ्घिनः गृह्यन्ते । अपितु क्लेश-बुद्ध्या आलस्यात् वा शास्त्रार्थ-ज्ञाने प्रयत्नम् अ-कृत्वा, केवलम् आचार-परम्परा-वशेन श्रद्धया क्वचिद् देवता-आराधनादौ प्रवर्तमानाः गृह्यन्ते । अतः अयम् अर्थः – ये शास्त्र-विधिम् उत्सृज्य (दुःख-बुद्ध्या आलस्यात् वा अनादृत्य), केवलम् आचार-प्रामाण्येन श्रद्धया अन्विताः सन्तः यजन्ते, तेषाम् तु का निष्ठा (का स्थितिः, कः आश्रयः) ? ताम् एव विशेषेण पृच्छति – किम् सत्त्वम्, आहो किम् रजः, अथवा तमः ? इति । तेषाम् तादृशी देव-पूजादि-प्रवृत्तिः किम् सत्त्व-संश्रिता रजः-संश्रिता वा तमः-संश्रिता वा ? इति अर्थः । श्रद्धायाः सात्त्विकत्वात्, क्लेश-बुद्ध्या आलस्येन च शास्त्र-अनादरस्य राजस-तामसत्वात् त्रेधा सन्देहः । यदि सत्त्व-भाव-संश्रिताः, तर्हि तेषाम् अपि सात्त्विकत्वात् यथा-उक्त-आत्मज्ञाने अधिकारः स्यात्, अन्यथा न इति प्रश्न-तात्पर्य-अर्थः ॥१७.१॥

अत्र उत्तरम् [श्री-भगवान् उवाच] – 'त्रि-विधा' इति –

17.2

श्रीभगवानुवाच

त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥२॥

श्रीभगवान् उवाच –	Śrī Kṛṣṇa said:
देहिनाम् सा स्वभाव-जा श्रद्धा	that faith of men which is according to one's nature
त्रि-विधा भवति	is threefold –
सात्त्विकी राजसी च एव तामसी च	in *sattva-guṇa*, *rajo-guṇa* and *tamo-guṇa*,
इति ताम् शृणु ।	thus hear about it!

"The Supreme Personality of Godhead said: According to the modes of nature acquired by the embodied soul, one's faith can be of three kinds – in goodness, in passion or in ignorance. Now hear about this."

श्री-भगवान्	**Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'
उवाच	**he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
त्रिविधा	**threefold** ⟨1.1⟩ f. *tri-vidhā* (*.ā[p]*)
भवति	**it is** ⟨*acyuta* 1.1⟩ √*bhū*...सत्तायाम् – to be, exist, become
श्रद्धा	**faith** ⟨1.1⟩ f. *śraddhā* – faith, trust
देहिनाम्	**of the embodied** ⟨6.3⟩ m. *dehin* (*dehī*) – embodied soul
सा	**that** ⟨1.1⟩ f. *kṛṣṇanāma tad* – (first person) he, that
स्वभाव-जा	**born from one's nature** ⟨1.1⟩ f. *sva-bhāva-jā* (*.ā[p]*)...स्व-भावात् जाता इति स्वभाव-जा
सात्त्विकी	**in *sattva-guṇa*** ⟨1.1⟩ f. *sāttvikī* (*.ī[p]*)
राजसी	**in *rajo-guṇa*** ⟨1.1⟩ f. *rājasī* (*.ī[p]*)
च	**and** ⟨*avyaya*⟩
एव	**certainly** ⟨*avyaya*⟩
तामसी	**in *tamo-guṇa*** ⟨1.1⟩ f. *tāmasī* (*.ī[p]*)
इति	**thus** ⟨*avyaya*⟩
ताम्	**that** ⟨2.1⟩ f. *kṛṣṇanāma tad* – (first person) he, that
शृणु	**you must hear** ⟨*vidhātā* 2.1⟩ √*śru*...श्रवणे – to hear, obey

Subodhinī: अयम् अर्थः – शास्त्र-तत्त्व-ज्ञानतः प्रवर्तमानानाम् परमेश्वर-पूजा-विषया सात्त्विकी एक-विधा एव श्रद्धा । लोक-आचार-मात्रेण तु प्रवर्तमानानाम् देहिनाम् या श्रद्धा, सा तु सात्त्विकी राजसी तामसी च इति त्रि-विधा भवति । अत्र हेतुः – स्वभाव-जा, स्व-भावः पूर्व-जन्म-संस्कारः, तस्मात् जाता स्वभाव-जा । स्व-भावम् अन्यथा कर्तुम् समर्थम् हि शास्त्र-उक्तम् विवेक-ज्ञानम्, तद् तु तेषाम् न अस्ति । अतः केवलम् पूर्व-स्वभावेन एव भवति इति श्रद्धा त्रिविधा भवति, ताम् इमाम् त्रि-विधाम् श्रद्धाम् शृणु । तद् उक्तम् 'व्यवसाय-आत्मिका बुद्धिः एका इह कुरुनन्दन' (2.41) इत्यादिना ॥१७.२॥

ननु च श्रद्धा सात्त्विकी एव, सत्त्व-कार्यत्वेन त्वया एव भागवता उद्धवम् प्रति निर्दिष्टत्वात् । यथा उक्तम् –

शमः दमः तितिक्षा ईक्षा तपः सत्यम् दया स्मृतिः ।
तुष्टिः त्यागः अ-स्पृहा श्रद्धा ह्रीः दयादिः स्व-निर्वृतिः ।

(*SB.* 11.25.2) इति एताः सत्त्वस्य वृत्तयः इति । अतः कथम् तस्याः त्रैविध्यम् उच्यते ? सत्यम्, तथापि रजः-तमः-युक्त-पुरुष-आश्रयत्वेन रजः-तमः-मिश्रत्वेन सत्त्वस्य त्रैविध्यात् श्रद्धायाः अपि त्रैविध्यम् घटते इति आह – 'सत्त्व-अनुरूपा' इति –

17.3

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ॥३॥

हे भारत !	O Arjuna!
सर्वस्य श्रद्धा सत्त्वानुरूपा भवति,	the faith of everyone is according to one's nature,
अयम् पुरुषः श्रद्धामयः,	a person is made up of his faith,
यः यच्छ्रद्धः सः सः एव ।	he is just that what his faith is

"O son of Bharata, according to one's existence under the various modes of nature, one evolves a particular kind of faith. The living being is said to be of a particular faith according to the modes he has acquired."

सत्त्वानुरूपा	**according to nature** ⟨1.1⟩ f. *sattva-_anurūpā* (*.ā[p]*)
सर्वस्य	**of all** ⟨6.1⟩ m. *kṛṣnanāma sarva*
श्रद्धा	**the faith** ⟨1.1⟩ f. *śraddhā* – faith, trust
भवति	**it is** ⟨*acyuta* 1.1⟩ √*bhū*...सत्तायाम् – to be, exist, become
भारत	**O Arjuna!** ⟨8.1⟩ m. *bhārata* – 'descendant of Bharata'
श्रद्धामयः	**made up of faith** ⟨1.1⟩ m. *śraddhāmaya*
अयम्	**this** ⟨1.1⟩ m. *kṛṣnanāma idam* – (first person) he, this
पुरुषः	**person** ⟨1.1⟩ m. *puruṣa*
यः	**he who** ⟨1.1⟩ m. *kṛṣnanāma yad* – (relative) who, which
यच्छ्रद्धः	**being of which faith** ⟨1.1⟩ m. *yad-_śraddha*...या श्रद्धा यस्य, सः यच्छ्रद्धः – whose faith is which
सः	**he** ⟨1.1⟩ m. *kṛṣnanāma tad* – (first person) he, that
एव	**certainly** ⟨*avyaya*⟩
सः	**that** ⟨1.1⟩ m. *kṛṣnanāma tad* – (first person) he, that

Subodhinī: सत्त्व-अनुरूपा (सत्त्व-तारतम्य-अनुसारिणी) सर्वस्य विवेकिनः अ-विवेकिनः वा लोकस्य श्रद्धा भवति । तस्मात् अयम् पुरुषः लौकिकः श्रद्धामयः (श्रद्धा-विकारः), त्रि-विधया श्रद्धया विक्रियते इति अर्थः । तद् एव आह – यः यद्-श्रद्धः (यादृशी श्रद्धा यस्य) सः एव सः (तादृश्या श्रद्धया युक्तः एव सः) । यः पूर्वम् सत्त्व-उत्कर्षेण सात्त्विक-श्रद्धया युक्तः पुरुषः, सः पुनः तादृशत्व-संस्कारेण सात्त्विक-श्रद्धया युक्तः एव भवति । यः तु रजसः उत्कर्षेण राजस-श्रद्धा-युक्तः, सः पुनः तादृशः एव भवति । यः तु तमसः उत्कर्षेण तामस-श्रद्धया युक्तः, सः पुनः तादृशः एव भवति इति, लोक-आचारमात्रेण प्रवर्तमानेषु एवम् सात्त्विक-राजस-तामस-श्रद्धा-व्यवस्था । शास्त्र-जनित-विवेक-ज्ञान-युक्तानाम् तु स्वभाव-विजयेन सात्त्विकी एका एव श्रद्धा इति प्रकरण-अर्थः ॥१७.३॥

सात्त्विकादि-भेदम् एव कार्य-भेदेन प्रपञ्चयति – 'यजन्ते' इति –

17.4

यजन्ते सात्त्विका देवान्यक्षरक्षांसि राजसाः ।
प्रेतान्भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥४॥

सात्त्विकाः जनाः देवान् यजन्ते,	persons in *sattva-guṇa* worship the *devas*,
राजसाः यक्ष-रक्षांसि,	those in *rajo-guṇa* the Yakṣas and Rakṣasas,
अन्ये च तामसाः	and the others, those in *tamo-guṇa*
प्रेतान् भूत-गणान् यजन्ते ।	worship ghosts and spirits

"Men in the mode of goodness worship the demigods; those in the mode of passion worship the demons; and those in the mode of ignorance worship ghosts and spirits."

यजन्ते	**they worship** ⟨*acyuta* 1.3⟩ √*yaj[a]*...देवपूजा-सङ्गतिकरण-यजन-दानेषु – to worship; associate; sacrifice; give
सात्त्विकाः	**those in *sattva-guṇa*** ⟨1.3⟩ m. *sāttvika* – in *sattva-guṇa*
देवान्	**the *devas*** ⟨2.3⟩ m. *deva* – divine being
यक्ष-रक्षांसि	**the Yakṣas and Rākṣasas** ⟨2.3⟩ n. *yakṣa-rakṣas* (*-rakṣaḥ*)
राजसाः	**those in *rajo-guṇa*** ⟨1.3⟩ m. *rājasa* – in *rajo-guṇa*
प्रेतान्	**the departed** ⟨2.3⟩ m. *preta* (*pra.*√*i[ṇ]* – to depart; + *.[k]ta*)
भूत-गणान्	**the hosts of ghosts** ⟨2.3⟩ m. *bhūta-gaṇa* – host of ghosts
च	**and** ⟨*avyaya*⟩
अन्ये	**others** ⟨1.3⟩ m. *kṛṣnanāma anya* – other
यजन्ते	**they worship** ⟨*acyuta* 1.3⟩ √*yaj[a]*...देवपूजा-सङ्गतिकरण-यजन-दानेषु – to worship; associate; sacrifice; give
तामसाः	**those in *tamo-guṇa*** ⟨1.3⟩ m. *tāmasa* – in *tamo-guṇa*
जनाः	**persons** ⟨1.3⟩ m. *jana* – man, person

Subodhinī: सात्त्विकाः जनाः सत्त्व-प्रकृतीन् देवान् एव यजन्ते (पूजयन्ति) । राजसाः तु रजः-प्रकृतीन् यक्षान् राक्षसान् च यजन्ते । एतेभ्यः अन्ये तु विलक्षणाः तामसाः जनाः तामसान् एव प्रेतान् भूत-गणान् च यजन्ते । सत्त्वादि-प्रकृतीनाम् तद्-तद्-देवतानाम् तु पूजा-रुचिभिः तद्-तद्-पूजकानाम् सात्त्विकत्वादि ज्ञातव्यम् इति अर्थः ॥१७.४॥

राजस-तामसेषु पुनः विशेष-अन्तरम् आह – 'अ-शास्त्र-विहितम्' इति द्वाभ्याम् –

17.5...6

अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः ।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः ॥५॥

दम्भाहङ्कार-संयुक्ताः	out of deceit and false ego
काम-राग-बलान्विताः	impelled by lust and attachment
ये जनाः	those persons who
अ-शास्त्र-विहितम् घोरम् तपः	severe austerity not prescribed by *śāstra*
तप्यन्ते . . .	undergo . . .

"Those who undergo severe austerities and penances not recommended in the scriptures, performing them out of pride and egoism, who are impelled by lust and attachment, . . ."

अ-शास्त्र-विहितम् **not prescribed by *śāstra*** ⟨2.1⟩ n. *a-śāstra-vihita*...न शास्त्रेण विहितम् इति अ-शास्त्र-विहितम्
विहित (*vi.*√*[ḍu]dhā[ñ]* – to hold, make; + *.[k]ta*) – held, made, prescribed

घोरम् **severe** ⟨2.1⟩ n. *ghora* – awful

तप्यन्ते **they undergo** ⟨*acyuta* 1.3⟩ √*tap[a]*...सन्तापे ऐश्वर्य्ये वा – to heat, burn; lord

ये **those who** ⟨1.3⟩ m. *kṛṣnanāma yad* – (relative) who, which

तपः **austerity** ⟨2.1⟩ n. *tapas (tapaḥ)* – austerity, penance

जनाः **persons** ⟨1.3⟩ m. *jana* – man, person

दम्भाहङ्कार-संयुक्ताः **who are endowed with deceit and false ego** ⟨1.3⟩ m. *dambha-_ahaṅkāra-saṁyukta*

काम-राग-बलान्विताः **who are endowed with strength of lust and attachment** ⟨1.3⟩ m. *kāma-rāga-bala-_anvita*
(or:) endowed with lust, attachment and *bala*
बल – strength; obstinacy

Subodhinī: शास्त्र-विधिम् अ-जानन्तः अपि, केचिद् प्राचीन-पुण्य-संस्कारेण उत्तमाः सात्त्विकाः एव भवन्ति । केचिद् तु मध्यमाः राजसाः भवन्ति । अधमाः तु तामसाः भवन्ति । ये पुनः अत्यन्तम् मन्द-भाग्याः, गत-अनुगत्या पाषण्ड-सङ्गेन च तद्-आचार-अनुवर्तिनः सन्तः, अ-शास्त्र-विहितम् घोरम् (भयम्-करम्) तपः तप्यन्ते (कुर्वन्ति)। तत्र हेतवः – दम्भ-अहङ्काराभ्याम् संयुक्ताः । तथा कामः (अभिलाषः) रागः (आसक्तिः) बलम् (आग्रहः) एतैः अन्विताः सन्तः, तान् आसुर-निश्चयान् विद्धि इति उत्तरेण अन्वयः ॥१७.५॥

17.6

कर्षयन्तः शरीरस्थं भूतग्राममचेतसः ।
मां चैवान्तःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥६॥

. . . अ-चेतसः	. . . those ignorant
शरीर-स्थम् भूत-ग्रामम्	[thereby] the elements in the body

अन्तः-शरीर-स्थम् माम् च एव	and also Me, who am situated in the body
कर्षयन्तः,	[while] torturing,
तान् आसुर-निश्चयान् विद्धि !	know them to be of demoniac mentality!

". . . who are foolish and who torture the material elements of the body as well as the Supersoul dwelling within, are to be known as demons."

कर्षयन्तः **who are torturing** ⟨1.3⟩ m. *karṣayat (kṛṣ[a]*...विलेखने आकर्षणे च – to draw, plough; attract; caus. *. .[ś]at[r]*) – [while] pulling, torturing

शरीर-स्थम् **situated in the body** ⟨2.1⟩ m. *śarīra-stha*

भूत-ग्रामम् **the aggregate of elements** ⟨2.1⟩ m. *bhūta-grāma*

अ-चेतसः **the ignorant** ⟨1.3⟩ m. *a-cetas (-cetaḥ)* – mindless

माम् **me** ⟨2.1⟩ *kṛṣnanāma asmad* – (last person) I

च **and** ⟨*avyaya*⟩

एव **certainly** ⟨*avyaya*⟩

अन्तः-शरीर-स्थम् **who resides in the body** ⟨2.1⟩ m. *antaḥ-śarīra-stha*

तान् **them** ⟨2.3⟩ m. *kṛṣnanāma tad* – (first person) he, that

विद्धि **you must know** ⟨*vidhātā* 2.1⟩ √*vid[a]* 2P...ज्ञाने – to know

आसुर-निश्चयान् **whose resolves are demonic** ⟨2.3⟩ m. *āsura-niścaya*...आसुरः निश्चयः यस्य, सः आसुर-निश्चयः – whose resolve is demoniac

Subodhinī: शरीर-स्थम् (प्रारम्भकत्वेन देहे स्थितम्) भूतानाम् (पृथिव्यादीनाम्) ग्रामम् (समूहम्) कर्षयन्तः (वृथा एव उपवासादिभिः कृशम् कुर्वन्तः) अ-चेतसः (अ-विवेकिनः) माम् च अन्तर्यामितया अन्तः-शरीर-स्थम् (देह-मध्ये स्थितम्) मद्-आज्ञा-आलङ्घनेन एव कर्षयन्तः सन्तः, एवम् ये तपः चरन्ति, तान् आसुर-निश्चयान्, आसुरः (अतिक्रूरः) निश्चयः येषाम् तान्, विद्धि ॥१७.६॥
आहारादि-भेदात् अपि सात्त्विकादि-भेदम् दर्शयितुम् आह – 'आहारः तु' इत्यादि त्रयोदशभिः –

17.7

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥७॥

सर्वस्य प्रियः आहारः तु अपि	but even the food liked by each
त्रि-विधः भवति	is threefold
तथा यज्ञः तपः दानम्,	as are sacrifice, austerity and charity,
तेषाम् इमम् भेदम् शृणु !	hear their distinctions!

"Even the food each person prefers is of three kinds, according to the three modes of material nature. The same is true of sacrifices, austerities and charity. Now hear of the distinctions between them."

आहारः **the food** ⟨1.1⟩ m. *āhāra*

तु **but** ⟨*avyaya*⟩

अपि **also** ⟨*avyaya*⟩

सर्वस्य **of all** ⟨6.1⟩ m. *kṛṣṇanāma sarva* – all

त्रि-विधः **of three kinds** ⟨1.1⟩ m. *tri-vidha*

भवति **it is** ⟨*acyuta* 1.1⟩ √*bhū*...सत्तायाम् – to be, exist, become

प्रियः **dear** ⟨1.1⟩ m. *priya*

यज्ञः **sacrifice** ⟨1.1⟩ m. *yajña*

तपः **austerity** ⟨1.1⟩ n. *tapas* (*tapaḥ*) – austerity, penance

तथा **so** ⟨*avyaya*⟩

दानम् **charity** ⟨1.1⟩ n. *dāna* – gift

तेषाम् **their** ⟨6.3⟩ m. *kṛṣṇanāma tad* – (first person) he, that

भेदम् **distinction** ⟨2.1⟩ m. *bheda* (from √*bhid[ir]*...विदारणे – to split, break) – separation, division

इमम् **this** ⟨2.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this

शृणु **you must hear** ⟨*vidhātā* 2.1⟩ √*śru*...श्रवणे – to hear, obey

Subodhinī: सर्वस्य अपि जनस्य यः आहारः (अन्नादिः), सः तु यथा-यथम् त्रि-विधः प्रियः भवति। तथा यज्ञ-तपः-दानानि च त्रि-विधानि भवन्ति। तेषाम् च वक्ष्यमाणम् इमम् भेदम् शृणु। एतद् च राजस-तामस-आहार-यज्ञादि-परित्यागेन सात्त्विक-आहार-यज्ञादि-सेवया सत्त्व-वृद्धौ यत्नः कर्तव्यः इति एतद् अर्थम् कथ्यते ॥१७.७॥

तत्र आहार-त्रैविध्यम् आह – 'आयुः' इति त्रिभिः –

17.8

आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ॥८॥

आयुः-सत्त्व-बलारोग्य-सुख-प्रीति-विवर्धनाः	which increase life, purity, strength, health, happiness and joy
रस्याः स्निग्धाः स्थिराः हृद्याः आहाराः	and juicy, fatty, nourishing and pleasing foods
सात्त्विक-प्रियाः ।	are dear to one in *sattva*

"Foods dear to those in the mode of goodness increase the duration of life, purify one's existence and give strength, health, happiness and satisfaction. Such foods are juicy, fatty, wholesome, and pleasing to the heart."

आयुः-सत्त्व-बलारोग्य-सुख-प्रीति-विवर्धनाः **which increase life, purity, strength, health, happiness and joy** ⟨1.3⟩ m. *āyuḥ-sattva-bala-_ārogya-sukha-prīti-vivardhana*...आयुः-सत्त्व-बल-आरोग्य-सुख-प्रीतीनाम् विवर्धनः इति आयुः-सत्त्व-बलारोग्य-सुख-प्रीति-विवर्धनः
ārogya (from *a-roga* – 'non-disease', health) – health; *roga* (disease) comes from √*ruj[a]*...हिंसायाम् – to harm; (derived:) *rogin* (*rogī*) – who is diseased

रस्याः **which are juicy** ⟨1.3⟩ m. *rasya* – juicy, tasty

स्निग्धाः **which are fatty** ⟨1.3⟩ m. *snigdha* – fatty

स्थिराः **which are nourishing** ⟨1.3⟩ m. *sthira* – 'firm', nourishing

हृद्याः **which are pleasing** ⟨1.3⟩ m. *hṛdya* – 'hearty', pleasing

आहाराः **foods** ⟨1.3⟩ m. *āhāra* – food

सात्त्विक-प्रियाः **which are dear to one in *sattva-guṇa*** ⟨1.3⟩ m. *sāttvika-priya*...सात्त्विकस्य प्रियः इति सात्त्विक-प्रियः – which is dear to one in *sattva-guṇa*

Subodhinī: आयुः जीवितम्, सत्त्वम् उत्साहः, बलम् शक्तिः, आरोग्यम् रोग-राहित्यम्, सुखम् चित्त-प्रसादः, प्रीतिः अभिरुचिः। आयुरादीनाम् विवर्धनाः (विशेषेण वृद्धि-कराः)। ते च रस्याः (रसवन्तः) स्निग्धाः (स्नेह-युक्ताः) स्थिराः (देहे सारांशेन चिर-काल-अवस्थायिनः) हृद्याः (दृष्टमात्राः एव हृदयङ्गमाः)। एवम्-भूताः आहाराः भक्ष्य-भोज्यादयः सात्त्वि-कप्रियाः ॥१७.८॥

17.9

कट्वम्ललवणात्युष्णातीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥९॥

कट्वम्ल-लवणात्युष्ण-तीक्ष्ण-रूक्ष-विदाहिनः	which are too bitter, sour, salty, hot, pungent, dry and burning
दुःख-शोकामय-प्रदाः आहाराः	and foods causing distress, sorrow and disease
राजसस्य इष्टाः ।	are dear to one in *rajo-guṇa*

"Foods that are too bitter, too sour, salty, hot, pungent, dry and burning are dear to those in the mode of passion. Such foods cause distress, misery and disease."

कट्वम्ल-लवणात्युष्ण-तीक्ष्ण-रूक्ष-विदाहिनः **which are too bitter, sour, salty, hot, pungent, dry and burning** ⟨1.3⟩ m. *kaṭu-_amla-lavaṇa-_atyuṣṇa-tīkṣṇa-rūkṣa-vidāhin* (*-vidāhī*)
The word *ati* is connected to all these qualities.

आहाराः **foods** ⟨1.3⟩ m. *āhāra* – food

राजसस्य **of one in *rajo-guṇa*** ⟨6.1⟩ m. *rājasa* – in *rajo-guṇa*

इष्टाः **which are desired** ⟨1.3⟩ m. *iṣṭa* (√*iṣ[u]*...इच्छायाम्; + .*[k]ta*) – desired

दुःख-शोकामय-प्रदाः **which give distress, sorrow and disease** ⟨1.3⟩ m. *duḥkha-śoka-_āmaya-prada* – giving misery, sorrow and disease

Subodhinī: 'अति'-शब्दः कट्वादिषु सप्तसु अपि सम्बद्धयते । अतिकटुः निम्बादिः, अत्यम्लः अतिलवणः अत्युष्णः च प्रसिद्धः, अतितीक्ष्णः मरीचादिः, अतिरूक्षः कङ्गु-कोद्रवादिः, अतिविदाही सर्षपादिः । अतिकट्वादयः आहाराः राजसस्य इष्टाः (प्रियाः) । दुःखम् (तात्कालिकम् हृदय-सन्तापादिः) शोकः (पश्चात्-भावि-दौर्मनस्यम्) आमयः (रोगः), एतान् प्रददति (प्रयच्छन्ति) इति ॥१७.९॥

17.10

यातयामं गतरसं पूति पर्युषितं च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥१०॥

यात-यामम्	cooked more than three hours before
गत-रसम् पूति पर्युषितम् च	tasteless, putrid and stale
उच्छिष्टम् अ-मेध्यम् अपि च यद् भोजनम्	and left-over or impure food
तामस-प्रियम् ।	is dear to one in *tamo-guna*

"Food prepared more than three hours before being eaten, food that is tasteless, decomposed and putrid, and food consisting of remnants and untouchable things is dear to those in the mode of darkness."

यात-यामम् **whose *yāma* has passed** ⟨1.1⟩ n. *yāta-yāma*...यातः यामः यस्य, तद् यात-यामम्
One *yāma* (three hours; same as *prahara*) after cooking, food has become cold and should again be heated up before eating.

गत-रसम् **whose taste has gone** ⟨1.1⟩ n. *gata-rasa*...गतः रसः यस्य, तद् गत-रसम्

पूति **which is putrid** ⟨1.1⟩ n. *pūti* – putrid, stinking

पर्युषितम् **which is stale** ⟨1.1⟩ n. *paryuṣita* (*pari.√vas[a]* 1P – to stay; + *.[k]ta*) – 'stayed', left over, esp. stayed over-night

च **and** ⟨*avyaya*⟩

यद् **that which** ⟨1.1⟩ n. *kṛṣnanāma yad* – (relative) who, which

उच्छिष्टम् **which is left-over [by others]** ⟨1.1⟩ n. *ucchiṣṭa* (*ud.√śiṣ[a]* – to leave remaining; + *.[k]ta*) – left remaining

अपि **also** ⟨*avyaya*⟩

च **and** ⟨*avyaya*⟩

अ-मेध्यम् **which is impure** ⟨1.1⟩ n. *a-medhya* – 'not fit to be sacrificed'

भोजनम् **food** ⟨1.1⟩ n. *bhojana*

तामस-प्रियम् **dear to one in *tamo-guṇa*** ⟨1.1⟩ n. *tāmasa-priya*

Subodhinī: यातः यामः (प्रहरः) यस्य पक्वस्य ओदनादेः तद् यात-यामम्, शैत्य-अवस्थाम् प्राप्तम् इति अर्थः । गत-रसम् (निष्पीडित-सारम्) पूति (दुर्गन्धम्) पर्युषितम् (दिन-अन्तर-पक्वम्) उच्छिष्टम् (अन्य-भुक्त-अवशिष्टम्) अ-मेध्यम् (अ-भक्ष्यम् कलञ्जादि), एवम्-भूतम् भोजनम् (भोज्यम्) तामसस्य प्रियम् ॥१७.१०॥

यज्ञः अपि त्रिविधः, तत्र सात्त्विकम् यज्ञम् आह – 'अ-फलाकाङ्क्षिभिः' इति त्रिभिः –

17.11

अफलाकाङ्क्षिभिर्यज्ञो विधिदिष्टो य इज्यते ।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥११॥

यष्टव्यम् एव	'it is to be offered'
इति मनः समाधाय	[after] thus fixing the mind
अ-फलाकाङ्क्षिभिः	by men not expecting the fruit
विधि-दिष्टः यः यज्ञः इज्यते,	the sacrifice which is performed according to rule,
सः सात्त्विकः ।	that is in *sattva-guṇa*

"Of sacrifices, the sacrifice performed according to the directions of scripture, as a matter of duty, by those who desire no reward, is of the nature of goodness."

अ-फलाकाङ्क्षिभिः **by those not expecting the fruit** ⟨3.3⟩ m. *a-phala-_ākāṅkṣin* (*-ākāṅkṣī*) – who does not expect the fruit

यज्ञः **the sacrifice** ⟨1.1⟩ m. *yajña*

विधि-दिष्टः **prescribed by the rules** ⟨1.1⟩ m. *vidhi-diṣṭa*...विधिना दिष्टः इति विधि-दिष्टः

यः **that which** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

इज्यते **it is offered** ⟨*acyuta* pass. 1.1⟩ *√yaj[a]*...देवपूजा-सङ्गतिकरण-यजन-दानेषु – to worship; associate; sacrifice; give

यष्टव्यम् **it is to be offered** ⟨1.1⟩ n. *yaṣṭavya* (*√yaj[a]*...देवपूजा-सङ्गतिकरण-यजन-दानेषु + *.tavya*) – to be offered

एव **certainly** ⟨*avyaya*⟩

इति **thus** ⟨*avyaya*⟩

मनः **the mind** ⟨1.1⟩ n. *manas* (*manaḥ*)

समाधाय **[after] concentrating** ⟨*avyaya*⟩ *sam.ā.√[ḍu]dhā[ñ]* – to hold, concentrate; + *.ya[p]*

सः **that** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

सात्त्विकः **in *sattva-guṇa*** ⟨1.1⟩ n. *sāttvika*

Subodhinī: फल-आकाङ्क्षा-रहितैः पुरुषैः विधिना दिष्टः (आवश्यकतया विहितः) यः यज्ञः इज्यते (अनुष्ठीयते), सः सात्त्विकः यज्ञः । कथम् इज्यते – 'यष्टव्यम् एव' इति, 'यज्ञ-अनुष्ठानम् एव कार्यम्, न अन्यत् फलम् साधनीयम्' इति, एवम् मनः समाधाय (एकाग्रम् कृत्वा) इति अर्थः ॥१७.११॥

राजसम् यज्ञम् आह – 'अभिसन्धाय' इति –

17.12

अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥१२॥

हे भरत-श्रेष्ठ !	O Arjuna!
फलम् तु अभिसन्धाय,	but [after] aiming at the fruit
दम्भार्थम् अपि च एव	only for the sake of deceit,
यद् इज्यते,	that which is offered,
तम् राजसम् यज्ञम् विद्धि !	know that sacrifice to be in *rajo-guṇa*!

"But the sacrifice performed for some material benefit, or for the sake of pride, O chief of the Bhāratas, you should know to be in the mode of passion."

अभिसन्धाय	**[after] aiming at** ⟨*avyaya*⟩ *abhi.sam.√[ḍu]dhā[ñ]* – to hold, aim at; + *.ya[p]*
तु	**but** ⟨*avyaya*⟩
फलम्	**the fruit** ⟨2.1⟩ n. *phala*
दम्भार्थम्	**for the sake of deceit** ⟨*avyaya*⟩ *dambha-_artham*
अपि	**also** ⟨*avyaya*⟩
च	**and** ⟨*avyaya*⟩
एव	**certainly** ⟨*avyaya*⟩
यद्	**that which** ⟨1.1⟩ n. *kṛṣnanāma yad* – (relative) who, which
इज्यते	**it is offered** ⟨*acyuta* pass. 1.1⟩ *√yaj[a]*...देवपूजा-सङ्गतिकरण-यजन-दानेषु – to worship; associate; sacrifice; give
भरत-श्रेष्ठ	**O Arjuna!** ⟨8.1⟩ m. *bharata-śreṣtha* – 'best of the Bharatas'
तम्	**that** ⟨2.1⟩ m. *kṛṣnanāma tad* – (first person) he, that
यज्ञम्	**sacrifice** ⟨2.1⟩ m. *yajña*
विद्धि	**you must know** ⟨*vidhātā* 2.1⟩ *√vid[a]* 2P...ज्ञाने – to know
राजसम्	**in *rajo-guṇa*** ⟨2.1⟩ m. *rājasa*

Subodhinī: फलम् अभिसन्धाय (उद्दिश्य) तु यद् इज्यते (यज्ञः क्रियते), दम्भार्थम् च (स्व-महत्त्व-ख्यापनार्थम्), तम् यज्ञम् राजसम् विद्धि ॥१७.१२॥
तामसम् यज्ञम् आह – 'विधि-हीनम्' इति –

17.13

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥१३॥

विधि-हीनम् अ-सृष्टान्नम्	which is irregular, without distribution of food

मन्त्र-हीनम् अ-दक्षिणम्	without *mantras* and remuneration
श्रद्धा-विरहितम् यज्ञम्	the sacrifice without faith
तामसम् परिचक्षते ।	is considered to be in *tamo-guṇa*

"Any sacrifice performed without regard for the directions of scripture, without distribution of prasādam (spiritual food), without chanting of Vedic hymns and remunerations to the priests, and without faith is considered to be in the mode of ignorance."

विधि-हीनम्	**which is irregular** ⟨2.1⟩ m. *vidhi-hīna* – destitute of rule, unauthorised, irregular
अ-सृष्टान्नम्	**in which food is not distributed** ⟨2.1⟩ m. *a-sṛṣṭa-_anna*...न सृष्टम् अन्नम् यस्मिन्, सः अ-सृष्टान्नः
मन्त्र-हीनम्	**which is without *mantra*** ⟨2.1⟩ m. *mantra-hīna*
अ-दक्षिणम्	**which is without remuneration** ⟨2.1⟩ m. *a-dakṣiṇa* दक्षिणा – right hand side; south; a gift to the priest
श्रद्धा-विरहितम्	**which is without faith** ⟨2.1⟩ m. *śraddhā-virahita*
यज्ञम्	**a sacrifice** ⟨2.1⟩ m. *yajña*
तामसम्	**in *tamo-guṇa*** ⟨2.1⟩ m. *tāmasa*
परिचक्षते	**they speak** ⟨*acyuta* 3.1⟩ *pari.√cakṣ[iṅ]* – to speak

Subodhinī: विधिहीनम् शास्त्र-उक्त-विधि-शून्यम् । अ-सृष्ट-अन्नम् ब्राह्मणादिभ्यः न सृष्टम् (न निष्पादितम्) अन्नम् यस्मिन् तम् । मन्त्रैः हीनम्, यथोक्त-दक्षिणा-रहितम् च, श्रद्धा-शून्यम् यज्ञम् तामसम् परिचक्षते (कथयन्ति) शिष्टाः ॥१७.१३॥
तपसः सात्त्विकादि-भेदम् दर्शयितुम्, प्रथमम् तावत् शारीरादि-भेदेन तस्य त्रैविध्यम् आह – 'देव-द्विज' इति त्रिभिः –

17.14

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥१४॥

देव-द्विज-गुरु-प्राज्ञ-पूजनम्	worshiping the *devas*, *brāhmanas*, *guru* and superiors
शौचम् आर्जवम्	purity, simplicity
ब्रह्म-चर्यम् अ-हिंसा च	celibacy and non-violence
शारीरम् तपः उच्यते ।	is said to be austerity of the body

"Austerity of the body consists in worship of the Supreme Lord, the brāhmaṇas, the spiritual master, and superiors like the father and mother, and in cleanliness, simplicity, celibacy and nonviolence."

देव-द्विज-गुरु-प्राज्ञ-पूजनम्	**worshiping the *devas*, *brāhmaṇas*, *guru* and superiors** ⟨1.1⟩ n. *deva-dvija-guru-prājña-pūjana*

शौचम्	**purity** ⟨1.1⟩ n. *śauca*
आर्जवम्	**simplicity** ⟨1.1⟩ n. *ārjava* – straightforwardness, honesty, sincerity
ब्रह्म-चर्यम्	**celibacy** ⟨1.1⟩ n. *brahma-carya* – 'study of the *Vedas*', spiritual practice as a *brahma-cārin* (*-cārī*) or celibate student
अहिंसा	**non-violence** ⟨1.1⟩ f. *a-hiṁsā*
च	**and** ⟨*avyaya*⟩
शारीरम्	**bodily** ⟨1.1⟩ n. *śārīra* (from *śarīra*)
तपः	**austerity** ⟨1.1⟩ n. *tapas* (*tapaḥ*) – austerity, penance
उच्यते	**it is said** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak

Subodhinī: प्राज्ञाः गुरु-व्यतिरिक्ताः, अन्ये अपि तत्त्व-विदः । देव-ब्राह्मणादि-पूजनम्, शौचादिकम् शारीरम् (शरीर-निर्वर्त्यम्) तपः उच्यते ॥१७.१४॥
वाचिकम् तपः आह – 'अनुद्वेग' इति –

17.15

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥१५॥

यद् अनुद्वेग-करम्	which causes no anxiety
सत्यम् प्रिय-हितम् च वाक्यम्	truthful, pleasing and beneficial speech
स्वाध्यायाभ्यसनम् च एव	and also study of the *Vedas*
वाङ्मयम् तपः उच्यते ।	is said to be austerity of speech

"Austerity of speech consists in speaking words that are truthful, pleasing, beneficial, and not agitating to others, and also in regularly reciting Vedic literature."

अनुद्वेग-करम्	**which does not cause anxiety** ⟨1.1⟩ n. *an-udvega-kara*...न उद्वेगम् करोति इति अनुद्वेग-करः
वाक्यम्	**speech** ⟨1.1⟩ n. *vākya*
सत्यम्	**which is truthful** ⟨1.1⟩ n. *satya* – true, real; truth
प्रिय-हितम्	**which is pleasing and beneficial** ⟨1.1⟩ n. *priya-hita*...प्रियम् च हितम् च इति प्रिय-हितम्
च	**and** ⟨*avyaya*⟩
यद्	**that which** ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
स्वाध्यायाभ्यसनम्	**the practice of study** ⟨1.1⟩ n. *svādhyāya-_abhyasana*...स्वाध्यायस्य अभ्यसनम् इति स्वाध्यायाभ्यसनम्
एव	**certainly** ⟨*avyaya*⟩
वाङ्मयम्	**verbal** ⟨1.1⟩ n. *vāk-_maya* – 'made of speech'
तपः	**austerity** ⟨1.1⟩ n. *tapas* (*tapaḥ*) – austerity, penance

उच्यते	**it is said** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak

Subodhinī: उद्वेगम् (भयम्) न करोति इति अनुद्वेग-करम् वाक्यम्, सत्यम् च, श्रोतुः
प्रियम् च, हितम् च (परिणामे सुख-करम्), स्वाध्याय-अभ्यसनम् (वेद-
अभ्यासः) च वाङ्मयम् (वाचा निर्वर्त्यम्) तपः ॥१७.१५॥
मानसम् तपः आह – 'मनः-प्रसाद' इति –

17.16

मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥१६॥

मनः-प्रसादः सौम्यत्वम् मौनम्	satisfaction, mildness, gravity
आत्म-विनिग्रहः भाव-संशुद्धिः	self-control and purity of heart
इति एतद् मानसम् तपः उच्यते ।	this is said to be austerity of the mind

"And satisfaction, simplicity, gravity, self-control and purification of one's existence are the austerities of the mind."

मनः-प्रसादः	**satisfaction of the mind** ⟨1.1⟩ m. *manaḥ-prasāda*
सौम्यत्वम्	**mildness** ⟨1.1⟩ n. *saumyatva* (*.tva*) सौम्य (from *soma*) – 'like the moon', mild, gentle, pleasant
मौनम्	**silence** ⟨1.1⟩ n. *mauna* (*muneḥ bhāvaḥ iti maunam*) – the disposition of a *muni*', gravity, thoughtful contemplation, restraint of tongue; observing silence
आत्म-विनिग्रहः	**self-control** ⟨1.1⟩ m. *ātma-vinigraha*
भाव-संशुद्धिः	**purity of heart** ⟨1.1⟩ f. *bhāva-saṁśuddhi*...भावस्य संशुद्धिः इति भाव-संशुद्धिः
इति	**thus** ⟨*avyaya*⟩
एतद्	**this** ⟨1.1⟩ n. *kṛṣṇanāma etad* – (first person) he, this
तपः	**austerity** ⟨1.1⟩ n. *tapas* (*tapaḥ*) – austerity, penance
मानसम्	**mental** ⟨1.1⟩ n. *mānasa*
उच्यते	**it is said** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak

Subodhinī: मनसः प्रसादः स्व-स्थता । सौम्यत्वम् अ-क्रूरता । मौनम् मुनेः भावः, मननम्
इति अर्थः । आत्मनः (मनसः) विनिग्रहः (विषयेभ्यः प्रत्याहारः) । भाव-संशुद्धिः
(व्यवहारे माया-राहित्यम्) इति एतद् मानसम् तपः ॥१७.१६॥
तद् एवम् शरीर-वाक्-मनोभिः निर्वर्त्यम् त्रि-विधम् तपः दर्शितम् । तस्य त्रि-
विधस्य अपि तपसः सात्त्विकादि-भेदेन त्रैविध्यम् आह – 'श्रद्धया' इति
त्रिभिः –

17.17

श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥१७॥

तद् त्रि-विधम् तपः	that threefold austerity (bodily, verbal, mental)
अ-फलाकाङ्क्षिभिः युक्तैः नरैः	by devoted men, who do not expect any fruit
परया श्रद्धया तप्तम्	undergone with great faith
सात्त्विकम् परिचक्षते ।	is considered to be in *sattva-guṇa*

"This threefold austerity, performed with transcendental faith by men not expecting material benefits but engaged only for the sake of the Supreme, is called austerity in goodness."

श्रद्धया **with faith** ⟨3.1⟩ f. *śraddhā* – faith, trust
परया **with greatest** ⟨3.1⟩ f. *parā (.ā[p])* – beyond
तप्तम् **which is undergone** ⟨2.1⟩ n. *tapta* (√*tap[a]*...सन्तापे ऐश्वर्य्ये वा – to heat, burn; lord, undergo; + *.[k]ta*)
तपः **austerity** ⟨2.1⟩ n. *tapas (tapaḥ)* – austerity, penance
तद् **that** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
त्रि-विधम् **threefold** ⟨2.1⟩ n. *tri-vidha*
नरैः **by men** ⟨3.3⟩ m. *nara* – man
अ-फलाकाङ्क्षिभिः **by those who do not expect a fruit** ⟨3.3⟩ m. *a-phala-_ākāṅkṣin (-ākāṅkṣī)* – who does not expect a fruit
युक्तैः **by devoted** ⟨3.3⟩ m. *yukta (.[k]ta)* – connected, engaged, endowed with
सात्त्विकम् **in *sattva-guṇa*** ⟨2.1⟩ n. *sāttvika*
परिचक्षते **they speak** ⟨*acyuta* 1.3⟩ *pari.*√*cakṣ[iṅ]* – to speak

Subodhinī: त्रि-विधम् अपि तपः, परया (श्रेष्ठया) श्रद्धया फल-आकाङ्क्षा-शून्यैः युक्तैः (एकाग्र-चित्तैः) नरैः तप्तम्, तद् सात्त्विकम् कथयन्ति ॥१७.१७॥
राजसम् तपः आह – 'सत्-कारः' इति –

17.18

सत्कारमानपूजार्थं तपो दम्भेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥१८॥

सत्कार-मान-पूजार्थम्	to gain respect, honor and worship
दम्भेन च एव यद् तपः क्रियते,	and austerity which is performed with deceit
तद् इह राजसम् प्रोक्तम्,	that is here declared to be in *rajo-guṇa*,

चलम् अ-ध्रुवम् ।	it is flickering and unstable

"Penance performed out of pride and for the sake of gaining respect, honor and worship is said to be in the mode of passion. It is neither stable nor permanent."

सत्कार-मान-पूजार्थम् **for the sake of respect, honor and worship** ⟨*avyaya*⟩ *satkāra-māna-pūja-_artham*
तपः **the austerity** ⟨1.1⟩ n. *tapas (tapaḥ)* – austerity, penance
दम्भेन **with deceit** ⟨3.1⟩ m. *dambha* – deceit
च **and** ⟨*avyaya*⟩
एव **certainly** ⟨*avyaya*⟩
यद् **that which** ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
क्रियते **it is done** ⟨*acyuta* pass. 1.1⟩ √*[du]kr[ñ]*...करणे – to do
तद् **that** ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
इह **here** ⟨*avyaya*⟩
प्रोक्तम् **declared** ⟨1.1⟩ n. *prokta (pra.*√*vac[a]* – to declare; + *.[k]ta*)
राजसम् **in *rajo-guṇa*** ⟨1.1⟩ n. *rājasa*
चलम् **flickering** ⟨1.1⟩ n. *cala* – moving
अ-ध्रुवम् **unstable** ⟨1.1⟩ n. *a-dhruva* – not fixed

Subodhinī: सत्-कारः (साधु-कारः), 'साधुः अयम् इति तापसः' इत्यादि वाक्-पूजा । मानः प्रत्युत्थान-अभिवादनादिः दैहिकी पूजा, अर्थ-लाभादिः । एतद्-अर्थम्, दम्भेन च, यद् तपः क्रियते, अतएव चलम् (अ-नियतम्) अ-ध्रुवम् च (क्षणिकम्) यद् एवम्-भूतम् तपः, तद् इह राजसम् प्रोक्तम् ॥१७.१८॥
तामसम् तपः आह – 'मूढ' इति –

17.19

मूढग्राहेणात्मनो यत्पीडया क्रियते तपः ।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥१९॥

मूढ-ग्राहेण	with a foolish notion
आत्मनः पीडया	with self-torture
परस्य उत्सादनार्थम् वा	or for the destruction of others
यद् तपः क्रियते,	that austerity which is performed,
तद् तामसम् उदाहृतम् ।	that is declared to be in *tamo-guṇa*

"Penance performed out of foolishness, with self-torture or to destroy or injure others, is said to be in the mode of ignorance."

मूढ-ग्राहेण with a foolish conception ⟨3.1⟩ m. *mūḍha-grāha*...मूढः ग्राहः इति मूढ-ग्राहः – a foolish conception

आत्मनः **of oneself** ⟨6.1⟩ m. *ātman (ātmā)* – the self, soul

यद् **that which** ⟨1.1⟩ n. *kṛṣnanāma yad* – (relative) who, which

पीडया **with torture** ⟨3.1⟩ f. *pīḍā* – suffering, torture

क्रियते **it is done** ⟨*acyuta* pass. 1.1⟩ √*[ḍu]kr[ñ]*...करणे – to do

तपः **austerity** ⟨1.1⟩ n. *tapas (tapaḥ)* – austerity, penance

परस्य **of another** ⟨6.1⟩ m. *para* – beyond, other

उत्सादनार्थम् **for the purpose of destruction** ⟨*avyaya*⟩ *utsādana-_artham*
उत्सादन (from *ud.*√*sad[l]* – to decline) – destroying, destruction

वा **or** ⟨*avyaya*⟩

तद् **that** ⟨1.1⟩ n. *kṛṣnanāma tad* – (first person) he, that

तामसम् **in *tamo-guṇa*** ⟨1.1⟩ n. *kṛṣṇanāma tāmasa*

उदाहृतम् **declared** ⟨1.1⟩ n. *udāhṛta (ud.ā.*√*hṛ[ñ]* – to set up, declare, illustrate; + *.[k]ta*)

Subodhinī: मूढ-ग्राहेण (अ-विवेक-कृतेन दुराग्रहेण) आत्मनः पीडया यद् तपः क्रियते, परस्य उत्सादन-अर्थम् वा (अन्यस्य विनाश-अर्थम्) अभिचार-रूपम्, तद् तामसम् उदाहृतम् (कथितम्) ॥१७.१९॥
पूर्वम् प्रतिज्ञातम् एव दानस्य त्रैविध्यम् आह – 'दातव्यम्' इति –

17.20

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥२०॥

देशे काले च पात्रे च	at the [proper] place and time, and to a worthy person
यद् दानम्	that charity which
दातव्यम् इति	as a duty
अनुपकारिणे दीयते,	is given to one who is not giving in return,
तद् दानम् सात्त्विकम् स्मृतम् ।	that charity is known to be in *sattva-guṇa*

"Charity given out of duty, without expectation of return, at the proper time and place, and to a worthy person is considered to be in the mode of goodness."

दातव्यम् **it is to be given** ⟨1.1⟩ n. *dātavya* (√*[ḍu]dā[ñ]*...दाने – to give; + *.tavya*) – to be given

इति **thus** ⟨*avyaya*⟩

यद् **that which** ⟨1.1⟩ n. *kṛṣnanāma yad* – (relative) who, which

दानम् **charity** ⟨1.1⟩ n. *dāna* – gift

दीयते **it is given** ⟨*acyuta* pass. 1.1⟩ √*[ḍu]dā[ñ]*...दाने – to give

अनुपकारिणे **to one who is not giving in return** ⟨4.1⟩ m. *an-upakārin (-upakārī)* – who is not giving in return
उपकार – help, assistence, benefit, service, favor

देशे **at the [proper] place** ⟨7.1⟩ m. *deśa* – place

काले **at the [proper] time** ⟨7.1⟩ m. *kāla* – time

च **and** ⟨*avyaya*⟩

पात्रे **to a [worthy] recipient** ⟨7.1⟩ n. *pātra* (from √*pā*...पाने – to drink) – a drinking-vessel, bowl, cup, plate; any vessel or receptacle; a recipient; a competent or worthy person

तद् **that** ⟨1.1⟩ n. *kṛṣnanāma tad* – (first person) he, that

दानम् **charity** ⟨1.1⟩ n. *kṛṣnanāma dāna* – gift

सात्त्विकम् **in *sattva-guṇa*** ⟨1.1⟩ n. *sāttvika*

स्मृतम् **it is known** ⟨1.1⟩ n. *smṛta* (√*smṛ*...चिन्तायाम् – to think, remember; + *.[k]ta*) – remembered

Subodhinī: 'दातव्यम्' इति एवम् निश्चयेन यद् दानम् दीयते अनुपकारिणे (प्रत्युपकार-असमर्थाय) । देशे कुरुक्षेत्रादौ, काले ग्रहणादौ, पात्रे च इति देश-कालादि-साहचर्यात् सप्तमी प्रयुक्ता । पात्र-भूताय तपः-श्रुतादि-सम्पन्नाय ब्राह्मणाय इति अर्थः, यद्वा पात्रे इति चतुर्थी एव एषा, पात्रे इति तृजन्तम्, रक्षकाय इति अर्थः । सः हि सर्वस्मात् आपद्-गणात् दातारम् पाति इति, यद् एवम्-भूतम् दानम् तद् सात्त्विकम् ॥१७.२०॥
राजसम् दानम् आह – 'यद् तु' इति –

17.21

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥२१॥

यद् तु	but that which
प्रत्युपकारार्थम्	expecting some return
पुनः फलम् उद्दिश्य वा	or [after] aiming again for its fruit
परिक्लिष्टम् च दीयते,	and grudgingly is given,
तद् दानम् राजसम् स्मृतम् ।	that charity is known to be in *rajo-guṇa*

"But charity performed with the expectation of some return, or with a desire for fruitive results, or in a grudging mood, is said to be charity in the mode of passion."

यद् **that which** ⟨1.1⟩ n. *kṛṣnanāma yad* – (relative) who, which

तु **but** ⟨*avyaya*⟩

प्रत्युपकारार्थम् **for the sake of a service in return** ⟨*avyaya*⟩ *pratyupakāra-_artham*

फलम् **the fruit** ⟨2.1⟩ n. *phala*

उद्दिश्य	**[after] aiming at** ⟨avyaya⟩ *ud.√diś[a]* – to aim at; + *.ya[p]*
वा	**or** ⟨avyaya⟩
पुनः	**again** ⟨avyaya⟩ (*punar*)
दीयते	**it is given** ⟨acyuta pass. 1.1⟩ *√[du]dā[ñ]*...दाने – to give
च	**and** ⟨avyaya⟩
परिक्लिष्टम्	**grudgingly** ⟨avyaya⟩ from *pari.√kliś[a]* – to suffer; + *.[k]ta* – suffered, troubled
तद्	**that** ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
दानम्	**charity** ⟨1.1⟩ n. *kṛṣṇanāma dāna* – gift
राजसम्	**in *rajo-guṇa*** ⟨1.1⟩ n. *rājasa*
स्मृतम्	**it is known** ⟨1.1⟩ n. *smṛta* (*√smṛ*...चिन्तायाम् – to think, remember; + *.[k]ta*) – remembered

Subodhinī: 'काल-अन्तरे अयम् माम् प्रत्युपकारम् करिष्यति' इति एवम् अर्थम्, फलम् वा स्वर्गादिकम् उद्दिश्य, यद् पुनः दानम् दीयते परिक्लिष्टम् (चित्त-क्लेश-युक्तम्) यथा भवति एवम-भूतम् तद् दानम् राजसम् उदाहृतम् (कथितम्) ॥१७.२१॥
तामसम् दानम् आह – 'अ-देश' इति –

17.22

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥२२॥

अ-देश-काले अ-पात्रेभ्यः च	at the wrong place and time, and to unworthy persons
यद् दानम्	that charity which
अ-सत्कृतम् अवज्ञातम्	disrespectfully and despisingly
दीयते,	is given,
तद् तामसम् उदाहृतम् ।	that is said to be in *tamo-guṇa*

"And charity performed at an impure place, at an improper time, to unworthy persons, or without proper attention and respect is said to be in the mode of ignorance."

अ-देश-काले	**not at the [proper] place and time** ⟨7.1⟩ m. *a-deśa-kāla* – not the [proper] place and time
यद्	**that which** ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
दानम्	**charity** ⟨1.1⟩ n. *dāna* – gift
अ-पात्रेभ्यः	**not to worthy recipients** ⟨4.3⟩ n. *a-pātra* – not a recipient; unworthy
च	**and** ⟨avyaya⟩
दीयते	**it is given** ⟨acyuta pass. 1.1⟩ *√[du]dā[ñ]*...दाने – to give
अ-सत्कृतम्	**disrespectfully** ⟨avyaya⟩ from *a-sat-kṛta* – disrespected
अवज्ञातम्	**despisingly** ⟨avyaya⟩ from *ava.√jñā* – to despise; + *.[k]ta* – despised

तद्	**that** ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
तामसम्	**in *tamo-guṇa*** ⟨1.1⟩ n. *kṛṣṇanāma tāmasa*
उदाहृतम्	**declared** ⟨1.1⟩ n. *udāhṛta* (*ud.ā.√hṛ[ñ]* – to set up, declare, illustrate; + *.[k]ta*)

Subodhinī: अ-देशे (अ-शुचि-स्थाने) अ-काले (अ-शौच-समये) अ-पात्रेभ्यः (विट-नट-नर्तकादिभ्यः) यद् दानम् दीयते । देश-काल-पात्र-सम्पत्तौ अपि, अ-सत्कृतम् (पाद-प्रक्षालनादि-सत्कार-शून्यम्) अवज्ञातम् (तिरस्कार-युक्तम्) एवम्-भूतम् दानम् तामसम् उदाहृतम् ॥१७.२२॥
ननु च एवम् विचार्यमाणे, सर्वम् अपि यज्ञ-तपः-दानादि राजस-तामस-प्रायम् एव इति व्यर्थः यज्ञादि-प्रयासः इति आशङ्क्य, तथा-विधस्य अपि सात्त्विकत्व-आपादन-प्रकारम् दर्शयितुम्, आह – 'ओम्' इति –

17.23

ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥२३॥

ओम् तद् सत्	'*om tad sat*' –
इति त्रिविधः ब्रह्मणः निर्देशः	the threefold designation of the Supreme
स्मृतः,	it is considered,
ब्राह्मणाः वेदाः च यज्ञाः च	the *brāhmaṇas*, the *Vedas* and sacrifices
तेन पुरा विहिताः ।	were formerly perfected by that

"From the beginning of creation, the three words *om* tat sat were used to indicate the Supreme Absolute Truth. These three symbolic representations were used by brāhmaṇas while chanting the hymns of the Vedas and during sacrifices for the satisfaction of the Supreme."

ओम्	***om*** ⟨avyaya⟩
तद्	***tad*** ⟨avyaya⟩
सत्	***sat*** ⟨avyaya⟩
इति	**thus** ⟨avyaya⟩
निर्देशः	**the designation** ⟨1.1⟩ m. *nirdeśa*
ब्रह्मणः	**of Brahman** ⟨6.1⟩ n. *brahman* (*brahma*) – spirit, soul
त्रि-विधः	**the threefold** ⟨1.1⟩ m. *tri-vidha*
स्मृतः	**it is known** ⟨1.1⟩ m. *smṛta* (*√smṛ*...चिन्तायाम् – to think, remember; + *.[k]ta*) – remembered
ब्राह्मणाः	**the *brāhmaṇas*** ⟨1.3⟩ m. *brāhmaṇa* – 'related to *brahma*'; or ब्रह्म जानाति इति ब्राह्मणः 'who knows *brahma* (the self)'
तेन	**by that** ⟨3.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
वेदाः	**the Vedas** ⟨1.3⟩ m. *veda* – the *Veda*

च **and** ⟨*avyaya*⟩

यज्ञाः **sacrifices** ⟨1.3⟩ m. *yajña* – sacrifice

च **and** ⟨*avyaya*⟩

विहिताः **which are made or perfected** ⟨1.3⟩ m. *vihita* (*vi.√[du]dhā[ñ]* – to hold, make; + *.[k]ta*) – held, made

Śrīdhara Svāmī explains *vihitāḥ* as निर्मिताः स-गुणी-कृताः वा – created or perfected. I.e., this triple designation of the Lord (*om tad sat*) was used to create or perfect the *brāmaṇas*, the *Vedas* and sacrifices.

पुरा **formerly** ⟨*avyaya*⟩

Subodhinī: 'ओम्-तद्-सत्' इति एवम् त्रि-विधः ब्रह्मणः (परमात्मनः) निर्देशः (नाम-व्यपदेशः) स्मृतः शिष्टैः । तत्र तावत् 'ओम् इति ब्रह्म' (*Taitt.-Up.* 1.8.1) इत्यादि श्रुति-प्रसिद्धेः 'ओम्' इति ब्रह्मणः नाम, जगत्-कारणत्वेन अतिप्रसिद्धत्वात्, अ-विदुषाम् परोक्षत्वात् च, 'तद्'-शब्दः अपि ब्रह्मणः नाम । परमार्थ-सत्त्व-साधुत्व-प्रशस्तत्वादिभिः 'सत्'-शब्दः ब्रह्मणः नाम, 'सत् एव सोम्य इदम् अग्रे आसीत्' (*Chāndogya-Up.* 6.2.1) इत्यादि श्रुतेः । अयम् त्रि-विधः अपि नाम-निर्देशः विगुणम् अपि स-गुणी-कर्तुम् समर्थः इति आशयेन स्तौति । तेन त्रि-विधेन ब्रह्मणः निर्देशेन ब्राह्मणाः च वेदाः च यज्ञाः च पूर्वम् (सृष्टि-आदौ) विहिताः, विधात्रा निर्मिताः स-गुणी-कृताः वा । यद्वा यस्य अयम् त्रि-विधः निर्देशः, तेन परमात्मना ब्राह्मणादयः पवित्रतमाः सृष्टाः । तस्मात् तस्य अयम् त्रि-विधः निर्देशः अतिप्रशस्तः इति अर्थः ॥१७.२३॥

इदानीम् प्रत्येकम् ओम्-कार-आदीनाम् प्राशस्त्यम् दर्शयिष्यन्, ओम्-कारस्य तद् एव आह – 'तस्मात्' इति –

17.24

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥२४॥

तस्मात्	therefore
ओम् इति उदाहृत्य	[after] uttering '*om*'
ब्रह्म-वादिनाम्	of the transcendentalists
विधानोक्ताः यज्ञ-दान-तपः-क्रियाः	acts of sacrifice, charity and austerity, mentioned in the scriptures
सततम् प्रवर्तन्ते ।	they always begin

"Therefore, transcendentalists undertaking performances of sacrifice, charity and penance in accordance with scriptural regulations begin always with *om*, to attain the Supreme."

तस्मात् **therefore** ⟨*avyaya*⟩

ओम् **'*om*'** ⟨*avyaya*⟩

इति **thus** ⟨*avyaya*⟩

उदाहृत्य **[after] declaring** ⟨*avyaya*⟩ *ud.ā.√hṛ[ñ]* – to set up, declare, illustrate; + *ya*

यज्ञ-दान-तपः-क्रियाः **acts of sacrifice, charity and austerity** ⟨1.3⟩ f. *yajña-dāna-tapaḥ-kriyā*

प्रवर्तन्ते **they begin** ⟨*acyuta* 1.3⟩ *pra.√vṛt[u]* – to start to act

विधानोक्ताः **which are mentioned in the scriptures** ⟨1.3⟩ f. *vidhāna-_uktā* (*.ā[p]*)

सततम् **always** ⟨*avyaya*⟩

ब्रह्म-वादिनाम् **of the transcendentalists** ⟨6.3⟩ m. *brahma-vādin* (*-vādī*) – exponent of the *Vedas*

Subodhinī: यस्मात् एवम् ब्रह्मणः निर्देशः प्रशस्तः, तस्मात् ओम् इति उदाहृत्य (उच्चार्य) कृत्वा, वेद-वादिनाम् यज्ञाद्याः शास्त्रोक्ताः क्रियाः सततम् (सर्वदा) अङ्ग-वैकल्ये अपि प्रकर्षेण वर्तन्ते, स-गुणाः भवन्ति इति अर्थः ॥१७.२४॥

द्वितीयम् नाम प्रस्तौति – 'तद्' इति –

17.25

तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः ।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः ॥२५॥

तद् इति	[after uttering] '*tad*'
फलम् अनभिसन्धाय	[after] not desiring the fruit
विविधाः यज्ञ-तपः-क्रियाः दान-क्रियाः च	different acts of sacrifices, austerities and charity
मोक्ष-काङ्क्षिभिः क्रियन्ते ।	are performed by those desiring liberation

"Without desiring fruitive results, one should perform various kinds of sacrifice, penance and charity with the word tat. The purpose of such transcendental activities is to get free from material entanglement."

तद् **'*tad*'** ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that

इति **thus** ⟨*avyaya*⟩

अनभिसन्धाय **[after] not aiming at** ⟨*avyaya*⟩ *abhi.sam.√[ḍu]dhā[ñ]* – to hold, aim at; + *.ya[p]*

फलम् **the fruit** ⟨2.1⟩ n. *phala*

यज्ञ-तपः-क्रियाः **acts of sacrifice and austerity** ⟨1.3⟩ f. *yajña-tapaḥ-kriyā*

दान-क्रियाः **acts of charity** ⟨1.3⟩ f. *dāna-kriyā* – an act of charity

च **and** ⟨*avyaya*⟩

विविधाः **the different** ⟨1.3⟩ f. *vividhā* (*.ā[p]*) – manifold

क्रियन्ते **they are done** ⟨*acyuta* pass. 1.3⟩ *√[ḍu]kṛ[ñ]*...करणे – to do

मोक्ष-काङ्क्षिभिः **by those desiring liberation** ⟨3.3⟩ m. *mokṣa-kāṅkṣin* (*-kaṅkṣī*) – who desires liberation

Subodhinī: 'उदाहृत्य' (17.24) इति पूर्वस्य अनुषङ्गः । 'तद्' इति युदाहृत्य, शुद्ध-चित्तैः मोक्ष-काङ्क्षिभिः पुरुषैः फल-अभिसन्धिम् अ-कृत्वा, यज्ञाद्याः क्रियाः क्रियन्ते । अतः चित्त-शोधन-द्वारेण फल-सङ्कल्प-त्याजनेन मुमुक्षुत्व-सम्पादकत्वात् 'तद्'-शब्द-निर्देशः प्रशस्तः इति अर्थः ॥१७.२५॥

'सत्'-शब्दस्य प्राशस्त्यम् आह – 'सद्भावे' इति द्वाभ्याम् –

17.26

सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते ।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥२६॥

हे पार्थ !	O Arjuna!
सद्भावे साधु-भावे च	in the sense of the Lord and the devotee
सत् इति एतद् प्रयुज्यते,	this [word] '*sat*' is used,
तथा प्रशस्ते कर्मणि	and in an auspicious act
सच्छब्दः युज्यते ।	the word '*sat*' is used

"The Absolute Truth is the objective of devotional sacrifice, and it is indicated by the word sat. The performer of such sacrifice is also called sat, . . ."

सद्भावे	**in the sense of 'the Absolute'** ⟨7.1⟩ m. *sat-_bhāva*
साधु-भावे	**in the sense of 'the devotee'** ⟨7.1⟩ m. *sādhu-bhāva*
च	**and** ⟨*avyaya*⟩
सत्	**'*sat*'** ⟨1.1⟩ n. *sat* – being, real, good
इति	**thus** ⟨*avyaya*⟩
एतद्	**this** ⟨1.1⟩ n. *kṛṣṇanāma etad* – (first person) he, this
प्रयुज्यते	**it is used** ⟨*acyuta* pass. 1.1⟩ *pra.√yuj[ir]* – to engage, use
प्रशस्ते	**in auspicious** ⟨7.1⟩ n. *praśasta* (*pra.√śaṁs[u]* – to praise; + *.[k]ta*) – 'praised', auspicious
कर्मणि	**in an act** ⟨7.1⟩ n. *karman* (*karma*) – activity
तथा	**so** ⟨*avyaya*⟩
सच्छब्दः	**the word '*sat*'** ⟨1.1⟩ m. *sat-_śabda*
पार्थ	**O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
युज्यते	**it is used** ⟨*acyuta* pass. 1.1⟩ √*yuj[ir]*...योगे – to join, engage, gain

Subodhinī: सद्भावे (अस्तित्वे), 'देवदत्तस्य पुत्रादिकम् अस्ति' इति अस्मिन् अर्थे, साधु-भावे च (साधुत्वे), 'देवदत्तस्य पुत्रादि-श्रेष्ठम्' इति अस्मिन् अर्थे, 'सत्' इति एतद् पदम् प्रयुज्यते, प्रशस्ते (माङ्गलिके) विवाहादि-कर्मणि च, 'सत् इदम् कर्म' इति 'सत्'-शब्दः युज्यते (प्रयुज्यते), सङ्गच्छते इति वा ॥१७.२६॥

Note: सद्भावे is explained by Baladeva as *brahmatve* (in the sense of 'the Absolute') and साधु-भावे as *brahmajñatve* (in the sense of 'the knower of the Absolute'). Śrīdhara Svāmī explains these words as *astitva* (existence) and *sādhutva* (excellence).

17.27

यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते ।
कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥२७॥

यज्ञे तपसि दाने च स्थितिः च	and steadiness in sacrifice, austerity and charity
सत् इति उच्यते,	is called '*sat*',
तदर्थीयम् कर्म च एव	as also work for the Lord
सत् इति एव अभिधीयते ।	is called as '*sat*'

". . . as are all works of sacrifice, penance and charity which, true to the absolute nature, are performed to please the Supreme Person, O son of Pṛthā."

यज्ञे	**in sacrifice** ⟨7.1⟩ m. *yajña* – sacrifice
तपसि	**in austerity** ⟨7.1⟩ n. *tapas* (*tapaḥ*) – austerity, penance
दाने	**in charity** ⟨7.1⟩ n. *dāna* – gift
च	**and** ⟨*avyaya*⟩
स्थितिः	**steadiness** ⟨1.1⟩ f. *sthiti* – situation
सत्	**'*sat*'** ⟨1.1⟩ n. *sat* – being, real, good
इति	**thus** ⟨*avyaya*⟩
च	**and** ⟨*avyaya*⟩
उच्यते	**it is called** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak
कर्म	**work** ⟨1.1⟩ n. *karman* (*karma*) – activity
च	**and** ⟨*avyaya*⟩
एव	**certainly** ⟨*avyaya*⟩
तदर्थीयम्	**for the Lord** ⟨1.1⟩ n. *tad-arthīya* – intended for that (the Lord)
सत्	**'*sat*'** ⟨1.1⟩ n. *sat* – being, real, good
इति	**thus** ⟨*avyaya*⟩
एव	**certainly** ⟨*avyaya*⟩
अभिधीयते	**it is called** ⟨*acyuta* pass. 1.1⟩ *abhi.√[ḍu]dhā[ñ]* – to explain, name

Subodhinī: यज्ञादिषु च या स्थितिः (तात्पर्येण अवस्थानम्), तद् अपि 'सत्' इति उच्यते । यस्य च इदम् नाम-त्रयम्, सः एव परमात्मा-अर्थः फलम् यस्य, तद् तद्-अर्थम् कर्म पूज-उपहार-गृह-अञ्जन-परिमार्जन-उपलेपन-अङ्ग-माङ्गलिकादि-क्रियाः, तद्-सिद्धये यद् अन्यत् कर्म क्रियते उद्यान-शालि-क्षेत्र-धन-अर्जनादि-विषयम् तद् कर्म तद्-अर्थीयम् । तद् च अतिव्यवहितम् अपि 'सत्' इति एव अभिधीयते ।

यस्मात् एवम् अतिप्रशस्तम् एतद् नाम-त्रयम्, तस्मात् एतद् सर्व-कर्म-सादगुण्यार्थम् कीर्तयेत् इति तात्पर्य-अर्थः । अत्र च अर्थवाद-अनुपपत्त्या विधिः कल्प्यते, 'विधेयम् स्तूयते वस्तु' इति न्यायात् ॥१७.२७॥

इदानीम् सर्व-कर्मसु श्रद्धया एव प्रवृत्ति-अर्थम्, अश्रद्धा-कृतम् सर्वम् निन्दति – 'अ-श्रद्धया' इति –

17.28

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥२८॥

पार्थ !	O Arjuna!
अ-श्रद्धया	without faith
यद् हुतम् दत्तम् तपः तप्तम् कृतम् च,	which is offered, given, undergone and done,
अ-सत् इति उच्यते,	is called '*asat*'
तद् न च प्रेत्य नो इह ।	it is [useful] neither after death, nor in this life

"Anything done as sacrifice, charity or penance without faith in the Supreme, O son of Pṛthā, is impermanent. It is called asat and is useless both in this life and the next."

अ-श्रद्धया **without faith** ⟨3.1⟩ f. *a-śraddhā* – no faith
हुतम् **offered in the fire** ⟨1.1⟩ n. *huta* (√*hu*...वह्नौ दाने – to offer in the fire, sacrifice; + *.[k]ta*)
दत्तम् **given** ⟨1.1⟩ n. *datta* (√*[ḍu]dā[ñ]*...दाने – to give; + *.[k]ta*)
तपः **austerity** ⟨1.1⟩ n. *tapas* (*tapaḥ*) – austerity, penance
तप्तम् **undergone** ⟨1.1⟩ n. *tapta* (√*tap[a]*...सन्तापे ऐश्वर्य्ये वा – to heat, burn; lord, undergo; + *.[k]ta*)
कृतम् **done** ⟨1.1⟩ n. *kṛta* (√*[ḍu]kṛ[ñ]*...करणे – to do; + *.[k]ta*)
च **and** ⟨*avyaya*⟩
यद् **that which** ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
अ-सत् **'*a-sat*'** ⟨1.1⟩ n. *a-sat* – not being, unreal, bad
इति **thus** ⟨*avyaya*⟩
उच्यते **it is called** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak
पार्थ **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
न **not** ⟨*avyaya*⟩
च **and** ⟨*avyaya*⟩
तद् **that** ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
प्रेत्य **after death** ⟨*avyaya*⟩ *pra.*√*i[ṇ]* – to depart; + *.ya[p]* – [after] departing
नो **not at all** ⟨*avyaya*⟩ *na_u*
इह **in this life** ⟨*avyaya*⟩ here

Subodhinī: अश्रद्धया हुतम् (हवनम्) दत्तम् (दानम्) तप्तम् (निर्वर्तितम्) तपः, यद् च अन्यत् अपि कृतम् कर्म, तद् सर्वम् 'अ-सत्' इति उच्यते । यतः तद् प्रेत्य (लोक-अन्तरे) न फलति, विगुणत्वात्, नो इह (न च अस्मिन् लोके) फलति, अयशः-करत्वात् ॥१७.२८॥

ओं तत्सदिति
श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि
श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः ॥१७॥

अथाष्टादशो ऽध्यायः

अथ अष्टादशः अध्यायः । now the eighteenth chapter

Subodhinī: अत्र च 'सर्व-कर्माणि मनसा सन्न्यस्य आस्ते सुखम् वशी' (5.13), 'सन्न्यास-योग-युक्तात्मा' (9.28) इत्यादिषु कर्म-सन्न्यासः उपदिष्टः । तथा 'त्यक्त्वा कर्म-फल-आसङ्गम् नित्य-तृप्तः निराश्रयः' (4.20), 'सर्व-कर्म-फल-त्यागम् ततः कुरु यतात्मवान्' (12.11) इत्यादिषु च फल-मात्र-त्यागेन कर्म-अनुष्ठानम् उपदिष्टम् । नच परस्परम् विरुद्धम् सर्व-ज्ञः परम-कारुणिकः भगवान् उपदिशेत् । अतः कर्म-सन्न्यासस्य तद्-अनुष्ठानस्य च अ-विरोध-प्रकारम् बुभुत्सुः [अर्जुनः उवाच] – 'सन्न्यासस्य' इति –

18.1

अर्जुन उवाच

सन्न्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम् ।
त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥१॥

अर्जुनः उवाच -	Arjuna said:
हे महा-बाहो हृषीकेश केशि-निषूदन !	O Kṛṣṇa!
सन्न्यासस्य त्यागस्य च तत्त्वम्	the nature of *sannyāsa* and of *tyāga*
पृथक् वेदितुम् इच्छामि ।	I want to know distinctly

"Arjuna said: O mighty-armed one, I wish to understand the purpose of renunciation (tyāga) and of the renounced order of life (sannyāsa), O killer of the Keśī demon, master of the senses."

अर्जुनः **Arjuna** ⟨1.1⟩ m. *arjuna* – white, 'who is pure in actions'
उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
सन्न्यासस्य **of *sannyāsa*** ⟨6.1⟩ m. *sannyāsa* – renunciation (of all work)
महा-बाहो **O Kṛṣṇa!** ⟨8.1⟩ m. *mahā-bāhu* – 'who has mighty arms'
तत्त्वम् **the nature** ⟨2.1⟩ n. *tattva* – truth
इच्छामि **I desire** ⟨*acyuta* 3.1⟩ √*iṣ[u]*...इच्छायाम् – to wish, desire
वेदितुम् **to know** ⟨*avyaya*⟩ √*vid[a]* 2P...ज्ञाने – to know; + *.tum[u]*
त्यागस्य **of *tyāga*** ⟨6.1⟩ m. *tyāga* – renunciation (of the fruit)
च **and** ⟨*avyaya*⟩
हृषीकेश **O Kṛṣṇa!** ⟨8.1⟩ m. *hṛṣīka-_īśa* – 'lord of the senses', the supreme guide, Paramātmā
पृथक् **separately** ⟨*avyaya*⟩ – separately, differently
केशि-निषूदन **O Kṛṣṇa!** ⟨8.1⟩ m. *keśi-niṣūdana*...केशिनः निषूदनः इति केशिनिषूदनः – 'the slayer of the Keśī demon'

Subodhinī: भो हृषीकेश (सर्व-इन्द्रिय-नियामक), हे केशि-निषूदन ! केशि-नाम्नः हि महतः हया-कृतेः दैत्यस्य युद्धे मुखम् व्यादाय भक्षयितुम् आगच्छतः, अत्यन्तम् व्यात्ते मुखे वाम-बाहुम् प्रवेश्य, तद्-क्षणम् एव विवृद्धेन तेन एव बाहुना कर्कटिका-फलवत्तम् विदार्य, निषूदितवान् । अतएव हे महा-बाहो इति सम्बोधनम् । सन्न्यासस्य त्यागस्य च तत्त्वम् पृथक् (विवेकेन) वेदितुम् इच्छामि ॥१८.१॥
तत्र उत्तरम् [श्री-भगवान् उवाच] – 'काम्यानाम्' इति –

18.2

श्रीभगवानुवाच

काम्यानां कर्मणां न्यासं सन्न्यासं कवयो विदुः ।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥२॥

श्रीभगवान् उवाच -	Śrī Kṛṣṇa said:
काम्यानाम् कर्मणाम् न्यासम्	renunciation of activities prompted by desire
कवयः सन्न्यासम् विदुः ।	the sages know as '*sannyāsa*',
सर्व-कर्म-फल-त्यागम्	renunciation of the fruit of all activities
विचक्षणाः त्यागम् प्राहुः ।	the wise declare to be '*tyāga*'

"The Supreme Personality of Godhead said: The giving up of activities that are based on material desire is what great learned men call the renounced order of life (sannyāsa). And giving up the results of all activities is what the wise call renunciation (tyāga)."

श्री-भगवान् **Śrī Kṛṣṇa** ⟨1.1⟩ m. *śrī-bhagavat* – 'who possesses opulence'
उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
काम्यानाम् **of those based on desire** ⟨6.3⟩ n. *kāmya* – based on desire
कर्मणाम् **of activities** ⟨6.3⟩ n. *karman (karma)* – activity
न्यासम् **the renunciation** ⟨2.1⟩ m. *nyāsa*
सन्न्यासम् **'*sannyāsa*'** ⟨2.1⟩ m. *sannyāsa* – renunciation
कवयः **thinkers** ⟨1.3⟩ m. *kavi* – a thinker
विदुः **they know** ⟨*acyuta* 1.3⟩ √*vid[a]* 2P...ज्ञाने – to know
सर्व-कर्म-फल-त्यागम् **the renunciation of the fruit of all activities** ⟨2.1⟩ m. *sarva-karma-phala-tyāga*...सर्वेषाम् कर्मणाम् फलस्य त्यागः इति सर्व-कर्म-फल-त्यागः
प्राहुः **they declared** ⟨*acyuta* opt. form with a past sense 1.3⟩ *pra.*√*brū[ñ]* – to declare
त्यागम् **'*tyāga*'** ⟨2.1⟩ m. *tyāga* – renunciation
विचक्षणाः **the wise** ⟨1.3⟩ m. *vicakṣaṇa* – 'who is clear-sighted', experienced, wise

Subodhinī: 'पुत्र-कामः यजेत' 'स्वर्ग-कामः यजेत' इति एवम् आदि काम-उपबन्धेन विहितानाम् काम्यानाम् कर्मणाम् न्यासम् (परित्यागम्) 'सन्न्यासम्' कवयः विदुः । सम्यक्-फलैः सह सर्व-कर्मणाम् अपि न्यासम् 'सन्न्यासम्' पण्डिताः

विदुः, जानन्ति इति अर्थः । सर्वेषाम् काम्यानाम् नित्य-नैमित्तिकानाम् च कर्मणाम् फलमात्र-त्यागम् प्राहुः 'त्यागम्' विचक्षणाः (निपुणाः), नतु स्वरूपतः कर्म-त्यागम् ॥१८.२॥

अ-विदुषः फल-त्यागमात्रम् एव 'त्याग'-शब्दार्थः, न कर्म-त्यागः इति । एतद् एव मतान्तर-निरासेन दृढी-कर्तुम् मत-भेदम् दर्शयति – 'त्याज्यम्' इति –

18.3

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ।
यज्ञदानतपःकर्म न त्याज्यमिति चापरे ॥३॥

कर्म दोषवत् त्याज्यम् इति	that [all] *karma* is to be given up as faulty
एके मनीषिणः प्राहुः,	some wise men declare,
यज्ञ-दान-तपः-कर्म	that acts of sacrifice, charity and austerity
न त्याज्यम् इति	are not to be given up
अ-परे च ।	others [declare]

"Some learned men declare that all kinds of fruitive activities should be given up, but there are yet other sages who maintain that acts of sacrifice, charity and penance should never be abandoned."

त्याज्यम् **to be abandoned** ⟨2.1⟩ n. *tyājya* (√*tyaj[a]*...हानौ – to abandon; + *.ya*)
दोषवत् **as faulty** ⟨2.1⟩ n. *doṣavat* (*.vat[u]*) – 'having *doṣa* (fault)'; faulty
इति **thus** ⟨*avyaya*⟩
एके **some** ⟨1.3⟩ m. *kṛṣṇanāma eka* – someone
The word *eka* has several meanings. In the meaning of 'quantity' it is declined only in singular.
कर्म **work** ⟨2.1⟩ n. *karman* (*karma*) – activity
प्राहुः **they declared** ⟨*acyuta* opt. form with a past sense 1.3⟩ *pra.*√*brū[ñ]* – to declare
मनीषिणः **wise men** ⟨1.3⟩ m. *manīṣin* (*manīṣī*) – 'who is thoughtful', a wise man
यज्ञ-दान-तपः-कर्म **act of sacrifice, charity and austerity** ⟨2.1⟩ n. *yajña-dāna-tapaḥ-karman* (-*karma*)
न **not** ⟨*avyaya*⟩
त्याज्यम् **to be abandoned** ⟨2.1⟩ n. *tyājya* (√*tyaj[a]*...हानौ – to abandon; + *.ya*)
इति **thus** ⟨*avyaya*⟩
च **and** ⟨*avyaya*⟩
अ-परे **others** ⟨1.3⟩ m. *kṛṣṇanāma a-para* – later, inferior, other

Subodhinī: दोषवत् हिंसादि-दोषवत्त्वेन बन्धकम् इति हेतोः सर्वम् अपि कर्म त्याज्यम् इति एके साङ्ख्याः प्राहुः मनीषिणः इति । अस्य अयम् भावः – 'मा हिंस्यात् सर्व-भूतानि' (*Kūrma-P.* 16.1) इति निषेधः पुरुषस्य अनर्थ-हेतुः हिंसा इति आह ।

'अग्निष्टोमीयम् पशुम् आलभेत' इत्यादि-प्राकरणिको विधिः तु हिंसायाः क्रतु-उपकारकत्वम् आह । अतः भिन्न-विषयत्वेन सामान्य-विशेष-न्याय-अगोचरत्वात् बाध्य-बाधकता नास्ति । द्रव्य-साध्येषु च सर्वेषु अपि कर्मसु हिंसादेः सम्भवात् सर्वम् अपि कर्म त्याज्यम् एव इति । तद् उक्तम् – 'दृष्टवत् आनुश्रविकः सः हि अविशुद्धि-क्षय-अतिशय-युक्तः' इति । अस्य अर्थः – उपायः ज्योतिष्टोम-आदिः सः अपि दृष्ट-उपायवत् गुरु-पाठात् अनुश्रूयते इति अनुश्रवः वेदः तद् बोधितः, तत्र अविशुद्धिः हिंसा, तया क्षयः (विनाशः), अग्निहोत्र-ज्योतिष्टोमादि-जन्य-स्वर्गेषु तारतम्यम् च वर्तते । पर-उत्कर्षः तु सर्वान् दुःखी-करोति । अपरे तु मीमांसकाः यज्ञादिकम् कर्म न त्याज्यम् इति प्राहुः । अयम् भावः – क्रतु-अर्था अपि सती इयम् हिंसा पुरुषेण एव कर्तव्या । सा च अन्य-उद्देशेन अपि कृता पुरुषस्य प्रत्यवाय-हेतुः एव । तथाहि विधिः विधेयस्य तद् उद्देशेन अनुष्ठानम् विधत्ते, तादर्थ्य-लक्षणत्वात् शेषत्वस्य । न तु एवम् निषेधः निषेध्यस्य तादर्थ्यम् अपेक्षते, प्राप्तिमात्र-अपेक्षितत्वात् । अन्यथा अज्ञान-प्रमादादि-कृते दोष-अभाव-प्रसङ्गात् । तद् एवम् समान-विषयत्वेन सामान्य-शास्त्रस्य विशेषेण बाधात् नास्ति दोषवत्त्वम्, अतः नित्यम् यज्ञादि-कर्म न त्याज्यम् इति । अनेन विधि-निषेधयोः समान-बलता वार्यते समान्य-विशेष-न्यायम् सम्पादयितुम् ॥१८.३॥

एवम् मत-भेदम् उपन्यस्य, स्व-मतम् कथयितुम् आह – 'निश्चयम्' इति –

18.4

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ।
त्यागो हि पुरुषव्याघ्र त्रिविधः सम्प्रकीर्तितः ॥४॥

हे भरत-सत्तम !	O Arjuna!
तत्र त्यागे मे (मम) निश्चयम् शृणु !	hear My ascertainment about *tyāga*!
हे पुरुष-व्याघ्र !	O Arjuna!
त्यागः हि त्रि-विधः सम्प्रकीर्तितः ।	*tyāga* is indeed declared as threefold

"O best of the Bhāratas, now hear My judgment about renunciation. O tiger among men, renunciation is declared in the scriptures to be of three kinds."

निश्चयम् **the ascertainment** ⟨2.1⟩ m. *niścaya* (from *nir.*√*ci[ñ]* – to ascertain)
शृणु **you must hear** ⟨*vidhātā* 2.1⟩ √*śru*...श्रवणे – to hear, obey
मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
तत्र **there** ⟨*avyaya*⟩
त्यागे **about *tyāga*** ⟨7.1⟩ m. *tyāga* – renunciation
भरत-सत्तम **O Arjuna!** ⟨8.1⟩ m. *bharata-sattama* (*.tama*) – 'best of the Bharatas'
त्यागः ***tyāga*** ⟨1.1⟩ m. *tyāga* – renunciation
हि **indeed** ⟨*avyaya*⟩
पुरुष-व्याघ्र **O Arjuna!** ⟨8.1⟩ m. *puruṣa-vyāghra* – 'a tiger among men'

त्रि-विधः **threefold** ⟨1.1⟩ m. *tri-vidha*

सम्प्रकीर्तितः **declared** ⟨1.1⟩ m. *samprakīrtita (sam.pra.√kṝt[a]* – to glorify; + *.[k]ta*) – glorified

Subodhinī: तत्र एवम् विप्रतिपन्ने त्यागे निश्चयम् मे वचनात् शृणु। 'त्यागस्य लोक-प्रसिद्धत्वात् किम् अत्र श्रोतव्यम् ?' इति मा अवमंस्थाः ! इति आह – 'हे पुरुष-व्याघ्र (पुरुष-श्रेष्ठ), त्यागः अयम् दुर्बोधः। हि (यस्मात्) अयम् कर्म-त्यागः तत्त्व-विद्भिः तामसादि-भेदेन त्रिविधः सम्यक्-विवेकेन प्रकीर्तितः। त्रैविध्यम् च 'नियतस्य तु सन्न्यासः कर्मणः' (18.7) इत्यादिना वक्ष्यति ॥१८.४॥ प्रथमम् तावत् निश्चयम् आह – 'यज्ञ-दान' इति द्वाभ्याम् –

18.5

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥५॥

यज्ञ-दान-तपः-कर्म	an act of sacrifice, charity and austerity
न त्याज्यम्,	is not to be given up,
तद् कार्यम् एव,	it has to be done,
यज्ञः दानम् तपः च एव	[because] sacrifice, charity and austerity
मनीषिणाम् पावनानि ।	are purifyers [even] of wise men

"Acts of sacrifice, charity and penance are not to be given up; they must be performed. Indeed, sacrifice, charity and penance purify even the great souls."

यज्ञ-दान-तपः-कर्म **an act of sacrifice, charity and austerity** ⟨1.1⟩ n. *yajña-dāna-tapaḥ-karman (-karma)*

न **not** ⟨*avyaya*⟩

त्याज्यम् **to be abandoned** ⟨1.1⟩ n. *tyājya* (*√tyaj[a]*...हानौ – to abandon; + *.ya*)

कार्यम् **to be done** ⟨1.1⟩ n. *kārya* (*√[ḍu]kṛ[ñ]*...करणे – to do; + *.ya*) – 'to be done', duty, work

एव **certainly** ⟨*avyaya*⟩

तद् **that** ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that

यज्ञः **sacrifice** ⟨1.1⟩ m. n. *kṛṣṇanāma yajña* – sacrifice

दानम् **charity** ⟨1.1⟩ n. *dāna* – gift

तपः **austerity** ⟨1.1⟩ n. *tapas (tapaḥ)* – austerity, penance

च **and** ⟨*avyaya*⟩

एव **certainly** ⟨*avyaya*⟩

पावनानि **purifyers** ⟨1.3⟩ n. *pāvana* – purifying, purifier

मनीषिणाम् **of wise men** ⟨6.3⟩ m. *manīṣin (manīṣī)* – 'who is thoughtful', a wise man

Subodhinī: मनीषिणाम् (विवेकिनाम्) पावनानि (चित्त-शुद्धि-कराणि) ॥१८.५॥ येन प्रकारेण कृतानि, एतानि पावनानि भवन्ति, तम् प्रकारम् दर्शयन् आह – 'एतानि' इति –

18.6

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥६॥

हे पार्थ !	O Arjuna!
एतानि अपि तु कर्माणि	even these acts
सङ्गम् फलानि च त्यक्त्वा	[after] giving up attachment and the fruits
कर्तव्यानि,	are to be done,
इति मे (मम) निश्चितम् उत्तमम् मतम् ।	this is My definite final opinion

"All these activities should be performed without attachment or any expectation of result. They should be performed as a matter of duty, O son of Pṛthā. That is My final opinion."

एतानि **these** ⟨1.3⟩ n. *kṛṣṇanāma etad* – (first person) he, this

अपि **also** ⟨*avyaya*⟩

तु **but** ⟨*avyaya*⟩

कर्माणि **acts** ⟨1.3⟩ n. *karman (karma)* – activity

सङ्गम् **attachment** ⟨2.1⟩ m. *saṅga*

त्यक्त्वा **[after] abandoning** ⟨*avyaya*⟩ *√tyaj[a]*...हानौ – to abandon; + *.[k]tvā*

फलानि **the fruits** ⟨2.3⟩ n. *phala* – fruit

च **and** ⟨*avyaya*⟩

कर्तव्यानि **are to be done** ⟨1.3⟩ n. *kartavya* (*√[ḍu]kṛ[ñ]*...करणे – to do; + *.tavya*) – 'to be done', duty

इति **thus** ⟨*avyaya*⟩

मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I

पार्थ **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'

निश्चितम् **ascertained** ⟨1.1⟩ n. *niścita (nir.√ci[ñ]* – to ascertain; + *.[k]ta*)

मतम् **opinion** ⟨1.1⟩ n. *mata* (*√man[a]* 4A...बोधने – to know, think; + *.[k]ta*) – thought; opinion

उत्तमम् **final** ⟨1.1⟩ n. *uttama* – highest, best, last

Subodhinī: यानि यज्ञादि-कर्माणि मया पावनानि इति उक्तम्, एतानि एव कर्तव्यानि। कथम् ? सङ्गम् (कर्तृत्व-अभिनिवेशम्) त्यक्त्वा केवलम् ईश्वर-आराधनतया कर्तव्यानि इति, फलानि च त्यक्त्वा कर्तव्यानि इति निश्चितम् मे (मम) मतम्। अतएव उत्तमम् ॥१८.६॥

प्रतिज्ञातम् त्यागस्य त्रैविध्यम् इदानीम् दर्शयति – 'नियतस्य' इति त्रिभिः –

18.7

नियतस्य तु सन्न्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ॥७॥

नियतस्य कर्मणः सन्न्यासः तु	but *sannyāsa* of prescribed duty
न उपपद्यते,	is not proper,
मोहात् तस्य परित्यागः	its renunciation out of illusion
तामसः परिकीर्तितः ।	is declared to be in *tamo-guṇa*

"Prescribed duties should never be renounced. If one gives up his prescribed duties because of illusion, such renunciation is said to be in the mode of ignorance."

नियतस्य **of the regular** ⟨6.1⟩ n. *niyata* (*ni.√yam[a]* – to restrain; + *.[k]ta*) – restrained, regular
तु **but** ⟨*avyaya*⟩
सन्न्यासः **the renunciation** ⟨1.1⟩ m. *sannyāsa*
कर्मणः **of work** ⟨6.1⟩ n. *karman* (*karma*) – activity
न **not** ⟨*avyaya*⟩
उपपद्यते **it exists** ⟨*acyuta* 1.1⟩ *upa.√pad[a]* – to attain, exist
मोहात् **out of illusion** ⟨5.1⟩ m. *moha* – delusion
तस्य **its** ⟨6.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
परित्यागः **renunciation** ⟨1.1⟩ m. *parityāga*
तामसः **in *tamo-guṇa*** ⟨1.1⟩ m. *tāmasa*
परिकीर्तितः **is declared** ⟨1.1⟩ m. *parikīrtita* (*pari.√kṝt[a]* – to glorify; + *.[k]ta*) – glorified

Subodhinī: काम्यस्य कर्मणः बन्धकत्वात् सन्न्यासः युक्तः । नियतस्य तु (नित्यस्य) पुनः कर्मणः सन्न्यासः (त्यागः) न उपपद्यते, सत्त्व-शुद्धि-द्वारा मोक्ष-हेतुत्वात् । अतः तस्य परित्यागः, 'उपादेये अपि त्याज्यम्' इति एवम्-लक्षणात् मोहात् एव भवेत् । सः च मोहस्य तामसत्वात् तामसः परिकीर्तितः ॥१८.७॥
राजसम् त्यागम् आह – 'दुःखम्' इति –

18.8

दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥८॥

दुःखम् इति एव,	[thinking] 'it is just troublesome'
काय-क्लेश-भयात्	out of fear of bodily suffering
यद् कर्म त्यजेत्,	when one gives up work,
सः राजसम् त्यागम् कृत्वा	he, performing renunciation in *rajo-guṇa*
त्याग-फलम् न एव लभेत् ।	will never get the fruit of renunciation

"Anyone who gives up prescribed duties as troublesome or out of fear of bodily discomfort is said to have renounced in the mode of passion. Such action never leads to the elevation of renunciation."

दुःखम् **miserable** ⟨2.1⟩ n. *duḥkha* – misery
इति **thus** ⟨*avyaya*⟩
एव **certainly** ⟨*avyaya*⟩
यद् **that which** ⟨2.1⟩ n. *kṛṣnanāma yad* – (relative) who, which
कर्म **work** ⟨2.1⟩ n. *karman* (*karma*) – activity
काय-क्लेश-भयात् **out of fear of bodily suffering** ⟨5.1⟩ n. *kāya-kleśa-bhaya*...कायस्य क्लेशस्य भयम् इति काय-क्लेश-भयम् – fear of suffering of the body
त्यजेत् **one would abandon** ⟨*vidhi* 1.1⟩ *√tyaj[a]*...हानौ – to abandon
सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
कृत्वा **[after] doing** ⟨*avyaya*⟩ *√[ḍu]kṛ[ñ]*...करणे – to do; + *.[k]tvā*
राजसम् **in *rajo-guṇa*** ⟨2.1⟩ m. *rājasa*
त्यागम् **renunciation** ⟨2.1⟩ m. *tyāga*
न एव **never** ⟨*avyaya*⟩
त्याग-फलम् **the fruit of renunciation** ⟨2.1⟩ n. *tyāga-phala*...त्यागस्य फलम् इति त्याग-फलम्
लभेत् **one would obtain** ⟨*vidhi* 1.1⟩ *√[ḍu]labh[aṣ]*...प्राप्तौ – to obtain

Subodhinī: यः कर्ता आत्म-बोधम् विना केवलम् 'दुःखम्' इति एवम् ज्ञात्वा, शरीर-आयास-भयात् नित्यम् कर्म त्यजेत् इति यद् तादृशः त्यागः राजसः, दुःखस्य राजसत्वात् । अतः तम् राजसम् त्यागम् कृत्वा, राजसः पुरुषः त्यागस्य फलम् ज्ञान-निष्ठा-लक्षणम् नैव लभते इति अर्थः ॥१८.८॥
सात्त्विकम् त्यागम् आह – 'कार्यम्' इति –

18.9

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ।
सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः ॥९॥

हे अर्जुन !	O Arjuna!
कार्यम् इति एव,	[thinking] 'it is to be done'
सङ्गम् फलम् च एव त्यक्त्वा	[after] giving up attachment and the fruit

यद् नियतम् कर्म क्रियते,	when prescribed duty is performed,
सः त्यागः सात्त्विकः मतः ।	that renunciation is considered to be in *sattva-guṇa*

"O Arjuna, when one performs his prescribed duty only because it ought to be done, and renounces all material association and all attachment to the fruit, his renunciation is said to be in the mode of goodness."

कार्यम्	**to be done** ⟨1.1⟩ n. *kārya* (√*[ḍu]kṛ[ñ]*...करणे – to do; + *.ya*) – 'to be done', duty, work
इति	**thus** ⟨*avyaya*⟩
एव	**certainly** ⟨*avyaya*⟩
यद्	**that which** ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
कर्म	**work** ⟨1.1⟩ n. *karman (karma)* – activity
नियतम्	**inevitably** ⟨1.1⟩ n. always, constantly, decidedly, inevitably, surely
क्रियते	**it is done** ⟨*acyuta* pass. 1.1⟩ √*[ḍu]kṛ[ñ]*...करणे – to do
अर्जुन	**O Arjuna!** ⟨8.1⟩ m. *arjuna* – white, 'who is pure in actions'
सङ्गम्	**attachment** ⟨2.1⟩ m. *saṅga*
त्यक्त्वा	**[after] abandoning** ⟨*avyaya*⟩ √*tyaj[a]*...हानौ – to abandon; + *.[k]tvā*
फलम्	**the fruit** ⟨2.1⟩ n. *phala*
च	**and** ⟨*avyaya*⟩
सः	**that** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
त्यागः	**renunciation** ⟨1.1⟩ m. *tyāga*
सात्त्विकः	**in *sattva-guṇa*** ⟨1.1⟩ m. *sāttvika*
मतः	**considered** ⟨1.1⟩ m. *mata* (√*man[a]* 4A...बोधने – to know, think; + *.[k]ta*) – thought; opinion

Subodhinī: 'कार्यम्' इति एवम् बुद्ध्वा, नियतम् (अवश्य-कर्तव्यतया विहितम्) कर्म सङ्गम् फलम् च त्यक्त्वा क्रियते इति यद् तादृशः त्यागः सात्त्विकः मतः ॥१८.९॥

एवम्-भूत-सात्त्विक-त्याग-परिनिष्ठितस्य लक्षणम् आह – 'न द्वेष्टि' इति –

18.10

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते ।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः ॥१०॥

सत्त्व-समाविष्टः	being situated in *sattva-guṇa*
मेधावी छिन्न-संशयः त्यागी	the intelligent and doubtless *tyāgī*
अ-कुशलम् कर्म न द्वेष्टि,	does not hate bad work,
कुशले न अनुषज्जते ।	nor is he attached to good [work]

"The intelligent renouncer situated in the mode of goodness, neither hateful of inauspicious work nor attached to auspicious work, has no doubts about work."

न	**not** ⟨*avyaya*⟩
द्वेष्टि	**he hates** ⟨*acyuta* 1.1⟩ √*dviṣ[a]*...अप्रीतौ – to hate
अ-कुशलम्	**the bad** ⟨2.1⟩ n. *a-kuśala*
कर्म	**work** ⟨2.1⟩ n. *karman (karma)* – activity
कुशले	**in the good** ⟨7.1⟩ n. *kuśala* – good
न	**not** ⟨*avyaya*⟩
अनुषज्जते	**he is attached** ⟨*acyuta* 1.1⟩ *anu.*√*sanj[a]* – to be attached
त्यागी	**the *tyāgī*** ⟨1.1⟩ m. *tyāgin (tyāgī)* – 'who is renounced'
सत्त्व-समाविष्टः	**filled with *sattva-guṇa*** ⟨1.1⟩ m. *sattva-samāviṣṭa*...सत्त्वेन समाविष्टः इति सत्त्व-समाविष्टः
मेधावी	**who is intelligent** ⟨1.1⟩ m. *medhāvin (medhāvī)*
छिन्न-संशयः	**whose doubt is cut** ⟨1.1⟩ m. *chinna-saṁśaya*...छिन्नः संशयः यस्य, सः छिन्न-संशयः

Subodhinī: सत्त्व-समाविष्टः (सत्त्वेन संव्याप्तः) सात्त्विक-त्यागी अ-कुशलम् (दुःख-आवहम्) शिशिरे प्रातः-स्नानादिकम् कर्म न द्वेष्टि । कुशले च (सुख-करे) कर्मणि निदाघे मध्याह्न-स्नानादौ न अनुषज्जते (प्रीतिम् न करोति) । तत्र हेतुः – मेधावी स्थिर-बुद्धिः । 'यत्र पर-परिभवादि महत् अपि दुःखम् सहते, स्वर्गादि-सुखम् च त्यजते, तत्र कियत् एतद् तात्कालिकम् सुखम् दुःखम् च!' इति एवम् अनुसन्धानवान् इति अर्थः । अतएव छिन्नः संशयः (मिथ्या-ज्ञानम्), दैहिकम् सुख-दुःखयोः उपादित्सा-परिजिहीर्षा-लक्षणम् यस्य सः ॥१८.१०॥

ननु एवम-भूतात् कर्म-फल-त्यागात् वरम् सर्व-कर्म-त्याग-स्तथा सति कर्म-विक्षेप-अभावेन ज्ञान-निष्ठा सुखम् सम्पद्यते, तत्र आह – 'न हि' इति –

18.11

न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥११॥

कर्माणि अ-शेषतः त्यक्तुम्	to completely give up [all] activities
देह-भृता न हि शक्यम्,	is not possible by an embodied being,
यः तु कर्म-फल-त्यागी	but one who gives up the fruit of activity
सः त्यागी इति अभिधीयते ।	he is called a *tyāgī*

"It is indeed impossible for an embodied being to give up all activities. But he who renounces the fruits of action is called one who has truly renounced."

न हि	**never** ⟨*avyaya*⟩ *na hi* – not indeed

देह-भृता **by an embodied being** ⟨3.1⟩ m. *deha-bhṛt* – an embodied being
शक्यम् **possible** ⟨1.1⟩ n. *śakya* (from √*śak[l]*...शक्तौ – to be able) – able, possible
त्यक्तुम् **to abandon** ⟨*avyaya*⟩ √*tyaj[a]*...हानौ – to abandon; + .*tum[u]*
कर्माणि **activities** ⟨2.3⟩ n. *karman (karma)* – activity
अ-शेषतः **completely** ⟨*avyaya*⟩ (*a-śeṣatas*) – without remainder
यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
तु **but** ⟨*avyaya*⟩
कर्म-फल-त्यागी **one who renounces the fruit of activity** ⟨1.1⟩ m. *karma-phala-tyāgin* (*-tyāgī*)
सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
त्यागी **a *tyāgī*** ⟨1.1⟩ m. *tyāgin (tyāgī)* – 'who is renounced'
इति **thus** ⟨*avyaya*⟩
अभिधीयते **he is called** ⟨*acyuta* pass. 1.1⟩ *abhi.*√*[ḍu]dhā[ñ]* – to explain, name

Subodhinī: देह-भृता (देहात्म-अभिमानवता) निःशेषेण सर्वाणि कर्माणि त्यक्तुम् नहि शक्यम् । तद् उक्तम् – 'न हि कश्चिद् क्षणम् अपि जातु तिष्ठति अ-कर्म-कृत्' (3.5) इत्यादिना । तस्मात् यः तु कर्माणि कुर्वन् अपि कर्म-फल-त्यागी, सः एव 'मुख्यः त्यागी' इति अभिधीयते ॥१८.११॥
एवम्-भूतस्य कर्म-फल-त्यागस्य फलम् आह – अनिष्टम् इति –

18.12

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ।
भवत्यत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित् ॥१२॥

अनिष्टम् इष्टम् मिश्रम् च	undesirable, desirable and mixed –
त्रि-विधम् कर्मणः फलम्	a threefold fruit of activity
अ-त्यागिनाम् प्रेत्य भवति,	accrues after death for those who are not renounced,
सन्न्यासिनाम् तु न क्वचिद् ।	but never for those who are renounced

"For one who is not renounced, the threefold fruits of action – desirable, undesirable and mixed – accrue after death. But those who are in the renounced order of life have no such result to suffer or enjoy."

अनिष्टम् **undesired** ⟨1.1⟩ n. *an-iṣṭa*
इष्टम् **desired** ⟨1.1⟩ n. *iṣṭa*
मिश्रम् **mixed** ⟨1.1⟩ n. *miśra*
च **and** ⟨*avyaya*⟩
त्रि-विधम् **threefold** ⟨1.1⟩ n. *tri-vidha*
कर्मणः **of activity** ⟨6.1⟩ n. *karman (karma)* – activity
फलम् **the fruit** ⟨1.1⟩ n. *phala*

भवति **there is** ⟨*acyuta* 1.1⟩ √*bhū*...सत्तायाम् – to be, exist, become
अ-त्यागिनाम् **of those who are not renounced** ⟨6.3⟩ m. *a-tyāgin* (*-tyāgī*) – who is not renounced
प्रेत्य **[after] departing** ⟨*avyaya*⟩ *pra.*√*i[n]* – to depart; + .*ya[p]*
न **not** ⟨*avyaya*⟩
तु **but** ⟨*avyaya*⟩
सन्न्यासिनाम् **of those who are renounced** ⟨6.3⟩ m. *sannyāsin (sannyāsī)* – who is renounced
क्वचिद् **at any time** ⟨*avyaya*⟩ *kva* (where) + .*cid* – anywhere, anytime, whatever

Subodhinī: अनिष्टम् (नारकित्वम्) इष्टम् (देवत्वम्) मिश्रम् (मनुष्यत्वम्), एवम् त्रि-विधम् पापस्य पुण्यस्य च उभय-मिश्रस्य च कर्मणः यद् फलम् प्रसिद्धम्, तद् सर्वम् अ-त्यागिनाम् (स-कामानाम्) एव प्रेत्य (परत्र) भवति, तेषाम् त्रि-विध-कर्म-सम्भवात् । नतु सन्न्यासिनाम् क्वचिद् अपि भवति । 'सन्न्यासि'-शब्देन अत्र फल-त्याग-साम्यात् प्रकृताः कर्म-फल-त्यागिनः अपि गृह्यन्ते । 'अनाश्रितः कर्म-फलम् कार्यम् कर्म करोति यः, सः सन्न्यासी च योगी च' (6.1) इति एवम् आदौ च कर्म-फल-त्यागिषु सन्न्यासि-शब्द-प्रयोग-दर्शनात् । तेषाम् सात्त्विकानाम् पाप-असम्भवात् ईश्वर-अर्पणेन च पुण्य-फलस्य त्यक्तत्वात्, त्रि-विधम् अपि कर्म-फलम् न भवति इति अर्थः ॥१८.१२॥
ननु 'कर्म कुर्वतः कर्म-फलम् कथम् न भवेत् ?' इति आशङ्क्य, सङ्ग-त्यागिनः निरहङ्कारस्य सतः कर्म-फलेन लेपः न अस्ति इति उपपादयितुम् आह – 'पञ्च एतानि' इति पञ्चभिः –

18.13

पञ्चैतानि महाबाहो कारणानि निबोध मे ।
साङ्ख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥१३॥

हे महा-बाहो !	O Arjuna!
सर्व-कर्मणाम् सिद्धये	for the accomplishment of all work
साङ्ख्ये कृतान्ते प्रोक्तानि	as declared in *Sāṅkhya* in conclusion
एतानि पञ्च कारणानि	these five causes
मे (मम) निबोध !	learn from Me!

"O mighty-armed Arjuna, according to the Vedānta there are five causes for the accomplishment of all action. Now learn of these from Me."

पञ्च **five** ⟨2.3⟩ n. *pañca*
एतानि **these** ⟨2.3⟩ n. *kṛṣṇanāma etad* – (first person) he, this
महा-बाहो **O Arjuna!** ⟨8.1⟩ m. *mahā-bāhu* – 'who has mighty arms'
कारणानि **causes** ⟨2.3⟩ n. *kāraṇa* – cause

निबोध you must know ⟨vidhātā 2.1⟩ *ni.√budh[ir]* – to know, be awake
मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
साङ्ख्ये **in *Sāṅkhya*** ⟨7.1⟩ n. *sāṅkhya* – *Sāṅkhya* philosophy
कृतान्ते **in conclusion** ⟨7.1⟩ m. *kṛta-_anta* – conclusion
प्रोक्तानि **which are declared** ⟨2.3⟩ n. *prokta* (*pra.√vac[a]* – to declare; + *.[k]ta*) – declared
सिद्धये **for the perfection** ⟨4.1⟩ f. *siddhi* – perfection
सर्व-कर्मणाम् **of all activities** ⟨6.3⟩ n. *sarva-karman* (*-karma*) – all activity

Subodhinī: सर्व-कर्मणाम् सिद्धये (निष्पत्तये) इमानि (वक्ष्यमाणानि) पञ्च कारणानि मे वचनात् निबोध (जानीहि)। आत्मनः कर्तृत्व-अभिमान-निवृत्त्यर्थम् अवश्यम् एतानि ज्ञातव्यानि इति एवम् तेषाम् स्तुति-अर्थम् आह – 'साङ्ख्ये' इति। सम्यक् ख्यायते (ज्ञायते) परमात्मा अनेन इति साङ्ख्यम् (तत्त्व-ज्ञानम्) तस्मिन्, कृतम् (कर्म) तस्य अन्तः (समाप्तिः) अस्मिन् इति कृतान्तः, तस्मिन् वेदान्त-सिद्धान्तः इति अर्थः। यद्वा, सङ्ख्यायन्ते (गण्यन्ते) तत्त्वानि यस्मिन् इति 'साङ्ख्यम्', कृतः अन्तः 'निर्णयः' यस्मिन् इति 'कृतान्तम्' (साङ्ख्य-शास्त्रम्) एव, तस्मिन् [कारणानि] प्रोक्तानि, अतः सम्यक् निबोध इति अर्थः ॥१८.१३॥
तानि एव आह – 'अधिष्ठानम्' इति –

18.14

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ॥१४॥

अधिष्ठानम् तथा कर्ता	the place (body) and the doer
पृथग्विधम् करणम् च	the manifold instrument (senses)
विविधाः पृथक् चेष्टाः च	the various different efforts
अत्र च पञ्चमम् दैवम् एव	and the fifth is the Lord

"The place of action (the body), the performer, the various senses, the many different kinds of endeavor, and ultimately the Supersoul – these are the five factors of action."

अधिष्ठानम् **the place** ⟨1.1⟩ n. *adhiṣṭhāna* – base, position, residence
तथा **so** ⟨*avyaya*⟩
कर्ता **the doer** ⟨1.1⟩ m. *kartṛ* (*kartā, .tṛ[n]*)
करणम् **the instrument** ⟨1.1⟩ n. *karaṇa*
च **and** ⟨*avyaya*⟩
पृथग्विधम् **of different kinds** ⟨1.1⟩ n. *pṛthak-_vidha*
विविधाः **manifold** ⟨1.3⟩ f. *vividhā* (*.ā[p]*)
च **and** ⟨*avyaya*⟩
पृथक् **different** ⟨*avyaya*⟩

चेष्टाः **efforts** ⟨1.3⟩ f. *ceṣṭā* – effort, endeavor, movement, exertion
दैवम् **the Lord** ⟨1.1⟩ n. *daiva* – godly, destiny; the *devas* controlling the senses, or the Supersoul
च **and** ⟨*avyaya*⟩
एव **certainly** ⟨*avyaya*⟩
अत्र **here** ⟨*avyaya*⟩
पञ्चमम् **the fifth** ⟨1.1⟩ n. *pañcama*

Subodhinī: अधिष्ठानम् (शरीरम्), कर्ता (चित्-जड-ग्रन्थिः रहङ्कारः), पृथक्-विधम् (अनेक-प्रकारम्) करणम् चक्षुः-श्रोत्रादि, विविधाः च कार्यतः स्वरूपतः च पृथक्-भूताः चेष्टाः (प्राण-अपानादीनाम् व्यापाराः)। अत्र च (एतेषु) एव पञ्चमम् दैवम् च कारणम्, चक्षुरादि-अनुग्राहकम् आदित्यादि-सर्व-प्रेरकः अन्तर्यामी वा ॥१८.१४॥
एतेषाम् एव सर्व-कर्म-हेतुत्वम् आह – 'शरीर' ति –

18.15

शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥१५॥

यद् कर्म	work which
न्याय्यम् वा विपरीतम् वा	either right or wrong
शरीर-वाङ्मनोभिः	with body, speech and mind
नरः प्रारभते,	a man performs,
तस्य एते पञ्च हेतवः ।	of that these are the five causes

"Whatever right or wrong action a man performs by body, mind or speech is caused by these five factors."

शरीर-वाङ्मनोभिः **with body, speech and mind** ⟨3.3⟩ n. *śarīra-vāc-_manas* (*-manaḥ*) – body, speech and mind
यद् **that which** ⟨2.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
कर्म **work** ⟨2.1⟩ n. *karman* (*karma*) – activity
प्रारभते **he begins** ⟨*acyuta* 1.1⟩ *pra.ā.√rabh[a]* – to begin
नरः **a man** ⟨1.1⟩ m. *nara*
न्याय्यम् **right** ⟨2.1⟩ n. *nyāyya* – regular, right
वा **or** ⟨*avyaya*⟩
विपरीतम् **wrong** ⟨2.1⟩ n. *viparīta* (*vi.pari.√i[n]* – to go round, turn; + *.[k]ta*) – turned round, reversed, wrong
वा **or** ⟨*avyaya*⟩
पञ्च **five** ⟨1.3⟩ m. *pañca*

एते	**these** ⟨1.3⟩ m. *kṛṣṇanāma etad* – (first person) he, this
तस्य	**of that** ⟨6.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
हेतवः	**the causes** ⟨1.3⟩ m. *hetu* – cause, desire

Subodhinī: यथा उक्तैः पञ्चभिः प्रारभ्यमाणम् कर्म, त्रिषु एव अन्तर्भाव्यम्, शरीर-वाच्-मनोभिः इति उक्तम्, शारीरम् वाचिकम् मानसम् च त्रि-विधम् कर्म इति प्रसिद्धेः । शरीरादिभिः यद् कर्म धर्म्यम् वा अ-धर्म्यम् वा करोति नरः, तस्य सर्वस्य कर्मणः एते पञ्च हेतवः ॥१८.१५॥

ततः किम् ? अतः आह – 'तत्र' इति –

18.16

तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥१६॥

तत्र एवम् सति यः तु	being thus, one who
केवलम् आत्मानम् कर्तारम् पश्यति,	sees only oneself as doer,
अ-कृत-बुद्धित्वात्	out of ignorance
सः दुर्मतिः न पश्यति ।	that fool does not see

"Therefore one who thinks himself the only doer, not considering the five factors, is certainly not very intelligent and cannot see things as they are."

तत्र	**there** ⟨*avyaya*⟩
एवम्	**thus** ⟨*avyaya*⟩
सति	**being** ⟨7.1⟩ n. *sat* – being, real, good
कर्तारम्	**the doer** ⟨2.1⟩ m. *kartṛ (kartā, .tṛ[n])*
आत्मानम्	**oneself** ⟨2.1⟩ m. *ātman (ātmā)* – the self, soul
केवलम्	**only** ⟨*avyaya*⟩
तु	**but** ⟨*avyaya*⟩
यः	**he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
पश्यति	**he sees** ⟨*acyuta* 1.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see
अ-कृत-बुद्धित्वात्	**out of ignorance** ⟨5.1⟩ n. *a-kṛta-buddhitva (.tva)* – the intelligence being not developed; ignorance अ-कृत – not done, undeveloped, unformed, imperfect
न	**not** ⟨*avyaya*⟩
सः	**he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
पश्यति	**sees** ⟨*acyuta* 1.1⟩ √*dṛś[ir]*...प्रेक्षणे – to see
दुर्मतिः	**a fool** ⟨1.1⟩ m. *durmati* – 'bad disposition of mind'

Subodhinī: तत्र सर्वस्मिन् कर्मणि एते पञ्च हेतवः इति एवम् सति, केवलम् (निरुपाधिकम् अ-सङ्गम्) आत्मानम् तु यः कर्तारम् पश्यति, शास्त्र-आचार्य-उपदेश-त्यागेन अ-संस्कृत-बुद्धित्वात् दुर्मतिः असौ सम्यक् न पश्यति ॥१८.१६॥

कः तर्हि सुमतिः 'यस्य कर्म-लेपः न अस्ति' इति उक्तम् ? इति अपेक्षायाम् आह – 'यस्य' इति –

18.17

यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यते ॥१७॥

यस्य न अहङ्कृतः भावः,	one whose nature is not egoistic,
यस्य बुद्धिः न लिप्यते,	one whose intelligence is not stained,
इमान् लोकान् हत्वा अपि	even [after] killing [all] these people
सः न हन्ति,	he does not [actually] kill,
न निबध्यते ।	nor is he bound

"One who is not motivated by false ego, whose intelligence is not entangled, though he kills men in this world, does not kill. Nor is he bound by his actions."

यस्य	**he whose** ⟨6.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
न	**not** ⟨*avyaya*⟩
अहङ्कृतः	**egoistic** ⟨1.1⟩ m. *ahaṅkṛta*
भावः	**nature** ⟨1.1⟩ m. *bhāva* – state of being: nature, sentiment
बुद्धिः	**intelligence** ⟨1.1⟩ f. *buddhi*
यस्य	**he whose** ⟨6.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
न	**not** ⟨*avyaya*⟩
लिप्यते	**it is smeared** ⟨*acyuta* pass. 1.1⟩ √*lip[a]*...उपदेहे – to smear
हत्वा	**[after] killing** ⟨*avyaya*⟩ √*han[a]*...हिंसा-गत्योः – to harm, kill; go; + *.[k]tvā*
अपि	**also** ⟨*avyaya*⟩
सः	**he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
इमान्	**these** ⟨2.3⟩ m. *kṛṣṇanāma idam* – (first person) he, this
लोकान्	**people** ⟨2.3⟩ m. *loka* – place, world, people
न	**not** ⟨*avyaya*⟩
हन्ति	**he kills** ⟨*acyuta* 1.1⟩ √*han[a]*...हिंसा-गत्योः – to harm, kill; go
न	**not** ⟨*avyaya*⟩
निबध्यते	**he is bound** ⟨*acyuta* pass. 1.1⟩ *ni.*√*bandh[a]* – to bind

Subodhinī: 'अहम्' इति कृतः, 'अहम् कर्ता' इति एवम्-भूतः भावः (अभिप्रायः) यस्य न अस्ति । यद्वा अहङ्कृतः (अहङ्कारस्य) भावः (स्व-भावः) कर्तृत्व-अभिनिवेशः

यस्य न अस्ति, शरीरादीनाम् एव कर्म-कर्तृत्व-आलोचनात् इति अर्थः । अतएव यस्य बुद्धिः न लिप्यते, इष्ट-अनिष्ट-बुद्ध्या कर्मसु न सज्जते, सः एवम्-भूतः देहादि-व्यतिरिक्त-आत्म-दर्शी इमान् लोकान् (सर्वान् अपि प्राणिनः), लोक-दृष्ट्या हत्वा अपि, विविक्तया स्व-दृष्ट्या न हन्ति । नच तद्-फलैः निबध्यते (बन्धनम् न प्राप्नोति) । किम् पुनः सत्त्व-शुद्धि-द्वारा परोक्ष-ज्ञान-उत्पत्ति-हेतुभिः कर्मभिः तस्य बन्ध-शङ्का ? इति अर्थः । तद् उक्तम् – 'ब्रह्मणि आधाय कर्माणि सङ्गम् त्यक्त्वा करोति यः, लिप्यते न सः पापेन' (5.10) इति ॥१८.१७॥

'हत्वा अपि न हन्ति न निबद्ध्यते' (18.17) इति एतद् एव उपपादयितुम्, कर्म-चोदनायाः कर्म-आश्रयस्य च कर्म-फलादीनाम् च त्रि-गुणात्मकत्वात्, निर्गुणस्य आत्मनः तद्-सम्बन्धः न अस्ति इति अभिप्रायेण कर्म-चोदनाम् कर्म-आश्रयम् च आह – 'ज्ञानम्' इति –

18.18

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ।
करणं कर्म कर्तेति त्रिविधः कर्मसङ्ग्रहः ॥१८॥

ज्ञानम् ज्ञेयम् परिज्ञाता	knowledge, its object and the knower –
त्रि-विधा कर्म-चोदना,	this is the threefold impetus to activity,
करणम् कर्म कर्ता	instrument, activity and doer –
इति त्रि-विधः कर्म-सङ्ग्रहः ।	this is the threefold constitution of activity

"Knowledge, the object of knowledge, and the knower are the three factors that motivate action; the senses, the work and the doer are the three constituents of action."

ज्ञानम्	**knowledge** ⟨1.1⟩ n. *jñāna*
ज्ञेयम्	**the object of knowledge** ⟨1.1⟩ n. *jñeya* (√*jñā* 9P...अवबोधने – to know; + .*ya*) – to be known
परिज्ञाता	**the knower** ⟨1.1⟩ m. *parijñātṛ* (*parijñātā*, .*tr[n]*)
त्रि-विधा	**threefold** ⟨1.1⟩ f. *tri-vidhā* (.*ā[p]*)
कर्म-चोदना	**the impetus of activity** ⟨1.1⟩ f. *karma-codanā*
करणम्	**the instrument** ⟨1.1⟩ n. *karaṇa*
कर्म	**activity** ⟨1.1⟩ n. *karman* (*karma*)
कर्ता	**the doer** ⟨1.1⟩ m. *kartṛ* (*kartā*, .*tṛ[n]*)
इति	**thus** ⟨*avyaya*⟩
त्रि-विधः	**threefold** ⟨1.1⟩ m. *tri-vidha*
कर्म-सङ्ग्रहः	**the constitution of activity** ⟨1.1⟩ m. *karma-saṅgraha*

Subodhinī: ज्ञानम् 'इष्ट-साधनम् एतद्' इति बोधः । ज्ञेयम् इष्ट-साधनम् कर्म । परिज्ञाता एवम्-भूत-ज्ञान-आश्रयः । एवम् त्रि-विधा कर्म-चोदना, चोद्यते (प्रवर्त्यते) येन इति चोदना । ज्ञानादि-त्रितयम् कर्म-प्रवृत्ति-हेतुः इति अर्थः ॥१८.१८॥

ततः किम् ? अतः आह – 'ज्ञानम्' इति –

18.19

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः ।
प्रोच्यते गुणसङ्ख्याने यथावच्छृणु तान्यपि ॥१९॥

गुण-सङ्ख्याने	in the theory of the *guṇas* (*Sāṅkhya*)
ज्ञानम् कर्म च कर्ता च	knowledge, activity and doer
गुण-भेदतः	according to the division of the *guṇas*
त्रिधा एव प्रोच्यते,	[each] is declared as threefold,
तानि अपि यथावत् शृणु !	here of them also as they are!

"According to the three different modes of material nature, there are three kinds of knowledge, action and performer of action. Now hear of them from Me."

ज्ञानम्	**knowledge** ⟨1.1⟩ n. *jñāna*
कर्म	**activity** ⟨1.1⟩ n. *karman* (*karma*)
च	**and** ⟨*avyaya*⟩
कर्ता	**the doer** ⟨1.1⟩ m. *kartṛ* (*kartā*, ..*tr[n]*)
च	**and** ⟨*avyaya*⟩
त्रिधा	**threefold** ⟨*avyaya*⟩
एव	**certainly** ⟨*avyaya*⟩
गुण-भेदतः	**according to the division of the *guṇas*** ⟨*avyaya*⟩ (-*bhedatas*)...गुणानाम् भेदतः इति गुण-भेदतः
प्रोच्यते	**it is declared** ⟨*acyuta* pass. 1.1⟩ *pra*.√*vac[a]* – to declare
गुण-सङ्ख्याने	**in the theory of the *guṇas*** ⟨7.1⟩ n. *guṇa-saṅkhyāna*...गुणानाम् सङ्ख्यानः इति गुण-सङ्ख्यानः – the enumeration of the *guṇas*
यथावत्	**as it is** ⟨*avyaya*⟩
शृणु	**you must hear** ⟨*vidhātā* 2.1⟩ √*śru*...श्रवणे – to hear, obey
तानि	**those** ⟨2.3⟩ n. *kṛṣṇanāma tad* – (first person) he, that
अपि	**also** ⟨*avyaya*⟩

Subodhinī: गुणाः सम्यक् कार्य-भेदेन ख्यायन्ते (प्रतिपाद्यन्ते) अस्मिन् इति गुण-सङ्ख्यानम् (साङ्ख्य-शास्त्रम्), तस्मिन् ज्ञानम् कर्म च (क्रिया) कर्ता च प्रत्येकम् सत्त्वादि-गुण-भेदेन त्रिधा एव उच्यते । तानि अपि ज्ञानादीनि वक्ष्यमाणानि यथावत् शृणु । 'त्रिधा एव' इति 'एव'-कारः गुण-त्रय-उपाधि-व्यतिरेकेण-आत्मनः स्वतः

कर्तृत्वादि-प्रतिषेध-अर्थः । चतुर्दशे अध्याये 'तत्र सत्त्वम् निर्मलत्वात्' (14.6) इत्यादिना गुणानाम् बन्धकत्व-प्रकारः निरूपितः । सप्तदशे अध्याये 'यजन्ते सात्त्विकाः देवान्' (17.4) इत्यादिना गुण-कृत-त्रिविध-स्वभाव-निरूपणेन रजः-तमः-स्वभावम् परित्यज्य सात्त्विक-आहारादि-सेवया सात्त्विक-स्वभावः सम्पादनीय इति उक्तम् । इह तु, क्रिया-कारक-फलादीनाम् आत्म-सम्बन्धः न अस्ति इति दर्शयितुम्, सर्वेषाम् त्रि-गुणात्मकत्वम् उच्यते इति विशेषः ज्ञातव्यः ॥१८.१९॥

तत्र ज्ञानस्य सात्त्विकादि-त्रैविध्यम् आह – 'सर्व-भूतेषु' इति त्रिभिः –

18.20

सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥२०॥

येन	that [knowledge] by which
विभक्तेषु सर्व-भूतेषु	in all divided beings
अ-विभक्तम् एकम् अ-व्ययम् भावम्	undivided one unchangeable [spiritual] nature
ईक्षते	one sees,
तद् ज्ञानम् सात्त्विकम् विद्धि !	know that knowledge to be in *sattva-guṇa*!

"That knowledge by which one undivided spiritual nature is seen in all living entities, though they are divided into innumerable forms, you should understand to be in the mode of goodness."

सर्व-भूतेषु **in all beings** ⟨7.3⟩ m. *sarva-bhūta* – all beings
येन **that by which** ⟨3.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
एकम् **one** ⟨2.1⟩ m. *eka*
भावम् **nature** ⟨2.1⟩ m. *bhāva* – state of being: nature, sentiment
अ-व्ययम् **unchangeable** ⟨2.1⟩ m. *a-vyaya* – unchangeable, imperishable
ईक्षते **one sees** ⟨*acyuta* 1.1⟩ √*īkṣ[a]*...दर्शने
अ-विभक्तम् **undivided** ⟨2.1⟩ m. *a-vibhakta*
विभक्तेषु **which are divided** ⟨7.3⟩ m. *vibhakta* (.*[k]ta*) – divided
तद् **that** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
ज्ञानम् **knowledge** ⟨2.1⟩ n. *jñāna*
विद्धि **you must know** ⟨*vidhātā* 2.1⟩ √*vid[a]* 2P...ज्ञाने – to know
सात्त्विकम् **in *sattva-guṇa*** ⟨2.1⟩ n. *sāttvika*

Subodhinī: सर्वेषु भूतेषु ब्रह्मा-अदि-स्थावर-अन्तेषु विभक्तेषु (परस्परम् व्यावृत्तेषु) अ-विभक्तम् (अनुस्यूतम्) एकम् अ-व्ययम् (निर्विकारम्) भावम् (परमात्म-तत्त्वम्) येन ज्ञानेन ईक्षते (आलोचयति), तद् ज्ञानम् सात्त्विकम् विद्धि ॥१८.२०॥

राजसम् ज्ञानम् आह – पृथक्त्वेन इति –

18.21

पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् ।
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥२१॥

यद् ज्ञानम् तु पृथक्त्वेन	but that knowledge which by distinction
सर्वेषु भूतेषु	in all living beings
पृथग्विधान् नाना-भावान्	various natures of different kinds
वेत्ति,	knows,
तद् ज्ञानम् राजसम् विद्धि !	know that knowledge to be in *rajo-guṇa*!

"That knowledge by which one sees that in every different body there is a different type of living entity you should understand to be in the mode of passion."

पृथक्त्वेन **by being different** ⟨3.1⟩ n. *pṛthaktva* (.*tva*) – separatedness
तु **but** ⟨*avyaya*⟩
यद् **that which** ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
ज्ञानम् **knowledge** ⟨1.1⟩ n. *jñāna*
नाना-भावान् **various natures** ⟨2.3⟩ m. *nānā-bhāva*
पृथग्विधान् **different kinds** ⟨2.3⟩ m. *pṛthak-_vidha*
वेत्ति **it knows** ⟨*acyuta* 1.1⟩ √*vid[a]* 2P...ज्ञाने – to know
सर्वेषु **in all** ⟨7.3⟩ m. *kṛṣṇanāma sarva* – all
भूतेषु **in beings** ⟨7.3⟩ m. *bhūta* (√*bhū*...सत्तायाम् – to be, exist, become; + .*[k]ta*) – past; an element, being, creature
तद् **that** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
ज्ञानम् **knowledge** ⟨2.1⟩ n. *jñāna*
विद्धि **you must know** ⟨*vidhātā* 2.1⟩ √*vid[a]* 2P...ज्ञाने – to know
राजसम् **in *rajo-guṇa*** ⟨2.1⟩ n. *rājasa*

Subodhinī: 'पृथक्त्वेन तु यद् ज्ञानम्' इति अस्य एव विवरणम् – सर्वेषु भूतेषु (देहेषु) नाना-भावान् (वस्तुतः एव अनेकान्) क्षेत्र-ज्ञान् पृथक्-विधान् (सुखी-दुःखी-इत्यादि-रूपेण विलक्षणान्) येन ज्ञानेन वेत्ति, तद् ज्ञानम् राजसम् विद्धि ॥१८.२१॥

तामसम् ज्ञानम् आह – 'यद् तु' इति –

18.22

यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम् ।
अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम् ॥२२॥

यद् तु	but that [knowledge] which
एकस्मिन् कार्ये कृत्स्नवत् सक्तम्,	is attached to one activity as all in all,
अहैतुकम् अ-तत्त्वार्थवत् अल्पम् च,	which is without reasoning and meaning, and small,
तद् तामसम् उदाहृतम् ।	that is declared to be in *tamo-guṇa*

"And that knowledge by which one is attached to one kind of work as the all in all, without knowledge of the truth, and which is very meager, is said to be in the mode of darkness."

यद्	**that which** ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
तु	**but** ⟨*avyaya*⟩
कृत्स्नवत्	**as all** ⟨*avyaya*⟩ (*.vat[i]*)
एकस्मिन्	**in one** ⟨7.1⟩ n. *kṛṣṇanāma eka* – one
कार्ये	**duty** ⟨7.1⟩ n. *kārya* – 'to be done', duty; effect
सक्तम्	**attached** ⟨1.1⟩ n. *sakta* (*.[k]ta*)
अहैतुकम्	**without reasoning** ⟨1.1⟩ n. *a-haituka*
अ-तत्त्वार्थवत्	**without real meaning** ⟨1.1⟩ n. *a-tattva-_arthavat* (*.vat[u]*)
अल्पम्	**small** ⟨1.1⟩ n. *alpa* – little, small
च	**and** ⟨*avyaya*⟩
तद्	**that** ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
तामसम्	**in *tamo-guṇa*** ⟨1.1⟩ n. *tāmasa*
उदाहृतम्	**declared** ⟨1.1⟩ n. *udāhṛta* (*ud.ā.*√*hṛ[ñ]* – to set up, declare, illustrate; + *.[k]ta*)

Subodhinī: एकस्मिन् कार्ये (देहे प्रतिमा-आदौ वा) कृत्स्नवत् (परिपूर्णवत्) सक्तम्, 'एतावान् एव आत्मा ईश्वरः वा' इति अभिनिवेश-युक्तम्, अहैतुकम् (निरुपपत्तिकम्), अ-तत्त्व-अर्थवत् (परमार्थ-अवलम्बन-शून्यम् । अतएव अल्पम् (तुच्छम्), अल्प-विषयत्वात् अल्प-फलत्वात् च । यद् एवम्-भूतम् ज्ञानम् तद् तामसम् उदाहृतम् ॥१८.२२॥
इदानीम् त्रि-विधम् कर्म आह – 'नियतम्' इति त्रिभिः –

18.23

नियतं सङ्गरहितमरागद्वेषतः कृतम् ।
अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥२३॥

अ-फल-प्रेप्सुना	by one who does not desire the fruit
यद् नियतम् सङ्ग-रहितम् कर्म	that regulated unattached work which
अ-राग-द्वेषतः कृतम्,	is done without attraction and hatred.
तद् सात्त्विकम् उच्यते ।	that is said to be in *sattva-guṇa*

"That action which is regulated and which is performed without attachment, without love or hatred, and without desire for fruitive results is said to be in the mode of goodness."

नियतम्	**regulated** ⟨1.1⟩ n. *niyatam*
सङ्ग-रहितम्	**without attachment** ⟨1.1⟩ n. *saṅga-rahita*
अ-राग-द्वेषतः	**without attachment or hatred** ⟨*avyaya*⟩ (*-dveṣatas; .tas[i]*)
कृतम्	**done** ⟨1.1⟩ n. *kṛta* (√*[du]kṛ[ñ]*...करणे – to do; + *.[k]ta*)
अ-फल-प्रेप्सुना	**by one who does not desire to obtain the fruit** ⟨3.1⟩ m. *a-phala-prepsu* – who does not desire to obtain the fruit प्रेप्सु – *pra.* + *īpsu*; *īpsu* (from √*āp[l]*...व्याप्तौ – to reach, obtain) – one who desires to obtain
कर्म	**work** ⟨1.1⟩ n. *karman* (*karma*) – activity
यद्	**that which** ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
तद्	**that** ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
सात्त्विकम्	**in *sattva-guṇa*** ⟨1.1⟩ n. *sāttvika*
उच्यते	**it is said** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak

Subodhinī: नियतम् (नित्यतया विहितम्), सङ्ग-रहितम् (अभिनिवेश-शून्यम्), अ-राग-द्वेषतः (न पुत्रादि-प्रीत्या वा शत्रु-द्वेषेण वा) यद् कृतम् भवति, फलम् प्राप्तुम् इच्छति इति फल-प्रेप्सुः, तद्-विलक्षणेन निष्कामेण कर्त्रा यद् कृतम् कर्म, तद् सात्त्विकम् उच्यते ॥१८.२३॥
राजसम् कर्म आह – यद् तु इति –

18.24

यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः ।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥२४॥

कामेप्सुना	by one who desires the fruit
साहङ्कारेण वा पुनः	or by one who has false ego
यद् बहुलायासम् कर्म तु	but that strenuous work which
क्रियते,	is done.
तद् राजसम् उदाहृतम् ।	that is said to be in *rajo-guṇa*

"But action performed with great effort by one seeking to gratify his desires, and enacted from a sense of false ego, is called action in the mode of passion."

यद्	**that which** ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
तु	**but** ⟨*avyaya*⟩
कामेप्सुना	**by one who desires sense gratification** ⟨3.1⟩ m. *kāma-_īpsu* – who desires to obtain *kāma* (sense gratification)

कर्म **work** ⟨1.1⟩ n. *karman (karma)* – activity
साहङ्कारेण **by one who has false ego** ⟨3.1⟩ m. *sa-_ahaṅkāra* – who has false ego
वा **or** ⟨*avyaya*⟩
पुनः **again** ⟨*avyaya*⟩ (*punar*)
क्रियते **it is done** ⟨*acyuta* pass. 1.1⟩ √*[ḍu]kr[ñ]*...करणे – to do
बहुलायासम् **in which there is much effort** ⟨1.1⟩ n. *bahula-_āyāsa*...बहुलः आयासः यस्मिन्, तद् बहुलायासः
तद् **that** ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
राजसम् **in *rajo-guṇa*** ⟨1.1⟩ n. *rājasa*
उदाहृतम् **declared** ⟨1.1⟩ n. *udāhṛta* (*ud.ā.*√*hṛ[ñ]* – to set up, declare, illustrate; + *.[k]ta*)

Subodhinī: यद् तु कर्म काम-ईप्सुना (फलम् प्राप्तुम् इच्छता) स-अहङ्कारेण वा, 'मद्-समः कः अन्यः श्रोत्रियः अस्ति ? इति एवम् निरूढ-अहङ्कार-युक्तेन च क्रियते, यद् च पुनः बहुल-आयासम् (अतिक्लेश-युक्तम्), तद् कर्म राजसम् उदाहृतम् ॥१८.२४॥
तामसम् कर्म आह – 'अनुबन्धम्' इति –

18.25

अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम् ।
मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥२५॥

अनुबन्धम् क्षयम् हिंसाम् पौरुषम् च	the consequence, loss, harm and capacity
अनपेक्ष्य	[after] not considering
यद् कर्म मोहात् आरभ्यते,	that work which is performed out of delusion,
तद् तामसम् उच्यते ।	that is said to be in *tamo-guṇa*

"That action performed in illusion, in disregard of scriptural injunctions, and without concern for future bondage or for violence or distress caused to others is said to be in the mode of ignorance."

अनुबन्धम् **the consequence** ⟨2.1⟩ m. *anubandha* – connection, result
क्षयम् **destruction** ⟨2.1⟩ m. *kṣaya*
हिंसाम् **harm** ⟨2.1⟩ f. *hiṁsā* – violence
अनपेक्ष्य **[after] not considering** ⟨*avyaya*⟩ *an-apekṣya*
अपेक्ष्य (*apa.*√*īkṣ[a]* – to look away, consider; + *.ya[p]*) – [after] considering
च **and** ⟨*avyaya*⟩
पौरुषम् **capacity** ⟨2.1⟩ n. *pauruṣa* – 'manhood'
मोहात् **out of illusion** ⟨5.1⟩ m. *moha* – illusion
आरभ्यते **it is begun** ⟨*acyuta* pass. 1.1⟩ *ā.*√*rabh[a]* – to begin

कर्म **work** ⟨1.1⟩ n. *karman (karma)* – activity
यद् **that which** ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which
तद् **that** ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
तामसम् **in *tamo-guṇa*** ⟨1.1⟩ n. *tāmasa*
उच्यते **it is said** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak

Subodhinī: 'अनुबद्धयते' इति अनुबन्धः, पश्चात्-भावि शुभ-अशुभम्, क्षयम् (वित्त-व्ययम्), हिंसाम् (पर-पीडाम्) च, पौरुषम् च (स्व-सामर्थ्यम्), अनपेक्ष्य (अ-पर्यालोच्य), केवलम् मोहात् एव यद् कर्म आरभ्यते, तद् तामसम् उच्यते ॥१८.२५॥
कर्तारम् त्रि-विधम् आह – 'मुक्त-सङ्गः' इति त्रिभिः –

18.26

मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः ।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ॥२६॥

मुक्त-सङ्गः अनहंवादी	being free from attachment and egoism
धृत्युत्साह-समन्वितः	endowed with determination and enthusiasm
सिद्ध्यसिद्ध्योः निर्विकारः कर्ता	the doer who is resolute in success and failure
सात्त्विकः उच्यते ।	is said to be in in *sattva-guṇa*

"One who performs his duty without association with the modes of material nature, without false ego, with great determination and enthusiasm, and without wavering in success or failure is said to be a worker in the mode of goodness."

मुक्त-सङ्गः **freed from attachment** ⟨1.1⟩ m. *mukta-saṅga*
अनहंवादी **who is not egoistic** ⟨1.1⟩ m. *an-ahaṁvādin (-vādī)*
धृत्युत्साह-समन्वितः **endowed with determination and enthusiasm** ⟨1.1⟩ m. *dhṛti-_utsāha-samanvita*...धृत्या च उत्साहेन च समन्वितः इति धृत्युत्साह-समन्वितः
utsāha (from *ud.*√*sah[a]* – to tolerate) – resolution, effort, enthusiasm
सिद्ध्यसिद्ध्योः **in success and failure** ⟨7.2⟩ f. *siddhi-_a-siddhi* – success and failure
निर्विकारः **who is without change** ⟨1.1⟩ m. *nirvikāra*
कर्ता **the doer** ⟨1.1⟩ m. *kartṛ (kartā, .tṛ[n])*
सात्त्विकः **in *sattva-guṇa*** ⟨1.1⟩ m. *sāttvika*
उच्यते **he is said** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak

Subodhinī: मुक्त-सङ्गः (त्यक्त-अभिनिवेशः), अनहंवादी (गर्व-उक्ति-रहितः), धृतिः (धैर्यम्), उत्साहः (उद्यमः), ताभ्याम् समन्वितः (संयुक्तः), आरब्धस्य कर्मणः सिद्धौ अ-सिद्धौ च निर्विकारः (हर्ष-विषाद-शून्यः) । एवम्-भूतः कर्ता सात्त्विकः उच्यते ॥१८.२६॥

राजसम् कर्तारम् आह – 'रागी' इति –

18.27

रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः ।
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥२७॥

रागी कर्म-फल-प्रेप्सुः	being attached, desiring the fruit of work
लुब्धः हिंसात्मकः अ-शुचिः	greedy, violent and unclean
हर्ष-शोकान्वितः कर्ता	the doer who is subject to joy and sorrow
राजसः परिकीर्तितः ।	is declared to be in *rajo-guṇa*

"The worker who is attached to work and the fruits of work, desiring to enjoy those fruits, and who is greedy, always envious, impure, and moved by joy and sorrow, is said to be in the mode of passion."

रागी **who is attached** ⟨1.1⟩ m. *rāgin (rāgī)*
कर्म-फल-प्रेप्सुः **who desires to obtain the fruit of work** ⟨1.1⟩ m. *karma-phala-prepsu*
लुब्धः **who is greedy** ⟨1.1⟩ m. *lubdha*
हिंसात्मकः **whose nature is violence** ⟨1.1⟩ m. *hiṁsā-_ātmaka*...हिंसा आत्मा यस्य, सः हिंसात्मकः
अ-शुचिः **who is unclean** ⟨1.1⟩ m. *a-śuci*
हर्ष-शोकान्वितः **who is endowed with elation and dejection** ⟨1.1⟩ m. *harṣa-śoka-anvita*...हर्षेण च शोकेन च अन्वितः यः, सः हर्ष-शोकान्वितः
कर्ता **the doer** ⟨1.1⟩ m. *kartṛ (kartā, .tr[n])*
राजसः **in *rajo-guṇa*** ⟨1.1⟩ m. *rājasa*
परिकीर्तितः **who is declared** ⟨1.1⟩ m. *parikīrtita (pari.√kṛt[a]* – to glorify; *+.[k]ta)* – glorified

Subodhinī: रागी (पुत्रादिषु प्रीतिमान्), कर्म-फल-प्रेप्सुः (कर्म-फल-कामी), लुब्धः (परस्व-अभिलाषी), हिंसात्मकः (मारक-स्वभावः), अ-शुचिः (विहित-शौच-शून्यः), लाभ-अलाभयोः हर्ष-शोकाभ्याम् अन्वितः कर्ता राजसः परिकीर्तितः ॥१८.२७॥

तामसम् कर्तारम् आह – 'अ-युक्तः' इति –

18.28

अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥२८॥

अ-युक्तः प्राकृतः स्तब्धः	being inattentive, vulgar and arrogant
शठः नैष्कृतिकः अ-लसः	deceitful, insulting and lazy
विषादी दीर्घ-सूत्री च कर्ता	the doer who is morose and procrastinating
तामसः उच्यते ।	is said to be in *tamo-guṇa*

"The worker who is always engaged in work against the injunctions of the scripture, who is materialistic, obstinate, cheating and expert in insulting others, and who is lazy, always morose and procrastinating is said to be a worker in the mode of ignorance."

अ-युक्तः **who is inattentive** ⟨1.1⟩ m. *a-yukta* – not connected, not devout, unfit
प्राकृतः **who is vulgar** ⟨1.1⟩ m. *prākṛta* (from *prakṛti* – nature) – natural, ordinary, vulgar
स्तब्धः **who is arrogant** ⟨1.1⟩ m. *stabdha* – arrogant
शठः **who is deceitful** ⟨1.1⟩ m. *śaṭha* – wicked
नैष्कृतिकः **who is insulting** ⟨1.1⟩ m. *naiṣkṛtika* – dishonest, insulting
अ-लसः **who is lazy** ⟨1.1⟩ m. *a-lasa* – inactive
विषादी **who is dejected** ⟨1.1⟩ m. *viṣādin (viṣādī)*
दीर्घ-सूत्री **who is procrastinating** ⟨1.1⟩ m. *dīrgha-sūtrin (-sūtrī)* – who is 'spinning a long yarn', being slow, procrastinating
दीर्घ – long, high, deep; for a long time; a long vowel
च **and** ⟨*avyaya*⟩
कर्ता **the doer** ⟨1.1⟩ m. *kartṛ (kartā, .tr[n])*
तामसः **in *tamo-guṇa*** ⟨1.1⟩ m. *tāmasa*
उच्यते **he is said** ⟨*acyuta* pass. 1.1⟩ √*vac[a]*...परिभाषणे – to speak

Subodhinī: अ-युक्तः (अनवहितः), प्राकृतः (विवेक-शून्यः), स्तब्धः (अ-नम्रः), शठः (शक्ति-गूहन-कारी), नैष्कृतिकः (पर-अवमानी), अ-लसः (अनुद्यम-शीलः), विषादी (शोक-शीलः), यद् अद्य वा श्वः वा कार्यम् तद् मासेन अपि न सम्पादयति यः सः दीर्घ-सूत्री । एवम्-भूतः कर्ता तामसः उच्यते । 'कर्तृ'-त्रैविध्येन (18.26ff.) एव 'ज्ञातुः' अपि त्रैविध्यम् उक्तम् भवति । 'कर्म'-त्रैविध्येन (18.23ff.) च 'ज्ञेयस्य' अपि त्रैविध्यम् उक्तम् वेदितव्यम् । 'बुद्धेः' त्रैविध्येन (18.30ff.) 'करणस्य' अपि उक्तम् भविष्यति ॥१८.२८॥

इदानीम् बुद्धेः धृतेः च अपि त्रैविध्यम् प्रतिजानीते – बुद्धेरिति –

18.29

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु ।
प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय ॥२९॥

हे धनञ्जय !	O Arjuna!
पृथक्त्वेन अ-शेषेण प्रोच्यमानम्	each completely being described
बुद्धेः धृतेः च एव	of intelligence and determination
गुणतः त्रि-विधम् भेदम् शृणु !	hear the division, threefold according to the *guṇas*!

"O winner of wealth, now please listen as I tell you in detail of the different kinds of understanding and determination, according to the three modes of material nature."

बुद्धेः **of intelligence** ⟨6.1⟩ f. *buddhi*

भेदम् **the division** ⟨2.1⟩ m. *bheda* (from √*bhid[ir]*...विदारणे – to split, break) – separation, division

धृतेः **of determination** ⟨6.1⟩ f. *dhṛti* – firmness, patience

च **and** ⟨*avyaya*⟩

एव **certainly** ⟨*avyaya*⟩

गुणतः **according to the *guṇas*** ⟨*avyaya*⟩ (*guṇatas*; *guṇa* + *.tas[i]*)

त्रि-विधम् **threefold** ⟨2.1⟩ m. *tri-vidha*

शृणु **you must hear** ⟨*vidhātā* 2.1⟩ √*śru*...श्रवणे – to hear, obey

प्रोच्यमानम् **being described** ⟨2.1⟩ m. *procyamāna* (*pra.*√*vac[a]* – to declare; + *.[ś]āna*) – [while] declaring

अ-शेषेण **completely** ⟨*avyaya*⟩ from *a-śeṣa* – without remainder

पृथक्त्वेन **individually** ⟨*avyaya*⟩ from *pṛthaktva* – separatedness

धनञ्जय **O Arjuna!** ⟨8.1⟩ m. *dhanam-_jaya* – 'winner of riches'

Subodhinī: स्पष्टार्थः ॥१८.२९॥
तत्र बुद्धेः त्रैविध्यम् आह – 'प्रवृत्तिम्' इति त्रिभिः –

Note: Śrīdhara Svāmī says (18.32) that this *buddhi* can be taken either as the inner organ 'intelligence', or as 'understanding', one of the functions of the inner organ, besides knowledge, determination and happiness (18.36ff.).

18.30

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ।
बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥३०॥

हे पार्थ !	O Arjuna!
या बुद्धिः	that intelligence which
प्रवृत्तिम् च निवृत्तिम् च कार्याकार्ये	religion, irreligion, what is proper and improper
भयाभये बन्धम् मोक्षम् च	fear, fearlessness, bondage and liberation
वेत्ति,	knows,
सा सात्त्विकी ।	that is in *sattva-guṇa*

"O son of Pṛthā, that understanding by which one knows what ought to be done and what ought not to be done, what is to be feared and what is not to be feared, what is binding and what is liberating, is in the mode of goodness."

प्रवृत्तिम् **activity** ⟨2.1⟩ f. *pravṛtti* – activity, tendency

च **and** ⟨*avyaya*⟩

निवृत्तिम् **inactivity** ⟨2.1⟩ f. *nivṛtti*

कार्याकार्ये **what is to be done and and what is not to be done** ⟨2.2⟩ n. *kārya-_a-kārya*...कार्यम् च अ-कार्यम् च इति कार्याकार्ये

भयाभये **fear and fearlessness** ⟨2.2⟩ n. *bhaya-_a-bhaya*...भयम् च अ-भयम् च इति भयाभये

बन्धम् **bondage** ⟨2.1⟩ m. *bandha*

मोक्षम् **liberation** ⟨2.1⟩ m. *mokṣa*

या **that which** ⟨1.1⟩ f. *kṛṣnanāma yad* – (relative) who, which

वेत्ति **it knows** ⟨*acyuta* 1.1⟩ √*vid[a]* 2P...ज्ञाने – to know

बुद्धिः **intelligence** ⟨1.1⟩ f. *buddhi*

सा **that** ⟨1.1⟩ f. *kṛṣnanāma tad* – (first person) he, that

पार्थ **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'

सात्त्विकी **in *sattva-guṇa*** ⟨1.1⟩ f. *sāttvikī* (*.ī[p]*)

Subodhinī: प्रवृत्तिम् धर्मे, निवृत्तिम् अ-धर्मे, यस्मिन् देशे काले च यद् कार्यम् अ-कार्यम् च, भय-अभये (कार्य-अकार्य-निमित्तौ अर्थ-अनार्थौ), कथम् बन्धः, कथम् वा मोक्ष इति या बुद्धिः (अन्तः-करणम्) वेत्ति, सा सात्त्विकी । 'यया पुमान् वेत्ति' इति वक्तव्ये करणे कर्तृत्व-उपचारः, 'काष्ठानि पचन्ति' इतिवत् ॥१८.३०॥
राजसीम् बुद्धिम् आह – 'यया' इति –

18.31

यया धर्ममधर्मं च कार्यं चाकार्यमेव च ।
अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥३१॥

हे पार्थ !	O Arjuna!
यया	that [intelligence] by which
धर्मम् अ-धर्मम् च	religion and irreligion
कार्यम् च अ-कार्यम् एव च	what is proper and improper
अ-यथावत् प्रजानाति,	one incorrectly understands,
सा बुद्धिः राजसी ।	that intelligence is in *rajo-guṇa*

"O son of Pṛthā, that understanding which cannot distinguish between religion and irreligion, between action that should be done and action that should not be done, is in the mode of passion."

यया **that by which** ⟨3.1⟩ f. *kṛṣnanāma yad* – (relative) who, which

धर्मम् **religion** ⟨2.1⟩ m. *dharma* – religious duty

अ-धर्मम् **irreligion** ⟨2.1⟩ m. *a-dharma*

च and ⟨*avyaya*⟩
कार्यम् **duty** ⟨2.1⟩ n. *kārya* – 'to be done'
च **and** ⟨*avyaya*⟩
अ-कार्यम् **non-duty** ⟨2.1⟩ n. *a-kārya* – 'not to be done'
एव **certainly** ⟨*avyaya*⟩
च **and** ⟨*avyaya*⟩
अ-यथावत् **incorrectly** ⟨*avyaya*⟩
प्रजानाति **one understands** ⟨*acyuta* 1.1⟩ *pra.√jñā* – to understand
बुद्धिः **intelligence** ⟨1.1⟩ f. *buddhi*
सा **that** ⟨1.1⟩ f. *kṛṣnanāma tad* – (first person) he, that
पार्थ **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
राजसी **in *rajo-guṇa*** ⟨1.1⟩ f. *rājasī* (*.ī[p]*)

Subodhinī: अ-यथावत् सन्देह-आस्पदत्वेन इति अर्थः । स्पष्टम् अन्यत् ॥१८.३१॥
तामसीम् बुद्धिम् आह – 'अ-धर्मम्' इति –

18.32

अधर्मं धर्ममिति या मन्यते तमसावृता ।
सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥३२॥

हे पार्थ !	O Arjuna!
तमसा आवृता	being covered by ignorance
या बुद्धिः	that intelligence which
अ-धर्मम् धर्मम् इति मन्यते,	holds irreligion for religion,
सर्वार्थान् विपरीतान् च,	and everything (i.e. crime, bondage) for the opposite,
सा तामसी ।	that is in *tamo-guṇa*

"That understanding which considers irreligion to be religion and religion to be irreligion, under the spell of illusion and darkness, and strives always in the wrong direction, O Pārtha, is in the mode of ignorance."

अ-धर्मम् **irreligion** ⟨2.1⟩ m. *a-dharma*
धर्मम् **religion** ⟨2.1⟩ m. *dharma*
इति **thus** ⟨*avyaya*⟩
या **that which** ⟨1.1⟩ f. *kṛṣnanāma yad* – (relative) who, which
मन्यते **it considers** ⟨*acyuta* 1.1⟩ √*man[a]* 4A...बोधने – to know, think
तमसा **by ignorance** ⟨3.1⟩ n. *tamas* (*tamah*) – darkness, ignorance
आवृता **being covered** ⟨1.1⟩ f. *āvṛtā* (*ā.√vṛ[ñ]* 5U – to cover; + *.[k]ta*; + *.ā[p]*) – covered
सर्वार्थान् **all things** ⟨2.3⟩ m. *sarva-_artha*

विपरीतान् **the reverse** ⟨2.3⟩ m. *viparīta* (*.[k]ta*) – opposite
च **and** ⟨*avyaya*⟩
बुद्धिः **intelligence** ⟨1.1⟩ f. *buddhi*
सा **that** ⟨1.1⟩ f. *kṛṣnanāma tad* – (first person) he, that
पार्थ **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
तामसी **in *tamo-guṇa*** ⟨1.1⟩ f. *tāmasī* (*.ī[p]*)

Subodhinī: विपरीत-ग्राहिणी बुद्धिः तामसी इति अर्थः ॥१८.३२॥
इदानीम् धृतेः त्रैविध्यम् आह – 'धृत्या' इति त्रिभिः –

18.33

धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः ।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥३३॥

हे पार्थ !	O Arjuna!
योगेन अ-व्यभिचारिण्या	undeviating through *yoga* practice
यया धृत्या	that determination by which
मनः-प्राणेन्द्रिय-क्रियाः धारयते,	one controls the activities of mind, life air and senses
सा धृतिः सात्त्विकी ।	that determination is in *sattva-guṇa*

"O son of Pṛthā, that determination which is unbreakable, which is sustained with steadfastness by yoga practice, and which thus controls the activities of the mind, life and senses is determination in the mode of goodness."

धृत्या **by determination** ⟨3.1⟩ f. *dhṛti* – firmness, patience
यया **that by which** ⟨3.1⟩ f. *kṛṣṇanāma yad* – (relative) who, which
धारयते **one causes to hold** ⟨*acyuta* caus. 1.1⟩ √*dhṛ[ñ]*...धारणे – to hold, support
मनः-प्राणेन्द्रिय-क्रियाः **the activities of mind, *prāṇa* and senses** ⟨2.3⟩ f. *manaḥ-prāṇa-_indriya-kriyā*
योगेन **by Yoga practice** ⟨3.1⟩ m. *yoga*
अ-व्यभिचारिण्या **with undeviating** ⟨3.1⟩ f. *a-vyabhicārinī* (*.ī[p]*) – not deviating
धृतिः **determination** ⟨1.1⟩ f. *dhṛti* – firmness, patience
सा **that** ⟨1.1⟩ f. *kṛṣṇanāma tad* – (first person) he, that
पार्थ **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
सात्त्विकी **in *sattva-guṇa*** ⟨1.1⟩ f. *sāttvikī* (*.ī[p]*)

Subodhinī: योगेन (चित्त-एकाग्रयेण हेतुना) अ-व्यभिचारिण्या (विषय-अन्तरम् अ-धारयन्त्या) यया धृत्या मनसः प्राणस्य इन्द्रियाणाम् च क्रियाः धारयते (नियच्छति), सा धृतिः सात्त्विकी ॥१८.३३॥

राजसीम् धृतिम् आह – 'यया तु' इति –

18.34

यया तु धर्मकामार्थान्धृत्या धारयतेऽर्जुन ।
प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी ॥३४॥

हे अर्जुन पार्थ !	O Arjuna!
यया धृत्या तु	but that determination by which
फलाकाङ्क्षी प्रसङ्गेन	one who out of attachment desires the fruit
धर्म-कामार्थान् धारयते,	holds fast to *dharma-artha-kāma*,
सा धृतिः राजसी ।	that determination is in *rajo-guṇa*

"But that determination by which one holds fast to fruitive results in religion, economic development and sense gratification is of the nature of passion, O Arjuna."

यया	**that by which** ⟨3.1⟩ f. *kṛṣnanāma yad* – (relative) who, which
तु	**but** ⟨*avyaya*⟩
धर्म-कामार्थान्	***dharma, kāma* and *artha*** ⟨2.3⟩ m. *dharma-kāma-_artha*
धृत्या	**by determination** ⟨3.1⟩ f. *dhṛti* – firmness, patience
धारयते	**he causes to hold** ⟨*ācyuta* caus. 1.1⟩ √*dhṛ[ñ]*...धारणे – to hold, support
अर्जुन	**O Arjuna!** ⟨8.1⟩ m. *arjuna* – white, 'who is pure in actions'
प्रसङ्गेन	**by attachment** ⟨3.1⟩ m. *prasaṅga* – complete attachment
फलाकाङ्क्षी	**one who expects the fruit** ⟨1.1⟩ m. *phala-_ākāṅkṣin (-ākāṅkṣī)*
धृतिः	**determination** ⟨1.1⟩ f. *dhṛti* – firmness, patience
सा	**that** ⟨1.1⟩ f. *kṛṣnanāma tad* – (first person) he, that
पार्थ	**O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
राजसी	**in *rajo-guṇa*** ⟨1.1⟩ f. *rājasī (.ī[p])*

Subodhinī: यया धृत्या धर्म-अर्थ-कामान् प्राधान्येन धारयते (न विमुञ्चति), तद्-प्रसङ्गेन फलाकाङ्क्षी च भवति, सा राजसी धृतिः ॥१८.३४॥
तामसीम् धृतिम् आह – 'यया' इति –

18.35

यया स्वप्नं भयं शोकं विषादं मदमेव च ।
न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसी ॥३५॥

हे पार्थ !	O Arjuna!

दुर्मेधाः यया	that by which a fool
स्वप्नम् भयम् शोकम् विषादम् मदम् एव च	sleep, fear, sorrow, dejection and madness
न विमुञ्चति,	does not give up,
सा धृतिः तामसी ।	that determination is in *tamo-guṇa*

"And that determination which cannot go beyond dreaming, fearfulness, lamentation, moroseness and illusion – such unintelligent determination, O son of Pṛthā, is in the mode of darkness."

यया	**that by which** ⟨3.1⟩ f. *kṛṣnanāma yad* – (relative) who, which
स्वप्नम्	**sleep** ⟨2.1⟩ m. *svapna* – sleep, dream
भयम्	**fear** ⟨2.1⟩ n. *bhaya*
शोकम्	**sorrow** ⟨2.1⟩ m. *śoka*
विषादम्	**dejection** ⟨2.1⟩ m. *viṣāda*
मदम्	**madness** ⟨2.1⟩ m. *mada* – intoxication, pride
एव	**certainly** ⟨*avyaya*⟩
च	**and** ⟨*avyaya*⟩
न	**not** ⟨*avyaya*⟩
विमुञ्चति	**he gives up** ⟨*acyuta* 1.1⟩ vi.√*muc[l]* – to release
दुर्मेधाः	**a fool** ⟨1.1⟩ m. f. *durmedhas (durmedhāḥ)* – who is foolish
धृतिः	**determination** ⟨1.1⟩ f. *dhṛti* – firmness, patience
सा	**that** ⟨1.1⟩ f. *kṛṣnanāma tad* – (first person) he, that
पार्थ	**O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
तामसी	**in *tamo-guṇa*** ⟨1.1⟩ f. *tāmasī (.ī[p])*

Subodhinī: दुष्टा (अ-विवेक-बहुला) मेधा यस्य, सः दुर्मेधाः पुरुषः यया धृत्या स्वप्नादीन् न विमुञ्चति, पुनः पुनः आवर्तयति, स्वप्नः अत्र निद्रा, सा धृतिः तामसी ॥१८.३५॥
सुखस्य त्रैविध्यम् प्रतिजानीते अर्धेन – 'सुखम्' इति –

18.36...37

सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ ।
अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति ॥३६॥

हे भरतर्षभ !	O Arjuna!
इदानीम् तु	but now
त्रि-विधम् सुखम् मे (मम) शृणु !	hear from Me of the threefold happiness!
यत्र अभ्यासात् रमते	that in which one enjoys through practice

दुःखान्तम् च निगच्छति . . .	and reaches the end of all distress . . .

"O best of the Bhāratas, now please hear from Me about the three kinds of happiness by which the conditioned soul enjoys, and by which he sometimes comes to the end of all distress."

सुखम् **happiness** ⟨2.1⟩ n. *sukha* – easiness, happiness

तु **but** ⟨*avyaya*⟩

इदानीम् **now** ⟨*avyaya*⟩

त्रि-विधम् **threefold** ⟨2.1⟩ n. *tri-vidha*

शृणु **you must hear** ⟨*vidhātā* 2.1⟩ √*śru*...श्रवणे – to hear, obey

मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I

भरतर्षभ **O Arjuna!** ⟨8.1⟩ m. *bharata-_ṛṣabha* – 'best of the descendants of Bharata'

अभ्यासात् **from practice** ⟨5.1⟩ m. *abhyāsa* (from *abhi.*√*as[u]* – to add, repeat) – discipline; repeated reading, study; practice; any repeated exercise; same as *abhyāsa-yoga* or *sādhana-bhakti* – repeated withdrawel of the mind from sense objects and concentration on the Lord

रमते **he rejoices** ⟨*acyuta* 1.1⟩ √*ram[u]*...क्रीडायाम् – to play, rejoice

यत्र **that where** ⟨*avyaya*⟩ – where, in which case, when

दुःखान्तम् **the end of misery** ⟨2.1⟩ m. *duḥkha-_anta*

च **and** ⟨*avyaya*⟩

निगच्छति **he attains** ⟨*acyuta* 1.1⟩ *ni.*√*gam[l]* – to go down, attain

Subodhinī: स्पष्ट-अर्थः । तत्र सात्त्विकम् सुखम् आह – 'अभ्यासात्' इति सार्धेन । यत्र (यस्मिन् सुखे) अभ्यासात् (अतिपरिचयात्) रमते, नतु विषय-सुखे इव सहसा रतिम् प्राप्नोति । यस्मिन् रममाणः च दुःखस्य अन्तम् (अवसानम्) नितराम् गच्छति (प्राप्नोति) ॥१८.३६॥

कीदृशम् तद् ? – 'यद् तद्' इति

18.37

यत्तदग्रे विषमिव परिणामेऽमृतोपमम् ।
तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥३७॥

. . . आत्म-बुद्धि-प्रसाद-जम्	. . . born from the satisfaction of self-realization
यद् तद् अग्रे विषम् इव	that which is first like poison
परिणामे अमृतोपमम्,	[but] at the end like nectar,
तद् सुखम् सात्त्विकम् प्रोक्तम् ।	that happiness is declared to be in *sattva-guṇa*

"That which in the beginning may be just like poison but at the end is just like nectar and which awakens one to self-realization is said to be happiness in the mode of goodness."

यद् तद् **that which** ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which; *tad* – (first person) he, that

अग्रे **in the beginning** ⟨7.1⟩ n. *kṛṣṇanāma agra* – first, beginning

विषम् **poison** ⟨1.1⟩ n. *viṣa*

इव **like** ⟨*avyaya*⟩

परिणामे **at the end** ⟨7.1⟩ m. *pariṇāma* – result, end

अमृतोपमम् **which is like nectar** ⟨1.1⟩ n. *amṛta-_upama*...अमृतम् उपमा यस्य, तद् अमृतोपमम् – whose resemblance is nectar

तद् **that** ⟨1.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that

सुखम् **happiness** ⟨1.1⟩ n. *kṛṣṇanāma sukha* – easiness, happiness

सात्त्विकम् **in *sattva-guṇa*** ⟨1.1⟩ n. *sāttvika*

प्रोक्तम् **it is declared** ⟨1.1⟩ n. *prokta* (*.[k]ta*) – declared

आत्म-बुद्धि-प्रसाद-जम् **which results from the satisfaction of self-realization** ⟨1.1⟩ n. *ātma-buddhi-prasāda-ja*...यद् आत्म-बुद्धेः प्रसादात् जायते, तद् आत्म-बुद्धि-प्रसाद-जम्

Subodhinī: यद् तद् (किम् अपि) अग्रे (प्रथमम्) विषम् इव, मनः-संयम-अधीनत्वात् दुःख-अवहम् इव भवति । परिणामे तु अमृत-सदृशम्, आत्म-विषया बुद्धिः आत्मबुद्धिः, तस्याः प्रसादेन (रजः-तमः-मल-त्यागेन स्वच्छतया) अवस्थानम् ततः जातम् यद् सुखम्, तद् सात्त्विकम् प्रोक्तम् योगिभिः ॥१८.३७॥

राजसम् सुखम् आह – 'विषय-इन्द्रिय' इति –

18.38

विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् ।
परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥३८॥

विषयेन्द्रिय-संयोगात्	derived from the contact of the senses with objects
यद तद् अग्रे अमृतोपमम्	that which is first like nectar
परिणामे विषम् इव,	[but] at the end like poison,
तद् सुखम् राजसम् स्मृतम् ।	that happiness is known to be in *rajo-guṇa*

"That happiness which is derived from contact of the senses with their objects and which appears like nectar at first but poison at the end is said to be of the nature of passion."

विषयेन्द्रिय-संयोगात् **from the contact of the senses with objects** ⟨5.1⟩ m. *viṣaya-_indriya-saṁyoga*...विषयैः इन्द्रियाणाम् संयोगः इति विषयेन्द्रिय-संयोगः – contact of the senses with sense objects

यद् तद् **that which** ⟨1.1⟩ n. *kṛṣṇanāma yad* – (relative) who, which; *tad* – (first person) he, that

अग्रे **in the beginning** ⟨7.1⟩ n. *agra* – first, beginning

अमृतोपमम् **which is like nectar** ⟨1.1⟩ n. *amṛta-_upama*...अ-मृतम् उपमा यस्य, तद् अमृतोपमम् – whose resemblance is nectar
परिणामे **at the end** ⟨7.1⟩ m. *pariṇāma* – result, end
विषम् **poison** ⟨1.1⟩ n. *viṣa*
इव **like** ⟨*avyaya*⟩
तद् **that** ⟨1.1⟩ n. *kṛṣnanāma tad* – (first person) he, that
सुखम् **happiness** ⟨1.1⟩ n. *kṛṣnanāma sukha* – easiness, happiness
राजसम् **in *sattva-guṇa*** ⟨1.1⟩ n. *rājasa*
स्मृतम् **it is known** ⟨1.1⟩ n. *smṛta* (√*smṛ*...चिन्तायाम् – to think, remember; + .[*k*]*ta*) – remembered

Subodhinī: विषयाणाम् इन्द्रियाणाम् च संयोगात् यद् तद् प्रसिद्धम् स्त्री-सङ्गादि-सुखम्, अमृतम् उपमा यस्य तादृशम् भवति अग्रे (प्रथमम्), परिणामे तु विष-तुल्यम्, इह अमुत्र च दुःख-हेतुत्वात्, तद् सुखम् राजसम् स्मृतम् ॥१८.३८॥
तामसम् सुखम् आह – 'यद्' इति –

18.39

यदग्रे चानुबन्धे च सुखं मोहनमात्मनः ।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥३९॥

निद्रालस्य-प्रमादोत्थम्	having arisen from sleep, laziness and madness
यद् सुखम् अग्रे च अनुबन्धे च	that happiness which in the beginning and the end
आत्मनः मोहनम्,	is the delusion of the self,
तद् तामसम् उदाहृतम् ।	that is declared to be in *tamo-guṇa*

"And that happiness which is blind to self-realization, which is delusion from beginning to end and which arises from sleep, laziness and illusion is said to be of the nature of ignorance."

यद् **that which** ⟨1.1⟩ n. *kṛṣnanāma yad* – (relative) who, which
अग्रे **in the beginning** ⟨7.1⟩ n. *agra* – first, beginning
च **and** ⟨*avyaya*⟩
अनुबन्धे **in the consequence** ⟨7.1⟩ m. *anubandha* – connection, result
च **and** ⟨*avyaya*⟩
सुखम् **happiness** ⟨1.1⟩ n. *sukha* – easiness, happiness
मोहनम् **deluding** ⟨1.1⟩ n. *mohana* – bewildering
आत्मनः **of the self** ⟨6.1⟩ m. *ātman* (*ātmā*) – the self, soul
निद्रालस्य-प्रमादोत्थम् **having arisen from sleep, laziness and madness** ⟨1.1⟩ n. *nidrā-_ālasya-pramāda-_uttha*
तद् **that** ⟨1.1⟩ n. *kṛṣnanāma tad* – (first person) he, that

तामसम् **in *tamo-guṇa*** ⟨1.1⟩ n. *tāmasa*
उदाहृतम् **declared** ⟨1.1⟩ n. *udāhṛta* (*ud.ā.*√*hṛ[ñ]*) – to set up, declare, illustrate; + .[*k*]*ta*

Subodhinī: अग्रे (प्रथम-क्षणे) अनुबन्धे च (पश्चात् अपि) यद् सुखम् आत्मनः मोह-करम्, तद् एव आह – निद्रा च आलस्यम् च प्रमादः च (कर्तव्यार्थ-अवधान-राहित्येन मनोराज्यम्), एतेभ्यः उत्तिष्ठति यद् सुखम् तद् तामसम् उदाहृतम् ॥१८.३९॥
अनुक्तम् अपि सङ्गृह्णन्, प्रकरण-अर्थम् उपसंहरति – 'न तद् अस्ति' इति –

18.40

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥४०॥

यद् सत्त्वम्	that being which
एभिः प्रकृति-जैः त्रिभिः गुणैः	from these three *guṇas* born of nature
मुक्तम् स्यात्,	may be free,
पृथिव्याम् वा दिवि देवेषु वा पुनः	either on earth, or in heaven among the *devas*
तद् न अस्ति ।	that does not exist

"There is no being existing, either here or among the demigods in the higher planetary systems, which is freed from these three modes born of material nature."

न **not** ⟨*avyaya*⟩
तद् **that** ⟨1.1⟩ n. *kṛṣnanāma tad* – (first person) he, that
अस्ति **it exists** ⟨*acyuta* 1.1⟩ √*as[a]*...भुवि – to be, exist
पृथिव्याम् **on earth** ⟨7.1⟩ f. *pṛthivī* – the earth
वा **or** ⟨*avyaya*⟩
दिवि **in heaven** ⟨7.1⟩ f. *div* (*dyauḥ*) – the sky or heaven
देवेषु **among the *devas*** ⟨7.3⟩ m. *deva* – divine being
वा **or** ⟨*avyaya*⟩
पुनः **again** ⟨*avyaya*⟩ (*punar*)
सत्त्वम् **being** ⟨1.1⟩ n. *sattva* – existence, goodness
प्रकृति-जैः **by those born from nature** ⟨3.3⟩ m. *prakṛti-ja* – born from nature
मुक्तम् **freed** ⟨1.1⟩ n. *mukta* (.[*k*]*ta*) – liberated
यद् **that which** ⟨1.1⟩ n. *kṛṣnanāma yad* – (relative) who, which
एभिः **by these** ⟨3.3⟩ m. *kṛṣnanāma idam* – (first person) he, this
स्यात् **it should be** ⟨*vidhi* 1.1⟩ √*as[a]*...भुवि – to be, exist
त्रिभिः **by three** ⟨3.3⟩ m. *tri* – three
गुणैः **by the *guṇas*** ⟨3.3⟩ m. *guṇa* – quality

Subodhinī: एभिः प्रकृति-सम्भवैः सत्त्वादिभिः त्रिभिः गुणैः मुक्तम् (हीनम्) सत्त्वम् (प्राणि-जातम् अन्यत् वा) यद् स्यात्, तद् पृथिव्याम् (मनुष्य-लोकादिषु) दिवि देवेषु च, क्वापि न अस्ति इति अर्थः ॥१८.४०॥

ननु च यदि एवम् सर्वम् अपि, क्रिया-कारक-फलादिकम् प्राणि-जातम् च, त्रि-गुणात्मकम् एव, कथम् तर्हि अस्य मोक्षः? इति अपेक्षायाम्, स्व-स्व-अधिकार-विहितैः कर्मभिः परमेश्वर-आराधनात् तद्-प्रसाद-लब्ध-ज्ञानेन इति एवम् सर्व-गीतार्थ-सारम् सङ्गृह्य प्रदर्शयितुम्, प्रकरण-अन्तरम् आरभते – 'ब्राह्मण' इत्यादि यावत् अध्याय-समाप्तिम् –

18.41

ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप ।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥४१॥

हे परन्तप !	O Arjuna!
ब्राह्मण-क्षत्रिय-विशाम् शूद्राणाम् च	of the *brāhmaṇas, kṣatriyas, vaiśyas* and *śūdras*
कर्माणि	the duties
स्वभाव-प्रभवैः गुणैः	by the qualities born of their own natures
प्रविभक्तानि ।	are divided

"Brāhmaṇas, kṣatriyas, vaiśyas and śūdras are distinguished by the qualities born of their own natures in accordance with the material modes, O chastiser of the enemy."

ब्राह्मण-क्षत्रिय-विशाम् **of the *brāhmaṇas, kṣatriyas* and *vaiśyas*** ⟨6.3⟩ m. *brāhmaṇa-kṣatriya-viś (-viṭ) – brāhmaṇas, kṣatriyas* and *vaiśyas*
शूद्राणाम् **of the *śūdras*** ⟨6.3⟩ m. *śūdra* – worker
च **and** ⟨*avyaya*⟩
परन्तप **O Arjuna!** ⟨8.1⟩ m. *param-_tapa* – 'who scorches the enemies'
कर्माणि **activities** ⟨1.3⟩ n. *karman (karma)* – activity
प्रविभक्तानि **they are divided** ⟨1.3⟩ n. *pravibhakta (pra.vi.√bhaj[a]* 10P – to divide; + *.[k]ta)* – divided
स्वभाव-प्रभवैः **by those born from one's nature** ⟨3.3⟩ m. *sva-bhāva-prabhava*...स्व-भावात् प्रभवः इति स्वभाव-प्रभवः
गुणैः **by the qualities** ⟨3.3⟩ m. *guṇa* – quality

Subodhinī: हे परन्तप (शत्रु-तापन)! ब्राह्मणानाम् क्षत्रियाणाम् विशाम् च शूद्राणाम् च कर्माणि प्रविभक्तानि (प्रकर्षेण विभागतः विहितानि)। शूद्राणाम् समासात् पृथक्-करणम् द्विजत्व-अभावेन वैलक्षण्यात्। विभाग-उपलक्षणम् आह – स्व-भावः (सात्त्विकादिः) प्रभवति (प्रादुर्भवति) येभ्यः, तैः गुणैः उपलक्षण-भूतैः। यद्वा, स्व-भावः पूर्व-जन्म-संस्कारः, तस्मात् प्रादुर्भूतैः इति अर्थः। तत्र सत्त्व-

प्रधानाः ब्राह्मणाः, सत्त्व-उपसर्जन-रजः-प्रधानाः क्षत्रियाः, तमः-उपसर्जन-रजः-प्रधानाः वैश्याः, रजः-उपसर्जन-तमः-प्रधानाः शूद्राः ॥१८.४१॥

तत्र ब्राह्मणस्य स्वाभाविकानि कर्माणि आह – 'शमः' इति –

18.42

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥४२॥

शमः दमः तपः शौचम्	peacefulness, sense-control, austerity, cleanliness
क्षान्तिः आर्जवम् एव	tolerance, simplicity
ज्ञानम् विज्ञानम् आस्तिक्यम् च	knowledge, realization and religiousness
स्व-भाव-जम् ब्रह्म-कर्म ।	is the natural behavior of a *brāhmaṇa*

"Peacefulness, self-control, austerity, purity, tolerance, honesty, knowledge, wisdom and religiousness – these are the natural qualities by which the brāhmaṇas work."

शमः **mind-control** ⟨1.1⟩ m. *śama* – calmness
दमः **sense-control** ⟨1.1⟩ m. *dama*
तपः **austerity** ⟨1.1⟩ n. *tapas (tapaḥ)* – austerity, penance
शौचम् **cleanliness** ⟨1.1⟩ n. *śauca*
क्षान्तिः **tolerance** ⟨1.1⟩ f. *kṣānti*
आर्जवम् **simplicity** ⟨1.1⟩ n. *ārjava* – straightforwardness, honesty, sincerity
एव **certainly** ⟨*avyaya*⟩
च **and** ⟨*avyaya*⟩
ज्ञानम् **knowledge** ⟨1.1⟩ n. *jñāna*
विज्ञानम् **realization** ⟨1.1⟩ n. *vijñāna*
आस्तिक्यम् **religiousness** ⟨1.1⟩ n. *āstikya* (from *asti* – there is) – the conviction that 'there is God', belief in God, faithfulness, religiosity, piety
(also from *asti*:) *nāstika* (from *na_asti*) – atheistical, infidel, disbelief; an atheist
ब्रह्म-कर्म **the work of a *brāhmaṇa*** ⟨1.1⟩ n. *brahma-karman (-karma)*
स्व-भाव-जम् **natural** ⟨1.1⟩ n. *sva-bhāva-ja* – born from one's nature

Subodhinī: शमः चित्त-उपरमः। दमः बाह्य-इन्द्रिय-उपरमः। तपः पूर्व-उक्तम् शारीरादि। शौचम् बाह्य-अभ्यन्तरम्। क्षान्तिः क्षमा। आर्जवम् अ-वक्रता। ज्ञानम् शास्त्रीयम्। विज्ञानम् अनुभवः। आस्तिक्यम् 'अस्ति पर-लोकः' इति निश्चयः। एतद् शमादि ब्राह्मणस्य स्व-भावात् जातम् कर्म ॥१८.४२॥

क्षत्रियस्य स्वाभाविकानि कर्माणि आह – 'शौर्यम्' इति –

18.43

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥४३॥

शौर्यम् तेजः धृतिः दाक्ष्यम्	heroism, vigor, determination, expertness
युद्धे अ-पलायनम् च अपि	and also courage in battle
दानम् ईश्वर-भावः च	generosity and leadership
स्व-भाव-जम् क्षात्रम् कर्म ।	is the natural behavior of a *kṣatriya*

"Heroism, power, determination, resourcefulness, courage in battle, generosity and leadership are the natural qualities of work for the kṣatriyas."

शौर्यम् **heroism** ⟨1.1⟩ n. *śaurya* (from *śūra* – strong, heroic) – heroism, valor, prowess, might
तेजः **vigor** ⟨1.1⟩ n. *tejas* (*tejaḥ*; from √*tij[a]*...निशाने क्षमायां च – to sharpen; tolerate) – sharpness; radiance, heat; brilliance, splendor; prowess, boldness; semen
धृतिः **determination** ⟨1.1⟩ f. *dhṛti* – firmness, patience
दाक्ष्यम् **expertness** ⟨1.1⟩ n. *dākṣya* – expertness, cleverness
युद्धे **in battle** ⟨7.1⟩ n. *yuddha* = battle
च **and** ⟨*avyaya*⟩
अपि **also** ⟨*avyaya*⟩
अ-पलायनम् **no cowerdice** ⟨1.1⟩ n. *a-palāyana* – not fleeing
दानम् **generosity** ⟨1.1⟩ n. *dāna* – gift
ईश्वर-भावः **leadership** ⟨1.1⟩ m. *īśvara-bhāva*...ईश्वरस्य भावः इति ईश्वर-भावः – the mood of a ruler
क्षात्रम् **of a *kṣatriya*** ⟨1.1⟩ n. *kṣātra*
कर्म **work** ⟨1.1⟩ n. *karman* (*karma*) – activity
स्व-भाव-जम् **born from one's nature** ⟨1.1⟩ n. *sva-bhāva-ja*

Subodhinī: शौर्यम् पराक्रमः । तेजः प्रागल्भ्यम् । धृतिः धैर्यम् । दाक्ष्यम् कौशलम् । युद्धे च अपि अ-पलायनम् अ-पराङ्मुखता । दानम् औदार्यम् । ईश्वर-भावः नियमन-शक्तिः । एतद् क्षत्रियस्य स्व-भाव-जम् कर्म ॥१८.४३॥
वैश्य-शूद्रयोः कर्म आह – 'कृषि' इति –

18.44

कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम् ।
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥४४॥

कृषि-गोरक्ष्य-वाणिज्यम्	agriculture, cow protection and trade
स्व-भाव-जम् वैश्य-कर्म,	is the natural work of a *vaiśya*,
परिचर्यात्मकम्	service
शूद्रस्य अपि स्व-भाव-जम् कर्म ।	is the natural work of a *śūdra*

"Farming, cow protection and business are the natural work for the vaiśyas, and for the śūdras there is labor and service to others."

कृषि-गोरक्ष्य-वाणिज्यम् **agriculture, cow-protection and trade** ⟨1.1⟩ n. *kṛṣi-go-rakṣya-vāṇijya*
कृषि (from *kṛṣ[a]*...विलेखने आकर्षणे च – to draw, plough; attract) – ploughing, cultivating land; (derived:) *kṛṣaka* – a farmer
वैश्य-कर्म **the work of a *vaiśya*** ⟨1.1⟩ n. *vaiśya-karman* (*-karma*)
स्व-भाव-जम् **born from one's nature** ⟨1.1⟩ n. *sva-bhāva-ja*
परिचर्यात्मकम् **service** ⟨1.1⟩ n. *paricarya-_ātmaka* – 'of the nature of service'
परिचर्य – 'going around', attending on, serving
कर्म **work** ⟨1.1⟩ n. *karman* (*karma*) – activity
शूद्रस्य **of a *śūdra*** ⟨6.1⟩ m. *śūdra*
अपि **also** ⟨*avyaya*⟩
स्व-भाव-जम् **born from one's nature** ⟨1.1⟩ n. *sva-bhāva-ja*

Subodhinī: कृषिः कर्षणम् । गाः रक्षति इति गो-रक्षः, तस्य भावः गौरक्ष्यम् (पाशुपाल्यम्) इति अर्थः । वाणिज्यम् क्रय-विक्रयादि । एतद् वैश्यस्य स्व-भाव-जम् कर्म । त्रैवर्णिक-परिचर्यात्मकम् शूद्रस्य अपि स्व-भाव-जम् कर्म ॥१८.४४॥
एवम्-भूतस्य ब्राह्मणादि-कर्मणः ज्ञान-हेतुत्वम् आह – 'स्वे स्वे' इति –

18.45

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।
स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु ॥४५॥

स्वे स्वे कर्मणि अभिरतः	devoted to his own particular work
नरः संसिद्धिम् लभते,	a man attains perfection,
स्व-कर्म-निरतः	being engaged in his duty
यथा सिद्धिम् विन्दति	how he attains perfection
तद् शृणु !	hear that!

"By following his qualities of work, every man can become perfect. Now please hear from Me how this can be done."

स्वे स्वे **in one's particular** ⟨7.1⟩ n. *kṛṣṇanāma sva* – own

कर्मणि	**in work** ⟨7.1⟩ n. *karman (karma)* – activity
अभिरतः	**being devoted** ⟨1.1⟩ m. *abhirata (abhi.√ram[u]* – to engage; + *.[k]ta)* – engaged
संसिद्धिम्	**perfection** ⟨2.1⟩ f. *saṁsiddhi*
लभते	**he obtains** ⟨*acyuta* 1.1⟩ √*[ḍu]labh[aṣ]*...प्राप्तौ – to obtain
नरः	**a man** ⟨1.1⟩ m. *nara*
स्व-कर्म-निरतः	**being engaged in one's work** ⟨1.1⟩ m. *sva-karma-nirata*
सिद्धिम्	**perfection** ⟨2.1⟩ f. *siddhi*
यथा	**as** ⟨*avyaya*⟩
विन्दति	**he obtains** ⟨*acyuta* 1.1⟩ √*vid[l̥]*...लाभे – to obtain
तद्	**that** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
शृणु	**you must hear** ⟨*vidhātā* 2.1⟩ √*śru*...श्रवणे – to hear, obey

Subodhinī: स्व-स्व-अधिकार-विहिते कर्मणि अभिरतः (परिनिष्ठितः) नरः संसिद्धिम् (ज्ञान-योग्यताम्) लभते । कर्मणां ज्ञान-प्राप्ति-प्रकारम् आह – 'स्व-कर्म' इति सार्धेन । स्व-कर्म-परिनिष्ठितः यथा (येन प्रकारेण) तत्त्व-ज्ञानम् लभते, तम् प्रकारम् शृणु ॥१८.४५॥

तम् एव आह – 'यतः' इति –

18.46

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥४६॥

यतः भूतानाम् प्रवृत्तिः,	from whom is the manifestation of all beings,
येन सर्वम् इदम् ततम्,	by whom all this is pervaded,
तम् स्व-कर्मणा अभ्यर्च्य	[after] worshiping Him through his own duty
मानवः सिद्धिम् विन्दति ।	a man attains perfection

"By worship of the Lord, who is the source of all beings and who is all-pervading, a man can attain perfection through performing his own work."

यतः	**he from whom** ⟨*avyaya*⟩ (*yatas*; from *yad* + *.tas[i]*)
प्रवृत्तिः	**manifestation** ⟨1.1⟩ f. *pravṛtti* – activity, tendency; manifestation
भूतानाम्	**of beings** ⟨6.3⟩ m. *bhūta* (√*bhū*...सत्तायाम् – to be, exist, become; + *.[k]ta*) – past; an element, being, creature
येन	**he by whom** ⟨3.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
सर्वम्	**all** ⟨1.1⟩ n. *kṛṣṇanāma sarva*
इदम्	**this** ⟨1.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this
ततम्	**pervaded** ⟨1.1⟩ n. *tata* (√*tan[u]*...विस्तारे – to spread, pervade; + *.[k]ta*)
स्व-कर्मणा	**with one's work** ⟨3.1⟩ n. *sva-karman (-karma)* – own occupation

तम्	**him** ⟨2.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
अभ्यर्च्य	**[after] worshiping** ⟨*avyaya*⟩ *abhi.√arc[a]* – to worship; + *.ya[p]*
सिद्धिम्	**perfection** ⟨2.1⟩ f. *siddhi*
विन्दति	**he obtains** ⟨*acyuta* 1.1⟩ √*vid[l̥]*...लाभे – to obtain
मानवः	**a man** ⟨1.1⟩ m. *mānava* – a human

Subodhinī: यतः अन्तर्यामिणः परमेश्वरात् भूतानाम् (प्राणिनाम्) प्रवृत्तिः (चेष्टा) भवति । येन च कारणात्मना सर्वम् इदम् विश्वम् ततम् (व्याप्तम्), तम् ईश्वरम् स्व-कर्मणा अभ्यर्च्य (पूजयित्वा), सिद्धिम् लभते मनुष्यः ॥१८.४६॥

'स्व-कर्मणा' (18.46) इति विशेषणस्य फलम् आह – 'श्रेयान्' इति –

18.47

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥४७॥

स्वनुष्ठितात् पर-धर्मात्	than the well-performed duty of another
विगुणः स्व-धर्मः श्रेयान्,	one's own duty, even faulty, is better,
स्व-भाव-नियतम् कर्म कुर्वन्	[while] doing work ordained by one's nature
किल्बिषम् न आप्नोति ।	one does not incur sin

"It is better to engage in one's own occupation, even though one may perform it imperfectly, than to accept another's occupation and perform it perfectly. Duties prescribed according to one's nature are never affected by sinful reactions."

श्रेयान्	**better** ⟨1.1⟩ m. *śreyas (śreyaḥ)* – better, benefit
स्व-धर्मः	**own duty** ⟨1.1⟩ m. *sva-dharma*
विगुणः	**faulty** ⟨1.1⟩ m. *viguṇa* – 'without qualities'
पर-धर्मात्	**than the duty of another** ⟨5.1⟩ m. *para-dharma* – the duty of another
स्वनुष्ठितात्	**than the well-performed** ⟨5.1⟩ m. *svanuṣṭhita (su.anu.√sthā* – to follow well; + *.[k]ta)* – well-performed
स्व-भाव-नियतम्	**controlled by one's nature** ⟨2.1⟩ n. *sva-bhāva-niyata*
कर्म	**activity** ⟨2.1⟩ n. *karman (karma)*
कुर्वन्	**[while] doing** ⟨1.1⟩ m. *kurvat* (√*[ḍu]kr[ñ]*...करणे – to do; + *.[ś]at[r]*)
न	**not** ⟨*avyaya*⟩
आप्नोति	**he obtains** ⟨*acyuta* 1.1⟩ √*āp[l̥]*...व्याप्तौ – to reach, obtain
किल्बिषम्	**sin** ⟨2.1⟩ n. *kilbiṣa* – fault

Subodhinī: विगुणः अपि स्व-धर्मः सम्यक् अनुष्ठितात् अपि पर-धर्मात् श्रेयान् (श्रेष्ठः) । नच बन्धु-वधादि-युक्तात् युद्धादेः स्व-धर्मात् भिक्षा-अटनादि-पर-धर्मः श्रेष्ठः इति

मन्तव्यम् । यतः स्व-भावेन पूर्व-उक्तेन नियमेन उक्तम् कर्म कुर्वन्, किल्बिषम् न आप्नोति ॥१८.४७॥

यदि पुनः साङ्ख्य-दृष्ट्या स्व-धर्मे हिंसा-लक्षणम् दोषम् मत्वा, पर-धर्मम् श्रेष्ठम् मन्यसे, तर्हि स-दोषत्वम् पर-धर्मे अपि तुल्यम् इति आशयेन आह – 'सह-जम्' इति –

18.48

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् ।
सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ॥४८॥

हे कौन्तेय !	O Arjuna!
स-दोषम् अपि सह-जम् कर्म	the natural duty, even with fault
न त्यजेत्,	one should not give up,
सर्वारम्भाः हि दोषेण आवृताः	all endeavors are covered by some fault
धूमेन अग्निः इव ।	as fire [is covered] by smoke

"Every endeavor is covered by some fault, just as fire is covered by smoke. Therefore one should not give up the work born of his nature, O son of Kuntī, even if such work is full of fault."

सह-जम् **natural** ⟨2.1⟩ n. *saha-ja* = 'born together', inborn, concomitant
कर्म **duty** ⟨2.1⟩ n. *karman* (*karma*) – activity
कौन्तेय **O Arjuna!** ⟨8.1⟩ m. *kaunteya* – 'son of Kuntī'
स-दोषम् **faulty** ⟨2.1⟩ n. *sa-doṣa* – with fault
अपि **also** ⟨*avyaya*⟩
न **not** ⟨*avyaya*⟩
त्यजेत् **one should abandon** ⟨*vidhi* 1.1⟩ √*tyaj[a]*...हानौ – to abandon
सर्वारम्भाः **all undertakings** ⟨1.3⟩ m. *sarva-_ārambha*
हि **indeed** ⟨*avyaya*⟩
दोषेण **by a fault** ⟨3.1⟩ m. *doṣa* – fault
धूमेन **by smoke** ⟨3.1⟩ m. *dhūma* – smoke
अग्निः **fire** ⟨1.1⟩ m. *agni*
इव **like** ⟨*avyaya*⟩
आवृताः **are covered** ⟨1.3⟩ m. *āvṛta* (*ā.*√*vṛ[ñ]* 5U – to cover; + *.[k]ta*) – covered

Subodhinī: सह-जम् (स्व-भाव-विहितम्) कर्म स-दोषम् अपि न त्यजेत् । हि (यस्मात्) सर्वे अपि आरम्भाः (दृष्ट-अदृष्टार्थानि सर्वाणि अपि कर्माणि) दोषेण केनचिद् आवृताः (व्याप्ताः) एव । यथा सह-जेन धूमेन अग्निः आवृतः तद्वत् । अतः यथा अग्नेः, धूम-रूपम् दोषम् अपाकृत्य, प्रतापः एव तमः-शीतादि-निवृत्तये

सेव्यते, तथा कर्मणः अपि दोष-अंशम् विहाय, गुण-अंशः एव सत्त्व-शुद्धये सेव्यते इति अर्थः ॥१८.४८॥

ननु कथम् कर्मणि क्रियमाणे दोष-अंश-प्रहाणेन गुण-अंशः एव सम्पत्स्यते ? इति अपेक्षायाम् आह – 'अ-सक्त' इति –

18.49

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ।
नैष्कर्म्यसिद्धिं परमां सन्न्यासेनाधिगच्छति ॥४९॥

सर्वत्र अ-सक्त-बुद्धिः	being unattached towards all [matter]
जितात्मा विगत-स्पृहः,	self-controlled and without hankering,
परमाम् नैष्कर्म्य-सिद्धिम्	the supreme perfection of freedom from reaction
सन्न्यासेन अधिगच्छति ।	by renunciation he attains

"One who is self-controlled and unattached and who disregards all material enjoyments can obtain, by practice of renunciation, the highest perfect stage of freedom from reaction."

अ-सक्त-बुद्धिः **who is unattached** ⟨1.1⟩ m. *a-sakta-buddhi*...अ-सक्ता बुद्धिः यस्य, सः अ-सक्त-बुद्धिः – whose intelligence is unattached
सर्वत्र **everywhere** ⟨*avyaya*⟩
जितात्मा **who is self-controlled** ⟨1.1⟩ m. *jita-_ātman* (*-ātmā*)...जितः आत्मा यस्य, सः जितात्मा – whose self is conquered
विगत-स्पृहः **who is free from hankering** ⟨1.1⟩ m. *vigata-spṛha*...विगता स्पृहा यस्मात्, सः विगत-स्पृहः – from whom hankering has gone
नैष्कर्म्य-सिद्धिम् **the perfection of freedom from reaction** ⟨2.1⟩ f. *naiṣkarmya-siddhi*
नैष्कर्म्य – the state of *niṣkarma* (freedom from action and reaction)
परमाम् **the supreme** ⟨2.1⟩ f. *paramā* (*.ā[p]*) – highest
सन्न्यासेन **by renunciation** ⟨3.1⟩ m. *sannyāsa* – renunciation
अधिगच्छति **he attains** ⟨*acyuta* 1.1⟩ *adhi.*√*gam[!]* – to go over, attain

Subodhinī: अ-सक्ता (सङ्ग-शून्या) बुद्धिः यस्य, जितात्मा (निरहङ्कारः), विगत-स्पृहः विगता स्पृहा (फल-विषय-इच्छा) यस्मात्, सः एवम्भूतेन, 'सः त्यागः सात्त्विकः मतः' (18.9) इति एवम् पूर्व-उक्तेन कर्म-आसक्ति-तद्-फलयोः त्याग-लक्षणेन सन्न्यासेन नैष्कर्म्य-सिद्धिम् (सर्व-कर्म-निवृत्ति-लक्षणाम् सत्त्व-शुद्धिम्) अधिगच्छति । यद्यपि सङ्ग-फलयोः त्यागेन कर्म-अनुष्ठानम् अपि नैष्कर्म्यम् एव, कर्तृत्व-अभिनिवेश-अभावात्, तद् उक्तम् – 'नैव किञ्चिद् करोमि इति युक्तः मन्येत तत्त्व-विद्' (5.8) इत्यादि श्लोक-चतुष्टयेन, तथापि अनेन उक्त-लक्षणेन सन्न्यासेन परमाम् नैष्कर्म्य-सिद्धिम् 'सर्व-कर्माणि मनसा सन्न्यस्य आस्ते सुखम् वशी' (5.13) इति एवम्-लक्षण-पारमहंस्य-अपर-पर्यायाम् प्राप्नोति ॥१८.४९॥

एवम्-भूतस्य परमहंसस्य ज्ञान-निष्ठया ब्रह्म-भाव-प्रकारम् आह – 'सिद्धिम् प्राप्तः' इति षड्भिः –

Note: See also verses 18.9, 5.8, 5.13.

18.50

सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे ।
समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ॥५०॥

हे कौन्तेय !	O Arjuna!
सिद्धिम् प्राप्तः	having attained [such] perfection
यथा ब्रह्म आप्नोति	how he reaches Brahman,
ज्ञानस्य या परा निष्ठा,	which is the highest stage of knowledge,
तथा समासेन एव मे (मम) निबोध !	that know from Me in summary!

"O son of Kuntī, learn from Me how one who has achieved this perfection can attain to the supreme perfectional stage, Brahman, the stage of highest knowledge, by acting in the way I shall now summarize."

सिद्धिम्	**perfection** ⟨2.1⟩ f. *siddhi*
प्राप्तः	**who has attained** ⟨1.1⟩ m. *prāpta* (*pra.*√*āp[ḷ]* – to obtain; + *.[k]ta*) – obtained
यथा	**as** ⟨*avyaya*⟩
ब्रह्म	**the Brahman** ⟨2.1⟩ n. *brahman* (*brahma*) – spirit, soul
तथा	**so** ⟨*avyaya*⟩
आप्नोति	**he reaches** ⟨*acyuta* 1.1⟩ √*āp[ḷ]*...व्याप्तौ – to reach, obtain
निबोध	**you must know** ⟨*vidhātā* 2.1⟩ *ni.*√*budh[ir]* – to know, be awake
मे	**my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
समासेन	**in summary** ⟨3.1⟩ m. *samāsa* – compound, summary
एव	**certainly** ⟨*avyaya*⟩
कौन्तेय	**O Arjuna!** ⟨8.1⟩ m. *kaunteya* – 'son of Kuntī'
निष्ठा	**stage** ⟨1.1⟩ f. *niṣṭhā* – state, condition
ज्ञानस्य	**of knowledge** ⟨6.1⟩ n. *jñāna* – knowledge
या	**that which** ⟨1.1⟩ f. *kṛṣṇanāma yad* – (relative) who, which
परा	**the supreme** ⟨1.1⟩ f. *parā* (*.ā[p]*) – beyond

Subodhinī: नैष्कर्म्य-सिद्धिम् प्राप्तः सन्, यथा (येन प्रकारेण) ब्रह्म प्राप्नोति, तथा (तम् प्रकारम्) सङ्क्षेपेण एव मे वचनात् निबोध ॥१८.५०॥
तद् एव आह – 'बुद्धया' इति –

18.51...53

बुद्धया विशुद्धया युक्तो धृत्यात्मानं नियम्य च ।
शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥५१॥

विशुद्धया बुद्धया युक्तः	endowed with purified intelligence
धृत्या आत्मानम् नियम्य च	and [after] controlling the mind with determination
शब्दादीन् विषयान् त्यक्त्वा	[after] shutting out the sense objects like sound
राग-द्वेषौ व्युदस्य च,	[after] giving up attachment and aversion . . .

"Being purified by his intelligence and controlling the mind with determination, giving up the objects of sense gratification, being freed from attachment and hatred, . . ."

बुद्धया	**with intelligence** ⟨3.1⟩ f. *buddhi*
विशुद्धया	**with purified** ⟨3.1⟩ f. *viśuddhā* – purified
युक्तः	**who is endowed** ⟨1.1⟩ m. *yukta* (*.[k]ta*) – connected, engaged endowed with
धृत्या	**with determination** ⟨3.1⟩ f. *dhṛti* – firmness, patience
आत्मानम्	**the self** ⟨2.1⟩ m. *ātman* (*ātmā*) – the self, soul
नियम्य	**[after] restraining** ⟨*avyaya*⟩ *ni.*√*yam[a]* – to restrain; + *.ya[p]*
च	**and** ⟨*avyaya*⟩
शब्दादीन्	**sound, etc.** ⟨2.3⟩ m. *śabda-_ādi*
विषयान्	**sense objects** ⟨2.3⟩ m. *viṣaya* – sense object
त्यक्त्वा	**[after] abandoning** ⟨*avyaya*⟩ √*tyaj[a]*...हानौ – to abandon; + *.[k]tvā*
राग-द्वेषौ	**attachment and aversion** ⟨2.2⟩ m. *rāga-dveṣa*
व्युदस्य	**[after] abandoning** ⟨*avyaya*⟩ *vi.ud.*√*as[u]* – to abandon; + *.ya[p]*
च	**and** ⟨*avyaya*⟩

Subodhinī: उक्तेन प्रकारेण विशुद्धया पूर्व-उक्तया सात्त्विक्या बुद्धया युक्तः, धृत्या सात्त्विक्या आत्मानम् (कार्य-कारण-सङ्घातम् ताम् एव बुद्धिम्) नियम्य (निश्चलाम् कृत्वा), शब्दादीन् विषयान् त्यक्त्वा, तद्-विषयौ राग-द्वेषौ च व्युदस्य, 'बुद्धया विशुद्धया युक्तः' (18.51) इति आदीनाम् 'ब्रह्म-भूयाय कल्पते' (18.53) इति तृतीयेन अन्वयः ॥१८.५१॥

18.52

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥५२॥

. . . विविक्त-सेवी लघ्वाशी . . .	one who lives in solitude, eats little

यत-वाक्काय-मानसः	whose words, body and mind are controlled
नित्यम् ध्यान-योग-परः	who is always absorbed in meditation
वैराग्यम् समुपाश्रितः . . .	who practices detachment . . .

". . . one who lives in a secluded place, who eats little, who controls his body, mind and power of speech, who is always in trance and who is detached, . . ."

विविक्त-सेवी **who resorts to solitude** ⟨1.1⟩ m. *vivikta-sevin (-sevī)*...विविक्तम् सेवते यः, सः विविक्त-सेवी

लघ्वाशी **who eats little** ⟨1.1⟩ m. *laghu-_āśin (-āśī)*...लघु अश्नाति यः, सः लघ्वाशी

यत-वाक्काय-मानसः **whose words, body and mind are controlled** ⟨1.1⟩ m. *yata-vāc-_kāya-mānasa (-mānasaḥ)*...यतानि वाक् च कायः च मानसम् च यस्य, सः वाक्काय-मानसः

ध्यान-योग-परः **who is absorbed in *dhyāna-yoga*** ⟨1.1⟩ m. *dhyāna-yoga-para*

नित्यम् **always** ⟨*avyaya*⟩ from *nitya* – innate, fixed, eternal

वैराग्यम् **to detachment** ⟨2.1⟩ n. *vairāgya*

समुपाश्रितः **having taken shelter** ⟨1.1⟩ m. *samupāśrita (upa.ā.√śri[ñ]* – to completely take shelter; + *.[k]ta)* – taken shelter

Subodhinī: विविक्त-सेवी शुद्ध-देश-अवस्थायी, लघु-आशी मित-भोजी। एतैः उपायैः यत-वाक्-काय-मानसः (संयत-वाक्-देह-चित्तः) भूत्वा, नित्यम् (सर्वदा) ध्यानेन योगः (ब्रह्म-संस्पर्शः, तत्परः) सन्, ध्यान-अविच्छेद-अर्थम् पुनः पुनः दृढम् वैराग्यम् सम्यक् उपाश्रितः भूत्वा ॥१८.५२॥

18.53

अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥५३॥

. . . अहङ्कारम् बलम् दर्पम्	. . . false egotism, power, pride
कामम् क्रोधम् परिग्रहम्	lust, anger and proprietorship
विमुच्य,	[after] giving up,
निर्ममः शान्तः	being selfless and peaceful
ब्रह्म-भूयाय कल्पते ।	one is eligible for spiritual life

". . . free from false ego, false strength, false pride, lust, anger, and acceptance of material things, free from false proprietorship, and peaceful – such a person is certainly elevated to the position of self-realization."

अहङ्कारम् **egotism** ⟨2.1⟩ m. *ahaṅkāra*

बलम् **power** ⟨2.1⟩ n. *bala* – strength

दर्पम् **pride** ⟨2.1⟩ m. *darpa*

कामम् **lust** ⟨2.1⟩ m. *kāma* – desire

क्रोधम् **anger** ⟨2.1⟩ m. *krodha*

परिग्रहम् **proprietorship** ⟨2.1⟩ m. *parigraha*

विमुच्य **[after] giving up** ⟨*avyaya*⟩ vi.√*muc[l]* – to release; + *.ya[p]*

निर्ममः **without proprietorship** ⟨1.1⟩ m. *nirmama* – without the notion of 'mine'

शान्तः **peaceful** ⟨1.1⟩ m. *śānta* (√*śam[u]* 4P...उपशमे – to be pacified; + *[k]ta*) – pacified

ब्रह्म-भूयाय **for the state of Brahman** ⟨4.1⟩ n. *brahma-bhūya*...ब्रह्मणः भूयः इति ब्रह्म-भूयः – the state of Brahman

कल्पते **he is able** ⟨*acyuta* 1.1⟩ √*kṛp[ū]*...सामर्थ्ये – to be able

Subodhinī: ततः च 'विरक्तः अहम्' इत्यादि अहङ्कारम्, बलम् दुराग्रहम्, दर्पम् योग-बलात् उन्मार्ग-प्रवृत्ति-लक्षणम्, प्रारब्ध-वशात् प्राप्यमाणेषु अपि विषयेषु कामम् क्रोधम् परिग्रहम् च विमुच्य (विशेषेण त्यक्त्वा), बलात् आपन्नेषु निर्ममः सन्, शान्तः परम् उपशान्तिम् प्राप्तः, ब्रह्म-भूयाय ('ब्रह्म अहम्' इति नैश्चल्येन आवस्थानाय) कल्पते (योग्यः भवति) ॥१८.५३॥
'ब्रह्म अहम्' इति एवम् नैश्चल्येन अवस्थानस्य फलम् आह – 'ब्रह्म-भूतः' इति –

18.54

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥५४॥

ब्रह्म-भूतः प्रसन्नात्मा	being self-realized and tranquil-minded
न शोचति, न काङ्क्षति,	he neither laments nor desires,
सर्वेषु भूतेषु समः	being equal towards all beings
पराम् मद्भक्तिम् लभते ।	he attains supreme devotion to Me

"One who is thus transcendentally situated at once realizes the Supreme Brahman and becomes fully joyful. He never laments or desires to have anything. He is equally disposed toward every living entity. In that state he attains pure devotional service unto Me."

ब्रह्म-भूतः **who is self-realized** ⟨1.1⟩ m. *brahma-bhūta* – 'being Brahman', identification as spirit soul, self-realization

प्रसन्नात्मा **whose mind is pacified** ⟨1.1⟩ m. *prasanna-_ātman (-ātmā)*...प्रसन्नः आत्मा यस्य, सः प्रसन्नात्मा

न **not** ⟨*avyaya*⟩

शोचति **he laments** ⟨*acyuta* 1.1⟩ √*śuc[a]*...शोके – to grieve, lament

न **not** ⟨*avyaya*⟩

काङ्क्षति **he desires** ⟨*acyuta* 1.1⟩ √*kāṅkṣ[i]*...काङ्क्षायाम् – to desire

समः **who is equal** ⟨1.1⟩ m. *sama* – same

सर्वेषु **towards all** ⟨7.3⟩ m. *kṛṣṇanāma sarva* – all

भूतेषु **towards beings** ⟨7.3⟩ m. *bhūta* (√*bhū*...सत्तायाम् – to be, exist, become; + .*[k]ta*) – past; an element, being, creature

मद्भक्तिम् **my devotion** ⟨2.1⟩ f. *mad-bhakti*

लभते **he obtains** ⟨*acyuta* 1.1⟩ √*[du]labh[aṣ]*...प्राप्तौ – to obtain

पराम् **supreme** ⟨2.1⟩ f. *parā* (.*ā[p]*) – beyond

Subodhinī: ब्रह्म-भूतः (ब्रह्मणि अवस्थितः) प्रसन्न-चित्तः नष्टम् न शोचति, न च अ-प्राप्तम् काङ्क्षति, देहादि-अभिमान-अभावात् । अतएव सर्वेषु अपि भूतेषु समः सन्, राग-द्वेषादि-कृत-विक्षेप-अभावात्, सर्व-भूतेषु मद्-भावन-आलक्षणाम् पराम् मद्-भक्तिम् लभते ॥१८.५४॥

18.55

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥५५॥

यः यावान् च अस्मि	who and how great I am
भक्त्या	by devotion
माम् तत्त्वतः अभिजानाति	he understands Me truly,
ततः माम् तत्त्वतः ज्ञात्वा	then [after] knowing Me truly
तदनन्तरम् विशते ।	he then enters [My nature]

"One can understand Me as I am, as the Supreme Personality of Godhead, only by devotional service. And when one is in full consciousness of Me by such devotion, he can enter into the kingdom of God."

भक्त्या **with devotion** ⟨3.1⟩ f. *bhakti* – devotion

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

अभिजानाति **he understands** ⟨*acyuta* 1.1⟩ *abhi.*√*jñā* – to understand

यावान् **how much** ⟨1.1⟩ m. *yāvat* – as much

यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which

च **and** ⟨*avyaya*⟩

अस्मि **I am** ⟨*acyuta* 3.1⟩ √*as[a]*...भुवि – to be, exist

तत्त्वतः **truly** ⟨*avyaya*⟩ (*tattvatas*; *tattva* + .*tas[i]*)

ततः **then** ⟨*avyaya*⟩ (*tatas*; from *tad* + .*tas[i]*) – from/after/than that

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

तत्त्वतः **truly** ⟨*avyaya*⟩ (*tattvatas*; *tattva* + .*tas[i]*)

ज्ञात्वा **[after] knowing** ⟨*avyaya*⟩ √*jñā* 9P...अवबोधने – to know; + .*[k]tvā*

विशते **he enters** ⟨*acyuta* 1.1⟩ √*viś[a]*...प्रवेशने – to enter

तदनन्तरम् **thereafter** ⟨*avyaya*⟩ *tad-anantaram*

Subodhinī: तया च परया भक्त्या तत्त्वतः माम् अभिजानाति । कथम्-भूतम् ? यावान् (सर्व-व्यापी), यः च अस्मि (सत्-चित्-आनन्द-घनः तथा-भूतम्) । ततः च माम् एवम् तत्त्वतः ज्ञात्वा, तद्-अनन्तरम् तस्य ज्ञानस्य अपि उपरमे सति माम् विशते, परम-आनन्द-रूपः भवति इति अर्थः ॥१८.५५॥
स्व-कर्मभिः परमेश्वर-आराधनात् उत्तम मोक्ष-प्रकारम् उपसंहरति – 'सर्व-कर्माणि' इति –

18.56

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः ।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥५६॥

मद्व्यपाश्रयः	one who takes shelter of Me
सदा सर्व-कर्माणि अपि कुर्वाणः	though always performing activities
शाश्वतम् अ-व्ययम् पदम्	the eternal imperishable abode
मत्प्रसादात् अवाप्नोति ।	he attains by My mercy

"Though engaged in all kinds of activities, My pure devotee, under My protection, reaches the eternal and imperishable abode by My grace."

सर्व-कर्माणि **all activities** ⟨2.3⟩ n. *sarva-karman* (-*karma*)

अपि **also** ⟨*avyaya*⟩

सदा **always** ⟨*avyaya*⟩

कुर्वाणः **[while] doing** ⟨1.1⟩ m. *kurvāna* (√*[du]kr[ñ]* – to do; + .*[ś]āna*)

मद्व्यपाश्रयः **who takes shelter of me** ⟨1.1⟩ m. *mad-vyapāśraya*...अहम् व्यपाश्रयः यस्य, सः मद्व्यपाश्रयः – whose shelter am I
व्यपाश्रय (*vi.apa.ā.*√*śri[ñ]* – to take shelter) – shelter

मत्प्रसादात् **by my mercy** ⟨5.1⟩ m. *mad-_prasāda*...मम प्रसादः इति मत्प्रसादः – my mercy

अवाप्नोति **he attains** ⟨*acyuta* 1.1⟩ *ava.*√*āp[ḷ]* – to obtain

शाश्वतम् **the eternal** ⟨2.1⟩ n. *śāśvata*

पदम् **abode** ⟨2.1⟩ n. *pada* – step, position

अ-व्ययम् **the imperishable** ⟨2.1⟩ n. *a-vyaya* – unchangeable, imperishable

Subodhinī: सर्व-कर्माणि (नित्य-नैमित्तिकानि काम्यानि च कर्माणि) पूर्व-उक्त-क्रमेण मद्व्यपाश्रयः सन् कुर्वाणः, अहम् एव व्यपाश्रयः (आश्रयणीयः) नतु स्वर्गादि-

फलम् यस्य, सः मद्-प्रसादात् शाश्वतम् (अनादि) अ-व्ययम् (नित्यम्) सर्व-उत्कृष्टम् वैष्णवम् पदम् प्राप्नोति ॥१८.५६॥
यस्मात् एवम् तस्मात् – 'चेतसा' इति –

18.57

चेतसा सर्वकर्माणि मयि सन्न्यस्य मत्परः ।
बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥५७॥

चेतसा	with the mind
सर्व-कर्माणि मयि सन्न्यस्य	[after] giving up all activities to Me
मत्परः	being fixed on Me
बुद्धि-योगम् उपाश्रित्य	[after] being dedicated to devotional service
सततम् मच्चित्तः भव !	be always absorbed in Me!

"In all activities just depend upon Me and work always under My protection. In such devotional service, be fully conscious of Me."

चेतसा **with the mind** ⟨3.1⟩ n. *cetas (cetaḥ)* – the mind
सर्व-कर्माणि **all activities** ⟨2.3⟩ n. *sarva-karman (-karma)*
मयि **in me** ⟨7.1⟩ *kṛṣṇanāma asmad* – (last person) I
सन्न्यस्य **[after] renouncing** ⟨*avyaya*⟩ *sam.ni.√as[u]* – to throw down, give up; + *.ya[p]*
मत्परः **who is devoted to Me** ⟨1.1⟩ m. *mad-_para*... अहम् परः यस्य, सः मत्परमः – 'whose supreme [shelter or master] I am', subordinate or devoted to Me
बुद्धि-योगम् ***buddhi-yoga*** ⟨2.1⟩ m. *buddhi-yoga* (see note under 2.39)
उपाश्रित्य **[after] taking shelter** ⟨*avyaya*⟩ *upa.ā.√śri[ñ]* – to take shelter; + *.ya[p]*
मच्चित्तः **whose thought is in me** ⟨1.1⟩ m. *mad-_citta*... मयि चित्तम् यस्य, सः मच्चित्तः
सततम् **constantly** ⟨*avyaya*⟩
भव **you must be** ⟨*vidhātā* 2.1⟩ *√bhū*...सत्तायाम् – to be, exist, become

Subodhinī: सर्व-कर्माणि चेतसा मयि सन्न्यस्य (समर्प्य), मत्परः अहम् एव परः प्राप्यः पुरुषार्थः यस्य सः व्यवसायात्मिकया बुद्ध्या योगम् आश्रित्य, सततम् (कर्म-अनुष्ठानकाले अपि) 'ब्रह्मार्पणम् ब्रह्म हविः' (4.24) इति न्यायेन, मयि एव चित्तम् यस्य तथा-भूतः भव ॥१८.५७॥
ततः यद् भविष्यति तद् शृणु – 'मद्-चित्तः' इति –

18.58

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि ।
अथ चेत्त्वमहङ्कारान्न श्रोष्यसि विनङ्क्ष्यसि ॥५८॥

मच्चित्तः	being absorbed in Me
मत्प्रसादात् सर्व-दुर्गाणि तरिष्यसि,	you will cross all obstacles by My mercy,
अथ अहङ्कारात्	but, out of false ego
त्वम् न श्रोष्यसि चेद्	if you will not listen [to My words]
विनङ्क्ष्यसि ।	you will perish

"If you become conscious of Me, you will pass over all the obstacles of conditioned life by My grace. If, however, you do not work in such consciousness but act through false ego, not hearing Me, you will be lost."

मच्चित्तः **whose thought is in me** ⟨1.1⟩ m. *mad-_citta*...मयि चित्तम् यस्य, सः मच्चित्तः
सर्व-दुर्गाणि **all difficulties** ⟨2.3⟩ n. *sarva-durga*
दुर्ग (from *dur.√gam[l]* – to go with difficulty) – difficult to go, difficulty
मत्प्रसादात् **by my mercy** ⟨5.1⟩ m. *mad-_prasāda* – my mercy
तरिष्यसि **you will cross** ⟨*kalki* 2.1⟩ *√tṝ*...प्लवन-तरणयोः – to swim; cross
अथ **now** ⟨*avyaya*⟩
चेद् **if** ⟨*avyaya*⟩
त्वम् **you** ⟨1.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
अहङ्कारात् **out of egotism** ⟨5.1⟩ m. *ahankāra* – egotism
न **not** ⟨*avyaya*⟩
श्रोष्यसि **you will hear** ⟨*kalki* 2.1⟩ *√śru*...श्रवणे – to hear, obey
विनङ्क्ष्यसि **you will perish** ⟨*kalki* 2.1⟩ *vi.√naś[a]* – to disappear, perish

Subodhinī: मद्-चित्तः सन् मद्-प्रसादात् सर्वाणि अपि दुर्गाणि (दुस्तराणि सांसारिकाणि दुःखानि) तरिष्यसि । विपक्षे दोषम् आह अथ चेद् (यदि पुनः) त्वम् अहङ्कारात् (ज्ञातृत्व-अभिमानात्) मद्-उक्तम् एतद् न श्रोष्यसि, तर्हि विनङ्क्ष्यसि (पुरुषार्थात् भ्रश्यसि) ॥१८.५८॥
कामम् 'विनङ्क्ष्यामि नतु बन्धुभिः युद्धम् करिष्यामि' इति चेद् तत्र आह – 'यद्' इति –

18.59

यदहङ्कारमाश्रित्य न योत्स्य इति मन्यसे ।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥५९॥

यद् अहङ्कारम् आश्रित्य	if, [after] taking to false ego
न योत्स्ये इति मन्यसे,	you think 'I will not fight',
एषः ते (तव) व्यवसायः मिथ्या,	this your resolve is wrong,
प्रकृतिः त्वाम् नियोक्ष्यति ।	[because] [your] nature will engage you

"If you do not act according to My direction and do not fight, then you will be falsely directed. By your nature, you will have to be engaged in warfare."

यद्	**if** ⟨*avyaya*⟩
अहङ्कारम्	**false ego** ⟨2.1⟩ m. *ahaṅkāra* – egotism
आश्रित्य	**[after] taking shelter** ⟨*avyaya*⟩ *ā.√śri[ñ]* – to take shelter; + *.ya[p]*
न	**not** ⟨*avyaya*⟩
योत्स्ये	**I will fight** ⟨*kalki* 3.1⟩ *√yudh[a]*...सम्प्रहारे – to fight
इति	**thus** ⟨*avyaya*⟩
मन्यसे	**you think** ⟨*acyuta* 2.1⟩ *√man[a]* 4A...बोधने – to know, think
मिथ्या	**false** ⟨*avyaya*⟩
एषः	**this** ⟨1.1⟩ m. *kṛṣṇanāma etad* – (first person) he, this
व्यवसायः	**resolve** ⟨1.1⟩ m. *vyavasāya*
ते	**your** ⟨opt. for *tava* 6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
प्रकृतिः	**nature** ⟨1.1⟩ f. *prakṛti*
त्वाम्	**you** ⟨2.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
नियोक्ष्यति	**it will engage** ⟨*kalki* 1.1⟩ *ni.√yuj[ir]* – to engage, perform

Subodhinī: मद्-उक्तम् अनादृत्य, केवलम् अहङ्कारम् अवलम्ब्य, 'युद्धम् न करिष्यामि' इति त्वम् यद् मन्यसे (अध्यवस्यसि), एषः ते अध्यवसायः मिथ्या एव, अ-स्वतन्त्रत्वात् तव । तद् एव आह – प्रकृतिः त्वाम् रजः-गुण-रूपेण परिणता सती नियोक्ष्यति, युद्धे प्रवर्तयिष्यति एव ॥१८.५९॥

18.60

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा ।
कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत् ॥६०॥

हे कौन्तेय !	O Arjuna!
यद् मोहात् कर्तुम् न इच्छसि,	if, out of illusion, you do not want to act
स्व-भाव-जेन स्वेन कर्मणा निबद्धः	bound by your own duty born of your nature
तद् अ-वशः अपि करिष्यसि ।	even unwillingly you will act

"Under illusion you are now declining to act according to My direction. But, compelled by the work born of your own nature, you will act all the same, O son of Kuntī."

स्व-भाव-जेन	**by that which is born of the own nature** ⟨3.1⟩ n. *sva-bhāva-ja* – born of the own nature, natural
कौन्तेय	**O Arjuna!** ⟨8.1⟩ m. *kaunteya* – 'son of Kuntī'
निबद्धः	**who is bound** ⟨1.1⟩ m. *nibaddha* (*ni.√bandh[a]* – to bind; + *.[k]ta*) – bound
स्वेन	**by the own** ⟨3.1⟩ n. *kṛṣṇanāma sva* – own

कर्मणा	**by duty** ⟨3.1⟩ n. *karman (karma)* – activity
कर्तुम्	**to do** ⟨*avyaya*⟩ *√[ḍu]kṛ[ñ]* – to do; + *.tum[u]*
न	**not** ⟨*avyaya*⟩
इच्छसि	**you desire** ⟨*acyuta* 2.1⟩ *√iṣ[u]*...इच्छायाम् – to wish, desire
यद्	**if** ⟨*avyaya*⟩
मोहात्	**out of illusion** ⟨5.1⟩ m. *moha* – illusion
करिष्यसि	**you will do** ⟨*kalki* 2.1⟩ *√[ḍu]kṛ[ñ]*...करणे – to do
अ-वशः	**unwillingly** ⟨1.1⟩ m. *a-vaśa* – 'not according to the wish'
अपि	**also** ⟨*avyaya*⟩
तद्	**then** ⟨*avyaya*⟩

Subodhinī: स्व-भावः (क्षत्रियत्वे हेतुः पूर्व-कर्म-संस्कारः), तस्मात् जातेन स्वकीयेन कर्मणा (शौर्यादिना पूर्व-उक्तेन 18.43) निबद्धः (यन्त्रितः), त्वम् मोहात् यद् कर्म (युद्ध-लक्षणम्) कर्तुम् न इच्छसि, अ-वशः अपि तद् कर्म करिष्यसि एव ॥१८.६०॥ तद् एवम् श्लोक-द्वयेन (18.59-60) साङ्ख्यादि-मतेन प्रकृति-पारतन्त्र्यम् स्व-भाव-पारतन्त्र्यम् कर्म-पारतन्त्र्यम् च उक्तम् । इदानीम् स्व-मतम् आह – 'ईश्वरः' इति द्वाभ्याम् –

Note: Although Kṛṣṇa (beginning with verse 2.11) appears to be speaking the *Bhagavad-gītā* in order to incite Arjuna to fight, this is not Kṛṣṇa's actual purpose. He does not need to convince Arjuna to fight, for Arjuna will fight anyway. Kṛṣṇa's actual intention in speaking the Gītā is to teach the ultimate goal of life.

18.61

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥६१॥

हे अर्जुन !	O Arjuna!
ईश्वरः	the Lord
मायया यन्त्रारूढानि सर्व-भूतानि	all beings, fixed to a machine by Māyā
भ्रामयन्	[while] driving
सर्व-भूतानाम् हृद्देशे तिष्ठति ।	is situated in the heart of all beings

"The Supreme Lord is situated in everyone's heart, O Arjuna, and is directing the wanderings of all living entities, who are seated as on a machine, made of the material energy."

ईश्वरः	**the Lord** ⟨1.1⟩ m. *īśvara* – lord
सर्व-भूतानाम्	**of all beings** ⟨6.3⟩ n. *sarva-bhūta* – all beings
हृद्देशे	**in the place of the heart** ⟨7.1⟩ m. *hṛd-deśa* – the place of the heart
अर्जुन	**O Arjuna!** ⟨8.1⟩ m. *arjuna* – white, 'who is pure in actions'

तिष्ठति **he is situated** ⟨*acyuta* 1.1⟩ √*sthā*...स्थाने – to stand

भ्रामयन् **[while] driving** ⟨1.1⟩ m. *bhrāmayat* (√*bhram[u]*...चलने – to move, roam; caus., .*[ś]at[r]*) – [while] causing to move

सर्व-भूतानि **all beings** ⟨2.3⟩ n. *sarva-bhūta*

यन्त्रारूढानि **which are fixed to a machine** ⟨2.3⟩ n. *yantra-_ārūḍha* – ascended on a machine
आरूढ (*ā.*√*ruh[a]* – to ascend; + .*[k]ta*) – ascended, mounted

मायया **by Māyā** ⟨3.1⟩ f. *māyā* – divine power, illusion, the Lord's energy

Subodhinī: सर्व-भूतानाम् हृदय-मध्ये ईश्वरः (अन्तर्यामी) तिष्ठति । किम् कुर्वन् सर्वाणि भूतानि मायया (निज-शक्त्या) भ्रामयन् (तद्-तद्-कर्मसु प्रवर्तयन्), यथा दारु-यन्त्रम् आरूढानि कृत्रिमाणि भूतानि सूत्र-धारः लोके भ्रामयति, तद्वत् इति अर्थः । यद्वा, यन्त्राणि (शरीराणि) आरूढानि भूतानि (देह-अभिमानिनः जीवान्) भ्रामयन् इति अर्थः ॥१८.६१॥

18.62

तमेव शरणं गच्छ सर्वभावेन भारत ।
तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥६२॥

हे भारत !	O Arjuna!
सर्व-भावेन	with all your heart
तम् एव शरणम् गच्छ !	surrender to Him alone!
तत्प्रसादात्	by His mercy
पराम् शान्तिम् शाश्वतम् स्थानम्	supreme peace and the eternal abode
प्राप्स्यसि ।	you will attain

"O scion of Bharata, surrender unto Him utterly. By His grace you will attain transcendental peace and the supreme and eternal abode."

तम् **to him** ⟨2.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that

एव **certainly** ⟨*avyaya*⟩

शरणम् **for shelter** ⟨2.1⟩ n. *śaraṇa* – shelter

गच्छ **you must go** ⟨*vidhātā* 2.1⟩ √*gam[l]*...गतौ – to go

सर्व-भावेन **with all heart** ⟨3.1⟩ m. *sarva-bhāva* – the whole heart

भारत **O Arjuna!** ⟨8.1⟩ m. *bhārata* – 'descendant of Bharata'

तत्प्रसादात् **by his mercy** ⟨5.1⟩ m. *tad-_prasāda* – his mercy

पराम् **supreme** ⟨2.1⟩ f. *parā* (.*ā[p]*) – beyond

शान्तिम् **peace** ⟨2.1⟩ f. *śānti* – peace of mind

स्थानम् **the abode** ⟨2.1⟩ n. *sthāna* – place, position

प्राप्स्यसि **you will obtain** ⟨*kalki* 2.1⟩ *pra.*√*āp[l]* – to obtain

शाश्वतम् **the eternal** ⟨2.1⟩ n. *śāśvata*

Subodhinī: यस्मात् एवम् सर्वे जीवाः परमेश्वर-परतन्त्राः, तस्मात् अहङ्कारम् परित्यज, सर्व-भावेन (सर्व-आत्मना) तम् ईश्वरम् एव शरणम् गच्छ । ततः तस्य एव प्रसादात् परमाम् (उत्कृष्टाम्) उपशान्तिम् स्थानम् च पारमेश्वरम् शाश्वतम् (नित्यम्) प्राप्स्यसि ॥१८.६२॥
सर्वम् गीता-अर्थम् उपसंहरन् आह – 'इति' इति –

18.63

इति ते ज्ञानमाख्यातं गुह्याद् गुह्यतरं मया ।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥६३॥

इति गुह्यात् गुह्यतरम् ज्ञानम्	thus knowledge more secret than the secret
मया ते (तुभ्यम्) आख्यातम्,	was described by Me to you,
एतद् अ-शेषेण विमृश्य	[after] considering it fully
यथा इच्छसि तथा कुरु !	do as you like!

"Thus I have explained to you knowledge still more confidential. Deliberate on this fully, and then do what you wish to do."

इति **thus** ⟨*avyaya*⟩

ते **to you** ⟨opt. for *tubhyam* 4.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

ज्ञानम् **knowledge** ⟨1.1⟩ n. *jñāna*

आख्यातम् **told** ⟨1.1⟩ n. *ākhyāta* (*ā.*√*khyā* – to tell; + .*[k]ta*)

गुह्यात् **than the secret** ⟨5.1⟩ n. *guhya* – secret

गुह्यतरम् **more secret** ⟨1.1⟩ n. *guhyatara* (.*tara*)

मया **by me** ⟨3.1⟩ *kṛṣṇanāma asmad* – (last person) I

विमृश्य **[after] considering** ⟨*avyaya*⟩ *vi.*√*mṛś[a]* – to consider; + .*ya[p]*

एतद् **this** ⟨2.1⟩ n. *kṛṣṇanāma etad* – (first person) he, this

अ-शेषेण **completely** ⟨*avyaya*⟩ from *a-śeṣa* – without remainder

यथा **as** ⟨*avyaya*⟩

इच्छसि **you desire** ⟨*acyuta* 2.1⟩ √*iṣ[u]*...इच्छायाम् – to wish, desire

तथा **so** ⟨*avyaya*⟩

कुरु **you must do** ⟨*vidhātā* 2.1⟩ √*[ḍu]kṛ[ñ]*...करणे – to do

Subodhinī: इति (अनेन प्रकारेण) ते (तुभ्यम्) सर्व-ज्ञेन परम-कारुणिकेन मया ज्ञानम् आख्यातम् (उपदिष्टम्) । कथम्-भूतम् ? गुह्यात् (गोप्यात्) रहस्य-मन्त्र-योगादि-ज्ञानात् अपि गुह्यतरम्, एतद् मया उपदिष्टम् गीता-शास्त्रम् अ-शेषतः विमृश्य

(पर्यालोच्य), पश्चात् यथा इच्छसि तथा कुरु । एतस्मिन् पर्यालोचिते सति, तव मोहः निवर्तिष्यते इति भावः ॥१८.६३॥

अतिगम्भीरम् गीता-शास्त्रम् अ-शेषतः पर्यालोचयितुम् अ-शक्नुवतः, कृपया स्वयम् एव तस्य सारम् सङ्गृह्य कथयति – 'सर्व-गुह्यतमम्' इति त्रिभिः –

Note: The word *guhya* refers to knowledge of the impersonal Brahman, and *guhyatara* refers to the more confidential knowledge of the all-pervading Paramātmā (18.62). Now *guhyatama*, the most confidential knowledge of worship of Bhagavān Śrī Kṛṣṇa will be described. This is the conclusion of the *Bhagavad-gītā*.

18.64

सर्वगुह्यतमं भूयः शृणु मे परमं वचः ।
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥६४॥

सर्व-गुह्यतमम् मे (मम) परमम् वचः	My supreme instruction, most confidential of all
भूयः शृणु !	hear again!
मे (मम) दृढम् इष्टः असि,	You are My very beloved,
इति ततः ते (तव) हितम् वक्ष्यामि ।	thus therefore I will speak for your benefit

"Because you are My very dear friend, I am speaking to you My supreme instruction, the most confidential knowledge of all. Hear this from Me, for it is for your benefit."

सर्व-गुह्यतमम् **the most secret of all** ⟨2.1⟩ n. *sarva-guhyatama (.tama)*...सर्वेभ्यः गुह्यतमम् इति सर्व-गुह्यतमम्

भूयः **again** ⟨*avyaya*⟩

शृणु **you must hear** ⟨*vidhātā* 2.1⟩ √*śru*...श्रवणे – to hear, obey

मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I

परमम् **supreme** ⟨2.1⟩ n. *parama* – highest

वचः **word** ⟨2.1⟩ n. *vacas (vacaḥ)* – speech

इष्टः **beloved** ⟨1.1⟩ m. *iṣṭa* (√*iṣ[u]*...इच्छायाम् – to wish, desire; + *.[k]ta*) – desired

असि **you are** ⟨*acyuta* 2.1⟩ √*as[a]*...भुवि – to be, exist

मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I

दृढम् **firmly** ⟨*avyaya*⟩

इति **thus** ⟨*avyaya*⟩

ततः **therefore** ⟨*avyaya*⟩ (*tatas*; from *tad* + *.tas[i]*) – from/after/than that

वक्ष्यामि **I will speak** ⟨*kalki* 3.1⟩ √*vac[a]*...परिभाषणे – to speak

ते **your** ⟨opt. for *tava* 6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

हितम् **benefit** ⟨2.1⟩ m. *hita* (√*[ḍu]dhā[ñ]*...धारण-पोषणयोः – to hold; nourish; + *.[k]ta*) – nourished, beneficial

Subodhinī: सर्वेभ्यः अपि गुह्येभ्यः गुह्यतमम् मे वचः तत्र तत्र उक्तम् अपि भूयः (पुनः अपि) वक्ष्यमाणम् शृणु । पुनः पुनः कथने हेतुम् आह – दृढम् (अत्यन्तम्) मे (मम) त्वम् इष्टः (प्रियः) असि इति मत्वा, ततः एव हेतोः ते हितम् वक्ष्यामि । यद्वा, त्वम् मम इष्टः असि, मया वक्ष्यमाणम् च दृढम् सर्व-प्रमाण-उपेतम् इति निश्चित्य, ततः ते वक्ष्यामि इति अर्थः । 'दृढ-मतिः' इति केचिद् पठन्ति ॥१८.६४॥

तद् एव आह – 'मन्मनाः' इति –

18.65

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥६५॥

मन्मनाः मद्भक्तः मद्याजी भव !	become absorbed in Me, become My devotee and worshiper!
माम् नमस्कुरु !	offer obeisances to Me!
माम् एव एष्यसि,	[then] you will come to Me alone,
मे (मम) प्रियः असि,	you are My beloved,
ते (तुभ्यम्) सत्यम् प्रतिजाने ।	[therefore] I truly promise to you

"Always think of Me, become My devotee, worship Me and offer your homage unto Me. Thus you will come to Me without fail. I promise you this because you are My very dear friend."

मन्मनाः **whose mind is in me** ⟨1.1⟩ m. *mad-_manas (manaḥ)*...मयि मनः यस्य, सः मन्मनाः

भव **you should become** ⟨*vidhātā* 2.1⟩ √*bhū*...सत्तायाम् – to be, exist, become

मद्भक्तः **my devotee** ⟨1.1⟩ m. *mad-bhakta*...मम भक्तः इति मद्भक्तः

मद्याजी **my worshiper** ⟨1.1⟩ m. *mad-yājin (-yājī)*...मम याजी इति मद्याजी

माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

नमस्कुरु **you should offer obeisances** ⟨*vidhātā* 2.1⟩ *namas.*√*[ḍu]kṛ[ñ]* – to offer obeisances

माम् **to me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I

एव **certainly** ⟨*avyaya*⟩

एष्यसि **you will go** ⟨*kalki* 2.1⟩ √*i[ṇ]*...गतौ – to go

सत्यम् **truly** ⟨*avyaya*⟩ from *satya* – true

ते **to you** ⟨opt. for *tubhyam* 4.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

प्रतिजाने **I promise** ⟨*acyuta* 3.1⟩ *prati.*√*jñā* 9U – to promise

प्रियः **beloved** ⟨1.1⟩ m. *priya* – dear

असि **you are** ⟨*acyuta* 2.1⟩ √*as[a]*...भुवि – to be, exist

मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I

Subodhinī: मद्-मनाः (मद्-चित्तः) भव, मम एव भक्तः भव, मद्-याजी (मद्-यजन-शीलः) भव, माम् एव नमस्कुरु। एवम् वर्तमानः त्वम् मद्-प्रसादात् लब्ध-ज्ञानेन माम् एव एष्यसि (प्राप्स्यसि)। अत्र च संशयम् मा कार्षीः। त्वम् हि मे प्रियः असि। अतः सत्यम् (यथा भवति एवम्) तुभ्यम् अहम् प्रतिजाने (प्रतिज्ञाम् करोमि) ॥१८.६५॥

ततः अपि गुह्यतमम् आह – 'सर्व' इति –

18.66

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।
अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥६६॥

सर्व-धर्मान् परित्यज्य	[after] abandoning all duties
माम् एकम् शरणम् व्रज !	take shelter of Me alone!
अहम् त्वाम् सर्व-पापेभ्यः मोक्षयिष्यामि,	I will liberate you from all sins,
मा शुचः !	do not grieve!

"Abandon all varieties of religion and just surrender unto Me. I shall deliver you from all sinful reactions. Do not fear."

सर्व-धर्मान् **all duties** ⟨2.3⟩ m. *sarva-dharma* – all duty
परित्यज्य **[after] abandoning** ⟨*avyaya*⟩ *pari.√tyaj[a]* – to abandon; + *.ya[p]*
माम् **to me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
एकम् **alone** ⟨2.1⟩ n. *kṛṣṇanāma eka* – one
शरणम् **for shelter** ⟨2.1⟩ n. *śaraṇa* – shelter
व्रज **you should go** ⟨*vidhātā* 2.1⟩ *√vraj[a]*...गतौ – to go
अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
त्वाम् **you** ⟨2.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
सर्व-पापेभ्यः **from all sins** ⟨5.3⟩ n. *sarva-pāpa* – all sin
मोक्षयिष्यामि **I will liberate** ⟨*kalki* 3.1⟩ *mokṣ[a]*...असने – to stop, cease
मा **not** ⟨*avyaya*⟩
शुचः **you should lament** ⟨*bhūteśa* 2.1⟩ *√śuc[a]*...शोके – to grieve, lament

In combination with *mā* the prefix *a-* of *bhūteśa* (***a**śucaḥ*) is not used, and *bhūteśa* has an imperative meaning.

Subodhinī: मद्-भक्त्या एव सर्वम् भविष्यति इति दृढ-विश्वासेन विधि-कैङ्कर्यम् त्यक्त्वा, मद्-एक-शरणः भव। एवम् वर्तमानः, 'कर्म-त्याग-निमित्तम् पापम् स्यात्' इति मा शुचः (शोकम् मा कार्षीः)। यतः त्वा (त्वाम्) मद्-एक-शरणम् सर्व-पापेभ्यः अहम् मोक्षयिष्यामि ॥१८.६६॥

एवम् गीतार्थ-तत्त्वम् उपदिश्य, तद्-सम्प्रदाय-प्रवर्तने नियमम् आह – 'इदम्' इति –

18.67

इदं ते नातपस्काय नाभक्ताय कदाचन ।
न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥६७॥

अ-तपस्काय	to one who is not austere
इदम् ते (तव) न कदाचन वाच्यम्,	this is never to be told by you,
न अ-भक्ताय न च अ-शुश्रूषवे,	nor to one who is not devoted or not submissive,
न च यः माम् अभ्यसूयति ।	nor [to one] who envies Me

"This confidential knowledge may never be explained to those who are not austere, or devoted, or engaged in devotional service, nor to one who is envious of Me."

इदम् **this** ⟨1.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this
ते **by you** ⟨opt. for *tava* 6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

Ṣaṣṭhī here indicates the *kartā*, which otherwise would be put in *tṛtīyā*.

न **not** ⟨*avyaya*⟩
अ-तपस्काय **to one who is not austere** ⟨4.1⟩ m. *a-tapaska* – 'who is without austerity'
न **not** ⟨*avyaya*⟩
अ-भक्ताय **to one who is not devoted** ⟨4.1⟩ m. *a-bhakta* (*.[k]ta*) – who is not devoted, a non-devotee
कदाचन **at any time** ⟨*avyaya*⟩ *kadā* (when) + *.cana*
न **not** ⟨*avyaya*⟩
च **and** ⟨*avyaya*⟩
अ-शुश्रूषवे **to one who is not submissive** ⟨4.1⟩ m. *a-śuśrūṣu*

शुश्रूषु – who desires to 'hear', learn, obey, serve

वाच्यम् **to be spoken** ⟨1.1⟩ n. *vācya* (*√vac[a]*...परिभाषणे – to speak; + *.ya*)
न **not** ⟨*avyaya*⟩
च **and** ⟨*avyaya*⟩
माम् **me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
अभ्यसूयति **he envies** ⟨*acyuta* 1.1⟩ *abhi.√asūya* – to envy

Subodhinī: इदम् गीतार्थ-तत्त्वम् ते (त्वया) अ-तपस्काय (स्व-धर्म-अनुष्ठान-हीनाय) न वाच्यम्। न च अ-भक्ताय (गुरौ ईश्वरे च भक्ति-शून्याय) कदाचिद् अपि न वाच्यम्, न च अ-शुश्रूषवे (श्रोतुम् अनिच्छते, परिचर्याम् अ-कुर्वते) वाच्यम्,

माम् परमेश्वरम् यः अभ्यसूयति (मनुष्य-दृष्ट्या दोष-आरोपेण निन्दति), तस्मै च न वाच्यम् ॥१८.६७॥

एतैः दोषैः विरहितेभ्यः मद्भक्तेभ्यः गीता-शास्त्र-उपदेष्टुः फलम् आह – 'यः इदम्' इति –

18.68

य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति ।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥६८॥

यः इदम् परमम् गुह्यम्	one who this supreme secret
मद्भक्तेषु अभिधास्यति,	will explain among My devotees,
मयि पराम् भक्तिम् कृत्वा	[after] doing a great service for Me
अ-संशयः	being free from doubt
माम् एव एष्यति ।	he attains Me

"For one who explains this supreme secret to the devotees, pure devotional service is guaranteed, and at the end he will come back to Me."

यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
इदम् **this** ⟨2.1⟩ n. *kṛṣṇanāma idam* – (first person) he, this
परमम् **supreme** ⟨2.1⟩ n. *parama* – highest
गुह्यम् **secret** ⟨2.1⟩ n. *guhya*
मद्भक्तेषु **among my devotees** ⟨7.3⟩ m. *mad-bhakta* – my devotee
अभिधास्यति **he will explain** ⟨*kalki* 1.1⟩ *abhi.√[du]dhā[ñ]* – to explain, name
भक्तिम् **devotion** ⟨2.1⟩ f. *bhakti*
मयि **in me** ⟨7.1⟩ *kṛṣṇanāma asmad* – (last person) I
पराम् **supreme** ⟨2.1⟩ f. *parā (.ā[p])* – beyond
कृत्वा **[after] doing** ⟨*avyaya*⟩ *√[ḍu]kṛ[ñ]*...करणे – to do; + *.[k]tvā*
माम् **to me** ⟨2.1⟩ *kṛṣṇanāma asmad* – (last person) I
एव **certainly** ⟨*avyaya*⟩
एष्यति **he will go** ⟨*kalki* 1.1⟩ *√i[ṇ]*...गतौ – to go
अ-संशयः **who is without doubt** ⟨1.1⟩ m. *a-saṁśaya* – without doubt

Subodhinī: मद्-भक्तेषु अभिधास्यति (मद्-भक्तेभ्यः यः वक्ष्यति), सः मयि पराम् भक्तिम् करोति । ततः निःसंशयः सन्, माम् एव प्राप्नोति इति अर्थः ॥१८.६८॥

18.69

न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः ।
भविता न च मे तस्मादन्यः प्रियतरो भुवि ॥६९॥

तस्मात् च मनुष्येषु	than he among men
न कश्चिद् मे (मम) प्रियकृत्तमः,	no one does dearer service to Me,
तस्मात् च अन्यः मे (मम) प्रियतरः	and another more dear to Me than he
भुवि न भविता ।	will not exist on earth

"There is no servant in this world more dear to Me than he, nor will there ever be one more dear."

न **not** ⟨*avyaya*⟩
च **and** ⟨*avyaya*⟩
तस्मात् **than he** ⟨5.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
मनुष्येषु **among men** ⟨7.3⟩ m. *manuṣya* – human, man
कश्चिद् **someone** ⟨1.1⟩ m. *kṛṣṇanāma kim (kaḥ) + .cid* – someone, something
मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
प्रिय-कृत्तमः **who does dearer service** ⟨1.1⟩ m. *priya-kṛttama (.tama)*
भविता **he will be** ⟨*bālakalki* 1.1⟩ *√bhū*...सत्तायाम् – to be, exist, become
मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
तस्मात् **than he** ⟨5.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
अन्यः **another one** ⟨1.1⟩ m. *kṛṣṇanāma anya* – other
प्रियतरः **who is more dear** ⟨1.1⟩ m. *priyatara (.tara)* – more dear
भुवि **on earth** ⟨7.1⟩ f. *bhū* – the earth

Subodhinī: तस्मात् (मद्-भक्तेभ्यः, गीता-शास्त्र-व्याख्यातुः सकाशात्) अन्यः मनुष्येषु मध्ये कश्चिद् अपि मम प्रिय-कृत्तमः (अत्यन्तम् परितोष-कर्ता) न अस्ति । नच काल-अन्तरे भविता (भविष्यति) । मम अपि तस्मात् अन्यः प्रियतरः अधुना भुवि तावत् न अस्ति । नच काल-अन्तरे अपि भविष्यति इति अर्थः ॥१८.६९॥
पठतः फलम् आह – 'अध्येष्यते' इति –

18.70

अध्येष्यते च य इमं धर्म्यं संवादमावयोः ।
ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ॥७०॥

यः च	and he who

आवयोः इमम् धर्म्यम् संवादम्	this sacred conversation of ours
अध्येष्यते,	will study,
तेन	by him
अहम् ज्ञान-यज्ञेन इष्टः स्याम्	I will be worshiped by the knowledge sacrifice
इति मे (मम) मतिः ।	this is My opinion

"And I declare that he who studies this sacred conversation of ours worships Me by his intelligence."

अध्येष्यते **he will study** ⟨*kalki* 1.1⟩ *adhi.√i[ṅ]* – to study (with *i[ṅ]*...अध्ययने – to study)
च **and** ⟨*avyaya*⟩
यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
इमम् **this** ⟨2.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
धर्म्यम् **sacred** ⟨2.1⟩ m. *dharmya* – 'according to *dharma*', religious
संवादम् **conversation** ⟨2.1⟩ m. *saṁvāda*
आवयोः **of us two** ⟨6.2⟩ *kṛṣṇanāma asmad* – (last person) I
ज्ञान-यज्ञेन **by the sacrifice through knowledge** ⟨3.1⟩ m. *jñāna-yajña*
तेन **by him** ⟨3.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
अहम् **I** ⟨1.1⟩ *kṛṣṇanāma asmad* – (last person) I
इष्टः **being worshiped** ⟨1.1⟩ m. *iṣṭa* (√*yaj[a]*...देवपूजा-सङ्गतिकरण-यजन-दानेषु – to worship; associate; sacrifice; give; + .*[k]ta*) – worshiped
स्याम् **I would be** ⟨*vidhi* 3.1⟩ √*as[a]*...भुवि – to be, exist
इति **thus** ⟨*avyaya*⟩
मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
मतिः **opinion** ⟨1.1⟩ f. *mati* – thought

Subodhinī: आवयोः (श्री-कृष्ण-अर्जुनयोः) इमम् धर्म्यम् (धर्मात् अनपेतम्) संवादम् यः अध्येष्यते (जप-रूपेण पठिष्यति), तेन पुंसा सर्व-यज्ञेभ्यः श्रेष्ठेन ज्ञान-यज्ञेन अहम् इष्टः स्याम् (भवेयम्) इति मे मतिः । यद्यपि असौ गीतार्थम् अ-बुद्ध्यमानः एव केवलम् जपति, तथापि मम 'तद्-शृण्वतः माम् एव असौ प्रकाशयति' इति बुद्धिः भवति । यथा लोके यद्-ऋच्छया अपि यदा कश्चिद् कदाचिद् कस्यचित् नाम गृह्णाति, तदा 'असौ माम् एव अयम् आह्वयति' इति मत्वा, तद्-पार्श्वम् आगच्छति, तथा अहम् अपि तस्य सन्निहितः भवेयम् । अतएव 'अजामिल'-'क्षत्रबन्धु'-प्रमुखाणाम् कथञ्चिद् नाम-उच्चारण-मात्रेण प्रसन्नः अस्मि, तथैव अस्य अपि प्रसन्नः भवेयम् इति अर्थः ॥१८.७०॥
अन्यस्य जपतः, यः अन्यः कश्चिद् शृणोति, तस्य अपि फलम् आह – 'श्रद्धावान्' इति –

18.71

श्रद्धावाननसूयश्च शृणुयादपि यो नरः ।
सो ऽपि मुक्तः शुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मणाम् ॥७१॥

यः श्रद्धावान् अनसूयः च नरः	that faithful and non-envious person who
शृणुयात् अपि,	will just hear,
सः अपि मुक्तः	even he, being liberated
पुण्य-कर्मणाम् शुभान् लोकान्	the higher planets of the pious
प्राप्नुयात् ।	he will attain

"And one who listens with faith and without envy becomes free from sinful reactions and attains to the auspicious planets where the pious dwell."

श्रद्धावान् **who has faith** ⟨1.1⟩ m. *śraddhāvat* (.*vat[u]*) – 'having *śraddhā* (faith)'; faithful
अनसूयः **who is not envious** ⟨1.1⟩ m. *an-asūya* – not envious
च **and** ⟨*avyaya*⟩
शृणुयात् **he can hear** ⟨*vidhi* 1.1⟩ √*śru*...श्रवणे – to hear, obey
अपि **also** ⟨*avyaya*⟩
यः **he who** ⟨1.1⟩ m. *kṛṣṇanāma yad* – (relative) who, which
नरः **a man** ⟨1.1⟩ m. *nara*
सः **he** ⟨1.1⟩ m. *kṛṣṇanāma tad* – (first person) he, that
अपि **also** ⟨*avyaya*⟩
मुक्तः **who is liberated** ⟨1.1⟩ m. *mukta* (√*muc[l]*...मोक्षणे – to release; + .*[k]ta*) – released
शुभान् **the auspicious** ⟨2.3⟩ m. *śubha* – auspicious
लोकान् **planets** ⟨2.3⟩ m. *loka* – place, world, people
प्राप्नुयात् **he can attain** ⟨*vidhi* 1.1⟩ *pra.*√*āp[l]* – to obtain
पुण्य-कर्मणाम् **of those whose activities are pious** ⟨6.3⟩ m. *puṇya-karman* (*-karmā*)...पुण्यम् कर्म यस्य, सः पुण्य-कर्मा – whose activity is pious

Subodhinī: यः नरः श्रद्धा-युक्तः केवलम् शृणुयात् अपि, श्रद्धावान् अपि कश्चिद् 'किमर्थम् अयम् उच्चैः जपति, अ-बद्धम् जपति वा ?' दोष-दृष्टिम् करोति । तद्-व्यावृत्ति-अर्थम् आह – अनसूयः च (असूया-रहितः) यः शृणुयात्, सः अपि सर्वैः पापैः मुक्तः सन्, अश्वमेधादि-पुण्य-कृतान् लोकान् प्राप्नुयात् ॥१८.७१॥
'सम्यक्-बोध-अनुत्पत्तौ पुनः उपदेक्ष्यामि !' इति आशयेन आह – 'कच्चिद्' इति –

18.72

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा ।
कच्चिदज्ञानसम्मोहः प्रणष्टस्ते धनञ्जय ॥७२॥

हे पार्थ !	O Arjuna!
कच्चिद्	is it that
त्वया एकाग्रेण चेतसा	by you with undivided attention
एतद् श्रुतम् ?	this has been heard?
हे धनञ्जय !	O Arjuna!
कच्चिद्	is it that
ते (तव) अज्ञान-सम्मोहः प्रणष्टः ?	your delusion due to ignorance is destroyed?

"O son of Pṛthā, O conqueror of wealth, have you heard this with an attentive mind? And are your ignorance and illusions now dispelled?"

कच्चिद् **is it that?** ⟨*avyaya*⟩
एतद् **this** ⟨1.1⟩ n. *kṛṣṇanāma etad* – (first person) he, this
श्रुतम् **being heard** ⟨1.1⟩ n. *śruta* (√*śru*...श्रवणे – to hear, obey; + .*[k]ta*) – heard
पार्थ **O Arjuna!** ⟨8.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
त्वया **by you** ⟨3.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
एकाग्रेण **with one-pointed** ⟨3.1⟩ n. *eka-_agra* – one-pointed
चेतसा **with attention** ⟨3.1⟩ n. *cetas* (*cetaḥ*) – consciousness, attention
कच्चिद् **is it that?** ⟨*avyaya*⟩
अज्ञान-सम्मोहः **delusion from ignorance** ⟨1.1⟩ m. *a-jñāna-sammoha*...अ-ज्ञानात् सम्मोहः इति अज्ञान-सम्मोहः
प्रणष्टः **being destroyed** ⟨1.1⟩ m. *pranaṣṭa* (*pra.*√*naś[a]* – to disappear, perish; + .*[k]ta*) – perished
ते **your** ⟨opt. for *tava* 6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you
धनञ्जय **O Arjuna!** ⟨8.1⟩ m. *dhanam-_jaya* – 'winner of riches'

Subodhinī: 'कच्चिद्' इति प्रश्नार्थे । अज्ञान-सम्मोहः तत्त्व-अज्ञान-कृतः विपर्ययः । स्पष्टम् अन्यत् ॥१८.७२॥
कृतार्थः सन् [अर्जुनः उवाच] – 'नष्टः' इति –

18.73

अर्जुन उवाच
नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत ।
स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ॥७३॥

अर्जुनः उवाच - हे अच्युत !	Arjuna said: O Kṛṣṇa!
त्वत्प्रसादात्	by Your mercy
मोहः नष्टः,	[my] delusion is distroyed,
मया स्मृतिः लब्धा,	I have regained memory,
गत-सन्देहः स्थितः अस्मि,	free from doubt I am standing,
तव वचनम् करिष्ये	I will carry out Your instruction

"Arjuna said: My dear Kṛṣṇa, O infallible one, my illusion is now gone. I have regained my memory by Your mercy. I am now firm and free from doubt and am prepared to act according to Your instructions."

अर्जुनः **Arjuna** ⟨1.1⟩ m. *arjuna* – white, 'who is pure in actions'
उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
नष्टः **destroyed** ⟨1.1⟩ m. *naṣṭa*
मोहः **delusion** ⟨1.1⟩ m. *moha*
स्मृतिः **memory** ⟨1.1⟩ f. *smṛti*
लब्धा **obtained** ⟨1.1⟩ f. *labdhā* (√*[ḍu]labh[aṣ]*...प्राप्तौ – to obtain; + .*[k]ta* + .*ā[p]*)
त्वत्प्रसादात् **by your mercy** ⟨5.1⟩ m. *tvad-_prasāda* – your mercy
मया **by me** ⟨3.1⟩ *kṛṣṇanāma asmad* – (last person) I
अच्युत **O Kṛṣṇa!** ⟨8.1⟩ m. *a-cyuta* – 'who is unfailing'
स्थितः **standing** ⟨1.1⟩ m. *sthita* (√*sthā*...स्थाने – to stand; + .*[k]ta*) – standing, staying
अस्मि **I am** ⟨*acyuta* 3.1⟩ √*as[a]*...भुवि – to be, exist
गत-हसन्देहः **who is free from doubt** ⟨1.1⟩ m. *gata-sandeha*...गतः सन्देहः यस्य, सः गत-सन्देहः – whose doubt has gone
करिष्ये **I will do** ⟨*kalki* 3.1⟩ √*[ḍu]kṛ[ñ]*...करणे – to do
वचनम् **speech** ⟨2.1⟩ n. *vacana*
तव **your** ⟨6.1⟩ *kṛṣṇanāma yuṣmad* – (middle person) you

Subodhinī: आत्म-विषयः मोहः नष्टः, यतः 'अयम् अहम् अस्मि' इति स्वरूप-अनुसन्धान-रूपा स्मृतिः त्वद्-प्रसादात् मया लब्धा । अतः स्थितः अस्मि, युद्धाय उपस्थितः अस्मि । गतः धर्म-विषयः सन्देहः यस्य, सः अहम् तव आज्ञाम् करिष्ये इति ॥१८.७३॥

तद् एवम् धृतराष्ट्रम् प्रति श्री-कृष्ण-अर्जुन-संवादम् कथयित्वा, प्रस्तुताम् कथाम् अनुसन्दधानः – 'इति' इति –

18.74

सञ्जय उवाच

इत्यहं वासुदेवस्य पार्थस्य च महात्मनः ।
संवादमिममश्रौषमद्भुतं रोमहर्षणम् ॥७४॥

सञ्जयः उवाच -	Sañjaya said:
वासुदेवस्य महात्मनः पार्थस्य च	of Śrī Kṛṣṇa and of the great soul Arjuna
इमम् अद्भुतम् रोम-हर्षणम् संवादम्	this wonderful and exciting conversation
इति अहम् अश्रौषम् ।	thus I heard

"Sañjaya said: Thus have I heard the conversation of two great souls, Kṛṣṇa and Arjuna. And so wonderful is that message that my hair is standing on end."

सञ्जयः **Sañjaya** ⟨1.1⟩ m. *sam._jaya* – 'conquest'
उवाच **he spoke** ⟨*adhokṣaja* 1.1⟩ √*vac[a]*...परिभाषणे – to speak
इति **thus** ⟨*avyaya*⟩
अहम् **I am** ⟨1.1⟩ *kṛṣnanāma asmad* – (last person) I
वासुदेवस्य **of Śrī Kṛṣṇa** ⟨6.1⟩ m. *vāsudeva* – 'son of Vasudeva'
पार्थस्य **of Arjuna** ⟨6.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
च **and** ⟨*avyaya*⟩
महात्मनः **of the 'great soul'** ⟨6.1⟩ m. *mahā-_ātman (-ātmā)*
संवादम् **the conversation** ⟨2.1⟩ m. *saṁvāda*
इमम् **this** ⟨2.1⟩ m. *kṛṣnanāma idam* – (first person) he, this
अश्रौषम् **I heard** ⟨*bhūteśa* 3.1⟩ √*śru*...श्रवणे – to hear, obey
अद्भुतम् **the wonderful** ⟨2.1⟩ m. *adbhuta*
रोम-हर्षणम् **due to which there is bristling of the hair** ⟨2.1⟩ m. *roma-harṣaṇa*...रोम्नाम् हर्षणम् यस्मात्, तद् रोम-हर्षणम्

Subodhinī: रोम-हर्षणम् (रोमाञ्च-करम्) संवादम् अश्रौषम् (श्रुतवान्) अहम् । स्पष्टम् अन्यत् ॥१८.७४॥
आत्मनः तद्-श्रवणे सम्भावनाम् आह – 'व्यास-प्रसादात्' इति –

18.75

व्यासप्रसादाच्छ्रुतवानेतद् गुह्यमहं परम् ।
योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयम् ॥७५॥

व्यास-प्रसादात्	by the mercy of Vyāsadeva
एतद् गुह्यम् परम् योगम्	this secret supreme *yoga*
योगेश्वरात् कृष्णात् स्वयम्	from the master of Yoga, Kṛṣṇa Himself
साक्षात् कथयतः	directly speaking
अहम् श्रुतवान् ।	I heard

"By the mercy of Vyāsa, I have heard these most confidential talks directly from the master of all mysticism, Kṛṣṇa, who was speaking personally to Arjuna."

व्यास-प्रसादात् **by the mercy of Vyāsa** ⟨5.1⟩ m. *vyāsa-prasāda*...व्यासस्य प्रसादः इति व्यास-प्रसादः – the mercy of Vyāsa
श्रुतवान् **I heard** ⟨1.1⟩ m. *śrutavat* (√*śru*...श्रवणे – to hear, obey; + *.[k]tavat[u]*) – 'one who heard'
एतद् **this** ⟨2.1⟩ n. *kṛṣṇanāma etad* – (first person) he, this
गुह्यम् **secret** ⟨2.1⟩ n. *guhya*
अहम् **I** ⟨1.1⟩ *kṛsnanāma asmad* – (last person) I
परम् **supreme** ⟨2.1⟩ n. *para* – beyond
योगम् **the *yoga*** ⟨2.1⟩ m. *yoga*
योगेश्वरात् **from the the master of mysticism** ⟨5.1⟩ m. *yoga-_īśvara*
कृष्णात् **from Śrī Kṛṣṇa** ⟨5.1⟩ m. *kṛṣṇa* – 'all-attractive' 'dark'
साक्षात् **directly** ⟨*avyaya*⟩
कथयतः **from one who is telling** ⟨5.1⟩ m. *kathayat* (√*katha*...वाक्यप्रबन्धे – to tell; + *.[ś]at[ṛ]*) – [while] telling
स्वयम् **himself** ⟨*avyaya*⟩

Subodhinī: भगवता व्यासेन दिव्यम् चक्षुः-श्रोत्रादि मह्यम् दत्तम् । अतः व्यासस्य प्रसादात् एतद् अहम् श्रुतवान् अस्मि । 'किम् तद् ?' इति अपेक्षायाम् आह – परम् योगम् । परत्वम् आविष्करोति – योगेश्वरात् श्री-कृष्णात् स्वयम् एव साक्षात् कथयतः श्रुतवान् इति ॥१८.७५॥

18.76

राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतम् ।
केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥७६॥

हे राजन् !	O King (Dhṛtarāṣṭra)!
केशवार्जुनयोः	of Śrī Kṛṣṇa and Arjuna
इमम् अद्भुतम् पुण्यम् संवादम्	this wonderful and holy conversation
संस्मृत्य संस्मृत्य च	[after] repeatedly remembering

मुहः मुहः हृष्यामि ।	I rejoice at every moment

"O King, as I repeatedly recall this wondrous and holy dialogue between Kṛṣṇa and Arjuna, I take pleasure, being thrilled at every moment."

राजन् **O King!** ⟨8.1⟩ m. *rājan (rājā)* – king
संस्मृत्य संस्मृत्य **[after] repeatedly remembering** ⟨*avyaya*⟩ *sam.√smṛ* – to remember; + *.ya[p]*
संवादम् **the conversation** ⟨2.1⟩ m. *saṁvāda*
इमम् **this** ⟨2.1⟩ m. *kṛṣṇanāma idam* – (first person) he, this
अद्भुतम् **wonderful** ⟨2.1⟩ m. *adbhuta (.[k]ta)*
केशवार्जुनयोः **of Śrī Kṛṣṇa and Arjuna** ⟨6.2⟩ m. *keśava-_arjuna*...केशवः च अर्जुनः च इति केशवार्जुनौ – Keśava and Arjuna
पुण्यम् **holy** ⟨2.1⟩ m. *puṇya*
हृष्यामि **I rejoice** ⟨*acyuta* 3.1⟩ *√hṛṣ[a]*...तुष्टौ – to rejoice
च **and** ⟨*avyaya*⟩
मुहः मुहः **every moment** ⟨*avyaya*⟩ *muhur (muhuḥ)*
मुहः – suddenly, at once; for a moment, awhile; at every moment, constantly; *muhur muhuḥ* – now and again, again and again; (derived:) *muhūrta* – a moment, any short time; a period of forty-eight minutes, as in *brāhma-muhūrta* (the second *muhūrta* before sunrise; dawn)

Subodhinī: हृष्यामि रोमाञ्चितः भवामि, हर्षम् प्राप्नोमि इति वा । स्पष्टम् अन्यत् ॥१८.७६॥

18.77

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः ।
विस्मयो मे महान्राजन्हृष्यामि च पुनः पुनः ॥७७॥

हे राजन् !	O King (Dhṛtarāṣṭra)!
हरेः अत्यद्भुतम् तद् रूपम् च	and that most wonderful form of Śrī Kṛṣṇa
संस्मृत्य संस्मृत्य	[after] repeatedly remembering
मे (मम) महान् विस्मयः,	my wonder is great,
पुनः पुनः हृष्यामि च ।	and I rejoice again and again

"O King, as I remember the wonderful form of Lord Kṛṣṇa, I am struck with wonder more and more, and I rejoice again and again."

तद् **that** ⟨2.1⟩ n. *kṛṣṇanāma tad* – (first person) he, that
च **and** ⟨*avyaya*⟩
संस्मृत्य संस्मृत्य **[after] repeatedly remembering** ⟨*avyaya*⟩ *sam.√smṛ* – to remember; + *.ya[p]*
रूपम् **the form** ⟨2.1⟩ n. *rūpa*

अत्यद्भुतम् **very wonderful** ⟨2.1⟩ n. *atyadbhuta*
हरेः **of Śrī Kṛṣṇa** ⟨6.1⟩ m. *hari* – 'who takes away', i.e. who removes all suffering of His devotees and steals their hearts
विस्मयः **wonder** ⟨1.1⟩ m. *vismaya* – surprise
मे **my** ⟨opt. for *mama* 6.1⟩ *kṛṣṇanāma asmad* – (last person) I
महान् **great** ⟨1.1⟩ m. *mahat[u]*
राजन् **O King!** ⟨8.1⟩ m. *rājan (rājā)* – king
हृष्यामि **I rejoice** ⟨*acyuta* 3.1⟩ *√hṛṣ[a]*...तुष्टौ – to rejoice
पुनः पुनः **again and again** ⟨*avyaya*⟩ *(punar)*

Subodhinī: 'तद्' इति विश्व-रूपम् निर्दिशति । स्पष्टम् अन्यत् ॥१८.७७॥
अतः त्वम् पुत्राणाम् राज्यादि-शङ्काम् परित्यज ! इति आशयेन आह – 'यत्र' इति –

18.78

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥७८॥

यत्र योगेश्वरः कृष्णः,	where there is the master of Yoga Śrī Kṛṣṇa,
यत्र धनुर्धरः पार्थः,	where there is the bowman Arjuna,
तत्र ध्रुवा श्रीः	there is certain fortune
विजयः भूतिः नीतिः	victory, opulence and morality
मम मतिः ।	this is my conviction

"Wherever there is Kṛṣṇa, the master of all mystics, and wherever there is Arjuna, the supreme archer, there will also certainly be opulence, victory, extraordinary power, and morality. That is my opinion."

यत्र **where** ⟨*avyaya*⟩
योगेश्वरः **the master of mysticism** ⟨1.1⟩ m. *yoga-_īśvara*
कृष्णः **Śrī Kṛṣṇa** ⟨1.1⟩ m. *kṛṣṇa* – 'all-attractive', 'dark'
यत्र **where** ⟨*avyaya*⟩
पार्थः **Arjuna** ⟨1.1⟩ m. *pārtha* – 'son of Pṛthā (Kuntī)'
धनुर्धरः **the archer** ⟨1.1⟩ m. *dhanuḥ-_dhara* – 'who holds a bow'
तत्र **there** ⟨*avyaya*⟩
श्रीः **fortune** ⟨1.1⟩ f. *śrī* – beauty, prosperity
विजयः **victory** ⟨1.1⟩ m. *vijaya*
भूतिः **opulence** ⟨1.1⟩ f. *bhūti*

ध्रुवा — **certain** ⟨1.1⟩ f. *dhruvā* (*.ā[p]*) – fixed, firm, unchanging, constant; lasting, permanent; certain, sure

नीतिः — **morality** ⟨1.1⟩ f. *nīti* – conduct

मतिः — **opinion** ⟨1.1⟩ f. *mati* – opinion, conviction

मम — **my** ⟨6.1⟩ *kṛṣṇanāma asmad* – (last person) I

Subodhinī: यत्र (येषाम् पाण्डवानाम् पक्षे) योगेश्वरः श्री-कृष्णः वर्तते, यत्र च पार्थः गाण्डीव-धनुः-धरः, तत्र एव श्रीः (राज्य-लक्ष्मीः), तत्र एव च विजयः, तत्र एव च भूतिः उत्तरोत्तर-अभिवृद्धिः च, तत्र एव नीतिः (नयः) अपि, 'ध्रुवा' (निश्चिता) इति सर्वत्र सम्बद्ध्यते इति मम मतिः (निश्चयः)। अतः इदानीम् अपि तावत् स-पुत्रः त्वम् श्री-कृष्णम् शरणम् उपेत्य, पाण्डवान् प्रसाद्य, सर्वस्वम् च तेभ्यः निवेद्य, पुत्र-प्राण-रक्षणम् कुरु इति भावः ॥१८.७८॥

ओं तत्सदिति
श्रीमहाभारते शतसाहस्त्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि
श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे मोक्षसन्न्यासयोगो नामाष्टादशोऽध्यायः ॥१८॥

"Sūta Gosvāmī said: 'O *brāhmaṇa* Śaunaka, while King Yudhiṣṭhira was observing the inauspicious signs on the earth at that time, Arjuna came back from the city of the Yadus (Dvārakā). When Arjuna bowed at his feet, the King saw that his dejection was unprecedented. His head was down, and tears glided from his lotus eyes. Seeing Arjuna pale due to heartfelt anxieties, the King, remembering the indications of the sage Nārada, questioned him in the midst of friends.'

"Mahārāja Yudhiṣṭhira said: 'My dear brother, please tell me whether our friends and relatives, such as Madhu, Bhoja, Daśārha, Ārha, Sātvata, Andhaka and the members of the Yadu family are all passing their days in happiness. . . . Or is it that you are feeling empty for all time because you might have lost your most intimate friend, Lord Kṛṣṇa? O my brother Arjuna, I can think of no other reason for your becoming so dejected.'

"Sūta Gosvāmī said: 'Arjuna, the celebrated friend of Lord Kṛṣṇa, was already grief-stricken because of his strong feeling of separation from Kṛṣṇa, and became even more so due to all Mahārāja Yudhiṣṭhira's speculative inquiries. Due to grief, Arjuna's mouth and lotuslike heart had dried up. Therefore his body lost all luster. Now, remembering the Supreme Lord, he could hardly utter a word in reply. With great difficulty he checked the tears of grief that smeared his eyes. He was very distressed because Lord Kṛṣṇa was out of his sight, and he increasingly felt affection for Him. Remembering Lord Kṛṣṇa and His well-wishes, benefactions, intimate familial relations and His chariot driving, Arjuna, overwhelmed and breathing very heavily, began to speak.'

"Arjuna said: 'O King! The Supreme Personality of Godhead Hari, who treated me exactly like an intimate friend, has left me alone. Thus my astounding power, which astonished even the demigods, is no longer with me. I have just lost Him whose separation for a moment would render all the universes unfavorable and void, like bodies without life. . . . O King! His jokings and frank talks were pleasing and beautifully decorated with smiles. His addresses unto me as 'O son of Pṛthā, O friend, O son of the Kuru dynasty,' and all such heartiness are now remembered by me, and thus I am overwhelmed. Generally both of us used to live together and sleep, sit and loiter together. And at the time of advertising oneself for acts of chivalry, sometimes, if there were any irregularity, I used to reproach Him by saying, 'My friend, You are very truthful.' Even in those hours when His value was minimized, He, being the Supreme Soul, used to tolerate all those utterings of mine, excusing me exactly as a true friend excuses his true friend, or a father excuses his son. . . . Now I am attracted to those instructions [the Bhagavad-gītā] imparted to me by Govinda, because they relieve the burning heart in all circumstances of time and space.'

"Sūta Gosvāmī said: 'Thus being deeply absorbed in thinking of the instructions of the Lord, which were imparted in the great intimacy of friendship, and in thinking of His lotus feet, Arjuna's mind became pacified and free from all material contamination. Arjuna's constant remembrance of the lotus feet of Lord Śrī Kṛṣṇa rapidly increased his devotion, and as a result all the trash in his thoughts subsided. Because of the Lord's pastimes and activities and because of His absence, it appeared that Arjuna forgot the instructions left by the Personality of Godhead. But factually this was not the case, and again he became Lord of his senses."

(*Śrīmad-Bhāgavatam*, 1.14.22 - 1.15.30)

Gītā-māhātmyam

(The Greatness Of The Gītā)

This *Gītā-māhātmyam* is found in the *Vaiṣṇavīya-tantra-sāra*, and to be recited after reading *Bhagavad-gītā*. It contains also verses from the *Gītā-māhātmyam* of *Varāha-Purāṇa*, where Dharā, the personified Earth, asks Lord Viṣṇu, "O Lord! How may unflinching devotion arise in someone afflicted by bad *karma*?" – "If he studies the Gītā, no sin can stain him, as water can not stain a lotus leaf. . .")

ऋषिरुवाच
गीतायाश्चैव माहात्म्यं यथावत्सूत मे वद ।
पुरा नारायणक्षेत्रे व्यासेन मुनिनोदितम् ॥१॥

The sage said: "O Sūta, please kindly tell me the glory of the Gītā, as it was spoken long before at Nārāyaṇa-kṣetra by the great sage Vyāsadeva."

सूत उवाच
भद्रं भगवता: पृष्टं यद्धि गुप्ततमं परम् ।
शक्यते केन तद्वक्तुं गीतामाहात्म्यमुत्तमम् ॥२॥
कृष्णो जानाति वै सम्यक् किञ्चित्कुन्तीसूतः फलम् ।
व्यासो वा व्यासपुत्रो वा याज्ञवल्क्यो ऽथ मैथिलः ॥३॥
अन्ये श्रवणतः श्रुत्वा लेशं सङ्कीर्तयन्ति च ।
तस्मात्किञ्चिद्वदाम्यत्र व्यासस्यास्यान्मया श्रुतम् ॥४॥

Sūta Gosvāmī said: "O venerable one, you have certainly asked the most glorious question. Verily, who can describe the supreme glory of the Gītā, the most hidden of all treasures? Certainly Lord Kṛṣṇa is in full knowledge of that glory; Arjuna, the son of Kuntī, knows something of its fruit; and Vyāsadeva, Śukadeva, Yājñavalkya, and the saintly King Janaka – they are all somewhat conversant with it as well. Others who have heard from one another about it are engaged in singing the praises of a tiny fraction of its greatness. Therefore I shall speak whatever I heard from the mouth of Vyāsa."

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥५॥
सारथ्यमर्जुनस्यादौ कुर्वन्गीतामृतं ददौ ।
लोकत्रयोपकाराय तस्मै कृष्णात्मने नमः ॥६॥

"The *Upaniṣads* are like a cow; the milkman is the cowherd Kṛṣṇa; the calf is Arjuna; a wise man is the enjoyer; and the milk is the nectar of the Gītā. To begin with, I offer my obeisances unto Lord Śrī Kṛṣṇa, wo accepted the position of the chariot driver of Arjuna, just to distribute this ambrosia of the Gītā for the benefit of all the three worlds."

संसारसागरं घोरं तर्तुमिच्छति यो नरः ।
गीतानावं समासाद्य पारं याति सुखेन सः ॥७॥
गीताज्ञानं श्रुतं नैव सदैवाभ्यासयोगतः ।
मोक्षमिच्छति मूढात्मा याति बालकहास्यताम् ॥८॥
ये शृण्वन्ति पठन्त्येव गीताशास्त्रमहर्निशम् ।
न ते वै मानुषा ज्ञेया देवरूपा न संशयः ॥९॥

"That man who wants to cross over the ghastly ocean of material suffering can do so very easily by taking shelter of the boat of the *Bhagavad-gītā*. That fool who wants to attain liberation by constant *yoga* practice without hearing the wisdom of the Gītā, becomes a laughing stock for children. Those who day and night hear and recite the Gītā are never to be taken as mere human beings. Without a doubt they are *devas*."

गीताज्ञानेन सम्बोधं कृष्णः प्राहार्जुनाय वै ।
भक्तितत्त्वं परं तत्र सगुणं चाथ निर्गुणम् ॥१०॥
सोपानाष्टादशैरेवं भुक्तिमुक्तिसमुच्छृतैः ।
क्रमशश्चित्तशुद्धिः स्यात्प्रेमभक्त्यादिकर्मसु ॥११॥
साधोर्गीताम्भसि स्नानं संसारमलनाशनम् ।
श्रद्धाहीनस्य तत्कार्यं हस्तिस्नानं वृथैव तत् ॥१२॥

"In order to enlighten Arjuna by the knowledge of the Gītā, Lord Kṛṣṇa has sung the praises of the supreme principle of devotion, both *saguṇa* and *nirguṇa*. In this way, by this ladder of eighteen chapters, which refutes *bhukti* and *mukti*, gradually the heart is purified in the practice of *prema-bhakti*. Bathing in the water of the Gītā, the devotee is cleansed from material contamination. But such an attempt by a faithless person is utterly useless, just like the elephant's bathing (who again throws dust on his body)."

. . .

यो ऽधीते विष्णुपर्वाहे गीतां श्रीहरिवासरे ।
स्वपञ्जाग्रंश्चलंस्तिष्ठन् शत्रुभिर्न स हीयते ॥२०॥
शालग्रामशिलायां वा देवागारे शिवालये ।
तीर्थे नद्यां पठेद्गीतां सौभाग्यं लभते ध्रुवम् ॥२१॥
देवकीनन्दनः कृष्णो गीतापठेन तुष्यति ।
यथा न वेदैर्दानेन यज्ञतीर्थव्रतादिभिः ॥२२॥
गीताधीता च येनापि भक्तिभावेन चेतसा ।
वेदशास्त्रपुराणानि तेनाधीतानि सर्वशः ॥२३॥

"A person who studies the Gītā at the time of holy festival days, especially on *ekādaśī*, such a person, whether sleeping or awake, moving or still, is never defeated by enemies. One who recites the Gītā in front of a *śālagrāma-śilā*, in a temple of Viṣṇu or Śiva, at a holy place, or on a river bank – such a person obtains permanent good fortune. The son of Devakī, the Supreme Lord Śrī Kṛṣṇa, cannot be satisfied by anyone's study of the *Vedas*, charity, sacrifice, pilgrimage, or vows, as much as He is satisfied by the devotional recitation of the Gītā. The study of the *Vedas* and *Purāṇas* is completed in all respects by one who studies the Gītā with devotion."

योगस्थाने सिद्धपीठे शिलाग्रे सत्सभासु च ।
यज्ञे च विष्णुभक्ताग्रे पठन्सिद्धिं परां लभेत् ॥२४॥
गीतापाठं च श्रवणं यः करोति दिने दिने ।
क्रतवो वाजिमेधाद्याः कृतास्तेन सदक्षिणाः ॥२५॥
यः शृणोति च गीतार्थं कीर्तयत्येव यः परम् ।
श्रावयेच्च परार्थं वै स प्रयाति परं पदम् ॥२६॥

"The highest perfection of life is attained by one who recites the Gītā at Siddha-pīṭha, an exalted holy place, before the *śālagrāma-śilā*, in the assembly of *sādhus*, during the performance of a sacrifice, and especially in the association of devotees. Great sacrifices such as the *aśvamedha*, along with their remunerations have been performed by one who daily hears and recites the Gītā.

One who attentively hears and sings the glories of the purport of the Gītā, or speaks that purport to others – such a person attains the supreme destination."

गीतायाः पुस्तकं शुद्धं यो ऽर्पयत्येव सादरात् ।
विधिना भक्तिभावेन तस्य भार्या प्रिया भवेत् ॥२७॥
यशः सौभाग्यमारोग्यं लभते नात्र संशयः ।
दयितानां प्रियो भूत्वा परमं सुखमश्नुते ॥२८॥
अभिचारोद्भवं दुःखं वरशापागतं च यत् ।
नोपसर्पति तत्रैव यत्र गीतार्चनं गृहे ॥२९॥
तापत्रयोद्भवा पीडा नैव व्याधिर्भवेत्क्वचित् ।
न शापो नैव पापं च दुर्गतिर्नरकं न च ॥३०॥
विष्फोटकादयो देहे न बाधन्ते कदाचन ।
लभेत्कृष्णपदे दास्यां भक्तिं चाव्यभिचारिणीम् ॥३१॥

"One who, with respect and devotion, and according to scriptural regulations makes a gift of the holy Gītā – such a person will have a devoted wife, and without a doubt will attain fame, fortune, and good health. Furthermore, he becomes extremely beloved by those near and dear to him, and enjoys great happiness. The misery caused by a curse or black rites can never enter into that house where the Gītā is worshipped. In that house there is never any suffering from the threefold miseries, nor is there ever fear of any type of sickness, curse, sin, misfortune, or hell. In that house, no one is ever born with an infected or deformed body, and those residing there achieve exclusive and continuous devotion in the mood of servitorship to the lotus feet of Lord Kṛṣṇa."

जायते सततं सख्यं सर्वजीवगणैः सह ।
प्रारब्धं भुञ्जतो वापि गीताभ्यासरतस्य च ॥३२॥
स मुक्तः स सुखी लोके कर्मणा नोपलिप्यते ।
महापापातिपापानि गीताध्यायी करोति चेत् ।
न किञ्चित्स्पृश्यते तस्य नलिनीदलमम्भसा ॥३३॥

"A person who is devoted to studying the Gītā acquires a friendly disposition to all living beings, despite his accruing the reactions of his previous actions in this world. That person is liberated and happy. Although acting in this world, he is not implicated. Even if by chance a person who studies the Gītā happens to commit extremely horrible sins, he cannot be in the least affected by that, just as a lotus leaf is not touched by the water."

अनाचारोद्भवं पापमवाच्यादिकृतं च यत् ।
अभक्ष्यभक्षजं दोषमस्पृश्यस्पर्शजं तथा ॥३४॥
ज्ञानाज्ञानकृतं नित्यमिन्द्रियैर्जनितं च यत् ।
तत्सर्वं नाशमायाति गीतापाठेन तत्क्षणात् ॥३५॥
सर्वत्र प्रतिभोक्ता च प्रतिगृह्य च सर्वशः ।
गीतापाठं प्रकुर्वाणो न लिप्यते कदाचन ॥३६॥
रत्नपूर्णां महीं सर्वां प्रतिगृह्याविधानतः ।
गीतापाठेन चैकेन शुद्धस्फटिकवत् सदा ॥३७॥

"Sin arising from offensive behavior or speech, the offense of eating forbidden things, and sinful activities incited by the senses and committed knowingly or unknowingly in daily routine activities – all kinds of sins are at once eradicated by devotional recitation of the Gītā. Although he may accept foodstuffs at all places or charity in all circumstances, the devoted reciter of the Gītā is distinguished in that he remains totally unimplicated by these actions at all times. Even one who, against the injunctions of the scriptures, accepts in charity as many precious jewels as would cover the entire surface of the Earth and oceans – such a person becomes as spotless pure as crystal simply by devotionally reciting the Gītā only once."

यस्यान्तःकरणं नित्यं गीतायां रमते सदा ।
स साग्निकः सदा जापी क्रियावान्स च पण्डितः ॥३८॥
दर्शनीयः स धनवान्स योगी ज्ञानवानपि ।
स एव याज्ञिको याजी सर्ववेदार्थदर्शकः ॥३९॥

"A person whose heart is always absorbed in the Gītā is certainly to be taken as superbly replete in the performance of sacrifices and the constant repetition of the holy names or *mantras* (*japa*). All his actions are properly adjusted, and he is truly learned. Certainly he is fit to be seen, he is truly wealthy, he is a *yogī*, and a genuine scholar. He is a knower of sacrifice, a performer of sacrifice, and a knower of all the *Vedas*."

गीतायाः पुस्तकं यत्र नित्यपाठश्च वर्तते ।
तत्र सर्वाणि तीर्थानि प्रयागादीनि भूतले ॥४०॥
निवसन्ति सदा देहे देहशेषे ऽपि सर्वदा ।
सर्वे देवाश्च ऋषयो योगिनो देहरक्षकाः ॥४१॥
गोपालबालकृष्णो ऽपि नारदध्रुवपार्षदैः ।
सहायो जायते शीघ्रं यत्र गीता प्रवर्तते ॥४२॥
यत्र गीताविचारश्च पठनं पाठनं तथा ।
मोदते तत्र श्रीकृष्णः भगवान् राधया सह ॥४३॥

"All the places of pilgrimage like Prayāga are eternally present wherever the Gītā is present and where its reading is performed. The protectors of the body, in the form of *devas*, *ṛṣis* or *yogīs*, all reside within the body of one who constantly studies the Gītā, and they are even present at the demise of his body. Accompanied by His associates such as Nārada and Dhruva, the cowherd boy Lord Śrī Kṛṣṇa personally appears as a guardian wherever the Gītā is present. With supreme ecstasy, the supreme Lord Kṛṣṇa and His divine consort Śrīmatī Rādhārāṇī are graciously present wherever the conception of the Gītā is discussed, studied and taught."

श्रीभगवानुवाच
गीता मे हृदयं पार्थ गीता मे सारमुत्तमम् ।
गीता मे ज्ञानमत्युग्रं गीता मे ज्ञानमव्ययम् ॥४४॥
गीता मे चोत्तमं स्थानं गीता मे परमं पदम् ।
गीता मे परमं गुह्यं गीता मे परमो गुरुः ॥४५॥
गीताश्रये ऽहं तिष्ठामि गीता मे परमं गृहम् ।
गीताज्ञानं समाश्रित्य त्रिलोकीं पालयाम्यहम् ॥४६॥
गीता मे परमा विद्या ब्रह्मरूपा न संशयः ।
अर्धमात्रा परा नित्यमनिर्वाच्यपदात्मिका ॥४७॥

The Supreme Lord said: "O Pārtha, the Gītā is My heart, My supreme essence, and the Gītā is intense, imperishable knowledge of Me. The Gītā is My supreme shelter, supreme abode, most hidden secret and My supreme *guru*. I am present within the Gītā, My supreme residence. Only by the knowledge of the Gītā do I maintain the three worlds. Gītā is My supreme science, it is verily the form of *brahma*. It is the supreme half-syllable (the dot on the ॐ), My very Self."

गीतानामानि वक्ष्यामि गुह्यानि शृणु पाण्डव ।
कीर्तनात्सर्वपापानि विलयं यान्ति तत्क्षणात् ॥४८॥
गङ्गा गीता च सावित्री सीता सत्या पतिव्रता ।
ब्रह्मावलिर्ब्रह्मविद्या त्रिसन्ध्या मुक्तगेहिनी ॥४९॥
अर्धमात्रा चिदानन्दा भवघ्नी भ्रान्तिनाशिनी ।
वेदत्रयी परानन्दा तत्त्वार्थज्ञानमञ्जरी ॥५०॥
इत्येतानि जपेन्नित्यं नरो निश्चलमानसः ।
ज्ञानसिद्धिं लभेन्नित्यं तथान्ते परमं पदम् ॥५१॥

"O Pāṇḍava, I shall now speak those confidential holy names of the Gītā by singing which all sins are immediately destroyed. Please listen: 'Gaṅgā, Gītā, Sāvitrī, Sītā, Satyā, Pativratā, Brahmāvalī, Brahmavidyā, Trisandhyā, Muktagehinī, Ardhamātrā, Cidānandā, Bhavaghnī, Bhrāntināśinī, Vedatrayī, Parānandā, Tattvārtha-jñāna-mañjarī.' A person who, with a steady mind, continuously utters these confidential holy names, achieves the perfection of divine knowledge, and in the end he reaches the supreme destination."

पाठे ऽसमर्थः सम्पूर्णे तदर्धं पाठमाचरेत् ।
तदा गोदानजं पुण्यं लभते नात्र संशयः ॥५२॥
त्रिभागं पठमानस्तु सोमयागफलं लभेत् ।
षडंशं जपमानस्तु गङ्गास्नानफलं लभेत् ॥५३॥
तथाध्यायद्वयं नित्यं पठमानो निरन्तरम् ।
इन्द्रलोकमवाप्नोति कल्पमेकं वसेद् ध्रुवम् ॥५४॥

"One should recite at least half the Gītā if he is unable to recite the entire text at one time. Then without a doubt, one achieves the piety which is accrued from donating cows. One will achieve the fruit of the Soma sacrifice by reciting one-third of the Gītā, and the result of bathing in the holy river Gaṅgā is achieved by uttering one-sixth of it. One who regularly recites two of its chapters with full conviction, will without a doubt attain to residence in the planet of Lord Indra for one *kalpa*."

एकमध्यायकं नित्यं पठते भक्तिसंयुतः ।
रुद्रलोकमवाप्नोति गणो भूत्वा वसेच्चिरम् ॥५५॥
अध्यायार्धं च पादं वा नित्यं यः पठते जनः ।
प्राप्नोति रविलोकं स मन्वन्तरसमाः शतम् ॥५६॥
गीतायाः श्लोकदशकं सप्त पञ्च चतुष्टयम् ।
त्रिद्व्येकमेकमर्धं वा श्लोकानां यः पठेन्नरः ।
चन्द्रलोकमवाप्नोति वर्षाणामयुतं तथा ॥५७॥

